CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द. नं. १६६४१

अथ रामगीता सटीका प्रारभ्यते ॥

मू० ५।-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ रामंरत्नकिरीटकुण्डलयुतं केयूरहारान्वितं
सीतालङ्कृतवामभागममलं सिंहासनस्थं विभुम् ॥ सुग्रीवादि
कपीश्वरैःसुरवरैः संसेव्यमानं सदा विश्वामित्रपराशरादिमुनि-
भिः संस्तूयमानं भजे ॥ १ ॥ इतिध्यात्वा ॥ श्रीमहादेवउवाच ॥

Central Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

 श्रीगणेशायनमः ॥ ध्यायेत्वाजानुबाहुं धृतशरधनुषं वद्धपद्मासनस्थं पीतंवासोवसानं नवकमलदलस्पर्द्धिनेत्रं प्रसन्नम् ॥ वामाङ्कारूढ
सीतामुखकमलमिलल्लोचनं नीरदाभं नाना लङ्कारदीप्तं दधतमुरुजटामण्डलं रामचन्द्रम् ॥ १ ॥ ततइति जगतां यानि मङ्गलानि
 आनन्दास्तेषामुपजीव्यभुतं मङ्गलं ब्रह्मानन्दः सएवात्मास्वरूपं तेन तस्यैवानन्दस्यान्यानि भूतानिमात्रामुपजीवन्तीति श्रुतेः मङ्ग

ततोजगन्मङ्गलमङ्गलात्मना विधाय रामायणकीर्तिमुत्तमाम्॥
चचार पूर्वाचरितं रघूत्तमो राजर्षिवर्य्यैरभिसेवितं यथा ॥ १ ॥

लानाञ्चमङ्गलमिति स्मृतेश्च किंच जगतां मङ्गलं कल्याणं यस्मात्तादृशकल्याणरूपआत्मामूर्तिस्तया उत्तमांश्रोत्रादीनां मोक्षदत्वेना त्युत्तमां रामायणकीर्तिं वाल्मीक्यादि कृत नानाविध रामायण प्रवर्तिकां रावणवधादिजां कीर्तिंविधाय स्थितोरघूत्तमः ततः सीताप रित्यागानन्तरं पूर्वैः स्ववंशजैराचारितं प्रजापालनसत्कथाश्रवणादिकं केवलंतत्पूर्वजैरेवाचरितमितिन किंत्वन्यैरपि राजर्षिश्रेष्ठैर्य थाऽभिसेवितं तथाचचार कृतवान् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदारागुरुदेवविश्वासलक्षणमहागुणवती यद्वा उदारा दानशीलाबुद्धिर्यस्य तेन पुरातनीः प्राचीनराजसम्बन्धिनीः शुभाः धर्माधर्मनिर्णेत्रीः प्रमत्तस्य स्वगोमण्डलमिश्रितब्राह्मणगोदानात् प्रमत्तस्य नृगस्य राज्ञो द्विजस्य शापात्तिर्यक्त्वमाह तेनाज्ञातकृतब्रह्मस्वापहारेण परमधा

सौमित्रिणापृष्ट उदारबुद्धिना रामःकथाःप्राह पुरातनीःशुभाः ॥
राज्ञः प्रमत्तस्य नृगस्य शापतो द्विजस्य तिर्यक्त्वमथाह राघवः
॥ २ ॥

र्मिकस्यापीदृश्यवस्थेति सर्वथाब्रह्मस्वविमुखताधर्मइतिसूचितम् ॥ १ ॥

CC-0. In Public Domain. Digitization by eGangotri

एकान्तेविजने उपस्थितंप्राप्तम् विनयान्वितः सन् भक्त्यागुरुरयमिति बुद्ध्या प्रणम्य अनेनगुरूपसदनप्रकारउक्तः आसादितंशुद्धंभाव

कदाचिदेकान्त उपस्थितंप्रभुं रामं रमालालितपादपङ्कजम् ॥
सौमित्रिरासादितशुद्धभावनः प्रणम्यभक्त्याविनयान्वितोऽब्र-
वीत् ॥ ३ ॥

नं भावनाकरणमन्तः करणंयेनसः शुद्धान्तःकरणइतियावत् भगवदुक्तसत्कथाश्रवणेन शुद्धान्तःकरणइत्यर्थः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हे महामते महतीसर्वविषयामतिर्यस्य तस्य संबोधनं त्वं शुद्धबोधोऽसि अनवच्छिन्नचैतन्यरूपोऽसि सर्वदेहिनामात्माऽसि जीवानांतत् प्रतिविम्बत्वात् अधीशोऽसि अन्तर्यामित्वान्नियन्ताऽसि वास्तवभेदाभावाच्च सर्वात्मत्वम् औपाधिकभेदाच्च नियन्तृनियम्यभावोबोध्यः निराकृतिः अस्मदादिवत्स्वार्जितकर्माधीनशरीराकृतिरहितः नन्वेवंसर्वैः कथमेवंनज्ञायतेऽतआह ज्ञानदृशां स्वयमेवप्रतीयसे ज्ञायतेऽ

त्वं शुद्धबोधोऽसि हि सर्वदेहिनामात्माऽस्यधीशोऽसि निरा-
कृतिःस्वयम् ॥ प्रतीयसे ज्ञानदृशां महामते पादाब्जभृङ्गाहितस
ङ्गसाङ्गिनाम् ॥ ४ ॥

नेनेतिज्ञानं वेदान्तवाक्यजातं तदेवदृक्दर्शनसाधनंयेषां तेषामितिसंबन्धसामान्येषष्ठी तैरित्यर्थः तादृशदृक्लाभश्च त्वद्भक्त्यधीनइत्याह पादेति त्वच्चरणकमलयोर्भृङ्गवदाहितःकृतः सङ्गोयेन तादृशान्तः करणसङ्गवतां त्वच्चरणकमल सलग्नान्तः करणवतामित्यर्थः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ प्रार्थयते अहमिति भवस्य संसारस्यापवर्गो निवृत्तिर्यस्मात्तादृशं तव पादाम्बुजं प्रपन्नोऽस्मि शरणं प्राप्तोऽस्मि योगिभावितं योगिभिः संसारमुक्तये भावितम् अनेन तस्य भवापवर्गत्वे सदाचारः प्रमाणमुक्तम् प्रार्थनीयमाह अपारवारिधिरूपं यदज्ञानं संसारमूलकारणं यथासुखम

अहं प्रपन्नोऽस्मि पदाम्बुजं प्रभो भवापवर्गं तव योगिभावितम् ॥ यथाञ्जसाज्ञानमपारवारिधिं सुखं तरिष्यामि तथाऽनुशाधि माम् ॥ ५ ॥

क्लेशेन तरिष्यामि तथा मामनुशाधि शिक्षय अपारवारिधिमित्यनेन सपारप्रसिद्धसमुद्राद्व्यतिरेक उक्तः अशक्यतरणताऽनेन ध्वनिता ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथोत्तरमवतारयति श्रुत्वेति रामः सौमित्रिवचः श्रुत्वा अथशब्दोवाक्यालङ्कारे तदा श्रवणाव्यवहितकाले एवप्रपन्नानां भक्तानामार्ति संसारदुःखंहरतितादृशः प्रपन्नाश्रमादिहीना भक्तानुग्रहपरा च धीर्यस्यसः क्षितिपालानां राज्ञां भूषणभूतोज्ञानरूपतमसउपशान्तये त

श्रुत्वाथ सौमित्रिवचोऽखिलं तदाप्राह प्रपन्नार्तिहरःप्रसन्नधीः ॥
विज्ञानमज्ञानतमोपशान्तये श्रुतिप्रपन्नं क्षितिपालभूषणः॥ ६॥

दर्थम् सन्धिरार्षः श्रुतिभिः तमेवविदित्वाऽतिमृत्युमेतीत्यादिश्रुतिभिः प्रपन्नं तत्फलकत्वेन बोधितं विज्ञानमात्मतत्वज्ञानामिति सामान्य तः प्रथमंप्राह ॥ ६ ॥

Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

अथतादृशज्ञानप्राप्त्यै क्रमेणबहिरङ्गान्तरङ्गसाधनान्याह आदाविति स्ववर्णाश्रमेषु शास्त्रेण वर्णिता याः क्रियानित्यनैमित्तकयज्ञदाना दिरूपास्ताः कृत्वा समासादितशुद्धमानसः प्राप्तान्तःकरणशुद्धिः तत्पूर्वमुपात्तसाधनः तदनुष्ठानपूर्वकमेवउपात्तानिसाधनानि शम दमादीनियेन तादृशः अनेनकर्मणां बहिरङ्गत्वं शमादीनामन्तरङ्गत्वं स्फुटमेवोक्तम् किंच शमदमवैराग्यदार्ढ्यपर्यन्तं कर्मानुष्ठानमेवेति

आदौ स्ववर्णाश्रमवर्णिताःक्रियाः कृत्वा समासादितशुद्धमानसः
समाप्य तत्पूर्वमुपात्तसाधनः समाश्रयेत्सद्गुरुमात्मलब्धये॥ ७॥

सूचितम् ततस्तत्कर्मानुष्ठानं समाप्य त्यक्त्वा संन्यस्येतियावत् आत्मलब्धये आत्मज्ञानाय तत्फलकाय तत्वमस्यादिवाक्यार्थविचारा-
य सद्गुरुं श्रोत्रियंब्रह्मनिष्ठमित्यादि लक्षणलक्षितं समाश्रयेत् सेवेत अनेनव्युत्पत्तिबलेन स्वयमेववाक्यार्थविचारः क्रियमाणो न फला-
येति सूचितम् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसारस्यभ्रमिमचक्ररूपत्वात्तन्निवृत्तेश्चतत्कारणाज्ञाननिवृत्तिमूलकत्वदज्ञाननिवृत्तेश्चतत्त्वज्ञानकसाध्यत्वात्तत्त्वज्ञानस्यचवेदान्त विचारसा-
ध्यत्वात्तदर्थंगुरुसमाश्रयणमित्याह क्रियेति भवःसंसारश्चक्रवद्विपरिवर्तमानईर्यते कथ्यते तदेवोपपादयाति आदृताआदरपूर्वंपूर्वजन्मार्जि
ताक्रियाएनस्यशरीरोद्भवस्यजन्मनोहेतुः तत्रजन्मनिसुरागिणोविषयाभिलाषवतः तौ शास्त्रप्रसिद्धौ धर्मेतरौ धर्माधर्मौ प्रियाप्रियौसुखदुः

क्रियाशरीरोद्भवहेतुरादृताप्रियाप्रियौतौभवतःसुरागिणः ॥
धर्मेतरौतत्रपुनः शरीरकंपुनः क्रियाचक्रवदीर्यतेभवः ॥ ८ ॥

खजनकौभवतःकस्यचिदधर्मएवसुखत्वबुद्ध्याप्रवृत्तिः कस्यचिद्धर्मएवंकदाचिदित्यप्यूह्यम् एवंतत्रोत्पादितकर्मणापुनःशरीरंपुनःक्रिया-
इत्येवंचक्रवद्विपरिवृत्तिः । यथाचक्रेभ्राम्यमाणेऽधोभागः कदाचिदुपरिउपरितनश्चाधः पुनरुपरिपुनरधएवंजन्मक्रिययोर्जन्यजनक-
भावेनपरिवृत्तिरिति बोध्यम् ॥ ८ ॥

Nepal Sanskrit University, Balmeekr Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यचाज्ञानमेवमूलमित्याह अज्ञानमेवेति अत्रविधौसंसारनिवृत्तिलक्षणेकर्तव्येऽर्थेतद्ज्ञानमेवमूलकारणत्वादज्ञानहानमेवविधीयते साध-
नत्वेनेतिशेषः ननुकर्मैवतन्नाशकमस्तुकिंज्ञानेनेत्याशङ्क्याह विद्यैवज्ञानमेवतन्नाशविधौमूलाज्ञाननाशनेपटीयसीसमर्थानकर्मसमर्थमितिशेषः

अज्ञानमेवास्यहिमूलकारणंतद्ज्ञानमेवात्रविधौविधीयते॥ विद्यै
वतन्नाशविधौपटीयसीनकर्मतज्जंसविरोधमीरितम् ॥ ९ ॥

यतस्तत्तज्जमज्ञानजम् आत्मस्वरूपाज्ञानजन्यदेहाद्यभिमानजन्यत्वात्कर्मणोज्ञानजन्यत्वंबोध्यम् ननुतज्जन्यस्यापितन्नाशकत्वंवृश्चिककर्क
व्यादौदृष्टमित्याशङ्क्यतज्जन्यत्वंवाननाशकत्वप्रयोजकंकिन्तुसविरोधत्वमेवेत्याह यत्सविरोधंतदीरितंनाशकमुक्तमित्यर्थः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतएवकर्मणानाज्ञानहानिरित्याह नाज्ञानेत्यादि यतःकर्मणाविरोधाभावान्नाज्ञाननाशेनापिरागनाशोवस्तुतः कर्मानुष्ठानात्पुनः सदो
षंक्षयिफलत्वादिदोषविशिष्टंकर्मैवोद्भवेत्कर्मणश्चपुनःसंसारएवेतिनमुक्तिमत्याशा ततस्तस्माद्बुधोविवेकीज्ञानविचारवान् ज्ञायतेऽनेने·

नाज्ञानहानिर्नचरागसङ्क्षयोभवेत्ततः कर्मसदोषमुद्भवेत् ॥ ततः
पुनः संसृतिरप्यवारितातस्माद्बुधोज्ञानविचारवान्भवेत् ॥ १० ॥

तिज्ञानंवेदान्तवाक्यंतद्विचारवान्भवेत ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानींज्ञानस्यैवमोक्षहेतुत्वंवक्तुंज्ञानकर्मसमुच्चयवादंदूषणायानुवदतिसार्धेन नन्विति नन्वितिशङ्कायाम् यथाविद्यावेदमुखेनश्रुतिपुराण-
लक्षणेन ब्रह्मविदाप्नोतिपरम् इत्यादिनापुरुषार्थसाधनमुक्ता तथा उभाभ्यामेवपक्षाभ्यांयथाखेपक्षिणांगातिः तथैवज्ञानकर्मभ्यांप्राप्यते
ब्रह्मशाश्वतम् इत्यादिनाक्रियाऽपितत्साधनत्वेनोक्ता किंच क्रियाकर्तव्यत। तृतीयार्थेप्रथमा कर्तव्यतयाआवश्यकेकृत्येअवश्यकर्तव्यत-

ननुक्रियावेदमुखेनचोदितायथैवविद्यापुरुषार्थसाधनम् ॥ कर्तव्यताप्राणभृतःप्रचोदिताविद्यासहायत्वमुपैतिसापुनः ॥ ११ ॥

याप्रचोदितानित्यनैमित्तिकरूपा एवंचनदकरणेप्रत्यवायोत्पत्त्याज्ञानोत्पत्तिरेवनस्यात् तस्मात्सापुनर्विद्यायाःसहायत्वंप्राप्नोतिघटेजन-
नीयेयथादण्डचक्रादीनांपरस्परसहायता ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्तव्येतीतस्वोक्तमेवेविवृणोति कर्मेति वीरहावाएषदेवानांयोऽग्निमुद्वासयतेयावज्जीवमग्निहोत्रंजुहोति इतिश्रुतिः तत्रासिद्धान्तीशङ्कते नन्विति ध्रुवंस्थिरंकार्यमिदंपुरुषार्थमोक्षजनिकाविद्यायतः स्वतन्त्राविनाऽपिसहायेन स्वकार्यसंपादनेसमर्था यथातेजस्तिमिरनिवर्तन-

कर्माकृतौदोषमपिश्रुतिर्जगौतस्मात्सदाकार्यमिदंमुमुक्षुणा॥ननु स्वतन्त्राध्रुवकार्यकारिणीविद्यानकिञ्चिन्मनसाऽप्यपेक्षते ॥ १२

समर्थंमनसाऽपिकिञ्चित्सहायभूतंवस्तुनापेक्षते तथाफलेजननीयेसहायान्तरसंभावनाऽपिनेतिभावः अनेनविद्याफलजननेनिरपेक्षास्वतन्त्र-त्वात्तेजोवदित्यनुमानंसूचितम् ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समुच्चयवादीपरिहराति नेति त्वदुक्तंनेत्यर्थः सत्यकार्यः अक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवति इत्यादिवेदनबोधितःस्थिरकार्योऽपि-
अध्वरः यथाऽन्यानपिकारकादिकान् आरादुपकारकप्रयाजाद्यङ्गानिदेशकालादीनिचप्रकाङ्क्षते तथाविद्यापिअग्निहोत्रंजुहोतिइत्यादिवि

नसत्यकार्योऽपिहियद्वदध्वरः प्रकाङ्क्षतेऽन्यानपिकारकादिकान्
तथैवविद्याविधितः प्रकाशितैर्विशिष्यते कर्मभिरेवमुक्तये ॥ १३ ॥

धिवाक्यतःतत्समूहेनप्रकाशितैः कर्मभिः सहितैवमुक्तयेविशिष्यतइत्यर्थः विदषाफलदानेकर्मापेक्षा अङ्गित्वात् प्रयाजादयङ्गापेक्षदर्शा
दिवादितिसत्प्रतिपक्षानुमानमनेनसूचितम् ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदनूद्यसिद्धान्तीदूषयति केचिदिति यत्केचिद्वितर्कवादिनःइतिज्ञानकर्मणोःसमुच्चित्यमुक्तिसाधनंवदन्तितदप्यसत् यथाकेवलंकर्म मोक्ष साधनमित्यसत्तथातन्मीलितमित्यप्यसत् तत्रहेतुर्दृष्टविरोधकारणात् दृष्टयोर्विरोधः सर्वलोकदृष्टविरोधरूपात्कारणात्तदसदित्यर्थः विरो

केचिद्वदन्तीतिवितर्कवादिनस्तदप्यसद्दृष्टविरोधकारणात् ॥
देहाभिमानादभिवर्धतेक्रियाविद्यागताहङ्कृतितःप्रसिद्ध्यति १४

धमेवाह देहाभिमानात्क्रियाववर्धतेअनात्मनिदेहादावात्मत्वाभिमानात्क्रियाप्रवृद्धिः विद्यातुगताहङ्कृतितः गताहङ्कृतिर्यस्यतस्यनष्टाहङ्कृतेः प्रसिद्ध्यति सार्वविभक्तिकस्तासिः एवंचाहङ्कारसत्तामूलकत्वात्क्रियाज्ञानयोः समुच्चयोविरुद्धइत्यर्थः ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus

अथपूर्वपक्षयुक्तानुमानंदूषयनविद्यास्वरूपमाह विशुद्धंविज्ञानंयेभ्यस्तेषांवेदान्तवाक्यानांयाद्विशेषेणरोचनंरलयोरभेदादालोचनंविचार
स्तेनाञ्चिताप्रापितायाचरमाआत्मवृत्तिर्ब्रह्माकारांतःकरणवृत्तिः साविद्येतिभण्यतेविद्वद्भिरितिशेषः पुनःसमुच्चयनिरासायविद्याकर्मणो
र्वैषम्यमाह कर्मयज्ञादिअखिलकारकादिभिःकर्तव्यकर्मादिभिरङ्गैश्चसहितंसदुदेति फलोन्मुखंभवति विद्यापुनरखिलकारकादीन्निहन्ति

विशुद्धविज्ञानविरोचनाञ्चिताविद्याऽत्मवृत्तिश्चरमेतिभण्यते ॥ उदेतिकर्माखिलकारकादिभिर्निहन्ति विद्याऽखिल कारकादि-कम् ॥ १५ ॥

तत्रकर्तृत्वादिबुद्धिंनिहन्ति सकलव्यापारपरित्यागेनब्रह्मणिसमाप्तिर्हिविद्या अतः स्वोत्पत्तौचित्तशुद्धिद्वाराकर्मसापेक्षास्वफलेजनायितव्ये-
तन्निरपेक्षैवान्यथाविद्यास्वरूपस्यैवभङ्गापत्तेरितिपूर्वपक्षयुक्तहेतोरासिद्धिरितिभावः ॥ १५ ॥

CC-0. In Public Domain. Digitization by eGangotri

उपसंहरन्मुमुक्षोर्वृत्तिप्रकारमाह तस्मादिति विद्याविरोधाद्विद्यायाः कर्मणासह विरोधेनसमुच्चयोनभवेत्तस्मात्सुधीर्मुमुक्षुरशेषतः कर्मत्यजे-
त् काम्यंतुसर्वथात्याज्यमेवनित्यनैमित्तिकमपियावच्चित्तशुद्धिकर्तव्यमेव ततोऽपिब्रह्मणिचित्तस्थैर्यपर्यन्तं कर्तव्यमेव ततस्तदनुसन्धानप्र-

तस्मात्त्यजेत्कार्यमशेषतः सुधीर्विद्याविरोधान्नसमुच्चयोभवेत् ।
आत्मानुसन्धानपरायणःसदा निवृत्तसर्वेन्द्रियवृत्तिगोचरः १६

तिबन्धकत्वात्प्रयोजनाभावाच्चतदपित्याज्यमेवेतिभावः इदानींमुमुक्षुकर्तव्यमाह निवृत्ताःसर्वेषामिन्द्रियाणां गोचराविषयाःशब्दादयोय
स्मात्तादृशःसन् आत्मनःसच्चिदानन्दस्यानुसन्धानमेवपरमयनंप्राप्यंयस्यतथाविधोभवेत् अत्रेन्द्रियप्रत्याहारःकर्तव्यत्वेनोक्तस्तेनतत्पूर्वंप्रा-
णायामाद्यर्थादाक्षिप्तम् ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रागिविरागिभेदेनकर्मणोकर्तव्यताकर्त्तव्यतेआहयावदिति माययाविद्ययाशरीरादिष्वनात्मसुआत्मधीरहङ्कर्तेत्यादिरूपायावद्वर्ततेतावद्वि
॥ ९ ॥ धिवादकर्मणाम् विधिर्यजेतेत्यादिश्रुतिर्वादःकर्तव्यताबोधकोयेषांकर्मणांविधेयोवशवर्त्तितत्कर्मकर्ताभवेत् तदपगमेतुतदाखिलं जगन्नेतीति

यावच्छरीरादिषुमाययात्मधीस्तावद्विधेयोविधिवादकर्मणाम् ॥
नेतीतिवाक्यैरखिलं निषिद्ध्य तज्ज्ञात्वापरात्मानमथत्यजेत्क्रि
याः ॥ १७ ॥

वाक्यैः अथातआदेशोनेतिनेतिइत्यादिवाक्यैर्निषिध्य मिथ्यात्वेननिर्णीयताद्विलक्षणतयासत्यत्वेनपरमात्मस्वरूपंज्ञात्वाक्रियास्त्यजेत्निरू ॥ ९ ॥
पितमेतत् ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मविज्ञानेसत्यवश्यमविद्या निवर्ततइत्याह यदेति आत्मनिशुद्धेन्तःकरणेपरमात्मनईशस्यात्मनोजीवस्यचयोविभेदोमायान्तःकरण
रूपोपाधिद्वयकृतोविभेदोभेदस्तस्यभेदकं नाशकंभास्वरंप्रकाशशीलं यद्विज्ञानमितरवृत्त्युपमर्दनपूर्वकंब्रह्माकाराऽखण्डाद्वृत्तिर्यदाऽवभाति

यदापरात्मात्मविभेदभेदकंविज्ञानमात्मन्यवभाति भास्वरम् ॥
तदैवमायाप्रविलीयतेऽञ्जसासकारकाकारणमात्मसंसृतेः॥ १८ ॥

असंभावनादितिरस्कारेणोदेति तदैव सकारकाजन्मान्तरप्रापककर्मसहितामाधातत्तज्जीवोपाधिभूताविद्याऽञ्जसाझटितिप्रविलीयतेनश्यति
ननुतन्नाशेऽपिसंसारनाशःकथमतोमायाविशेषणम् आत्मसंसृतेःकारणंसंसारस्योपादानकारणमेवंचतन्नाशेकार्यनाशोभवत्येवेतिभावः १८

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं पुनर्दार्ढ्यायाह श्रुतीति तत्त्वमसीत्यादिश्रुतिरूपैःप्रमाणैस्तज्जनितज्ञानेन नाशितासाविद्याकथमपिकार्यकारिणीभविष्यतीति काकुरत्र सर्वथानेत्यर्थः असतःकार्यकारित्वासंभवादितिभावः पुनश्चतस्यानोद्भवइत्याह विज्ञानमात्रादिति अमलाशुद्धाद्वितीयतःद्विती

श्रुतिप्रमाणाभिविनाशिताचसाकथंभविष्यत्यपिकार्यकारिणी ॥
विज्ञानमात्रादमलाद्वितीयतस्तस्मादविद्यानपुनर्भविष्यति १९

यात्मविषयकाद्विज्ञानमात्रादितरासहकृतान्निदिध्यासनपरिपाकजज्ञानाद्यतोनष्टातस्मात्सापुनर्नभविष्यति रज्ज्वज्ञानमूलकस्य सर्पस्य रज्जुज्ञानेन निवृत्तस्ययथानपुनरुत्पत्तिरितिभावः ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्यायाइतरनिरपेक्षायाएवमोक्षकारणत्वमुक्तंयुक्तिपूर्वकंपुनःकथयतिश्रोतृदार्ढ्याय। यदीति। यदिनष्टातत्वज्ञाननाशिता सा न पुनः प्रसूयतेनोत्पद्यतेतदाकारणाभावादहंमतिःकथंभवेत्। कथमपिनभवेदित्यर्थः। तदभावाच्चतत्कालेकर्माभावइतिस्वफलजननेसास्वतन्त्राइ

यदिस्मनष्टा नपुनःप्रसूयते कर्ताऽहमस्येति मतिः कथं भवेत् ॥
तस्मात्स्वतन्त्रा न किमप्यपेक्षते विद्या विमोक्षाय विभाति केवला ॥ २० ॥

तरानिरपेक्षैवनाकिमप्यपेक्षते द्वितीयस्यासंभवात् अतः केवलाऽसहायैवविमोक्षायविभातितत्फलिकाभवतीत्यर्थः ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वकरणेप्रत्यवायभिया कर्मकार्यमितिचेन्नेत्याह सप्रत्यवायइति कर्मत्यागेनाहिनिश्चयेनाहंप्रत्यवायसहितोभविष्यामीत्येवंशुद्धात्मानि-अनात्मधर्मस्यधीरप्रज्ञस्यतत्त्वज्ञानविकलस्यप्रसिद्धा नतुतत्त्वदर्शिनः तस्याहंबुद्धेरभावात् पीपादेरनात्मधर्मतानिश्चयाच्च तस्माद्बुधैःकर्म

स प्रत्यवायोह्यहमित्यनात्मधीरज्ञप्रसिद्धा नतु तत्त्वदर्शिनः ॥ तस्माद्बुधैस्त्याज्यमपि क्रियात्मभिर्विधानतःकर्मविधि प्रकाशितम् ॥ २३ ॥

क्रियात्मभिः षष्ठ्यर्थेतृतीया क्रियाफलसक्तचित्तानां विधानतोविधानेनेतिकर्तव्यतयायुक्तंकर्म विधिभिरवश्यकर्तव्यतयाबोधितमपि-त्याज्यमित्यर्थः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविरक्तस्यकार्यमाह। श्रद्धेति । गुरुशास्त्रयोर्विश्वासःश्रद्धातदन्वितोबुभुत्सुःशुद्धमानसोऽपि निष्कामकर्मानुष्ठानाच्छुद्धमानसश्चगुरोः प्रसादाल्लब्धतत्त्वमसीतिवाक्यतः श्रुतमात्मजीवयोरैकात्म्यंविज्ञाय मनननिदिध्यासनपरिपाकाभ्यांसाक्षात्कृत्य। चएवार्थः । साक्षा

श्रद्धान्वितस्तत्त्वमसीतिवाक्यतो गुरोःप्रसादादपिशुद्धमानसः॥
विज्ञायचैकात्म्यमथात्मजीवयोः सुखी भवेन्मेरुरिवाप्रकम्पनः
॥ २४ ॥

त्कृत्यैवसुखी भवेत्। सकलदुःखहीनोभवेदित्यर्थः। अप्रकम्पनःविषयाभिलाषाक्षोभितान्तःकरणः ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महावाक्यंविवरीतुंवाक्यार्थस्यपदार्थबोधपूर्वकत्वमाह । आदाविति । विधानतःभ्रमप्रमादराहित्येनवाक्यार्थविज्ञानस्यविधावुत्पत्तौआ
दौप्रथमंमुख्यमितियावत् । पदार्थावगतिःकारणम् । हिप्रसिद्धं तस्यपदत्र्यंतत्त्वम्असीति । तत्रतत्पदार्थःपरमात्मासर्वज्ञत्वादिगुणः त्वं

आदौ पदार्थावगतिर्हिकारणं वाक्यार्थविज्ञानविधौ विधानतः ॥
तत्त्वंपदार्थौपरमात्मजीवकावसीतिचैकात्म्यमथानयोर्भवेत्
॥ २५ ॥

पदार्थोजीवः अनयोस्तत्त्वंपदार्थयोरैकात्म्यंतद्बोधकमसीतिपदम् ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुसर्वज्ञत्वादिगुणस्येशस्याकिञ्चिज्ज्ञत्वधर्मवता जीवेनैकात्म्यं विरुद्धमित्याशङ्क्याह । प्रत्यागिति । अहंबुद्धिवद्यत्वं प्रत्यक्त्वं जीवधर्मः परोक्षत्वमीशधर्मस्तदादिधर्मकृतमात्मनोः परमात्मजीवात्मनोर्विरोधं विहाय त्यक्त्वा तयोः संशोधिताम् युक्तिभिः सम्यग्विचारितां तत्त्वंपदाभ्यां शक्त्यभावेऽपि वक्ष्यमाणप्रकारया लक्षणया लक्षितां ज्ञातां चिदात्मतां संगृह्य तत्त्वंपदोपास्थितिविषयां कृत्वा स्वमात्मानं तथा ज्ञात्वाऽथएकात्मज्ञानानन्तरमद्वयो भवेत् । चित्स्वरूपतां प्राप्त इव भवेत् । पूर्वमपि तत्स्वरूप एव विस्मृतकण्ठचामीकरन्यायेन च तत्प्राप्तिः तद्वदित्युक्तम् ।

प्रत्यक्परोक्षादिविरोधमात्मनोर्विहाय संगृह्य तयोश्चिदात्मताम् ॥ संशोधितां लक्षणया च लक्षितां ज्ञात्वा स्वमात्मानमथाद्वयो भवेत् ॥ २६ ॥

अयं भावः तत्त्वंपदयोर्द्वावर्थौ वाच्यो लक्ष्यश्च तत्र तत्पदस्य मायोपाधिः सर्वज्ञत्वादिविशिष्टो वाच्यः त्वंपदस्यापि किञ्चिज्ज्ञत्वादिविशिष्टो मायाकार्याविद्योपाधिरविद्यावदन्तःकरणोपाधिर्वाच्यः उभयोरपि विशेषणांशत्यागेन शुद्धश्चिदात्मा लक्ष्यः तत्र वाच्ययोर्विरुद्धधर्मकत्वादैक्यासंभवेऽपि लक्ष्ययोरैक्यं निर्बाधमेवेति ॥ २६ ॥

Sanskrit University. Balmeeki Campus ...

CC-0. In Public Domain. Digitization by eGangotri

उक्तलक्षणास्वरूपमाह । एकात्मकत्वादिति जहतीलक्षणाजहत्स्वार्थलक्षणायथागङ्गायांघोषइत्यत्रगङ्गापदार्थस्यप्रवाहस्यघोषाधारता
नुपपत्त्यासर्वथातत्परित्यागेनतीररूपार्थलक्षणा साप्रकृते न एकात्मत्वात् । विशेष्यांशस्यैकत्वात्सर्वथास्वार्थत्यागाभावात् । तथाज
हल्लक्षणताजहत्स्वार्थलक्षणावत्त्वमपिअत्रनसंभवति । यथाकाकेभ्योदधिरक्ष्यतामित्यादौकाकशब्दस्यस्वार्थात्यागेनैवदध्युपघातकेलक्षणा
सापिन । विरोधतःविशेषणत्यागेनसर्वथास्वार्थत्यागाभावात् । अतोभागलक्षणाजहदजहल्लक्षणायुज्यते । अदोषतःपूर्वोक्तदोषाभावात्

एकात्मकत्वाज्जहती न सम्भवेत्तथाऽजहल्लक्षणता विरोधतः॥
सोऽयंपदार्थाविवभागलक्षणायुज्येततत्त्वंपदयोरदोषतः॥२७॥

विशेष्यांशस्यात्यागाद्विशेषणांशस्यत्यागाच्च । तत्रदृष्टान्तः । सोऽयंपदार्थाविव । यथासोऽयंदेवदत्तइत्यत्रतद्देशादिविशिष्टोऽतीतानुभव
विषयोवातत्पदार्थः एतद्देशादिविशिष्टोऽनुभूयमानोवेदंशब्दार्थः । तयोश्चाविरुद्धविशेषणकत्वादैक्यासंभवेनदेशादिरूपविशेषणत्यागेना ॥ १४ ॥
नुभवगतातीतत्वादिविशेषणत्यागेनवालक्षणयैक्यंतद्वदितिभावः ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथत्याज्यत्वायजीवोपाधिमाह । रसादी ति । रसापृथ्वीआदिर्येषांतानिपञ्चीकृतानियानिभूतानितेभ्यः संभवोयस्यतत् । पञ्चीकरणंचेत्थम् एकैकंभूतंद्विधाविभज्यतत्रैकंभागंचतुर्धाविभज्यतेषांभागानांस्वेतरभूतचतुष्टयार्धभागचतुष्टयेसंयोजनेएकैकंभूतंपञ्चात्मकंभवतिभा

रसादिपञ्चीकृतभूतसंभवंभोगालयंदुःखसुखादिकर्मणाम् ॥ शरी
रमाद्यन्तवदादिकर्मजंमायामयंस्थूलमुपाधिमात्मनः ॥ २८ ॥

गाधिक्याच्चप्रातिस्विकतयाभूगादिव्यवहारोऽपि । सुखदुःखयोरादीनियानिकर्माणितेषांभेभास्तत्कर्मजसुखदुःखानुभवस्तस्यालयमाश्रयभूतमाद्यन्तवत् उत्पत्तिनाशयोगि आदिकर्मजंप्राग्भवीयकर्मजन्यंमायामयंपरम्परयामायाविकारः तद्विकारभूतविकारत्वात् । एतच्छरीरमात्मनःस्थूलमुपाधिंवदन्तीतिशेषः ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसूक्ष्मोपाधिमाह। सूक्ष्ममिति । बुधाः अन्यत्स्थूलशरीरविलक्षणंशरीरंलिङ्गदेहाख्यमात्मनउपाधिंविदुः । तत्स्वरूपमाह। सूक्ष्मंचक्षु-
राद्यविषयः मनोबुद्धिदशेन्द्रियैःप्राणैश्चयुतम् सङ्कल्पात्मकंमनः निश्चयात्मिकाबुद्धिः घ्राणरसनाचक्षुस्त्वक्श्रोत्रेतिपञ्चज्ञानेन्द्रियाणि वा- स.

सूक्ष्मंमनोबुद्धिदशेन्द्रियैर्युतंप्राणैरपञ्चीकृतभूतसंभवम् ॥ भोक्तुः
सुखादेरनुसाधनंभवेच्छरीरमन्यद्विदुरात्मनोबुधाः ॥ २९ ॥

क्पाणिपादपायूपस्थानिकर्मेन्द्रियाणि प्राणापानव्यानोदानसमानाश्चप्राणास्तैर्युतमेतत्सप्तदशसमुदायात्मकम्। तदाधारभूतान्याह । अप
ञ्चीकृतभूतसंभवंतेभ्यउत्पन्नमतएवादृश्यम् । तथाभोक्तुःसुखादेःसुखदुःखाद्यनुभवस्यानुसाधनम् स्थूलशरीरस्यैतदनुगतस्यैवभोगसाधनत्व ॥ १९ ॥
मितिभावः । एतद्वियोगेनैवमरणव्यवहारइतिबोध्यम् ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतजीवोपाधिद्वयमुक्त्वाईशोपाधिमाह । अनादीति । अनादि उत्पत्तिहीनम् । नानाविधपरिणामशालितयापरिणामरूपेणनश्वरमिति अनादित्वमात्रोक्त्यासूचितम् । अनिर्वाच्यम् सत्त्वासत्त्वाभ्यांनिर्वक्तुमशक्यम् कारणंसकलप्रपञ्चस्यजनकम् ईदृशीमायातुब्रह्मणःपरमी-

अनाद्यनिर्वाच्यमपीहकारणं मायाप्रधानंतुपरंशरीरकम् ॥ उ-
पाधिभेदात्तुयतःपृथक्स्थितं स्वात्मानमात्मन्यवधारयेत्क्र-
मात् ॥ ३० ॥

श्वरव्यवहारसंपादकत्वादुत्कृष्टंप्रधानंशरीरकम् । स्वार्थेकः । एवमुपाधिभेदादेकमेवचैतन्यंयतः पृथक्स्थितंजीवईशइतिभेदबुद्धिविषय मतोलक्षणयोपाधिपरित्यागेनस्वात्मानमात्मनिअवधारयेदभेदेनजानीयात् । क्रमाच्छ्रवणमनननिदिध्यासनक्रमेणेत्यर्थः ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

अथवाक्यार्थविचारफलमाह । कोशेष्विति । आनन्दमयस्य ब्रह्मत्वेअन्नमयप्राणमयमनोमयविज्ञानमयेषुचतुर्षुकोशेषुतत्तत्सङ्गात्तत्तदाकृतिर्विभाति यथाजपादिसङ्गात्स्फटिकोऽनेकाकृतिर्भाति । आनन्दमयस्यापि जीवत्ववादिनातुतेनसहपञ्चसु कोशेष्वितिबोध्यम् । अस्मि-

कोशेषुपञ्चस्वपितत्तदाकृतिर्विभातिसङ्गात्स्फटिकोपलोयथा ॥ असङ्गरूपोऽयमजोयतोऽद्वयोविज्ञायतेऽस्मिन्परितोविचारिते ॥ ३१ ॥

न्महावाक्येपरितोविचारितेसम्यग्विचारितेसत्ययमात्माऽसङ्गरूपः अन्नमयादिभिःसङ्गरहितः । असङ्गोनहिसज्जते । इतिश्रुतेः । अजोऽद्वयश्चविज्ञायते । स्थूलोऽहमित्यादिस्त्वज्ञस्यतत्तत्कोशप्रसङ्गात्प्रतीतिःस्फटिकवत् तत्त्वज्ञस्यतुनतथाप्रतीतिरितिभावः । एवंचतत्तदुपाधिकृततत्तद्रूपताप्रतीतिनिरासएव विचारफलमितिभावः ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जाग्रदाद्यवस्थाऽपि बुद्धेर्धर्मोनात्मधर्मइत्याह । बुद्धेरिति । इहआत्मनिस्वप्नादिभेदेन जाग्रत्स्वप्नसुषुप्तिभेदेन यात्रिधावृत्तिर्दृश्यतेसाऽपि गुणत्रयात्मनः सत्त्वरजस्तमोरूपगुणत्रयस्वरूपाया बुद्धेर्धर्मः । उक्तावस्थात्रयस्योक्तमूलकत्वात् । एतदवस्थात्रयस्यास्मिन्नवस्थात्रय-साक्षिणि आत्मनि भानं मृषा बुद्ध्यध्यास निबन्धनं न तु वास्तव मित्यर्थः । अन्योऽन्यतोव्यभिचारतस्तस्यावस्था त्रयस्यस्व रूपतो

बुद्धेस्त्रिधा वृत्तिरपीह दृश्यते स्वप्नादि भेदेन गुणत्रयात्मनः ॥ अन्योऽन्यतोऽस्मिन्व्यभिचारतोमृषा नित्ये परे ब्रह्मणि केवले शिवे ॥ ३२ ॥

मृषात्वात्तज्ज्ञानस्य मृषात्वमेव । स्वप्नकाले जाग्रत्सुषुप्त्योरभावात् । जाग्रतिइतरद्वयस्याभावात् सुषुप्तावितरयोरभावात्परस्परं व्यभिचारोबोध्यः आत्मनस्तदनाश्रयत्वंविशेषणैराह । नित्येउत्पत्तिनाशशून्येपरेगुणत्रयातीते ब्रह्मणिव्यापकेकेवलेऽसङ्गेशिवआनन्दरूपे एवंभूतेसदैकरसेपरस्परव्यभिचारधर्माभानमसंभवीति भावः ॥ ३२ ॥

अथसाज्यत्वायसंसारमूलभूतांवृत्तिमाह । देहेति । एषांसङ्घातइतरेतराध्यासविषयात् अजस्रंयावद्धियो बुद्धेर्वृत्तिस्तमोमूलतयाऽज्ञ
लक्षणाऽज्ञत्वज्ञापिका यावत्परिवर्तते तावद्भवोद्भवःसंसारोद्भवोभवेत् । तमःपदंरजसोऽप्युपलक्षणम् । रजस्तमःप्रधानाबुद्धिः संसारहेतु

देहेन्द्रियप्राण मनश्चिदात्मनां सङ्घादजस्रं परिवर्तते धियः ॥
वृत्तिस्तमोमूलतयाऽज्ञलक्षणा यावद्भवेत्तावदसौ भवोद्भवः॥३३॥

त्वात्सर्वथासाज्येति भावः ॥ ३३ ॥

CC-0. In Public Domain. Digitization by eGangotri

कृत महावाक्यविचारस्य कर्तव्यमाह । नेतीति । अथात आदेशोनेतिनेति इति प्रमाणेननिराकृतं मिथ्यात्वेनगृहीतमखिलंजगत्येनसः ततोहृदासम्यक्प्रधानेनमनसासम्यगास्वादितं चिल्लक्षणंघनामृतंदुःखासंभिन्नंसुखंयेनसः । स्वर्गादितुपरिणामदुःखत्वात्तत्संभिन्नमेव । एवंभूतोऽशेषंजगद्देहेन्द्रियादिदृश्यमसूक्ष्मंत्यजेत् ज्ञानोपादानबुद्धिविषयंनकुर्यात् । किन्तूदासीनस्तत्रभवेत् । ननुदेहेन्द्रियादिभिरेवतज्ज्ञान

नेतिप्रमाणेन निराकृताखिलो हृदासमास्वादितचिद्घनामृतः ॥ त्यजेदशेषं जगदात्तसद्रसं पीत्वा यथाऽम्भः प्रजहाति तत्फलम् ॥ ३४ ॥

लाभात्कथमुपजीव्यस्यत्यागइत्याशङ्क्यदृष्टान्तदर्शनेनपरिहरति । यथातृषावानआत्तः सद्रसोमाधुर्ययेनतादृशं नारिकेलनारङ्गादि फलान्तर्वर्त्यम्भःपीत्वा तत्स्थानभूतंतत्फलं जहाति तत्रोदासीनोभवति तद्वत्सर्वदृश्यसारांशोत्रब्रह्मतल्लाभसतिनिः सारंदृश्यंनोपादेयंनापिहेयमितिभावः । यतोभयादिसंभावनातद्धेयमित्युच्यते ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतरस्यानित्यत्वेनतत्रवैराग्यार्थमात्मनएवनित्यत्वमाह । कदाचिदिति । कदापीत्यर्थः । अनवः उत्पत्त्यनन्तरंविद्यमानोऽहिनवः । तेन जन्मानन्तरास्तित्वंव्यावर्तितं नवत्वाभावेनेवजीर्णत्वाभावादवस्थान्तरापत्तिरूप परिणामोऽपिनिरस्तः ।अनेनअस्तिजायतेवर्द्धतेविपरिणमतेऽपक्षीयते नश्यतीति षड्भाव विकार राहित्यमुक्तम् । एवंचैतद्विधं सर्वमुक्तषड्भावविकारवत्त्वादनित्यमिति ततोविरज्येतेतिबोधित-

कदाचि दात्मान मृतोनजायते नक्षीयते नापिविवर्धतेऽनवः ॥
निरस्तसर्वातिशयः सुखात्मकः स्वयम्प्रभः सर्वगतोऽयमद्वयः ३५

म् । यतऽईदृशोऽतएवनिरस्तः सर्वस्यदेहेन्द्रियादेरतिशयोमहत्त्वं येनस्वलाभात्सः यल्लाभान्नापरोलाभइतिःश्रुतेः यतःसुखात्मकः आनन्द स्वरूपः स्वयम्प्रभःस्वप्रकाशकश्च देहेन्द्रियादिस्तु दुःखस्वरूपः परप्रकाश्यश्च । यस्यभासासर्वमिदंविभाति । इतिश्रुतेः । सर्वगतोव्यापकः अयमहंबुद्धिविषयःप्रत्यगात्माऽपिअद्वयः उक्ताद्वयब्रह्मस्वरूपएव । नततोऽतिरिक्तइतिभावः । अयमात्माब्रह्म । इतिश्रुतेः ॥ ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुएवंविधेविकारशून्येआत्मनिजन्ममरणादिप्रवाहरूपसंसारभानंकथमितिशङ्कते। एवंविधेइति।दुःखमयःदुःखप्रचुरः।उत्तरयति। अज्ञानतइ
तिअज्ञानमूलकोयोध्यासोदेहान्तः करणादौअहंममेत्यध्यासस्तद्वशात्। एवंचभ्रान्तिरूपातत्प्रतीतिरितिभावः। नन्वेवंकथंतस्यसंसारस्यानि

एवंविधे ज्ञानमये सुखात्मके कथंभवो दुःखमयःप्रतीयते ॥
अज्ञानतोऽध्यासवशात्प्रकाशतेज्ञानेविलीयेत विरोधतःक्षणात्॥
॥ ३६ ॥

वृत्तिस्तत्राह। ज्ञानेति। आविर्भूतइतिशेषः। ज्ञानस्याज्ञानविरोधित्वात्तदुत्पत्तिक्षणएवकारणभूताज्ञाननाशात्तत्कार्यसंसारस्यापि वि
लयइत्यर्थः। यथारज्जुज्ञानेनरज्जौसर्पस्यलयइत्यर्थः ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाध्यासलक्षणमाह । यदन्यदिति । यदन्यत्सर्पादिकमन्यत्र रज्ज्वादौ भ्रमात् भ्रमजनकाद्दोषाद्विभाव्यते विज्ञायते अमुं विपश्चितो विद्वांसोऽध्यासइत्याहुः । यथाऽसर्पभूते रज्ज्वादौ अहिविभावनं सर्पारोपो रज्ज्वबुद्धिमूलकस्तद्वदीश्वरेऽपि जगद्देहादिसंसारात्मकं सर्वं विभाव्यते आत्मज्ञानाभावाद्यथार्थतया ज्ञायते ॥ ३७ ॥

यदन्यदन्यत्र विभाव्यते भ्रमादध्यासमित्याहुरमुं विपश्चितः॥
असर्पभूतेऽहिविभावनं यथा रज्ज्वादिके तद्वदपीश्वरे जगत्॥३७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनिब्रगद्धानेकीदृशोऽध्यासोनिमित्तंतदाह विकल्पेति सर्वविकल्पकारणमायारहितेवस्तुतस्तत्सङ्गरहितेचिदात्मकेचित्स्वरूपेसर्वकारणेनिरामयेदुःखासंभिन्नानन्दमयेकेवलेसर्वविकारशून्येपरेदृश्याविलक्षणेब्रह्मणिव्यापकं आत्मनिप्रथममहङ्कारः कल्पितः सएवाध्यासः ।

विकल्पमायारहितेचिदात्मके ऽहङ्कारएष प्रथमः प्रकल्पितः ॥
अध्यासएवात्मनिसर्वकारणे निरामयेब्रह्मणि केवलेपरे ॥ ३८॥

अहंबुद्ध्यात्मकोऽध्यासएवसर्वसंसारकारणमितिभावः ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 बुद्धिनिष्ठएवसंसारोनत्वात्मनिष्ठइत्यत्रान्वयव्यतिरेकौप्रमाणयति। इच्छादीति। परेसर्वसाक्षिणिआत्मनिसंसृतिहेतवःभासमानसंसारकारणं
 सदाकालत्रयेऽपिइच्छादिरागादिसुखादिधार्मिकाः इच्छांपेक्षेरागद्वेषौसुखदुःखंइत्येवमादिद्वन्द्वधर्मिकाःधियएवधीषुसतीषुसंसारइत्यन्वयमु

इच्छादिरागादिसुखादिधार्मिकाः सदा धियः संसृतिहेतवः परे ॥
यस्मात्प्रसुप्तौतदभावतःपरः सुखस्वरूपेणविभाव्यतेहिनः॥३९॥

क्त्वातद्व्यतिरेकमाहयस्मात्कारणात्प्रसुप्तौतदभावा त्धीवृत्त्यभावात परआत्मानोऽस्माभिःतृतीयार्थेषुषष्ठी। सुखरूपेणस्वस्वरूपमात्रेणाविभा
व्यतेनिश्चीयते नतु संसारित्वेनेतिभावः सुप्तोत्थितस्तुसुखमहमस्वाप्समितिप्रत्यभिज्ञानुभवात्तदात्मस्वरूपनिश्चयोऽस्तीतितात्पर्यम् ॥ ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथ पुनस्तत्त्वं पदार्थस्वरूपमाह । अनादीति । अनादिर्याऽविद्या ततउद्भवो यस्या बुद्धेरन्तःकरणस्य तत्र विम्बितः प्रतिबिम्बितश्चितःप्रकाशः
स जीवइतीर्यते आत्मापरात्माधियः साक्षितया धीधर्मासङ्गेनैव पृथक्स्थितः । अन्तर्यामितयेत्यर्थः जीवोऽहंसुखीत्यादिप्रकारेणान्तःकर

अनाद्यविद्योद्भवबुद्धिबिम्बितोजीवप्रकाशोऽयमितीर्यते चितः ॥
आत्माधियः साक्षितया पृथक् स्थितो बुद्ध्या परिच्छिन्नपरः
सएव हि ॥ ४० ॥

णवृत्त्यां ध्यासवान्परमात्मा तु साक्षितया सर्वत्राविद्यमानोऽपि न तथेति भावः । अतएव बुद्ध्यापरिच्छिन्नपरः बुद्धिलक्षणपरिच्छेदरहितः अतएव
परः । एवंचज्ञानेन प्रतिबिम्बाधार विलयप्रतिबिम्बस्य विलयात्मजीवः सएवपरमात्मैवेति प्रसिद्धं सइत्यस्य चार्थान्तर बोध्या ॥ ४० ॥

CC-0. In Public Domain. Digitization by eGangotri

अथ बुद्ध्यात्मनोःपरस्पराध्यासवशात् परस्परधर्मभानमितिदार्ढ्यायपुनराह । चिद्बिम्बेति । चिदात्मचेतसोरन्योन्याध्यासवशात् पर स.
रा. गी. स्परतादात्म्यारोपाज्जडाजडत्वंप्रतीयते । चेतसोवृत्तीनांज्ञानत्वं जीवात्मनोजडत्वंप्रतीयते । अतएवज्ञानाश्रयआत्मेति चितएवताकिंर्कि
कव्यवहारः । जीवात्मनिजडात्मनिजडात्माकथ्यते बुधैरितिस्मार्तव्यवहारश्च । अत्रहेतुः । चिदित्यादि । चिद्बिम्बस्यसाचिदाभासः अ
॥ २१ ॥

चिद्बिम्बसाक्ष्यात्मधियांप्रसङ्गतस्त्वेकत्रवासादनलाक्तलोहवत् ॥
अन्योऽन्यमध्यासवशात्प्रतीयते जडाजडत्वंचचिदात्मचेतसोः
॥ ४१ ॥

क्षैःसहितः साक्षःसेन्द्रियः सचासावात्मामनःधीरन्तःकरणंतेषांप्रकृष्टसङ्गादतिसान्निकर्षादध्यासइत्यर्थः । अनलाक्तलोहवत् अग्नितप्तलो
हपिण्डवत् अत्रदृष्टान्तः । अग्निधर्मोदाहकत्वं लोहधर्मश्चवर्तुलत्वाद्यनलेभासते । तत्रहेतुरेकत्रवासात् परस्पराविभागेनवृत्तेरित्यर्थः । तद्व ॥ २१ ॥
देतयोरपि परस्परधर्माध्यासइत्यर्थः ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं दार्ढ्यायपुनराह । गुरोरिति । वेदवाक्यतइत्यनेन श्रवणंगुरोःसकाशादपि । ततश्चानेनमननमुक्तम् । ताभ्यांसञ्जातोविद्यया ज्ञानरूपस्यात्मनोऽनुभवोयस्यसः । अनेनकृतनिदिध्यासनइत्यर्थः । तं चिदानन्दस्वरूपं स्वात्मानमुपाधिवर्जितं रहितोपाधिधर्ममात्मस्थं

गुरोःसकाशादपिवेदवाक्यतः सञ्जातविद्यानुभवोनिरीक्ष्य तम् ।
स्वात्मानमात्मस्थमुपाधिवर्जितं त्यजेदशेषं जडमात्मगोचरम् ॥ ४२ ॥

हृत्स्थंनिरीक्ष्य अपरोक्षीकृत्याशेषंजडं दृश्यंत्यजेत् । तत्रोदासीनोभवेदिति भावः ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञेयंनिरुपाधिकं स्वरूपंश्लोकद्वयेनाह प्रकाशेति अहंप्रकाशरूपः स्वप्रकाशः परप्रकाशहीनः परप्रकाशरूपोयथाघटादिः अजोजन्मादि हीनः अद्वयःसजातीयद्वितीयरहितः असकृद्विभातः सकृदपिपरेणभासकान्तरेणप्रकाशितः सकृद्विभातः नसकृद्विभातोसकृद्विभातः नत

प्रकाशरूपोऽहमजोऽहमद्वयोऽसकृद्विभातोऽहमतीवनिर्मलः ॥
विशुद्धविज्ञानघनोनिरामयःसम्पूर्णआनन्दमयोऽहमक्रियः॥४३॥

त्रसूर्योभातिनचन्द्रतारकमितिश्रुतेः नतद्भासयतेसूर्यइतिस्मृतेश्च अतीवनिर्मलः मायाकृतावरणविक्षेपरहितः विशुद्धविज्ञानघनः विशुद्धचि दे़कधनः निरामयःकर्तृत्वाभिमानरहितः सम्पूर्णःदेशकालपरिच्छेदहीनः आनन्दमयः आनन्दरूपः स्वार्थेमयट् अक्रियः परिणामहीनः
॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदैवेति अहंसदैवकालत्रयेऽपिमुक्तःसर्वधर्मरहितः अचिन्त्यशक्तिमान् यःपरमात्मा अतिन्द्रियज्ञानम्इन्द्रियातिरिक्तज्ञानरूपःयतोवाचो निवर्त्तन्ते अप्राप्यमनसासहइतिश्रुतेः अविक्रियात्मकोऽपरिणामी अनन्तपारःअन्तःकालतःपारःपरन्तीरन्तावविद्यमानौ यस्य तेनदेश

सदैवमुक्तोऽहमचिन्त्यशक्तिमानतीन्द्रियज्ञानमविक्रियात्मकः॥
अनन्तपारोऽहमहर्निशंबुधैर्विभावितोऽहंहृदिवेदवादिभिः ॥४४॥

कालपरिच्छेदहीनः ईदृशोयःपरमात्माबुधैर्हृदि अहर्निशंविभावितः सोऽहमित्यर्थः ॥ ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंभावनायाःफलमाह एवमिति उक्तरीत्यासदाआत्मानं अखण्डितात्मनाविषयानाकृष्टचित्तेन विचारमाणस्यध्यायतः धातूनामनेकार्थत्वात् चरमाणएवचारमाणःस्वार्थेऽण् विशुद्धभावनाब्रह्माकारान्तःकरणवृत्तिरुदन्तीतिशेषः साचोदिताकारकैर्देहान्तरमापककर्मभिः स

एवंसदात्मानमखण्डितात्मनाविचारमाणस्यविशुद्धभावना ॥
हन्यादविद्यामचिरेणकारकैरसायनंयद्वदुपासितंरुजः ॥ ४५ ॥

हाविद्यामाचिरेणशीघ्रमेवहन्यात् यथापामितंसेवितंरसायनं रुजोहन्यात्तद्वत् ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रध्यानेइतिकर्तव्यतामाह विविक्तइति निर्जनइत्यर्थः आसीनोयथोचितपद्मासनाद्युपविष्टः उपारतेन्द्रियः तेनशमदमादिसम्पन्नः विनिर्जितात्माप्राणायामादिभिर्जितान्तःकरणः अतएवविमलान्तराशयोविशुद्धचित्तः विज्ञानदृक्विज्ञानएवदृक्भानंयस्यसः द्रष्टृदृश्यभा

विविक्तआसीनउपारतेन्द्रियोविनिर्जितात्माविमलान्तराशयः॥
विभावयेदेकमनन्यसाधनोविज्ञानदृक्केवलआत्मसंस्थितः॥४६

नरहितः अनेननिर्विकल्पकसमाधिरुक्तः अनन्यसाधनः तत्त्वज्ञानातिरिक्तमुक्तिसाधनास्तित्वभ्रमरहितः केवलोऽसङ्गःआत्मसंस्थितः आत्मन्येवसंस्थासमाप्तिः सञ्जातायस्यसतेन नकदापिविषयान्तरसञ्चारवांश्चित्तः विभावयेत् ध्यायेत् ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंच यदेतद्भूतंभविष्यद्वर्तमानं विश्वंपरमात्मादर्शनंभासकोयस्यतत् तस्यभासासर्वमिदंविभातीति श्रुतेः तत्सर्वकारणेमायासान्निधाना
त्सर्वोपादानत्वेनाभिमतेआत्मनिविलापयेत् उपादानसत्ताव्यतिरेकेणकार्यसत्तांनपश्येत् तादृशस्यलक्षणमाह सम्पूर्णः अवाप्तसमस्तका

विश्वंयदेतत्परमात्मदर्शनं विलापयेदात्मनि सर्वकारणे ॥
पूर्णश्चिदानन्दमयोऽवतिष्ठते न वेद बाह्यं न च किञ्चिदान्त
रम् ॥ ४७ ॥

मः तस्यकाम्याभावात् चिदानन्दमयः तद्रूपोऽवतिष्ठते बाह्यमान्तरंच दृश्यंनजानाति सर्वत्रब्रह्मदर्शनादिति भावः ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाधिसिद्धेः पूर्वंयत्कर्तव्यंतदाह । पूर्वमिति । समाधेः सकलविषयव्यासङ्गनिवृत्तिपूर्वकं ब्रह्माकारवृत्तिः समाधिस्ततः पूर्वमखिलंस
चराचरंजगत् ओङ्कारमात्रं विचिन्तयेत् । ओङ्कारोमायतेऽ नेर्यातमात्रा प्रमाणं बोधकत्वेन परिच्छेदकंयस्यतथाजानीयात् । तदेवविवृ

पूर्वं समाधे रखिलं विचिन्तये दोङ्कारमात्रं सचराचरं जगत् ॥
तदेव वाच्यं प्रणवो हि वाचको विभाव्यते ज्ञानवशान्न बो-
धतः ॥ ४८ ॥

णोति तदेवेति । जगदेवेत्यर्थः । प्रणवोवाचकोविभाव्यतेएतत्त्वाहिप्रसिद्ध इत्यर्थः । इयंभावनाज्ञानवशादेवनबोधकः । बोधोनिर्विशेषब्रह्मसा
क्षात्कारस्तदुत्तरंनेत्यर्थः । तस्यसर्ववृत्त्युपमर्दकत्वात् ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमर्थंविवृणोति । अकारेति । अकारसञ्ज्ञस्तद्वाच्यःपुरुषोहिविश्वकोविश्वएवविश्वकः विश्वशब्देनपरिभाषितःअयंजाग्रत्साक्षीविराट् ततःस्वप्नसाक्षीतैजसःतेनपदेनपरिभाषितःलिङ्गदेहाभिमानीहिरण्यगर्भउकारकः उकारप्रतिपाद्यईर्यते । ततः सुषुप्तिसाक्षीप्राज्ञपदवाच्यो

अकारसञ्ज्ञः पुरुषो हि विश्वको ह्युकारकस्तैजसईर्यते क्रमात्
प्राज्ञो मकारः परिपठ्यतेऽखिलैः समाधि पूर्वं न तु तत्त्वतो
भवेत् ॥ ४९ ॥

मायोपाधिकोमकारस्तद्वाच्यः परिपठ्यतेऽखिलैर्वेदैः । इयंभावनासमाधिपूर्वंसमाधेःपूर्वमेव नतत्त्वतः तत्त्वसाक्षात्कारेसतिनभवेत् । सर्वस्यब्रह्मणिप्रविलयात् ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविलापन प्रकारमाहद्वाभ्याम् । विश्वंत्विति । उकारमध्ये बहुधाव्यवस्थितं स्थूलदेहनिबंधनंस्थूलदेहाभिमानेन स्थितं विश्वम्पुरुषंत-
द्वाचकमकारम् च विलापयेत् । तुश्चार्थे । विलीनम्भावयेत् ततस्तैजसंलिङ्गदेहाभिमानिनम् पुरुषं तद्वाचकंप्रणवद्वितीय वर्णमुकारं वि-

विश्वं त्वकारं पुरुषं विलापयेदुकारमध्येबहुधा व्यवस्थितम् ।
ततो मकारे प्रविलाप्यतैजसंद्वितीयवर्णं प्रणवस्य चान्तिमे ॥५०॥

लीनविश्वकम्मकारे विलाप्यविलीनम्भावयित्वा ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततस्तादृशंमकारंतद्वाच्यंप्राज्ञंचकारणं कारणत्वाभिमानिनंपुरुषंमिहात्मनि चिद्घनेपरे विलापयेत् तथाभावयेत् । ततः सोऽहंसर्वविला
पाधिष्ठानंपरब्रह्मेतिभावयेत् । तद्विशिनष्टि । सदाविमुक्तिमत् नित्यमुक्तम् । नन्वहंपदार्थस्यरागद्वेषादिमलिनस्यकथं ब्रह्मत्वभावनेत्या

मकारमप्यात्मनि चिद्घने परे विलापयेत्प्राज्ञमपीह कारणम् ।
सोऽहं परं ब्रह्म सदा विमुक्तिमद्विज्ञानदृङ्मुक्त उपाधितोऽमलः ॥ ५१ ॥

शङ्क्याहंपदार्थंविशिनष्टि । उपाधितोमुक्तः अतएवामलःतथाभावनेसाधनं विज्ञानदृक्विज्ञानं ब्रह्ममात्रप्रत्ययाविच्छेदरूपादृक् निदिध्या
सनं सत्साक्षात्कारसाधनंयस्यसः ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंभावनावतोलक्षणमाह । एवमिति । उक्तप्रकारेणसदाजातापरमात्मन्येकभावना यस्यसः परिविस्मृतमखिलंपुत्रदेहादियेनसः। अत एवस्वस्वरूपानन्देनैवतुष्टःनतुविषयानन्देन । तस्यपरिणामेदुःखरूपत्वात्ततो विरक्तइत्यर्थः । साक्षान्नित्यात्मनिसुखप्रकाशकः साक्षा

एवं सदा जातपरात्मभावनः स्वानन्दतुष्टःपरिविस्मृताखिलः ॥
आस्ते स नित्यात्मसुखप्रकाशकः साक्षाद्विमुक्तोऽचलवारिसि
न्धुवत् ॥ ५२ ॥

दौपाधिकनामरूपभेदराहित्येननित्यमखण्डितमात्मस्वरूपंयत्सुखंप्रकाशश्चतद्रूपः एवंरूपो विमुक्तोजीवन्मुक्तः । अचलंनिश्चलंवारियस्यतादृशसिन्धुवदास्ते । विषयसम्बन्धरूपलहरीरहितआस्तइत्यर्थः ॥ ५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशस्य मत्प्राप्तिर्भवत्येवेत्याह । एवमिति । उक्तप्रकारेण सदाऽभ्यस्तसमाधियोगिनः निवृत्ताः सर्वेषामिन्द्रियाणां गोचराः विषयाः शब्दादयो यस्य विनिर्जिता अशेषा रिपवः कामादयो येन तस्य । तज्जयेन विषयेष्वन्तःकरणाप्रवृत्तेः । अतएव सर्वज्ञत्वनित्यत्वनित्यतृप्तत्वबोध

एवं सदाऽभ्यस्तसमाधियोगिनो निवृत्तसर्वेन्द्रियगोचरस्य हि ॥ विनिर्जिताशेषरिपोरहं सदा दृश्यो भवेयं जितषड्गुणात्मनः ॥५३ ॥

रूपत्वस्वतन्त्रत्वनित्यमलुप्तत्वानन्तरूपाः षड्गुणा यस्य तादृश आत्मा जितो वशीकृतो येन तस्य सदा दृश्यो भवेयम् । एतेन मद्भक्तस्य योगिनो ऽहं दृश्यो न तु भक्तिविमुखस्येति सूचितम् ॥ ५३ ॥ ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंविधोजीवन्मुक्तःप्रारब्धवशेन अनभिमानोभोगानश्नँस्तिष्ठेत् ततोमय्येवविलीयते मद्रूपोभवतीत्याह । ध्यात्वैवमिति ॥ ५४ ।

ध्यात्वैवमात्मानमहर्निशं मुनितिष्ठेत्सदा मुक्तसमस्तबन्धनः ॥
प्रारब्धमश्नन्नभिमानवर्जितो मय्येवसाक्षात्प्रविलीयते ततः ५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वधर्मापेक्षयाऽयमेवधर्मोज्यायानित्याह । आदौचेति । भवसंसारमादिमध्यावसानेषुसर्वथाभयशोकयोः कारणंविदित्वातत्कारणीभूतंविधिवादैर्यजेतेत्यादिभिश्चोदितंबोधितंसमस्तंकर्ममार्गंकाम्यंहित्वा अखिलात्मनांजीवानांस्वरूपभूतंमामात्मानं परमेश्वरंभजेत् । य

आदौ च मध्ये च तथैव चान्ततो भवं विदित्वा भयशोक कारणम् ॥ हित्वा समस्तं विधिवादचोदितं भजेत्स्वमात्मान मथाखिलात्मनाम् ॥ ५५ ॥

थाधनस्यार्जनेनादौदुःखंमध्येपालनकृतं तत्र राजादिकृतं भयमन्तेनाशेशोकपर्यंतसायिदुःखमेवं पदार्थमात्रेद्रष्टव्यम् ॥ ५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मय्यभेदभावनया नामरूपाविभागेन तद्रूप एवभवतीत्यमुमर्थं सदृष्टान्तमाह । आत्मनीति । आत्मनिसर्वाधिष्ठानेमयिइदंस्वस्वरूपं जीवमभेदेनविभावयन्यदा । तिष्ठतीतिशेषः । तदामयात्मनापरमेश्वरेणाऽभेदेनभवति अभिन्नोभवति । तत्रदृष्टान्तः यथासमुद्रेप्रविष्टं नद्यादि

आत्मन्यभेदेन विभावयन्निदं भवत्यभेदेन मयाऽत्मनातदा ॥ यथाजलं वारिनिधौ यथापयः क्षीरेवियद्व्योम्न्यऽनिले यथाऽनिलः ॥ ५६ ॥

जलंसमुद्रएव यथाक्षीरेगवादिक्षीरेप्रक्षिप्तंपयःक्षीरमेव यथाव्योम्निमहाकाशेघटाद्यवच्छिन्नाकाशोघटादिभङ्गे च यथाचर्मभस्त्रिकाद्यवच्छिन्नोवायुरनिलेमहावायौ नामरूपाविभागेनैकीभवतीत्यर्थः ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमात्मतत्त्वज्ञस्य जगत्सत्यत्वभ्रमःस्वतएवापैतीत्याह । इत्थमिति । हिरण्यर्थे । लोकसंस्थितोऽपिजीवन्मुक्तिदशायांप्रारब्धवशाल्लोक व्यवहारंकुर्वन्नपिजगन्मृषैवेतिविभावयन्सन् यदियदा इत्थमीक्षते ऐकात्म्यं जानीयात्तदा निवृत्तजगत्सत्यत्वभ्रमो भवतीति शेषः। तत्र हेतुः श्रुतियुक्तिमानतोनिराकृतत्वात् । अतोऽन्यदार्तमित्यादिश्रुतिरूपात् जगन्मिथ्यादृश्यत्वात् शुक्तिरजतवदितितदुपबृंहितानुमानरू

इत्थं यदीक्षेत हि लोकसंस्थितो जगन्मृषैवेतिविभावयन्मुनिः॥ निराकृतत्वाच्छ्रुतियुक्तिमानतो यथेन्दुभेदो दिशि दिग्भ्रमादयः॥ ५७॥

पात्मानतःप्रमाणतोनिराकृतत्वात् तत्रदृष्टान्तोयथेन्दुभेदः एकचन्द्रेद्विचन्द्रत्वभ्रमस्तदेकत्वज्ञानेननिवर्तते यथाच दिशिप्राच्यादौअन्यदिक्त्वभ्रमः सोऽपितत्त्वज्ञानान्निवर्तते । एवंभ्रमतःपुरुषस्य दिक्षुभ्रमणाद्भ्रमोनिकटवर्तिवृक्षादौच भ्रमणभ्रमस्तत्स्थैर्यज्ञानेन निवर्तते तद्वत् ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशज्ञानेमदाराधनमेवोपायइत्याह । यावदिति । अखिलं जगन्मदात्मकंमदधिष्ठानकंमाद्विवर्तभूतंयावन्नपश्येत्तावन्मत्प्राप्तयेश्रद्धालुः भगवदाराधनमेवज्ञानप्रापकमित्यत्र दृढविश्वासवान् अतिशयेनोर्जिताद्वृद्धिमतीभक्तिर्मयिभगवतिपूज्यताबुद्धिरूपालक्षणं चिह्नंयस्यसः ।

यावन्नपश्येदखिलं मदात्मकं तावन्मदाराधनतत्परो भवेत् ॥
श्रद्धालुरत्यूर्जित भक्तिलक्षणो यस्तस्य दृश्यो ऽहमहर्निशं हृदि ॥ ५८ ॥

तावन्मदाराधननिष्ठोभवेत् एवंहितस्यहृदि अहमहर्निशंदृश्योभवा मियेयथामांप्रपद्यन्ते तांस्तथैवभजाम्यहमितिस्मृतेः ॥ ५८ ॥

Nepal Sanskrit University, Balmeekі Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वोक्तवचनजातस्य श्रुतिसमत्वं कथमेतदालोचनमपिमदाराधनप्रतिबन्धकदुरितध्वंसोपायइत्याह रहस्यमिति । श्रुतिसारसङ्ग्रहत्वेनाति

रहस्यमेतच्छ्रुतिसारसङ्ग्रहं मया विनिश्चित्य तवोदितं प्रिय ॥ यस्त्वेतदालोचयतीहबुद्धिमान् स मुच्यते पातकराशिभिः क्षणात् ॥ ५९ ॥

गोपनीयता अप्रमाणशङ्काकलङ्कराहित्यंसूचितम् । आलोचयतिसम्यग्विचारयति ॥ ५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ भगवानुक्तमेवार्थसङ्क्षेपेण दार्ढ्यायपुनराह भ्रातरिति । यदीतियदित्यर्थे । यदीदंजगत् परिदृश्यते तत्सर्वमायैवेतिज्ञात्वेति शेषः चेतसासर्वंपरिहृत्यतत्रौदासीन्यंकृत्वामद्भावनयामदैक्यभावनया भावितंशुद्धंमानसंयस्यताहशास्तिष्ठ । इत्युपदिश्याशिषंप्राह निरामयः

भ्रातर्यदीदं परिदृश्यते जगन्मायैव सर्वं परिहृत्य चेतसा॥मद्भा वनाभावितशुद्धमानसः सुखी भवाऽऽनन्दमयो निरामयः६०

सन्सुखीभव। सर्वदुःखनिवृत्त्येतिभावः। ततोऽन्तरङ्गामन्यामाशिषमाह आनन्दमयोभवेति तद्रूपोभवेत्यर्थः। यद्यपिपूर्वमानन्दरूपत्वमस्त्येवतथाऽपितत्प्राप्तिर्विस्मृतकंठस्थभूषणप्राप्तिवत ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंरीत्यास्वोपासकस्यलोकपावनत्वमाह। यइति । कदावा यदाकदाचिदित्यर्थः । हृदानिर्मलेनान्तःकरणेन यो मामगुणं प्राकृतसत्त्व रजस्तमोरूपगुणरहितम् । सच्चिदानन्दरूपत्वात् । अतएवगुणादन्याकृतात्परंमायातीतम् । यदिवायद्वेत्यर्थे । गुणात्मकं सर्वज्ञत्वादिलोकोत्तरलावण्यादिगुणवानात्मामूर्तिर्यस्यतं दृश्यमानं रूपं सेवते । सद्विविधोऽप्युपासकःअहं मत्स्वरूपएव । मामकइत्यर्थोवा । प्रि-

यः सेवते मामगुणं गुणात्परंहृदा कदा वा यदि वा गुणात्मकम् ॥ सोऽहंस्वपादाञ्चितरेणुभिः स्पृशन्पुनाति लोकत्रितयं यथा रविः ॥ ६१ ॥

योहिज्ञानिनोऽत्यर्थमहंसचममप्रिय इत्युक्तेः । तादृशोभक्तःस्वपादलग्नरेणुभिःसंस्पृशन्लोकत्रयमपि पुनाति । अज्ञानध्वान्तनिरसनेनपवित्रीकरोति । यथारविःस्वकरैर्जगद्वितिमिरीकरोति तद्वत् ॥ ६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानीमेतद्ग्रन्थार्थालोचनासमर्थस्यपाठमात्रतोऽपिमहत्फलमाह । विज्ञानंविज्ञानजनकं करणंव्युत्पत्त्येतिबोध्यम् । वेदान्तैरुपनिषद्वाक्यैर्वेद्यंचरणंजगज्जन्मादिलक्षणंकर्मयस्यतेन ननुपाठमात्रादेताद्दशमहत्फलप्राप्तिःकथमित्याशङ्क्यभवत्येवेति सूचयंस्तत्रहेतुमाह । मद्वचने

विज्ञानमेतदखिलंश्रुतिसारमेकं वेदान्तवेद्यचरणेनमयैवगीतम् ।
यःश्रद्धया परिपठेद्गुरुभक्तियुक्तो मद्रूपमेतियदि मद्वचनेषुभक्तिः
॥ ६२ ॥ इतिश्री अध्यात्मरामायणे रामगीता समाप्ता ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसम्वादे उत्तरकाण्डे श्रीरामगीतायां पञ्चमःसर्गः ॥ ५ ॥

षुभक्तिर्विश्वासोयदीतिअर्थाद्गुरुवाक्यविश्वासस्यैव फलदायकत्वादितिभावः ॥६२॥ इत्यध्यात्मरामायणेउमामहेश्वरसम्वादे उत्तरकाण्डे सेतौपञ्चमःसर्गः ॥ ६२ ॥ श्रीरामचन्द्रार्पणमस्तु ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

श्रीराममन्त्रःखलु तारकाख्यः संसारसन्तारणसुप्रसिद्धः ॥ भक्-
त्याऽप्यभक्त्या समुपासितोयः श्रेयांसि सर्वाणि ददात्यवश्य
म् ॥ १ ॥ तन्तारकंसम्प्रतिपादयन्ती श्रीरामगीता सकलैः सुसे
व्या ॥ विज्ञप्तिमित्थंजनको विनीतः समर्पयत्यार्यजनेषुहर्षात् २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प,	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति
स्पर्द्धि	स्पार्द्धि	१	२	१	शाधि	शाधि	३	२	६	नाशे	नाशो	६	१	१
जीव्य	जीव्य	१	२	३	व्यत्र	व्यत्र	४	१	१	नन्वितिश	नन्वितिशे	६	२	१
सम्बीन्धनी:	सम्बन्धिनी:	२	२	१	ष्ठामे	ष्ठानमे	४	२	३	त्रिदा	विदा	६	२	२
ब्रह्म	ब्रह्म	२	१	२	ब्रह्म	ब्रह्म	४	२	१	मंवे	मेव	६	२	२
ब्रह्म	ब्रह्म	२	१	६	वलेन	वलेन	४	२	७	व्येतीत	व्यतेति	७	१	१
बोधोऽासि	बोधोऽसि	३	१	४	निघृत्ते	निवृत्ते	९	१	१	वीरहा	वीरहा	७	१	१
संवन्ध	सम्बन्ध	३	१	७	कत्व	कत्वा	९	१	१	सद्दष्ट	सद्दृष्ट	८	१	३
भवस्यंससार	भवस्यसंसार	३	२	१	नक	नैक	६	१	१	विशुद्धं	विशुद्ध	८	२	१
न्सार	सार	३	२	२	बेदान्त	वेदान्त	५	१	१	कारांत:	कारान्त:	८	२	२
पर्वग	पवर्ग	३	२	२	पूर्वं	पूर्व	५	१	२	वृत्ति	वृत्ति	९	१	१
वारिधि	वारिधि	३	२	२	बुद्ध्या	बुद्ध्या	५	१	६	स्त्रवाना	स्त्रना	९	२	१
					एवं	एव	९	१	६	वृत्यु	वृत्यु	१०	१	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
रीप	रपि	११	२	१
नर्हष्टा	नेर्हष्टा	१२	१	४
र्वाद्यो	र्वाद्यो	१२	१	७
त्याभिः	त्मभिः	१२	२	६
शुद्ध	शुद्ध	१३	१	१
जीवया	जीवयो	१३	१	२
निर्वाध	निर्बाध	१४	१	१०
भव्र	भव	१५	१	४
अर्जोद्र	अर्जोऽद्व	१६	२	६
द्वात्	द्वातू	१७	२	१

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
ल्लाभ	ल्लाभे	१८	१	८
इतिः	इति	१८	२	२
ज्ञानन	ज्ञानेन	१९	१	१
वुद्वया	वुद्धया	२०	१	६
रागादि	रागादि	२१	१	३
विलय	विलय	२१	१	७
धम	धर्म	२१	२	१
म्वस्य	म्वंयस्य	२१	२	२
वुवै	बुधे	२३	१	५
एव	एवं	२३	२	१
द्रष्ट	द्रष्ट्ट	२४	१	२

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
विभाव्यत	विभाव्यते	२५	१	४ मु
लिङ्गेद	लिङ्गदे	२६	१	२
वोधकः	वोधतः	२५	१	६
विज्ञानं ब्रह्म	विज्ञानंनिादि ध्यासनं ब्रह्म	२६	२ ६	३
भेदेरा	भेदरा	२७	१	६
रुपा	रूपाः	२७	२	६
आत्म	अत्मा	२७	२	६
मुनिति	मुनिास्ति	२८	१	२
भव	भवं	२८	२	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
तदकत्व	तदेकत्व	२६	२	७	वतथाऽ	वतथाऽ	३१	१	६	मद्वचने	मद्वचने	३२	१	२
भ्रमण	भ्रमणं	२६	२	८	कंठ	कण्ठ	३१	१	२	तन्त्तारकं	तत्तारकं	३२	२	३

नेपाल पाशुपत, यन्त्रालये मुद्रितः

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति रामगीता सटीका समाप्ता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह.नं. १६६४२

अथ रामगीता सटीका प्रारभ्यते ॥

मू० २।-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

|| ||

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ रामंरत्नकिरीटकुण्डलयुतं केयूरहारान्वितं
सीतालङ्कृतवामभागममलं सिंहासनस्थं विभुम् ॥ सुग्रीवादि
कपीश्वरैःसुरवरैः संसेव्यमानं सदा विश्वामित्रपराशरादिमुनि-
भिः संस्तूयमानं भजे ॥ १ ॥ इतिध्यात्वा ॥ श्रीमहादेवउवाच॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 श्रीगणेशायनमः ॥ ध्यायेत्वाजानुबाहुं धृतशरधनुषं बद्धपद्मासनस्थं पीतंवासोवसानं नवकमलदलस्पर्द्धिनेत्रं प्रसन्नम् ॥ वामाङ्कारूढ
सीतामुखकमलमिलल्लोचनं नीरदाभं नाना लङ्कारदीप्तं दधतमुरुजटामण्डलं रामचन्द्रम् ॥ १ ॥ ततइति जगतां यानि मङ्गलानि
 आनन्दास्तेषामुपजीव्यभूतं मङ्गलं ब्रह्मानन्दः सएवात्मास्वरूपं तेन तस्यैवानन्दस्यान्यानि भूतानिमात्रामुपजीवन्तीति श्रुतेः मङ्ग

ततोजगन्मङ्गलमङ्गलात्मना विधाय रामायणकीर्तिमुत्तमाम् ॥
चचार पूर्वाचरितं रघूत्तमो राजर्षिवर्य्यैरभिसेवितं यथा ॥ १ ॥

लानाश्चमङ्गलमिति स्मृतेश्च किंच जगतां मङ्गलं कल्याणं यस्मात्तादृशकल्याणरूपआत्मामूर्तिस्तया उत्तमांश्रोत्रादीनां मोक्षदत्वेना
त्युत्तमां रामायणकीर्तिं वाल्मीक्यादि कृत नानाविध रामायण प्रवर्तिकां रावणवधादिजां कीर्तिंविधाय स्थितोरघूत्तमः ततः सीताप
रित्यागानन्तरं पूर्वैः स्ववंशजैराचारितं प्रजापालनसत्कथाश्रवणादिकं केवलंतत्पूर्वजैरेवाचरितमितिन किंत्वन्यैरपि राजर्षिश्रेष्ठैर्य
थाऽभिसेवितं तथाचचार कृतवान् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदारागुरुदेवविश्वासलक्षणमहागुणवती यद्वा उदारा दानशीलाबुद्धिर्यस्य तेन पुरातनीः प्राचीनराजसम्बन्धिनीः शुभाः धर्माधर्मनिर्णेत्रीः प्रमत्तस्य स्वगोमण्डलमिश्रितब्राह्मणगोदानात् प्रमत्तस्य नृगस्य राज्ञो द्विजस्य शापात्तिर्यक्त्वमाह तेनाज्ञातकृतब्रह्मस्वापहारेण परमधा

सौमित्रिणापृष्ट उदारबुद्धिना रामःकथाःप्राह पुरातनीःशुभाः ॥
राज्ञः प्रमत्तस्य नृगस्य शापतो द्विजस्य तिर्यक्त्वमथाह राघवः
॥ २ ॥

र्मिकस्यापीदृश्यवस्थेति सर्वथाब्रह्मस्वविमुखताधर्मइतिसूचितम् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकान्तेविजने उपस्थितंप्राप्तम् विनयान्वितः सन्भक्त्यागुरुरयमिति बुद्ध्या प्रणम्य अनेनगुरूपसदनप्रकारउक्तः आसादितंशुद्धंभाव

कदाचिदेकान्त उपस्थितंप्रभुं रामं रमालालितपादपङ्कजम् ॥
सौमित्रिरासादितशुद्धभावनः प्रणम्यभक्त्याविनयान्वितोऽब्रवीत् ॥ ३ ॥

नं भावनाकरणमन्तः करणंयेनसः शुद्धान्तःकरणइतियावत् भगवदुक्तसत्कथाश्रवणेन शुद्धान्तःकरणइत्यर्थः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हे महामते महतीसर्वविषयामतिर्यस्य तस्य संवोधनं त्वं शुद्धवोधोऽसि अनवच्छिन्नचैतन्यरूपोऽसि सर्वदेहिनामात्माऽसि जीवानांतत् प्रतिविम्बत्वात् अधीशोऽसि अन्तर्यामित्वान्नियन्ताऽसि वास्तवभेदाभावाच्च सर्वात्मत्वम् औपाधिकभेदाच्च नियन्तृनियम्यभावोवोध्यः निराकृतिः अस्मदादिवत्स्वार्जितकर्माधीनशरीराकृतिरहितः नन्वेवंसर्वैः कथमेवंनज्ञायतेऽतआह ज्ञानदृशां स्वयमेवप्रतीयसे ज्ञायतेऽ

त्वं शुद्धवोधोऽसि हि सर्वदेहिनामात्माऽस्यधीशोऽसि निरा-
कृतिःस्वयम् ॥ प्रतीयसे ज्ञानदृशां महामते पादाब्जभृङ्गाहितस
ङ्गसाङ्गिनाम् ॥ ४ ॥

नेनेतिज्ञानं वेदान्तवाक्यजातं तदेवदृक्दर्शनसाधनंयेषां तेषामितिसंवन्धसामान्येषष्ठी तैरित्यर्थः तादृशदृक्लाभश्च त्वद्भक्त्यधीनइत्याह पादेति त्वच्चरणकमलयोर्भृङ्गवदाहितःकृतः सङ्गोयेन तादृशान्तः करणसङ्गवतां त्वच्चरणकमल सङ्गिशान्तः करणवतामित्यर्थः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

अथ प्रार्थयते अहमिति भवरूपंससारस्यापवर्गो निवृत्तिर्यस्मात्तादृशंतवपादाम्बुजंप्रपन्नोऽस्मिशरणंप्राप्तोऽस्मि योगिभावितं योगीभिः सं न्सारमुक्तये भावितम् अनेनतस्य भवापवर्गत्वे सदाचारः प्रमाणमुक्तम् प्रार्थनीयमाह अपारवारिधिरूपंयदज्ञानंसंसारमूलकारणं यथासुखम

अहं प्रपन्नोऽस्मि पदाम्बुजं प्रभो भवापवर्गं तव योगिभावितम् ॥ यथाञ्जसाज्ञानमपारवारिधिं सुखं तरिष्यामि तथाऽनुशाधि माम् ॥ ५ ॥

क्लेशेन तरिष्यामि तथा मामनुशाधिशिक्षय अपारवारिधिमित्यनेनसपारप्रसिद्धसमुद्राद्व्यतिरेकउक्तः अशक्यतरणताऽनेनध्वनिता ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथोत्तरमवतारयति श्रुत्वेति रामः सौमित्रिवचः श्रुत्वा अथशब्दोवाक्यालङ्कारे तदा श्रवणाव्यवहितकाले एवप्रपन्नानां भक्तानामार्ति संसारदुःखंहरतितादृशः प्रपन्नाभ्रमादिहीना भक्तानुग्रहपरा च धीर्यस्यसः क्षितिपालानां राज्ञां भूषणभूतोज्ञानरूपतमसउपशान्तये त

श्रुत्वाथ सौमित्रिवचोऽखिलं तदाप्राहप्रपन्नार्तिहरःप्रसन्नधीः ॥
विज्ञानमज्ञानतमोपशान्तये श्रुतिप्रपन्नं क्षितिपालभूषणः ॥ ६ ॥

दर्थम् सन्धिरार्षः श्रुतिभिः तमेवविदित्वाऽतिमृत्युमेतीत्यादिश्रुतिभिः प्रपन्नं तत्फलकत्वेन बोधितं विज्ञानमात्मतत्वज्ञानमिति सामान्य तः प्रथमंप्राह ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथतादृशज्ञानप्राप्तये क्रमेणबहिरङ्गान्तरङ्गसाधनान्याह आदाविति स्ववर्णाश्रमेषु शास्त्रेण वर्णिता याः क्रियानित्यनैमित्तकयज्ञदानादिरूपास्ताः कृत्वा समासादितशुद्धमानसः प्राप्तान्तःकरणशुद्धिः तत्पूर्वमुपात्तसाधनः तदनुष्ठानपूर्वकमेवउपात्तानिसाधनानि शमदमादीनियेन तादृशः अनेनकर्मणां बहिरङ्गत्वं शमादीनामन्तरङ्गत्वं स्फुटमेवोक्तम् किंच शमदमवैराग्यदार्ढ्यपर्यन्तं कर्मानुष्ठामेवेति

आदौ स्ववर्णाश्रमवर्णिताः क्रियाः कृत्वा समासादितशुद्धमानसः
समाप्य तत्पूर्वमुपात्तसाधनः समाश्रयेत्सद्गुरुमात्मलब्धये॥ ७॥

सूचितम् ततस्तत्कर्मानुष्ठानं समाप्य त्यक्त्वा संन्यस्येतियावत् आत्मलब्धये आत्मज्ञानाय तत्फलकाय तत्वमस्यादिवाक्यार्थविचाराय सद्गुरुंश्रोत्रियंब्रह्मनिष्ठमित्यादि लक्षणलक्षितं समाश्रयेत् सेवेत अनेनव्युत्पत्तिबलेन स्वयमेववाक्यार्थविचारः क्रियमाणो न फलायेति सूचितम् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसारस्यभ्रमिमच्चक्ररूपत्वात्तन्निवृत्तेश्चतत्कारणाज्ञाननिवृत्तिमूलकत्वदज्ञाननिवृत्तेश्चतत्त्वज्ञानकसाध्यत्वात्तत्त्वज्ञानस्यचवेदान्तविचारसाध्यत्वात्तदर्थंगुरुसमाश्रयणमित्याह क्रियेति भवःसंसारश्चक्रवद्विपरिवर्तमानईर्यते कथ्यते तदेवोपपादयति आदृताआदरपूर्वपूर्वजन्मार्जिताक्रियाएनस्यशरीरोद्भवस्यजन्मनोहेतुः तत्रजन्मनिसुरागिणोविपयाभिलाषवतः तौ शास्त्रप्रसिद्धौ धर्मेतरौ धर्माधर्मौ प्रियाप्रियौसुखदुः

क्रियाशरीरोद्भवहेतुरादृताप्रियाप्रियौतौभवतःसुरागिणः ॥
धर्मेतरौतत्रपुनः शरीरकंपुनः क्रियाचक्रवदीर्यतेभवः ॥ ८ ॥

खजनकौभवतःकस्यचिदधर्मएवसुखत्वबुद्ध्याप्रवृत्तिः कस्यचिद्धर्मएवंकदाचिदित्यप्यूह्यम् एवंतत्रोत्पादितकर्मणापुनःशरीरंपुनःक्रियाइत्येवंचक्रवद्विपरिवृत्तिः । यथाचक्रेभ्राम्यमाणेऽधोभागः कदाचिदुपरिउपरितनश्चाधः पुनरुपरिपुनरधएवंजन्मक्रिययोर्जन्यजनकभावेनपरिवृत्तिरिति बोध्यम् ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यचाज्ञानमेवमूलमित्याह अज्ञानमेवेति अत्रविधौसंसारनिवृत्तिलक्षणेकर्तव्येऽर्थेतज्ज्ञानमेवमूलकारणत्वादज्ञानज्ञानमेवविधीयते साध-
नत्वेनेतिशेषः ननुकर्मैवतन्नाशकमस्तुकिंज्ञानेनेत्याशङ्क्याह विद्यैवज्ञानमेवतन्नाशविधौमूलाज्ञानंनाशनेपटीयसीसमर्थानकर्मसमर्थमितिशेषः

अज्ञानमेवास्याहिमूलकारणंतज्ज्ञानमेवात्रविधौविधीयते॥ विद्यै
वतन्नाशविधौपटीयसीनकर्मतज्जंसविरोधमीरितम् ॥ ९ ॥

यतस्तत्तज्जमज्ञानजम् आत्मस्वरूपाज्ञानजन्यदेहाद्यभिमानजन्यत्वात्कर्मणोज्ञानजन्यत्वंबोध्यम् ननुतज्जन्यस्यापितन्नाशकत्वंवृश्चिककर्क
व्यादौदृष्टमित्याशङ्क्यतज्जन्यत्वंवाननाशकत्वप्रयोजकंकिन्तुसविरोधत्वमेवेत्याह यतसविरोधंतदीरितंनाशकमुक्तमित्यर्थः ॥ ९ ॥ ॥ ८ ॥

CC-0. In Public Domain. Digitization by eGangotri

अतएवकर्मणानाज्ञानहानिरित्याह नाज्ञानेत्यादि यतःकर्मणाविरोधाभावान्नाज्ञाननाशनापिरागनाशोवस्तुतः कर्मानुष्ठानात्पुनः सदो-
षंक्षयिफलत्वादिदोषविशिष्टंकर्मैवोद्भवेत्कर्मणश्चपुनःसंसारएवेतिनमुक्तिप्रत्याशा ततस्तस्माद्बुधोविवेकीज्ञानविचारवान् ज्ञायतेऽनेने-

नाज्ञानहानिर्नचरागसङ्क्षयोभवेत्ततः कर्मसदोषमुद्भवेत् ॥ ततः
पुनः संसृतिरप्यवारितातस्माद्बुधोज्ञानविचारवान्भवेत् ॥ १० ॥

तिज्ञानंवेदान्तवाक्यंतद्विचारवान्भवेत ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानींज्ञानस्यैवमोक्षहेतुत्वंवक्तुंज्ञानकर्मसमुच्चयवादंदूषणायानुवदतिसार्धेन नन्विति नान्वितशङ्कायाम् यथाविद्यावेदमुखेनश्रुतिपुराण-
लक्षणेन ब्रह्मविदाप्नोतिपरम् इत्यादिनापुरुषार्थसाधनमुक्ता तथा उभाभ्यांमवपक्षाभ्यांयथाखेपक्षिणांगातिः तथैवज्ञानकर्मभ्यांप्राप्यते
ब्रह्मशाश्वतम् इत्यादिनाक्रियाऽपितत्साधनत्वेनोक्ता किंच क्रियाकर्तव्यत। तृतीयार्थेप्रथमा कर्तव्यतयाआवश्यकेकृत्यैअवश्यकर्तव्यत-

ननुक्रियावेदमुखेनचोदितायथैवविद्यापुरुषार्थसाधनम् ॥ कर्त्तव्य
ताप्राणभृतःप्रचोदिताविद्यासहायत्वमुपैतिसापुनः ॥ ११ ॥

याप्रचोदितानित्यनैमित्तिकरूपा एवंचनदकरणेप्रत्यवायोत्पत्त्याज्ञानोत्पत्तिरेवनस्यात् तस्मात्सापुनर्विद्यायाःसहायत्वंप्राप्नोतिघटेजन- ॥ ६ ॥
नीयेयथादण्डचक्रादीनांपरस्परसहायता ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्तव्यमेतस्मात्कर्मवैविद्रूणानि कर्मेति वीरहा वा एष देवानां योऽग्निमुद्वासयते यावज्जीवमग्निहोत्रं जुहोति इतिश्रुतिः तत्रासिद्धान्तीशङ्कते नान्वाति ध्रुवं स्थिरं कार्यमिदं पुरुषार्थमोक्षजनिकाविद्यायतः स्वतन्त्राविनाऽपिसहायेन स्वकार्यसंपादनेसमर्था यथातेजस्तिमिरनिवर्तन-

कर्माकृतौदोषमपिश्रुतिर्जगौतस्मात्सदाकार्यमिदंमुमुक्षुणा॥ननु स्वतन्त्राध्रुवकार्यकारिणीविद्यानकिञ्चिन्मनसाऽप्यपेक्षते ॥ १२

समर्थंमनसाऽपिकिञ्चित्सहायभूतंवस्तुनापेक्षते तथाफलेजननीयेसहायान्तरसंभावनाऽपिनेतिभावः अनेनविद्याफलजननेनिरपेक्षास्वतन्त्र-त्वात्तेजोवदित्यनुमानंसूचितम् ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समुच्चयवादीपरिहराति नेति त्वदुक्तंनेत्यर्थः सत्यकार्यः अक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवति इत्यादिवेदनबोधितःस्थिरकार्योऽपि-अध्वरः यथाऽन्यानपिकारकादिकान् आरादुपकारकप्रयाजाद्यङ्गानिदेशकालादीनिचप्रकाङ्क्षते तथाविद्यापिअग्निहोत्रंजुहोतिइत्यादिवि

नसत्यकार्योऽपिहियद्वदध्वरः प्रकाङ्क्षतेऽन्यानपिकारकादिकान्
तथैवविद्याविधितः प्रकाशितैर्विशिष्यते कर्मभिरेवमुक्तये ॥ १३ ॥

धिवाक्यतःतत्समूहेनप्रकाशितैः कर्मभिः सहितैवमुक्तयेविशिष्यतइत्यर्थः विद्याफलदानेकर्मापेक्षा अङ्गित्वात् प्रयाजाद्यङ्गापेक्षदर्शादिवदितिसत्प्रतिपक्षानुमानमनेनसूचितम् ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदनूद्यसिद्धान्तीदूषयति केचिदिति यत्केचिद्वितर्कवादिनशतिज्ञानकर्मणोसमुच्चित्यमुक्तिसाधनंवदन्तितदप्यसत् यथाकेवलंकर्म मोक्ष साधनमित्यसत्तथातन्मीलितमित्यप्यसत् तत्रहेतुर्दृष्टविरोधकारणात् दृष्टोयोविरोधः सर्वलोकदृष्टविरोधरूपात्कारणात्तदसदित्यर्थः विरो

केचिद्वदन्तीतिवितर्कवादिनस्तदप्यसदृष्टविरोधकारणात् ॥
देहाभिमानादभिवर्धतेक्रियाविद्यागताहङ्कृतितःप्रसिद्ध्यति १४

धमेवाह देहाभिमानात्क्रियावर्धतेअनात्मनिदेहादावात्मत्वाभिमानात्क्रियावृद्धिः विद्यातुगताहङ्कृतितः गताहङ्कृतिर्यस्यतस्यनष्टाहङ्कृतेः प्रसिद्ध्यति सार्वविभक्तिकस्तासिः एवंचाहङ्कारसत्तामूलकत्वात्क्रियाज्ञानयोः समुच्चयोविरुद्धइत्यर्थः ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथपूर्वपक्षयुक्तानुमानंदूषयनविद्यास्वरूपमाह विशुद्धंविज्ञानंयेभ्यस्तेषांवेदान्तवाक्यानांयाद्विशेषेणरोचनंरलयोरभेदादालोचनंविचार
स्तेनाश्रिताप्रापितायाचरमाआत्मवृत्तिब्रह्माकारांतःकरणवृत्तिः साविद्येतिभण्यते।विद्भिरितिशेषः पुनःसमुच्चयवारणायविद्याकर्मणो
वैषम्यमाह कर्मयज्ञादिअखिलकारकादिभिःकर्तव्यकर्मादिभिरङ्गैश्चसाहितंसदुदेति फलोन्मुखंभवति विद्यापुनरखिलकारकादिनिहन्ति

विशुद्धविज्ञानविरोचनाञ्चिताविद्याऽऽत्मवृत्तिश्चरमेतिभण्यते ॥
उदेतिकर्माखिलकारकादिभिर्निहन्ति विद्याऽखिल कारकादि-
कम् ॥ १५ ॥

तत्रकर्तृत्वादिबुद्धिंनिहन्ति सकलव्यापारपरित्यागेनब्रह्मणिसमाप्तिर्हिविद्या अतःस्वोत्पत्तौचित्तशुद्धिद्वाराकर्मसापेक्षास्वफलेजनायितव्यं-
तन्निरपेक्षैवान्यथाविद्यास्वरूपस्यैवभङ्गापत्तेरितिपूर्वपक्षयुक्तहेतोरसिद्धिरितिभावः ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपसंहरन्मुमुक्षोर्वृत्तिप्रकारमाह तस्मादिति विद्याविरोधाद्विद्यायाःकर्मणासह विरोधेनसमुच्चयोनभवेत्तस्मात्सुधीर्मुमुक्षुरशेषतःकर्मत्यजेत् काम्यंतुसर्वथात्याज्यमेवनित्यनैमितिकमापियावच्चित्तशुद्धिकर्तव्यमेव ततोऽपिब्रह्माणिचित्तस्थैर्यपर्यन्तं कर्तव्यमेव ततस्तदनुसन्धानप्र-

तस्मात्त्यजेत्कार्यमशेषतः सुधीर्विद्याविरोधान्नसमुच्चयोभवेत् ।
आत्मानुसन्धानपरायणःसदा निवृत्तसर्वेन्द्रियवृत्तिगोचरः १६

तिबन्धकत्वात्प्रयोजनाभावाच्चतदापित्याज्यमेवेतिभावः इदानींमुमुक्षुकर्तव्यमाह निवृत्ताःसर्वेषामिन्द्रियाणां गोचराविषयाःशब्दादयोयस्मात्तादृशःसन् आत्मनःसच्चिदानन्दस्यानुसन्धानमेवपरमयनंप्राप्यंयस्यतथाविधोभवेत् अत्रेन्द्रियप्रत्याहारःकर्तव्यत्वेनोक्तस्तेनतत्पूर्वंप्राणायामाद्यर्थादाक्षिप्तम् ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रागिविरागिभेदेनकर्मणोकर्तव्यताकर्त्तव्यतेआहयावदिति माययाविद्ययाशरीरादिष्ववानात्मसुआत्मधीरहङ्कर्तेत्यादिरूपायावद्वर्तततेतावद्वि
धिवादकर्मणाम् विधिर्यजेतेत्यादिश्रुतिर्वादःकर्तव्यतावोधकोयेषांकर्मणांविधेयोवशवर्त्तितत्कर्मकर्ताभवेत तदपगमेतुतदाखिलं जगन्नेतीति

याकच्छरीरादिषुमाययात्मधीस्तावद्विधेयोविधिवादकर्मणाम् ॥
नेतीतिवाक्यैरखिलं निषिद्ध्य तज्ज्ञात्वापरात्मानमथत्यजेत्क्रि
याः ॥ १७ ॥

वाक्यैः अथातआदेशोनेतिनेतिइत्यादिवाक्यैर्निषिध्य मिथ्यात्वेननिर्णीयतद्विलक्षणतयासत्यत्वेनपरमात्मस्वरूपंज्ञात्वाक्रियास्त्यजेत् निरू
पितमेतत् ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मविज्ञानेसत्यवश्यमविद्या निवर्ततइत्याह यदेति आत्मनिशुद्धेन्तःकरणेपरमात्मनईशस्यात्मनोजीवस्यचयोविभेदोमायान्तःकरण
रूपोपाधिद्वयकृतोविभेदोभेदस्तस्यभेदकं नाशकंभास्वरंप्रकाशशीलंयद्विज्ञानमितरवृत्त्युपमर्दनपूर्वकंब्रह्माकाराऽखण्डाद्याचित्तिर्यदाऽवभाति

यदापरात्मात्मविभेदभेदकंविज्ञानमात्मन्यवभाति भास्वरम् ॥
तदैवमायाप्रविलीयतेऽञ्जसासकारकाकारणमात्मसंसृतेः॥१८॥

असंभावनादितिरस्कारेणोदेति तदैव सकारकाजन्मान्तरप्रापककर्मसहितामायातत्तज्जीवोपाधिभूताविद्याऽञ्जसाझटितिप्रविलीयतेनश्यति
ननुतन्नाशेऽपिसंसारनाशःकथमतोमायाविशेषणम् आत्मसंसृतेःकारणंसंसारस्योपादानकारणमेवंचतन्नाशेकार्यनाशोभवत्येवेतिभावः १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं पुनर्दार्ढ्यायाह श्रुतीति तत्त्वमसीत्यादिश्रुतिरूपैःप्रमाणैस्तज्जनितज्ञानेन नाशितासाविद्याकथमपिकार्यकारिणीभविष्यतीति काकुरत्र सर्वथानेत्यर्थः असतःकार्यकारित्वासंभवादितिभावः पुनश्चतस्यानोद्भवइत्याह विज्ञानमात्रादिति अमलाशुद्धाद्वितीयतःद्विती

श्रुतिप्रमाणाभिविनाशिताचसाकथंभविष्यत्यपिकार्यकारिणी ॥
विज्ञानमात्रादमलाद्वितीयतस्तस्मादविद्यानपुनर्भविष्यति १९

यात्मविषयकाद्विज्ञानमात्रादितरासहकृतान्निदिध्यासनपरिपाकजज्ञानाचसोनष्टातस्मात्सापुनर्नभविष्यति रज्ज्वज्ञानमूलकस्य सर्पस्य र ज्जुज्ञानेन निवृत्तस्ययथानपुनरुत्पात्तिरितिभावः ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्यायाइतरनिरपेक्षायाएवमोक्षकारणत्वमुक्तंयुक्तिपूर्वकंपुनःकथयतिश्रोतृदार्ढ्याय। यदीति। यदिनष्टातत्त्वज्ञाननाशिता सा न पुनः प्रसूयतेनोत्पद्यतेतदाकारणाभावादहंमतिःकथंभवेत्। कथमपिनभवेदित्यर्थः। तदभावाच्चतत्कालेकर्माभावइतिस्वफलजननेसास्वतन्त्राइ

यदिस्मनष्टा नपुनःप्रसूयते कर्ताऽहमस्येति मतिः कथं भवेत्॥
तस्मात्स्वतन्त्रा न किमप्यपेक्षते विद्या विमोक्षाय विभाति केवला॥ २०॥

तरनिरपेक्षैवनकिमप्यपेक्षते द्वितीयस्यासंभवात् अतः केवलाऽसहायैवविमोक्षायविभातितत्फलिकाभवतीत्यर्थः॥ २०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रार्थेश्रुतिरपिप्रमाणमित्याह सेति साप्रसिद्धा नकर्मणानप्रजयाधनेनत्यागेनैकेअमृतत्वमानशुः इत्यादिकातैत्तिरीयश्रुतिःप्रशस्तानामर्थ वादैःप्राशस्त्येनबोधितानामपिकर्मणांन्यासंत्यागंसादरंस्फुटमाह नतुकर्मसमुच्चयमित्यर्थः तथावाजिनां वाजसनेयिनाम् एतावदरेखल्वमृत

सातैत्तिरीयश्रुतिराहसादरंन्यासंप्रशस्ताखिलकर्मणां स्फुटम् ॥
एतावदित्याहचवाजिनांश्रुतिर्ज्ञानंविमोक्षायनकर्मसाधनम् २१

त्वम् इत्यादिका ज्ञानंविमोक्षायसाधनं नकर्मेत्येतदाह ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहङ्कारत्यागरूपकारणवैषम्यात् क्रियाज्ञानयोर्वैषम्यमुक्त्वा फलमयुक्तमपिवैषम्यमाह विद्येति हेसमुच्चयवादिन् त्वयाक्रतुरग्निष्टोमादिर्विद्यासमत्वेनदर्शितः परन्तुसमोदृष्टान्तोनोदाहृतः अनेनक्रतुर्विद्यासमः श्रुतिबोधितकर्तव्यताकत्वादित्यनुमानान्निरस्तम् दृष्टान्ताभावात् अन्वय्येवानुमानन्नव्यातिरेकीतिभावः एतच्चाकरेविस्तरेणप्रपञ्चितम् ननुविद्याकर्मणीसमे एकफलत्वाच्चक्रदण्डादिवदित्यनुमान-

विद्या समत्वेनतु दर्शितस्त्वया क्रतुर्नदृष्टान्त उदाहृतः समः ॥
फलैःपृथक्त्वाद्बहुकारकैः क्रतुःसंसाध्यतेज्ञानमतोविपर्ययम् २२

मितिचेत्तत्राह फलैः पृथक्त्वात षष्ठ्यर्थेतृतीया फलानांभेदादित्यर्थः एवंचस्वरूपासिद्धोहेतुरितिभावः समानकारकत्वमपिहेतुर्नेत्याह क्रतुर्बहुभिः कारकैरहंममताभिमानरूपैरान्तरैर्वाह्यैश्चदेशकालादिनियमैश्चसाध्यते ज्ञानन्त्वतोविपर्ययवदतोनतयोः साम्यमितिभावः २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वकरणेप्रत्यवायभिया कर्मकार्यमितिचेन्नेत्याह सप्रत्यवायइति कर्मत्यागेनाहंनिश्चयेनाहंप्रत्यवायसहितोभविष्यामीत्येवंशुद्धात्मानि-
अनात्मधर्मस्यधीरमज्ञस्यतत्त्वज्ञानविकलस्यप्रसिद्धा नतुतत्त्वदर्शिनः तस्याहंबुद्धेरभावात् पापादेरनात्मधर्मतानिश्चयाच्च तस्माद्बुधैःकर्म

स प्रत्यवायोह्यहमित्यनात्मधीरज्ञप्रसिद्धा नतु तत्वदर्शिनः ॥ तस्माद्बुधैस्त्याज्यमपि क्रियात्मभिर्विधानतःकर्मविधि प्रकाशितम् ॥ २३ ॥

क्रियात्यभिः षष्ठ्यर्थेतृतीया क्रियाफलसक्तचित्तानां विधानतोविधानेनेतिकर्तव्यतयायुक्तंकर्म विधिभिरवश्यकर्तव्यतयाबोधितमपि-
त्याज्यमित्यर्थः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाविरक्तस्यकार्यमाह। श्रद्धेति । गुरुशास्त्रयोर्विश्वासःश्रद्धातदन्वितोबुभुत्सुःशुद्धमानसोऽपि निष्कामकर्मानुष्ठानाच्छुद्धमानसश्चगुरोः प्रसादाल्लब्धतत्त्वमसीतिवाक्यतः श्रुतमात्मजीवयोरैकात्म्यंविज्ञाय मननिदिध्यासनपरिपाकाभ्यांसाक्षात्कृत्य। चएवार्थः । साक्षा

श्रद्धान्वितस्तत्त्वमसीतिवाक्यतो गुरोःप्रसादादपिशुद्धमानसः॥
विज्ञायचैकात्म्यमथात्मजीवयोः सुखी भवेन्मेरुरिवाप्रकम्पनः
॥ २४ ॥

त्कृत्यैवसुखी भवेत्। सकलदुःखहीनोभवेदित्यर्थः ।· अप्रकम्पनःविषयाभिलाषाक्षोभितान्तःकरणः ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महान्वयंविवरीतुंवाक्यार्थस्यपदार्थबोधपूर्वकत्वमाह । आदाविति । विधानतः भ्रमप्रमादराहित्येनवाक्यार्थविज्ञानस्य विधावुत्पत्तौआ
दौप्रथमंमुख्यमितियावत् । पदार्थावगतिःकारणम् । हिप्रसिद्धं तस्यपदत्रयंतत्त्वमसीति । तत्रतत्पदार्थःपरमात्मासर्वज्ञत्वादिगुणः त्वं

आदौ पदार्थावगतिर्हि कारणं वाक्यार्थविज्ञानविधौ विधानतः ॥
तत्त्वंपदार्थौ परमात्मजीवकावसीतिचैकात्म्यमथानयोर्भवेत्
॥ २५ ॥

पदार्थोजीवः अनयोस्तत्त्वंपदार्थयोरैकात्म्यंतद्बोधकमसीतिपदम् ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुसर्वज्ञत्वादिगुणस्येशस्य किञ्चिज्ज्ञत्वधर्मवता जीवेनैकात्म्यं विरुद्धमित्याशङ्क्याह । प्रत्यगिति । अहंबुद्धिविषयत्वं प्रत्यक्त्वं जीवधर्मः परोक्षत्वमीशधर्मस्तदादिधर्मकृतमात्मनोः परमात्मजीवात्मनोर्विरोधं विहाय त्यक्त्वा तयोः संशोधितां युक्तिभिः सम्यग्विचारितां तत्त्वंपदाभ्यां शक्त्यभावेऽपि वक्ष्यमाणप्रकारया लक्षणया लक्षितां ज्ञातां चिदात्मतां संगृह्य तत्त्वंपदोपास्थितां विषयां कृत्वा स्वमात्मानं तथा ज्ञात्वाऽथ एकात्मज्ञानानन्तरमद्वयो भवेत् । चित्स्वरूपतां प्राप्तइव भवेत् । पूर्वं प्राप्तस्वरूप एव विस्मृतकण्ठचामीकरन्यायेन च तत्प्राप्तिः तद्वदित्युक्तम् ।

प्रत्यक्परोक्षादिविरोधमात्मनोर्विहायसंगृह्यतयोश्चिदात्मताम् ॥
संशोधितांलक्षणयाचलक्षितांज्ञात्वास्वमात्मानमथाद्वयोभवेत्
॥ २६ ॥

अयंभावः तत्त्वंपदयोर्द्वावर्थौ वाच्यो लक्ष्यश्च तत्र तत्पदस्य मायोपाधिः सर्वज्ञत्वादिविशिष्टो वाच्यः त्वंपदस्यापि किञ्चिज्ज्ञत्वादिविशिष्टो मायाकार्याविद्योपाधिरविद्यावदन्तःकरणोपाधिर्वाच्यः उभयोरपि विशेषणांशत्यागेन शुद्धश्चिदात्मा लक्ष्यः तत्र वाच्ययोर्विरुद्धधर्मकत्वादैक्यासंभवेऽपि लक्ष्ययोरैक्यं निर्बाधमेवेति ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तलक्षणास्वरूपमाह । एकात्मकत्वादिति जहतीलक्षणाजहत्स्वार्थलक्षणायथागङ्गायांघोषइत्यत्रगङ्गापदार्थस्यप्रवाहस्यघोषाधारतानुपपत्त्यामर्वथातत्परित्यागेनतीररूपार्थलक्षणा साप्रकृते न एकात्मत्वात् । विशेष्यांशस्यैकत्वात्सर्वथास्वार्थत्यागाभावात् । तथाजहल्लक्षणताजहत्स्वार्थलक्षणात्त्वमपिअत्रनसंभवति । यथाकाकेभ्योदधिरक्ष्यतामित्यादौकाकपदस्यस्वार्थात्यागेनैवदध्युपघातकेलक्षणा सापिन । विरोधतःविशेषणत्यागेनसर्वथास्वार्थत्यागाभावात् । अतोभागलक्षणाजहदजहल्लक्षणायुज्यते । अदोषतःपूर्वोक्तदोषाभावात्

एकात्मकत्वाज्जहती न सम्भवेत्तथाऽजहल्लक्षणता विरोधतः॥
सोऽयंपदार्थाविवभागलक्षणायुज्येततत्त्वंपदयोरदोषतः॥२७॥

विशेष्यांशस्यात्यागाद्विशेषणांशस्यत्यागाच्च । तत्रदृष्टान्तः । सोऽयंपदार्थाविव । यथासोऽयंदेवदत्तइत्यत्रतद्देशादिविशिष्टोऽतीतानुभवविषयोवातत्पदार्थः एतद्देशादिविशिष्टोऽनुभूयमानोवेदंशब्दार्थः । तयोश्चाविरुद्धविशेषणकत्वादैक्यासंभवेनदेशादिरूपविशेषणत्यागेनानुभवगतानीतत्वादिविशेषणत्यागेनवालक्षणयैक्यंतद्वदितिभावः ॥ २७ ॥ ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथत्याज्यत्वायजीवोपाधिमाह । रसादी ति । रसापृथ्वीआदिर्येषांतानिपञ्चीकृतानियानिभूतानितेभ्यःसंभवोयस्यतत् । पञ्चीकरणंचे
त्थम् एकैकंभूतंद्विधाविभज्यतत्रैकंभागंचतुर्धाविभज्यतेषांभागानांस्वेतरभूतचतुष्टयार्धभागचतुष्टयेसंयोजनेएकैकंभूतंपञ्चात्मकंभवतिभा

रसादिपञ्चीकृतभूतसंभवंभोगालयंदुःखसुखादिकर्मणाम् ॥ शरी
रमाद्यन्तवदादिकर्मजंमायामयंस्थूलमुपाधिमात्मनः ॥ २८ ॥

गाधिक्याच्चप्रातिस्विकतयाभूगादिव्यवहारोऽपि । सुखदुःखयोरादीनियानिकर्माणितेषांभोगस्तत्कर्मजसुखदुःखानुभवस्तस्यालयमाश्र
यभूतमाद्यन्तवत् उत्पत्तिनाशयोगि आदिकर्मजंभाग्भवीयकर्मजन्यंमायामयंपरम्परयामायाविकारः तद्विकारभूतविकारत्वात् । एतच्छरी
रमात्मनःस्थूलमुपाधिंवदन्तीतिशेषः ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसूक्ष्मोपाधिमाह। सूक्ष्ममिति । बुधाःअन्यत्स्थूलशरीरविलक्षणंशरीरंलिङ्गदेहाख्यमात्मनउपाधिंविदुः । तत्स्वरूपमाह। सूक्ष्मंचक्षु-
राद्यविषयः मनोबुद्धिदशेन्द्रियैःप्राणैश्चयुतम् सङ्कल्पात्मकंमनः निश्चयात्मिकाबुद्धिः घ्राणरसनाचक्षुस्त्वक्श्रोत्रेतिपञ्चज्ञानेन्द्रियाणि वा-

सूक्ष्मंमनोबुद्धिदशेन्द्रियैर्युतंप्राणैरपञ्चीकृतभूतसंभवम् ॥ भोक्तुः
सुखादेरनुसाधनंभवेच्छरीरमन्यद्विदुरात्मनोबुधाः ॥ २९ ॥

क्पाणिपादपायूपस्थानिकर्मेन्द्रियाणि प्राणापानव्यानोदानसमानाश्चप्राणास्तैर्युतमेतत्सप्तदशसमुदायात्मकम्। तदाधारभूतान्याह ।अप
ञ्चीकृतभूतसंभवंतेभ्यउत्पन्नमतएवादृश्यम् ।तथाभोक्तुःसुखादेःसुखदुःखाद्यनुभवस्यानुसाधनम् स्थूलशरीरस्यैतदनुगतस्यैवभोगसाधनत्व
मितिभावः । एतद्वियोगेनैवमरणव्यवहारइतिबोध्यम् ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिजीवोपाधिद्वयमुक्त्वाईशोपाधिमाह । अनादीति । अनादि उत्पत्तिहीनम् । नानाविधपरिणामशालितयापरिणामरूपेणनश्वरामिति अनादित्वमात्रोक्त्यासूचितम् । अनिर्वाच्यम् सत्त्वासत्त्वाभ्यांनिर्वक्तुमशक्यम् कारणंसकलप्रपञ्चस्यजनकम् ईदृशीमायातुब्रह्मणःपरमी-

अनाद्यनिर्वाच्यमपीहकारणं मायाप्रधानंतुपरंशरीरकम् ॥ उपाधिभेदात्तुयतःपृथक्स्थितं स्वात्मानमात्मन्यवधारयेत्क्रमात् ॥ ३० ॥

श्वरव्यवहारसंपादकत्वादुत्कृष्टंप्रधानंशरीरकम् । स्वार्थेकः । एवमुपाधिभेदादेकमेवचैतन्यंयतः पृथक्स्थितंजीवईशइतिभेदबुद्धिविषय मतोलक्षणयोपाधिपरित्यागेनस्वात्मानमात्मनिअवधारयेदभेदेनजानीयात् । क्रमाच्छ्रवणमनननिदिध्यासनक्रमेणेत्यर्थः ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवाक्यार्थविचारफलमाह । कोशेष्विति । आनन्दमयस्य ब्रह्मत्वेअन्नमयप्राणमयमनोमयविज्ञानमयेषुचतुर्षुकोशेषुतत्तत्सङ्गात्तत्तदाकृतिर्विभाति यथाजपादिसङ्गात्स्फटिकोऽनेकाकृतिर्भाति । आनन्दमयस्यापि जीवत्ववादिनातुतेनसहपञ्चस्तु कोशेष्वितिबोध्यम् । अस्मि-

कोशेषुपञ्चस्वपितत्तदाकृतिर्विभातिसङ्गात्स्फटिकोपलोयथा ॥ असङ्गरूपोऽयमजोयतोऽद्वयोविज्ञायतेऽस्मिन्परितोविचारिते ॥ ३१ ॥

न्महावाक्येपरितोविचारितेसम्यग्विचारितेसत्ययमात्माऽसङ्गरूपःअन्नमयादिभिःसङ्गरहितः । असङ्गोनहिसज्जते। इतिश्रुतेः । अजोऽद्वयश्चविज्ञायते । स्थूलोऽहमित्यादिस्त्वज्ञस्यतत्तत्कोशप्रसङ्गात्प्रतीतिःस्फटिकवत् तत्त्वज्ञस्यतुनतथाप्रतीतिरितिभावः । एवंचतत्तदुपाधिकृततत्तद्रूपताप्रतीतिनिरासएव विचारफलमितिभावः ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जाग्रदाद्यवस्थाऽपि बुद्धेर्धर्मोनात्मधर्मइत्याह । बुद्धेरिति । इहआत्मनिस्वप्नादिभेदेन जाग्रत्स्वप्नसुषुप्तिभेदेन यात्रिधावृत्तिर्दृश्यतेसाऽपि गुणत्रयात्मनः सत्त्वरजस्तमोरूपगुणत्रयस्वरूपाया बुद्धेर्धर्मः । उक्तावस्थात्रयस्योक्तमूलकत्वात् । एतदवस्थात्रयस्यास्मिन्नवस्थात्रय-साक्षिणि आत्मनि भानं मृषा बुद्ध्यध्यास निबन्धनं न तु वास्तव मित्यर्थः । अन्योऽन्यतोऽव्यभिचारतस्तस्यावस्था त्रयस्यस्व रूपतो

बुद्धेस्त्रिधा वृत्तिरपीह दृश्यते स्वप्नादि भेदेन गुणत्रयात्मनः ॥ अन्योऽन्यतोऽस्मिन्व्यभिचारतोमृषा नित्ये परे ब्रह्मणि केवले शिवे ॥ ३२ ॥

मृषात्वात्तज्ज्ञानस्य मृषात्वमेव । स्वप्नकाले जाग्रत्सुषुप्त्योरभावात् । जाग्रतिइतरद्वयस्याभावात् सुषुप्तावितरयोरभावात्परस्परं व्यभिचारोबोध्यः आत्मनस्तदनाश्रयत्वंविशेषणैराह । नित्येउत्पत्तिनाशशून्येपरेगुणत्रयातीते ब्रह्मणिव्यापकेकेवलेऽसङ्गेशिवआनन्दरूपे एवंभूतेसदैकरसेपरस्परव्यभिचारधर्माभानमसंभवीति भावः ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसाज्यत्वायसंसारमूलभूतांवृत्तिमाह । देहेति । एषांसङ्घातइतरेतराध्यासविषयात् अजस्रंयावद्धियो बुद्धेर्वृत्तिस्तमोमूलतयाऽज्ञ

लक्षणाऽज्ञत्वज्ञापिका यावत्परिवर्तते तावद्भवोद्भवःसंसारोद्भवोभवेत् । तमःपदंरजसोऽप्युपलक्षणम् । रजस्तमःप्रधानाबुद्धिः संसारहेतु

देहेन्द्रियप्राण मनश्चिदात्मनां सङ्घादजस्रं परिवर्तते धियः ॥
वृत्तिस्तमोमूलतयाऽज्ञलक्षणा यावद्भवेत्तावदसौ भवोद्भवः ॥३३॥

त्वात्सर्वथासाज्येति भावः ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत महावाक्यविचारस्य कर्तव्यमाह । नेतीति । अथात आदेशोनेतिनेति इति प्रमाणेननिराकृतं मिथ्यात्वेनगृहीतमखिलंजगत्येनसः ततोहृदामस्त्वप्रधानेनमनसासम्यगास्वादितं चिल्लक्षणंघनामृतंदुःखासंभिन्नंसुखंयेनसः । स्वर्गादितुपरिणामदुःखत्वात्तत्संभिन्नमेव । एवंभूतोऽशेषंजगद्देहेन्द्रियादिदृश्यसमूहंत्यजेत् हानोपादानबुद्धिविषयंनकुर्यात् । किन्तूदासीनस्तत्रभवेत् । ननुदेहेन्द्रियादिभिरेवतज्ज्ञान

नेतिप्रमाणेन निराकृताखिलो हृदासमास्वादितचिद्घनामृतः ॥
त्यजेदशेषं जगदात्तसद्रसं पीत्वा यथाऽम्भः प्रजहाति तत्फ-
लम् ॥ ३४ ॥

लाभात्कथमुपजीव्यस्यत्यागइत्याशङ्क्यदृष्टान्तदर्शनेनपरिहरति । यथातृषावान्आत्तः सद्रसोमाधुर्ययेनतादृशं नारिकेलनारङ्गादि फलान्तवर्त्यम्भःपीत्वा तत्स्थानभूतंतत्फलं जहाति तत्रोदासीनोभवति तद्वत्सर्वदृश्यसारांशोब्रह्मतल्लाभसतिनिः सारंदृश्यंनोपादेयंनापिहेयमितिभावः । यतोभयादिसंभावनातद्धेयमित्युच्यते ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतरस्यानित्यत्वेनतत्रवैराग्यार्थमात्मनएवनित्यत्वमाह । कदाचिदिति । कदापीत्यर्थः । अनवः उत्पत्त्यनन्तरंविद्यमानोहिनवः । तेन जन्मानन्तरास्तित्वंव्यावर्तितं नवत्वाभावेनैवजीर्णत्वाभावादवस्थान्तरापत्तिरूप परिणामोऽपिनिरस्तः ।अनेनअस्तिजायतेवर्द्धतेविपारिणम तेऽपक्षीयते नश्यतीति षड्भाव विकार राहित्यमुक्तम् । एवंचैतद्भिन्नं सर्वमुक्तषड्भावविकारवत्त्वादनित्यमिति ततोविरज्येतेतिबोधित-

कदाचि दात्मान मृतोनजायते नक्षीयते नापिविवर्धतेऽनवः ॥
निरस्तसर्वातिशयः सुखात्मकः स्वयम्प्रभः सर्वगतोऽयमद्वयः ३५

म् । यतऽईदृशोऽतएवनिरस्तः सर्वस्यदेहेन्द्रियादेरतिशयोमहत्त्वं येनस्वलाभात्सः यल्लाभान्नापरोलाभइतिःश्रुतेः यतःसुखात्मकः आनन्द स्वरूपः स्वयम्प्रभःस्वप्रकाशकश्च देहेन्द्रियादिस्तु दुःखस्वरूपः परप्रकाश्यश्च । यस्यभासासर्वमिदंविभाति । इतिश्रुतेः । सर्वगतोव्यापकः अयमहंबुद्धिविषयःप्रत्यगात्माऽपिअद्वयः उक्ताद्वयब्रह्मस्वरूपएव । नततोऽतिरिक्तइतिभावः । अयमात्माब्रह्म । इतिश्रुतेः ॥ ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुएवंविधेविकारशून्येआत्मनिजन्ममरणादिप्रवाहरूपसंसारभानंकथमितिशङ्कते। एवंविधेइति।दुःखमयःदुःखप्रचुरः।उत्तरयति। अज्ञानतइ
तिअज्ञानमूलकोयोध्यासोदेहान्तः करणादौअहंममेत्यध्यासस्तद्वशात्। एवंचभ्रान्तिरूपातत्प्रतीतिरितिभावः। नन्वेवंकथंतस्यसंसारस्यनि

एवंविधे ज्ञानमये सुखात्मके कथंभवो दुःखमयःप्रतीयते ॥
अज्ञानतोऽध्यासवशात्प्रकाशतेज्ञानेविलीयेत विरोधलःक्षणात्॥
॥ ३६ ॥

वृत्तिस्तत्राह। ज्ञानेति। आविर्भूतइतिशेषः। ज्ञानस्याज्ञानविरोधित्वात्तदुत्पत्तिक्षणएवकारणभूताज्ञाननाशात्तत्कार्यसंसारस्यापि वि
लयइत्यर्थः। यथारज्जुज्ञाननरज्जौसर्पस्यलयइत्यर्थः॥ ३६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाध्यासलक्षणमाह । यदन्यदिति । यदन्यत्सर्पादिकमन्यत्ररज्ज्वादौभ्रमात्भ्रमजनकाद्दोषाद्विभाव्यतेविज्ञायतेअमुंविपश्चितोविद्वांसोऽध्यासइत्याहुः । यथाऽसर्पभूतेरज्ज्वादौ अहिविभावनंसर्पारोपोरज्ज्वबुद्धिमूलकस्तद्वदीश्वरेऽपिजगद्देहादिसंसारात्मकंसर्वंविभाव्य-

यदन्यदन्यत्र विभाव्यते भ्रमादध्यासमित्याहुरमुंविपश्चितः॥
असर्पभूतेऽहिविभावनंयथा रज्ज्वादिकेतद्वदपीश्वरे जगत्॥३७॥

तेआत्मज्ञानाभावाद्यथार्थतयाज्ञायते ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनिन्नगङ्कानेकीदृशोऽध्यासोनिमित्तंतदाह विकल्पेति सर्वविकल्पकारणमायारहितेवस्तुतस्तत्सङ्गरहितेचिदात्मकेचित्स्वरूपेसर्वकार णेनिरामयेदुःखासंभिन्नानन्दमयेकेवलसर्वविकारशून्यपरेदृश्याविलक्षणेब्रह्मणिव्यापके आत्मनिप्रथममहङ्कारः कल्पितः सएवाध्यासः ।

विकल्पमायारहितेचिदात्मके ऽहङ्कारएष प्रथमः प्रकल्पितः ॥
अध्यासएवात्मनिसर्वकारणे निरामयेब्रह्मणि केवलेपरे ॥ ३८॥

अहंबुद्ध्यात्मकोऽध्यासएवसर्वसंसारकारणमितिभावः ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बुद्धिनिष्ठएवसंसारोनत्वात्मनिष्ठइत्यत्रान्वयव्यतिरेकौप्रमाणयति। इच्छादीति। परेसर्वसाक्षिणि आत्मनिसंसृतिहेतवःभासमानसंसारकारणं सदा कालत्रयेऽपिइच्छादिरागादिसुखादिधार्मिकाः इच्छापक्षेरागद्वेषौसुखदुःखंइत्येवमादिद्वन्द्वधार्मिकाःधियएवधीषुसतीषुसंसारइत्यन्वयमु

इच्छादिरागादिसुखादिधार्मिकाः सदा धियः संसृतिहेतवः परे ॥
यस्मात्प्रसुप्तौतदभावतःपरः सुखस्वरूपेणविभाव्यतेहिनः ॥३९॥

क्त्वातद्व्यतिरेकमाहयस्मात्कारणात्प्रसुप्तौतदभावा तुधीवृत्त्यभावात परआत्मानोऽस्माभिःतृतीयार्थेपुषष्ठी। सुखरूपेणस्वस्वरूपमात्रेणाविभाव्यतेनिश्चीयते नतु संसारित्वेनेतिभावः सुप्तोत्थितस्तुसुखमहमस्वाप्समितिप्रत्यभिज्ञानुभवात्तदात्मस्वरूपनिश्चयोऽस्तीतितात्पर्यम् ॥ ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथपुनस्तत्त्वं पदार्थस्वरूपमाह । अनादीति । अनादिर्याऽविद्यातदुद्भवो यस्या बुद्धेरन्तःकरणस्यतत्रविम्बितःप्रतिबिम्बिताश्रितःप्रकाशः सजीवइतीर्यते आत्मापरात्माधियः साक्षितया धीधर्मासङ्गेनैवपृथक्स्थितः । अन्तर्यामितयेत्यर्थः जीवोऽहंसुखीत्यादिप्रकारेणान्तःकर

अनाद्यविद्योद्भवबुद्धिबिम्बितोजीवप्रकाशोऽयमितीर्यते चितः ॥
आत्माधियः साक्षितया पृथक् स्थितो बुद्ध्या परिच्छिन्नपरः
सएव हि॥ ४० ॥

णधर्माध्यासवान्परमात्मातु साक्षितयासर्वत्रविद्यमानोऽपितथेतिभावः। अतएवबुद्ध्यापरिच्छिन्नपरः बुद्धिलक्षणपरिच्छेदरहितःअतएव परः । एवंचज्ञानेनप्रतिबिम्बाधार विलयप्रतिबिम्बस्यविलयात्सजीवः सएवपरमात्मैवहिप्रसिद्धं सइत्यस्यचानुत्तबोध्या ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ बुद्ध्यात्मनोःपरस्पराध्यासवशात् परस्परधर्मभानमितिदार्ढ्यायपुनराह । चिद्बिम्बेति । चिदात्मचेतसोरन्योन्याध्यासवशात् परस्परतादात्म्यारोपाज्जडाजडत्वंप्रतीयते । चेतसोवृत्तीनांज्ञानत्वं जीवात्मनोजडत्वंप्रतीयते । अतएवज्ञानाश्रयआत्मेति चितएवताकिंककव्यवहारः । जीवात्मनिजडात्मानिजडात्माकथ्यते बुधैरितिस्मार्तव्यवहारश्च । अत्रहेतुः । चिदित्यादि । चिद्बिम्बस्यसाचिदाभासः अ

चिद्बिम्बसाक्ष्यात्मधियांप्रसङ्गतस्त्वेकत्रवासादनलाक्तलोहवत्॥
अन्योऽन्यमध्यासवशात्प्रतीयते जडाजडत्वंचचिदात्मचेतसोः
॥ ४१ ॥

क्षेःसहितः साक्षःसेन्द्रियः सचासावात्मामनःधीरन्तःकरणंतेषांप्रकृष्टसङ्गादतिसान्निकर्षादध्यासइत्यर्थः । अनलाक्तलोहवत् अग्नितप्तलोहपिण्डवत् अत्रदृष्टान्तः । अग्निधर्मोदाहकत्वं लोहधर्मश्चवर्तुलत्वाद्यनलेभासते । तत्रहेतुरेकत्रवासात् परस्पराविभागेनवृत्तेरित्यर्थः । तद्वदेतयोरपि परस्परधर्माध्यासइत्यर्थः ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं दार्ढ्यायपुनराह । गुरोरिति । वेदवाक्यतइत्यनेन श्रवणंगुरोःसकाशादपि । ततश्चानेनमननमुक्तम् । ताभ्यांसञ्जातोविद्यया ज्ञानरूपस्यात्मनोऽनुभवोयस्यसः । अनेनकृतनिदिध्यासनइत्यर्थः । तं चिदानन्दस्वरूपं स्वात्मानमुपाधिवर्जितं रहितोपाधिधर्ममात्मस्थं

गुरोःसकाशादपिवेदवाक्यतः सञ्जातविद्यानुभवोनिरीक्ष्य तम् । स्वात्मानमात्मस्थमुपाधिवर्जितं त्यजेदशेषं जडमात्मगोचरम् ॥ ४२ ॥

हृत्स्थंनिरीक्ष्य अपरोक्षीकृत्याशेषंजडं दृश्यंत्यजेत् । तत्रोदासीनोभवेदिति भावः ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

ज्ञेयंनिरुपाधिकं स्वरूपंश्लोकद्वयेनाह प्रकाशोति अहंप्रकाशरूपः स्वप्रकाशः परप्रकाशहीनः परप्रकाशरूपोयथाघटादिः अजोजन्मादि हीनः अद्वयःसजातीयद्वितीयरहितः असकृद्विभातः सकृदपिपरेणभासकान्तरेणप्रकाशितः सकृद्विभातः नसकृद्विभातोसकृद्विभातः नत

प्रकाशरूपोऽहमजोऽहमद्वयोऽसकृद्विभातोऽहमतीवनिर्मलः ॥
विशुद्धविज्ञानघनोनिरामयःसम्पूर्णआनन्दमयोऽहमक्रियः॥४३॥

त्रसूर्योभातिनचन्द्रतारकमितिश्रुतेः नतद्भासयतेसूर्यइतिस्मृतेश्च अतीवनिर्मलः मायाकृतावरणविक्षेपरहितः विशुद्धविज्ञानघनः विशुद्धचिदेकरसः निरामयःकर्तृत्वाभिमानरहितः सम्पूर्णःदेशकालपरिच्छेदहीनः आनन्दमयः आनन्दरूपः स्वार्थेमयट् अक्रियः परिणामहीनः ॥ ४३ ॥

CC-0. In Public Domain. Digitization by eGangotri

सदैवेति अहंसदैवकालत्रयेऽपिमुक्तःसर्वधर्मरहितः अचिन्त्यशक्तिमान यः परमात्मा अतिन्द्रियज्ञानमिन्द्रियातिरिक्तज्ञानरूपः यतोवाचो निवर्त्तन्ते अप्राप्यमनसासहइतिश्रुतेः अविक्रियात्मकोऽपरिणामी अनन्तपारःअन्तःकालतःपारःपरन्तीरन्तावविद्यमानौ यस्य तेनदेश

सदैवमुक्तोऽहमचिन्त्यशक्तिमानतीन्द्रियज्ञानमविक्रियात्मकः॥
अनन्तपारोऽहमहर्निशंबुधैर्विभावितोऽहंहृदिवेदवादिभिः ॥४४॥

कालपरिच्छेदहीनः ईदृशोयःपरमात्मावुधैर्हृदि अहर्निशंविभावितः सोऽहमित्यर्थः ॥ ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स.

एवंभावनायाःफलमाह एवमिति उक्तरीत्यासदाआत्मानं अखण्डितात्मनाविषयानाकृष्टचित्तेन विचारमाणस्यध्यायतः धातूनामनेकार्थ
 त्वात् चरमाणएवचारमाणःस्वार्थेऽण् विशुद्धभावनाब्रह्माकारान्तः करणवृत्तिरुदन्तीतिशेषः साचोदितावारकैर्देहान्तरमापकैकर्मभिः स

एवंसदात्मानमखण्डितात्मनाविचारमाणस्यविशुद्धभावना ॥
हन्यादविद्यामचिरेणकारकैरसायनंयद्वदुपासितंरुजः ॥ ४५ ॥

हाविद्यामाचिरेणशीघ्रमेवहन्यात् यथोपामितंसेवितंरसायनं रुजोहन्यात्तद्वत् ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रध्यानेइतिकर्तव्यतामाह विविक्तइति निर्जनइत्यर्थः आसीनोयथोचितपद्मासनाद्युपविष्टः उपारतेन्द्रियः तेनशमदमादिसम्पन्नः विनि र्जितात्माप्राणायामादिभिर्जितान्तःकरणः अतएवविमलान्तराशयोविशुद्धचित्तः विज्ञानदृक्विज्ञानएवदृक्भानंयस्यसः द्रष्टृदृश्यभा

विविक्तआसीनउपारतेन्द्रियोविनिर्जितात्माविमलान्तराशयः॥
विभावयेदेकमनन्यसाधनोविज्ञानदृक्केवलआत्मसंस्थितः॥४६

नरहितः अनेननिर्विकल्पकसमाधिरुक्तः अनन्यसाधनः तत्त्वज्ञानातिरिक्तमुक्तिसाधनास्तित्वभ्रमरहितः केवलोऽसङ्गः आत्मसंस्थितः आत्मन्येवसंस्थासमाप्तिः सञ्जातायस्यसतेन नकदापिविषयान्तरसञ्चारवच्चित्तः विभावयेत् ध्यायेत् ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 किंच यदेतत्भूतंभविष्यद्वर्तमानं विश्वंपरमात्मादर्शनंभासकोयस्यतत तस्यभासासर्वमिदंविभातीति श्रुतेः तत्सर्वकारणेमायासान्निधाना
तुसर्वोपादानत्वेनाभिमतेआत्मनिविलापयेत् उपादानसत्ताव्यतिरेकेणकार्यसत्तांनपश्येत् तादृशस्यलक्षणमाह सम्पूर्णः अवाप्तसमस्तका

विश्वंयदेतत्परमात्मदर्शनं विलापयेदात्मनि सर्वकारणे ॥
पूर्णश्चिदानन्दमयोऽवतिष्ठते न वेद बाह्यं न च किञ्चिदान्त
रम् ॥ ४७ ॥

मः तस्यकाम्याभावात् चिदानन्दमयः तद्रूपोऽवतिष्ठते बाह्यमान्तरंच दृश्यंनजानाति सर्वत्रब्रह्मदर्शनादिति भावः ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाधिसिद्धेः पूर्वंयत्कर्तव्यंतदाह । पूर्वमिति । समाधेः सकलविषयव्यासङ्गनिवृत्तिपूर्वकं ब्रह्माकारवृत्तिः समाधिस्ततः पूर्वमखिलंस चराचरंजगत् ओङ्कारमात्रं विचिन्तयेत् । ओङ्कारोमीयतेऽ नयेतिमात्रा प्रमाणं बोधकत्वेन परिच्छेदकोयस्यतथाजानीयात् । तदेवविवृ

पूर्वं समाधे रखिलं विचिन्तये दोङ्कारमात्रं सचराचरं जगत् ॥
तदेव वाच्यं प्रणवो हि वाचको विभाव्यते ज्ञानवशान्न बो-
धतः ॥ ४८ ॥

णोति तदेवेति । जगदेवेत्यर्थः । प्रणवोवाचकोविभाव्यतेएतत्ताहिप्रसिद्ध इत्यर्थः । इयंभावनाज्ञानवशादेवनबोधकः । बोधोनिर्विशेषब्रह्मसा क्षात्कारस्तदुत्तरंनेत्यर्थः । तस्यसर्ववृत्त्युपमर्दकत्वात् ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमर्थं विवृणोति । अकारेति । अकारसञ्ज्ञस्तद्वाच्यः पुरुषो हि विश्वको विश्व एव विश्वकः विश्वशब्देन परिभाषितः अयं जाग्रत्साक्षी विराट् ततः स्वप्नसाक्षी तैजसः तेन पदेन परिभाषितः लिङ्गदेहाभिमानी हिरण्यगर्भ उकारकः उकारप्रतिपाद्य ईर्यते । ततः सुषुप्तिसाक्षी प्राज्ञपदवाच्यो

अकारसञ्ज्ञः पुरुषो हि विश्वको ह्युकारकस्तैजस ईर्यते क्रमात्
प्राज्ञो मकारः परिपठ्यतेऽखिलैः समाधिपूर्वं न तु तत्त्वतो
भवेत् ॥ ४९ ॥

मायोपाधिको मकारस्तद्वाच्यः परिपठ्यतेऽखिलैर्वेदैः । इयं भावना समाधिपूर्वं समाधेः पूर्वमेव न तत्त्वतः तत्त्वसाक्षात्कारे सति न भवेत् । सर्वस्य ब्रह्मणि प्रविलयात् ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविलापनप्रकारमाहद्वाभ्याम् । विश्वंत्विति । उकारमध्ये बहुधाव्यवस्थितं स्थूलदेहनिबंधनंस्थूलदेहाभिमानेन स्थितं विश्वम्पुरुषंतद्वाचकंमकारम् च विलापयेत् । तुश्चार्थे । विलीनम्भावयेत् ततस्तैजसंलिङ्गदेहाभिमानिनम् पुरुषं तद्वाचकंप्रणवस्यद्वितीय वर्णमुकारं वि-

विश्वं त्वकारं पुरुषं विलापयेदुकारमध्येबहुधा व्यवस्थितम् ।
ततोमकारेप्रविलाप्यतैजसंद्वितीयवर्णं प्रणवस्य चान्तिमे ॥५०॥

लीनविश्वकम्मकारे विलाप्याविलीनम्भावयित्वा ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तनस्तादृशंमकारंतद्वाच्यंप्राज्ञंचकारणंकारणत्वाभिमानिनंपुरुषमिहात्मनि चिद्घनेपरे विलापयेत् तथाभावयेत् । ततः सोऽहंमर्वोपाधिष्ठानंपरब्रह्मविभावयेत् । तद्विशिनष्टि । सदाविमुक्तिमत् नित्यमुक्तम् । नन्वहंपदार्थस्यरागद्वेषादिमलिनस्यकथं ब्रह्मत्वभावनेसा

मकारमप्यात्मनि चिद्घने परे विलापयेत्प्राज्ञमपीह कारणम् ।
सोऽहं परं ब्रह्म सदा विमुक्तिमद्विज्ञानदृङ्मुक्त उपाधितोऽमलः ॥ ५१ ॥

शङ्कयाहंपदार्थंविशिनष्टि । उपाधितोमुक्तः अतएवामलःतथाभावनेसाधनं विज्ञानदृक्विज्ञानं ब्रह्ममात्रप्रत्ययाविच्छेदरूपादृक् निदिध्यासनं सत्साक्षात्कारेसाधनंयस्यसः ॥ ५१ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंभावनावतोलक्षणमाह । एवमिति । उक्तप्रकारेणसदाजातापरमात्मन्येकभावना यस्यसः परिविस्मृतमखिलंपुत्रदेहादिर्येननः। अत एवस्वस्वरूपानन्देनैवतुष्टःनतुविषयानन्देन । तस्यपरिणामेदुःखरूपत्वात्ततो विरक्तइत्यर्थः । साक्षान्नित्यात्मनिसुखप्रकाशकः साक्षा

एवं सदा जातपरात्मभावनः स्वानन्दतुष्टःपरिविस्मृताखिलः ॥
आस्ते स नित्यात्मसुखप्रकाशकः साक्षाद्विमुक्तोऽचलवारिसि
न्धुवत् ॥ ५२ ॥

दौपाधिकनामरूपभेदरहितत्वेननित्यमखण्डितमात्मस्वरूपंयत्सुखंप्रकाशश्चतद्रूपः एवंरूपो विमुक्तोजीवन्मुक्तः । अचलंनिश्चलंवारियस्यताद्दशसिन्धुवदास्ते । विषयमम्बन्धरूपलहरीरहितआस्तइत्यर्थः ॥ ५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशस्यमत्प्राप्तिर्भवत्येवेत्याह । एवमिति । उक्तप्रकारेणसदाऽभ्यस्तसमाधेर्योगिनः निवृत्ताःसर्वेषामिन्द्रियाणांगोचराविषयाःशब्दादयो यस्य विनिर्जिताअशेषारिपवःकामादयोयेनतस्य । तज्जयेनविषयेष्वन्तःकरणाप्रवृत्तिः । अतएव सर्वज्ञत्वनित्यत्वनित्यतृप्तत्वबोध

एवं सदाऽभ्यस्तसमाधियोगिनो निवृत्तसर्वेन्द्रियगोचरस्य हि ॥ विनिर्जिताशेषरिपोरहंसदा दृश्यो भवेयं जितषड्गुणात्मनः ॥५३ ॥

रूपत्वस्वतन्त्रत्वनित्यमलुप्तत्वानन्तरूपाषड्गुणायस्यतादृशआत्मजितो वशीकृतोयेनतस्य सदादृश्योभवेयम् । एतेनमद्भक्तस्ययोगिनो ऽहंदृश्योनतुभक्तिविमुखस्येति सूचितम् ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंविधोजीवन्मुक्तःप्रारब्धवशेन अनभिमानोभोगानश्नँस्तिष्ठेत् ततोमय्येवविलीयते मद्रूपोभवतीत्याह । ध्यात्वैवमिति ॥ ५४ ।

ध्यात्वैवमात्मानमहर्निशं मुनितिष्ठेत्सदा मुक्तसमस्तबन्धनः ॥
प्रारब्धमश्नन्नभिमानवर्जितो मय्येवसाक्षात्प्रविलीयते ततः ५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सर्वधर्मापेक्षयाऽयमेव धर्मोऽज्यायानित्याह । आदाविति । भवं संसारमादिमध्यान्तमानेषु सर्वथा भयशोकयोः कारणं विदित्वा तत्कारणीभूतं विधिवादयोजितं त्याग्यादिभिश्चोदितं बोधितं समस्तं कर्ममार्गं काम्यं हित्वा अखिलात्मनां जीवानां स्वरूपभूतं मामात्मानं परमेश्वरं भजेत् । य

आदौ च मध्ये च तथैव चान्ततो भवं विदित्वा भयशोककारणम् ॥ हित्वा समस्तं विधिवादचोदितं भजेत्स्वमात्मानमथाखिलात्मनाम् ॥ ५५ ॥

थाधनस्य अर्जनेनादौ दुःखं मध्ये पालनकृतं तत्र राजादिकृतं भयमन्ते नाशे शोकपर्यवसायि दुःखमेवं पदार्थमात्रे द्रष्टव्यम् ॥ ५५ ॥

CC-0. In Public Domain. Digitization by eGangotri

मय्यभेदभावनया नामरूपाविभागेन तद्रूप एवभवतीत्यमुमर्थं सदृष्टान्तमाह । आत्मनीति । आत्मनिसर्वाधिष्ठानेमयिइदंस्वस्वरूपं जीवमभेदेनविभावयन्यदा । तिष्ठतीतिशेषः । तदामयात्मनापरमेश्वरेणाऽभेदेनभवति अभिन्नोभवति । तत्रदृष्टान्तः यथासमुद्रेप्रविष्टं नद्यादि

आत्मन्यभेदेन विभावयन्निदं भवत्यभेदेन मयाऽत्मनातदा ॥
यथाजलं वारिनिधौ यथापयः क्षीरेवियद्व्योम्न्यऽनिले यथाऽनिलः ॥ ५६ ॥

जलंसमुद्रएव यथाक्षीरेगवादिक्षीरेप्रक्षिप्तंपयःक्षीरमेव यथाव्योम्निमहाकाशेघटाद्यवच्छिन्नाकाशोघटादिभङ्गे च यथाचर्मभस्त्रिकाद्यवच्छिन्नोवायुरनिलेमहावायौ नामरूपाविभागेनैकीभवतीत्यर्थः ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमात्मतत्त्वज्ञस्य जगत्सत्त्वभ्रमःस्वतएवापैतीत्याह । इत्थमिति । हिरण्यर्थे । लोकसंस्थितोऽपिजीवन्मुक्तिदशायांप्रारब्धवशाल्लोकव्यवहारंकुर्वन्नपिजगन्मृषैवेतिविभावयन्सन् यदियदा इत्थमीक्षते ऐकात्म्यं जानीयात्तदा निवृत्तजगत्सत्यत्वभ्रमो भवतीति शेषः । तत्र हेतुः श्रुतियुक्तिमानतोनिराकृतत्वात् । अतोऽन्यदार्तमित्यादिश्रुतिरूपात् जगन्मिथ्यादृश्यत्वात् शुक्तिरजतवदितितदुपबृंहितानुमानरू

इत्थं यदीक्षेत हि लोकसंस्थितो जगन्मृषैवेतिविभावयन्मुनिः ॥ निराकृतत्वाच्छ्रुतियुक्तिमानतो यथेन्दुभेदो दिशि दिग्भ्रमादयः ॥ ५७ ॥

पात्मानतःप्रमाणतोनिराकृतत्वात् तत्रदृष्टान्तोयथेन्दुभेदः एकचन्द्रेद्विचन्द्रत्वभ्रमस्तदेकत्वज्ञानेननिवर्तते यथाच दिशिप्राच्यादौअन्यदिक्त्वभ्रमः सोऽपितत्त्वज्ञानान्निवर्तते । एवंभ्रमतःपुरुषस्य दिक्षुभ्रमणाद्भ्रमोनिकटवर्तिवृक्षादौच भ्रमणभ्रमस्तत्स्थैर्यज्ञानेन निवर्तते तद्वत् ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशज्ञानेमदाराधनमेवोपायइत्याह । यावदिति । अखिलं जगन्मदात्मकंमदधिष्ठानकंमाद्विवर्तभूतंयावन्नपश्येत्तावन्मत्प्राप्त्येश्रद्धालुः भगवदाराधनमेवज्ञानप्रापकमित्यत्र दृढविश्वासवान् अतिशयेनोर्जिताऽवृद्धिमतीभक्तिर्मयिभगवतिपूज्यताबुद्धिरूपालक्षणं चिह्नंयस्यसः ।

यावन्नपश्येदखिलं मदात्मकं तावन्मदाराधनतत्परो भवेत् ॥
श्रद्धालुरत्यूर्जित भक्तिलक्षणो यस्तस्य दृश्यो ऽहमहर्निशं हृदि ॥ ५८ ॥

तावन्मदाराधननिष्ठोभवेत् एवंहितस्यहृदि अहमहर्निशंदृश्योभवा मियेयथामांप्रपद्यन्ते तांस्तथैवभजाम्यहमितिस्मृतेः ॥ ५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वोक्तवचनजातस्य श्रुतिसमत्वं कथमेतदालोचनमपिमदाराधनप्रतिबन्धकदुरितध्वंसोपायइत्याह रहस्यमिति । श्रुतिसारसङ्ग्रहत्वेनाति

रहस्यमेतच्छ्रुतिसारसङ्ग्रहं मया विनिश्चित्य तवोदितं प्रिय ॥
यस्त्वेतदालोचयतीहबुद्धिमान् स मुच्यते पातकराशिभिः
क्षणात् ॥ ५९ ॥

गोपनीयता अप्रमाणशङ्काकलङ्कराहित्यंसूचितम् । आलोचयतिसम्यग्विचारयति ॥ ५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथ भगवानुक्तमेवार्थसंक्षेपेण दार्ढ्यायपुनराह भ्रातरिति । यदीतियादित्यर्थे । यदीदंजगत् परिदृश्यते तत्सर्वंमायैवेतिज्ञात्वेति शेषः चेतसासर्वंपरिहृत्यतत्रौदासीन्यंकृत्वामद्भावनयामदैक्यभावनया भावितंशुद्धंमानसंयस्यतादृशास्तिष्ठ । इत्युपदिश्याशिषंप्राह निरामयः

भ्रातर्यदीदं परिदृश्यते जगन्मायैव सर्वं परिहृत्य चेतसा॥ मद्भावनाभावितशुद्धमानसः सुखी भवाऽऽनन्दमयो निरामयः ६०

सन्सुखीभव। सर्वदुःखनिवृत्तस्योतिभावः। ततोऽन्तरङ्गामन्यामाशिषमाह आनन्दमयोभवेति तद्रूपोभवेत्यर्थः । यद्यपिपूर्वमानन्दरूपत्वमस्त्येवतथाऽपितत्प्राप्तिर्विस्मृतकंठस्थभूषणप्राप्तिवत ॥ ६० ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 एवंरीत्यास्वोपासकस्यलोकपावनत्वमाह। यइति । कदावा यदाकदाचिदित्यर्थः । हृदानिर्मलेनान्तःकरणेन यो मामगुणं प्राकृतसत्त्व
रजस्तमोरूपगुणरहितम् । सच्चिदानन्दरूपत्वात् । अतएवगुणादव्याकृतात्परंमायातीतम् । यदिवायद्वत्त्वर्थे । गुणात्मकं सर्वज्ञत्वा-
॥ ३१ ॥ दिलोकोत्तरलावण्यादिगुणवानात्मामूर्तिर्यस्यतं दृश्यमानं रूपं सेवते । सद्विविधोऽप्युपासकः अहं मत्स्वरूपएव । मामकइत्यर्थोवा । प्रि-

य: सेवते मामगुणं गुणात्परं हृदा कदा वा यदि वा गुणात्मकम्
॥ सोऽहंस्वपादाञ्चितरेणुभिः स्पृशन्पुनाति लोकत्रितयं यथा
रविः ॥ ६१ ॥

योज्ञिज्ञानिनोऽत्यर्थमहंसचममप्रिय इत्युक्तेः । तादृशोभक्तःस्वपादलग्नरेणुभिःसंस्पृशन्लोकत्रयमपि पुनाति । अज्ञानध्वान्तनिरसने ॥ ३१ ॥
नपवित्रीकरोति । यथारविःस्वकरैर्जगद्वितिमिरीकरोति तद्वत् ॥ ६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानीमेतद्ग्रन्थार्थालोचनासमर्थस्यपाठमात्रतोऽपिमहत्फलमाह । विज्ञानंविज्ञानजनकं करणंव्युत्पत्त्येतिबोध्यम् । वेदान्तैरुपनिषद्वाक्यैर्वेद्यंचरणंजगज्जन्मादिलक्षणंकर्मयस्यतेन ननुपाठमात्रादेतादृशमहत्फलप्राप्तिःकथमित्याशङ्क्यभवत्येवेति सूचयंस्तत्रहेतुमाह । मद्वचने

विज्ञानमेतदखिलंश्रुतिसारमेकं वेदान्तवेद्यचरणेनमयैवगीतम् ।
यःश्रद्धया परिपठेद्गुरुभक्तियुक्तो मद्रूपमेति यदि मद्वचनेषुभक्तिः ॥ ६२ ॥ इतिश्री अध्यात्मरामायणे रामगीता समाप्ता ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसम्वादे उत्तरकाण्डे श्रीरामगीतायां पञ्चमःसर्गः ॥ ५ ॥

षुभक्तिर्विश्वासोयदीतिअर्थाद्गुरुवाक्यविश्वासस्यैव फलदायकत्वादितिभावः ॥६२॥ इत्यध्यात्मरामायणेउमामहेश्वरसम्वादे उत्तरकाण्डेसेतौपञ्चमःसर्गः ॥ ६२ ॥ श्रीरामचन्द्रार्पणमस्तु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीराममन्त्रः खलु तारकाख्यः संसारसन्तारणसुप्रसिद्धः ॥ भक्-
त्याऽप्यभक्त्या समुपासितोयः श्रेयांसि सर्वाणि ददात्यवश्य
म् ॥ १ ॥ तन्तारकंसम्प्रतिपादयन्ती श्रीरामगीता सकलैः सुसे
व्या ॥ विज्ञप्तिमित्थंजनको विनीतः समर्पयत्यार्यजनेषुहर्षात् २

॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प,	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति
स्पर्द्धि	स्पार्द्धि	१	२	१	शाधि	शाधि	३	२	६	नाशे	नाशो	६	१	१
जीव्य	जीन्य	१	२	३	व्यत्र	व्यव	४	१	१	नन्वितिश	नन्वितिशे	६	२	१
सम्बीन्धनीः	सम्बन्धिनीः	२	२	१	ष्ठामे	ष्ठानमे	४	२	३	त्रिदा	विदा	६	२	२
व्रह्म	ब्रह्म	२	१	२	व्रह्म	ब्रह्म	४	२	१	मेत्रे	मेव	६	२	२
ब्रह्म	ब्रह्म	२	१	६	वलेन	बलेन	४	२	७	व्येतीत	व्यतेति	७	१	१
वोधोऽासि	बोधोऽसि	३	१	४	निघृत्ते	निवृत्ते	५	१	१	वीरहा	वीरहा	७	१	१
संवन्ध	सम्बन्ध	३	१	७	कत्व	कत्वा	५	१	१	सदृष्ट	सद्दृष्ट	८	१	३
भवस्यंससार	भवस्यसंसार	३	२	१	नक	नैक	५	१	१	विशुद्धं	विशुद्ध	८	२	१
न्सार	सार	३	२	२	.बेदान्त	वेदान्त	५	१	१	कारांतः	कारान्तः	८	२	२
पर्वग	पवर्ग	३	२	२	पूर्व	पूर्वे	५	१	२	वृत्ति	वृत्ति	९	१	१
वारिधि	वारिधि	३	२	२	वुद्ध्या	बुद्ध्या	५	१	६	स्ववाना	स्वना	९	२	१
					एवं	एव	५	१	६	बृत्यु	वृत्यु	१०	१	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
रीप	रपि	११	२	१
नर्दष्टा	र्नदष्टा	१२	१	४
र्वाह्मे	र्वाह्मे	१२	१	७
त्याभि:	त्माभि:	१२	२	६
शुद्द	शुद्ध	१३	१	१
जीवया	जीवयो	१३	१	२
निर्वाध	निर्बाध	१४	१	१०
गव्र	भव्र	१९	१	४
अर्जोद्व	अर्जोऽद्व	१६	२	६
द्व त्	द्वात्	१७	२	१

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
ल्लाभ	ल्लाभे	१८	१	८
इति:	इति	१८	२	२
ज्ञानन	ज्ञानेन	१९	१	१
वुद्दया	वुद्धया	२०	१	९
रागादि	रागादि	२१	१	३
त्रिलय	विलय	२१	१	७
धम	धर्म	२१	२	१
म्त्रस्य	म्वंयस्य	२१	२	२
वुवै	वुधै	२३	१	५
एव	एवं	२३	२	१
द्रष्ट	द्रष्टृ	२४	१	२

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
विभाव्यत	विभाव्यते	२५	१	४ मू
लिङ्गेद	लिङ्गदे	२६	१	२
वोधकः	वोधतः	२५	१	६
त्रिज्ञानं ब्रह्म	विज्ञानंनिादि ध्यासनं ब्रह्म	२६	२ ६	३
भेदेरा	भेदरा	२७	१	६
रुपा	रूपाः	२७	२	१
आत्म	अत्मा	२७	२	१
सुनिति	सुनिास्ति	२८	१	२
भव	भवं	२८	२	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
तदकत्व	तदेकत्व	२८	२	७	वतथाऽ	वतथाऽ	३१	१	६	मद्वचने	मद्वचने	३२	१	२
भ्रमण	भ्रमणं	२८	२	८	कंठ	कण्ठ	३१	१	२	तन्तारकं	तत्तारकं	३२	२	३

नेपाल पाशुपत, यन्त्रालये मुद्रिता.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इती रामगीता सटीका समाप्ता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८.नं.१६६४३

अथ रामगीता सटीका प्रारभ्यते ॥

मू० २।–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ रामंरत्नकिरीटकुण्डलयुतं केयूरहारान्वितं
सीतालङ्कृतवामभागममलं सिंहासनस्थं विभुम् ॥ सुग्रीवादि
कपीश्वरैःसुरवरैः संसेव्यमानं सदा विश्वामित्रपराशरादिमुनि-
भिः संस्तूयमानं भजे ॥ १ ॥ इतिध्यात्वा ॥ श्रीमहादेवउवाच॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ ध्यायेत्वाजानुबाहुं धृतशरधनुपं बद्धपद्मासनस्थं पीतंवासोवसानं नवकमलदलस्पर्द्धिनेत्रं प्रसन्नम् ॥ वामाङ्कारूढ
सीतामुखकमलमिलल्लोचनं नीरदाभं नाना लङ्कारदीप्तं दधतमुरुजटामण्डलं रामचन्द्रम् ॥ १ ॥ ततइति जगतां यानि मङ्गलानि
आनन्दास्तेषामुपजीव्यभूतं मङ्गलं ब्रह्मानन्दः सएवात्मास्वरूपं तेन तस्यैवानन्दस्यान्यानि भूतानिमात्रामुपजीवन्तीति श्रुतेः मङ्ग

ततोजगन्मङ्गलमङ्गलात्मना विधाय रामायणकीर्तिमुत्तमाम् ॥
चचार पूर्वाचरितं रघूत्तमो राजर्षिवर्य्यैरभिसेवितं यथा ॥ १ ॥

लानाञ्चमङ्गलमिति स्मृतेश्च किंच जगतां मङ्गलं कल्याणं यस्मात्तादृशकल्याणरूपआत्मामूर्तिस्तया उत्तमांश्रोत्रादीनां मोक्षदत्वेना
त्युत्तमां रामायणकीर्तिं वाल्मीक्यादि कृत नानाविध रामायण प्रवर्तिकां रावणवधादिजां कीर्तिंविधाय स्थितोरघूत्तमः ततः सीताप
रित्यागानन्तरं पूर्वैः स्ववंशजैराचरितं प्रजापालनसत्कथाश्रवणादिकं केवलंतत्पूर्वजैरेवाचरितमितिन किंत्वन्यैरपि राजर्षिश्रेष्ठैर्य
थाऽभिसेवितं तथाचचार कृतवान् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदारागुरुदेवविश्वासलक्षणमहागुणवती यद्वा उदारा दानशीलाबुद्धिर्यस्य तेन पुरातनीः प्राचीनराजसम्बन्धिनीः शुभाः धर्माधर्मनिर्णेत्रीः प्रमत्तस्य स्वगोमण्डलमिश्रितब्राह्मणगोदानात् प्रमत्तस्य नृगस्य राज्ञो द्विजस्य शापात्तिर्यक्त्वमाह तेनाज्ञातकृतब्रह्मस्वापहारेण परमधा

सौमित्रिणापृष्ट उदारबुद्धिना रामःकथाःप्राह पुरातनीःशुभाः ॥
राज्ञः प्रमत्तस्य नृगस्य शापतो द्विजस्य तिर्यक्त्वमथाह राघवः
॥ २ ॥

र्मिकस्यापीदृश्यवस्थेति सर्वथाब्रह्मस्वविमुखताधर्मइतिसूचितम् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकान्तेविजने उपस्थितंप्राप्तम् विनयान्वितः सन् भक्त्यागुरुरयमिति बुद्ध्या प्रणम्य अनेनगुरूपसदनप्रकारउक्तः आसादितंशुद्धंभाव

कदाचिदेकान्त उपस्थितंप्रभुं रामं रमालालितपादपङ्कजम् ॥
सौमित्रिरासादितशुद्धभावनः प्रणम्यभक्त्याविनयान्वितोऽब्र-
वीत् ॥ ३ ॥

नं भावनाकरणमन्तः करणंयेनसः शुद्धान्तःकरणइतियावत् भगवदुक्तसत्कथाश्रवणेन शुद्धान्तःकरणइत्यर्थः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हे महामते महतीसर्वविषयामतिर्यस्य तस्य संबोधनं त्वं शुद्धबोधोऽसि अनवच्छिन्नचैतन्यरूपोऽसि सर्वदेहिनामात्माऽसि जीवानांतत्प्रतिविम्बत्वात्अधीशोऽसि अन्तर्यामित्वान्नियन्ताऽसि वास्तवभेदाभावाच्च सर्वात्मत्वम् औपाधिकभेदाच्च नियन्तृनियम्यभावोबोध्यः निराकृतिः अस्मदादिवत्स्वार्जितकर्माधीनशरीराकृतिरहितः नन्वेवंसर्वैः कथमेवंनज्ञायतेऽतआह ज्ञानदृशां स्वयमेवप्रतीयसे ज्ञायतेऽ

त्वं शुद्धबोधोऽसि हि सर्वदेहिनामात्माऽस्यधीशोऽसि निरा-
कृतिःस्वयम् ॥ प्रतीयसे ज्ञानदृशां महामते पादाब्जभृङ्गाहितस
ङ्गसाङ्गिनाम् ॥ ४ ॥

नेनेतिज्ञानं वेदान्तवाक्यजातं तदेवदृक्दर्शनसाधनंयेषां तेषामितिसंबन्धसामान्येषष्ठी तैरित्यर्थः तादृशदृक्लाभश्च त्वद्भक्त्यधीनइत्याह पादेति त्वच्चरणकमलयोर्भृङ्गवदाहितःकृतः सङ्गोयेन तादृशान्तः करणसङ्गवतां त्वच्चरणकमल सङ्गिप्रान्तः करणवतामित्यर्थः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ प्रार्थयते अहमिति भवस्य संसारस्यापवर्गो निवृत्तिर्यस्मात्तादृशं तव पादाम्बुजं प्रपन्नोऽस्मि शरणं प्राप्तोऽस्मि योगिभावितं योगीभिः सं
न्सारमुक्त्यै भावितम् अनेन तस्य भवापवर्गत्वे सदाचारः प्रमाणमुक्तम् प्रार्थनीयमाह अपारवारिधिरूपं यदज्ञानं संसारमूलकारणं यथासुखम

अहं प्रपन्नोऽस्मि पदाम्बुजं प्रभो भवापवर्गं तव योगिभावितम्॥ यथाञ्जसाज्ञानमपारवारिधिं सुखं तरिष्यामि तथाऽनुशाधि माम् ॥ ५ ॥

क्लेशेन तरिष्यामि तथा मामनुशाधि शिक्षय अपारवारिधिमित्यनेन सपारप्रसिद्धसमुद्राद्व्यतिरेक उक्तः अशक्यतरणताऽनेन ध्वनिता ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथोत्तरमवतारयति श्रुत्वेति रामः सौमित्रिवचः श्रुत्वा अथशब्दोवाक्यालङ्कारे तदा श्रवणाव्यवहितकाले एवप्रपन्नानां भक्तानामार्ति संसारदुःखहरातितादृशः प्रपन्नाश्रमादिहीना भक्तानुग्रहपरा च धीर्यस्यसः क्षितिपालानां राज्ञां भूषणभूतोज्ञानरूपतमसउपशान्तये त

श्रुत्वाथ सौमित्रिवचोऽखिलं तदाप्राह प्रपन्नार्तिहरःप्रसन्नधीः ॥
विज्ञानमज्ञानतमोपशान्तये श्रुतिप्रपन्नं क्षितिपालभूषणः॥ ६॥

दर्थम् सन्धिरार्षः श्रुतिभिः तमेवविदित्वाऽतिमृत्युमेतीत्यादिश्रुतिभिः प्रपन्नं तत्फलकत्वेन बोधितं विज्ञानमात्मतत्वज्ञानामिति सामान्य तः प्रथमंप्राह ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथताद्दशज्ञानप्राप्तये क्रमेणबहिरङ्गान्तरङ्गसाधनान्याह आदाविति स्ववर्णाश्रमेषु शास्त्रेण वर्णिता याः क्रियानित्यनैमित्तकयज्ञदाना दिरूपास्ताः कृत्वा समासादितशुद्धमानसः प्राप्तान्तःकरणशुद्धिः तत्पूर्वमुपात्तसाधनः तदनुष्ठानपूर्वकमेवउपात्तानिसाधनानि शम दमादीनियेन तादृशः अनेनकर्मणां बहिरङ्गत्वं शमादीनामन्तरङ्गत्वं स्फुटमेवोक्तम् किंच शमदमवैराग्यदार्ढ्यपर्यन्तं कर्मानुष्ठामेवेति

आदौ स्ववर्णाश्रमवर्णिताः क्रियाः कृत्वा समासादितशुद्धमानसः
समाप्य तत्पूर्वमुपात्तसाधनः समाश्रयेत्सद्गुरुमात्मलब्धये॥ ७॥

सूचितम् ततस्तत्कर्मानुष्ठानं समाप्य त्यक्त्वा संन्यस्येतियावत् आत्मलब्धये आत्मज्ञानाय तत्फलकाय तत्वमस्यादिवाक्यार्थविचारा- य सद्गुरुं श्रोत्रियंब्रह्मनिष्ठमित्यादि लक्षणलक्षितं समाश्रयेत् सेवेत अनेनव्युत्पत्तिबलेन स्वयमेववाक्यार्थविचारः क्रियमाणो न फला- येति सूचितम् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसारस्यभ्रमिमच्चक्ररूपत्वात्तन्निवृत्तेश्चतत्कारणाज्ञाननिवृत्तिमूलकत्वदज्ञाननिवृत्तेश्चतत्त्वज्ञानकसाध्यत्वात्तत्त्वज्ञानस्यचवेदान्त विचारसाध्यत्वात्तदर्थंगुरुसमाश्रयणमित्याह क्रियेति भवःसंसारश्चक्रवद्विपरिवर्तमानईर्यते कथ्यते तदेवोपपादयति आदृताआदरपूर्वपूर्वजन्मार्जिताक्रियाएतस्यशरीरोद्भवस्यजन्मनोहेतुः तत्रजन्मनिसुरागिणोविषयाभिलाषवतः तौ शास्त्रप्रसिद्धौ धर्मेतरौ धर्माधर्मौ प्रियाप्रियौसुखदुः

क्रियाशरीरोद्भवहेतुराहृताप्रियाप्रियौतौभवतःसुरागिणः ॥
धर्मेतरौतत्रपुनः शरीरकंपुनः क्रियाचक्रवदीर्यतेभवः ॥ ८ ॥

खजनकौभवतःकस्यचिदधर्मएवसुखत्वबुद्ध्याप्रवृत्तिः कस्यचिद्धर्मएवंकदाचिदित्यप्यूह्यम् एवंतत्रोत्पादितकर्मणापुनःशरीरंपुनःक्रियाइत्येवंचक्रवद्विपरिवृत्तिः । यथाचक्रेभ्राम्यमाणेऽधोभागः कदाचिदुपरिउपरितनश्चाधः पुनरुपरिपुनरधएवंजन्मक्रिययोर्जन्यजनकभावेनपरिवृत्तिरिति बोध्यम् ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यचाज्ञानमेवमूलमित्याह अज्ञानमेवेति   अत्रविधौसंसारनिवृत्तिलक्षणेकर्तव्येऽर्थेतद्ज्ञानमेवमूलकारणत्वादज्ञानहानमेवविधीयते साध-
नत्वेनेतिशेषः ननुकर्मैवतन्नाशकमस्तुकिंज्ञानेनेत्याशङ्क्याह विद्यैवज्ञानमेवतन्नाशविधौमूलाज्ञाननाशनेपटीयसीसमर्थानकर्मसमर्थमितिशेषः

अज्ञानमेवास्यहिमूलकारणंतद्ज्ञानमेवात्रविधौविधीयते ॥ विद्यै
वतन्नाशविधौपटीयसीनकर्मतज्जंसविरोधमीरितम् ॥ ९ ॥

यतस्तत्तज्जमज्ञानजम्   आत्मस्वरूपाज्ञानजन्यदेहाद्यभिमानजन्यत्वात्कर्मणोज्ञानजन्यत्वंबोध्यम् ननुतज्जन्यस्यापितन्नाशकत्वंवृश्चिककर्क
व्यादौदृष्टमित्याशङ्क्यतज्जन्यत्वंवाननाशकत्वप्रयोजकंकिन्तुसविरोधत्वमेवेत्याह यतसविरोधंतदीरितंनाशकमुक्तमित्यर्थः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतएवकर्मणानाज्ञानहानिरित्याह नाज्ञानेत्यादि यतःकर्मणाविरोधाभावान्नाज्ञाननाशनापिरागनाशोवस्तुतः कर्मानुष्ठानात्पुनः सदो
षंक्षयिफलत्वादिदोषविशिष्टंकर्मैवोद्भवेत्कर्मणश्चपुनःसंसारएवेतिनमुक्तिप्रत्याशा ततस्तस्माद्बुधोविवेकीज्ञानविचारवान् ज्ञायतेऽनेने·

नाज्ञानहानिर्नचरागसङ्क्षयोभवेत्ततः कर्मसदोषमुद्भवेत् ॥ ततः
पुनः संसृतिरप्यवारितातस्माद्बुधोज्ञानविचारवान्भवेत् ॥ १० ॥

तिज्ञानंवेदान्तवाक्यंतद्विचारवान्भवेत ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानींज्ञानस्यैवमोक्षहेतुत्वंनतुज्ञानकर्मसमुच्चयस्तदंदूषणायानुवदतिसार्धेन नन्विति नन्वितिशङ्कायाम् यथाविद्यावेदमुखेनश्रुतिपुराण-
लक्षणेन ब्रह्मविदाप्नोतिपरम् इत्यादिनापुरुषार्थसाधनमुक्ता तथा उभाभ्यामवपक्षाभ्यांयथाखेपक्षिणांगतिः तथैवज्ञानकर्मभ्यांप्राप्यते
ब्रह्मशाश्वतम् इत्यादिनाक्रियाऽपितत्साधनत्वेनोक्ता किंच क्रियाकर्तव्यत। तृतीयार्थेप्रथमा कर्तव्यतयाआवश्यकेकृत्येअवश्यकर्तव्यत-

ननुक्रियावेदमुखेनचोदितायथैवविद्यापुरुषार्थसाधनम् ॥ कर्त्तव्य
ताप्राणभृतःप्रचोदिताविद्यासहायत्वमुपैतिसापुनः ॥ ११ ॥

यामचोदितानित्यनैमित्तिकरूपा एवंचनदकरणेप्रत्यवायोत्पत्त्याज्ञानोत्पत्तिरेवनस्यात् तस्मात्सापुनर्विद्यायाःसहायत्वंप्राप्नोतिघटेजन-
नीयेयथादण्डचक्रादीनांपरस्परसहायता ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्तव्यतेतित्मवाक्यमवेविवृणोति कर्मेति व्रीरहा वाएषदेवानांयोऽग्निमुद्वासयतेयावज्जीवमग्निहोत्रंजुहोति इतिश्रुतिः तत्रासिद्धान्तीशङ्कते नान्वाति ध्रुवंस्थिरंकार्यमिदंपुरुषार्थमोक्षजनिकाविद्यायतः स्वतन्त्राविनाऽपिसहायेन स्वकार्यसंपादनेसमर्था यथातेजस्तिमिरनिवर्तन-

कर्माकृतौदोषमपिश्रुतिर्जगौतस्मात्सदाकार्यमिदंमुमुक्षुणा॥ननु स्वतन्त्राध्रुवकार्यकारिणीविद्यानकिञ्चिन्मनसाऽप्यपेक्षते ॥ १२

समर्थंमनसाऽपिकिञ्चित्सहायभूतंवस्तुनापेक्षते तथाफलेजननीयेसहायान्तरसंभावनाऽपिनेतिभावः अनेनविद्याफलजननेनिरपेक्षास्वतन्त्र-त्वात्तेजोवदित्यनुमानंसूचितम् ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समुच्चयवादीपरिहराति नेति त्वदुक्तेनेत्यर्थः सत्यकार्यः अक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवति इत्यादिवेदनबोधितःस्थिरकार्योऽपि-
अध्वरः यथाऽन्यानपिकारकादिकान् आरादुपकारकप्रयाजाद्यङ्गानिदेशकालादीनिचप्रकाङ्क्षते तथाविद्यापिअग्निहोत्रंजुहोतिइत्यादिवि

नसत्यकार्योऽपिहियद्वदध्वरः प्रकाङ्क्षतेऽन्यानपिकारकादिकान्
तथैवविद्याविधितः प्रकाशितैर्विशिष्यते कर्मभिरेवमुक्तये ॥ १३ ॥

धिवाक्यतःतत्समूहेनप्रकाशितैः कर्मभिः सहितैवमुक्तयेविशिष्यतइत्यर्थः विद्याफलदानेकर्मापेक्षा अङ्गित्वात् प्रयाजाद्यङ्गापेक्षदर्शा
दिवादितिसत्प्रतिपक्षानुमानमनेनसूचितम् ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदनूदद्यसिद्धान्तींदूषयति केचिदिति यत्केचिद्वितर्कवादिनइतिज्ञानकर्मणीसमुच्चित्यमुक्तिसाधनंवदन्तितदप्यसत् यथाकेवलंकर्म मोक्ष साधनमित्यमत्तथातन्मीलितमित्यप्यसत् तत्रहेतुर्दृष्टविरोधकारणात् दृष्टायोविरोधः सर्वलोकदृष्टविरोधरूपात्कारणात्तदसदित्यर्थः विरो

केचिद्वदन्तीतिवितर्कवादिनस्तदप्यसद्दृष्टविरोधकारणात् ॥
देहाभिमानादभिवर्धतेक्रियाविद्यागताहङ्कृतितःप्रसिद्ध्यति १४

धमेवाह देहाभिमानात्क्रियावर्धतेअनात्मनिदेहादावात्मत्वाभिमानात्क्रियावृद्धिः विद्यातुगताहङ्कृतितः गताहङ्कृतिर्यस्यतस्यनष्टाहङ्कृतेः प्रसिद्ध्यति सार्वविभक्तिकस्तसिः एवंचाहङ्कारसत्तामूलकत्वात्क्रियाज्ञानयोः समुच्चयोविरुद्धइत्यर्थः ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथपूर्वपक्षयुक्तानुमानंदूषयन्विद्यास्वरूपमाह विशुद्धंविज्ञानंयेभ्यस्तेषांवेदान्तवाक्यानांयद्विशेषेणरोचनंरलयोरभेदादालोचनंविचार स्तेनाञ्चिताप्रापिताया चरमा आत्मवृत्तिर्ब्रह्माकारांतःकरणवृत्तिः साविद्येतिभण्यतेविद्वाद्भिरितिशेषः पुनःसमुच्चयवारणायविद्याकर्मणो वैषम्यमाह कर्मयज्ञादिअखिलकारकादिभिःकर्तव्यकर्मादिभिरङ्गैश्चसहितंसदुदेति फलोन्मुखंभवति विद्यापुनरखिलकारकादीन्निहन्ति

विशुद्धविज्ञानविरोचनाञ्चिताविद्याऽऽत्मवृत्तिश्चरमेतिभण्यते ॥ उदेतिकर्माखिलकारकादिभिर्निहन्ति विद्याऽखिल कारकादि-कम् ॥ १५ ॥

तत्रकर्तृत्वादिबुद्धिंनिहन्ति सकलव्यापारपरित्यागेनब्रह्मणिसमाप्तिहिंविद्या अतः स्वोत्पत्तौचित्तशुद्धिद्वाराकर्मसापेक्षास्वफलेजनयितव्यं-तन्निरपेक्षैवान्यथाविद्यास्वरूपस्यैवभङ्गापत्तेरितिपूर्वपक्षयुक्तहेतोरासिद्धिरितिभावः ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपसंहरन्मुमुक्षोर्वृत्तिप्रकारमाह तस्मादिति विद्याविरोधाद्विद्यायाःकर्मणासह विरोधेनसमुच्चयोनभवेत्तस्मात्सुधीर्मुमुक्षुरशेषतःकर्मत्यजे-
त् काम्यंतुसर्वथात्याज्यमेवनित्यनैमित्तिकमपियावच्चित्तशुद्धिकर्तव्यमेव ततोऽपिब्रह्मणिचित्तस्थैर्यपर्यन्तं कर्तव्यमेव ततस्तदनुसन्धानप्र-

तस्मात्त्यजेत्कार्यमशेषतः सुधीर्विद्याविरोधान्नसमुच्चयोभवेत् ।
आत्मानुसन्धानपरायणःसदा निवृत्तसर्वेन्द्रियवृत्तिगोचरः १६

तिबन्धकत्वात्प्रयोजनाभावाच्चतदापित्याज्यमेवेतिभावः इदानींमुमुक्षुकर्तव्यमाह निवृत्ताःसर्वेषामिन्द्रियाणां गोचराविषयाःशब्दादयोय
स्मात्तादृशःसन् आत्मनःसच्चिदानन्दस्यानुसन्धानमेवपरमयनंप्राप्यंयस्यतथाविधोभवेत् अत्रेन्द्रियप्रत्याहारःकर्तव्यत्वेनोक्तस्तेनतत्पूर्वंप्रा-
णायामाद्यर्थादाक्षिप्तम् ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रागिविरागिभेदेनकर्मणोकर्तव्यताकर्त्तव्यतेआहयावदिति माययाविद्ययाशरीरादिष्ववानात्मसुआत्मधीरहङ्कर्तेत्यादिरूपायावद्वर्ततेतावद्वि
धिवादकर्मणाम् विधिर्यजेतेत्यादिश्रुतिर्वादःकर्तव्यताबोधकोयेषांकर्मणांविधेयोवशवर्त्तितत्कर्मकर्ताभवेत तदपगमेतुतदाखिलं जगन्नेतीति

याबच्छरीरादिषुमाययात्मधीस्तावद्विधेयोविधिवादकर्मणाम् ॥
नेतीतिवाक्यैरखिलं निषिद्ध्य तज्ज्ञात्वापरात्मानमथत्यजेत्क्रि
याः ॥ १७ ॥

वाक्यैः अथातआदेशोनेतिनेतिइत्यादिवाक्यैर्निषिध्य मिथ्यात्वेननिर्णीयताद्विलक्षणतयासत्यत्वेनपरमात्मस्वरूपंज्ञात्वाक्रियास्त्यजेत्निरू
पितमेतत् ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मविज्ञानेसत्यवश्यमविद्या निवर्ततइत्याह यदेति आत्मनिशुद्धेन्तःकरणेपरमात्मनईशस्यात्मनोजीवस्यचयोविभेदोमायान्तःकरण
रूपोपाधिद्वयकृतोविभेदोभेदस्तस्यभेदकं नाशकंभास्वरंप्रकाशशीलं यद्विज्ञानमितरवृत्त्युपमर्दनपूर्वकंब्रह्माकाराऽखण्डाद्यावृत्तिर्यदाऽवभाति

यदापरात्मात्मविभेदभेदकंविज्ञानमात्मन्यवभाति भास्वरम् ॥
तदैवमायाप्रविलीयतेऽञ्जसासकारकाकारणमात्मसंसृतेः॥ १८॥

असंभावनादितिरस्कारेणोदेति तदैव सकारकाजन्मान्तरप्रापककर्मसहितामाथातत्तज्जीवोपाधिभूताविद्याऽञ्जसाझटितिप्रविलीयतेनश्यति
ननुतन्नाशेऽपिसंसारनाशःकथमतोमायाविशेषणम् आत्मसंसृतेःकारणंसंसारस्योपादानकारणमेवंचतन्नाशेकार्यनाशोभवत्येवेतिभावः १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं पुनर्दार्ढ्यायाह श्रुतीति तत्त्वमसीत्यादिश्रुतिरूपैःप्रमाणैस्तज्जनितज्ञानेन नाशितासाविद्याकथमपिकार्यकारिणीभविष्यतीति काकुरत्र सर्वथानेत्यर्थः असतःकार्यकारित्वासंभवादितिभावः पुनश्चतस्यानोद्भवइत्याह विज्ञानमात्रादिति अमलाशुद्धाद्द्वितीयतःद्विती

श्रुतिप्रमाणाभिविनाशिताचसाकथंभविष्यत्यपिकार्यकारिणी ॥
विज्ञानमात्रादमलाद्द्वितीयतस्तस्मादविद्यानपुनर्भविष्यति १९

यात्माविषयकाद्विज्ञानमात्रादितरासहकृतान्निदिध्यासनपरिपाकजज्ञानाद्यतोनष्टातस्मात्सापुनर्नभविष्यति रज्ज्वज्ञानमूलकस्य सर्पस्य रज्जुज्ञानेन निवृत्तस्ययथानपुनरुत्पत्तिरितिभावः ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्यायाइतरनिरपेक्षायाएवमोक्षकारणत्वमुक्तंयुक्तिपूर्वकंपुनःकथयतिश्रोतृदार्ढ्याय । यदीति । यदिनष्टातत्त्वज्ञाननाशिता सा न पुनः प्रसूयतेनोत्पद्यतेतदाकारणाभावादहंमतिःकथंभवेत् । कथमपिनभवेदित्यर्थः । तदभावाच्चतत्कालेकर्माभावइतिस्वफलजननेसास्वतन्त्राइ

यदिस्मनष्टा नपुनःप्रसूयते कर्ताऽहमस्येति मतिः कथं भवेत् ॥
तस्मात्स्वतन्त्रा न किमप्यपेक्षते विद्या विमोक्षाय विभाति केव
ला ॥ २० ॥

तरनिरपेक्षैवनाकिमप्यपेक्षते द्वितीयस्या संभवात् अतः केवलाऽसहायैवविमोक्षायविभातितत्फलिकाभवतीत्यर्थः ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 अत्रार्थेश्रुतिरपिप्रमाणमित्याह सेति साप्रसिद्धा नकर्मणानप्रजयाधनेनत्यागेनैके अमृतत्वमानशुः इत्यादिकातैत्तिरीयश्रुतिःप्रशस्तानामर्थ
 वादैःप्राशस्त्येनबोधितानामपिकर्मणांन्यासंत्यागंसादरंस्फुटमाह नतुकर्मसमुच्चयमित्यर्थः तथावाजिनां वाजसनेयिनाम् एतावदरेखल्वमृत

सातैत्तिरीयश्रुतिराहसादरंन्यासंप्रशस्ताखिलकर्मणां स्फुटम् ॥
एतावदित्याहचवाजिनांश्रुतिर्ज्ञानंविमोक्षायनकर्मसाधनम् २१

त्वम् इत्यादिका ज्ञानंविमोक्षायसाधनं नकर्मेत्येतदाह ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहङ्कारत्यागरूपकारणवैषम्यात् क्रियाज्ञानयोर्वैषम्यमुक्त्वा फलप्रयुक्तमपिवैषम्यमाह विद्येति हेसमुच्चयवादिन् त्वयाक्रतुरग्निष्टोमादिर्विद्यासमत्वेनदर्शितः परन्तुसमोदृष्टान्तोनोदाहृतः अनेनक्रतुर्विद्यासमः श्रुतिबोधितकर्तव्यताकत्वादित्यनुमानन्निरस्तम् दृष्टान्ताभावाव अन्वय्येवानुमानन्नव्यतिरेकीतिभावः एतच्चाकरेविस्तरेणप्रपञ्चितम् ननुविद्याकर्मणीसमे एकफलत्वाच्चक्रदण्डादिवदित्यनुमान-

विद्या समत्वेनतु दर्शितस्त्वया क्रतुर्नदृष्टान्त उदाहृतः समः ॥
फलैःपृथक्त्वाद्बहुकारकैः क्रतुःसंसाध्यतेज्ञानमतोविपर्ययम् २२

मितिचेत्तत्राह फलैः पृथक्त्वात षष्ठ्यर्थेतृतीया फलानांभेदादित्यर्थः एवंचस्वरूपासिद्धोहेतुरितिभावः समानकारकत्वमपिहेतुर्नेत्याह क्रतुर्बहुभिः कारकैरहंममताभिमानरूपैरान्तरैर्बाह्यैश्चदेशकालादिनियमैश्चसाध्यते ज्ञानन्त्वतोविपर्ययवदतोनतयोः साम्यमितिभावः २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वकरणेप्रत्यवायभिया कर्मकार्यमितिचेन्नेत्याह सप्रत्यवायइति कर्मत्यागेनाहंनिश्चयेनाहंप्रत्यवायसहितोभविष्यामीत्येवंशुद्धात्मानि-
अनात्मधर्मस्यधीरप्रज्ञस्यतत्त्वज्ञानविकलस्यप्रसिद्धा नतुतत्त्वदर्शिनः तस्याहंबुद्धेरभावात् पापादेरनात्मधर्मतानिश्चयाच्च तस्माद्बुधैःकर्म

स प्रत्यवायोह्यहमित्यनात्मधीरज्ञप्रसिद्धा नतु तत्वदर्शिनः ॥
तस्माद्बुधैस्त्याज्यमपि क्रियात्मभिर्विधानतःकर्मविधि प्रका-
शितम् ॥ २३ ॥

क्रियात्मभिः षष्ठ्यर्थेतृतीया क्रियाफलसक्तचित्तानां विधानतोविधानेनेतिकर्तव्यतयायुक्तंकर्म विधिभिरवश्यकर्तव्यतयाबोधितमपि-
त्याज्यमित्यर्थः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविरक्तस्यकार्यमाह। श्रद्धेति । गुरुशास्त्रयोर्विश्वासःश्रद्धातदन्वितोबुभुत्सुःशुद्धमानसोऽपि निष्कामकर्मानुष्ठानाच्छुद्धमानसश्चगुरोः प्रसादाल्लब्धतत्त्वमसीतिवाक्यतः श्रुतमात्मजीवयोरैकात्म्यंविज्ञाय मननिदिध्यासनपरिपाकाभ्यांसाक्षात्कृत्य। चएवार्थः । साक्षा

श्रद्धान्वितस्तत्त्वमसीतिवाक्यतो गुरोःप्रसादादपिशुद्धमानसः॥
विज्ञायचैकात्म्यमथात्मजीवयोः सुखी भवेन्मेरुरिवाप्रकम्पनः
॥ २४ ॥

त्कृत्यैवसुखी भवेत्। सकलदुःखहीनोभवेदित्यर्थः। अप्रकम्पनःविषयाभिलाषाक्षोभितान्तःकरणः॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महावाक्यंविवरीतुंवाक्यार्थस्यपदार्थबोधपूर्वकत्वमाह । आदाविति । विधानतःक्रमप्रमादर्गाद्दित्येनवाक्यार्थविज्ञानस्यविधावुत्पत्तौआ
दौप्रथमंमुख्यमितियावत्। पदार्थावगतिःकारणम्। हिप्रसिद्धं तस्यपदत्र्यंतत्त्वम्असीति। तत्रतत्पदार्थःपरमात्मासर्वज्ञत्वादिगुणः त्वं

आदौ पदार्थावगतिर्हिकारणं वाक्यार्थविज्ञानविधौ विधानतः ॥
तत्त्वंपदार्थौपरमात्मजीवकावसीतिचैकात्म्यमथानयोर्भवेत्
॥ २५ ॥

पदार्थोजीवः अनयोस्तत्त्वंपदार्थयोरैकात्म्यंतद्बोधकमसीतिपदम् ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुसर्वज्ञत्वादिगुणस्येशस्यकिञ्चिज्ज्ञत्वधर्मवताजीवेनैकात्म्यं विरुद्धमित्याशङ्क्याह । प्रत्यगिति । अहंबुद्धिवेद्यत्वंप्रत्यक्त्वंजीवधर्मः परोक्षत्वमीशधर्मस्तदादिधर्मकृतमात्मनोःपरमात्मजीवात्मनोर्विरोधंविहायत्यक्त्वातयोः संशोधिताम् युक्तिभिःसम्यग्विचारितांतत्त्वंपदाख्यांशक्त्यभावेऽपिवक्ष्यमाणप्रकारयालक्षणयालक्षितां ज्ञात्वाचिदात्मतां संगृह्य तत्त्वंपदोपास्थितिविषयांकृत्वा स्वमात्मानंतथाज्ञात्वाऽथएकात्म्यज्ञानानन्तरमद्वयोभवत् । चित्स्वरूपतांप्राप्तइवभवत् । पूर्वमपितत्स्वरूपएवविस्मृतकण्ठचामीकरन्यायेनचतत्प्राप्तिरितउपचारेणतद्वत्युक्तम् ।

प्रत्यक्परोक्षादिविरोधमात्मनोर्विहायसंगृह्यतयोश्चिदात्मताम् ॥
संशोधितांलक्षणयाचलक्षितांज्ञात्वास्वमात्मानमथाद्वयोभवेत्
॥ २६ ॥

अयंभावः तत्त्वंपदयोर्द्वावर्थौ वाच्योलक्ष्यश्च तत्रतत्पदस्यमायोपाधिःसर्वज्ञत्वादिविशिष्टोवाच्यः त्वंपदस्यापिकिञ्चिज्ज्ञत्वादिविशिष्टो मायाकार्याविद्योपाधिरविद्यावदन्तःकरणोपाधिर्वाच्यः उभयोरपिविशेषणांशत्यागेनशुद्धश्चिदात्मालक्ष्यः तत्रवाच्ययोर्विरुद्धधर्मकत्वादैक्यासंभवेऽपिलक्ष्ययोरैक्यंनिर्बाधमेवेति ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तलक्षणास्वरूपमाह । एकात्मकत्वादिति जहतीलक्षणाजहत्स्वार्थलक्षणायथागङ्गायांघोषइत्यत्रगङ्गापदार्थस्यप्रवाहस्यघोषाधारता नुपपत्त्यासर्वथातत्परित्यागेनतीररूपार्थलक्षणा साप्रकृते न एकात्मत्वात् । विशेष्यांशस्यैकत्वात्सर्वथास्वार्थत्यागाभावात् । तथाज हल्लक्षणताजहत्स्वार्थलक्षणावत्त्वमपिअत्रनसंभवति । यथाकाकेभ्योदधिरक्ष्यतामित्यादौकाकपदस्यस्वार्थात्यागेनैवदध्युपघातकेलक्षणा सापिन । विरोधतःविशेषणत्यागेनसर्वथास्वार्थत्यागाभावात् । अतोभागलक्षणाजहदजहल्लक्षणायुज्यते । अदोषतःपूर्वोक्तदोषाभावात्

एकात्मकत्वाज्जहती न सम्भवेत्तथाऽजहल्लक्षणता विरोधतः॥
सोऽयंपदार्थाविवभागलक्षणायुज्येतत्त्वंपदयोरदोषतः॥२७॥

विशेष्यांशस्यात्यागाद्विशेषणांशस्यत्यागाच्च । तत्रदृष्टान्तः । सोऽयंपदार्थाविव । यथासोऽयंदेवदत्तइत्यत्रतद्देशादिविशिष्टोऽतीतानुभव विषयोवातत्पदार्थः एतद्देशादिविशिष्टोऽनुभूयमानोवेदंशब्दार्थः । तयोश्चाविरुद्धविशेषणकत्वादैक्यासंभवेनदेशादिरूपविशेषणत्यागेना नुभवगतातीतत्वादिविशेषणत्यागेनवालक्षणयैक्यंतद्वदितिभावः ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथत्याज्यत्वायजीवोपाधिमाह । रसादीति । रसापृथ्वीआदिर्येषांतानिपञ्चीकृतानियानिभूतानितेभ्यःसंभवोयस्यनत् । पञ्चीकरणंचे
त्थम् एकैकंभूतंद्विधाविभज्यतत्रैकंभागंचतुर्धाविभज्यतेषांभागानांस्वेतरभूतचतुष्टयार्धभागचतुष्टयेसंयोजनेएकैकंभूतंपञ्चात्मकंभवतिभा

रसादिपञ्चीकृतभूतसंभवंभोगालयंदुःखसुखादिकर्मणाम् ॥ शरी
रमाद्यन्तवदादिकर्मजंमायामयंस्थूलमुपाधिमात्मनः ॥ २८ ॥

गाधिक्याच्चप्रातिस्विकतयाभूगादिव्यवहारोऽपि । सुखदुःखयोरादीनियानिकर्माणितेषांभोगस्तत्कर्मजसुखदुःखानुभवस्तस्यालयमाश्र
यभूतमाद्यन्तवत्उत्पत्तिनाशयोगि आदिकर्मजंभाग्भवीयकर्मजन्यंमायामयंपरम्परयामायाविकारः तद्विकारभूतविकारत्वात् । एतच्छरी
रमात्मनःस्थूलमुपाधिंवदन्तीतिशेषः ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसूक्ष्मोपाधिमाह। सूक्ष्ममिति । बुधाःअन्यत्स्थूलशरीरविलक्षणंशरीरंलिङ्गदेहाख्यमात्मनउपाधिंविदुः । तत्स्वरूपमाह। सूक्ष्मंचक्षु-
राद्यविषयः मनोबुद्धिदशेन्द्रियैःप्राणैश्चयुतम् सङ्कल्पात्मकंमनः निश्चयात्मिकाबुद्धिः घ्राणरसनाचक्षुस्त्वक्श्रोत्रेतिपञ्चज्ञानेन्द्रियाणि वा-

सूक्ष्मंमनोबुद्धिदशेन्द्रियैर्युतंप्राणैरपञ्चीकृतभूतसंभवम् ॥ भोक्तुः
सुखादेरनुसाधनंभवेच्छरीरमन्याद्विदुरात्मनोबुधाः ॥ २९ ॥

क्पाणिपादपायूपस्थानिकर्मेन्द्रियाणि प्राणापानव्यानोदानसमानाश्चप्राणास्तैर्युतमेतत्सप्तदशसमुदायात्मकम्। तदाधारभूतान्याह ।अप
ञ्चीकृतभूतसंभवंतेभ्यउत्पन्नमतएवादृश्यम्।तथाभोक्तुःसुखादेःसुखदुःखाद्यनुभवस्यानुसाधनम् स्थूलशरीरस्यैतदनुगतस्यैवभोगसाधनत्व
मितिभावः । एतद्वियोगेनैवमरणव्यवहारइतिबोध्यम् ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिजीवोपाधिद्वयमुक्त्वाईशोपाधिमाह । अनादीति । अनादि उत्पत्तिहीनम् । नानाविधपरिणामशालितयापरिणामरूपेणनश्वरामिति अनादित्वमात्रेोक्त्यासूचितम् । अनिर्वाच्यम् सत्त्वासत्त्वाभ्यांनिर्वक्तुमशक्यम् कारणंसकलप्रपञ्चस्यजनकम् ईदृशीमायातुब्रह्मणःपरमी-

अनाद्यनिर्वाच्यमपीहकारणं मायाप्रधानंतुपरंशरीरकम् ॥ उ-पाधिभेदान्तुयतःपृथक्स्थितं स्वात्मानमात्मन्यवधारयेत्क्र-मात् ॥ ३० ॥

श्वरव्यवहारसंपादकत्वादुत्कृष्टंप्रधानंशरीरकम् । स्वार्थेकः । एवमुपाधिभेदादेकमेवचैतन्यंयतः पृथक्स्थितंजीवईशइतिभेदबुद्धिविषय मतोलक्षणयोपाधिपरित्यागेनस्वात्मानमात्मानिअवधारयेदभेदेनजानीयात् । क्रमाच्छ्रवणमनननिदिध्यासनक्रमेणेत्यर्थः ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवाक्यार्थविचारफलमाह । कोशेष्विति । आनन्दमयस्य ब्रह्मत्वेअन्नमयप्राणमयमनोमयविज्ञानमयेषुचतुर्षुकोशेषुतत्तत्सङ्गात्तत्तदाकृतिर्विभाति यथाजपादिसङ्गात्स्फटिकोऽनेकाकृतिर्भाति । आनन्दमयस्यापि जीवत्ववादिनातुतेनसहपञ्चसु कोशेष्वितिबोध्यम् । अस्मि-

कोशेषुपञ्चस्वपितत्तदाकृतिर्विभातिसङ्गात्स्फटिकोपलोयथा ॥ असङ्गरूपोऽयमजोयतोऽद्वयोविज्ञायतेऽस्मिन्परितोविचारिते ॥ ३१ ॥

न्महावाक्येपरितोविचारितेसम्यग्विचारितेसत्ययमात्माऽसङ्गरूपःअन्नमयादिभिःसङ्गरहितः । असङ्गोनहिसज्जते । इतिश्रुतेः । अजोऽद्वयश्चविज्ञायते । स्थूलोऽहमित्यादिस्त्वज्ञस्यतत्तत्कोशप्रसङ्गात्प्रतीतिःस्फटिकवत् तत्त्वज्ञस्यतुनतथाप्रतीतिरितिभावः । एवंचतत्तदुपाधिकृततत्तद्रूपताप्रतीतिनिरामएव विचारफलमितिभावः ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जाग्रदाद्यवस्थाऽपि बुद्धेर्धर्मोनात्मधर्मइत्याह । बुद्धेरिति । इहआत्मनिस्वप्नादिभेदेन जाग्रत्स्वप्नसुषुप्तिभेदेन यात्रिधावृत्तिर्दृश्यतेसाऽपि गुणत्रयात्मनः सत्त्वरजस्तमोरूपगुणत्रयस्वरूपाया बुद्धेर्धर्मः । उक्तावस्थात्रयस्योक्तमूलकत्वात् । एतदवस्थात्रयस्यास्मिन्नवस्थात्रय- साक्षिणि आत्मनि भानं मृषा बुद्ध्यध्यास निबन्धनं न तु वास्तव मित्यर्थः । अन्योऽन्यतोव्यभिचारतस्तस्यावस्था त्रयस्यस्व रूपतो

बुद्धेस्त्रिधा वृत्तिरपीह दृश्यते स्वप्नादि भेदेन गुणत्रयात्मनः ॥
अन्योऽन्यतोऽस्मिन्व्यभिचारतोमृषा नित्ये परे ब्रह्मणि केव
ले शिवे ॥ ३२ ॥

मृषात्वात्तज्ज्ञानस्य मृषात्वमेव । स्वप्नकाले जाग्रत्सुषुप्त्योरभावात् । जाग्रतिइतरद्वयस्याभावात सुषुप्तावितरयोरभावात्परस्परं व्यभि चाराबोध्यः आत्मनस्तद्धनाश्रयत्वंविशेषणैराह । नित्येउत्पत्तिनाशशून्येपरेगुणत्रयातीते ब्रह्मणिव्यापकेकेवलेऽसङ्गेशिवआनन्दरूपे एवंभूतेसद्रूपेपरस्परव्यभिचारधर्माभानमसंभवीति भावः ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसाऽन्यत्वायमंसारमूलभूतांवृत्तिमाह । देहेति । एषांसङ्घातइतरेतराध्यासविषयात् अजस्रंयावाद्धियो बुद्धेर्वृत्तिस्तमोमूलतयाऽज्ञ
लक्षणाऽज्ञत्वज्ञापिका यावत्परिवर्तते तावद्भवोद्भवःसंसारोद्भवोभवेत् । तमःपदंरजसोऽप्युपलक्षणम् । रजस्तमःप्रधानाबुद्धिः संसारहेतु

देहेन्द्रियप्राण मनश्चिदात्मनां सङ्घादजस्रं परिवर्तते धियः ॥
वृत्तिस्तमोमूलतयाऽज्ञलक्षणा यावद्भवेत्तावदसौ भवोद्भवः ॥ ३३ ॥

त्वात्सर्वथासाऽन्येति भावः ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत महावाक्यविचारस्य कर्तव्यमाह । नेतीति । अथात आदेशोनेतिनेति इति प्रमाणेननिराकृतं मिथ्यात्वेनगृहीतमखिलंजगत्येनसः ततोहृदामस्त्वप्रधानेनमनसासम्यगास्वादितं चिल्लक्षणंघनामृतंदुःखासंभिन्नंसुखंयेनसः । स्वर्गादितुपरिणामदुःखत्वात्तत्संभिन्नमेव । एवंभूतोऽशेषंजगद्देहेन्द्रियादिदृश्यसमूहंत्यजेत् हानोपादानबुद्धिविषयंनकुर्यात् । किन्तूदासीनस्तत्रभवेत् । ननुदेहेन्द्रियादिभिरेवतज्ज्ञान

नेतिप्रमाणेन निराकृताखिलो हृदासमास्वादितचिद्घनामृतः ॥
त्यजेदशेषं जगदात्तसद्रसं पीत्वा यथाऽम्भः प्रजहाति तत्फ-
लम् ॥ ३४ ॥

लाभात्कथमुपजीव्यस्यत्यागइत्याशङ्क्यदृष्टान्तदर्शनेनपरिहराति । यथातृषावानआत्तः सद्रसोमाधुर्ययेनतादृशं नारिकेलनारङ्गादि फलान्तवर्त्यम्भःपीत्वा तत्स्थानभूतंतत्फलं जहाति तत्रोदासीनोभवति तद्वत्सर्वदृश्यसारांशोत्रज्ञतल्लाभसतिनिः सारंदृश्यंनोपादेयंनापिहेयमितिभावः । यतोभयादिसंभावनातद्धेयमित्युच्यते ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतरस्यानित्यत्वेनतत्रवैराग्यार्थमात्मनएवनित्यत्वमाह । कदाचिदिति । कदापीत्यर्थः । अनवः उत्पत्त्यनन्तरंविद्यमानोहिनवः । तेन
जन्मानन्तरास्तित्वंव्यावर्तितं नवत्वाभावेनैवजीर्णत्वाभावादवस्थान्तरापत्तिरूप परिणामोऽपिनिरस्तः ।अनेनअस्तिजायतेवर्द्धतेविपरिणम
तेऽपक्षीयते नश्यतीति षड्भाव विकार राहित्यमुक्तम् । एवंचैतद्भिन्नं सर्वमुक्तषड्भावविकारवत्त्वादनित्यमिति ततोविरज्येतेतिबोधित-

कदाचिदात्मा न मृतो न जायते न क्षीयते नापि विवर्धतेऽनवः ॥
निरस्तसर्वातिशयः सुखात्मकः स्वयम्प्रभः सर्वगतोऽयमद्वयः ३५

म् । यतऽईदृशोऽतएवनिरस्तः सर्वस्यदेहेन्द्रियादेरतिशयोमहत्त्वं येनस्वलाभात्सः यल्लाभान्नापरोलाभइतिःश्रुतेः यतःसुखात्मकः आनन्द
स्वरूपः स्वयम्प्रभःस्वप्रकाशकश्च देहेन्द्रियादिस्तुदुःखस्वरूपः परप्रकाश्यश्च । यस्यभासासर्वमिदंविभाति । इतिश्रुतेः । सर्वगतोव्यापकः
अयमहंबुद्धिविषयःप्रत्यगात्माऽपिअद्वयः उक्ताद्वयब्रह्मस्वरूपएव । नततोऽतिरिक्तइतिभावः । अयमात्माब्रह्म । इतिश्रुतेः ॥ ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुएवंविधेविकारशून्येआत्मनिजन्ममरणादिप्रवाहरूपसंसारभानंकथमितिशङ्कते। एवंविधेइति।दुःखमयःदुःखप्रचुरः।उत्तरयति। अज्ञानतइ
तिअज्ञानमूलकोयोध्यासोदेहान्तः करणादौअहंममेत्यध्यासस्तद्वशात्। एवंचभ्रान्तिरूपातत्प्रतीतिरितिभावः। नन्वेवंकथंतस्यसंसारस्यनि

एवंविधे ज्ञानमये सुखात्मके कथंभवो दुःखमयःप्रतीयते ॥
अज्ञानतोऽध्यासवशात्प्रकाशतेज्ञानेविलीयेत विरोधतःक्षणात्॥
॥ ३६ ॥

वृत्तिस्तत्राह। ज्ञानेति। आविर्भूतइतिशेषः। ज्ञानस्याज्ञानाविरोधित्वात्तदुत्पत्तिक्षणएवकारणभूताज्ञाननाशात्तत्कार्यसंसारस्यापि वि
लयइत्यर्थः। यथारज्जुज्ञाननरज्जौसर्पस्यलयइत्यर्थः ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाध्यासलक्षणमाह । यदन्य दिति । यदन्यत्सर्पादिकमन्यत्ररज्ज्वादौ भ्रमात् भ्रमजनकाद्दोषाद्विभाव्यते विज्ञायते अमुं विपश्चितो विद्वांसोऽध्यास इत्याहुः । यथाऽसर्पभूते रज्ज्वादौ अहिविभावनं सर्पारोपो रज्ज्वबुद्धिमूलकस्तद्वदीश्वरेऽपि जगद्देहादिसंसारात्मकं सर्वं विभाव्यते आत्मज्ञानाभावाद्यथार्थतया ज्ञायते ॥ ३७ ॥

यदन्यदन्यत्र विभाव्यते भ्रमादध्यासमित्याहुरमुं विपश्चितः ॥
असर्पभूतेऽहिविभावनं यथा रज्ज्वादिके तद्वदपीश्वरे जगत् ॥ ३७ ॥

॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनिजगज्ज्ञानेकीदृशोऽध्यासोनिमित्तंतदाह विकल्पेति सर्वविकल्पकारणमायारहितेवस्तुतस्तत्सङ्गरहितेचिदात्मकेचित्स्वरूपेसर्वकारणेनिरामयेदुःखासंभिन्नानन्दमयेकेवलंसर्वविकारशून्यपरेदृश्यविलक्षणेब्रह्मणिव्यापके आत्मनिप्रथममहङ्कारःकल्पितः सएवाध्यासः ।

विकल्पमायारहितेचिदात्मके ऽहङ्कारएष प्रथमः प्रकल्पितः ॥
अध्यासएवात्मनिसर्वकारणे निरामयेब्रह्मणि केवलेपरे ॥ ३८॥

अहंबुद्ध्यात्मकोऽध्यासएवसर्वसंसारकारणमितिभावः ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

बुद्धिनिष्ठएवसंसारोनत्वात्मनिष्ठइत्यत्रान्वयव्यतिरेकौप्रमाणयति । इच्छादीति । परेसर्वसाक्षिणिआत्मनिसंसृतिहेतवःभासमानसंसारकारणं
सदाकालत्रयेऽपिइच्छादिरागादिसुखादिधार्मिकाः इच्छाद्वेषरागद्वेषौसुखदुःखंइत्येवमादिद्वन्द्वधार्मिकाःधियएवधीपुसतीपुसंसारइत्यन्वयमु

इच्छादिरागादिसुखादिधार्मिकाः सदा धियः संसृतिहेतवः परे ॥
यस्मात्प्रसुप्तौतदभावतःपरः सुखस्वरूपेणविभाव्यतेहिनः ॥ ३९ ॥

क्त्वातद्व्यतिरेकमाहयस्मात्कारणात्प्रसुप्तौतदभावात्तधीवृत्त्यभावात् परआत्मानोऽस्माभिःतृतीयार्थेषुषष्ठी । सुखरूपेणस्वस्वरूपमात्रेणाविभा
व्यतेनिश्चीयते नतु संसारित्वेनेतिभावः सुप्तोत्थितस्तुसुखमहमस्वाप्समितिप्रत्यभिज्ञानुभवात्तदात्मस्वरूपनिश्चयोऽस्तीतितात्पर्यम् ॥ ३९

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथपुनस्तत्त्वंपदार्थस्वरूपमाह ।अनादीति।अनादिर्याऽविद्यातत्तउद्भवोयस्या बुद्धेरन्तःकरणस्यतत्रविम्बितःप्रतिविम्बिताश्चितःप्रकाशः सजीवइतीर्यते आत्मापगात्माधियः साक्षितयाधीधर्मासङ्गेनैवपृथक्स्थितः । अन्तर्यामितयेत्यर्थः जीवोऽहंसुखीत्यादिप्रकारेणान्तःकर

अनाद्यविद्योद्भवबुद्धिबिम्बितोजीवप्रकाशोऽयमितीर्यते चितः ॥
आत्माधियः साक्षितया पृथक् स्थितो बुद्ध्या परिच्छिन्नपरः
सएव हि ॥ ४० ॥

णधर्माध्यासवान्परमात्मातु साक्षितयासर्वत्रविद्यमानोऽपिनतथेतिभावः। अतएवबुद्ध्यापरिच्छिन्नपरः बुद्धिलक्षणपरिच्छेदरहितःअतएव परः । एवंचज्ञानेनप्रतिविम्बाधार विलयप्रतिविम्बस्यविलयात्सजीवः सएवपरमात्मैवहिप्रसिद्धं सइत्यस्यचात्राप्यत्तर्बोध्या ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 अथ बुद्ध्यात्मनोःपरस्पराध्यासवशात् परस्परधर्मभानमितिदार्ढ्यायपुनराह । चिद्बिम्बेति । चिदात्मचेतसोरन्योन्याध्यासवशात् पर
स्परतादात्म्यारोपाज्जड.जडत्वंप्रतीयते । चेतसोवृत्तीनांज्ञानत्वं जीवात्मनोजडत्वंप्रतीयते । अतएवज्ञानाश्रयआत्मेति चितएवताकिं
 कव्यवहारः । जीवात्मनिजडात्मनिजडात्माकथ्यते बुधैरितिस्मार्तव्यवहारश्च । अत्रहेतुः । चिदित्यादि । चिद्बिम्बस्यसाचिदाभासः अ

चिद्बिम्बसाक्ष्यात्मधियांप्रसङ्गतस्त्वेकत्रवासादनलाक्तलोहवत्॥
अन्योऽन्यमध्यासवशात्प्रतीयते जडाजडत्वंचचिदात्मचेतसोः
॥ ४१ ॥

क्षिःसहितः साक्षःसेन्द्रियः सचासावात्मामनःधीरन्तःकरणंतेषांप्रकृष्टसङ्गादतिसान्निकर्षादध्यासइत्यर्थः । अनलाक्तलोहवत् अग्नितप्तलो
हपिण्डवत् अत्रदृष्टान्तः । अग्निधर्मोदाहकत्वं लोहधर्मश्चवर्तुलत्वाद्यनलेभासते । तत्रहेतुरेकत्रवासात् परस्पराविभागेनवृत्तेरित्यर्थः । तद्व
देतयोरपि परस्परधर्माध्यासइत्यर्थः ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं दार्ढ्यायपुनराह । गुरोरिति । वेदवाक्यतइत्यनेन श्रवणंगुरोःसकाशादपि । ततश्चानेनमननमुक्तम् । ताभ्यांसञ्जातोविद्यया ज्ञानरूपस्यात्मनोऽनुभवोयस्यसः । अनेनकृतनिदिध्यासनइत्यर्थः । तं चिदानन्दस्वरूपं स्वात्मानमुपाधिवर्जितं रहितोपाधिधर्ममात्मस्थं

गुरोःसकाशादपिवेदवाक्यतः सञ्जातविद्यानुभवोनिरीक्ष्य तम् ।
स्वात्मानमात्मस्थमुपाधिवर्जितं त्यजेदशेषं जडमात्मगोचरम् ॥ ४२ ॥

हृत्स्थंनिरीक्ष्य अपरोक्षीकृत्याशेषंजडं दृश्यंत्यजेत् । तत्रोदासीनोभवेदिति भावः ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञेयंनिरुपाधिकं स्वरूपंश्लोकद्वयेनाह प्रकाशेति अहंप्रकाशरूपः स्वप्रकाशः परप्रकाशहीनः परप्रकाशरूपोयथाघटादिः अजोजन्मादि
हीनः अद्वयःसजातीयद्वितीयरहितः असकृद्विभातः सकृदपिपरेणभासकान्तरेणप्रकाशितः सकृद्विभातः नसकृद्विभातोसकृद्विभातः नत

प्रकाशरूपोऽहमजोऽहमद्वयोऽसकृद्विभातोऽहमतीवनिर्मलः ॥
विशुद्धविज्ञानघनोनिरामयःसम्पूर्णआनन्दमयोऽहमक्रियः॥४३॥

त्रसूर्योभातिनचन्द्रतारकमितिश्रुतेः नतद्भासयतेसूर्यइतिस्मृतेश्च अतीवनिर्मलः मायाकृतावरणविक्षेपरहितः विशुद्धविज्ञानघनःविशुद्धचि
देकरसः निरामयःकर्तृत्वाभिमानरहितः सम्पूर्णःदेशकालपरिच्छेदहीनः आनन्दमयः आनन्दरूपः स्वार्थेमयट् अक्रियः परिणामहीनः
॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदैवेति अहंसदैवकालत्रयेऽपिमुक्तःसर्वधर्मरहितः अचिन्त्यशक्तिमान यः परमात्मा अतिन्द्रियज्ञानमूइन्द्रियातिरिक्तज्ञानरूपःयतोवाचो निवर्त्तन्ते अप्राप्यमनसासहइतिश्रुतः अविक्रियात्मकोऽपरिणामी अनन्तपारःअन्तःकालतःपारःपरन्तीरन्तावविद्यमानौ यस्य तंनदेश

सदैवमुक्तोऽहमचिन्त्यशक्तिमानतीन्द्रियज्ञानमविक्रियात्मकः॥
अनन्तपारोऽहमहर्निशंबुधैर्विभावितोऽहंहृदिवेदवादिभिः ॥४४॥

कालपरिच्छेदहीनः ईदृशोयःपरमात्माबुधैर्हृदि अहर्निशंविभावितः सोऽहमित्यर्थः ॥ ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंभावनायाःफलमाह एवमिति उक्तरीत्यासदाआत्मानं अखण्डितात्मनाविषयानाकृष्टचित्तेन विचारमाणम्यध्यायतः धातूनामनेकार्थं
त्वात् चरमाणएवचारमाणःस्वार्थेऽण् विशुद्धभावनाब्रह्माकारान्तः करणवृत्तिरुदंतीतिशेषः सात्वोदिताकारकैर्देहान्तरप्रापककर्मभिः स

एवंसदात्मानमखण्डितात्मनाविचारमाणस्यविशुद्धभावना ॥
हन्यादविद्यामचिरेणकारकैरसायनंयद्वदुपासितंरुजः ॥ ४५ ॥

हाविद्यामाचिरेणशीघ्रमेवहन्यात् यथापामितंसेवितंरसायनं रुजोहन्यात्तद्वत् ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रध्यानेइतिकर्तव्यतामाह विविक्तइति निर्जनइत्यर्थः आसीनोयथोचितपद्मासनाद्युपविष्टः उपारतेन्द्रियः तेनशमदमादिसम्पन्नः विनि र्जितात्माप्राणायामादिभिर्जितान्तःकरणः अतएवविमलान्तराशयोविशुद्धचित्तः विज्ञानदृक्विज्ञानएवदृक्भानंयस्यसः द्रष्टृदृश्यभा

विविक्तआसीनउपारतेन्द्रियोविनिर्जितात्माविमलान्तराशयः॥
विभावयेदेकमनन्यसाधनोविज्ञानदृक्केवलआत्मसंस्थितः॥४६

नरहितः अनेननिर्विकल्पकसमाधिरुक्तः अनन्यसाधनः तत्त्वज्ञानातिरिक्तमुक्तिसाधनास्तित्वभ्रमरहितः केवलोऽसङ्गःआत्मसंस्थितः आत्मन्येवसंस्थासमाप्तिः सञ्जातायस्यसतेन नकदापिविषयान्तरसञ्चारवांश्चित्तः विभावयेत् ध्यायेत् ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंच यदेतत्भूतंभविष्यद्वर्तमानं विश्वंपरमात्मादर्शनंभासकोयस्यतत् तस्यभासासर्वमिदंविभातीति श्रुतेः तत्सर्वकारणेमायासान्निधाना
तुसर्वोपादानत्वेनाभिमतेआत्मनिविलापयेत् उपादानसत्ताव्यतिरेकेणकार्यसत्तांनपश्येत् तादृशस्यलक्षणमाह सम्पूर्णः अवाप्तसमस्तका

विश्वंयदेतत्परमात्मदर्शनं विलापयेदात्मनि सर्वकारणे ॥
पूर्णश्चिदानन्दमयोऽवतिष्ठते न वेद बाह्यं न च किञ्चिदान्तरम् ॥ ४७ ॥

मः तस्यकाम्याभावात् चिदानन्दमयः तद्रूपोऽवतिष्ठते बाह्यमान्तरंच दृश्यंनजानाति सर्वत्रब्रह्मदर्शनादिति भावः ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाधिसिद्धेः पूर्वंयत्कर्तव्यंतदाह । पूर्वमिति । समाधेः सकलविषयव्यासङ्गनिवृत्तिपूर्वकं ब्रह्माकारवृत्तिः समाधिस्ततः पूर्वमखिलंस चराचरंजगत् ओङ्कारमात्रं विचिन्तयेत् । ओङ्कारोमीयतेऽ नयेतिमात्रा प्रमाणं बोधकत्वेन परिच्छेदकायस्यतथाजानीयात् । तदेवविवृ

पूर्वं समाधे रखिलं विचिन्तये दोङ्कारमात्रं सचराचरं जगत् ॥
तदेव वाच्यं प्रणवो हि वाचको विभाव्यते ज्ञानवशान्न बो-
धतः ॥ ४८ ॥

णोति तदेवेति । जगदेवेत्यर्थः । प्रणवोवाचकोविभाव्यतेएतत्ताहिप्रसिद्ध इत्यर्थः । इयंभावनाज्ञानवशादेवनबोधकः। बोधोनिर्विशेषब्रह्मसा क्षात्कारस्तद्रुत्तरंनेत्यर्थः । तस्यसर्ववृत्त्युपमर्दकत्वात् ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमर्थंविवृणोति । अकारेति । अकारसञ्ज्ञस्तद्वाच्यःपुरुषोहिविश्वकोविश्वएवविश्वकः विश्वशब्देनपरिभाषितःअयंजाग्रत्साक्षीविराट्
ततःस्वप्नसाक्षीतैजसःतेनपदेनपरिभाषितःलिङ्गदेहाभिमानीहिरण्यगर्भउकारकः उकारप्रतिपाद्यईर्यते । ततः सुषुप्तिसाक्षीप्राज्ञपदवाच्यो

अकारसञ्ज्ञः पुरुषो हि विश्वको ह्युकारकस्तैजसईर्यते क्रमात्
प्राज्ञो मकारः परिपठ्यतेऽखिलैः समाधि पूर्वं न तु तत्त्वतो
भवेत् ॥ ४९ ॥

मायोपाधिकोमकारस्तद्वाच्यः परिपठ्यतेऽखिलैर्वेदैः । इयंभावनासमाधिपूर्वंसमाधेःपूर्वमेव नतत्त्वतः तत्त्वसाक्षात्कारेसतिनभवेत् । सर्व
स्यब्रह्मणिप्रविलयात् ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविलापन प्रकारमाहद्वाभ्याम् । विश्वंत्विति । उकारमध्ये बहुधाव्यवस्थितं स्थूलदेहनिबंधनंस्थूलदेहाभिमानेन स्थितं विश्वम्पुरुषंतद्वाचकमकारम् च विलापयेत् । तुश्चार्थे । विलीनम्भावयेत् ततस्तैजसंलिङ्गदेहाभिमानिनम् पुरुषं तद्वाचकंप्रणवस्यद्वितीय वर्णमुकारं वि-

विश्वं त्वकारं पुरुषं विलापयेदुकारमध्येबहुधा व्यवस्थितम् ।
ततो मकारे प्रविलाप्यतैजसंद्वितीयवर्णं प्रणवस्य चान्तिमे ॥५०॥

लीनोविश्वकम्मकारे विलाप्याविलीनम्भावयित्वा ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततस्तादृशंमकारंतद्वाच्यंप्राज्ञंचकारणंकारणत्वाभिमानिनंपुरुषमिहात्मनि चिद्घनेपरे विलापयेत् तथाभावयेत् । ततः सोऽहंमर्वविला
पाधिष्ठानंपरब्रह्मविभावयेत् । तद्विशिनष्टि । सदाविमुक्तिमत् नित्यमुक्तम् । नन्वहंपदार्थस्यरागद्वेषादिमलिनस्यकथं ब्रह्मत्वभावनेसा

मकारमप्यात्मनि चिद्घने परे विलापयेत्प्राज्ञमपीह कारणम् ।
सोऽहं परं ब्रह्म सदा विमुक्तिमद्विज्ञानदृङ्मुक्त उपाधितोऽ
मलः ॥ ५१ ॥

शङ्क्याहंपदार्थंविशिनष्टि । उपाधितोमुक्तः अतएवामलःतथाभावनेसाधनं विज्ञानदृक्विज्ञानं ब्रह्ममात्रप्रत्ययाविच्छेदरूपादृक् निदिध्या
सनं सत्साक्षात्कारेसाधनंयस्यसः ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंभावनावतोलक्षणमाह । एवमिति । उक्तप्रकारेण सदा जातापरमात्मन्येकभावना यस्य सः परिविस्मृतमखिलंपुत्रदेहादि येन सः । अत एवस्वस्वरूपानन्देनैवतुष्टःनतुविषयानन्देन । तस्यपरिणामेदुःखरूपत्वात्ततो विरक्तइत्यर्थः । साक्षान्नित्यात्मनिसुखप्रकाशकः साक्षा

एवं सदा जातपरात्मभावनः स्वानन्दतुष्टःपरिविस्मृताखिलः ॥
आस्ते स नित्यात्मसुखप्रकाशकः साक्षाद्विमुक्तोऽचलवारिसिन्धुवत् ॥ ८२ ॥

दौपाधिकनामरूपभेदरहितत्वेननित्यमखण्डितमात्मस्वरूपंयत्सुखंप्रकाशश्चतद्रूपः एवंरूपो विमुक्तोजीवन्मुक्तः । अचलंनिश्चलंवारियस्यतादृशसिन्धुवदास्ते । विषयसम्बन्धरूपकल्लोलरहितआस्तइत्यर्थः ॥ ८२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशस्यमत्प्राप्तिर्भवत्येवेत्याह । एवमिति । उक्तप्रकारेणसदाऽभ्यस्तसमाधेर्योगिनः निवृत्ताःसर्वेषामिन्द्रियाणांगोचराविषयाःशब्दादयो यस्य विनिर्जिताअशेषारिपवःकामादयोयेनतस्य । तज्जयेनविषयेष्वन्तःकरणाप्रवृत्तिः । अतएव सर्वज्ञत्वनित्यत्वनित्यतृप्तत्वबोध

एवं सदाऽभ्यस्तसमाधियोगिनो निवृत्तसर्वेन्द्रियगोचरस्य हि ॥ विनिर्जिताशेषरिपोरहंसदा दृश्यो भवेयं जितषड्गुणात्मनः ॥५३ ॥

रूपत्वस्वतन्त्रत्वनित्यमलुप्तत्वानन्तरूपाषड्गुणायस्यताद‍ृशआत्मजितो वशीकृतोयेनतस्य सदादृश्योभवेयम् । एतेनमद्भक्तस्ययोगिनो ऽहंदृश्योनतुभक्तिविमुखस्येति सूचितम् ॥ ५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंविधोजीवन्मुक्तःप्रारब्धवशेन अनभिमानोभोगानश्नँस्तिष्ठेत् ततोमय्येवविलीयते मद्रूपोभवतीत्याह । ध्यात्वैवमिति ॥ ५४ ।

ध्यात्वैवमात्मानमहर्निशं मुनितिष्ठेत्सदा मुक्तसमस्तबन्धनः ॥
प्रारब्धमश्नन्नभिमानवर्जितो मय्येवसाक्षात्प्रविलीयते ततः ५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सर्वधर्मापेक्षया ऽयमेव धर्मो ज्यायानित्याह । आदाविति । भवसंसारपादिमध्यावसानेषु सर्वथा भयशोकयोः कारणं विदित्वा तत्कारणीभूतं विधिवादयेजितत्वा दभिधादितं विधितं समस्तं कर्ममार्गकाम्यं हित्वा अखिलात्मनां जीवानां स्वरूपभूतं मामात्मानं परमेश्वरं भजेत् । य

आदौ च मध्ये च तथैव चान्ततो भवं विदित्वा भयशोककारणम् ॥ हित्वा समस्तं विधिवादचोदितं भजेत्स्वमात्मानमथाखिलात्मनाम् ॥ ५७ ॥

था धनस्य जनेनादौ दुःखं मध्ये पालनकृतं तत्र राजादिकृतं भयमन्ते नाशे शोकपर्यवसायि दुःखमेवं पदार्थमात्रे द्रष्टव्यम् ॥ ५७ ॥

CC-0. In Public Domain. Digitization by eGangotri

मय्यभेदभावनया नामरूपाविभागेन तद्रूप एवभवतीत्यमुमर्थं सदृष्टान्तमाह । आत्मनीति । आत्मनिसर्वाधिष्ठानेमयिइदंस्वस्वरूपं जीव मभेदेनविभावयन्यदा । तिष्ठतीतिशेषः । तदामयात्मनापरमेश्वरेणाऽभेदेनभवति अभिन्नोभवति । तत्रदृष्टान्तः यथासमुद्रेप्रविष्टं नद्यादि

आत्मन्यभेदेन विभावयन्निदं भवत्यभेदेन मयाऽत्मनातदा ॥
यथाजलं वारिनिधौ यथापयः क्षीरेवियद्व्योम्न्यऽनिले यथाऽ
निलः ॥ ५६ ॥

जलंसमुद्रएव यथाक्षीरेगवादिक्षीरेप्रक्षिप्तंपयःक्षीरमेव यथाव्योम्निमहाकाशेघटाद्यवच्छिन्नाकाशोघटादिभङ्गे च यथाचर्मभस्त्रिकाद्यव च्छिन्नोवायुरनिलेमहावायौ नामरूपाविभागेनैकीभवतीत्यर्थः ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमात्मतत्त्वज्ञस्य जगत्सत्यत्वभ्रमःस्वतएवापैतीत्याह । इत्थमिति । हिरण्यर्थे । लोकसंस्थितोऽपिजीवन्मुक्तिदशायांप्रारब्धवशाल्लोकव्यवहारंकुर्वन्नपिजगन्मृषैवेतिविभावयन्सन् यदियदा इत्थमीक्षते ऐकात्म्यं जानीयात्तदा निवृत्तजगत्सत्यत्वभ्रमो भवतीति शेषः। तत्र हेतुः श्रुतियुक्तिमानतोनिराकृतत्वात् । अतोऽन्यदार्तमित्यादिश्रुतिरूपात् जगन्मिथ्यादृश्यत्वात् शुक्तिरजतवदितितदुपबृंहितानुमानरू

इत्थं यदीक्षेत हि लोकसंस्थितो जगन्मृषैवेतिविभावयन्मुनिः ॥
निराकृतत्वाच्छ्रुतियुक्तिमानतो यथेन्दुभेदो दिशि दिग्भ्रमादयः ॥ ५७ ॥

पात्मानतःप्रमाणतोनिराकृतत्वात् तत्रदृष्टान्तोयथेन्दुभेदः एकचन्द्रेद्विचन्द्रत्वभ्रमस्तदेकत्वज्ञानेननिवर्तते यथाच दिशिप्राच्यादौअन्यदिक्त्वभ्रमः सोऽपितत्त्वज्ञानान्निवर्तते । एवंभ्रमतःपुरुषस्य दिक्षुभ्रमणाद्भ्रमोनिकटवर्तिवृक्षादौच भ्रमणभ्रमस्तत्स्थैर्यज्ञानेन निवर्तते तद्वत् ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशज्ञानेमदाराधनमेवोपायइत्याह । यावदिति । अखिलं जगन्मदात्मकंमदधिष्ठानकंमाद्विवर्तंभूतंयावन्नपश्येत्तावन्मत्प्राप्तयेश्रद्धालुः भगवदाराधनमेवज्ञानप्रापकमित्यत्र दृढविश्वासवान् अतिशयेनोर्जिताद्वृद्धिमतीभक्तिर्मयिभगवतिपूज्यताबुद्धिरूपालक्षणं चिह्नंयस्यसः ।

यावन्नपश्येदखिलं मदात्मकं तावन्मदाराधनतत्परो भवेत् ॥
श्रद्धालुरत्यूर्जित भक्तिलक्षणो यस्तस्य दृश्यो ऽहमहर्निशं
हृदि ॥ ५८ ॥

तावन्मदाराधननिष्ठोभवेत् एवंहितस्यहृदि अहमहर्निशंदृश्योभवा मियेयथामांप्रपद्यन्ते तांस्तथैवभजाम्यहमितिस्मृतेः ॥ ५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वोक्तवचनजातस्य श्रुतिसमत्वं कथमेतदालोचनमपिमदाराधनप्रतिबन्धकदुरितध्वंसोपायइत्याह रहस्यमिति । श्रुतिसारसङ्ग्रहत्वेनाति

रहस्यमेतच्छ्रुतिसारसङ्ग्रहं मया विनिश्चित्य तवोदितं प्रिय ॥
यस्त्वेतदालोचयतीहबुद्धिमान् स मुच्यते पातकराशिभिः
क्षणात् ॥ ५९ ॥

गोपनीयता अप्रमाणशङ्काकलङ्कराहित्यंसूचितम् । आलोचयतिसम्यग्विचारयति ॥ ५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ भगवानुक्तमेवार्थंसङ्क्षेपेण दार्ढ्यायपुनराह भ्रातरिति । यदीतियादित्यर्थे । यदीदंजगत् परिदृश्यते तत्सर्वंमायैवेतिज्ञात्वेति शेषः चेतसासर्वंपरिहृत्यतत्रौदासीन्यंकृत्वामद्भावनयामदैक्यभावनया भावितंशुद्धंमानसंयस्यताद्दशास्तिष्ठ । इत्युपदिश्याशिषंप्राह निरामयः

भ्रातर्यदीदं परिदृश्यते जगन्मायैव सर्वं परिहृत्य चेतसा ॥ मद्भा
वनाभावितशुद्धमानसः सुखी भवाऽऽनन्दमयो निरामयः ६०

सन्सुखीभव । सर्वंदुःखनिवृत्त्येति भावः । ततोऽन्तरङ्गामन्यामाशिषमाह आनन्दमयोभवेति तद्रूपोभवेत्यर्थः । यद्यपिपूर्वमानन्दरूपत्वमस्त्येवतथाऽपितत्प्राप्तिर्विस्मृतकंठस्थभूषणप्राप्तिवत ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंरीत्यास्वोपासकस्यलोकपावनत्वमाह। यइति । कदावा यदाकदाचिदित्यर्थः । हृदानिर्मलेनान्तःकरणेन यो मामगुणं प्राकृतसत्त्व रजस्तमोरूपगुणरहितम् । सच्चिदानन्दरूपत्वात् । अतएवगुणाद्व्याकृतात्परंमायातीतम् । यदिवायद्वत्वर्थे । गुणात्मकं सर्वज्ञत्वादिलोकोत्तरलावण्यादिगुणवानात्मामूर्तिर्यस्यतं दृश्यमानं रूपं सेवते । सद्विविधोऽप्युपासकःअहं मत्स्वरूपएव । मामकइत्यर्थोवा । मि-

यः सेवते मामगुणं गुणात्परं हृदा कदा वा यदि वा गुणात्मकम् ॥ सोऽहंस्वपादाञ्चितरेणुभिः स्पृशन्पुनाति लोकान्त्रितयं यथा रविः ॥ ६१ ॥

योऽहिज्ञानिनोऽत्यर्थमहंमचममप्रिय इत्युक्तेः । तादृशोभक्तःस्वपादलग्नरेणुभिःसंस्पृशन्लोकत्रयमपि पुनाति । अज्ञानध्वान्तनिरसनेनपवित्रीकरोति । यथारविःस्वकरैर्जगद्वितिमिरीकरोति तद्वत् ॥ ६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानीमेतद्ग्रन्थार्थालोचनासमर्थस्यपाठमात्रतोऽपिमहत्फलमाह । विज्ञानंविज्ञानजनकं करणव्युत्पत्त्यंतिबोध्यम् । वेदान्तैरुपनिषद्वाक्यै
र्वेद्यंचरणंजगज्जन्मादिलक्षणंकर्मयस्यतेन ननुपाठमात्रादेतादृशमहत्फलप्राप्तिःकथमित्याशङ्क्यभवत्येवेति सूचयंस्तत्रहेतुमाह । मद्वचने

विज्ञानमेतदखिलंश्रुतिसारमेकं वेदान्तवेद्यचरणेनमयैवगीतम् ।
यःश्रद्धया परिपठेद्गुरुभक्तियुक्तो मद्रूपमेति यदि मद्वचनेषुभक्तिः
॥ ६२ ॥ इतिश्री अध्यात्मरामायणे रामगीता समाप्ता ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसम्वादे उत्तरकाण्डे श्रीरामगीतायां पञ्चमःसर्गः ॥ ५ ॥

षुभक्तिर्विश्वासोयदीतिअर्थाद्गुरुवाक्यविश्वासस्यैव फलदायकत्वादितिभावः ॥६२॥ इत्यध्यात्मरामायणेउमामहेश्वरसम्वादे उत्तरकाण्डे
सेतौपञ्चमःसर्गः ॥ ६२ ॥ श्रीरामचन्द्रार्पणमस्तु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीराममन्त्रःखलु तारकाख्यः संसारसन्तारणसुप्रसिद्धः ॥ भक्-
त्याऽप्यभक्त्या समुपासितोयः श्रेयांसि सर्वाणि ददात्यवश्य
म् ॥ १ ॥ तन्तारकंसम्प्रतिपादयन्ती श्रीरामगीता सकलैः सुसे
व्या ॥ विज्ञप्तिमित्थंजनको विनीतः समर्पयत्यार्यजनेषुहर्षात् २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प,	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति
स्यर्द्धि	स्पर्द्धि	१	२	१	शाध्रि	शाधि	३	२	६	नाशे	नाशो	६	१	१
जींव्य	जींव्य	१	२	३	व्यत्र	व्यत्र	४	१	१	नन्वितिश	नन्वितिशे	६	२	१
सम्वीन्धनीः	सम्वन्धिनीः	२	२	१	ष्ठामे	ष्ठानमे	४	२	३	त्रिदा	त्रिदा	६	२	२
व्रह्म	व्रह्म	२	१	२	व्रह्म	व्रह्म	४	२	१	मेत्रें	मेव	६	२	२
व्रह्म	व्रह्म	२	१	६	वलेन	वलेन	४	२	७	व्येतीत	व्यतेति	७	१	१
वोधोऽासि	वोधोऽसि	३	१	४	निघृत्ते	निवृत्ते	५	१	१	वीरहा	वीरहा	७	१	१
संवन्ध	सम्वन्ध	३	१	७	कत्व	कत्वा	५	१	१	सद्दष्ट	सद्‌दृष्ट	८	१	३
भवस्यंससार	भवस्यसंसार	३	२	१	नक	नैक	५	१	१	विशुद्धं	विशुद्ध	८	२	१
न्सार	सार	३	२	२	बेदान्त	वेदान्त	५	१	१	कारांतः	कारान्तः	८	२	२
पर्वग	पवर्ग	३	२	२	पूर्वे	पूर्वे	५	१	२	वृंत्ति	वृत्ति	९	१	१
वारिधि	वारिधि	३	२	२	वुद्‌ध्या	वुद्‌ध्या	५	१	६	स्वत्राना	स्वना	९	२	१
					एवं	एव	५	१	६	वृत्यु	वृत्यु	१०	१	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
रींप	रपि	११	२	१	ह्लाभ	ह्लाभे	१८	१	८	विभाव्यत	विभाव्यते	२५	१	४ मु
नर्दृष्टा	र्नदृष्टा	१२	१	४	इतिः	इति	१८	२	२	लिङ्गेद	लिङ्गदे	२६	१	२
वार्द्धे	वार्द्धे	१२	१	७	ज्ञानन	ज्ञानेन	१९	१	१	बोधकः	बोधतः	२५	१	६
त्याभिः	त्माभिः	१२	२	६	वुद्धया	वुद्ध्या	२०	१	५	{ विज्ञानं ब्रह्म }	{ विज्ञानंनिादि ध्यासनं ब्रह्म }	२६	२६	३
शुद्द	शुद्ध	१३	१	१	रागादि	रागादे	२१	१	३	भेदेरा	भेदरा	२७	१	६
जीवया	जीवयो	१३	१	२	विलय	विलय	२१	१	७	रुपा	रूपाः	२७	२	१
निर्वाध	निर्वाध	१४	१	१०	धम	धर्म	२१	२	१	आत्म	अत्मा	२७	२	१
भव	भव	१५	१	४	म्वस्य	म्वंयस्य	२१	२	२	मुनिति	मुनिास्ति	२८	१	२
अर्जोद्र	अर्जोऽद्र	१६	२	६	वुवै	वुधै	२३	१	५	भव	भवं	२८	२	१
द्व त्	द्वात्	१७	२	१	एव	एवं	२३	२	१					
					द्रष्ट	द्रष्टृ	२४	१	२					

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
तदकत्व	तदेकत्व	२६	२	७	वतथाऽ	वतथाऽ	३१	१	६	मद्वचने	मद्वचने	३२	१	२
भ्रमण	भ्रमणं	२६	२	८	कंठ	कण्ठ	३१	१	२	तन्तारकं	तत्तारकं	३२	२	३

नेपाल पाशुपत, यन्त्रालये मुद्रिता.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इती रामगीता सटीका समाप्ता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द. नं. १६६४४

अथ रामगीता सटीका प्रारभ्यते ॥

मू० ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ रामंरत्नकिरीटकुण्डलयुतं केयूरहारान्वितं
सीतालङ्कृतवामभागममलं सिंहासनस्थं विभुम् ॥ सुग्रीवादि
कपीश्वरैःसुरवरैः संसेव्यमानं सदा विश्वामित्रपराशरादिमुनि-
भिः संस्तूयमानं भजे ॥ १ ॥ इतिध्यात्वा ॥ श्रीमहादेवउवाच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशाय नमः ॥ ध्यायेत्वाजानुबाहुं धृतशरधनुषं वद्धपद्मासनस्थं पीतंवासोवसानं नवकमलदलस्पर्द्धिनेत्रं प्रसन्नम् ॥ वामाङ्कारूढ
सीतामुखकमलमिलल्लोचनं नीरदाभं नाना लङ्कारदीप्तं दधतमुरुजटामण्डलं रामचन्द्रम् ॥ १ ॥ ततइति जगतां यानि मङ्गलानि
आनन्दास्तेषामुपजीव्यभूतं मङ्गलं ब्रह्मानन्दः सएवात्मास्वरूपं तेन तस्यैवानन्दस्यान्यानि भूतानिमात्रामुपजीवन्तीति श्रुतेः मङ्ग

ततोजगन्मङ्गलमङ्गलात्मना विधाय रामायणकीर्तिमुत्तमाम् ॥
चचार पूर्वाचरितं रघूत्तमो राजर्षिवर्य्यैरभिसेवितं यथा ॥ १ ॥

लानाञ्चमङ्गलमिति स्मृतेश्च किंच जगतां मङ्गलं कल्याणं यस्मात्तादृशकल्याणरूपआत्मामूर्तिस्तया उत्तमांश्रोत्रादीनां मोक्षदत्वेना
त्युत्तमां रामायणकीर्तिं वाल्मीक्यादि कृत नानाविध रामायण प्रवर्तिकां रावणवधादिजां कीर्तिंविधाय स्थितोरघूत्तमः ततः सीताप
रित्यागानन्तरं पूर्वैः स्ववंशजैराचारितं प्रजापालनसत्कथाश्रवणादिकं केवलंतत्पूर्वजैरेवाचरितमितिन किंत्वन्यैरपि राजर्षिश्रेष्ठैर्य
थाऽभिसेवितं तथाचचार कृतवान् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदारागुरुदेवविश्वासलक्षणमहागुणवती यद्वा उदारा दानशीलाबुद्धिर्यस्य तेन पुरातनीः प्राचीनराजसम्बन्धिनीः शुभाः धर्माधर्मनिर्णेत्रीः प्रमत्तस्य स्वगोमण्डलमिश्रितब्राह्मणगोदानात् प्रमत्तस्य नृगस्य राज्ञो द्विजस्य शापात्तिर्यक्त्वमाह तेनाज्ञातकृतब्रह्मस्वापहारेण परमधा

सौमित्रिणापृष्ट उदारबुद्धिना रामःकथाःप्राह पुरातनीःशुभाः ॥
राज्ञः प्रमत्तस्य नृगस्य शापतो द्विजस्य तिर्यक्त्वमथाह राघवः
॥ २ ॥

र्मिकस्यापीदृश्यवस्थेति सर्वथाब्रह्मस्वविमुखताधर्मइतिसूचितम् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एकान्तेविजने उपस्थितंप्राप्तम् विनयान्वितः सन्भक्त्यागुरुरयमिति बुद्ध्या प्रणम्य अनेनगुरूपसदनप्रकारउक्तः आसादितंशुद्धंभाव

कदाचिदेकान्त उपस्थितंप्रभुं रामं रमालालितपादपङ्कजम् ॥
सौमित्रिरासादितशुद्धभावनः प्रणम्यभक्त्याविनयान्वितोऽब्र-
वीत् ॥ ३ ॥

नं भावनाकरणमन्तः करणंयेनसः शुद्धान्तःकरणइतियावत् भगवदुक्तसत्कथाश्रवणेन शुद्धान्तःकरणइत्यर्थः ॥ ३ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हे महामते महतीसर्वविषयामतिर्यस्य तस्य संबोधनं त्वं शुद्धबोधोऽसि अनवच्छिन्नचैतन्यरूपोऽसि सर्वदेहिनामात्माऽसि जीवानांतत् प्रतिबिम्बत्वात् अधीशोऽसि अन्तर्यामित्वान्नियन्ताऽसि वास्तवभेदाभावाच्च सर्वात्मत्वम् औपाधिकभेदाच्च नियन्तृनियम्यभावोबोध्यः निराकृतिः अस्मदादिवत्स्वार्जितकर्माधीनशरीराकृतिरहितः नन्वेवंसर्वैः कथमेवंनज्ञायतेऽतआह ज्ञानदृशां स्वयमेवप्रतीयसे ज्ञायतेऽ

त्वं शुद्धबोधोऽसि हि सर्वदेहिनामात्माऽस्यधीशोऽसि निरा-कृतिःस्वयम् ॥ प्रतीयसे ज्ञानदृशां महामते पादाब्जभृङ्गाहितसङ्गसाङ्गिनाम् ॥ ४ ॥

नेनेतिज्ञानं वेदान्तवाक्यजातं तदेवदृक्दर्शनसाधनंयेषां तेषामितिसंबन्धसामान्येषष्ठी तैरित्यर्थः तादृशदृक्लाभश्च त्वद्भक्त्यधीनइत्याह पादेति त्वच्चरणकमलयोर्भृङ्गवदाहितःकृतः सङ्गोयेन तादृशान्तः करणसङ्गवतां त्वच्चरणकमल सङ्घमान्तः करणवतामित्यर्थः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ प्रार्थयते अहमिति भवस्यं संसारस्यापवर्गो निवृत्तिर्यस्मात्ताहशं तव पादाम्बुजं प्रपन्नोऽस्मि शरणं प्राप्तोऽस्मि योगिभावितं योगीभिः संन्सारमुक्तये भावितम् अनेन तस्य भवापवर्गत्वे सदाचारः प्रमाणमुक्तम् प्रार्थनीयमाह अपारवारिधिरूपं यदज्ञानं संसारमूलकारणं यथासुखम्

अहं प्रपन्नोऽस्मि पदाम्बुजं प्रभो भवापवर्गं तव योगिभावितम् ॥ यथाञ्जसाज्ञानमपारवारिधिं सुखं तरिष्यामि तथाऽनुशाधि माम् ॥ ५ ॥

क्लेशेन तरिष्यामि तथा मामनुशाधि शिक्षय अपारवारिधिमित्यनेन सपारप्रसिद्धसमुद्राद्व्यतिरेक उक्तः अशक्यतरणताऽनेन ध्वनिता ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्थोत्तरमवतारयति श्रुत्वेति रामः सौमित्रिवचः श्रुत्वा अथशब्दोवाक्यालङ्कारे तदा श्रवणाऽव्यवहितकाले एवप्रपन्नानां भक्तानामार्ति संसारदुःखंहरतितादृशः प्रपन्नार्भ्रमादिहीना भक्तानुग्रहपरा च धीर्यस्यसः क्षितिपालानां राज्ञां भूषणभूतोज्ञानरूपतमसउपशान्तये त.

श्रुत्वाथ सौमित्रिवचोऽखिलं तदाप्राहप्रपन्नार्तिहरःप्रसन्नधीः ॥
विज्ञानमज्ञानतमोपशान्तये श्रुतिप्रपन्नं क्षितिपालभूषणः ॥ ६ ॥

दर्थम् सन्धिरार्षः श्रुतिभिः तमेवविदित्वाऽतिमृत्युमेतीत्यादिश्रुतिभिः प्रपन्नं तत्फलकत्वेन बोधितं विज्ञानमात्मतत्वज्ञानामिति सामान्य तः प्रथमंप्राह ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथतादृशज्ञानप्राप्त्यै क्रमेणबहिरङ्गान्तरङ्गसाधनान्याह आदाविति स्ववर्णाश्रमेषु शास्त्रेण वर्णिता याः क्रियानित्यनैमित्तकयज्ञदाना दिरूपास्ताः कृत्वा समासादितशुद्धमानसः प्राप्तान्तःकरणशुद्धिः तत्पूर्वमुपात्तसाधनः तदनुष्ठानपूर्वकमेवउपात्तानिसाधनानि शम दमादीनियेन तादृशः अनेनकर्मणां बहिरङ्गत्वं शमादीनामन्तरङ्गत्वं स्फुटमेवोक्तम् किंच शमदमवैराग्यदार्ढ्यपर्यन्तं कर्मानुष्ठामेवेति

आदौ स्ववर्णाश्रमवर्णिताःक्रियाः कृत्वा समासादितशुद्धमानसः
समाप्य तत्पूर्वमुपात्तसाधनः समाश्रयेत्सद्गुरुमात्मलब्धये॥ ७॥

सूचितम् ततस्तत्कर्मानुष्ठानं समाप्य त्यक्त्वा संन्यस्येतियावत् आत्मलब्धये आत्मज्ञानाय तत्फलकाय तत्वमस्यादिवाक्यार्थविचारा- य सद्गुरुं श्रोत्रियंब्रह्मनिष्ठमित्यादि लक्षणलक्षितं समाश्रयेत् सेवेत अनेनव्युत्पत्तिबलेन स्वयमेववाक्यार्थविचारः क्रियमाणो न फला- येति सूचितम् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसारस्यभ्रमिमच्चक्ररूपत्वात्तन्निवृत्तेश्चतत्कारणाज्ञाननिवृत्तिमूलकत्वदज्ञाननिवृत्तेश्चतत्त्वज्ञानकसाध्यत्वात्तत्त्वज्ञानस्यचवेदान्त विचारसा-
ध्यत्वात्तदर्थंगुरुसमाश्रयणामित्याह क्रियेति भवःसंसारश्चक्रवद्विपरिवर्तमानईर्यते कथ्यते तदेवोपपादयति आदृताआदरपूर्वंपूर्वजन्मार्जि
ताक्रियाएनस्यशरीरोद्भवस्यजंन्मनोहेतुः तत्रजन्मनिसुरागिणोविषयाभिलाषवतः तौ शास्त्रप्रसिद्धौ धर्मेतरौ धर्माधर्मौ प्रियाप्रियौसुखदुः

क्रियाशरीरोद्भवहेतुरादृताप्रियाप्रियौतौभवतःसुरागिणः ॥
धर्मेतरौतत्रपुनः शरीरकंपुनः क्रियाचक्रवदीर्यतेभवः॥ ८ ॥

खजनकौभवतःकस्यचिदधर्मएवसुखत्वबुद्ध्याप्रवृत्तिः कस्यचिद्धर्मएवंकदाचिदित्यप्यूह्यम् एवंतत्रोत्पादितकर्मणापुनःशरीरंपुनःक्रिया-
इत्येवंचक्रवद्विपरिवृत्तिः । यथाचक्रेभ्राम्यमाणेऽधोभागः कदाचिदुपरिउपरितनश्चाधः पुनरुपरिपुनरधएवंजन्मक्रिययोर्जन्यजनक-
भावेनपरिवृत्तिरिति बोध्यम् ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तस्य चाज्ञानमेव मूलमित्याह अज्ञानमेवेति अत्र विधौ संसारनिवृत्तिलक्षणे कर्तव्येऽर्थे तद्ध्यानमेव मूलकारणत्वादज्ञानहानमेव विधीयते साध-
नत्वेनेति शेषः ननु कर्मैव तन्नाशकमस्तु किं ज्ञानेनेत्याशङ्क्याह विधौ वज्ञानमेव तन्नाशविधौ मूलाज्ञाननाशने पटीयसी समर्थानकर्मसमर्थमिति शेषः

अज्ञानमेवास्य हि मूलकारणं तद्धानमेवात्र विधौ विधीयते ॥ विद्यैव तन्नाशविधौ पटीयसी न कर्म तज्जं सविरोधमीरितम् ॥ ९ ॥

यतस्तत्तज्जमज्ञानजम् आत्मस्वरूपाज्ञानजन्यं देहाद्यभिमानजन्यत्वात्कर्मणोऽज्ञानजन्यत्वं बोध्यम् ननु तज्जन्यस्यापि तन्नाशकत्वं वृश्चिककर्क-
ट्यादौ दृष्टमित्याशङ्क्य तज्जन्यत्वं वा न नाशकत्वे प्रयोजकं किन्तु सविरोधत्वमेवेत्याह यतः सविरोधं तदीरितं नाशकमुक्तमित्यर्थः ॥ ९ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतएवकर्मणानाज्ञानहानिरित्याह नाज्ञानेत्यादि यतःकर्मणाविरोधाभावान्नाज्ञाननाशनापिरागनाशोवस्तुतः कर्मानुष्ठानात्पुनः सदो
षंक्षयिफलत्वादिदोषविशिष्टंकर्मैवोद्भवेत्कर्मणश्चपुनःसंसारएवेतिनमुक्तिमत्याशा ततस्तस्माद्बुधोविवेकीज्ञानविचारवान् ज्ञायतेऽनेने·

नाज्ञानहानिर्नचरागसङ्क्षयोभवेत्ततः कर्मसदोषमुद्भवेत् ॥ ततः
पुनः संसृतिरप्यवारितातस्माद्बुधोज्ञानविचारवान्भवेत् ॥ १० ॥

तिज्ञानंवेदान्तवाक्यंतद्विचारवान्भवेत ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानीं ज्ञानस्यैवमोक्षहेतुत्वंन्नकुंज्ञानकर्मसमुच्चयवादंदूषणायानुवदतिसार्धेन नन्विति नन्वितिशङ्कायाम् यथाविद्यावेदमुखेनश्रुतिपुराण-
लक्षणेन ब्रह्मविदाप्नोतिपरम् इत्यादिनापुरुषार्थसाधनमुक्ता तथा उभाभ्यामवपक्षाभ्यांयथाखेपक्षिणांगातिः तथैवज्ञानकर्मभ्यांप्राप्यते
ब्रह्मशाश्वतम् इत्यादिनाक्रियाऽपितत्साधनत्वेनोक्ता किंच क्रियाकर्तव्यत। तृतीयार्थेप्रथमा कर्तव्यतयाआवश्यकेकृत्यअवश्यकर्तव्यत-

ननुक्रियावेदमुखेनचोदितायथैवविद्यापुरुषार्थसाधनम् ॥ कर्तव्य
ताप्राणभृतःप्रचोदिताविद्यासहायत्वमुपैतिसापुनः ॥ ११ ॥

याप्रचोदितानित्यनैमित्तिकरूपा एवंचनदकरणेप्रत्यवायोत्पत्त्याज्ञानोत्पत्तिरेवनस्यात् तस्मात्सापुनर्विद्यायाःसहायत्वंप्राप्नोतिघटेजन-
नीयेयथादण्डचक्रादीनांपरस्परसहायता ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्तव्येतीतस्त्रोक्तमंत्रेविवृणोति कर्मेति वीरहावाएषदेवानांयोऽग्निमुद्वासयतेयावज्जीवमग्निहोत्रंजुहोति इतिश्रुतिः तत्रासिद्धान्तीशङ्कते नन्विति ध्रुवंस्थिरंकार्यमिदंपुरुषार्थमोक्षजनिकाविद्यायतः स्वतन्त्राविनाऽपिसहायेन स्वकार्यसंपादनेसमर्था यथातेजस्तिमिरनिवर्तन-

कर्माकृतौदोषमपिश्रुतिर्जगौतस्मात्सदाकार्यमिदंमुमुक्षुणा॥ननु
स्वतन्त्राध्रुवकार्यकारिणीविद्यानकिञ्चिन्मनसाऽप्यपेक्षते ॥ १२

समर्थंमनसाऽपिकिञ्चित्सहायभूतंवस्तुनापेक्षते तथाफलेजननीयेसहायान्तरसंभावनाऽपिनेतिभावः अनेनविद्याफलजननेनिरपेक्षास्वतन्त्र-त्वात्तेजोवदित्यनुमानंसूचितम् ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समुच्चयवादीपरिहराति नेति त्वदुक्तंनेत्यर्थः सत्यकार्यः अक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवति इत्यादिवेदनबोधितःस्थिरकार्योऽपि-
अध्वरः यथाऽन्यानपिकारकादिकान् आरादुपकारकप्रयाजाद्यङ्गानिदेशकालादीनिचप्रकाङ्क्षते तथाविद्यापिअग्निहोत्रंजुहोतिइत्यादिवि

नसत्यकार्योऽपिहियद्वदध्वरः प्रकाङ्क्षतेऽन्यानपिकारकादिकान्
तथैवविद्याविधितः प्रकाशितैर्विशिष्यते कर्मभिरेवमुक्तये ॥ १३ ॥

धिवाक्यतःतत्समूहेनप्रकाशितैः कर्मभिः सहितैवमुक्तयेविशिष्यतइत्यर्थः विद्याफलदानेकर्मापेक्षा अङ्गित्वात् प्रयाजाद्यङ्गापेक्षदर्शा
दिवदितिसत्प्रतिपक्षानुमानमनेनसूचितम् ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदनूदयसिद्धान्तीदूषयति केचिदिति यत्केचिद्वितर्कवादिनइतिज्ञानकर्मणोसमुच्चित्यमुक्तिसाधनंवदान्तितदप्यसत् यथाकेवलंकर्म मोक्ष साधनमित्यसत्तथातन्मीलितमित्यप्यसत् तत्रहेतुर्दृष्टविरोधकारणात् दृष्टोयोविरोधः सर्वलोकदृष्टविरोधरूपात्कारणात्तदसदित्यर्थः विरो

केचिद्वदन्तीतिवितर्कवादिनस्तदप्यसद्दृष्टविरोधकारणात् ॥
देहाभिमानादभिवर्धतेक्रियाविद्यागताहङ्कृतितःप्रसिद्ध्यति १४

धमेवाह देहाभिमानात्क्रियावर्धतेअनात्मनिदेहादावात्मत्वाभिमानात्क्रियावृद्धिः विद्यातुगताहङ्कृतितः गताहङ्कृतिर्यस्यतस्यनष्टाहङ्कृतेः प्रसिद्ध्यति सार्वविभक्तिकस्तासिः एवंचाहङ्कारसत्तामूलकत्वात्क्रियाज्ञानयोः समुच्चयोविरुद्धइत्यर्थः ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथपूर्वपक्षयुक्तानुमानंदूषयनविद्यास्वरूपमाह विशुद्धंविज्ञानंयेभ्यस्तेषांवेदान्तवाक्यानांयाद्विशेषेणरोचनंरलयोरभेदादालोचनंविचार स्तेनाञ्चिताप्रापितायाचरमाआत्मवृत्तिर्ब्रह्माकारांतःकरणवृत्तिः साविद्येतिभण्यतेविद्वद्भिरितिशेषः पुनःसमुच्चयवारणायविद्याकर्मणो वैषम्यमाह कर्मयज्ञादिअखिलकारकादिभिःकर्तव्यकर्मादिभिरङ्गैश्चसहितंसदुदेति फलोन्मुखंभवति विद्यापुनरखिलकारकादीन्निहन्ति

विशुद्धविज्ञानविरोचनाञ्चिताविद्याऽऽत्मवृत्तिश्चरमेतिभण्यते ॥ उदेतिकर्माखिलकारकादिभिर्निहन्ति विद्याऽखिल कारकादि-कम् ॥ १५ ॥

तत्रकर्तृत्वादिबुद्धिंनिहन्ति सकलव्यापारपरित्यागेनब्रह्मणिसमाप्तिर्हिविद्या अतः स्वोत्पत्तौचित्तशुद्धिद्वाराकर्मसापेक्षास्वफलेजनयितव्यं-तन्निरपेक्षैवान्यथाविद्यास्वरूपस्यैवभङ्गापत्तेरितिपूर्वपक्षयुक्तहेतोरसिद्धिरितिभावः ॥ १५ ॥

CC-0. In Public Domain. Digitization by eGangotri

उपसंहरन्मुमुक्षोर्वृत्तिप्रकारमाह तस्मादिति विद्याविरोधाद्विद्यायाःकर्मणासह विरोधेनसमुच्चयोनभवेत्तस्मात्सुधीर्मुमुक्षुरशेषतःकर्मत्यजे-
त् काम्यंतुसर्वथात्याज्यमेवनित्यनैमित्तिकमपियावच्चित्तशुद्धिकर्तव्यमेव ततोऽपित्रह्माणिचित्तस्थैर्यपर्यन्तं कर्तव्यमेव ततस्तदनुसन्धानप्र-

तस्मात्त्यजेत्कार्यमशेषतः सुधीर्विद्याविरोधान्नसमुच्चयोभवेत् ।
आत्मानुसन्धानपरायणःसदा निवृत्तसर्वेन्द्रियवृत्तिगोचरः १६

तिबन्धकत्वात्प्रयोजनाभावाच्चतदपित्याज्यमेवेतिभावः इदानींमुमुक्षुकर्तव्यमाह निवृत्ताःसर्वेषामिन्द्रियाणां गोचराविषयाःशब्दादयोय
स्मात्तादृशःसन् आत्मनःसच्चिदानन्दस्यानुसन्धानमेवपरमयनंप्राप्यंयस्यतथाविधोभवेत् अत्रेन्द्रियप्रत्याहारःकर्तव्यत्वेनोक्तस्तेनतत्पूर्वंप्रा-
णायामाद्यर्थादाक्षिप्तम् ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रागिविरागिभेदेनकर्मणोकर्तव्यताकर्त्तव्यतेआहयावदिति माययाविद्ययाशरीरादिष्ववानात्मसुआत्मधीरहङ्कर्तेत्यादिरूपायावद्वर्तते तावद्विधिवादकर्मणाम् विधिर्यजेतेत्यादिश्रुतिर्वादः कर्तव्यताबोधकोयेषांकर्मणांविधेयोवश्यवर्त्तितत्कर्मकर्ता भवेत तदपगमेतुतदाखिलं जगन्नेतीति

याववच्छरीरादिषुमाययात्मधीस्तावद्विधेयोविधिवादकर्मणाम् ॥
नेतीतिवाक्यैरखिलं निषिद्ध्य तज्ज्ञात्वापरात्मानमथत्यजेत्क्रियाः ॥ १७ ॥

वाक्यैः अथातआदेशोनेतिनेतिइत्यादिवाक्यैर्निषिध्य मिथ्यात्वेननिर्णीयतद्विलक्षणतयासत्यत्वेनपरमात्मस्वरूपंज्ञात्वाक्रियास्त्यजेत् निरूपितमेतत् ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मविज्ञानेसत्यवश्यमविद्या निवर्ततइत्याह यदेति आत्मनिशुद्धेन्तःकरणेपरमात्मनईशस्यात्मनोजीवस्यचयोविभेदोमायान्तःकरण
रूपोपाधिद्वयकृतोविभेदोभेदस्तस्यभेदकं नाशकंभास्वरंप्रकाशशीलंयद्विज्ञानमितरवृत्त्युपमर्दनपूर्वकंब्रह्माकाराऽखण्डाद्वृत्तिर्यदाऽवभाति

यदापरात्मात्मनविभेदभेदकंविज्ञानमात्मन्यवभाति भास्वरम् ॥
तदैवमायाप्रविलीयतेऽञ्जसासकारकाकारणमात्मसंसृतेः॥ १८॥

असंभावनादितिरस्कारेणोदेति तदैव सकारकाजन्मान्तरप्रापककर्मसहितामायातत्तज्जीवोपाधिभूता विद्याऽञ्जसाझदितिप्रविलीयतेनश्यति
ननुतन्नाशेऽपिसंसारनाशःकथमतोमायाविशेषणम् आत्मसंसृतेःकारणंसंसारस्योपादानकारणमेवंचतन्नाशेकार्यनाशोभवत्येवेतिभावः १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं पुनर्दार्ढ्यायाह श्रुतीति तत्त्वमसीत्यादिश्रुतिरूपैःप्रमाणैस्तज्जनितज्ञानेन नाशितासाविद्याकथमपिकार्यकारिणीभविष्यतीति काकुरत्र सर्वथानेत्यर्थः असतःकार्यकारित्वासंभवादितिभावः पुनश्चतस्यानोद्भवइत्याह विज्ञानमात्रादिति अमलाशुद्धाद्वितीयतःद्विती

श्रुतिप्रमाणाभिविनाशिताचसाकथंभविष्यत्यपिकार्यकारिणी ॥
विज्ञानमात्रादमलाद्वितीयतस्तस्मादविद्यानपुनर्भविष्यति १९

यात्मविषयकाद्विज्ञानमात्रादितरासहकृतान्निदिध्यासनपरिपाकजज्ञानाद्यतोनष्टातस्मात्सापुनर्नभविष्यति रज्ज्वज्ञानमूलकस्य सर्पस्य रज्जुज्ञानेन निवृत्तस्ययथानपुनरुत्पत्तिरितिभावः ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्याया इतरनिरपेक्षाया एवमोक्षकारणत्वमुक्तं युक्तिपूर्वकं पुनः कथयति श्रोतृदार्ढ्याय । यदीति । यदि नष्टा तत्त्वज्ञाननाशिता सा न पुनः मस्ूयते नोत्पद्यते तदा कारणाभावादहंमतिः कथं भवेत् । कथमपि न भवेदित्यर्थः । तदभावाच्च तत्काले कर्माभावइति स्वफलजनने सा स्वतन्त्रा इ

यदिस्मनष्टा नपुनःप्रसूयते कर्ताऽहमस्येति मतिः कथं भवेत् ॥
तस्मात्स्वतन्त्रा न किमप्यपेक्षते विद्या विमोक्षाय विभाति केव
ला ॥ २० ॥

तरनिरपेक्षैव न कि मप्यपेक्षते द्वितीयस्य। संभवात् अतः केवलाऽसहायैव विमोक्षाय विभाति तत्फलिका भवतीत्यर्थः ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रार्थे श्रुतिरपिप्रमाणमित्याह सेति साप्रसिद्धा नकर्मणानप्रजयाधनेनत्यागेनैके अमृतत्वमानशुः इत्यादिकातैत्तिरीयश्रुतिःप्रशस्तानामर्थ वादैःप्राशस्त्येनबोधितानामपिकर्मणांन्यासंत्यागंसादरंस्फुटमाह नतुकर्मसमुच्चयमित्यर्थः तथावाजिनांवाजसनेयिनाम् एतावदरेखल्वमृत स.

सातैत्तिरीयश्रुतिराहसादरंन्यासंप्रशस्ताखिलकर्मणां स्फुटम् ॥
एतावदित्याहचवाजिनांश्रुतिर्ज्ञानंविमोक्षायनकर्मसाधनम् २१

त्वम् इत्यादिका ज्ञानंविमोक्षायसाधनं नकर्मेत्येतदाह ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहङ्कारत्यागरूपकारणवैषम्यात् क्रियाज्ञानयोर्वैषम्यमुक्त्वा फलमयुक्तमापिवैषम्यमाह विद्येति हेसमुच्चयवादिन् त्वयाक्रतुरग्निष्टोमादिर्वि द्यासमत्वेनदर्शितः परन्तुसमोदृष्टान्तोनोदाहृतः अनेनक्रतुर्विद्यासमः श्रुतिबोधितकर्तव्यताकत्वादित्यनुमानान्निरस्तम् दृष्टान्ताभावा-द अन्वय्येवानुमानन्नव्यतिरेकीतिभावः एतच्चाकरेविस्तरेणप्रपञ्चितम् ननुविद्याकर्मणीसमे एकफलत्वाच्चक्रदण्डादिवदित्यनुमान-

विद्या समत्वेनतु दर्शितस्त्वया क्रतुर्नदृष्टान्त उदाहृतः समः ॥
फलैःपृथक्त्वाद्बहुकारकैः क्रतुःसंसाध्यतेज्ञानमतोविपर्ययम् २२

मितिचेत्तत्राह फलैः पृथक्त्वात षष्ठ्यर्थेतृतीया फलानांभेदादित्यर्थः एवंचस्वरूपासिद्धोहेतुरितिभावः समानकारकत्वमपिहेतुर्नेत्याह क्रतुर्बहुभिः कारकैरहंममताभिमानरूपैरान्तरैर्वाह्यैश्चदेशकालादिनियमैश्चसाध्यते ज्ञानन्त्वतोविपर्ययवदतोनतयोः साम्यमितिभावः २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वकरणेप्रत्यवायभिया कर्मकार्यमितिचेन्नेत्याह सप्रत्यवायइति कर्मत्यागेनाहंनिश्चयेनाहंप्रत्यवायसंहितोभविष्यामीत्येवंशुद्धात्मानि-
अनात्मधर्मस्यधीरप्रज्ञस्यतत्त्वज्ञानविकलस्यप्रसिद्धा नतुतत्त्वदर्शिनः तस्याहंबुद्धेरभावात् पापादेरज्ञातमधर्मतानिश्चयाच्च तस्माद्बुधैःकर्म

स प्रत्यवायोह्यहमित्यनात्मधीरज्ञप्रसिद्धा नतु तत्वदर्शिनः ॥ तस्माद्बुधैस्त्याज्यमपि क्रियात्मभिर्विधानतःकर्मविधि प्रकाशितम् ॥ २३ ॥

क्रियात्यभिः षष्ठ्यर्थेतृतीया क्रियाफलसक्तचित्तानां विधानतोविधानेनेतिकर्तव्यतयायुक्तंकर्म विधिभिरवश्यकर्तव्यतयाबोधितमपि
त्याज्यामित्यर्थः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविरक्तस्यकार्यमाह। श्रद्धेति । गुरुशास्त्रयोर्विश्वासःश्रद्धानदन्वितोबुभुत्सुःशुद्धमानसोऽपि निष्कामकर्मानुष्ठानाच्छुद्धमानसश्चगुरोः प्रसादाल्लब्धतत्त्वमसीतिवाक्यतः श्रुतमात्मजीवयोरैकात्म्यंविज्ञाय मननिदिध्यासनपरिपाकाभ्यांसाक्षात्कृत्य। चएवार्थः । साक्षा

श्रद्धान्वितस्तत्त्वमसीतिवाक्यतो गुरोःप्रसादादपिशुद्धमानसः॥
विज्ञायचैकात्म्यमथात्मजीवयोः सुखी भवेन्मेरुरिवाप्रकम्पनः
॥ २४ ॥

त्कृत्यवसुखी भवेत् । सकलदुःखहीनो भवेदित्यर्थः । अप्रकम्पनःविषयाभिलाषाक्षोभितान्तःकरणः ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महावाक्यंविवरीतुंवाक्यार्थस्यपदार्थबोधपूर्वकत्वमाह । आदाविति । विधानतः भ्रमप्रमादराहित्येनवाक्यार्थविज्ञानस्यविधावुत्पत्तौआ
दौप्रथमंमुख्यमितियावत् । पदार्थावगतिःकारणम् । हिप्रसिद्धं तस्यपदत्रयंतत्त्वमसीति । तत्रतत्पदार्थःपरमात्मासर्वज्ञत्वादिगुणः त्वं

आदौ पदार्थावगतिर्हिकारणं वाक्यार्थविज्ञानविधौ विधानतः ॥
तत्त्वंपदार्थौपरमात्मजीवकावसीतिचैकात्म्यमथानयोर्भवेत्
॥ २५ ॥

पदार्थोजीवः अनयोस्तत्त्वंपदार्थयोरैकात्म्यंतद्बोधकमसीतिपदम् ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुसर्वज्ञत्वादिगुणस्येशस्यकिञ्चिज्ज्ञत्वधर्मवताजीवेनैकात्म्यं विरुद्धमित्याशङ्क्याह । प्रत्यगिति । अहंबुद्धिवेद्यत्वंप्रत्यक्त्वंजीवधर्मः परोक्षत्वमीशधर्मस्तदादिधर्मकृतमात्मनोःपरमात्मजीवात्मनोर्विरोधंविहायत्यक्त्वातयोः संशोधिताम् युक्तिभिःसम्यग्विचारितांतत्त्वंपदाभ्यांशक्त्यभावेऽपिवक्ष्यमाणप्रकारयालक्षणयालक्षितां ज्ञाताञ्चिदात्मतां संगृह्य तत्त्वंपदोपास्थितिविषयांकृत्वा स्वमात्मानंतथाज्ञात्वाऽथएकात्मज्ञानानन्तरमद्वयोभवेत् । चित्स्वरूपतांप्राप्तइवभवेत् । पूर्वमपितत्स्वरूपएवविस्मृतकण्ठचामीकरन्यायेनचतत्प्राप्तिः तदुक्तम् ।

प्रत्यक्परोक्षादिविरोधमात्मनोर्विहायसंगृह्यतयोश्चिदात्मताम् ॥
संशोधितांलक्षणयाचलक्षितांज्ञात्वास्वमात्मानमथाद्वयोभवेत्
॥ २६ ॥

अयंभाव : तत्त्वंपदयोर्द्वावर्थौ वाच्योलक्ष्यश्च तत्रतत्पदस्यमायोपाधिःसर्वज्ञत्वादिविशिष्टोवाच्यः त्वंपदस्यापिकिञ्चिज्ज्ञत्वादिविशिष्टो मायाकार्याविद्योपाधिरविद्यावदन्तःकरणोपाधिर्वाच्यः उभयोरपिविशेषणांशत्यागेनशुद्धश्चिदात्मालक्ष्यः तत्रवाच्ययोर्विरुद्धधर्मकत्वादैक्यासंभवेऽपिलक्ष्ययोरैक्यंनिर्बाधमेवेति ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तलक्षणास्वरूपमाह । एकात्मकत्वादिति जहतीलक्षणाजहत्स्वार्थलक्षणायथागङ्गायांघोषइत्यत्रगङ्गापदार्थस्यप्रवाहस्यघोषाधारता
नुपपत्त्यामर्वथातत्परित्यागेनतीररूपार्थलक्षणा साप्रकृते न एकात्मत्वात् । विशेष्यांशस्यैकत्वात्सर्वथास्वार्थत्यागाभावात् । तथाज
हल्लक्षणताजहत्स्वार्थलक्षणात्वत्त्वमपिअत्रनसंभवति । यथाकाकेभ्योदधिरक्ष्यतामित्यादौकाकपदस्यस्वार्थात्यागेनैवदध्युपघातकेलक्षणा
सापिन । विरोधतःविशेषणत्यागेनसर्वथास्वार्थत्यागाभावात् । अतोभागलक्षणाजहदजहल्लक्षणायुज्यते । अदोषतःपूर्वोक्तदोषाभावात्

एकात्मकत्वाज्जहती न सम्भवेत्तथाऽजहल्लक्षणता विरोधतः॥
सोऽयंपदार्थाविवभागलक्षणायुज्येततत्त्वंपदयोरदोषतः॥२७॥

विशेष्यांशस्यात्यागाद्विशेषणांशस्यत्यागाच्च । तत्रदृष्टान्तः । सोऽयंपदार्थाविव । यथासोऽयंदेवदत्तइत्यत्रतद्देशादिविशिष्टोऽतीतानुभव
विषयोवातत्पदार्थः एतद्देशादिविशिष्टोऽनुभूयमानोवेदंशब्दार्थः । तयोश्चाविरुद्धविशेषणकत्वादैक्यासंभवेनदेशादिरूपविशेषणत्यागेना
नुभवगतानातत्वादिविशेषणत्यागेनवालक्षणयैक्यंतद्वदितिभावः ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथत्याज्यत्वायजीवोपाधिमाह । रसादी ति । रसापृथ्वीआदिर्येषांतानिपञ्चीकृतानियानिभूतानितेभ्यःसंभवोयस्यतत् । पञ्चीकरणंचे त्थम् एकैकंभूतंद्विधाविभज्यतत्रैकंभागंचतुर्धाविभज्यतेषांभागानांस्वेतरभूतचतुष्टयार्धभागचतुष्टयेसंयोजनेएकैकंभूतंपञ्चात्मकंभवतिभा

रसादिपञ्चीकृतभूतसंभवंभोगालयंदुःखसुखादिकर्मणाम् ॥ शरी रमाद्यन्तवदादिकर्मजंमायामयंस्थूलमुपाधिमात्मनः ॥ २८ ॥

गाधिक्याच्चप्रातिस्विकतयाभूरादिव्यवहारोऽपि । सुखदुःखयोरादीनियानिकर्माणितेषांभोगस्तत्कर्मजसुखदुःखानुभवस्तस्यालयमाश्र यभूतमाद्यन्तवत्उत्पत्तिनाशयोगि आदिकर्मजंप्राग्भवीयकर्मजन्यंमायामयंपरम्परयामायाविकारः तद्विकारभूतविकारत्वात् । एतच्छरी रमात्मनःस्थूलमुपाधिंवदन्तीतिशेषः ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसूक्ष्मोपाधिमाह। सूक्ष्ममिति । बुधाःअन्यत्स्थूलशरीरविलक्षणंशरीरंलिङ्गदेहाख्यमात्मनउपाधिंविदुः । तत्स्वरूपमाह। सूक्ष्मंचक्षु-
राद्यविषयः मनोबुद्धिदशेन्द्रियैःप्राणैश्चयुतम् सङ्कल्पात्मकंमनः निश्चयात्मिकाबुद्धिः घ्राणरसनाचक्षुस्त्वक्श्रोत्रेतिपञ्चज्ञानेन्द्रियाणि वा-

सूक्ष्मंमनोबुद्धिदशेन्द्रियैर्युतंप्राणैरपञ्चीकृतभूतसंभवम् ॥ भोक्तुः
सुखादेरनुसाधनंभवेच्छरीरमन्याद्विदुरात्मनोबुधाः ॥ २९ ॥

क्पाणिपादपायूपस्थानिकर्मेन्द्रियाणि प्राणापानव्यानोदानसमानाश्चप्राणास्तैर्युतमेतत्सप्तदशसमुदायात्मकम्। तदाधारभूतान्याह ।अप
ञ्चीकृतभूतसंभवंतेभ्यउत्पन्नमतएवादृश्यम् । तथाभोक्तुःसुखादेःसुखदुःखाद्यनुभवस्यानुसाधनम् स्थूलशरीरस्यैतदनुगतस्यैवभोगसाधनत्व
मितिभावः । एताद्दियोगेनैवमरणव्यवहारइतिबोध्यम् ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिजीवोपाधिद्वयमुक्त्वाईशोपाधिमाह । अनादीति । अनादि उत्पत्तिहीनम् । नानाविधपरिणामशालितयापरिणामरूपेणनश्वरामिति अनादित्वमात्रोक्त्यासूचितम् । अनिर्वाच्यम् सत्त्वासत्त्वाभ्यांनिर्वक्तुमशक्यम् कारणंसकलप्रपञ्चस्यजनकम् ईदृशीमायातुब्रह्मणःपरमी-

अनाद्यनिर्वाच्यमपीहकारणं मायाप्रधानंतुपरंशरीरकम् ॥ उपाधिभेदान्तुयतःपृथक्स्थितं स्वात्मानमात्मन्यवधारयेत्क्रमात् ॥ ३० ॥

श्वरव्यवहारसंपादकत्वादुत्कृष्टंप्रधानंशरीरकम् । स्वार्थेकः । एवमुपाधिभेदादेकमेवचैतन्यंयतः पृथक्स्थितंजीवईशइतिभेदबुद्धिविषय मतोलक्षणयोपाधिपरित्यागेनस्वात्मानमात्मनिअवधारयेदभेदेनजानीयात् । क्रमाच्छ्रवणमनननिदिध्यासनक्रमेणेत्यर्थः ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवाक्यार्थविचारफलमाह । कोशेष्विति । आनन्दमयस्य ब्रह्मत्वेअन्नमयप्राणमयमनोमयविज्ञानमयेषुचतुर्षुकोशेषुतत्तत्सङ्गात्तत्तदाकृतिर्विभाति यथाजपादिसङ्गात्स्फटिकोऽनेकाकृतिर्भाति । आनन्दमयस्यापि जीवत्ववादिनातुतेनसहपञ्चसु कोशेष्वितिबोध्यम् । अस्मि-

कोशेषुपञ्चस्वपितत्तदाकृतिर्विभातिसङ्गात्स्फटिकोपलोयथा ॥ असङ्गरूपोऽयमजोयतोऽद्वयोविज्ञायतेऽस्मिन्परितोविचारिते ॥ ३१ ॥

न्महावाक्येपरितोविचारितेसम्यग्विचारितेसत्ययमात्माऽसङ्गरूपःअन्नमयादिभिःसङ्गरहितः । असङ्गोनहिसज्जते । इतिश्रुतेः । अजोऽद्वयश्चविज्ञायते । स्थूलोऽहमित्यादिस्त्वज्ञस्यतत्तत्कोशप्रसङ्गात्प्रतीतिःस्फटिकवत् तत्त्वज्ञस्यतुनतथाप्रतीतिरितिभावः । एवंचतत्तदुपाधिकृततत्तद्रूपताप्रतीतिनिरासएव विचारफलमितिभावः ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जाग्रदाद्यवस्थाऽपि बुद्धेर्धर्मोनात्मधर्मइत्याह । बुद्धेरिति । इहआत्मनिस्वप्नादिभेदेन जाग्रत्स्वप्नसुषुप्तिभेदेन यात्रिधावृत्तिर्दृश्यतेसाऽपि गुणत्रयात्मनः सत्त्व रजस्तमोरूपगुणत्रयस्वरूपाया बुद्धेर्धर्मः । उक्तावस्थात्रयस्योक्तमूलकत्वात् । एतदवस्थात्रयस्यास्मिन्नवस्थात्रय-साक्षिणि आत्मनि भानं मृषा बुद्ध्यध्यास निबन्धनं न तु वास्तव मित्यर्थः । अन्योऽन्यतोव्यभिचारतस्तस्यावस्था त्रयस्यस्व रूपतो

बुद्धेस्त्रिधा वृत्तिरपीह दृश्यते स्वप्नादि भेदेन गुणत्रयात्मनः ॥ अन्योऽन्यतोऽस्मिन्व्यभिचारतोमृषा नित्ये परे ब्रह्मणि केवले शिवे ॥ ३२ ॥

मृषात्वात्तज्ज्ञानस्य मृषात्वमेव । स्वप्नकाले जाग्रत्सुषुप्त्योरभावात् । जाग्रतिइतरद्वयस्याभावात् सुषुप्तावितरयोरभावात्परस्परं व्यभिचारोबोध्यः आत्मनस्तदनाश्रयत्वंविशेषणैराह । नित्येउत्पत्तिनाशशून्येपरेगुणत्रयातीते ब्रह्मणिव्यापकेकेवलेऽसङ्गेशिवआनन्दरूपे एवंभूतेसदैकरसेपरस्परव्यभिचारधर्माभानमसंभवीति भावः ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथत्याज्यत्वायसंसारमूलभूतांवृत्तिमाह । देहेति । एषांसङ्घातइतरेतराध्यासविषयात् अजस्रंप्रवाहियो बुद्धेर्वृत्तिस्तमोमूलतयाऽज्ञ
रा. गी. लक्षणाऽज्ञत्वज्ञापिका यावत्परिवर्तते तावद्भवोद्भवःसंसारोद्भवोभवेत् । तमःपदंरजसोऽप्युपलक्षणम् । रजस्तमःप्रधानाबुद्धिः संसारहेतु स.

॥ १७ ॥

देहेन्द्रियप्राण मनश्चिदात्मनां सङ्घादजस्रं परिवर्तते धियः ॥
वृत्तिस्तमोमूलतयाऽज्ञलक्षणा यावद्भवेत्तावदसौ भवोद्भवः॥ ३३॥

॥ १७ ॥

त्वात्सर्वथात्याज्येति भावः ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत महावाक्यविचारस्य कर्तव्यमाह । नेतीति । अथात आदेशोनेतिनेति इति प्रमाणेननिराकृतं मिथ्यात्वेनगृहीतमखिलंजगत्येनसः ततोहृदासत्त्वप्रधानेनमनसासम्यगास्वादितं चिल्लक्षणंघनामृतंदुःखासंभिन्नंसुखंयेनस: । स्वर्गादितुपरिणामदुःखत्वात्तत्संभिन्नमेव । एवंभूतोऽशेषंजगद्देहेन्द्रियादिदृश्यसमूहंत्यजेत् हानोपादानबुद्धिविषयंनकुर्यात् । किन्तूदासीनस्तत्रभवेत् । ननुदेहेन्द्रियादिभिरेवतज्ज्ञान

नेतिप्रमाणेन निराकृताखिलो हृदासमास्वादितचिद्घनामृतः ॥ त्यजेदशेषं जगदात्तसद्रसं पीत्वा यथाऽम्भः प्रजहाति तत्फलम् ॥ ३४ ॥

लाभात्कथमुपजीव्यस्यत्यागइत्याशङ्क्यदृष्टान्तदर्शनेनपरिहराति । यथातृषावानआत्तः सद्रसोमाधुर्ययेनताहशं नारिकेलनारङ्गादि फलान्तवर्त्यम्भःपीत्वा तत्स्थानभूतंतत्फलं जहाति तत्रोदासीनोभवति तद्वत्सर्वदृश्यसारांशोब्रह्मतल्लाभसतिनिः सारंदृश्यंनोपादेयंनापिहेयमितिभावः । यतोभयादिसंभावनातद्धेर्यामित्युच्यते ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतरस्यानित्यत्वेनतत्रवैराग्यार्थमात्मनएवनित्यत्वमाह । कदाचिदिति । कदापीत्यर्थः । अनवः उत्पत्त्यनन्तरंविद्यमानोहिनवः । तेन जन्मानन्तरास्तित्वंव्यावर्तितं नवत्वाभावेनैवजीर्णत्वाभावादवस्थान्तरापत्तिरूप परिणामोऽपिनिरस्तः ।अनेनअस्तिजायतेवर्द्धतेविपरिणम तेऽपक्षीयते नश्यतीति षड्भाव विकार राहित्यमुक्तम् । एवंचैतद्भिन्नं सर्वमुक्तषड्भावविकारवत्त्वादनित्यमिति ततोविरज्येतेतिबोधित-

कदाचि दात्मान मृतोनजायते नक्षीयते नापिविवर्धतेऽनवः ॥
निरस्तसर्वातिशयः सुखात्मकः स्वयम्प्रभः सर्वगतोऽयमद्वयः ३५

म् । यतऽईदृशोऽतएवनिरस्तः सर्वस्यदेहेन्द्रियादेरतिशयोमहत्त्वं येनस्वलाभात्सः यल्लाभान्नापरोलाभइतिःश्रुतेः यतःसुखात्मकः आनन्द स्वरूपः स्वयम्प्रभःस्वप्रकाशकश्च देहेन्द्रियादिस्तु दुःखस्वरूपः परप्रकाश्यश्च । यस्यभासासर्वमिदंविभाति । इतिश्रुतेः । सर्वगतोव्यापकः अयमहंबुद्धिविषयःप्रत्यगात्माऽपिअद्वयः उक्ताद्वयब्रह्मस्वरूपएव । नततोऽतिरिक्तइतिभावः । अयमात्माब्रह्म । इतिश्रुतेः ॥ ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुएवंविधेविकारशून्येआत्मनिजन्ममरणादिप्रवाहरूपसंसारभानंकथमितिशङ्कते। एवंविधेइति।दुःखमयःदुःखप्रचुरः।उत्तरयति। अज्ञानतइ तिअज्ञानमूलकोयोध्यासोदेहान्तः करणादौअहंममेत्यध्यासस्तद्वशात्। एवंचभ्रान्तिरूपातत्प्रतीतिरितिभावः। नन्वेवंकथंतस्यसंसारस्यनि

एवंविधे ज्ञानमये सुखात्मके कथंभवो दुःखमयःप्रतीयते ॥
अज्ञानतोऽध्यासवशात्प्रकाशतेज्ञानेविलीयेत विरोधतःक्षणात्॥
॥ ३६ ॥

वृत्तिस्तत्राह। ज्ञानेति। आविर्भूतइतिशेषः। ज्ञानस्याज्ञानविरोधित्वात्तदुत्पत्तिक्षणएवकारणभूताज्ञाननाशात्तत्कार्यसंसारस्यापि वि लयइत्यर्थः। यथारज्जुज्ञाननरज्जौसर्पस्यलयइत्यर्थः ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाध्यासलक्षणमाह । यदन्यदिति । यदन्यत्सर्पादिकमन्यत्ररज्ज्वादौ भ्रमात्भ्रमजनकाद्दोषाद्विभाव्यते विज्ञायते अमुं विपश्चितो विद्वांसोऽध्यास इत्याहुः । यथाऽसर्पभूते रज्ज्वादौ अहिविभावनं सर्पारोपो रज्ज्वबुद्धिमूलकस्तद्वदीश्वरेऽपि जगद्देहादिसंसारात्मकं सर्वं विभाव्य-

यदन्यदन्यत्र विभाव्यते भ्रमादध्यासमित्याहुरमुं विपश्चितः॥
असर्पभूतेऽहिविभावनं यथा रज्ज्वादिके तद्वदपीश्वरे जगत्॥३७॥

ते आत्मज्ञानाभावात्त्रयार्थतया ज्ञायते ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनिजगज्ज्ञानेकीदृशोऽध्यासोनिमित्तंतदाह विकल्पेति सर्वविकल्पकारणमायारहितेवस्तुतस्तत्सङ्गरहितेचिदात्मकेचित्स्वरूपेसर्वकारणेनिरामयेदुःखासंभिन्नानन्दमयेकेवलेसर्वविकारशून्यपरेदृश्यविलक्षणेब्रह्मणिव्यापके आत्मनिप्रथममहङ्कारः कल्पितः सएवाध्यासः ।

विकल्पमायारहितेचिदात्मके ऽहङ्कारएष प्रथमः प्रकल्पितः ॥
अध्यासएवात्मनिसर्वकारणे निरामयेब्रह्मणि केवलेपरे ॥ ३८॥

अहंबुद्ध्यात्मकोऽध्यासएवसर्वसंसारकारणमितिभावः ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बुद्धिनिष्ठएवसंसारोनत्वात्मनिष्ठइत्यत्रान्वयव्यतिरेकौप्रमाणयति । इच्छादीति । परेसर्वसाक्षिणिआत्मनिसंसृतिहेतवःभासमानसंसारकारणं
सदाकालत्रयेऽपिइच्छादिरागादिसुखादिधार्मिकाः इच्छांपक्षेरागद्वेषौसुखदुःखंइत्येवमादिद्वन्द्वधार्मिकाःधियएवधीषुसतीषुसंसारइत्यन्वयमु

इच्छादिरागादिसुखादिधार्मिकाः सदा धियः संसृतिहेतवः परे ॥
यस्मात्प्रसुप्तौतदभावतःपरः सुखस्वरूपेणविभाव्यतेहिनः ॥३९॥

क्त्वातद्व्यतिरेकमाहयस्मात्कारणात्प्रसुप्तौतदभावात् धीवृत्त्यभावात् परआत्मानोऽस्माभिःतृतीयार्थेषुषष्ठी । सुखरूपेणस्वस्वरूपमात्रेणाविभा
व्यतेनिश्चीयते नतु संसारित्वेनेतिभावः सुप्तोत्थितस्तुसुखमहमस्वाप्समितिप्रत्यभिज्ञानुभवात्तदात्मस्वरूपनिश्चयोऽस्तीतितात्पर्यम् ॥ ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथपुनस्तत्त्वंपदार्थस्वरूपमाह । अनादीति । अनादिर्याऽविद्यातदुद्भवोयस्या बुद्धेरन्तःकरणस्यतत्रबिम्बितःप्रतिबिम्बितश्चितःप्रकाशः सजीवइतीर्यते आत्मापगात्माधियः साक्षितयाधीधर्मासङ्गेनैवपृथक्स्थितः । अन्तर्यामितयेत्यर्थः जीवोऽहंसुखीत्यादिप्रकारेणान्तःकर

अनाद्यविद्योद्भवबुद्धिबिम्बितोजीवप्रकाशोऽयमितीर्यते चितः ॥ आत्माधियः साक्षितया पृथक् स्थितो बुद्ध्या परिच्छिन्नपरः सएव हि ॥ ४० ॥

णधर्माध्यासवान्परमात्मातु साक्षितयासर्वत्रविद्यमानोऽपिनतथेतिभावः । अतएवबुद्ध्यापरिच्छिन्नपरः बुद्धिलक्षणपरिच्छेदरहितःअतएव परः । एवंचज्ञानेनप्रतिबिम्बाधार विलयप्रतिबिम्बस्यविलयात्सजीवः सएवपरमात्मैवहिप्रसिद्धं सइत्यस्यचावृत्तिर्बोध्या ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ बुद्ध्यात्मनोःपरस्पराध्यासवशात् परस्परधर्मभानमितिदार्ढ्यायपुनराह । चिद्बिम्बेति । चिद्गात्मचेतसोरन्योन्याध्यासवशात् परस्परतादात्म्यारोपाज्जडाजडत्वंप्रतीयते । चेतसोवृत्तीनांज्ञानत्वं जीवात्मनोजडत्वंप्रतीयते । अतएवज्ञानाश्रयआत्मेति चितएवता। किं कर्तृव्यवहारः । जीवात्मनिजडात्मनिजडात्माकथ्यते बुधैरितिस्मार्तव्यवहारश्च । अत्रहेतुः । चिदित्यादि । चिद्बिम्बस्यमाचिदाभासः अ

चिद्बिम्बसाक्ष्यात्मधियांप्रसङ्गतस्त्वेकत्रवासादनलाक्तलोहवत्॥
अन्योऽन्यमध्यासवशात्प्रतीयते जडाजडत्वंचचिदात्मचेतसोः
॥ ४१ ॥

क्षैःमहितः साक्षःसेन्द्रियः सचासावात्मामनःधीरन्तःकरणंतेषांप्रकृष्टसङ्गाद्तिसान्निकर्षादध्यासइत्यर्थः । अनलाक्तलोहवत् अग्नितप्तलोहपिण्डवत् अत्रदृष्टान्तः । अग्निधर्मोदाहकत्वं लोहधर्मश्चवर्तुलत्वाद्यनलेभासते । तत्रहेतुरेकत्रवासात् परस्पराविभागेनवृत्तेरित्यर्थः । तद्वदेतयोरपि परस्परधर्माध्यासइत्यर्थः ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं दार्ढ्यायपुनराह । गुरोरिति । वेदवाक्यतइत्यनेन श्रवणंगुरोःसकाशादपि । ततश्चानेनमननमुक्तम् । ताभ्यांसञ्जातोविद्यया ज्ञानरूपस्यात्मनोऽनुभवोयस्यसः । अनेनकृतनिदिध्यासनइत्यर्थः । तं चिदानन्दस्वरूपं स्वात्मानमुपाधिवर्जितं रहितोपाधिधर्ममात्मस्थं

गुरोःसकाशादपिवेदवाक्यतः सञ्जातविद्यानुभवोनिरीक्ष्य तम् । स्वात्मानमात्मस्थमुपाधिवर्जितं त्यजेदशेषं जडमात्मगोचरम् ॥ ४२ ॥

हृत्स्थंनिरीक्ष्य अपरोक्षीकृत्याशेषंजडं दृश्यंत्यजेत् । तत्रोदासीनोभवेदिति भावः ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञेयंनिरुपाधिकं स्वरूपंश्लोकद्वयेनाह प्रकाशेति अहंप्रकाशरूपः स्वप्रकाशः परप्रकाशहीनः परप्रकाशरूपोयथाघटादिः अजोजन्मादि
हीनः अद्वयःसजातीयद्वितीयरहितः अभक्तद्विभातः सकृदपिपरेणभासकान्तरेणप्रकाशितः सकृद्विभातः नसकृद्विभातोसकृद्विभातः नत

प्रकाशरूपोऽहमजोऽहमद्वयोऽसकृद्विभातोऽहमतीवनिर्मलः ॥
विशुद्धविज्ञानघनोनिरामयःसम्पूर्णआनन्दमयोऽहमक्रियः॥४३॥

त्रसूर्योभातिनचन्द्रतारकमितिश्रुतेः नतद्भासयतेसूर्यइतिस्मृतेश्च अतीवनिर्मलः मायाकृतावरणविक्षेपरहितः विशुद्धविज्ञानघनः विशुद्धचि
देकरसः निरामयःकर्तृत्वाभिमानरहितः सम्पूर्णःदेशकालपरिच्छेदहीनः आनन्दमयः आनन्दरूपः स्वार्थेमयट् अक्रियः परिणामहीनः
॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदैवेति अहंसदैवकालत्रयेऽपिमुक्तःसर्वधर्मरहितः अचिन्त्यशक्तिमान् यः परमात्मा अतिन्द्रियज्ञानमृइन्द्रियातिरिक्तज्ञानरूपःयतोवाचो निवर्त्तन्ते अप्राप्यमनसासहइतिश्रुतेः अविक्रियात्मकोऽपरिणामी अनन्तपारःअन्तःकालतःपारःपरन्तीरन्तावविद्यमानौ यस्य तेनदेश

सदैवमुक्तोऽहमचिन्त्यशक्तिमानतीन्द्रियज्ञानमविक्रियात्मकः।
अनन्तपारोऽहमहर्निशंबुधैर्विभावितोऽहंहृदिवेदवादिभिः ॥४४॥

कालपरिच्छेदहीनः ईदृशोयःपरमात्माबुधैर्हृदि अहर्निशंविभावितः सोऽहमित्यर्थः ॥ ४४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एवंभावनायाःफलमाह एवमिति उक्तरीत्यासदाआत्मानं अखण्डितात्मनाविषयानाकृष्टचित्तेन विचारमाणस्यध्यायतः धातूनामनेकार्थ
त्वात् चरमाणएवचारमाणःस्वार्थेऽण् विशुद्धभावनाब्रह्माकारान्तः करणवृत्तिरुदंतीतिशेषः साचेऽदिताकारकैर्देहान्तरप्रापककर्मभिः स

एवंसदात्मानमखण्डितात्मनाविचारमाणस्यविशुद्धभावना ॥
हन्यादविद्यामचिरेणकारकैरसायनंयद्वदुपासितंरुजः ॥ ४५ ॥

हाविद्यामचिरेणशीघ्रमेवहन्यात् यथोपासितंसेवितंरसायनं रुजोहन्यात्तद्वत् ॥ ४५ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रध्यानेइतिकर्तव्यतामाह विविक्तइति निर्जनइत्यर्थः आसीनोयथोचितपद्मासनाद्युपविष्टः उपारतेन्द्रियः तेनशमदमादिसम्पन्नः विनि र्जितात्माप्राणायामादिभिर्जितान्तःकरणः अतएवविमलान्तराशयोविशुद्धचित्तः विज्ञानदृक्विज्ञानएवदृक्भानंयस्यसः द्रष्टृदृश्यभा

विविक्तआसीनउपारतेन्द्रियोविनिर्जितात्माविमलान्तराशयः॥
विभावयेदेकमनन्यसाधनोविज्ञानदृक्केवलआत्मसंस्थितः॥४६

नरहितः अनेननिर्विकल्पकसमाधिरुक्तः अनन्यसाधनः तत्त्वज्ञानातिरिक्तमुक्तिसाधनास्तित्वभ्रमरहितः केवलोऽसङ्गःआत्मसंस्थितः आत्मन्येवसंस्थासमाप्तिः सञ्जातायस्यसतेन नकदापिविषयान्तरसञ्चारवच्चित्तः विभावयेत् ध्यायेत् ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंच यदेतत्भूतंभविष्यद्वर्तमानं विश्वंपरमात्मादर्शनंभासकोयस्यतत् तस्यभासासर्वमिदंविभातीति श्रुतेः तत्सर्वकारणेमायासान्निधाना
त्सर्वोपादानत्वेनाभिमतेआत्मनिविलापयेत् उपादानसत्ताव्यतिरेकेणकार्यसत्तांनपश्येत् तादृशस्यलक्षणमाह सम्पूर्णः अवाप्तसमस्तका

विश्वंयदेतत्परमात्मदर्शनं विलापयेदात्मनि सर्वकारणे ॥
पूर्णश्चिदानन्दमयोऽवतिष्ठते न वेद बाह्यं न च किञ्चिदान्त
रम् ॥ ४७ ॥

मः तस्यकाम्याभावात् चिदानन्दमयः तद्रूपोऽवतिष्ठते बाह्यमान्तरंच दृश्यंनजानाति सर्वत्रब्रह्मदर्शनादिति भावः ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाधिसिद्धेः पूर्वंयत्कर्तव्यंतदाह । पूर्वमिति । समाधेः सकलविषयव्यासङ्गनिवृत्तिपूर्वकं ब्रह्माकारवृत्तिः समाधिस्ततः पूर्वमखिलंस चराचरंजगत् ओङ्कारमात्रं विचिन्तयेत् । ओङ्कारोमीयतेऽ नयेतिमात्रा प्रमाणं बोधकत्वेन परिच्छेदकोयस्यतथाजानीयात् । तदेवविवृ

पूर्वं समाधे रखिलं विचिन्तये दोङ्कारमात्रं सचराचरं जगत् ॥ तदेव वाच्यं प्रणवो हि वाचको विभाव्यते ज्ञानवशान्न बोधतः ॥ ४८ ॥

णोति तदेवेति । जगदेवेत्यर्थः । प्रणवोवाचकोविभाव्यतेएतत्राहिप्रसिद्ध इत्यर्थः । इयंभावनाज्ञानवशादेवनबोधकः । बोधोनिर्विशेषब्रह्मसाक्षात्कारस्तदुत्तरंनेत्यर्थः । तस्यसर्ववृत्त्युपमर्दकत्वात् ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

...भासकोयस्यतत् तस्यभासासर्वमिदंविभातीति श्रुतेः तत्सर्वकारणंमायासान्निधाना स.

उक्तमर्थंविवृणोति । अकारंति । अकारसञ्ज्ञस्तद्वाच्यःपुरुषोहिविश्वकोविश्वएवविश्वकः विश्वशब्देनपरिभाषितःअयंजाग्रत्साक्षीविराट् ततःस्वप्नसाक्षीतैजसःतेनपदेनपरिभाषितःलिङ्गदेहाभिमानीहिरण्यगर्भउकारकः उकारप्रतिपाद्यईर्यते । ततः सुषुप्तिसाक्षीप्राज्ञपदवाच्यो

अकारसञ्ज्ञः पुरुषो हि विश्वको ह्युकारकस्तैजसईर्यते क्रमात्
प्राज्ञो मकारः परिपठ्यतेऽखिलैः समाधि पूर्वं न तु तत्त्वतो
भवेत् ॥ ४९ ॥

मायोपाधिकोमकारस्तद्वाच्यः परिपठ्यतेऽखिलैर्वेदैः । इयंभावनासमाधिपूर्वंसमाधेःपूर्वमेव नतत्त्वतः तत्त्वसाक्षात्कारेसतिनभवेत् । सर्वस्यप्रपञ्चस्यब्रह्मणिप्रविलयात् ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविलापन प्रकारमाहद्वाभ्याम । विश्वंत्विति । उकारमध्ये बहुधाव्यवस्थितं स्थूलदेहनिबंधनंस्थूलदेहाभिमानेन स्थितं विश्वम्पुरुषंत-द्वाचकमकारम् च विलापयेत् । तुश्चार्थे । विलीनम्भावयेत् ततस्तैजसंलिङ्गदेहाभिमानिनम् पुरुषं तद्वाचकंप्रणवद्वितीय वर्णमुकारं वि-

विश्वं त्वकारं पुरुषं विलापयेदुकारमध्येबहुधा व्यवस्थितम् ।
ततो मकारे प्रविलाप्यतैजसंद्वितीयवर्णं प्रणवस्य चान्तिमे ॥५०॥

लीनविश्वकम्मकारे विलाप्याविलीनम्भावयित्वा ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततस्तादृशंमकारंतद्वाच्यंप्राज्ञंचकारणंकारणत्वाभिमानिनंपुरुषमिहात्मनि चिद्घनेपरे विलापयेत् तथाभावयेत्। ततः सोऽहंसर्वविला
पाधिष्ठानंपरब्रह्मविभावयेत्। तद्विशिनष्टि। सदाविमुक्तिमत् नित्यमुक्तम्। नन्वहंपदार्थस्यरागद्वेषादिमलिनस्यकथं ब्रह्मत्वभावनेत्या

मकारमप्यात्मनि चिद्घने परे विलापयेत्प्राज्ञमपीह कारणम्।
सोऽहं परं ब्रह्म सदा विमुक्तिमद्विज्ञानदृङ्मुक्त उपाधितोऽमलः॥ ५१॥

शङ्क्याहंपदार्थंविशिनष्टि। उपाधितोमुक्तः अतएवामलःतथाभावनेसाधनं विज्ञानदृक्विज्ञानं ब्रह्ममात्रप्रत्ययाविच्छेदरूपादृक् निदिध्या
सनं सत्साक्षात्कारेसाधनंयस्यसः॥ ५१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंभावनावतोलक्षणमाह । एवमिति । उक्तप्रकारेणसदाजातापरमात्मन्येकभावना यस्यसः परिविस्मृतमखिलंपुत्रदेहादियेनसः। अत एवस्वस्वरूपानन्देनैवतुष्टःनतुविषयानन्देन । तस्यपरिणामेदुःखरूपत्वात्ततो विरक्तइत्यर्थः । साक्षान्नित्यात्मनित्यसुखप्रकाशकः साक्षा

एवं सदा जातपरात्मभावनः स्वानन्दतुष्टःपरिविस्मृताखिलः ॥
आस्ते स नित्यात्मसुखप्रकाशकः साक्षाद्विमुक्तोऽचलवारिसि
न्धुवत् ॥ ५२ ॥

दौपाधिकनामरूपभेदरहित्येननित्यमखण्डितमात्मस्वरूपंयत्सुखंप्रकाशश्चतद्रूपः एवंरूपो विमुक्तोजीवन्मुक्तः । अचलंनिश्चलंवारियस्यताहशसिन्धुवदास्ते । विषयसम्बन्धरूपलहरीरहितआस्तइत्यर्थः ॥ ५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशस्यमत्प्राप्तिर्भवत्येवेत्याह । एवमिति । उक्तप्रकारेणसदाऽभ्यस्तसमाधियोगिनः निवृत्ताःसर्वेषामिन्द्रियाणांगोचराविषयाःशब्दादयो यस्य विनिर्जिताअशेषारिपवःकामादयोयेनतस्य । तज्जयेनविषयेष्वन्तःकरणाप्रवृत्तेः । अतएव सर्वज्ञत्वनित्यत्वनित्यतृप्तत्वबोध

एवं सदाऽभ्यस्तसमाधियोगिनो निवृत्तसर्वेन्द्रियगोचरस्य हि ॥ विनिर्जिताशेषरिपोरहंसदा दृश्यो भवेयं जितषड्गुणात्मनः ॥५३ ॥

रूपत्वस्वतन्त्रत्वनियमलुप्तत्वानन्तरूपाषड्गुणायस्यतादृशआत्माजितो वशीकृतोयेनतस्य सदादृश्योभवेयम् । एतेनमद्भक्तस्ययोगिनो ऽहंदृश्यांनतुभक्तिविमुखस्येति सूचितम् ॥ ५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंविधोजीवन्मुक्तःप्रारब्धवशेन अनभिमानोभोगानश्नँस्तिष्ठेत् ततोमय्येवाविलीयते मद्रूपोभवतीत्याह । ध्यात्वैवमिति ॥ ५४ ।

ध्यात्वैवमात्मानमहर्निशं मुनिस्तिष्ठेत्सदा मुक्तसमस्तबन्धनः ॥
प्रारब्धमश्नन्नभिमानवर्जितो मय्येवसाक्षात्प्रविलीयते ततः ५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वधर्मापेक्षयाऽयमेवधर्मोज्यायानित्याह । आदौचेति । भवसंसारमादिमध्यान्तमानेपुमर्वथाभयशोकयोः कारणंविदित्वातत्कारणीभूतंविधिवादयजेतेत्यादिभिश्चोदितंबोधितंसमस्तंकर्ममार्गकाम्यंहित्वा अखिलात्मनांजीवानांस्वरूपभूतंमामात्मानं परमेश्वरंभजेत् । य

आदौ च मध्ये च तथैव चान्ततो भवं विदित्वा भयशोक कारणम् ॥ हित्वा समस्तं विधिवादचोदितं भजेत्स्वमात्मान मथाखिलात्मनाम् ॥ ५५ ॥

थाधनस्यार्जनेनादौदुःखंमध्येपालनकृतं तत्र राजादिकृतं भयमन्तेनाशेशोकपर्यवसायिदुःखमेवं पदार्थमात्रेद्रष्टव्यम् ॥ ५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मय्यभेदभावनया नामरूपाविभागेन तद्रूप एवभवतीत्यमुमर्थं सदृष्टान्तमाह । आत्मनीति । आत्मनिसर्वाधिष्ठानेमयिइदंस्वस्वरूपं जीव मभेदेनविभावयन्यदा । तिष्ठतीतिशेषः । तदामयात्मनापरमेश्वरेणाऽभेदेनभवति अभिन्नोभवति । तत्रदृष्टान्तः यथासमुद्रेप्रविष्टं नद्यादि

आत्मन्यभेदेन विभावयन्निदं भवत्यभेदेन मयाऽत्मनातदा ॥
यथाजलं वारिनिधौ यथापयः क्षीरेवियद्व्योम्न्यऽनिले यथाऽ
निलः ॥ ५६ ॥

जलंसमुद्रएव यथाक्षीरेगवादिक्षीरेप्रक्षिप्तंपयःक्षीरमेव यथाव्योम्निमहाकाशेघटाद्यवच्छिन्नाकाशोघटादिभङ्गे च यथाचर्मभस्त्रिकाद्यव च्छिन्नोवायुरनिलेमहावायौ नामरूपाविभागेनैकीभवतीत्यर्थः ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमात्मतत्त्वज्ञस्य जगत्सत्यत्वभ्रमःस्वतएवापैतीत्याह । इत्थमिति । हिरण्यर्थे । लोकसंस्थितोऽपिजीवन्मुक्तिदशायांप्रारब्धवशाल्लोकव्यवहारंकुर्वन्नपिजगन्मृषैवेतिविभावयन्सन् यदियदा इत्थमीक्षते ऐकात्म्यं जानीयात्तदा निवृत्तजगत्सत्यत्वभ्रमो भवतीति शेषः । तत्र हेतुः श्रुतियुक्तिमानतोनिराकृतत्वात् । अतोऽन्यदार्तमित्यादिश्रुतिरूपात् जगन्मिथ्यादृश्यत्वात् शुक्तिरजतवदितितदुपबृंहितानुमानरू

इत्थं यदीक्षेत हि लोकसंस्थितो जगन्मृषैवेतिविभावयन्मुनिः ॥
निराकृतत्वाच्छ्रुतियुक्तिमानतो यथेन्दुभेदो दिशि दिग्भ्रमादयः ॥ ५७ ॥

पात्मानतःप्रमाणतोनिराकृतत्वात् तत्रदृष्टान्तोयथेन्दुभेदः एकचन्द्रेद्विचन्द्रत्वभ्रमस्तदेकत्वज्ञानेननिवर्तते यथाच दिशिप्राच्यादौअन्यदिक्त्वभ्रमः सोऽपितत्त्वज्ञानान्निवर्तते । एवंभ्रमतःपुरुषस्य दिक्षुभ्रमणाद्भ्रमोनिकटवर्तिवृक्षादौच भ्रमणभ्रमस्तत्स्थैर्यज्ञानेन निवर्तते तद्वत् ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशज्ञानेमदाराधनमेवोपायइत्याह । यावदिति । अखिलं जगन्मदात्मकंमदधिष्ठानकंमाद्विवर्तभूतंयावन्नपश्येत्तावन्मत्शास्येश्रद्धालुः भगवदाराधनमेवज्ञानप्रापकमित्यत्र दृढविश्वासवान् अतिशयेनोर्जितावृद्धिमतीभक्तिर्मयिभगवतिपूज्यताबुद्धिरूपालक्षणं चिह्नंयस्यसः ।

यावन्नपश्येदखिलं मदात्मकं तावन्मदाराधनतत्परो भवेत् ॥
श्रद्धालुरत्यूर्जित भक्तिलक्षणो यस्तस्य दृश्यो ऽहमहर्निशं हृदि ॥ ५८ ॥

तावन्मदाराधननिष्ठोभवेत् एवंहितस्यहृदि अहमहर्निशंदृश्योभवा मियेयथामांप्रपद्यन्ते तांस्तथैवभजाम्यहमितिस्मृतेः ॥ ५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वोक्तवचनजातस्य श्रुतिसमत्वं कथमेतदालोचनमपिमदाराधनप्रतिबन्धकदुरितध्वंसोपायइत्याह रहस्यमिति । श्रुतिसारसङ्ग्रहत्वेनाति

रहस्यमेतच्छ्रुतिसारसङ्ग्रहं मया विनिश्चित्य तवोदितं प्रिय ॥
यस्त्वेतदालोचयतीहबुद्धिमान् स मुच्यते पातकराशिभिः
क्षणात् ॥ ५९ ॥

गोपनीयता अप्रमाणशङ्काकलङ्कराहित्यंसूचितम् । आलोचयतिसम्यग्विचारयति ॥ ५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ भगवानुक्तमेवार्थसंक्षेपेण दार्ढ्यायपुनराह भ्रातरिति । यदीतियादित्यर्थे । यदीदंजगत् परिदृश्यते तत्सर्वंमायैवेतिज्ञात्वेति शेषः चेतसासर्वंपरिहृत्यतत्रौदासीन्यंकृत्वामद्भावनयामदैक्यभावनया भावितंशुद्धंमानसंयस्यताद्दशास्तिष्ठ । इत्युपदिश्याशिषंप्राह निरामयः

भ्रातर्यदीदं परिदृश्यते जगन्मायैव सर्वं परिहृत्य चेतसा ॥ मद्भावनाभावितशुद्धमानसः सुखी भवाऽऽनन्दमयो निरामयः ६०

सन्मुखीभव । सर्वदुःखनिवृत्त्येतिभावः । ततोऽन्तरङ्गामन्यामाशिषमाह आनन्दमयोभवेति तद्रूपोभवेत्यर्थः । यद्यपिपूर्वमानन्दरूपत्वमस्त्ये वतथाऽपितत्प्राप्तिर्विस्मृतकंठस्थभूषणप्राप्तिवत ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंरीत्याम्वोपासकस्यलोकपावनत्वमाह। यइति । कदावा यदाकदाचिदित्यर्थः । हृदानिर्मलेनान्तःकरणेन यो मामगुणं प्राकृतसत्त्व

 रजस्तमोरूपगुणरहितम् । सच्चिदानन्दरूपत्वात् । अतएवगुणादव्याकृतात्परंमायातीतम् । यद्विवायद्वेत्यर्थे । गुणात्मकं सर्वज्ञत्वा-

दिलोकोत्तरलावण्यादिगुणवानात्मामूर्तिर्यस्यतं दृश्यमानं रूपं सेवते । सद्विविधोऽप्युपासकः अहं मत्स्वरूपएव । मामकइत्यर्थोवा । प्रि-

यः सेवते मामगुणं गुणात्परं हृदा कदा वा यदि वा गुणात्मकम् ॥ सोऽहंस्वपादाञ्चितरेणुभिः स्पृशन्पुनाति लोकान्त्रितयं यथा रविः ॥ ६१ ॥

योहिज्ञानिनोऽत्यर्थमहंमचममप्रिय इत्युक्तेः । तादृशोभक्तःस्वपादलग्नरेणुभिःसंस्पृशन्लोकत्रयमपि पुनाति । अज्ञानध्वान्तनिरसने

नपवित्रीकरोति । यथारविःस्वकरैर्जगद्वितिमिरीकरोति तद्वत् ॥ ६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानीमेतद्ग्रन्थार्थालोचनासमर्थस्यपाठमात्रतोऽपिमहत्फलमाह । विज्ञानंविज्ञानजनकं करणंव्युत्पत्त्येतिबोध्यम् । वेदान्तैरुपनिषद्वाक्यै वेंद्यंचरणंजगज्जन्मादिलक्षणंकर्मयस्यतेन ननुपाठमात्रादेतादृशमहत्फलप्राप्तिःकथमित्याशङ्क्यभवत्येवेति सूचयंस्तत्रहेतुमाह । मद्वचने

विज्ञानमेतदखिलंश्रुतिसारमेकं वेदान्तवेद्यचरणेनमयैवगीतम् ।
यःश्रद्धया परिपठेद्गुरुभक्तियुक्तो मद्रूपमेति यदि मद्वचनेषुभक्तिः
॥ ६२ ॥ इतिश्री अध्यात्मरामायणे रामगीता समाप्ता ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसम्वादे उत्तरकाण्डे श्रीरामगीतायां पञ्चमःसर्गः ॥ ५ ॥

षुभक्तिर्विश्वासोयदीतिअर्थाद्गुरुवाक्यविश्वासस्यैव फलदायकत्वादितिभावः ॥६२॥ इत्यध्यात्मरामायणेउमामहेश्वरसम्वादे उत्तरकाण्डे सेतौपञ्चमःसर्गः ॥ ६२ ॥ श्रीरामचन्द्रार्पणमस्तु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीराममन्त्रःखलु तारकाख्यः संसारसन्तारणसुप्रसिद्धः ॥ भक्-
त्याऽप्यभक्त्या समुपासितोयः श्रेयांसि सर्वाणि ददात्यवश्य
म् ॥ १ ॥ तन्तारकंसम्प्रतिपादयन्ती श्रीरामगीता सकलैः सुसे
व्या ॥ विज्ञप्तिमित्थंजनको विनीतः समर्पयत्यार्यजनेषुहर्षात् २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प,	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति
स्यर्द्धि	स्पर्द्धि	१	२	१	शाधि	शाधि	३	२	६	नाशे	नाशो	६	१	१
जीव्य	जीन्य	१	२	३	व्यत्र	व्यव	४	१	१	नन्वितिश	नन्वितिशे	६	२	१
सम्बीन्धनीः	सम्बन्धिनीः	२	२	१	छामे	छानमे	४	२	३	त्रिदा	विदा	६	२	२
ब्रह्म	ब्रह्म	२	१	२	ब्रह्म	ब्रह्म	४	२	१	मेवे	मेव	६	२	२
ब्रह्म	ब्रह्म	२	१	६	वलेन	बलेन	४	२	७	व्येतीत	व्यतेति	७	१	१
वोधोऽसि	बोधोऽसि	३	१	४	निघृत्ते	निवृत्ते	५	१	१	बीरहा	वीरहा	७	१	१
संवन्ध	सम्ब्रन्ध	३	१	७	कत्व	कत्वा	५	१	१	सद्दष्ट	सद्द्दष्ट	८	१	३
भवस्यंससार	भवस्यसंसार	३	२	१	नक	नैक	५	१	१	त्रिशुद्धं	विशुद्ध	८	२	१
न्सार	सार	३	२	२	बेदान्त	वेदान्त	५	१	१	कारांतः	कारान्तः	८	२	२
पर्वग	पत्वर्ग	३	२	२	पूर्वे	पूर्वे	५	१	२	वृत्ति	वृत्ति	९	१	१
बारिधि	वारिधि	३	२	२	बुद्ध्या	बुद्ध्या	५	१	६	स्वत्राना	स्वनां	९	२	१
					एवं	एत्र	५	१	६	वृत्यु	वृत्यु	१०	१	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
रीप	रपि	११	२	१	ल्लाभ	ल्लाभे	१८	१	८	बिभाव्यत्त	विभाव्यते	२५	१	४ मु
नर्दृष्टा	र्नदृष्टा	१२	१	४	इतिः	इति	१८	२	२	लिङ्गेद	लिङ्गदे	२६	१	२
र्वाद्धे	र्वाद्धे	१२	१	७	ज्ञानन	ज्ञानेन	१९	१	१	बोधकः	बोधतः	२५	१	६
त्याभिः	त्माभिः	१२	२	६	वुद्धया	वुद्धया	२०	१	९	विज्ञानं ब्रह्म	विज्ञानंनिदि ध्यासनं ब्रह्म	२६	२ ६	३
शुद्द	शुद्ध	१३	१	१	रागादि	रागादि	२१	१	३	भेदेरा	भेदरा	२७	१	६
जीवया	नीवयो	१३	१	२	त्रिलय	विलय	२१	१	७	रुपा	रूपाः	२७	२	१
निर्वाध	निर्बाध	१४	१	१०	धम	धर्म	२१	२	१	आत्म	अत्मा	२७	२	१
भब	भव	१९	१	४	म्वस्य	म्वंयस्य	२१	२	२	मुनिति	मुनिस्ति	२८	१	२
अर्जोद्र	अर्जोऽद्र	१६	२	६	वुवै	बुधै	२३	१	५	भव	भवं	२८	२	१
द्वात्	द्वाव्	१७	२	१	एव	एवं	२३	२	१					
					द्रष्ट	द्रष्टृ	२४	१	२					

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
तदकत्व	तदेकत्व	२६	२	७	वतथाऽ	वतथाऽ	३१	१	१	मद्बचने	मद्वचने	३२	१	२
भ्रमण	भ्रमणं-	२६	२	८	कंठ	कण्ठ	३१	१	२	तन्तारकं	तत्तारकं	३२	२	३

नेपाल पाशुपत, यन्त्रालये मुद्रिता.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इती रामगीता सटीका समाप्ता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द. नं. १६६४१

अथ रामगीता सटीका प्रारभ्यते ॥

मू० ५। -

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ रामंरत्नकिरीटकुण्डलयुतं केयूरहारान्वितं सीतालङ्कृतवामभागममलं सिंहासनस्थं विभुम् ॥ सुग्रीवादि कपीश्वरैःसुरवरैः संसेव्यमानं सदा विश्वामित्रपराशरादिमुनि-भिः संस्तूयमानं भजे ॥ १ ॥ इतिध्यात्वा ॥ श्रीमहादेवउवाच ॥

Sampurnanand Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ ध्यायेत्वाजानुबाहुं धृतशरधनुषं बद्धपद्मासनस्थं पीतंवासोवसानं नवकमलदलस्पर्द्धिनेत्रं प्रसन्नम् ॥ वामाङ्कारूढ सीतामुखकमलमिलल्लोचनं नीरदाभं नाना लङ्कारदीप्तं दधतमुरुजटामण्डलं रामचन्द्रम् ॥ १ ॥ ततइति जगतां यानि मङ्गलानि आनन्दास्तेषामुपजीव्यभूतं मङ्गलं ब्रह्मानन्दः सएवात्मास्वरूपं तेन तस्यैवानन्दस्यान्यानि भूतानिमात्रामुपजीवन्तीति श्रुतेः मङ्ग

ततोजगन्मङ्गलमङ्गलात्मना विधाय रामायणकीर्तिमुत्तमाम् ॥
चचार पूर्वाचरितं रघूत्तमो राजर्षिवर्य्यैरभिसेवितं यथा ॥ १ ॥

लानाञ्चमङ्गलमिति स्मृतेश्च किंच जगतां मङ्गलं कल्याणं यस्मात्तादृशकल्याणरूपआत्मामूर्तिस्तया उत्तमांश्रोत्रादीनां मोक्षदत्वेना त्युत्तमां रामायणकीर्तिं वाल्मीक्यादि कृत नानाविध रामायण प्रवर्तिकां रावणवधादिजां कीर्तिंविधाय स्थितोरघूत्तमः ततः सीताप रित्यागानन्तरं पूर्वैः स्ववंशजैराचारितं प्रजापालनसत्कथाश्रवणादिकं केवलंतत्पूर्वजैरेवाचरितमितिन किंत्वन्यैरपि राजर्षिश्रेष्ठैर्य थाऽभिसेवितं तथाचचार कृतवान् ॥ १ ॥ ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदारागुरुदेवविश्वासलक्षणमहागुणवती यद्वा उदारा दानशीलाबुद्धिर्यस्य तेन पुरातनीः प्राचीनराजसम्बन्धिनीः शुभाः धर्माधर्मनिर्णेत्रीः प्रमत्तस्य स्वगोमण्डलमिश्रितब्राह्मणगोदानात् प्रमत्तस्य नृगस्य राज्ञो द्विजस्य शापात्तिर्यक्त्वमाह तेनाज्ञातकृतब्रह्मस्वापहारेण परमधा

सौमित्रिणापृष्ट उदारबुद्धिना रामःकथाःप्राह पुरातनीःशुभाः ॥
राज्ञः प्रमत्तस्य नृगस्य शापतो द्विजस्य तिर्यक्त्वमथाह राघवः
॥ २ ॥

र्मिकस्यापीदृश्यवस्थेति सर्वथाब्रह्मस्वविमुखताधर्मइतिसूचितम् ॥ १ ॥

CC-0. In Public Domain. Digitization by eGangotri

एकान्तेविजने उपस्थितंप्राप्तम् विनयान्वितः सन्भक्त्यागुरुरयमिति बुद्ध्या प्रणम्य अनेनगुरूपसदनप्रकारउक्तः आसादितंशुद्धंभाव

कदाचिदेकान्त उपस्थितंप्रभुं रामं रमालालितपादपङ्कजम् ॥
सौमित्रिरासादितशुद्धभावनः प्रणम्यभक्त्याविनयान्वितोऽब्र-
वीत् ॥ ३ ॥

नं भावनाकरणमन्तः करणंयेनसः शुद्धान्तःकरणइतियावत् भगवदुक्तसत्कथाश्रवणेन शुद्धान्तःकरणइत्यर्थः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

हे महामते महतीसर्वविषयामतिर्यस्य तस्य संबोधनं त्वं शुद्धबोधोऽसि अनवच्छिन्नचैतन्यरूपोऽसि सर्वदेहिनामात्माऽसि जीवानांतत् प्रतिविम्बत्वात् अधीशोऽसि अन्तर्यामित्वान्नियन्ताऽसि वास्तवभेदाभावाच्च सर्वात्मत्वम् औपाधिकभेदाच्च नियन्तृनियम्यभावोबोध्यः निराकृतिः अस्मदादिवत्स्वार्जितकर्माधीनशरीराकृतिरहितः नन्वेवंसर्वैः कथमेवंनज्ञायतेऽतआह ज्ञानदृशां स्वयमेवप्रतीयसे ज्ञायतेऽ

त्वं शुद्धबोधोऽसि हि सर्वदेहिनामात्माऽस्यधीशोऽसि निरा-
कृतिःस्वयम् ॥ प्रतीयसे ज्ञानदृशां महामते पादाब्जभृङ्गाहितस
ङ्गसाङ्गिनाम् ॥ ४ ॥

नेनेतिज्ञानं वेदान्तवाक्यजातं तदेवदृक्दर्शनसाधनंयेषां तेषामितिसंबन्धसामान्येषष्ठी तैरित्यर्थः तादृशदृक्लाभश्च त्वद्भक्त्यधीनइत्याह पादेति त्वच्चरणकमलयोर्भृङ्गवदाहितःकृतः सङ्गोयेन तादृशान्तः करणसङ्गवतां त्वच्चरणकमल सल्लग्नान्तः करणवतामित्यर्थः ॥ ४ ॥

CC-0. In Public Domain. Digitization by eGangotri

अथ प्रार्थयते अहमिति भवस्य संसारस्यापवर्गो निवृत्तिर्यस्मात्तादृशं तव पादाम्बुजं प्रपन्नोऽस्मि शरणं प्राप्तोऽस्मि योगिभावितं योगिभिः सं न्सारमुक्तये भावितम् अनेनतस्य भवापवर्गत्वे सदाचारः प्रमाणमुक्तम् प्रार्थनीयमाह अपारवारिधिरूपं यदज्ञानं संसारमूलकारणं यथासुखम

अहं प्रपन्नोऽस्मि पदाम्बुजं प्रभो भवापवर्गं तव योगिभावितम् ॥ यथाञ्जसाज्ञानमपारवारिधिं सुखं तरिष्यामि तथाऽनुशाधि माम् ॥ ५ ॥

क्लेशेन तरिष्यामि तथा मामनुशाधि शिक्षय अपारवारिधिमित्यनेन सपारप्रसिद्धसमुद्राद्व्यतिरेक उक्तः अशक्यतरणताऽनेन ध्वनिता ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथोत्तरमवतारयति श्रुत्वेति रामः सौमित्रिवचः श्रुत्वा अथशब्दोवाक्यालङ्कारे तदा श्रवणाव्यवहितकाले एवप्रपन्नानां भक्तानामार्तिं संसारदुःखंहरतितादृशः प्रपन्नाश्रमादिहीना भक्तानुग्रहपरा च धीर्यस्यसः क्षितिपालानां राज्ञां भूषणभूतोज्ञानरूपतमसउपशान्तये त

श्रुत्वाथ सौमित्रिवचोऽखिलं तदाप्राह प्रपन्नार्तिहरःप्रसन्नधीः ॥
विज्ञानमज्ञानतमोपशान्तये श्रुतिप्रपन्नं क्षितिपालभूषणः॥ ६ ॥

दर्थम् सन्धिरार्षः श्रुतिभिः तमेवविदित्वाऽतिमृत्युमेतीत्यादिश्रुतिभिः प्रपन्नं तत्फलकत्वेन बोधितं विज्ञानमात्मतत्वज्ञानामिति सामान्य तः प्रथमंप्राह ॥ ६ ॥

Central Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

अथताद्दशज्ञानप्राप्त्यै क्रमेणबहिरङ्गान्तरङ्गसाधनान्याह आदाविति स्ववर्णाश्रमेषु शास्त्रेण वर्णिता याः क्रियानित्यनैमित्तकयज्ञदाना दिरूपास्ताः कृत्वा समासादितशुद्धमानसः प्राप्तान्तःकरणशुद्धिः तत्पूर्वमुपात्तसाधनः तदनुष्ठानपूर्वकमेवउपात्तानिसाधनानि शम दमादीनियेन तादृशः अनेनकर्मणां बहिरङ्गत्वं शमादीनामन्तरङ्गत्वं स्फुटमेवोक्तम् किंच शमदमवैराग्यदार्ढ्यपर्यन्तं कर्मानुष्ठानमेवेति

आदौ स्ववर्णाश्रमवर्णिताःक्रियाः कृत्वा समासादितशुद्धमानसः
समाप्य तत्पूर्वमुपात्तसाधनः समाश्रयेत्सद्गुरुमात्मलब्धये॥ ७॥

सूचितम् ततस्तत्कर्मानुष्ठानं समाप्य त्यक्त्वा संन्यस्येतियावत् आत्मलब्धये आत्मज्ञानाय तत्फलकाय तत्वमस्यादिवाक्यार्थविचारा-य सद्गुरुं श्रोत्रियंब्रह्मनिष्ठमित्यादि लक्षणलक्षितं समाश्रयेत् सेवेत अनेनव्युत्पत्तिबलेन स्वयमेववाक्यार्थविचारः क्रियमाणो न फला-येति सूचितम् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसारस्यभ्रमिमच्चक्ररूपत्वात्तन्निवृत्तेश्चतत्कारणाज्ञाननिवृत्तिमूलकत्वदज्ञाननिवृत्तेश्चतत्त्वज्ञानकसाध्यत्वात्तत्त्वज्ञानस्यचवेदान्त विचारसा-ध्यत्वात्तदर्थंगुरुसमाश्रयणमित्याह क्रियेति भवःसंसारश्चक्रवद्विपरिवर्तमानईर्यते कथ्यते तदेवोपपादयाति आदृताआदरपूर्वपूर्वजन्मार्जिताक्रियाएनस्यशरीरोद्भवस्यजन्मनोहेतुः तत्रजन्मनिसुरागिणोविषयाभिलाषवतः तौ शास्त्रप्रसिद्धौ धर्मेतरौ धर्माधर्मौ प्रियाप्रियौसुखदुः

क्रियाशरीरोद्भवहेतुरादृताप्रियाप्रियौतौभवतःसुरागिणः ॥
धर्मेतरौतत्रपुनः शरीरकंपुनः क्रियाचक्रवदीर्यतेभवः ॥ ८ ॥

खजनकौभवतःकस्यचिद्धर्मएवसुखत्वबुद्ध्याप्रवृत्तिः कस्यचिद्धर्मएवंकदाचिदित्यप्यूह्यम् एवंतत्रोत्पादितकर्मणापुनःशरीरंपुनःक्रिया-इत्येवंचक्रवद्विपरिवृत्तिः । यथाचक्रेभ्राम्यमाणेऽधोभागः कदाचिदुपरिउपरितनश्चाधः पुनरुपरिपुनरधएवंजन्मक्रिययोर्जन्यजनक-भावेनपरिवृत्तिरिति बोध्यम् ॥ ८ ॥

Nepal Sanskrit University, Balmeekri Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यचाज्ञानमेवमूलमित्याह अज्ञानमेवेति अत्रविधौसंसारानिवृत्तिलक्षणेकर्तव्येऽर्थेतद्धानमेवमूलकारणत्वादज्ञानहानमेवविधीयते साध-
नत्वेनेतिशेषः ननुकर्मैवतन्नाशकमस्तुकिंज्ञानेनेत्याशङ्क्याह विद्यैवज्ञानमेवतन्नाशविधौमूलाज्ञाननाशनेपटीयसीसमर्थानकर्मसमर्थमितिशेषः

अज्ञानमेवास्यहिमूलकारणंतद्धानमेवात्रविधौविधीयते ॥ विद्यै
वतन्नाशविधौपटीयसीनकर्मतज्जंसविरोधमीरितम् ॥ ९ ॥

यतस्तत्तज्जमज्ञानजम् आत्मस्वरूपाज्ञानजन्यदेहाद्यभिमानजन्यत्वात्कर्मणोज्ञानजन्यत्वंबोध्यम् ननुतज्जन्यस्यापितन्नाशकत्वंवृश्चिककर्क
व्यादौदृष्टमित्याशङ्क्यतज्जन्यत्वंवाननाशकत्वप्रयोजकंकिन्तुसविरोधत्वमेवेत्याह यत्सविरोधंतदीरितंनाशकमुक्तमित्यर्थः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अतएवकर्मणानाज्ञानहानिरित्याह नाज्ञानेत्यादि यतःकर्मणाविरोधाभावान्नाज्ञाननाशेनापिरागनाशोवस्तुतः कर्मानुष्ठानात्पुनः सदो
षंक्षयिफलत्वादिदोषविशिष्टंकर्मैवोद्भवेत्कर्मणश्चपुनःसंसारएवेतिनमुक्तिमत्याशा ततस्तस्माद्बुधोविवेकीज्ञानविचारवान् ज्ञायतेऽनेने·

नाज्ञानहानिर्नचरागसङ्क्षयोभवेत्ततः कर्मसदोषमुद्भवेत् ॥ ततः पुनः संसृतिरप्यवारितातस्माद्बुधोज्ञानविचारवान्भवेत् ॥ १० ॥

तिज्ञानंवेदान्तवाक्यंतद्विचारवान्भवेत ॥ १० ॥

CC-0. In Public Domain. Digitization by eGangotri

इदानींज्ञानस्यैवमोक्षहेतुत्वंवक्तुंज्ञानकर्मसमुच्चयवादंदूषणायानुवदतिसार्धेन नन्विति नन्वितिशङ्कायाम् यथाविद्यावेदमुखेनश्रुतिपुराण-
लक्षणेन ब्रह्मविदाप्नोतिपरम् इत्यादिनापुरुषार्थसाधनमुक्ता तथा उभाभ्यामेवपक्षाभ्यांयथाखेपक्षिणांगतिः तथैवज्ञानकर्मभ्यांप्राप्यते
ब्रह्मशाश्वतम् इत्यादिनाक्रियाऽपितत्साधनत्वेनोक्ता किंच क्रियाकर्तव्यत। तृतीयार्थेप्रथमा कर्तव्यतयाआवश्यकेकृत्येअवश्यकर्तव्यत-

नन्विक्रियावेदमुखेनचोदितायथैवविद्यापुरुषार्थसाधनम् ॥ कर्तव्यताप्राणभृतःप्रचोदिताविद्यासहायत्वमुपैतिसापुनः ॥ ११ ॥

याप्रचोदितानित्यनैमित्तिकरूपा एवंचतदकरणेप्रत्यवायोत्पत्त्याज्ञानोत्पत्तिरेवनस्यात् तस्मात्सापुनर्विद्यायाःसहायत्वंप्राप्नोतिघटेजन-
नीयेयथादण्डचक्रादीनांपरस्परसहायता ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कर्तव्येतीतस्वोक्तमेवेविवृणोति कर्मेति वीरहावाएषदेवानांयोऽग्निमुद्वासयतेयावज्जीवमग्निहोत्रंजुहोति इतिश्रुतिः तत्रासिद्धान्तीशङ्कते नन्विति ध्रुवंस्थिरंकार्यमिदंपुरुषार्थमोक्षजनिकाविद्यायतः स्वतन्त्राविनाऽपिसहायेन स्वकार्यसंपादनेसमर्था यथातेजस्तिमिरनिवर्तन-

कर्माकृतौदोषमपिश्रुतिर्जगौतस्मात्सदाकार्यमिदंमुमुक्षुणा॥ननु
स्वतन्त्राध्रुवकार्यकारिणीविद्यानकिञ्चिन्मनसाऽप्यपेक्षते ॥१२

समर्थंमनसाऽपिकिञ्चित्सहायभूतंवस्तुनापेक्षते तथाफलेजननीयेसहायान्तरसंभावनाऽपिनेतिभावः अनेनविद्याफलजननेनिरपेक्षास्वतन्त्र-
त्वात्तेजोवदित्यनुमानंसूचितम् ॥ १२ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

समुच्चयवादीपरिहराति नेति त्वदुक्तंनेत्यर्थः सत्यकार्यः अक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवति इत्यादिवेदनबोधितःस्थिरकार्योऽपि-
अध्वरः यथाऽन्यानपिकारकादिकान् आरादुपकारकप्रयाजाद्यङ्गानिदेशकालादीनिचप्रकाङ्क्षते तथाविद्यापिअग्निहोत्रंजुहोतिइत्यादिवि

नसत्यकार्योऽपिहियद्वदध्वरः प्रकाङ्क्षतेऽन्यानपिकारकादिकान्
तथैवविद्याविधितःप्रकाशितैर्विशिष्यते कर्मभिरेवमुक्तये ॥ १३ ॥

धिवाक्यतःतत्समूहेनप्रकाशितैः कर्मभिः सहितैवमुक्तयेविशिष्यतइत्यर्थः विदयाफलदानेकर्मापेक्षा अङ्गित्वात् प्रयाजादध्यङ्गापेक्षदर्शा
दिवादितिसत्प्रतिपक्षानुमानमनेनसूचितम् ॥ १३ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदनूद्यसिद्धान्तीदूषयति केचिदिति यत्केचिद्वितर्कवादिनःतज्ज्ञानकर्मणोसमुच्चित्यमुक्तिसाधनंवदन्तितदप्यसत् यथाकेवलंकर्म मोक्ष साधनमित्यसत्तथातन्मीलितमित्यप्यसत् तत्रहेतुर्दृष्टविरोधकारणात् दृष्टयोर्विरोधः सर्वलोकदृष्टविरोधरूपात्कारणात्तदसदित्यर्थः विरो

केचिद्वदन्तीतिवितर्कवादिनस्तदप्यसदृष्टविरोधकारणात् ॥
देहाभिमानादभिवर्धतेक्रियाविद्यागताहङ्कृतितःप्रसिद्ध्यति १४

धमेवाह देहाभिमानात्क्रियावर्धते अनात्मनिदेहादावात्मत्वाभिमानात्क्रियावृद्धिः विद्यातुगताहङ्कृतितः गताहङ्कृतिर्यस्यतस्यनष्टाहङ्कृतेः प्रसिद्ध्यति सार्वविभक्तिकस्तासिः एवंचाहङ्कारसत्तामूलकत्वात्क्रियाज्ञानयोः समुच्चयोविरुद्धइत्यर्थः ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

अथपूर्वपक्षयुक्तानुमानंदूषयन विद्यास्वरूपमाह विशुद्धंविज्ञानंयेभ्यस्तेषांवेदान्तवाक्यानांयद्विशेषेणरोचनंरलयोरभेदादालोचनंविचार
स्तेनाश्चिताप्रापितायाचरमाआत्मवृत्तिर्ब्रह्माकारांतःकरणवृत्तिः साविद्यंतिभण्यतेवृद्धैरितिशेषः पुनःसमुच्चयनिराकरणायविद्याकर्मणो
वैषम्यमाह कर्मयज्ञादिअखिलकारकादिभिःकर्तव्यकर्मादिभिरङ्गैश्चसहितंसदुदेति फलोन्मुखंभवति विद्यापुनरखिलकारकादीन्निहन्ति

विशुद्धविज्ञानविरोचनाञ्चिताविद्याऽत्मवृत्तिश्चरमेतिभण्यते ॥ उदेतिकर्माखिलकारकादिभिर्निहन्ति विद्याऽखिल कारकादि-कम् ॥ १५ ॥

तत्रकर्तृत्वादिबुद्धिंनिहन्ति सकलव्यापारपरित्यागेनब्रह्मणिसमाप्तिर्हिविद्या अतः स्वोत्पत्तौचित्तशुद्धिद्वाराकर्मसापेक्षास्वफलेजनयितव्ये-
तन्निरपेक्षैवान्यथाविद्यास्वरूपस्यैवभङ्गापत्तेरितिपूर्वपक्षयुक्तहेतोरासिद्धिरितिभावः ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपसंहरन्मुमुक्षोर्वृत्तिप्रकारमाह तस्मादिति विद्याविरोधाद्विद्यायाःकर्मणासह विरोधेनसमुच्चयोनभवेत्तस्मात्सुधीर्मुमुक्षुरशेषतःकर्मत्यजे-
त् काम्यंतुसर्वथात्याज्यमेवनित्यनैमित्तिकमपियावच्चित्तशुद्धिकर्तव्यमेव ततोऽपिब्रह्माणिचित्तस्थैर्यपर्यन्तं कर्तव्यमेव ततस्तदनुसन्धानप्र-

तस्मात्त्यजेत्कार्यमशेषतः सुधीर्विद्याविरोधान्नसमुच्चयोभवेत् ।
आत्मानुसन्धानपरायणःसदा निवृत्तसर्वेन्द्रियवृत्तिगोचरः १६

तिबन्धकत्वात्प्रयोजनाभावाच्चतदपित्याज्यमेवेतिभावः इदानींमुमुक्षुकर्तव्यमाह निवृत्ताःसर्वेषामिन्द्रियाणां गोचराविषयाःशब्दादयोय
स्मात्तादृशःसन् आत्मनःसच्चिदानन्दस्यानुसन्धानमेवपरमयनंप्राप्यंयस्यतथाविधोभवेत् अत्रेन्द्रियप्रत्याहारःकर्तव्यत्वेनोक्तस्तेनतत्पूर्वप्रा-
णायामाद्यर्थादाक्षिप्तम् ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रागिविरागिभेदेनकर्मणोकर्तव्यताकर्त्तव्यतेआहयावदिति माययाविद्यया शरीरादिष्वनात्मसुआत्मधीरहङ्कर्तेत्यादिरूपायावद्वर्ततेतावद्वि
धिवादकर्मणाम् विधिर्यजेतेत्यादिश्रुतिर्वादः कर्तव्यताबोधकोयेषांकर्मणांविधेयोवश्यवर्त्तितत्कर्मकर्ताभवेत् तदपगमेतुतदाखिलं जगन्नेतीति

यावच्छरीरादिषुमाययात्मधीस्तावद्विधेयोविधिवादकर्मणाम् ॥
नेतीतिवाक्यैरखिलं निषिद्ध्य तज्ज्ञात्वापरात्मानमथत्यजेत्क्रि
याः ॥ १७ ॥

वाक्यैः अथातआदेशोनेतिनेतिइत्यादिवाक्यैर्निषिध्य मिथ्यात्वेननिर्णीयतद्विलक्षणतयासत्यत्वेनपरमात्मस्वरूपंज्ञात्वाक्रियास्त्यजेत्निरू ॥ ९ ॥
पितमेतत् ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मविज्ञानेसत्यवश्यमविद्या निवर्ततइत्याह यदेति आत्मनिशुद्धेन्तःकरणेपरमात्मनईशस्यात्मनोजीवस्यचयोविभेदोमायान्तःकरण
रूपोपाधिद्वयकृतोविभेदोभेदस्तस्यभेदकं नाशकंभास्वरंप्रकाशशीलंयद्विज्ञानमितरवृत्त्युपमर्दनपूर्वकंब्रह्माकाराऽखण्डाद्वृत्तिर्यदाऽवभाति

यदापरात्मात्मविभेदभेदकंविज्ञानमात्मन्यवभाति भास्वरम् ॥
तदैवमायाप्रविलीयतेऽञ्जसासकारकाकारणमात्मसंसृतेः॥ १८॥

असंभावनादितिरस्कारेणोदेति तदैव सकारकाजन्मान्तरप्रापककर्मसहितामायातत्तज्जीवोपाधिभूताविद्याऽञ्जसाझदितिप्रविलीयतेनश्यति
ननुतन्नाशेऽपिसंसारनाशःकथमतोमायाविशेषणम् आत्मसंसृतेःकारणंसंसारस्योपादानकारणमेवंचतन्नाशेकार्यनाशोभवत्येवेतिभावः १८

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं पुनर्दार्ढ्यायाह श्रुतीति तत्त्वमसीत्यादिश्रुतिरूपैःप्रमाणैस्तज्जनितज्ञानेन नाशितासाविद्याकथमपिकार्यकारिणीभविष्यतीति काकुरत्र सर्वथानेत्यर्थः असतःकार्यकारित्वासंभवादितिभावः पुनश्चतस्यानोद्भवइत्याह विज्ञानमात्रादिति अमलाशुद्धाद्वितीयतःद्विती

श्रुतिप्रमाणाभिर्विनाशिताचसाकथंभविष्यत्यपिकार्यकारिणी ॥
विज्ञानमात्रादमलाद्वितीयतस्तस्मादविद्यानपुनर्भविष्यति १९

यात्मविषयकाद्विज्ञानमात्रादितरासहकृताच्छ्रवणादिध्यासनपरिपाकजज्ञानाद्यतोनष्टातस्मात्सापुनर्नभविष्यति रज्ज्वज्ञानमूलकस्य सर्पस्य रज्जुज्ञानेन निवृत्तस्ययथानपुनरुत्पत्तिरितिभावः ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्यायाइतरनिरपेक्षायाएवमोक्षकारणत्वमुक्तंयुक्तिपूर्वकंपुनःकथयतिश्रोतृदार्ढ्याय।यदीति। यदिनष्टातत्त्वज्ञाननाशिता सा न पुनः प्रसूयतेनोत्पद्यतेतदाकारणाभावादहंमतिःकथंभवेत्। कथमपिनभवेदित्यर्थः। तदभावाच्चतत्कालेकर्माभावइतिस्वफलजननेसास्वतन्त्राइ

यदिस्मनष्टा नपुनःप्रसूयते कर्ताऽहमस्येति मतिः कथं भवेत् ॥ तस्मात्स्वतन्त्रा न किमप्यपेक्षते विद्या विमोक्षाय विभाति केवला ॥ २० ॥

तरानिरपेक्षैवनाकिमप्यपेक्षते द्वितीयस्यासंभवात् अतः केवलाऽसहायैवविमोक्षायविभातितत्फालिकाभवतीत्यर्थः ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नन्वकरणेप्रत्यवायभिया कर्मकार्यमितिचेन्नेत्याह सप्रत्यवायइति कर्मत्यागेनाहिनिश्चयेनाहंप्रत्यवायसंहितोभविष्यामीत्येवंशुद्धात्मानि-अनात्मधर्मस्यधीरप्रज्ञस्यतत्त्वज्ञानविकलस्यप्रसिद्धा नतुतत्त्वदर्शिनः तस्याहंबुद्धेरभावात् पीपादेरनात्मधर्मतानिश्चयाच्च तस्माद्बुधैःकर्म

स प्रत्यवायोह्यहमित्यनात्मधीरज्ञप्रसिद्धा नतु तत्त्वदर्शिनः ॥
तस्माद्बुधैस्त्याज्यमपि क्रियात्मभिर्विधानतःकर्मविधि प्रकाशितम् ॥ २३ ॥

क्रियात्यभिः षष्ठ्यर्थेतृतीया क्रियाफलसक्तचित्तानां विधानतोविधानेनेतिकर्तव्यतयायुक्तंकर्म विधिभिरवश्यकर्तव्यतयाबोधितमपि-त्याज्यमित्यर्थः ॥ २३ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविरक्तस्यकार्यमाह। श्रद्धेति । गुरुशास्त्रयोर्विश्वासःश्रद्धातदन्वितोबुभुत्सुःशुद्धमानसोऽपि निष्कामकर्मानुष्ठानाच्छुद्धमानसश्चगुरोः प्रसादाल्लब्धतत्त्वमसीतिवाक्यतः श्रुतमात्मजीवयोरैकात्म्यंविज्ञाय मनननिदिध्यासनपरिपाकाभ्यांसाक्षात्कृत्य। चएवार्थः । साक्षा

श्रद्धान्वितस्तत्त्वमसीतिवाक्यतो गुरोःप्रसादादपिशुद्धमानसः॥
विज्ञायचैकात्म्यमथात्मजीवयोः सुखी भवेन्मेरुरिवाप्रकम्पनः
॥ २४ ॥

त्कृत्यैवसुखी भवेत्। सकलदुःखहीनोभवेदित्यर्थः। अप्रकम्पनःविषयाभिलाषाक्षोभितान्तःकरणः ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महावाक्यंविवरीतुंवाक्यार्थस्यपदार्थबोधपूर्वकत्वमाह । आदाविति । विधानतःभ्रमप्रमादराहित्येनवाक्यार्थविज्ञानस्यविधावुत्पत्तौआ दौप्रथमंमुख्यमितियावत् । पदार्थावगतिःकारणम् । हिप्रसिद्धं तस्यपदत्रयंतत्त्वम् असीति । तत्रतत्पदार्थःपरमात्मासर्वज्ञत्वादिगुणः त्वं

आदौ पदार्थावगतिर्हिकारणं वाक्यार्थविज्ञानविधौ विधानतः ॥
तत्त्वंपदार्थौपरमात्मजीवकावसीतिचैकात्म्यमथानयोर्भवेत्
॥ २५ ॥

पदार्थोजीवः अनयोस्तत्त्वंपदार्थयोरैकात्म्यंतद्बोधकमसीतिपदम् ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननु सर्वज्ञत्वादिगुणस्येशस्य किञ्चिज्ज्ञत्वधर्मवता जीवेनैकात्म्यं विरुद्धमित्याशङ्क्याह । प्रत्यगिति । अहंबुद्धिविषयत्वं प्रत्यक्त्वं जीवधर्मः परोक्षत्वमीशधर्मस्तदादिधर्मकृतमात्मनोः परमात्मजीवात्मनोर्विरोधं विहाय त्यक्त्वा तयोः संशोधितां युक्तिभिः सम्यग्विचारितां तत्त्वंपदाभ्यां शक्त्यभावेऽपि वक्ष्यमाणप्रकारया लक्षणया लक्षितां ज्ञातां चिदात्मतां संगृह्य तत्त्वंपदोपास्थितिविषयां कृत्वा स्वमात्मानं तथा ज्ञात्वाऽथ एकात्मज्ञानानन्तरमद्वयो भवेत् । चित्स्वरूपतां प्राप्त इव भवेत् । पूर्वमपि तत्स्वरूप एव विस्मृतकण्ठचामीकरन्यायेन च तत्प्राप्तिः तद्वदित्युक्तम् ।

प्रत्यक्परोक्षादिविरोधमात्मनोर्विहाय संगृह्य तयोश्चिदात्मताम् ॥
संशोधितां लक्षणया च लक्षितां ज्ञात्वा स्वमात्मानमथाद्वयो भवेत्
॥ २६ ॥

अयं भावः तत्त्वंपदयोर्द्वावर्थौ वाच्यो लक्ष्यश्च तत्र तत्पदस्य मायोपाधिः सर्वज्ञत्वादिविशिष्टो वाच्यः त्वंपदस्यापि किञ्चिज्ज्ञत्वादिविशिष्टो मायाकार्याविद्योपाधिरविद्यावदन्तःकरणोपाधिर्वाच्यः उभयोरपि विशेषणांशत्यागेन शुद्धश्चिदात्मा लक्ष्यः तत्र वाच्ययोर्विरुद्धधर्मकत्वादैक्यासंभवेऽपि लक्ष्ययोरैक्यं निर्बाधमेवेति ॥ २६ ॥

CC-0. In Public Domain. Digitization by eGangotri

उक्तलक्षणास्वरूपमाह । एकात्मकत्वादिति जहतीलक्षणाजहत्स्वार्थलक्षणायथागङ्गायांघोषइत्यत्रगङ्गापदार्थस्यप्रवाहस्यघोषाधारतानुपपत्त्यासर्वथातत्परित्यागेनतीररूपार्थलक्षणा साप्रकृते न एकात्मत्वात् । विशेष्यांशस्यैकत्वात्सर्वथास्वार्थत्यागाभावात् । तथाजहल्लक्षणताजहत्स्वार्थलक्षणावत्त्वमपिअत्रनसंभवति । यथाकाकेभ्योदधिरक्ष्यतामित्यादौकाकशब्दस्यस्वार्थात्यागेनैवदध्युपघातकेलक्षणा सापिन । विरोधतःविशेषणत्यागेनसर्वथास्वार्थत्यागाभावात् । अतोभागलक्षणाजहदजहल्लक्षणायुज्यते । अदोषतःपूर्वोक्तदोषाभावात्

एकात्मकत्वाज्जहती न सम्भवेत्तथाऽजहल्लक्षणता विरोधतः॥
सोऽयंपदार्थाविवभागलक्षणायुज्येततत्त्वंपदयोरदोषतः॥२७॥

विशेष्यांशस्यात्यागाद्विशेषणांशस्यत्यागाच्च । तत्रदृष्टान्तः । सोऽयंपदार्थाविव । यथासोऽयंदेवदत्तइत्यत्रतद्देशादिविशिष्टोऽतीतानुभवविषयोवातत्पदार्थः एतद्देशादिविशिष्टोऽनुभूयमानोवेदंशब्दार्थः । तयोश्चाविरुद्धविशेषणकत्वादैक्यासंभवेनदेशादिरूपविशेषणत्यागेनानुभवगतातीतत्वादिविशेषणत्यागेनवालक्षणयैक्यंतद्वदितिभावः ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथत्याज्यत्वायजीवोपाधिमाह । रसादी ति । रसापृथ्वीआदिर्येषांतानिपञ्चीकृतानियानिभूतानितेभ्यःसंभवोयस्यतत् । पञ्चीकरणंचे
त्थम् एकैकंभूतंद्विधाविभज्यतत्रैकंभागंचतुर्धाविभज्यतेषांभागानांस्वेतरभूतचतुष्टयार्धभागचतुष्टयेसंयोजनेएकैकंभूतंपञ्चात्मकंभवतिभा

रसादिपञ्चीकृतभूतसंभवंभोगालयंदुःखसुखादिकर्मणाम् ॥ शरी
रमाद्यन्तवदादिकर्मजंमायामयंस्थूलमुपाधिमात्मनः ॥ २८ ॥

गाधिक्याच्चप्रातिस्विकतयाभूगादिव्यवहारोऽपि । सुखदुःखयोरादीनियानिकर्माणितेषांभेभास्तत्कर्मजसुखदुःखानुभवस्तस्यालयमाश्र
यभूतमाद्यन्तवत् उत्पत्तिनाशयोगि आदिकर्मजंभाग्भवीयकर्मजन्यंमायामयंपरम्परयामायाविकारः तद्विकारभूतविकारत्वात् । एतच्छरी
रमात्मनःस्थूलमुपाधिंवदन्तीतिशेषः ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसूक्ष्मोपाधिमाह। सूक्ष्ममिति । बुधाः अन्यतस्थूलशरीरविलक्षणंशरीरंलिङ्गदेहाख्यमात्मनउपाधिंविदुः । तत्स्वरूपमाह। सूक्ष्मंचक्षु-
राद्यविषयः मनोबुद्धिदशेन्द्रियैःप्राणैश्चयुतम् सङ्कल्पात्मकंमनः निश्चयात्मिकाबुद्धिः घ्राणरसनाचक्षुस्त्वक्श्रोत्रेतिपञ्चज्ञानेन्द्रियाणि वा-

सूक्ष्मंमनोबुद्धिदशेन्द्रियैर्युतंप्राणैरपञ्चीकृतभूतसंभवम् ॥ भोक्तुः
सुखादेरनुसाधनंभवेच्छरीरमन्याद्विदुरात्मनोबुधाः ॥ २९ ॥

क्पाणिपादपायूपस्थानिकर्मेन्द्रियाणि प्राणापानव्यानोदानसमानाश्चप्राणास्तैर्युतमेतत्सप्तदशसमुदायात्मकम्। तदाधारभूतान्याह ।अप
ञ्चीकृतभूतसंभवंतेभ्यउत्पन्नमतएवादृश्यम् । तथाभोक्तुःसुखादेःसुखदुःखाद्यनुभवस्यानुसाधनम् स्थूलशरीरस्यैतदनुगतस्यैवभोगसाधनत्व
मितिभावः । एताद्वियोगेनैवमरणव्यवहारइतिबोध्यम् ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतजीवोपाधिद्वयमुक्त्वाईशोपाधिमाह । अनादीति । अनादि उत्पत्तिहीनम् । नानाविधपरिणामशालितयापरिणामरूपेणनश्वरामिति अनादित्वमात्रोक्त्यासूचितम् । अनिर्वाच्यम् सत्त्वासत्त्वाभ्यांनिर्वक्तुमशक्यम् कारणंसकलप्रपञ्चस्यजनकम् ईदृशीमायातुब्रह्मणःपरमी-

अनाद्यनिर्वाच्यमपीहकारणं मायाप्रधानंतुपरंशरीरकम् ॥ उ-
पाधिभेदान्तुयतःपृथक्स्थितं स्वात्मानमात्मन्यवधारयेत्क्र-
मात् ॥ ३० ॥

श्वरव्यवहारसंपादकत्वादुत्कृष्टंप्रधानंशरीरकम् । स्वार्थेकः । एवमुपाधिभेदादेकमेवचैतन्यंयतः पृथक्स्थितंजीवईशइतिभेदबुद्धिविषय मतोलक्षणयोपाधिपरित्यागेनस्वात्मानमात्मनिअवधारयेदभेदेनजानीयात् । क्रमाच्छ्रवणमनननिदिध्यासनक्रमेणेत्यर्थः ॥ ३० ॥

CC-0. In Public Domain. Digitization by eGangotri

अथवाक्यार्थविचारफलमाह । कोशेष्विति । आनन्दमयस्य ब्रह्मत्वेअन्नमयप्राणमयमनोमयविज्ञानमयेषुचतुर्षुकोशेषुतत्तत्सङ्गात्तत्तदाकृतिर्विभाति यथाजपादिसङ्गात्स्फटिकोऽनेकाकृतिर्भाति । आनन्दमयस्यापि जीवत्ववादिनातुतेनसहपञ्चसु कोशेष्वितिबोध्यम् । अस्मि-

कोशेषुपञ्चस्वपितत्तदाकृतिर्विभातिसङ्गात्स्फटिकोपलोयथा ॥ असङ्गरूपोऽयमजोयतोऽद्वयोविज्ञायतेऽस्मिन्परितोविचारिते ॥ ३१ ॥

न्महावाक्येपरितोविचारितेसम्यग्विचारितेसत्ययमात्माऽसङ्गरूपःअन्नमयादिभिःसङ्गरहितः । असङ्गोनहिसज्जते । इतिश्रुतेः । अजोऽद्वयश्चविज्ञायते । स्थूलोऽहमित्यादिस्त्वज्ञस्यतत्तत्कोशप्रसङ्गात्प्रतीतिःस्फटिकवत् तत्त्वज्ञस्यतुनतथाप्रतीतिरितिभावः । एवंचतत्तदुपाधिकृततत्तद्रूपताप्रतीतिनिरासएव विचारफलमितिभावः ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जाग्रदाद्यवस्थाऽपि बुद्धेर्धर्मोनात्मधर्मइत्याह । बुद्धेरिति । इहआत्मनिस्वप्नादिभेदेन जाग्रत्स्वप्नसुषुप्तिभेदेन यात्रिधावृत्तिर्दृश्यतेसाऽपि गुणत्रयात्मनः सत्त्वरजस्तमोरूपगुणत्रयस्वरूपाया बुद्धेर्धर्मः । उक्तावस्थात्रयस्योक्तमूलकत्वात् । एतदवस्थात्रयस्यास्मिन्नवस्थात्रय-साक्षिणि आत्मनि भानं मृषा बुद्ध्यध्यास निबन्धनं न तु वास्तव मित्यर्थः । अन्योऽन्यतोव्यभिचारतस्तस्यावस्था त्रयस्यस्व रूपतो

बुद्धेस्त्रिधा वृत्तिरपीह दृश्यते स्वप्नादि भेदेन गुणत्रयात्मनः ॥ अन्योऽन्यतोऽस्मिन्व्यभिचारतोमृषा नित्ये परे ब्रह्मणि केवले शिवे ॥ ३२ ॥

मृषात्वात्तज्ज्ञानस्य मृषात्वमेव । स्वप्नकाले जाग्रत्सुषुप्त्योरभावात् । जाग्रतिइतरद्वयस्याभावात् सुषुप्तावितरयोरभावात्परस्परं व्यभिचारोबोध्यः आत्मनस्तदनाश्रयत्वंविशेषणैराह । नित्येउत्पत्तिनाशशून्येपरेगुणत्रयातीते ब्रह्मणिव्यापकेकेवलेऽसङ्गेशिवआनन्दरूपे एवंभूतेसदैकरसेपरस्परव्यभिचारधर्माभानमसंभवीति भावः ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसाज्यत्वायसंसारमूलभूतांवृत्तिमाह । देहेति । एषांसङ्घातइतरेतराध्यासविषयात् अजस्रंयावद्धियो बुद्धेर्वृत्तिस्तमोमूलतयाऽज्ञ
लक्षणाऽज्ञत्वज्ञापिका यावत्परिवर्तते तावद्भवोद्भवःसंसारोद्भवोभवेत् । तमःपदंरजसोऽप्युपलक्षणम् । रजस्तमःप्रधानाबुद्धिः संसारहेतु

देहेन्द्रियप्राण मनश्चिदात्मनां सङ्घादजस्रं परिवर्तते धियः ॥
वृत्तिस्तमोमूलतयाऽज्ञलक्षणा यावद्भवेत्तावदसौ भवोद्भवः ॥ ३३ ॥

त्वात्सर्वथासाध्येति भावः ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत महावाक्यविचारस्य कर्तव्यमाह । नेतीति । अथात आदेशोनेतिनेति इति प्रमाणेननिराकृतं मिथ्यात्वेनगृहीतमखिलंजगत्येनसः ततोहृदासम्यक्प्रधानेनमनसासम्यगास्वादितं चिल्लक्षणंघनामृतंदुःखासंभिन्नंसुखंयेनसः । स्वर्गादितुपरिणामदुःखत्वात्तत्संभिन्नमेव । एवंभूतोऽशेषंजगद्देहेन्द्रियादिदृश्यमसूहंत्यजेत् ज्ञानोपादानबुद्धिविषयंनकुर्यात् । किन्तूदासीनस्तत्रभवेत् । ननुदेहेन्द्रियादिभिरेवतज्ज्ञान

नेतिप्रमाणेन निराकृताखिलो हृदासमास्वादितचिद्घनामृतः ॥ त्यजेदशेषं जगदात्तसद्रसं पीत्वा यथाऽम्भः प्रजहाति तत्फलम् ॥ ३४ ॥

लाभात्कथमुपजीव्यस्यत्यागइत्याशङ्क्यदृष्टान्तदर्शनेनपरिहरति । यथातृषावानआत्तः सद्रसोमाधुर्ययेनतादृशं नारिकेलनारङ्गादि फलान्तर्वर्त्यम्भःपीत्वा तत्स्थानभूतंतत्फलं जहाति तत्रोदासीनोभवति तद्वत्सर्वदृश्यसारांशोत्रब्रह्मतल्लाभसतिनिःसारंदृश्यंनोपादेयंनापिहेयमितिभावः । यतोभयादिसंभावनातद्धेयमित्युच्यते ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतरस्यानित्यत्वेनतत्रवैराग्यार्थमात्मनएवनित्यत्वमाह । कदाचिदिति । कदापीत्यर्थः । अनवः उत्पत्त्यनन्तरंविद्यमानोहिनवः । तेन जन्मानन्तरास्तित्वंव्यावर्तितं नवत्वाभावेनेवजीर्णत्वाभावादवस्थान्तरापत्तिरूप परिणामोऽपिनिरस्तः ।अनेनअस्तिजायतेवर्द्धतेविपरिणम तेऽपक्षीयते नश्यतीति षड्भाव विकार राहित्यमुक्तम् । एवंचैतद्विशं सर्वमुक्तषड्भावविकारवत्त्वादनित्यमिति ततोविरज्येतेतिबोधित-

कदाचि दात्मान मृतोनजायते नक्षीयते नापिविवर्धतेऽनवः ॥
निरस्तसर्वातिशयः सुखात्मकः स्वयम्प्रभः सर्वगतोऽयमद्वयः ३५

म् । यतऽईदृशोऽतएवनिरस्तः सर्वस्यदेहेन्द्रियादेरतिशयोमहत्त्वं येनस्वलाभात्सः यल्लाभान्नापरोलाभइतिःश्रुतेः यतःसुखात्मकः आनन्द स्वरूपः स्वयम्प्रभःस्वप्रकाशकश्च देहेन्द्रियादिस्तु दुःखस्वरूपः परप्रकाश्यश्च । यस्यभासासर्वमिदंविभाति । इतिश्रुतेः । सर्वगतोव्यापकः अयमहंबुद्धिविषयःप्रत्यगात्माऽपिअद्वयः उक्ताद्वयब्रह्मस्वरूपएव । नततोऽतिरिक्तइतिभावः । अयमात्माब्रह्म । इतिश्रुतेः ॥ ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुएवंविधेविकारशून्येआत्मनिजन्ममरणादिप्रवाहरूपसंसारभानंकथमितिशङ्कते। एवंविधेइति।दुःखमयःदुःखप्रचुरः।उत्तरयति। अज्ञानतइ तिअज्ञानमूलकोयोध्यासोदेहान्तः करणादौअहंममेत्यध्यासस्तद्वशात्। एवंचभ्रान्तिरूपातत्प्रतीतिरितिभावः। नन्वेवंकथंतस्यसंसारस्यनि

एवंविधे ज्ञानमये सुखात्मके कथंभवो दुःखमयःप्रतीयते ॥
अज्ञानतोऽध्यासवशात्प्रकाशतेज्ञानेविलीयेत विरोधतःक्षणात्॥
॥ ३६ ॥

वृत्तिस्तत्राह। ज्ञानेति। आविर्भूतइतिशेषः। ज्ञानस्याज्ञानविरोधित्वात्तदुत्पत्तिक्षणएवकारणभूताज्ञाननाशात्तत्कार्यसंसारस्यापि वि लयइत्यर्थः। यथारज्जुज्ञाननरज्जौसर्पस्यलयइत्यर्थः ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाध्यासलक्षणमाह । यदन्यदिति । यदन्यत्सर्पादिकमन्यत्ररज्ज्वादौभ्रमात्भ्रमजनकाद्दोषाद्विभाव्यतेविज्ञायतेअमुंविपश्चितोविद्वांसोऽध्यासइत्याहुः । यथाऽसर्पभूतेरज्ज्वादौ अहिविभावनंसर्पारोपोरज्ज्वबुद्धिमूलकस्तद्वदीश्वरेऽपिजगद्देहादिसंसारात्मकंसर्वंविभाव्यते आत्मज्ञानाभावाद्ययार्थतयाज्ञायते ॥ ३७ ॥

यदन्यदन्यत्र विभाव्यते भ्रमादध्यासमित्याहुरमुंविपश्चितः॥
असर्पभूतेऽहिविभावनंयथा रज्ज्वादिकेतद्वदपीश्वरेजगत्॥३७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनिभगज्ञानेकीदृशोऽध्यासोनिमित्तंतदाह विकल्पेति सर्वविकल्पकारणमायारहितेवस्तुतस्तत्सङ्गरहितेचिदात्मकेचित्स्वरूपेसर्वकारणेनिरामयेदुःखासंभिन्नानन्दमयेकेवलेसर्वविकारशून्यपरेदृश्यविलक्षणेब्रह्मणिव्यापकं आत्मनिप्रथममहङ्कारः कल्पितः सएवाध्यासः ।

विकल्पमायारहितेचिदात्मके ऽहङ्कारएष प्रथमः प्रकल्पितः ॥
अध्यासएवात्मनिसर्वकारणे निरामयेब्रह्मणि केवलेपरे ॥ ३८ ॥

अहंबुद्ध्यात्मकोऽध्यासएवसर्वसंसारकारणमितिभावः ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रा. गी.

॥ २० ॥

बुद्धिनिष्ठएवसंसारोनत्वात्मनिष्ठइत्यत्रान्वयव्यातिरेकौप्रमाणयति। इच्छादीति। परेसर्वसाक्षिणिआत्मनिसंसृतिहेतवःभासमानसंसारकारणं सदाकालत्रयेऽपिइच्छादिरागादिसुखादिधार्मिकाः इच्छांपेक्षेरागद्वेषौसुखदुःखंइत्येवमादिद्वन्द्वधर्मिकाःधियएवधीषुसतीषुसंसारइत्यन्वयमु

स.

इच्छादिरागादिसुखादिधार्मिकाः सदा धियः संसृतिहेतवः परे ॥
यस्मात्प्रसुप्तौतदभावतःपरः सुखस्वरूपेणविभाव्यतेहिनः ॥३९॥

क्त्वातद्व्यतिरेकमाहयस्मात्कारणात्प्रसुप्तौतदभावात् धीवृत्त्यभावात परआत्मानोऽस्माभिःतृतीयार्थेषुषष्ठी। सुखरूपेणस्वस्वरूपमात्रेणाविभाव्यतेनिश्चीयते नतु संसारित्वेनेतिभावः सुप्तोत्थितस्तुसुखमहमस्वाप्समितिप्रत्यभिज्ञानुभवात्तदात्मस्वरूपनिश्चयोऽस्तीतितात्पर्यम् ॥ ३९

॥ २० ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ पुनस्तत्त्वं पदार्थस्वरूपमाह । अनादीति । अनादिर्याऽविद्यातत उद्भवो यस्या बुद्धेरन्तःकरणस्य तत्र बिम्बितः प्रतिबिम्बितश्चितः प्रकाशः स जीव इतीर्यते आत्मा परमात्मा धियः साक्षितया धीधर्मासङ्गेनैव पृथक्स्थितः । अन्तर्यामितयेत्यर्थः जीवोऽहं सुखीत्यादिप्रकारेणान्तःकर

अनाद्यविद्योद्भवबुद्धिबिम्बितो जीवप्रकाशोऽयमितीर्यते चितः ॥
आत्माधियः साक्षितया पृथक् स्थितो बुद्ध्या परिच्छिन्नपरः
स एव हि ॥ ४० ॥

णवर्गाध्यासवान् परमात्मा तु साक्षितया सर्वत्र विद्यमानोऽपि न तथेति भावः । अत एव बुद्ध्यापरिच्छिन्नपरः बुद्धिलक्षणपरिच्छेदरहितः अत एव परः । एवं च ज्ञानेन प्रतिबिम्बाधार विलय प्रतिबिम्बस्य विलयात् स जीवः स एव परमात्मैव हि प्रसिद्धं स इत्यस्य चावृत्तिर्बोध्या ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ बुद्ध्यात्मनोःपरस्पराध्यासवशात् परस्परधर्मभानमितिदार्ढ्यायपुनराह । चिद्बिम्बेति । चिदात्मचेतसोरन्योन्याध्यासवशात् पर स.
रा. गी. स्परतादात्म्यारोपाज्जडाजडत्वंप्रतीयते । चेतसोवृत्तीनांज्ञानत्वं जीवात्मनोजडत्वंप्रतीयते । अतएवज्ञानाश्रयआत्मेति चितएवताकिं
कव्यवहारः । जीवात्मनिजडात्मनिजडात्माकथ्यते बुधैरितिस्मार्तव्यवहारश्च । अत्रहेतुः । चिदित्यादि । चिद्बिम्बस्यसाचिदाभासः अ
॥ २१ ॥ चिद्बिम्बसाक्ष्यात्मधियांप्रसङ्गतस्त्वेकत्रवासादनलाक्तलोहवत् ॥
अन्योऽन्यमध्यासवशात्प्रतीयते जडाजडत्वंचचिदात्मचेतसोः
॥ ४१ ॥

क्षैःसहितः साक्षःसेन्द्रियः सचासावात्मामनःधीरन्तःकरणंतेषांप्रकृष्टसङ्गादतिसान्निकर्षादध्यासइत्यर्थः । अनलाक्तलोहवत् अग्नितप्तलो
हपिण्डवत् अत्रदृष्टान्तः । अग्निधर्मोदाहकत्वं लोहधर्मश्चवर्तुलत्वाद्यनलेभासते । तत्रहेतुरेकत्रवासात् परस्पराविभागेनवृत्तेरित्यर्थः । तद्व ॥ २१ ॥
देतयोरपि परस्परधर्माध्यासइत्यर्थः ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं दार्ढ्यायपुनराह । गुरोरिति । वेदवाक्यतइत्यनेन श्रवणंगुरोःसकाशादपि । ततश्चानेनमननमुक्तम् । ताभ्यांसञ्जातोविद्यया ज्ञानरूपस्यात्मनोऽनुभवोयस्यसः । अनेनकृतनिदिध्यासनइत्यर्थः । तं चिदानन्दस्वरूपं स्वात्मानमुपाधिवर्जितं रहितोपाधिधर्ममात्मस्थं

गुरोःसकाशादपिवेदवाक्यतः सञ्जातविद्यानुभवोनिरीक्ष्य तम् । स्वात्मानमात्मस्थमुपाधिवर्जितं त्यजेदशेषं जडमात्मगोचरम् ॥ ४२ ॥

हृत्स्थंनिरीक्ष्य अपरोक्षीकृत्याशेषंजडं दृश्यंत्यजेत् । तत्रोदासीनोभवेदिति भावः ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञेयंनिरुपाधिकं स्वरूपंश्लोकद्वयेनाऽ प्रकाशोति अहंप्रकाशरूपः स्वप्रकाशः परप्रकाशहीनः परप्रकाशरूपोयथाघटादिः अजोजन्मादि हीनः अद्वयःसजातीयद्वितीयरहितः असकृद्विभातः सकृदपिपरेणभासकान्तरेणप्रकाशितः सकृद्विभातः नसकृद्विभातोसकृद्विभातः नत

प्रकाशरूपोऽहमजोऽहमद्वयोऽसकृद्विभातोऽहमतीवनिर्मलः ॥
विशुद्धविज्ञानघनोनिरामयःसम्पूर्णआनन्दमयोऽहमक्रियः॥४३॥

त्रसूर्योभातिनचन्द्रतारकमितिश्रुतेः नतद्भासयतेसूर्यइतिस्मृतेश्च अतीवनिर्मलः मायाकृतावरणविक्षेपरहितः विशुद्धविज्ञानघनः विशुद्धचि देकरसः निरामयःकर्तृत्वाभिमानरहितः सम्पूर्णःदेशकालपरिच्छेदहीनः आनन्दमयः आनन्दरूपः स्वार्थेमयट् अक्रियः परिणामहीनः ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदैवेति अहंसदैवकालत्रयेऽपिमुक्तःसर्वधर्मरहितः अचिन्त्यशक्तिमान यः परमात्मा अतिन्द्रियज्ञानमूइन्द्रियातिरिक्तज्ञानरूपःयतोवाचो निवर्त्तन्ते अप्राप्यमनसासहइतिश्रुतेः अविक्रियात्मकोऽपरिणामी अनन्तपारःअन्तःकालतःपारःपरन्तीरन्तावविद्यमानौ यस्य तेनदेश

सदैवमुक्तोऽहमचिन्त्यशक्तिमानतीन्द्रियज्ञानमविक्रियात्मकः॥
अनन्तपारोऽहमहर्निशंबुधैर्विभावितोऽहंहृदिवेदवादिभिः ॥४४॥

कालपरिच्छेदहीनः ईदृशोयःपरमात्माबुधैर्हृदि अहर्निशंविभावितः सोऽहमित्यर्थः ॥ ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंभावनायाःफलमाह एवमिति उक्तरीत्यासदाआत्मानं अखण्डितात्मनाविषयानाकृष्टचित्तेन विचारमाणस्यध्यायतः धातूनामनेकार्थ
त्वात् चरमाणएवचारमाणःस्वार्थेऽण् विशुद्धभावनाब्रह्माकारान्तः करणवृत्तिरुदन्तीतिशेषः साचोदिनाकारकैर्देहान्तरमापककर्मभिः स

एवंसदात्मानमखण्डितात्मनाविचारमाणस्यविशुद्धभावना ॥
हन्यादविद्यामचिरेणकारकैरसायनंयद्वदुपासितंरुजः ॥ ४५ ॥

हाविद्यामाचिरेणशीघ्रमेवहन्यात् यथापामितंसेवितंरसायनं रुजोहन्यात्तद्वत् ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रध्यानेइतिकर्तव्यतामाह विविक्तइति निर्जनइत्यर्थः आसीनोयथोचितपद्मासनाद्युपविष्टः उपारतेन्द्रियः तेनशमदमादिसम्पन्नः विनिर्जितात्माप्राणायामादिभिर्जितान्तःकरणः अतएवविमलान्तराशयोविशुद्धचित्तः विज्ञानदृग्विज्ञानएवदृग्भानंयस्यसः द्रष्टृदृश्यभा

विविक्तआसीनउपारतेन्द्रियोविनिर्जितात्माविमलान्तराशयः॥
विभावयेदेकमनन्यसाधनोविज्ञानदृक्केवलआत्मसंस्थितः॥४६

नरहितः अनेननिर्विकल्पकसमाधिरुक्तः अनन्यसाधनः तत्त्वज्ञानातिरिक्तमुक्तिसाधनास्तित्वभ्रमरहितः केवलोऽसङ्गःआत्मसंस्थितः आत्मन्येवसंस्थासमाप्तिः सञ्जातायस्यसतेन नकदापिविषयान्तरसञ्चारवांश्चित्तः विभावयेत् ध्यायेत् ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंच यदेतत्भूतंभविष्यद्वर्तमानं विश्वंपरमात्मादर्शनंभासकोयस्यतत् तस्यभासासर्वमिदंविभातीति श्रुतेः तत्सर्वकारणेमायासान्निधाना तुसर्वोपादानत्वेनाभिमतेआत्मनिविलापयेत् उपादानसत्ताव्यतिरेकेणकार्यसत्तांनपश्येत् तादृशस्यलक्षणमाह सम्पूर्णः अवाप्तसमस्तका

विश्वंयदेतत्परमात्मदर्शनं विलापयेदात्मनि सर्वकारणे ॥
पूर्णश्चिदानन्दमयोऽवतिष्ठते न वेद बाह्यं न च किञ्चिदान्तरम् ॥ ४७ ॥

मः तस्यकाम्याभावात् चिदानन्दमयः तद्रूपोऽवतिष्ठते बाह्यमान्तरंच दृश्यंनजानाति सर्वत्रब्रह्मदर्शनादिति भावः ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाधिसिद्धेः पूर्वंयत्कर्तव्यंतदाह । पूर्वमिति । समाधेः सकलविषयव्यासङ्गनिवृत्तिपूर्वकं ब्रह्माकारवृत्तिः समाधिस्ततः पूर्वमखिलंस चराचरंजगत् ओङ्कारमात्रं विचिन्तयेत् । ओङ्कारोमायतेऽ नेनेतिमात्रा प्रमाणं बोधकत्वेन परिच्छेदकोयस्यतथाजानीयात् । तदेवविवृ

पूर्वं समाधे रखिलं विचिन्तये दोङ्कारमात्रं सचराचरं जगत् ॥
तदेव वाच्यं प्रणवो हि वाचको विभाव्यते ज्ञानवशान्न बो-
धतः ॥ ४८ ॥

णोति तदेवेति । जगदेवेत्यर्थः । प्रणवोवाचकोविभाव्यतेएतत्ताहिप्रसिद्ध इत्यर्थः । इयंभावनाज्ञानवशादेवनबोधकः । बोधोनिर्विशेषब्रह्मसा क्षात्कारस्तदुत्तरंनेत्यर्थः । तस्यसर्ववृत्त्युपमर्दकत्वात् ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमर्थं विवृणोति । अकारेति । अकारसञ्ज्ञस्तद्वाच्यः पुरुषो हि विश्वको विश्व एव विश्वकः विश्वशब्देन परिभाषितः अयं जाग्रत्साक्षी विराट् ततः स्वप्नसाक्षी तैजसः तेन पदेन परिभाषितः लिङ्गदेहाभिमानी हिरण्यगर्भ उकारकः उकारप्रतिपाद्य ईर्यते । ततः सुषुप्तिसाक्षी प्राज्ञपदवाच्यो

अकारसञ्ज्ञः पुरुषो हि विश्वको ह्युकारकस्तैजस ईर्यते क्रमात् प्राज्ञो मकारः परिपठ्यतेऽखिलैः समाधि पूर्वं न तु तत्त्वतो भवेत् ॥ ४९ ॥

मायोपाधिको मकारस्तद्वाच्यः परिपठ्यतेऽखिलैर्वेदैः । इयं भावना समाधिपूर्वं समाधेः पूर्वमेव न तत्त्वतः तत्त्वसाक्षात्कारे सति न भवेत् । सर्वस्य ब्रह्मणि प्रविलयात् ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविलापन प्रकारमाहद्वाभ्याम् । विश्वंत्त्विति । उकारमध्ये बहुधाव्यवस्थितं स्थूलदेहनिबंधनंस्थूलदेहाभिमानेन स्थितं विश्वम्पुरुषंतद्वाचकमकारम् च विलापयेत् । तुश्चार्थे । विलीनम्भावयेत् ततस्तैजसंसालिङ्गदेहाभिमानिनम् पुरुषं तद्वाचकंप्रणवद्वितीय वर्णमुकारं वि-

विश्वं त्वकारं पुरुषं विलापयेदुकारमध्येबहुधा व्यवस्थितम् ।
ततो मकारे प्रविलाप्यतैजसंद्वितीयवर्णं प्रणवस्य चान्तिमे ॥५०॥

लीनविश्वकम्मकारे विलाप्याविलीनम्भावयित्वा ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततस्तादृशंमकारंतद्वाच्यंप्राज्ञंचकारणं कारणत्वाभिमानिनंपुरुषमिहात्मनि चिद्घनेपरे विलापयेत् तथाभावयेत् । ततः सोऽहंमर्वोविला
पाधिज्ञानंपरब्रह्मावभावयेत् । तद्विशिनष्टि । सदाविमुक्तिमत् नित्यमुक्तम् । नन्वहंपदार्थस्यरागद्वेषादिमलिनस्यकथं ब्रह्मत्वभावनेत्या

मकारमप्यात्मनि चिद्घने परे विलापयेत्प्राज्ञमपीह कारणम् ।
सोऽहं परं ब्रह्म सदा विमुक्तिमद्विज्ञानदृङ्मुक्त उपाधितोऽ
मलः ॥ ५१ ॥

शङ्क्याहंपदार्थंविशिनष्टि । उपाधितोमुक्तः अतएवामलःतथाभावनेसाधनं विज्ञानदृक्विज्ञानं ब्रह्ममात्रप्रसयाविच्छेदरूपादृक् निदिध्या
सनं सत्साक्षात्कारसाधनंयस्यसः ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंभावनावतोलक्षणमाह । एवमिति । उक्तप्रकारेणसदाजातापरमात्मन्येकभावना यस्यसः परिविस्मृतमखिलंपुत्रदेहादियेनसः। अत एवस्वस्वरूपानन्देनैवतुष्टःनतुविषयानन्देन । तस्यपरिणामेदुःखरूपत्वात्ततो विरक्तइत्यर्थः । साक्षान्नित्यात्मनित्यसुखप्रकाशकः साक्षा

एवं सदा जातपरात्मभावनः स्वानन्दतुष्टःपरिविस्मृताखिलः ॥
आस्ते स नित्यात्मसुखप्रकाशकः साक्षाद्विमुक्तोऽचलवारिसि
न्धुवत् ॥ ५२ ॥

दौपाधिकनामरूपभेदराहित्येननित्यमखण्डितमात्मस्वरूपंयत्सुखंप्रकाशश्चतद्रूपः एवंरूपो विमुक्तोजीवन्मुक्तः । अचलंनिश्चलंवारियस्यताद्दशसिन्धुवदास्ते । विषयसम्बन्धरूपलहरीरहितआस्तइत्यर्थः ॥ ५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशस्य मत्प्राप्तिर्भवत्येवेत्याह । एवमिति । उक्तप्रकारेण सदाऽभ्यस्तसमाधियोगिनः निवृत्ताः सर्वेषामिन्द्रियाणां गोचरा विषयाः शब्दादयो यस्य विनिर्जिता अशेषा रिपवः कामादयो येन तस्य । तज्जयेन विषयेष्वन्तःकरणाप्रवृत्तेः । अतएव सर्वज्ञत्वनित्यत्वनित्यतृप्तत्वबोध

एवं सदाऽभ्यस्तसमाधियोगिनो निवृत्तसर्वेन्द्रियगोचरस्य हि ॥ विनिर्जिताशेषरिपोरहं सदा दृश्यो भवेयं जितषड्गुणात्मनः ॥५३ ॥

रूपत्वस्वातन्त्र्यत्वनित्यमलुप्तत्वानन्तरूपा षड्गुणा यस्य तादृश आत्मा जितो वशीकृतो येन तस्य सदा दृश्यो भवेयम् । एतेन मद्भक्तस्य योगिनो ऽहं दृश्यो न तु भक्तिविमुखस्येति सूचितम् ॥ ५३ ॥ ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंविधोजीवन्मुक्तःप्रारब्धवशेन अनभिमानो भोगानश्नँस्तिष्ठेत् ततोमय्येवविलीयते मद्रूपोभवतीत्याह । ध्यात्वैवमिति ॥ ५४ ।

ध्यात्वैवमात्मानमहर्निशं मुनिस्तिष्ठेत्सदा मुक्तसमस्तबन्धनः ॥
प्रारब्धमश्नन्नभिमानवर्जितो मय्येवसाक्षात्प्रविलीयते ततः ५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वधर्मापेक्षयाऽयमेवधर्मोज्यायानित्याह । आदौचेति । भवसंसारमादिमध्यावसानेषुसर्वथाभयशोकयोः कारणंविदित्वातत्कारणी
भूतंविधिवादैर्यजेतेत्यादिभिश्चोदितंबोधितंसमस्तंकर्ममार्गंकाम्यंहित्वा अखिलात्मनांजीवानांस्वरूपभूतंमामात्मानं परमेश्वरंभजेत् । य

आदौ च मध्ये च तथैव चान्ततो भवं विदित्वा भयशोक कार
णम् ॥ हित्वा समस्तं विधिवादचोदितं भजेत्स्वमात्मान मथा
खिलात्मनाम् ॥ ५५ ॥

थाधनस्यार्जनेनादौदुःखंमध्येपालनकृतं तत्र राजादिकृतं भयमन्तेनाशेशोकपर्यंवसायिदुःखमेवं पदार्थमात्रेद्रष्टव्यम् ॥ ५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मय्यभेदभावनया नामरूपाविभागेन तद्रूप एवभवतीत्यमुमर्थं सदृष्टान्तमाह । आत्मनीति । आत्मनिसर्वाधिष्ठानेमयिइदंस्वस्वरूपं जीवमभेदेनविभावयन्यदा । तिष्ठतीतिशेषः । तदामयात्मनापरमेश्वरंणाऽभेदेनभवति अभिन्नोभवति । तत्रदृष्टान्तः यथासमुद्रेप्रविष्टं नद्यादि

आत्मन्यभेदेन विभावयन्निदं भवत्यभेदेन मयाऽत्मनातदा ॥ यथाजलं वारिनिधौ यथापयः क्षीरेवियद्व्योम्न्यऽनिले यथाऽनिलः ॥ ५६ ॥

जलंसमुद्रएव यथाक्षीरेगवादिक्षीरेप्रक्षिप्तंपयःक्षीरमेव यथाव्योम्निमहाकाशेघटाद्यवच्छिन्नाकाशोघटादिभङ्गे च यथाचर्मभस्त्रिकाद्यवच्छिन्नोवायुरनिलेमहावायौ नामरूपाविभागेनैकीभवतीत्यर्थः ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमात्मतत्त्वज्ञस्य जगत्सत्यत्वभ्रमःस्वतएवापैतीत्याह । इत्थमिति । हिरप्यर्थे । लोकसंस्थितोऽपिजीवन्मुक्तिदशायांप्रारब्धवशाल्लोक व्यवहारंकुर्वन्नपिजगन्मृषैवेतिविभावयन्सन् यदियदा इत्थमीक्षते ऐकात्म्यं जानीयात्तदा निवृत्तजगत्सत्यत्वभ्रमो भवतीति शेषः। तत्र हेतुः श्रुतियुक्तिमानतोनिराकृतत्वात् । अतोऽन्यदार्तमित्यादिश्रुतिरूपात् जगन्मिथ्यादृश्यत्वात् शुक्तिरजतवदितितदुपबृंहितानुमानरू

इत्थं यदीक्षेत हि लोकसंस्थितो जगन्मृषैवेतिविभावयन्मुनिः॥ निराकृतत्वाच्छ्रुतियुक्तिमानतो यथेन्दुभेदो दिशि दिग्भ्रमादयः॥ ५७॥

पात्मानतःप्रमाणतोनिराकृतत्वात् तत्रदृष्टान्तोयथेन्दुभेदः एकचन्द्रेद्विचन्द्रत्वभ्रमस्तदेकत्वज्ञानेननिवर्तते यथाच दिशिप्राच्यादौअ न्यदिक्त्वभ्रमः सोऽपितत्त्वज्ञानान्निवर्तते । एवंभ्रमतःपुरुषस्य दिक्षुभ्रमणाद्भ्रमोनिकटवर्तिवृक्षादौच भ्रमणभ्रमस्तत्स्थैर्यज्ञानेन निवर्तते तद्वत् ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशज्ञानेमदाराधनमेवोपायइत्याह । यावदिति । अखिलं जगन्मदात्मकंमदधिष्ठानकंमाद्विवर्तभूतंयावन्नपश्येत्तावन्मत्प्राप्तयेश्रद्धालुः भगवदाराधनमेवज्ञानप्रापकमित्यत्र दृढविश्वासवान् अतिशयेनोर्जितावृद्धिमतीभक्तिर्मयिभगवतिपूज्यताबुद्धिरूपालक्षणं चिह्नंयस्यसः ।

यावन्नपश्येदखिलं मदात्मकं तावन्मदाराधनतत्परो भवेत् ॥
श्रद्धालुरत्यूर्जित भक्तिलक्षणो यस्तस्य दृश्यो ऽहमहर्निशं हृदि ॥ ५८ ॥

तावन्मदाराधननिष्ठोभवेत् एवंहितस्यहृदि अहमहर्निशंदृश्योभवा मियेयथामांप्रपद्यन्ते तांस्तथैवभजाम्यहमितिस्मृतेः ॥ ५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वोक्तवचनजातस्य श्रुतिसमत्वं कथमेतदालोचनमपिमदाराधनप्रतिबन्धकदुरितध्वंसोपायइत्याह रहस्यमिति । श्रुतिसारसङ्ग्रहत्वेनाति

रहस्यमेतच्छ्रुतिसारसङ्ग्रहं मया विनिश्चित्य तवोदितं प्रिय ॥ यस्त्वेतदालोचयतीहबुद्धिमान् स मुच्यते पातकराशिभिः क्षणात् ॥ ५९ ॥

गोपनीयता अप्रमाणशङ्काकलङ्कराहित्यंसूचितम् । आलोचयतिसम्यग्विचारयति ॥ ५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ भगवानुक्तमेवार्थसंक्षेपेण दार्ढ्यायपुनराह भ्रातरिति । यदीतियादित्यर्थे । यदीदंजगत् परिदृश्यते तत्सर्वमायैवेतिज्ञात्वेति शेषः
चेतसासर्वंपरिहृत्यतत्रौदासीन्यंकृत्वामद्भावनयामदैक्यभावनया भावितंशुद्धंमानसंयस्यतादृशास्तिष्ठ । इत्युपदिश्याशिषंप्राह निरामयः

भ्रातर्यदीदं परिदृश्यते जगन्मायैव सर्वं परिहृत्य चेतसा ॥ मद्भा
वनाभावितशुद्धमानसः सुखी भवाऽऽनन्दमयो निरामयः ६०

सन्सुखीभव । सर्वदुःखनिवृत्त्येतिभावः । ततोऽन्तरङ्गामन्यामाशिषमाह आनन्दमयोभवेति तद्रूपोभवेत्यर्थः । यद्यपिपूर्वमानन्दरूपत्वमस्त्ये
वतथाऽपितत्प्राप्तिर्विस्मृतकंठस्थभूषणप्राप्तिवत ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंरीत्यास्वोपासकस्यलोकपावनत्वमाह। यइति । कदावा यदाकदाचिदित्यर्थः । हृदानिर्मलेनान्तःकरणेन यो मामगुणं प्राकृतसत्त्व
रजस्तमोरूपगुणरहितम् । सच्चिदानन्दरूपत्वात् । अतएवगुणादन्याकृतात्परंमायातीतम् । यदिवायद्वेत्यर्थे । गुणात्मकं सर्वज्ञत्वा-
दिलोकोत्तरलावण्यादिगुणवानात्मामूर्तिर्यस्यतं दृश्यमानं रूपं सेवते । सद्विविधोऽप्युपासकःअहं मत्स्वरूपएव । मामकइत्यर्थोवा । प्रि-

यः सेवते मामगुणं गुणात्परंहृदा कदा वा यदि वा गुणात्मकम् ॥ सोऽहंस्वपादाञ्चितरेणुभिः स्पृशन्पुनाति लोकत्रितयं यथा रविः ॥ ६१ ॥

योहिज्ञानिनोऽत्यर्थमहंसचममप्रिय इत्युक्तेः । तादृशोभक्तःस्वपादलग्नरेणुभिःसंस्पृशन्लोकत्रयमपि पुनाति । अज्ञानध्वान्तनिरसने
नपवित्रीकरोति । यथारविःस्वकरैर्जगद्वितिमिरीकरोति तद्वत् ॥ ६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानीमेतद्ग्रन्थार्थालोचनासमर्थस्यपाठमात्रतोऽपिमहत्फलमाह । विज्ञानंविज्ञानजनकं करणंव्युत्पत्त्येतिबोध्यम् । वेदान्तैरुपनिषद्वाक्यैर्वेद्यंचरणंजगज्जन्मादिलक्षणंकर्मयस्यतेन ननुपाठमात्रादेताद्दशमहत्फलप्राप्तिःकथमित्याशङ्क्यभवत्येवेति सूचयंस्तत्रहेतुमाह । मद्वचने

विज्ञानमेतदखिलंश्रुतिसारमेकं वेदान्तवेद्यचरणेनमयैवगीतम् ।
यःश्रद्धया परिपठेद्गुरुभक्तियुक्तो मद्रूपमेतियदि मद्वचनेषुभक्तिः
॥ ६२ ॥ इतिश्री अध्यात्मरामायणे रामगीता समाप्ता ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसम्वादे उत्तरकाण्डे श्रीरामगीतायां पञ्चमःसर्गः ॥ ५ ॥

षुभक्तिर्विश्वासोयदीतिअर्थाद्गुरुवाक्यविश्वासस्यैव फलदायकत्वादितिभावः ॥६२॥ इत्यध्यात्मरामायणेउमामहेश्वरसम्वादे उत्तरकाण्डे सेतौपञ्चमःसर्गः ॥ ६२ ॥ श्रीरामचन्द्रार्पणमस्तु ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

श्रीराममन्त्रःखलु तारकाख्यः संसारसन्तारणसुप्रसिद्धः ॥ भक्-
त्याऽप्यभक्त्या समुपासितोयः श्रेयांसि सर्वाणि ददात्यवश्य
म् ॥ १ ॥ तन्तारकंसम्प्रतिपादयन्ती श्रीरामगीता सकलैः सुसे
व्या ॥ विज्ञप्तिमित्थंजनको विनीतः समर्पयत्यार्यजनेषुहर्षात् २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प,	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति
स्यर्द्धि	स्पार्द्धि	१	२	१	शाधि	शाधि	३	२	६	नाशे	नाशो	६	१	१
जीव्य	जीन्य	१	२	३	व्यत्र	व्यत्र	४	१	१	नन्वितिश	नन्वितिशे	६	२	१
सम्बीन्धनीः	सम्बन्धिनीः	२	२	१	ष्ठामे	ष्ठानमे	४	२	३	त्रिदा	विदा	६	२	२
व्रह्म	व्रह्म	२	१	२	व्रह्म	व्रह्म	४	२	१	मंवे	मेव्	६	२	२
व्रह्म	व्रह्म	२	१	६	वलेन	वलेन	४	२	७	व्येतीत	व्यतेति	७	१	१
वोधोऽसि	वोधोऽसि	३	१	४	निघृत्ते	निवृत्ते	५	१	१	वीरहा	वीरहा	७	१	१
संवन्ध	सम्बन्ध	३	१	७	कत्व	कत्वा	५	१	१	सद्दष्ट	सद्दृष्ट	८	१	३
भवस्यंससार	भवस्यसंसार	३	२	१	नक	नैक	५	१	१	बिशुद्धं	विशुद्ध	८	२	१
न्सार	सार	३	२	२	बेदान्त	वेदान्त	५	१	१	कारांतः	कारान्तः	८	२	२
पर्वग	पवर्ग	३	२	२	पूर्व	पूर्व	५	१	२	वृत्ति	वृत्ति	९	१	१
वारिधि	वारिधि	३	२	२	वुद्ध्या	वुद्ध्या	५	१	६	स्त्रवाना	स्त्रना	९	२	१
					एवं	एत्र	५	१	६	वृत्यु	वृत्यु	१०	१	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
रीप	रपि	११	२	१
नर्दृष्टा	र्नदृष्टा	१२	१	४
वर्द्धौ	वर्द्धे	१२	१	७
त्याभिः	त्मभिः	१२	२	६
शुद्ध	शुद्ध	१३	१	१
जीवया	जीवयो	१३	१	२
निर्वाध	निर्बाध	१४	१	१०
भव्र	भव	१५	१	४
अर्जोद्व	अर्जोऽद्व	१६	२	६
द्वात्	द्वातू	१७	२	१

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
लाभ	लाभे	१८	१	८
इतिः	इति	१८	२	२
ज्ञानन	ज्ञानेन	१९	१	१
वुद्वया	वुद्ध्या	२०	१	६
रागदि	रागादि	२१	१	३
विलय	विलय	२१	१	७
धम	धर्म	२१	२	१
म्वस्य	म्वंयस्य	२१	२	२
वुधै	बुधै	२३	१	५
एव	एवं	२३	२	१
द्रष्ट	द्रष्टृ	२४	१	२

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
विभाव्यत	विभाव्यते	२५	१	४ मू
लिङ्गेद	लिङ्गदे	२६	१	२
बोधकः	बोधतः	२५	१	६
विज्ञानं ब्रह्म	विज्ञानंनिादि ध्यासनं ब्रह्म	२६	२६	३
भेदेरा	भेदरा	२७	१	६
रुपा	रूपाः	२७	२	६
आतम	अतमा	२७	२	६
मुनिति	मुनिास्ति	२८	१	२
भव	भवं	२८	२	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
तदकत्व	तदेकत्व	२९	२	७	वतथाऽ	वतथाऽ	३१	१	६	मद्वचने	मद्वचने	३२	१	२
भ्रमण	भ्रमणं	२९	२	८	कंठ	कण्ठ	३१	१	२	तन्त्तारकं	तत्तारकं	३२	२	३

नेपाल पाशुपत, यन्त्रालये मुद्रितः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति रामगीता सटीका समाप्ता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह. नं. १६६४२

अथ रामगीता सटीका प्रारभ्यते ॥

मू० २।-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ रामंरत्नकिरीटकुण्डलयुतं केयूरहारान्वितं
सीतालङ्कृतवामभागममलं सिंहासनस्थं विभुम् ॥ सुग्रीवादि
कपीश्वरैःसुरवरैः संसेव्यमानं सदा विश्वामित्रपराशरादिमुनि-
भिः संस्तूयमानं भजे ॥ १ ॥ इतिध्यात्वा ॥ श्रीमहादेवउवाच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ ध्यायेत्वाजानुबाहुं धृतशरधनुषं बद्धपद्मासनस्थं पीतंवासोवसानं नवकमलदलस्पर्द्धिनेत्रं प्रसन्नम् ॥ वामाङ्कारूढ सीतामुखकमलमिलल्लोचनं नीरदाभं नाना लङ्कारदीप्तं दधतमुरुजटामण्डलं रामचन्द्रम् ॥ १ ॥ ततइति जगतां यानि मङ्गलानि आनन्दास्तेषामुपजीव्यभूतं मङ्गलं ब्रह्मानन्दः सएवात्मास्वरूपं तेन तस्यैवानन्दस्यान्यानि भूतानिमात्रामुपजीवन्तीति श्रुतेः मङ्ग

ततोजगन्मङ्गलमङ्गलात्मना विधाय रामायणकीर्तिमुत्तमाम् ॥
चचार पूर्वाचरितं रघूत्तमो राजर्षिवर्य्यैरभिसेवितं यथा ॥ १ ॥

लानाश्चमङ्गलमिति स्मृतेश्च किंच जगतां मङ्गलं कल्याणं यस्मात्तादृशकल्याणरूपआत्मामूर्तिस्तया उत्तमांश्रोत्रादीनां मोक्षदत्वेना त्युत्तमां रामायणकीर्तिं वाल्मीक्यादि कृत नानाविध रामायण प्रवर्तिकां रावणवधादिजां कीर्तिंविधाय स्थितोरघूत्तमः ततः सीताप रित्यागानन्तरं पूर्वैः स्ववंशजैराचारितं प्रजापालनसत्कथाश्रवणादिकं केवलंतत्पूर्वजैरेवाचरितमितिन किंत्वन्यैरपि राजर्षिश्रेष्ठैर्य थाऽभिसेवितं तथाचचार कृतवान् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदारागुरुदेवविश्वासलक्षणमहागुणवती यद्वा उदारा दानशीलाबुद्धिर्यस्य तेन पुरातनीः प्राचीनराजसम्बन्धिनीः शुभाः धर्माधर्मनिर्णेत्रीः प्रमत्तस्य स्वगोमण्डलमिश्रितब्राह्मणगोदानात् प्रमत्तस्य नृगस्य राज्ञो द्विजस्य शापात्तिर्यक्त्वमाह तेनाज्ञातकृतब्रह्मस्वापहारेण परमधा

सौमित्रिणापृष्ट उदारबुद्धिना रामःकथाःप्राह पुरातनीःशुभाः ॥
राज्ञः प्रमत्तस्य नृगस्य शापतो द्विजस्य तिर्यक्त्वमथाह राघवः
॥ २ ॥

र्मिकस्यापीदृश्यवस्थेति सर्वथाब्रह्मस्वविमुखताधर्मइतिसूचितम् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकान्तेविजने उपस्थितंप्राप्तम् विनयान्वितः सन् भक्त्यागुरुरयमिति बुद्ध्या प्रणम्य अनेनगुरूपसदनप्रकारउक्तः आसादितंशुद्धंभाव

कदाचिदेकान्त उपस्थितंप्रभुं रामं रमालालितपादपङ्कजम् ॥
सौमित्रिरासादितशुद्धभावनः प्रणम्यभक्त्याविनयान्वितोऽब्र-
वीत् ॥ ३ ॥

नं भावनाकरणमन्तः करणंयेनसः शुद्धान्तःकरणइतियावत् भगवदुक्तसत्कथाश्रवणेन शुद्धान्तःकरणइत्यर्थः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हे महामते महतीसर्वविषयामतिर्यस्य तस्य संबोधनं त्वं शुद्धबोधोऽसि अनवच्छिन्नचैतन्यरूपोऽसि सर्वदेहिनामात्माऽसि जीवानांतत् प्रतिविम्बत्वात् अधीशोऽसि अन्तर्यामित्वान्नियन्ताऽसि वास्तवभेदाभावाच्च सर्वात्मत्वम् औपाधिकभेदाच्च नियन्तृनियम्यभावोबोध्यः निराकृतिः अस्मदादिवत्स्वार्जितकर्माधीनशरीराकृतिरहितः नन्वेवंसर्वैः कथमेवंनज्ञायतेऽतआह ज्ञानदृशां स्वयमेवप्रतीयसे ज्ञायतेऽ

त्वं शुद्धबोधोऽसि हि सर्वदेहिनामात्माऽस्यधीशोऽसि निरा-
कृतिःस्वयम् ॥ प्रतीयसे ज्ञानदृशां महामते पादाब्जभृङ्गाहितस
ङ्गसाङ्गिनाम् ॥ ४ ॥

नेनेतिज्ञानं वेदान्तवाक्यजातं तदेवदृक्दर्शनसाधनंयेषां तेषामितिसंबन्धसामान्येषष्ठी तैरित्यर्थः शादृशदृक्लाभश्च त्वद्भक्त्यधीनइत्याह पादेति त्वच्चरणकमलयोर्भृङ्गवदाहितःकृतः सङ्गोयेन तादृशान्तः करणसङ्गवतां त्वच्चरणकमल सल्लग्नान्तः करणवतामित्यर्थः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

अथ प्रार्थयते अहमिति भवस्यंससारस्यापवर्गो निवृत्तिर्यस्मात्तादृशंतवपादाम्बुजंप्रपन्नोऽस्मिशरणंप्राप्तोऽस्मि योगिभावितं योगीभिः सं
न्सारमुक्तये भावितम् अनेनतस्य भवापवर्गत्वे सदाचारः प्रमाणमुक्तम् प्रार्थनीयमाह अपारवारिधिरूपंयदज्ञानंसंसारमूलकारणं यथासुखम

अहं प्रपन्नोऽस्मि पदाम्बुजं प्रभो भवापवर्गं तव योगिभावितम् ॥ यथाञ्जसाज्ञानमपारवारिधिं सुखं तरिष्यामि तथाऽनुशाधि माम् ॥ ५ ॥

क्लेशेन तरिष्यामि तथा मामनुशाधिशिक्षय अपारवारिधिमित्यनेनसपारप्रसिद्धसमुद्राद्व्यतिरेकउक्तः अशक्यतरणताऽनेनध्वनिता ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथोत्तरमवतारयति श्रुत्वेति रामः सौमित्रिवचः श्रुत्वा अथशब्दोवाक्यालङ्कारे तदा श्रवणाऽव्यवहितकाले एवप्रपन्नानां भक्तानामार्ति संसारदुःखंहरतितादृशः प्रपन्नाभ्रमादिहीना भक्तानुग्रहपरा च धीर्यस्यसः क्षितिपालानां राज्ञां भूषणभूतोऽज्ञानरूपतमसउपशान्तये स

श्रुत्वाथ सौमित्रिवचोऽखिलं तदाप्राह प्रपन्नार्तिहरःप्रसन्नधीः ॥
विज्ञानमज्ञानतमोपशान्तये श्रुतिप्रपन्नं क्षितिपालभूषणः ॥ ६ ॥

दर्थम् सन्धिरार्षः श्रुतिभिः तमेवविदित्वाऽतिमृत्युमेतीत्यादिश्रुतिभिः प्रपन्नं तत्फलकत्वेन बोधितं विज्ञानमात्मतत्वज्ञानमिति सामान्यतः प्रथमंप्राह ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथतादृशज्ञानप्राप्तये क्रमेणबहिरङ्गान्तरङ्गसाधनान्याह आदाविति स्ववर्णाश्रमेषु शास्त्रेण वर्णिता याः क्रियानित्यनैमित्तकयज्ञदानादिरूपास्ताः कृत्वा समासादितशुद्धमानसः प्राप्तान्तःकरणशुद्धिः तत्पूर्वमुपात्तसाधनः तदनुष्ठानपूर्वकमेवउपात्तानिसाधनानि शमदमादीनियेन तादृशः अनेनकर्मणां बहिरङ्गत्वं शमादीनामन्तरङ्गत्वं स्फुटमेवोक्तम् किंच शमदमवैराग्यदार्ढ्यपर्यन्तं कर्मानुष्ठामेवेति

आदौ स्ववर्णाश्रमवर्णिताःक्रियाः कृत्वा समासादितशुद्धमानसः
समाप्य तत्पूर्वमुपात्तसाधनः समाश्रयेत्सद्गुरुमात्मलब्धये॥ ७॥

सूचितम् ततस्तत्कर्मानुष्ठानं समाप्य त्यक्त्वा संन्यस्येतियावत् आत्मलब्धये आत्मज्ञानाय तत्फलकाय तत्वमस्यादिवाक्यार्थविचाराय सद्गुरुंश्रोत्रियंब्रह्मनिष्ठमित्यादि लक्षणलक्षितं समाश्रयेत् सेवेत अनेनव्युत्पत्तिबलेन स्वयमेववाक्यार्थविचारः क्रियमाणो न फलायेति सूचितम् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसारस्यभ्रमिमच्चक्ररूपत्वात्तन्निवृत्तश्चतत्कारणाज्ञानानिवृत्तिमूलकत्वदज्ञाननिवृत्तेश्चतत्त्वज्ञानकसाध्यत्वात्तत्त्वज्ञानस्यचवेदान्त विचारसा-
ध्यत्वात्तदर्थंगुरुसमाश्रयणमित्याह क्रियेति भवःसंसारश्चक्रवद्विपरिवर्तमानईर्यते कथ्यते तदेवोपपादयति आदृताआदरपूर्वपूर्वजन्मार्जि
ताक्रियाएनस्यशरीरोद्भवस्यजन्मनोहेतुः तत्रजन्मनिसुरागिणोविषयाभिलाषवतः तौ शास्त्रप्रसिद्धौ धर्मेतरौ धर्माधर्मौ प्रियाप्रियौसुखदुः

क्रियाशरीरोद्भवहेतुरादृताप्रियाप्रियौतौभवतःसुरागिणः ॥
धर्मेतरौतत्रपुनः शरीरकंपुनः क्रियाचक्रवदीर्यतेभवः ॥ ८ ॥

खजनकौभवतःकस्यचिदधर्मएवसुखत्वबुद्ध्याप्रवृत्तिः कस्यचिद्धर्मएवंकदाचिदित्यप्यूह्यम् एवंतत्रोत्पादितकर्मणापुनःशरीरंपुनःक्रिया-
इत्येवंचक्रवद्विपरिवृत्तिः । यथाचक्रेभ्राम्यमाणेऽधोभागः कदाचिदुपरिउपरितनश्चाधः पुनरुपरिपुनरधएवंजन्मक्रिययोर्जन्यजनक-
भावेनपरिवृत्तिरिति बोध्यम् ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यचाज्ञानमेवमूलमित्याह अज्ञानमेवेति अत्रविधौसंसारनिवृत्तिलक्षणेकर्तव्येऽर्थेतज्ज्ञानमेवमूलकारणत्वादज्ञानज्ञानमेवविधीयते साध-
नत्वेनेतिशेषः ननुकर्मैवतन्नाशकमस्तुकिंज्ञानेनेत्याशङ्क्याह विद्यैवज्ञानमेवतन्नाशविधौमूलाज्ञाननाशनेपटीयसीसमर्थानकर्मसमर्थमितिशेषः

अज्ञानमेवास्याहिमूलकारणंतज्ज्ञानमेवात्रविधौविधीयते ॥ विद्यै
वतन्नाशविधौपटीयसीनकर्मतज्जंसविरोधमीरितम् ॥ ९ ॥

यतस्तत्तज्जमज्ञानजम् आत्मस्वरूपाज्ञानजन्यदेहाद्यभिमानजन्यत्वात्कर्मणोज्ञानजन्यत्वंबोध्यम् ननुतज्जन्यस्यापितन्नाशकत्वंवृश्चिककर्क
व्यादौदृष्टमित्याशङ्क्यतज्जन्यत्वंवाननाशकत्वेप्रयोजकंकिन्तुसविरोधत्वमेवेत्याह यतसविरोधंतदीरितंनाशकमुक्तमित्यर्थः ॥ ९ ॥ ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतएवकर्मणानाज्ञानहानिरित्याह नाज्ञानेत्यादि यतःकर्मणाविरोधाभावान्नाज्ञाननाशनापिरागनाशोवस्तुतः कर्मानुष्ठानात्पुनः सदो
षंक्षयिफलत्वादिदोषविशिष्टंकर्मैवोद्भवेत्कर्मणश्चपुनःसंसारएवेतिनमुक्तिमत्याशा ततस्तस्माद्बुधोविवेकीज्ञानविचारवान् ज्ञायतेऽनेने·

नाज्ञानहानिर्नचरागसङ्क्षयोभवेत्ततः कर्मसदोषमुद्भवेत् ॥ ततः
पुनः संसृतिरप्यवारितातस्माद्बुधोज्ञानविचारवान्भवेत् ॥ १० ॥

तिज्ञानंवेदान्तवाक्यंतद्विचारवान्भवेत ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानींज्ञानस्यैवमोक्षहेतुत्वंवक्तुंज्ञानकर्मसमुच्चयवादंदूषणायानुवदतिसार्धेन नन्विति नन्वितिशङ्कायाम् यथाविद्यावेदमुखेनश्रुतिपुराण-लक्षणेन ब्रह्मविदाप्नोतिपरम् इत्यादिनापुरुषार्थसाधनमुक्ता तथा उभाभ्यामवपक्षाभ्यांयथाखेपक्षिणांगातिः तथैवज्ञानकर्मभ्यांप्राप्यते ब्रह्मशाश्वतम् इत्यादिनाक्रियाऽपितत्साधनत्वेनोक्ता किंच क्रियाकर्तव्यत। तृतीयार्थेप्रथमा कर्तव्यतयाआवश्यकेकृत्येअवश्यकर्तव्यत-

ननुक्रियावेदमुखेनचोदितायथैवविद्यापुरुषार्थसाधनम् ॥ कर्तव्यताप्राणभृतःप्रचोदिताविद्यासहायत्वमुपैतिसापुनः ॥ ११ ॥

याप्रचोदितानित्यनैमित्तिकरूपा एवंचनदकरणेप्रत्यवायोत्पत्त्याज्ञानोत्पत्तिरेवनस्यात् तसमात्सापुनर्विद्यायाःसहायत्वंप्राप्नोतिघटेजन-नीयेयथादण्डचक्रादीनांपरस्परसहायता ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्तव्यमेतितस्मात्कर्मवैविद्वणाऽनि कर्मेति व्रीग्हा वाएषदेवानांयोऽग्निमुद्वासयतेयावज्जीवमग्निहोत्रंजुहोति इतिश्रुतिः तत्रासिद्धान्तीशङ्कते
नान्वाति ध्रुवंस्थिरंकार्यमिदंपुरुषार्थमोक्षजनिकाविद्यायतः स्वतन्त्राविनाऽपिसहायेन स्वकार्यसंपादनेसमर्था यथातेजस्तिमिरनिवर्तन-

कर्माकृतौदोषमपिश्रुतिर्जगौतस्मात्सदाकार्यमिदंमुमुक्षुणा॥ननु
स्वतन्त्राध्रुवकार्यकारिणीविद्यानकिञ्चिन्मनसाऽप्यपेक्षते ॥ १२

समर्थंमनसाऽपिकिञ्चित्सहायभूतंवस्तुनापेक्षते तथाफलेजननीयेसहायान्तरसंभावनाऽपिनेतिभावः अनेनविद्याफलजननेनिरपेक्षास्वतन्त्र-
त्वात्तेजोवदित्यनुमानंसूचितम् ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समुच्चयवादीपरिहराति नेति त्वदुक्तंनेत्यर्थः सत्यकार्यः अक्षय्यंहवैचातुर्मास्ययाजिनः सुकृतंभवति इत्यादिवेदनबोधितःस्थिरकार्योऽपि-
अध्वरः यथाऽन्यानपिकारकादिकान् आरादुपकारकप्रयाजाद्यङ्गानिदेशकालादीनिचप्रकाङ्क्षते तथाविद्यापिअग्निहोत्रंजुहोतिइत्यादिवि

नसत्यकार्योऽपिहियद्वदध्वरः प्रकाङ्क्षतेऽन्यानपिकारकादिकान्
तथैवविद्याविधितः प्रकाशितैर्विशिष्यते कर्मभिरेवमुक्तये ॥ १३ ॥

धिवाक्यतःतत्समूहेनप्रकाशितैः कर्मभिः सहितैवमुक्तयेविशिष्यतइत्यर्थः विद्याफलदानेकर्मापेक्षा अङ्गित्वात् प्रयाजाद्यङ्गापेक्षदर्शा
दिवदितितत्प्रतिपक्षानुमानमनेनसूचितम् ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदनूद्यसिद्धान्तीदूषयति केचिदिति यत्केचिद्वितर्कवादिनश्रतिज्ञानकर्मणोसमुच्चित्यमुक्तिसाधनंवदन्तितदप्यसत् यथाकेवलंकर्म मोक्ष साधनमित्यमत्तथातन्मीलितमित्यप्यसत् तत्रहेतुर्दृष्टविरोधकारणात् दृष्टोयोविरोधः सर्वलोकदृष्टविरोधरूपात्कारणात्तदसदित्यर्थः विरो

केचिद्वदन्तीतिवितर्कवादिनस्तदप्यसद्दृष्टविरोधकारणात् ॥
देहाभिमानादभिवर्धतेक्रियाविद्यागताहङ्कृतितःप्रसिद्ध्यति १४

धमेवाह देहाभिमानात्क्रियावर्धतेअनात्मनिदेहादावात्मत्वाभिमानात्क्रियावृद्धिः विद्यातुगताहङ्कृतितः गताहङ्कृतिर्यस्यतस्यनष्टाहङ्कृतेः प्रसिद्ध्यति सार्वविभक्तिकस्तासिः एवंचाहङ्कारसत्तामूलकत्वात्क्रियाज्ञानयोः समुच्चयोविरुद्धइत्यर्थः ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विशुद्धंविज्ञानंयेभ्यस्तेषांवेदान्तवाक्यानांयाद्विशेषेणरोचनंरलयोरभेदादालोचनंविचार
अथपूर्वपक्षयुक्तानुमानंदूषयन्विद्यास्वरूपमाह स्तेनाञ्चितांप्रापितायाचरमाआत्मवृत्तिर्ब्रह्माकारांतःकरणवृत्तिः साविद्येतिभण्यते।विद्वाद्भिरितिशेषः पुनःसमुच्चयवारणायविद्याकर्मणो
वैषम्यमाह कर्मयज्ञादिअखिलकारकादिभिःकर्तव्यकर्मादिभिरङ्गैश्चसाहितंसदुदेति फलोन्मुखंभवति विद्यापुनरखिलकारकादिनिहन्ति

विशुद्धविज्ञानविरोचनाञ्चिताविद्याऽऽत्मवृत्तिश्चरमेतिभण्यते ॥
उदेतिकर्माखिलकारकादिभिर्निहन्ति विद्याऽखिल कारकादि-
कम् ॥ १५ ॥

तत्रकर्तृत्वादिबुद्धिंनिहन्ति सकलव्यापारपरित्यागेनब्रह्मणिसमाप्तिर्हिविद्या अतःस्वोत्पत्तौचित्तशुद्धिद्वाराकर्मसापेक्षास्वफलेजनयितव्ये-
तन्निरपेक्षैवान्यथाविद्यास्वरूपस्यैवभङ्गापत्तेरितिपूर्वपक्षयुक्तहेतोरसिद्धिरितिभावः ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपसंहरन्मुमुक्षोर्वृत्तिप्रकारमाह तस्मादिति विद्याविरोधाद्विद्यायाःकर्मणासह विरोधेनसमुच्चयोनभवेत्तस्मात्सुधीर्मुमुक्षुरशेषतःकर्मत्यजेत् काम्यंतुसर्वथात्याज्यमेवनित्यनैमितिकमापियावच्चित्तशुद्धिकर्तव्यमेव ततोऽपिब्रह्माणिचित्तस्थैर्यपर्यन्तं कर्तव्यमेव ततस्तदनुसन्धानप्र-

तस्मात्त्यजेत्कार्यमशेषतः सुधीर्विद्याविरोधान्नसमुच्चयोभवेत् ।
आत्मानुसन्धानपरायणःसदा निवृत्तसर्वेन्द्रियवृत्तिगोचरः १६

तिबन्धकत्वात्प्रयोजनाभावाच्चतदपित्याज्यमेवेतिभावः इदानींमुमुक्षुकर्तव्यमाह निवृत्ताःसर्वेषामिन्द्रियाणां गोचराविषयाःशब्दादयोयस्मात्तादृशःसन् आत्मनःसच्चिदानन्दस्यानुसन्धानमेवपरमयनंप्राप्यंयस्यतथाविधोभवेत् अत्रेन्द्रियप्रत्याहारःकर्तव्यत्वेनोक्तस्तेनतत्पूर्वप्राणायामाद्यर्थादाक्षिप्तम् ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रागिविरागिभेदेनकर्मणोकर्तव्यताकर्त्तव्यतेआहयावदिति माययाविद्ययाशरीरादिष्वनात्मसुआत्मधीरहङ्कर्तेत्यादिरूपायावद्वर्ततेतावद्वि
धिवादकर्मणाम् विधिर्यजेतेत्यादिश्रुतिर्वादःकर्तव्यताबोधकोयेषांकर्मणांविधेयोवशवर्त्तितत्कर्मकर्ताभवेत् तदपगमेतुतदाखिलं जगन्नेतीति

यावच्छरीरादिषुमाययात्मधीस्तावद्विधेयोविधिवादकर्मणाम् ॥
नेतीतिवाक्यैरखिलं निषिद्ध्य तज्ज्ञात्वापरात्मानमथत्यजेत्क्रि
याः ॥ १७ ॥

वाक्यैः अथातआदेशोनेतिनेतिइत्यादिवाक्यैर्निषिध्य मिथ्यात्वेननिर्णीयताद्विलक्षणतयासत्यत्वेनपरमात्मस्वरूपंज्ञात्वाक्रियास्त्यजेत् निरू
पितमेतत् ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मविज्ञानेसत्यवश्यमविद्या निवर्ततइत्याह यदेति आत्मनिशुद्धेन्तःकरणेपरमात्मनईशस्यात्मनोजीवस्यचयोविभेदोमायान्तःकरण
रूपोपाधिद्वयकृतोविभेदोभेदस्तस्यभेदकं नाशकंभास्वरंप्रकाशशीलंयद्विज्ञानमितरवृत्त्युपमर्दनपूर्वकंब्रह्माकाराऽखण्डाद्यावृत्तिर्यदाऽवभाति

यदापरात्मात्मविभेदभेदकंविज्ञानमात्मन्यवभाति भास्वरम् ॥
तदैवमायाप्रविलीयतेऽञ्जसासकारकाकारणमात्मसंसृतेः॥ १८॥

असंभावनादितिरस्कारेणोदेति तदैव सकारकाजन्मान्तरप्रापककर्मसहितामायातत्तज्जीवोपाधिभूताविद्याऽञ्जसाझदितिप्रविलीयतेनश्यति
ननुतन्नाशेऽपिसंसारनाशःकथमतोमायाविशेषणम् आत्मसंसृतेःकारणंसंसारस्योपादानकारणमेवंचतन्नाशेकार्यनाशोभवत्येवेतिभावः १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं पुनर्दार्ढ्यायाह श्रुतीति तत्त्वमसीत्यादिश्रुतिरूपैःप्रमाणैस्तज्जनितज्ञानेन नाशितासात्विद्याकथमपिकार्यकारिणीभविष्यतीति काकुरत्र सर्वथानेत्यर्थः असतःकार्यकारित्वासंभवादितिभावः पुनश्चतस्यानोद्भवइत्याह विज्ञानमात्रादिति अमलाशुद्धाद्वितीयतःद्विती

श्रुतिप्रमाणाभिविनाशिताचसाकथंभविष्यत्यपिकार्यकारिणी ॥
विज्ञानमात्रादमलाद्वितीयतस्तस्मादविद्यानपुनर्भविष्यति १९

यात्मविषयकाद्विज्ञानमात्रादितरासहकृतान्निदिध्यासनपरिपाकजज्ञानाचसोनष्टातस्मात्सापुनर्नभाविष्यति रज्ज्वज्ञानमूलकस्य सर्पस्य रज्जुज्ञानेन निवृत्तस्ययथानपुनरुत्पात्तिरितिभावः ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्यायाइतरनिरपेक्षायाएवमोक्षकारणत्वमुक्तंयुक्तिपूर्वकंपुनःकथयतिश्रोतृदार्ढ्याय । यदीति । यदिनष्टातत्त्वज्ञाननाशिता सा न पुनः प्रसूयतेनोत्पद्यतेतदाकारणाभावादहंमतिःकथंभवेत् । कथमपिनभवेदित्यर्थः । तदभावाच्चतत्कालेकर्माभावइतिस्वफलजननेसास्वतन्त्राइ

यदिस्मनष्टा नपुनःप्रसूयते कर्ताऽहमस्येति मतिः कथं भवेत् ॥ तस्मात्स्वतन्त्रा न किमप्यपेक्षते विद्या विमोक्षाय विभाति केवला ॥ २० ॥

तरनिरपेक्षैवनकिमप्यपेक्षते द्वितीयस्यासंभवात् अतः केवलाऽसहायैवविमोक्षायविभातितत्फलिकाभवतीत्यर्थः ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रार्थेश्रुतिरपिप्रमाणमित्याह सेति साप्रसिद्धा नकर्मणानप्रजयाधनेनत्यागेनैकेअमृतत्वमानशुः इत्यादिकातैत्तिरीयश्रुतिःप्रशस्तानामर्थ वादैःप्राशस्त्येनबोधितानामपिकर्मणांन्यासंत्यागंसादरंस्फुटमाह नतुकर्मसमुच्चयमित्यर्थः तथावाजिनां वाजसनेयिनाम् एतावदरेखल्वमृत

सातैत्तिरीयश्रुतिराहसादरंन्यासंप्रशस्ताखिलकर्मणां स्फुटम् ॥
एतावदित्याहचवाजिनांश्रुतिर्ज्ञानंविमोक्षायनकर्मसाधनम् २१

त्वम् इत्यादिका ज्ञानंविमोक्षायसाधनं नकर्मेत्येतदाह ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहङ्कारत्यागरूपकारणवैषम्यात् क्रियाज्ञानयोर्वैषम्यमुक्त्वा फलप्रयुक्तमपिवैषम्यमाह विद्येति हेसमुच्चयवादिन् त्वयाक्रतुरग्निष्टोमादिर्वि द्यासमत्वेनदर्शितः परन्तुसमोदृष्टान्तोनोदाहृतः अनेनक्रतुर्विद्यासमः श्रुतिबोधितकर्तव्यताकत्वादित्यनुमानान्निरस्तम् दृष्टान्ताभावा-द् अन्वय्येवानुमानन्नव्यातिरेकीतिभाव; एतच्चाकरेविस्तरेणप्रपञ्चितम् ननुविद्याकर्मणीसमे एकफलत्वाच्चक्रदण्डादिवदित्यनुमान-

विद्या समत्वेनतु दर्शितस्त्वया क्रतुर्नदृष्टान्त उदाहृतः समः ॥
फलैःपृथक्त्वाद्बहुकारकैः क्रतुःसंसाध्यतेज्ञानमतोविपर्ययम् २२

मितिचेत्तत्राह फलैः पृथक्त्वात षष्ठ्यर्थेतृतीया फलानांभेदादित्यर्थः एवंचस्वरूपासिद्धोहेतुरितिभावः समानकारकत्वमपिहेतुर्नेत्याह क्रतुर्बहुभिः कारकैरहंममताभिमानरूपैरान्तरैर्बाह्यैश्चदेशकालादिनियमैश्चसाध्यते ज्ञानन्त्वतोविपर्ययवदतोनतयोः साम्यमितिभावः २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वकरणेप्रत्यवायभिया कर्मकार्यमितिचेन्नेत्याह सप्रत्यवायइति कर्मत्यागेनाहंनिश्चयेनाहंप्रत्यवायसहितोभविष्यामीत्येवंशुद्धात्मानि- अनात्मधर्मस्यधीरमज्ञस्यतत्त्वज्ञानविकलस्यप्रसिद्धा नतुतत्त्वदर्शिनः तस्याहंबुद्धेरभावात् पापादेरनात्मधर्मतानिश्चयाच्च तस्माद्बुधैःकर्म

स प्रत्यवायोह्यहमित्यनात्मधीरज्ञप्रसिद्धा नतु तत्वदर्शिनः ॥
तस्माद्बुधैस्त्याज्यमपि क्रियात्मभिर्विधानतःकर्मविधि प्रका
शितम् ॥ २३ ॥

क्रियात्यभिः षष्ठ्यर्थेतृतीया क्रियाफलसक्तचित्तानां विधानतोविधानेनेतिकर्तव्यतयायुक्तंकर्म विधिभिरवश्यकर्तव्यतयाबोधितमपि त्याज्यमित्यर्थः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाविरक्तस्यकार्यमाह। श्रद्धेति । गुरुशास्त्रयोर्विश्वासःश्रद्धातदन्वितोबुभुत्सुःशुद्धमानसोऽपि निष्कामकर्मानुष्ठानाच्छुद्धमानसश्चगुरोः प्रसादाल्लब्धतत्त्वमसीतिवाक्यतः श्रुतमात्मजीवयोरैकात्म्यंविज्ञाय मननिदिध्यासनपरिपाकाभ्यांसाक्षात्कृत्य। चएवार्थः । साक्षा

श्रद्धान्वितस्तत्त्वमसीतिवाक्यतो गुरोःप्रसादादपिशुद्धमानसः॥
विज्ञायचैकात्म्यमथात्मजीवयोः सुखी भवेन्मेरुरिवाप्रकम्पनः
॥ २४ ॥

त्कृत्यैवसुखी भवेत्। सकलदुःखहीनो भवेदित्यर्थः । अप्रकम्पनःविषयाभिलाषाक्षोभितान्तःकरणः ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महावाक्यार्थं विवरीतुं वाक्यार्थस्य पदार्थबोधपूर्वकत्वमाह । आदाविति । विधानतः भ्रमप्रमादराहित्येन वाक्यार्थविज्ञानस्य विधावुत्पत्तौ आदौ प्रथमं मुख्यमिति यावत् । पदार्थावगतिः कारणम् । हि प्रसिद्धं तस्य पदत्रयं तत्त्वम् असीति । तत्र तत्पदार्थः परमात्मा सर्वज्ञत्वादिगुणः त्वं

आदौ पदार्थावगतिर्हिकारणं वाक्यार्थविज्ञानविधौ विधानतः ॥
तत्त्वंपदार्थौ परमात्मजीवकावसीतिचैकात्म्यमथानयोर्भवेत्
॥ २५ ॥

पदार्थो जीवः अनयोस्तत्त्वंपदार्थयोरैकात्म्यं तद्बोधकमसीतिपदम् ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननु सर्वज्ञत्वादिगुणस्येशस्य किञ्चिज्ज्ञत्वधर्मवता जीवेनैकात्म्यं विरुद्धमित्याशङ्क्याह । प्रत्यगिति । अहंबुद्धिविषयत्वं प्रत्यक्त्वं जीवधर्मः परोक्षत्वमीशधर्मस्तदादिधर्मकृतमात्मनोः परमात्मजीवात्मनोर्विरोधं विहाय त्यक्त्वा तयोः संशोधितां युक्तिभिः सम्यग्विचारितां तत्त्वंपदाभ्यां शक्त्यभावेऽपि वक्ष्यमाणप्रकारया लक्षणया लक्षितां ज्ञातां चिदात्मतां संगृह्य तत्त्वंपदार्थपारस्थां निर्विषयां कृत्वा स्वमात्मानं तथा ज्ञात्वाऽथ एकात्मज्ञानानन्तरमद्वयो भवेत् । चित्स्वरूपतां प्राप्तइव भवेत् । पूर्वमपि तत्स्वरूप एव विस्मृतकण्ठचामीकरन्यायेन च तत्प्राप्तिः तद्वदित्युक्तम् ।

**प्रत्यक्परोक्षादिविरोधमात्मनोर्विहाय संगृह्य तयोश्चिदात्मताम् ॥
संशोधितां लक्षणया च लक्षितां ज्ञात्वा स्वमात्मानमथाद्वयो भवेत्
॥ २६ ॥**

अयं भावः तत्त्वंपदयोर्द्वावर्थौ वाच्यो लक्ष्यश्च तत्र तत्पदस्य मायोपाधिः सर्वज्ञत्वादिविशिष्टो वाच्यः त्वंपदस्यापि किञ्चिज्ज्ञत्वादिविशिष्टो मायाकार्याविद्योपाधिरविद्यावदन्तःकरणोपाधिर्वाच्यः उभयोरपि विशेषणांशत्यागेन शुद्धश्चिदात्मा लक्ष्यः तत्र वाच्ययोर्विरुद्धधर्मकत्वादैक्यासंभवेऽपि लक्ष्ययोरैक्यं निर्बाधमेवेति ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तलक्षणास्वरूपमाह । एकात्मकत्वादिति जहतीलक्षणाजहत्स्वार्थालक्षणायथागङ्गायांघोषइत्यत्रगङ्गापदार्थस्यप्रवाहस्यघोषाधारता
नुपपत्त्यामर्वथातत्परित्यागेनतीररूपार्थलक्षणा साप्रकृते न एकात्मत्वात् । विशेष्यांशस्यैकत्वात्सर्वथास्वार्थत्यागाभावात् । तथाज
हल्लक्षणताजहत्स्वार्थलक्षणात्वत्त्वमपिअत्रनसंभवति । यथाकाकेभ्योदधिरक्ष्यतामित्यादौकाकपदस्यस्वार्थात्यागेनैवदध्युपघातकेलक्षणा
सापिन । विरोधतःविशेषणत्यागेनसर्वथास्वार्थत्यागाभावात् । अतोभागलक्षणाजहदजहल्लक्षणायुज्यते । अदोषतःपूर्वोक्तदोषाभावात्

एकात्मकत्वाज्जहती न सम्भवेत्तथाऽजहल्लक्षणता विरोधतः॥
सोऽयंपदार्थाविवभागलक्षणायुज्येततत्त्वंपदयोरदोषतः॥२७॥

विशेष्यांशस्यात्यागाद्विशेषणांशस्यत्यागाच्च । तत्रदृष्टान्तः । सोऽयंपदार्थाविव । यथासोऽयंदेवदत्तइत्यत्रतद्देशादिविशिष्टोऽतीतानुभव
विषयोवातत्पदार्थः एतद्देशादिविशिष्टोऽनुभूयमानोवेदंशब्दार्थः । तयोश्चाविरुद्धविशेषणकत्वादैक्यासंभवेनदेशादिरूपविशेषणत्यागेना
नुभवगतानीतत्वादिविशेषणत्यागेनवालक्षणयैक्यंतद्वदितिभावः ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथत्याज्यत्वायजीवोपाधिमाह । रसादी ति । रसापृथ्वीआदिर्येषांतानिपञ्चीकृतानियानिभूतानितेभ्यः संभवोयस्यतत् । पञ्चीकरणंचेत्थम् एकैकंभूतंद्विधाविभज्यतत्रैकंभागंचतुर्धाविभज्यतेषांभागानांस्वेतरभूतचतुष्टयार्धभागचतुष्टयेसंयोजनेएकैकंभूतंपञ्चात्मकंभवतिभा

रसादिपञ्चीकृतभूतसंभवंभोगालयंदुःखसुखादिकर्मणाम् ॥ शरीरमाद्यन्तवदादिकर्मजंमायामयंस्थूलमुपाधिमात्मनः ॥ २८ ॥

गाधिक्याच्चप्रातिस्विकतयाभूगादिव्यवहारोऽपि । सुखदुःखयोरादीनियानिकर्माणितेषांभोगस्तत्कर्मजन्यसुखदुःखानुभवस्तस्यालयमाश्रयभूतमाद्यन्तवत् उत्पत्तिनाशयोगि आदिकर्मजंप्राग्भवीयकर्मजन्यंमायामयंपरम्परयामायाविकारः तद्विकारभूतविकारत्वात् । एतच्छरीरमात्मनःस्थूलमुपाधिंवदन्तीतिशेषः ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसूक्ष्मोपाधिमाह। सूक्ष्ममिति । बुधाःअन्यतस्थूलशरीरविलक्षणंशरीरंलिङ्गदेहाख्यमात्मनउपाधिंविदुः । तत्स्वरूपमाह। सूक्ष्मंचक्षु-
राद्यविषयः मनोबुद्धिदशेन्द्रियैःप्राणैश्चयुतम् सङ्कल्पात्मकंमनः निश्चयात्मिकाबुद्धिः घ्राणरसनाचक्षुस्त्वक्श्रोत्रेतिपञ्चज्ञानेन्द्रियाणि वा- स.

सूक्ष्मंमनोबुद्धिदशेन्द्रियैर्युतंप्राणैरपञ्चीकृतभूतसंभवम् ॥ भोक्तुः
सुखादेरनुसाधनंभवेच्छरीरमन्याद्विदुरात्मनोबुधाः ॥ २९ ॥

क्पाणिपादपायूपस्थानिकर्मेन्द्रियाणि प्राणापानव्यानोदानसमानाश्चप्राणास्तैर्युतमेतत्सप्तदशसमुदायात्मकम्। तदाधारभूतान्याह ।अप
ञ्चीकृतभूतसंभवंतेभ्यउत्पन्नमतएवादृश्यम्। तथाभोक्तुःसुखादेःसुखदुःखाद्यनुभवस्यानुसाधनम् स्थूलशरीरस्यैतदनुगतस्यैवभोगसाधनत्व
मितिभावः । एताद्रियोगेनैवमरणव्यवहारइतिबोध्यम् ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिजीवोपाधिद्वयमुक्त्वाईशोपाधिमाह । अनादीति । अनादि उत्पत्तिहीनम् । नानाविधपरिणामशालितयापरिणामरूपेणनश्वरामिति अनादित्वमात्रोक्त्यासूचितम् । अनिर्वाच्यम् सत्त्वासत्त्वाभ्यांनिर्वक्तुमशक्यम् कारणंसकलप्रपञ्चस्यजनकम् ईदृशीमायातुब्रह्मणःपरमी-

अनाद्यनिर्वाच्यमपीहकारणं मायाप्रधानंतुपरंशरीरकम् ॥ उपाधिभेदान्तुयतःपृथक्स्थितं स्वात्मानमात्मन्यवधारयेत्क्रमात् ॥ ३० ॥

श्वरव्यवहारसंपादकत्वादुत्कृष्टंप्रधानंशरीरकम् । स्वार्थेकः । एवमुपाधिभेदादेकमेवचैतन्यंयतः पृथक्स्थितंजीवईशइतिभेदबुद्धिविषय मतोलक्षणयोपाधिपरित्यागेनस्वात्मानमात्मनिअवधारयेदभेदेनजानीयात् । क्रमाच्छ्रवणमनननिदिध्यासनक्रमेणेत्यर्थः ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवाक्यार्थविचारफलमाह । कोशेष्विति । आनन्दमयस्य ब्रह्मत्वेअन्नमयप्राणमयमनोमयविज्ञानमयेषुचतुर्षुकोशेषुतत्तत्सङ्गात्तत्सदाकृतिर्विभाति यथाजपादिसङ्गात्स्फटिकोऽनेकाकृतिर्भाति । आनन्दमयस्यापि जीवत्ववादिनातुतेनसहपञ्चसु कोशेष्वितिबोध्यम् । अस्मि-

कोशेषुपञ्चस्वपितत्तदाकृतिर्विभातिसङ्गात्स्फटिकोपलोयथा ॥ असङ्गरूपोऽयमजोयतोऽद्वयोविज्ञायतेऽस्मिन्परितोविचारिते ॥ ३१ ॥

न्महावाक्येपरितोविचारितेसम्याग्विचारितेसत्ययमात्माऽसङ्गरूपःअन्नमयादिभिःसङ्गरहितः । असङ्गोनहिसज्जते । इतिश्रुतेः । अजोऽद्वयश्चविज्ञायते । स्थूलोऽहमित्यादिस्त्वज्ञस्यतत्तत्कोशभ्रमसङ्गात्प्रतीतिःस्फटिकवत् तत्त्वज्ञस्यतुनतथाप्रतीतिरितिभावः । एवंचतत्तदुपाधिकृततत्तद्रूपताप्रतीतिनिरासएव विचारफलमितिभावः ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जाग्रदाद्यवस्थाऽपि बुद्धेर्धर्मोनात्मधर्मइत्याह । बुद्धेरिति । इहआत्मनिस्वप्नादिभेदेन जाग्रत्स्वप्नसुषुप्तिभेदेन यात्रिधावृत्तिर्दृश्यतेसाऽपि गुणत्रयात्मनः सत्त्वरजस्तमोरूपगुणत्रयस्वरूपाया बुद्धेर्धर्मः । उक्तावस्थात्रयस्योक्तमूलकत्वात् । एतदवस्थात्रयस्यास्मिन्नवस्थात्रय-साक्षिणि आत्मनि भानं मृषा बुद्ध्यध्यास निबन्धनं न तु वास्तव मित्यर्थः । अन्योऽन्यतोव्यभिचारतस्तस्यावस्था त्रयस्यस्व रूपतो

बुद्धेस्त्रिधा वृत्तिरपीह दृश्यते स्वप्नादि भेदेन गुणत्रयात्मनः ॥ अन्योऽन्यतोऽस्मिन्व्यभिचारतोमृषा नित्ये परे ब्रह्मणि केवले शिवे ॥ ३२ ॥

मृषात्वात्तद्भानस्य मृषात्वमेव । स्वप्नकाले जाग्रत्सुषुप्त्योरभावात् । जाग्रतिइतरद्वयस्याभावात् सुषुप्तावितरयोरभावात्परस्परं व्यभिचारोबोध्यः आत्मनस्तदनाश्रयत्वंविशेषणैराह । नित्येउत्पत्तिनाशशून्येपरेगुणत्रयातीते ब्रह्मणिव्यापकेकेवलेऽसङ्गेशिवआनन्दरूपे एवंभूतेसदैकरसेपरस्परव्यभिचारधर्माभानमसंभवीति भावः ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसाऽन्यत्वायसंसारमूलभूतांवृत्तिमाह । देहेति । एषांसङ्घातइतरेतराध्यासविषयात् अजस्रंयावद्धियो बुद्धेर्वृत्तिस्तमोमूलतयाऽज्ञ
 लक्षणाऽज्ञत्वज्ञापिका यावत्परिवर्तते तावद्भवोद्भवःसंसारोद्भवोभवेत् । तमःपदंरजसोऽप्युपलक्षणम् । रजस्तमःप्रधानाबुद्धिः संसारहेतु

देहेन्द्रियप्राण मनश्चिदात्मनां सङ्घादजस्रं परिवर्तते धियः ॥
वृत्तिस्तमोमूलतयाऽज्ञलक्षणा यावद्भवेत्तावदसौ भवोद्भवः॥३३॥

त्वात्सर्वथात्याज्येति भावः ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत महावाक्यविचारस्य कर्तव्यमाह । नेतीति । अथात आदेशो नेति नेति इति प्रमाणेन निराकृतं मिथ्यात्वेन गृहीतमखिलं जगत् येन सः ततो हृदा सत्त्वप्रधानेन मनसा सम्यगास्वादितं चिल्लक्षणं घनामृतं दुःखासंभिन्नं सुखं येन सः । स्वर्गादि तु परिणामदुःखत्वात्तत्संभिन्नमेव । एवंभूतोऽशेषं जगद्देहेन्द्रियादिदृश्यसमूहं त्यजेत् हानोपादानबुद्धिविषयं न कुर्यात् । किन्तूदासीनस्तत्र भवेत् । ननु देहेन्द्रियादिभिरेव तज्ज्ञान

नेतिप्रमाणेन निराकृताखिलो हृदासमास्वादितचिद्घनामृतः ॥ त्यजेदशेषं जगदात्तसद्रसं पीत्वा यथाऽम्भः प्रजहाति तत्फलम् ॥ ३४ ॥

लाभात् कथमुपजीव्यस्य त्याग इत्याशङ्क्य दृष्टान्तदर्शनेन परिहरति । यथा तृषावान् आत्तः सद्रसो माधुर्यं येन तादृशं नारिकेलनारङ्गादि फलान्तवर्त्यम्भः पीत्वा तत्स्थानभूतं तत्फलं जहाति तत्रोदासीनो भवति तद्वत् सर्वदृश्यसारांशो ब्रह्म तल्लाभे सति निःसारं दृश्यं नोपादेयं नापि हेयमिति भावः । यतो भयादिसंभावनात द्धेयमपीत्युच्यते ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतरस्यानित्यत्वेनतत्रवैराग्यार्थमात्मनएवनित्यत्वमाह । कदाचिदिति । कदापीत्यर्थः । अनवः उत्पत्त्यनन्तरंविद्यमानोहिनवः । तेन जन्मानन्तरास्तित्वंव्यावर्तितं नवत्वाभावेनैवजीर्णत्वाभावादवस्थान्तरापत्तिरूप परिणामोऽपिनिरस्तः ।अनेनअस्तिजायतेवर्द्धतेविपरिणम तेऽपक्षीयते नश्यतीति षड्भाव विकार राहित्यमुक्तम् । एवंचैतद्भिन्नं सर्वमुक्तषड्भावविकारवत्त्वादनित्यमिति ततोविरज्येतेतिबोधित-

कदाचिदात्मा न मृतो न जायते न क्षीयते नापि विवर्धतेऽनवः ॥
निरस्तसर्वातिशयः सुखात्मकः स्वयम्प्रभः सर्वगतोऽयमद्वयः ३५

म् । यतऽईदृशोऽतएवनिरस्तः सर्वस्यदेहेन्द्रियादेरतिशयोमहत्त्वं येनस्वलाभात्सः यल्लाभान्नापरोलाभइतिःश्रुतेः यतःसुखात्मकः आनन्द स्वरूपः स्वयम्प्रभःस्वप्रकाशकश्च देहेन्द्रियादिस्तु दुःखस्वरूपः परप्रकाश्यश्च । यस्यभासासर्वमिदंविभाति । इतिश्रुतेः । सर्वगतोव्यापकः अयमहंबुद्धिविषयःप्रत्यगात्माऽपिअद्वयः उक्ताद्वयब्रह्मस्वरूपएव । नततोऽतिरिक्तइतिभावः । अयमात्माब्रह्म । इतिश्रुतेः ॥ ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुएवंविधेविकारशून्येआत्मनिजन्ममरणादिप्रवाहरूपसंसारभानंकथमितिशङ्कते। एवंविधेइति।दुःखमयःदुःखप्रचुरः।उत्तरयति। अज्ञानतइ
तिअज्ञानमूलकोयोध्यासोदेहान्तः करणादौ अहममेत्यध्यासस्तद्वशात्। एवंचभ्रान्तिरूपातत्प्रतीतिरितिभावः। नन्वेवंकथंतस्यसंसारस्यनि

एवंविधे ज्ञानमये सुखात्मके कथंभवो दुःखमयःप्रतीयते ॥
अज्ञानतोऽध्यासवशात्प्रकाशतेज्ञानेविलीयेत विरोधलःक्षणात्॥
॥ ३६ ॥

वृत्तिस्तत्राह। ज्ञानेति। आविर्भूतइतिशेषः। ज्ञानस्याज्ञानविरोधित्वात्तदुत्पत्तिक्षणएवकारणभूताज्ञाननाशात्तत्कार्यसंसारस्यापि वि
लयइत्यर्थः। यथारज्जुज्ञानेनरज्जौसर्पस्यलयइत्यर्थः ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाध्यासलक्षणमाह । यदन्यदिति । यदन्यत्सर्पादिकमन्यत्ररज्ज्वादौभ्रमात्भ्रमजनकाद्दोषाद्विभाव्यतेविज्ञायतेअमुंविपश्चितोविद्वां-
सोऽध्यासइत्याहुः । यथाऽसर्पभूतेरज्ज्वादौ अहिविभावनंसर्पारोपोरज्ज्वबुद्धिमूलकस्तद्वदीश्वरेऽपिजगद्देहादिसंसारात्मकंसर्वंविभाव्य-

यदन्यदन्यत्र विभाव्यते भ्रमादध्यासमित्याहुरमुंविपश्चितः॥
असर्पभूतेऽहिविभावनंयथा रज्ज्वादिकेतद्वदपीश्वरेजगत्॥३७॥

तेआत्मज्ञानाभावाद्यथार्थतयाज्ञायते ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनिव्रगह्वानेकीदृशोऽध्यामोनिमित्तंतदाह विकल्पेति सर्वविकल्पकारणमायारहितेवस्तुतस्तत्सङ्गरहितेचिदात्मकेचित्स्वरूपेसर्वकारणेनिरामयेदुःखासंभिन्नानन्दमयेकेवलंसर्वविकारशून्यपरेदृश्याविलक्षणेब्रह्मणिव्यापकं आत्मनिप्रथममहङ्कारः कल्पितः सएवाध्यासः ।

विकल्पमायारहितेचिदात्मके ऽहङ्कारएष प्रथमः प्रकल्पितः ॥
अध्यासएवात्मनिसर्वकारणे निरामयेब्रह्मणि केवलेपरे ॥ ३८॥

अहंबुद्ध्यात्मकोऽध्यासएवसर्वसंसारकारणमितिभावः ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

बुद्धिनिष्ठएवसंसारोनत्वात्मनिष्ठइत्यत्रान्वयव्यतिरेकौप्रमाणयति। इच्छादीति। परेसर्वसाक्षिणिआत्मनिसंसृतिहेतवःभासमानसंसारकारणं
सदाकालत्रयेऽपिइच्छादिरागादिसुखादिधार्मिकाः इच्छापक्षेरागद्वेषौसुखदुःखंइत्येवमादिद्वन्द्वधार्मिकाःधियएवधीषुसतीषुसंसारइत्यन्वयमु

इच्छादिरागादिसुखादिधार्मिकाः सदा धियः संसृतिहेतवः परे ॥
यस्मात्प्रसुप्तौतदभावतःपरः सुखस्वरूपेणविभाव्यतेहिनः ॥३९॥

क्त्वातद्व्यतिरेकमाहयस्मात्कारणात्प्रसुप्तौतदभावात्धीवृत्त्यभावात परआत्मानोऽस्माभिःतृतीयार्थेषुषष्ठी। सुखरूपेणस्वस्वरूपमात्रेणाविभा
व्यतेनिश्चीयते नतु संसारित्वेनेतिभावः सुप्तोत्थितस्तुसुखमहमस्वाप्समितिप्रत्यभिज्ञानुभवात्तदात्मस्वरूपनिश्चयोऽस्तीतितात्पर्यम् ॥ ३९

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथपुनस्तत्त्वं पदार्थस्वरूपमाह । अनादीति । अनादिर्याऽविद्यातत उद्भवो यस्या बुद्धेरन्तःकरणस्यतत्रविम्बितःप्रतिबिम्बिताश्चितःप्रकाशः सजीवइतीर्यते आत्मापरात्माधियः साक्षितया धीधर्मासङ्गेनैवपृथक्स्थितः । अन्तर्यामितयेत्यर्थः जीवोऽहंसुखीत्यादिप्रकारेणान्तःकर

अनाद्यविद्योद्भवबुद्धिबिम्बितोजीवप्रकाशोऽयमितीर्यते चितः ॥
आत्माधियः साक्षितया पृथक् स्थितो बुद्ध्या परिच्छिन्नपरः
सएव हि ॥ ४० ॥

णधर्माध्यासवान्परमात्मातु साक्षितयासर्वत्रविद्यमानोऽपिनतथेतिभावः । अतएवबुद्ध्यापरिच्छिन्नपरः बुद्धिलक्षणपरिच्छेदरहितःअतएव परः । एवंचज्ञानेनप्रतिबिम्बाधार विलयप्रतिबिम्बस्यविलयात्सजीवः सएवपरमात्मैवहिप्रसिद्धं सइत्यस्यचान्त्राप्तबोध्या ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ बुद्ध्यात्मनोःपरस्पराध्यासवशात् परस्परधर्मभानमितिदार्ढ्यायपुनराह । चिद्बिम्बेति । चिदात्मचेतसोरन्योन्याध्यासवशात् परस्परतादात्म्यारोपाज्जडाजडत्वंप्रतीयते । चेतसोवृत्तीनांज्ञानत्वं जीवात्मनोजडत्वंप्रतीयते । अतएवज्ञानाश्रयआत्मेति चितएवतार्किकव्यवहारः । जीवात्मनिजडात्मानिजडात्माकथ्यते बुधैरितिस्मार्तव्यवहारश्च । अत्रहेतुः । चिदित्यादि । चिद्बिम्बस्यसाचिदाभासः अ

चिद्बिम्बसाक्ष्यात्मधियांप्रसङ्गतस्त्वेकत्रवासादनलाक्तलोहवत्॥
अन्योऽन्यमध्यासवशात्प्रतीयते जडाजडत्वंचचिदात्मचेतसोः
॥ ४१ ॥

क्षेःसहितः साक्षःसेन्द्रियः सचासावात्मामनःधीरन्तःकरणंतेषांप्रकृष्टसङ्गादतिसान्निकर्षादध्यासइत्यर्थः । अनलाक्तलोहवत् अग्नितप्तलोहपिण्डवत् अत्रदृष्टान्तः । अग्निधर्मोदाहकत्वं लोहधर्मश्चवर्तुलत्वाद्यनलेभासते । तत्रहेतुरेकत्रवासात् परस्पराविभागेनवृत्तेरित्यर्थः । तद्वदेतयोरपि परस्परधर्माध्यासइत्यर्थः ॥ ४१ ॥ ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं दार्ढ्यायपुनराह । गुरोरिति । वेदवाक्यतइत्यनेन श्रवणंगुरोःसकाशादपि । ततश्चानेनमननमुक्तम् । ताभ्यांसञ्जातोविद्यया ज्ञानरूपस्यात्मनोऽनुभवोयस्यसः । अनेनकृतनिदिध्यासनइत्यर्थः । तं चिदानन्दस्वरूपं स्वात्मानमुपाधिवर्जितं रहितोपाधिधर्ममात्मस्थं

गुरोःसकाशादपिवेदवाक्यतः सञ्जातविद्यानुभवोनिरीक्ष्य तम् । स्वात्मानमात्मस्थमुपाधिवर्जितं त्यजेदशेषं जडमात्मगोचरम् ॥ ४२ ॥

हृत्स्थंनिरीक्ष्य अपरोक्षीकृत्याशेषंजडं दृश्यंत्यजेत् । तत्रोदासीनोभवेदिति भावः ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

ज्ञेयंनिरुपाधिकं स्वरूपंश्लोकद्वयेनाह प्रकाशेति अहंप्रकाशरूपः स्वप्रकाशः परप्रकाशहीनः परप्रकाशरूपोयथाघटादिः अजोजन्मादि हीनः अद्वयःसजातीयद्वितीयरहितः असकृद्विभातः सकृदपिपरेणभासकान्तरेणप्रकाशितः सकृद्विभातः नसकृद्विभातोसकृद्विभातः नत

प्रकाशरूपोऽहमजोऽहमद्वयोऽसकृद्विभातोऽहमतीवनिर्मलः ॥
विशुद्धविज्ञानघनोनिरामयःसम्पूर्णआनन्दमयोऽहमक्रियः॥४३॥

त्रसूर्योभातिनचन्द्रतारकमितिश्रुतेः नतद्भासयतेसूर्यइतिस्मृतेश्च अतीवनिर्मलः मायाकृतावरणविक्षेपरहितः विशुद्धविज्ञानघनः विशुद्धचिदेकरसः निरामयःकर्तृत्वाभिमानरहितः सम्पूर्णःदेशकालपरिच्छेदहीनः आनन्दमयः आनन्दरूपः स्वार्थेमयट् अक्रियः परिणामहीनः ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदैवेति अंहसदैवकालत्रयेऽपिमुक्तःसर्वधर्मरहितः अचिन्त्यशक्तिमान यः परमात्मा अतिन्द्रियज्ञानमृइन्द्रियातिरिक्तज्ञानरूपःयतोवाचो निवर्त्तन्ते अप्राप्यमनसासहइतिश्रुतः अविक्रियात्मकोऽपरिणामी अनन्तपारःअन्तःकालतःपारःपरन्तीरन्तावविद्यमानौ यस्य तेनदेश

सदैवमुक्तोऽहमचिन्त्यशक्तिमानतीन्द्रियज्ञानमविक्रियात्मकः॥
अनन्तपारोऽहमहर्निशंबुधैर्विभावितोऽहंहृदिवेदवादिभिः ॥४४॥

कालपरिच्छेदहीनः ईदृशोयःपरमात्माबुधैर्हृदि अहर्निशंविभावितः सोऽहमित्यर्थः ॥ ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंभावनायाःफलमाह एवमिति उक्तरीत्यासदाआत्मानं अखण्डितात्मनाविषयानाकृष्टचित्तेन विचारमाणस्यध्यायतः धातूनामनेकार्थ त्वात् चरमाणएवचारमाणःस्वार्थेऽण् विशुद्धभावनाब्रह्माकारान्तःकरणवृत्तिरुदेतीतिशेषः साचोदिताकारकैर्देहान्तरमापकैःकर्मभिः स

एवंसदात्मानमखण्डितात्मनाविचारमाणस्यविशुद्धभावना ॥
हन्यादविद्यामचिरेणकारकैरसायनंयद्वदुपासितंरुजः ॥ ४५ ॥

हाविद्यामचिरेणशीघ्रमेवहन्यात् यथापामितंसेवितंरसायनं रुजोहन्यात्तद्वत् ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रध्यानेऽइतिकर्तव्यतामाह विविक्तऽइति निर्जनइत्यर्थः आसीनोयथोचितपद्मासनाद्युपविष्टः उपारतेन्द्रियः तेनशमदमादिसम्पन्नः विनि र्जितात्माप्राणायामादिभिर्जितान्तःकरणः अतएवविमलान्तराशयोविशुद्धचित्तः विज्ञानदृग्विज्ञानएवदृग्भानंयस्यसः द्रष्टृदृश्यभा

विविक्तआसीनउपारतेन्द्रियोविनिर्जितात्माविमलान्तराशयः॥
विभावयेदेकमनन्यसाधनोविज्ञानदृक्केवलआत्मसंस्थितः॥४६

नरहितः अनेननिर्विकल्पकसमाधिरुक्तः अनन्यसाधनः तत्त्वज्ञानातिरिक्तमुक्तिसाधनास्तित्वभ्रमरहितः केवलोऽसङ्गःआत्मसंस्थितः आत्मन्येवसंस्थासमाप्तिः सञ्जातायस्यसतेन नकदापिविषयान्तरसञ्चारवच्चित्तः विभावयेत् ध्यायेत् ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंच यदेतत्भूतंभविष्यद्वर्तमानं विश्वंपरमात्मादर्शनंभासकोयस्यतत् तस्यभासासर्वमिदंविभातीति श्रुतेः तत्सर्वकारणेमायासान्निधाना
त्सर्वोपादानत्वेनाभिमतेआत्मनिविलापयेत् उपादानसत्ताव्यतिरेकेणकार्यसत्तांनपश्येत् तादृशस्यलक्षणमाह सम्पूर्णः अवाप्तसमस्तका

विश्वंयदेतत्परमात्मदर्शनं विलापयेदात्मनि सर्वकारणे ॥
पूर्णश्चिदानन्दमयोऽवतिष्ठते न वेद बाह्यं न च किञ्चिदान्त
रम् ॥ ४७ ॥

मः तस्यकाम्याभावात् चिदानन्दमयः तद्रूपोऽवतिष्ठते बाह्यमान्तरंच दृश्यंनजानाति सर्वत्रब्रह्मदर्शनादिति भावः ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाधिसिद्धेः पूर्वंयत्कर्तव्यंतदाह । पूर्वमिति । समाधेः सकलविषयव्यासङ्गनिवृत्तिपूर्वकं ब्रह्माकारवृत्तिः समाधिस्ततः पूर्वमखिलंस चराचरंजगत् ओङ्कारमात्रं विचिन्तयेत् । ओङ्कारोमीयतेऽनयेतिमात्रा प्रमाणं बोधकत्वेन परिच्छेदकायस्यतथाजानीयात् । तदेवविवृ

पूर्वं समाधे रखिलं विचिन्तये दोङ्कारमात्रं सचराचरं जगत् ॥
तदेव वाच्यं प्रणवो हि वाचको विभाव्यते ज्ञानवशान्न बो-
धतः ॥ ४८ ॥

णोति तदेवेति । जगदेवेत्यर्थः । प्रणवोवाचकोविभाव्यतेएतत्वाहिप्रसिद्ध इत्यर्थः । इयंभावनाज्ञानवशादेवनबोधकः । बोधोनिर्विशेषब्रह्मसा क्षात्कारस्तदुत्तरंनेत्यर्थः । तस्यसर्ववृत्त्युपमर्दकत्वात् ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमर्थं विवृणोति । अकारेति । अकारसञ्ज्ञस्तद्वाच्यः पुरुषो हि विश्वको विश्व एव विश्वकः विश्वशब्देन परिभाषितः अयं जाग्रत्साक्षी विराट्
ततः स्वप्नसाक्षी तैजसः तेन पदेन परिभाषितः लिङ्गदेहाभिमानी हिरण्यगर्भ उकारकः उकारप्रतिपाद्य ईर्यते । ततः सुषुप्तिसाक्षी प्राज्ञपदवाच्यो

अकारसञ्ज्ञः पुरुषो हि विश्वको ह्युकारकस्तैजस ईर्यते क्रमात्
प्राज्ञो मकारः परिपठ्यतेऽखिलैः समाधिपूर्वं न तु तत्त्वतो
भवेत् ॥ ४९ ॥

मायोपाधिको मकारस्तद्वाच्यः परिपठ्यतेऽखिलैर्वेदैः । इयं भावना समाधिपूर्वं समाधेः पूर्वमेव न तत्त्वतः तत्त्वसाक्षात्कारे सति न भवेत् । सर्वं
स्य ब्रह्मणि प्रविलयात् ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाविलापन प्रकारमाहद्वाभ्याम् । विश्वंत्विति । उकारमध्ये बहुधाव्यवस्थितं स्थूलदेहनिबंधनंस्थूलदेहाभिमानेन स्थितं विश्वम्पुरुषंत-द्वाचकम्मकारम् च विलापयेत् । तुश्चार्थे । विलीनम्भावयेत् ततस्तैजसंलिङ्गदेहाभिमानिनम् पुरुषं तद्वाचकंप्रणवाद्वितीय वर्णमुकारं वि-

विश्वं त्वकारं पुरुषं विलापयेदुकारमध्येबहुधा व्यवस्थितम् ।
ततो मकारे प्रविलाप्यतैजसंद्वितीयवर्णं प्रणवस्य चान्तिमे ॥५०॥

लीनविश्वकम्मकारे विलाप्याविलीनम्भावयित्वा ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तनस्तादृशंमकारंतद्वाच्यंप्राज्ञंचकारणंकारणत्वाभिमानिनंपुरुषमिहात्मनि चिद्घनेपरे विलापयेत् तथाभावयेत् । ततः सोऽहंमर्वोपाधिला
पाधिष्ठानंपरब्रह्मविभावयेत् । तद्विशिनष्टि । सदाविमुक्तिमत् नित्यमुक्तम् । नन्वहंपदार्थस्यरागद्वेषादिमलिनस्यकथं ब्रह्मत्वभावनेसा

मकारमप्यात्मनि चिद्घने परे विलापयेत्प्राज्ञमपीह कारणम् ।
सोऽहं परं ब्रह्म सदा विमुक्तिमद्विज्ञानदृङ्मुक्त उपाधितोऽमलः ॥ ५१ ॥

शङ्क्याहंपदार्थंविशिनष्टि । उपाधितोमुक्तः अतएवामलःतथाभावनेसाधनं विज्ञानदृक्विज्ञानं ब्रह्ममात्रप्रत्ययाविच्छेदरूपादृक् निदिध्यासनं सत्साक्षात्कारेसाधनंयस्यसः ॥ ५१ ॥

CC-0. In Public Domain. Digitization by eGangotri

एवंभावनावतोलक्षणमाह । एवमिति । उक्तप्रकारेण सदा जातापरमात्मन्येकभावना यस्य सः परिविस्मृतमखिलंपुत्रदेहादि येन सः । अत एवस्वस्वरूपानन्देनैवतुष्टः नतुविषयानन्देन । तस्यपरिणामेदुःखरूपत्वात्ततो विरक्तइत्यर्थः । साक्षान्नित्यात्मानिसुखप्रकाशकः साक्षा

एवं सदा जातपरात्मभावनः स्वानन्दतुष्टः परिविस्मृताखिलः ॥
आस्ते स नित्यात्मसुखप्रकाशकः साक्षाद्विमुक्तोऽचलवारिसि
न्धुवत् ॥ ८२ ॥

दौपाधिकनामरूपभेदरहितत्वेननित्यमखण्डितमात्मस्वरूपंयत्सुखंप्रकाशश्चतद्रूपः एवंरूपो विमुक्तोजीवन्मुक्तः । अचलंनिश्चलंवारियस्यताहशसिन्धुवदास्ते । विषयसम्बन्धरूपलहरीरहितआस्तइत्यर्थः ॥ ८२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशस्यमत्प्राप्तिर्भवत्येवेत्याह । एवमिति । उक्तप्रकारेणसदाऽभ्यस्तसमाधेर्योगिनः निवृत्ताःसर्वेषामिन्द्रियाणांगोचराविषयाःशब्दादयो यस्य विनिर्जिताअशेषारिपवःकामादयोयेनतस्य । तज्जयेनविषयेष्वन्तःकरणाप्रवृत्तिः । अतएव सर्वज्ञत्वनित्यत्वनित्यतृप्तत्वबोध

एवं सदाऽभ्यस्तसमाधियोगिनो निवृत्तसर्वेन्द्रियगोचरस्य हि ॥ विनिर्जिताशेषरिपोरहंसदा दृश्यो भवेयं जितषड्गुणात्मनः ॥५३ ॥

रूपत्वस्वतन्त्रत्वनित्यमलुप्तत्वानन्तरूपाषड्गुणायस्यताटृशआत्माजितो वशीकृतोयेनतस्य सदादृश्योभवेयम् । एतेनमद्भक्तस्ययोगिनो ऽहंदृश्योनतुभक्तिविमुखस्येति सूचितम् ॥ ८१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंविधोजीवन्मुक्तःप्रारब्धवशेन अनभिमानोभोगानश्नँस्तिष्ठेत् ततोमय्येवाविलीयते मद्रूपोभवतीत्याह । ध्यात्वैवमिति ॥ ५४ ।

ध्यात्वैवमात्मानमहर्निशं मुनिस्तिष्ठेत्सदा मुक्तसमस्तबन्धनः ॥
प्रारब्धमश्नन्नभिमानवर्जितो मय्येवसाक्षात्प्रविलीयते ततः ५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सर्वधर्मापेक्षयाऽयमेवधर्मोज्यायानित्याह । आदौ चेति । भवंसंसारमादिमध्यान्तमानेषु सर्वथाभयशोकयोः कारणं विदित्वा तत्कारणीभूतं विधिवादयजं तत्त्यागादिभिश्चोदितं बोधितं समस्तं कर्ममार्गं काम्यं हित्वा अखिलात्मनां जीवानां स्वरूपभूतं मामात्मानं परमेश्वरं भजेत् । य

आदौ च मध्ये च तथैव चान्ततो भवं विदित्वा भयशोक कारणम् ॥ हित्वा समस्तं विधिवादचोदितं भजेत्स्वमात्मान मथाखिलात्मनाम् ॥ ५५ ॥

थाधनस्यार्जनेनादौ दुःखं मध्ये पालनकृतं तत्र राजादिकृतं भयमन्ते नाशे शोकपर्यवसायि दुःखमेवं पदार्थमात्रे द्रष्टव्यम् ॥ ५५ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मय्यभेदभावनया नामरूपाविभागेन तद्रूप एवभवतीत्यमुमर्थं सदृष्टान्तमाह । आत्मनीति । आत्मनिसर्वाधिष्ठानेमयिइदंस्वस्वरूपं जीवमभेदेनविभावयन्यदा । तिष्ठतीतिशेषः । तदामयात्मनापरमेश्वरेणाऽभेदेनभवति अभिन्नोभवति । तत्रदृष्टान्तः यथासमुद्रेप्रविष्टं नद्यादि

आत्मन्यभेदेन विभावयन्निदं भवत्यभेदेन मयाऽत्मनातदा ॥ यथाजलं वारिनिधौ यथापयः क्षीरेवियद्व्योम्न्यऽनिले यथाऽनिलः ॥ ५६ ॥

जलंसमुद्रएव यथाक्षीरेगवादिक्षीरेप्रक्षिप्तंपयःक्षीरमेव यथाव्योम्निमहाकाशेघटाद्यवच्छिन्नाकाशोघटादिभङ्गे च यथाचर्मभस्त्रिकाद्यवच्छिन्नोवायुरनिलेमहावायौ नामरूपाविभागेनैकीभवतीत्यर्थः ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमात्मतत्त्वज्ञस्य जगत्सत्यत्वभ्रमःस्वतएवापैतीत्याह । इत्थमिति । हिरण्यर्थे । लोकसंस्थितोऽपिजीवन्मुक्तिदशायांप्रारब्धवशाल्लोक
व्यवहारंकुर्वन्नपिजगन्मृषैवेतिविभावयन्सन् यदियदा इत्थमीक्षते ऐकात्म्यं जानीयात्तदा निवृत्तजगत्सत्यत्वभ्रमो भवतीति शेषः। तत्र
हेतुः श्रुतियुक्तिमानतोनिराकृतत्वात् । अतोऽन्यदार्तमित्यादिश्रुतिरूपात् जगन्मिथ्यादृश्यत्वात् शुक्तिरजतवदितितदुपबृंहितानुमानरू

इत्थं यदीक्षेत हि लोकसंस्थितो जगन्मृषैवेतिविभावयन्मुनिः ॥
निराकृतत्वाच्छ्रुतियुक्तिमानतो यथेन्दुभेदो दिशि दिग्भ्रमादयः ॥ ५७ ॥

पात्मानतःप्रमाणतोनिराकृतत्वात् तत्रदृष्टान्तोयथेन्दुभेदः एकचन्द्रेद्विचन्द्रत्वभ्रमस्तदेकत्वज्ञानेननिवर्तते यथाच दिशिप्राच्यादौअ
न्यदिक्त्वभ्रमः सोऽपितत्त्वज्ञानान्निवर्तते । एवंभ्रमतःपुरुषस्य दिक्षुभ्रमणाद्भ्रमोनिकटवर्तिवृक्षादौच भ्रमणभ्रमस्तत्स्थैर्यज्ञानेन निवर्तते
तद्वत् ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ईदृशज्ञानेमदाराधनमेवोपायइत्याह । यावदिति । अखिलं जगन्मदात्मकंमदधिष्ठानकंमाद्विवर्तभूतंयावन्नपश्येत्तावन्मत्प्राप्तयेश्रद्धालुः भगवदाराधनमेवज्ञानप्रापकमित्यत्र दृढविश्वासवान् अतिशयेनोर्जिताद्वृद्धिमतीभक्तिर्मयिभगवतिपूज्यताबुद्धिरूपालक्षणं चिह्नंयस्यसः ।

यावन्नपश्येदखिलं मदात्मकं तावन्मदाराधनतत्परो भवेत् ॥
श्रद्धालुरत्यूर्जित भक्तिलक्षणो यस्तस्य दृश्यो ऽहमहर्निशं हृदि ॥ ५८ ॥

तावन्मदाराधननिष्ठोभवेत् एवंहितस्यहृदि अहमहर्निशंदृश्योभवा मियेयथामांप्रपद्यन्ते तांस्तथैवभजाम्यहमितिस्मृतेः ॥ ५८ ॥

CC-0. In Public Domain. Digitization by eGangotri

स्वोक्तवचनजातस्य श्रुतिसमत्वं कथमेतदालोचनमपिमदाराधनप्रतिबन्धकदुरितध्वंसोपायइत्याह रहस्यमिति । श्रुतिसारसङ्ग्रहत्वेनाति

रहस्यमेतच्छ्रुतिसारसङ्ग्रहं मया विनिश्चित्य तवोदितं प्रिय ॥
यस्त्वेतदालोचयतीहबुद्धिमान् स मुच्यते पातकराशिभिः
क्षणात् ॥ ५९ ॥

गोपनीयता अप्रमाणशङ्काकलङ्कराहित्यंसूचितम् । आलोचयतिसम्यग्विचारयति ॥ ५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथ भगवानुक्तमेवार्थसंक्षेपेण दार्ढ्यायपुनराह भ्रातरिति । यदीतियादित्यर्थे । यदीदंजगत् परिदृश्यते तत्सर्वमायैवेतिज्ञात्वेति शेषः चेतसासर्वपरिहृत्यतत्रौदासीन्यंकृत्वामद्भावनयामदैक्यभावनया भावितंशुद्धंमानसंयस्यतादृशस्तिष्ठ । इत्युपदिश्याशिषंप्राह निरामयः

भ्रातर्यदीदं परिदृश्यते जगन्मायैव सर्वं परिहृत्य चेतसा॥मद्भा वनाभावितशुद्धमानसः सुखी भवाऽऽनन्दमयो निरामयः६०

सन्सुखीभव। सर्वदुःखनिवृत्त्येतिभावः। ततोऽन्तरङ्गामन्यामाशिषमाह आनन्दमयोभवेति तद्रूपोभवेत्यर्थः । यद्यपिपूर्वमानन्दरूपत्वमस्त्येवतथाऽपितत्प्राप्तिर्विस्मृतकंठस्थभूषणप्राप्तिवत ॥ ६० ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंरीत्यास्वोपासकस्यलोकपावनत्वमाह। यइति । कदावा यदाकदाचिदित्यर्थः । हृदानिर्मलेनान्तःकरणेन यो मामगुणं प्राकृतसत्त्व
रजस्तमोरूपगुणरहितम् । सच्चिदानन्दरूपत्वात् । अतएवगुणाद्व्याकृतात्परंमायातीतम् । यदिवायद्वत्स्वर्थे । गुणात्मकं सर्वज्ञत्वा-
॥ ३१ ॥ दिलोकोत्तरलावण्यादिगुणवानात्मामूर्तिर्यस्यतं दृश्यमानं रूपं सेवते । सद्विविधोऽप्युपासकः अहं मत्स्वरूपएव । मामकइत्यर्थोवा । प्रि-

यः सेवते मामगुणं गुणात्परंहृदा कदा वा यदि वा गुणात्मकम् ॥ सोऽहंस्वपादाञ्चितरेणुभिः स्पृशन्पुनाति लोकत्रितयं यथा रविः ॥ ६१ ॥

योऽहिज्ञानिनोऽत्यर्थमहंमचममप्रिय इत्युक्तेः । तादृशोभक्तःस्वपादकमरेणुभिःसंस्पृशन्लोकत्रयमपि पुनाति । अज्ञानध्वान्तनिरसने ॥ ३१ ॥
नपवित्रीकरोति । यथारविःस्वकरैर्जगद्वितिमिरीकरोति तद्वत् ॥ ६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानीमेतद्ग्रन्थार्थालोचनासमर्थंस्यपाठमात्रतोऽपिमहत्फलमाह । विज्ञानंविज्ञानजनकं करणव्युत्पत्त्येतिबोध्यम् । वेदान्तैरुपनिषद्वाक्यै
वैंद्यंचरणंजगज्जन्मादिलक्षणंकर्मयस्यतेन ननुपाठमात्रादेतादृशमहत्फलप्राप्तिःकथमित्याशङ्क्यभवत्येवेति सूचयंस्तत्रहेतुमाह । मद्वचने

विज्ञानमेतदखिलंश्रुतिसारमेकं वेदान्तवेद्यचरणेनमयैवगीतम् ।
यः श्रद्धया परिपठेद्गुरुभक्तियुक्तो मद्रूपमेति यदि मद्वचनेषुभक्तिः
॥ ६२ ॥ इतिश्री अध्यात्मरामायणे रामगीता समाप्ता ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसम्वादे उत्तरकाण्डे श्रीरामगीतायां पञ्चमःसर्गः ॥ ५ ॥

षुभक्तिर्विश्वासोयदीतिअर्थाद्गुरुवाक्यविश्वासस्यैव फलदायकत्वादितिभावः ॥६२॥ इत्यध्यात्मरामायणेउमामहेश्वरसम्वादे उत्तरकाण्डे
सेतौपञ्चमःसर्गः ॥ ६२ ॥ श्रीरामचन्द्रार्पणमस्तु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीराममन्त्रःखलु तारकाख्यः संसारसन्तारणसुप्रसिद्धः ॥ भक्-
त्याऽप्यभक्त्या समुपासितोयः श्रेयांसि सर्वाणि ददात्यवश्य
म् ॥ १ ॥ तन्तारकंसम्प्रतिपादयन्ती श्रीरामगीता सकलैः सुसे
व्या ॥ विज्ञप्तिमित्थंजनको विनीतः समर्पयत्यार्यजनेषुहर्षात् २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प,	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति
स्पर्द्धि	स्पर्द्धि	१	२	१	शाधि	शाधि	३	२	६	नाशे	नाशो	६	१	१
जीव्य	जीव्य	१	२	३	व्यत्र	व्यव	४	१	१	नन्वितिश	नन्वितिशे	६	२	१
सम्बीन्धनीः	सम्बन्धिनीः	२	२	१	ष्ठामे	ष्ठानमे	४	२	३	विदा	विदा	६	२	२
व्रह्म	व्रह्म	२	१	२	व्रह्म	व्रह्म	४	२	१	मेवे	मेव	६	२	२
व्रह्म	व्रह्म	२	१	६	वलेन	वलेन	४	२	७	व्येतीत	व्यतेति	७	१	१
वोधोऽसि	वोधोऽसि	३	१	४	निघृत्ते	निवृत्ते	५	१	१	वीरहा	वीरहा	७	१	१
संवन्ध	सम्बन्ध	३	१	७	कत्व	कत्वा	५	१	१	सद्दष्ट	सद्दृष्ट	८	१	३
भवस्यंससार	भवस्यसंसार	३	२	१	नक	नैक	५	१	१	विशुद्धं	विशुद्ध	८	२	१
न्सार	सार	३	२	२	बेदान्त	वेदान्त	५	१	१	कारांतः	कारान्तः	८	२	२
पर्वग	पवर्ग	३	२	२	पूर्व	पूर्व	५	१	२	वृत्ति	वृत्ति	९	१	१
वारिधि	वारिधि	३	२	२	वुद्ध्या	बुद्ध्या	५	१	६	स्ववाना	स्वना	९	२	१
					एवं	एव	५	१	६	बृत्यु	वृत्यु	१०	१	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
रीप	रपि	११	२	१
नर्दष्टा	र्नदष्टा	१२	१	४
वर्द्धै	वर्द्धे	१२	१	७
त्याभिः	त्माभिः	१२	२	६
शुद्द	शुद्ध	१३	१	१
जीवया	जीवयो	१३	१	२
निर्वाध	निर्बाध	१४	१	१०
गव	भव	१९	१	४
अर्जोद्व	अर्जोऽद्व	१६	२	६
द्व त्	द्वात्	१७	२	१

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
ल्लाभ	ल्लाभे	१८	१	८
इतिः	इति	१८	२	२
ज्ञानन	ज्ञानेन	१९	१	१
वुद्दया	वुद्धया	२०	१	९
रागादि	रागादे	२१	१	३
त्रिलय	विलय	२१	१	७
धम	धर्म	२१	२	१
म्त्रस्य	म्बंयस्य	२१	२	२
वुवै	वुधै	२३	१	५
एव	एवं	२३	२	१
द्रष्ट	द्रष्टृ	२४	१	२

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
विभाव्यत	विभाव्यते	२५	१	४ मू
लिङ्गेद	लिङ्गदे	२६	१	२
वोधकः	वोधतः	२५	१	६
त्रिज्ञानं ब्रह्म	विज्ञानंनिादि ध्यासनं ब्रह्म	२६	२ ६	३
भेदेरा	भेदरा	२७	१	६
रुपा	रूपाः	२७	२	१
आतम	अतमा	२७	२	१
सुनिति	सुनिास्ति	२८	१	२
भव	भवं	२८	२	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
तदकत्व	तदेकत्व	२६	२	७	वतथाऽ	वतथाऽ	३१	१	६	मद्वचने	मद्वचने	३२	१	२
भ्रमण	भ्रमणं	२६	२	८	कंठ	कण्ठ	३१	१	२	तन्तारकं	तत्तारकं	३२	२	३

नेपाल पाशुपत, यन्त्रालये मुद्रिता.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इती रामगीता सटीका समाप्ता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द·नं·१६६४३

अथ रामगीता सटीका प्रारभ्यते ॥

मू० २।—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ रामंरत्नकिरीटकुण्डलयुतं केयूरहारान्वितं सीतालङ्कृतवामभागममलं सिंहासनस्थं विभुम् ॥ सुग्रीवादि कपीश्वरैःसुरवरैः संसेव्यमानं सदा विश्वामित्रपराशरादिमुनि-भिः संस्तूयमानं भजे ॥ १ ॥ इतिध्यात्वा ॥ श्रीमहादेवउवाच॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशाय नमः ॥ ध्यायेत्वाजानुवाहुं धृतशरधनुपं बद्धपद्मासनस्थं पीतंवासोवसानं नवकमलदलस्पर्द्धिनेत्रं प्रसन्नम् ॥ वामाङ्कारूढ
सीतामुखकमलमिलल्लोचनं नीरदाभं नाना लङ्कारदीप्तं दधतमुरुजटामण्डलं रामचन्द्रम् ॥ १ ॥ ततइति जगतां यानि मङ्गलानि
आनन्दास्तेषामुपजीव्यभूतं मङ्गलं ब्रह्मानन्दः सएवात्मास्वरूपं तेन तस्यैवानन्दस्यान्यानि भूतानिमात्रामुपजीवन्तीति श्रुतेः मङ्ग

ततोजगन्मङ्गलमङ्गलात्मना विधाय रामायणकीर्तिमुत्तमाम् ॥
चचार पूर्वाचरितं रघूत्तमो राजर्षिवर्य्यैरभिसेवितं यथा ॥ १ ॥

लानाञ्चमङ्गलमिति स्मृतेश्च किंच जगतां मङ्गलं कल्याणं यस्मात्तादृशकल्याणरूपआत्मामूर्तिस्तया उत्तमांश्रोत्रादीनां मोक्षदत्वेना
त्युत्तमां रामायणकीर्तिं वाल्मीक्यादि कृत नानाविध रामायण प्रवर्तिकां रावणवधादिजां कीर्तिंविधाय स्थितोरघूत्तमः ततः सीताप
रित्यागानन्तरं पूर्वैः स्ववंशजैराचरितं प्रजापालनसत्कथाश्रवणादिकं केवलंतत्पूर्वजैरेवाचरितमितिन किंत्वन्यैरपि राजर्षिश्रेष्ठैर्य
थाऽभिसेवितं तथाचचार कृतवान् ॥ १ ॥ ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदारागुरुदेवविश्वासलक्षणमहागुणवती यद्वा उदारा दानशीलाबुद्धिर्यस्य तेन पुरातनीः प्राचीनराजसम्बन्धिनीः शुभाः धर्माधर्मनिर्णेत्रीः प्रमत्तस्य स्वगोमण्डलमिश्रितब्राह्मणगोदानात् प्रमत्तस्य नृगस्य राज्ञो द्विजस्य शापात्तिर्यक्त्वमाह तेनाज्ञातकृतब्रह्मस्वापहारेण परमधा

सौमित्रिणापृष्ट उदारबुद्धिना रामःकथाःप्राह पुरातनीःशुभाः ॥
राज्ञः प्रमत्तस्य नृगस्य शापतो द्विजस्य तिर्यक्त्वमथाह राघवः
॥ २ ॥

र्मिकस्यापीदृश्यवस्थेति सर्वथाब्रह्मस्वविमुखताधर्मइतिसूचितम् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकान्तेविजने उपस्थितंप्राप्तम् विनयान्वितः सन् भक्त्यागुरुरयमिति बुद्ध्या प्रणम्य अनेनगुरूपसदनप्रकारउक्तः आसादितंशुद्धंभाव

कदाचिदेकान्त उपस्थितंप्रभुं रामं रमालालितपादपङ्कजम् ॥
सौमित्रिरासादितशुद्धभावनः प्रणम्यभक्त्याविनयान्वितोऽब्र-
वीत् ॥ ३ ॥

नं भावनाकरणमन्तः करणंयेनसः शुद्धान्तःकरणइतियावत् भगवदुक्तसत्कथाश्रवणेन शुद्धान्तःकरणइत्यर्थः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हे महामते महतीसर्वविषयामतिर्यस्य तस्य संबोधनं त्वं शुद्धबोधोऽसि अनवच्छिन्नचैतन्यरूपोऽसि सर्वदेहिनामात्माऽसि जीवानांतत्प्रतिविम्बत्वात् अधीशोऽसि अन्तर्यामित्वान्नियन्ताऽसि वास्तवभेदाभावाच्च सर्वात्मत्वम् औपाधिकभेदाच्च नियन्तृनियम्यभावोबोध्यः निराकृतिः अस्मदादिवत्स्वार्जितकर्माधीनशरीराकृतिरहितः नन्वेवंसर्वैः कथमेवंनज्ञायतेऽतआह ज्ञानदृशां स्वयमेवप्रतीयसे ज्ञायतेऽ

त्वं शुद्धबोधोऽसि हि सर्वदेहिनामात्माऽस्यधीशोऽसि निराकृतिःस्वयम् ॥ प्रतीयसे ज्ञानदृशां महामते पादाब्जभृङ्गाहितसङ्गसाङ्गिनाम् ॥ ४ ॥

नेनेतिज्ञानं वेदान्तवाक्यजातं तदेवदृक्दर्शनसाधनंयेषां तेषामितिसंबन्धसामान्येषष्ठी तैरित्यर्थः तादृशदृक्लाभश्च त्वद्भक्त्यधीनइत्याह पादेति त्वच्चरणकमलयोर्भृङ्गवदाहितःकृतः सङ्गोयेन तादृशान्तः करणसङ्गवतां त्वच्चरणकमल सङ्लग्नान्तः करणवतामित्यर्थः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ प्रार्थयते अहमिति भवस्यं संसारस्यापवर्गो निवृत्तिर्यस्मात्तादृशं तव पादाम्बुजं प्रपन्नोऽस्मि शरणं प्राप्तोऽस्मि योगिभावितं योगीभिः संसारमुक्तये भावितम् अनेन तस्य भवापवर्गत्वे सदाचारः प्रमाणमुक्तम् प्रार्थनीयमाह अपारवारिधिरूपं यदज्ञानं संसारमूलकारणं यथासुखम

अहं प्रपन्नोऽस्मि पदाम्बुजं प्रभो भवापवर्गं तव योगिभावितम् ॥ यथाञ्जसाज्ञानमपारवारिधिं सुखं तरिष्यामि तथाऽनुशाधि माम् ॥ ५ ॥

क्लेशेन तरिष्यामि तथा मामनुशाधि शिक्षय अपारवारिधिमित्यनेन सपारप्रसिद्धसमुद्राद्व्यतिरेक उक्तः अशक्यतरणताऽनेन ध्वनिता ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथोत्तरमवतारयति श्रुत्वेति रामः सौमित्रिवचः श्रुत्वा अथशब्दोवाक्यालङ्कारे तदा श्रवणाव्यवहितकाले एवप्रपन्नानां भक्तानामार्ति संसारदुःखहरातितादृशः प्रपन्नाश्रमादिहीना भक्तानुग्रहपरा च धीर्यस्यसः क्षितिपालानां राज्ञां भूषणभूतोज्ञानरूपतमसउपशान्तये त

श्रुत्वाथ सौमित्रिवचोऽखिलं तदाप्राह प्रपन्नार्तिहरःप्रसन्नधीः ॥
विज्ञानमज्ञानतमोपशान्तये श्रुतिप्रपन्नं क्षितिपालभूषणः॥ ६ ॥

दर्थम् सन्धिरार्षः श्रुतिभिः तमेवविदित्वाऽतिमृत्युमेतीत्यादिश्रुतिभिः प्रपन्नं तत्फलकत्वेन बोधितं विज्ञानमात्मतत्वज्ञानामिति सामान्य तः प्रथमंप्राह ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथताद्दशज्ञानप्राप्तये क्रमेणबहिरङ्गान्तरङ्गसाधनान्याह आदाविति स्ववर्णाश्रमेषु शास्त्रेण वर्णिता याः क्रियानित्यनैमित्तकयज्ञदाना दिरूपास्ताः कृत्वा समासादितशुद्धमानसः प्राप्तान्तःकरणशुद्धिः तत्पूर्वमुपात्तसाधनः तदनुष्ठानपूर्वकमेवउपात्तानिसाधनानि शम दमादीनियेन तादृशः अनेनकर्मणां बहिरङ्गत्वं शमादीनामन्तरङ्गत्वं स्फुटमेवोक्तम् किंच शमदमवैराग्यदार्ढ्यपर्यन्तं कर्मानुष्ठानमेवेति

आदौ स्ववर्णाश्रमवर्णिताः क्रियाः कृत्वा समासादितशुद्धमानसः
समाप्य तत्पूर्वमुपात्तसाधनः समाश्रयेत्सद्गुरुमात्मलब्धये॥ ७॥

सूचितम् ततस्तत्कर्मानुष्ठानं समाप्य त्यक्त्वा संन्यस्येतियावत् आत्मलब्धये आत्मज्ञानाय तत्फलकाय तत्त्वमस्यादिवाक्यार्थविचारा- य सद्गुरुंश्रोत्रियंब्रह्मनिष्ठमित्यादि लक्षणलक्षितं समाश्रयेत् सेवेत अनेनव्युत्पत्तिवलेन स्वयमेववाक्यार्थविचारः क्रियमाणो न फला- येति सूचितम् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसारस्यभ्रमिमच्चक्ररूपत्वात्तन्निवृत्तेश्चतत्कारणाज्ञाननिवृत्तिमूलकत्वदज्ञाननिवृत्तेश्चतत्त्वज्ञानकसाध्यत्वात्तत्त्वज्ञानस्यचवेदान्त विचारसाध्यत्वात्तदर्थंगुरुसमाश्रयणमित्याह क्रियेति भवःसंसारश्चक्रवद्विपरिवर्तमानईर्यते कथ्यते तदेवोपपादयति आदृताआदरपूर्वपूर्वजन्मार्जिताक्रियाएनस्यशरीरोद्भवस्यजन्मनोहेतुः तत्रजन्मनिसुरागिणोविषयाभिलाषवतः तौ शास्त्रप्रसिद्धौ धर्मेतरौ धर्माधर्मौ प्रियाप्रियौसुखदुः

क्रियाशरीरोद्भवहेतुराद्दृताप्रियाप्रियौतौभवतःसुरागिणः ॥
धर्मेतरौतत्रपुनः शरीरकंपुनः क्रियाचक्रवदीर्यतेभवः ॥ ८ ॥

खजनकौभवतःकस्यचिदधर्मएवसुखत्वबुद्ध्याप्रवृत्तिः कस्यचिद्धर्मएवंकदाचिदित्यप्यूह्यम् एवंतत्रोत्पादितकर्मणापुनःशरीरंपुनःक्रियाइत्येवंचक्रवद्विपरिवृत्तिः । यथाचक्रेभ्राम्यमाणेऽधोभागः कदाचिदुपरिउपरितनश्चाधः पुनरुपरिपुनरधएवंजन्मक्रिययोर्जन्यजनकभावेनपरिवृत्तिरिति बोध्यम् ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यचाज्ञानमेवमूलमित्याह अज्ञानमेवेति अत्रविधौसंसारनिवृत्तिलक्षणेकर्त्तव्येऽर्थेतद्धानमेवमूलकारणत्वादज्ञानहानमेवविधीयते साध-
नत्वेनेतिशेषः ननुकर्मैवतन्नाशकमस्तुकिंज्ञानेनेत्याशङ्क्याह विद्येवज्ञानमेवतन्नाशविधौमूलाज्ञाननाशनेपटीयसीसमर्थानकर्मसमर्थमितिशेषः

अज्ञानमेवास्यहिमूलकारणंतद्धानमेवात्रविधौविधीयते ॥ विद्यै-
वतन्नाशविधौपटीयसीनकर्मतज्जंसविरोधमीरितम् ॥ ९ ॥

यतस्तत्तज्जमज्ञानजम् आत्मस्वरूपाज्ञानजन्यदेहाद्यभिमानजन्यत्वात्कर्मणोज्ञानजन्यत्वंवोध्यम् ननुतज्जन्यस्यापितन्नाशकत्वंवृश्चिककर्क-
व्यादौदृष्टमित्याशङ्क्यतज्जन्यत्वंवाननाशकत्वमप्रयोजकंकिन्तुसविरोधत्वमेवेत्याह यतसविरोधंतदीरितंनाशकमुक्तमित्यर्थः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतएवकर्मणानाज्ञानहानिरित्याह नाज्ञानेत्यादि यतःकर्मणाविरोधाभावान्नाज्ञाननाशनापिरागनाशोवस्तुतः कर्मानुष्ठानात्पुनः सदो षंक्षयिफलत्वादिदोषविशिष्टंकर्मैवोद्भवेत्कर्मणश्चपुनःसंसारएवेतिनमुक्तिप्रत्याशा ततस्तस्माद्बुधोविवेकीज्ञानविचारवान् ज्ञायतेऽनेने·

नाज्ञानहानिर्नचरागसङ्क्षयोभवेत्ततः कर्मसदोषमुद्भवेत् ॥ ततः
पुनः संसृतिरप्यवारितातस्माद्बुधोज्ञानविचारवान्भवेत् ॥ १० ॥

तिज्ञानंवेदान्तवाक्यंतद्विचारवान्भवेत ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानींज्ञानस्यैवमोक्षहेतुत्वंनकुंज्ञानकर्मसमुच्चयवादंदूषणायानुवदतिसार्धेन नन्विति नान्वितिशङ्कायाम् यथाविद्यावेदमुखेनश्रुतिपुराण-
लक्षणेन ब्रह्मविदाप्नोतिपरम् इत्यादिनापुरुषार्थसाधनमुक्ता तथा उभाभ्यांमवपक्षाभ्यांयथाखेपक्षिणांगतिः तथैवज्ञानकर्मभ्यांप्राप्यते
ब्रह्मशाश्वतम् इत्यादिनाक्रियाऽपितत्साधनत्वेनोक्ता किंच क्रियाकर्तव्यत। तृतीयार्थेप्रथमा कर्तव्यतयाआवश्यकेकृत्येअवश्यकर्तव्यत-

**ननुक्रियावेदमुखेनचोदितायथैवविद्यापुरुषार्थसाधनम् ॥ कर्तव्य
ताप्राणभृतःप्रचोदिताविद्यासहायत्वमुपैतिसापुनः ॥ ११ ॥**

याप्रचोदितानित्यनैमित्तिकरूपा एवंचनदकरणेप्रत्यवायोत्पत्त्याज्ञानोत्पत्तिरेवनस्यात् तस्मात्सापुनर्विद्यायाःसहायत्वंप्राप्नोतिघटेजन-
नीयेयथादण्डचक्रादीनांपरस्परसहायता ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्तव्येतीतम्वाक्यमेवेविवृणोति कर्मेति वीरहावाएषदेवानांयोऽग्निमुद्वासयतेयावज्जीवमग्निहोत्रंजुहोति इतिश्रुतिः तत्रासिद्धान्तीशङ्कते नान्वाति ध्रुवंस्थिरंकार्यमिदंपुरुषार्थंमोक्षजनिकाविद्यायतः स्वतन्त्राविनाऽपिसहायेन स्वकार्यसंपादनेसमर्था यथातेजस्तिमिरनिवर्तन-

कर्माकृतौदोषमपिश्रुतिर्जगौतस्मात्सदाकार्यमिदंमुमुक्षुणा॥ननु स्वतन्त्राध्रुवकार्यकारिणीविद्यानकिञ्चिन्मनसाऽप्यपेक्षते ॥ १२

समर्थंमनसाऽपिकिञ्चित्सहायभूतंवस्तुनापेक्षते तथाफलेजननीयेसहायान्तरसंभावनाऽपिनेतिभावः अनेनविद्याफलजननेनिरपेक्षास्वतन्त्र-त्वात्तेजोवदित्यनुमानंसूचितम् ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समुच्चयवादीपरिहराति नेति त्वदुक्तंनेत्यर्थः सत्यकार्यः अक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवति इत्यादिवेदनबोधितःस्थिरकार्योऽपि-
अध्वरः यथाऽन्यानापिकारकादिकान् आरादुपकारकप्रयाजाद्यङ्गानिदेशकालादीनिचप्रकाङ्क्षते तथाविद्यापिअग्निहोत्रंजुहोतिइत्यादिवि

नसत्यकार्योऽपिहियद्वदध्वरः प्रकाङ्क्षतेऽन्यानपिकारकादिकान्
तथैवविद्याविधितः प्रकाशितैर्विशिष्यते कर्मभिरेवमुक्तये ॥ १३ ॥

धिवाक्यतःतत्समूहेनप्रकाशितैः कर्मभिः सहितैवमुक्तयेविशिष्यतइत्यर्थः विद्याफलदानेकर्मापेक्षा अङ्गित्वात् प्रयाजाद्यङ्गापेक्षदर्शा
दिवदितिसत्प्रतिपक्षानुमानमनेनसूचितम् ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदनूद्यसिद्धान्तीदूषयति केचिदिति यत्केचिद्वितर्कवादिनशर्तज्ञानकर्मणीसमुचित्यमुक्तिसाधनंवदान्तितदप्यसत् यथाकेवलंकर्म मोक्ष साधनमित्यमत्तथातन्मीलितमित्यप्यसत् तत्रहेतुर्दृष्टविरोधकारणात् दृष्टायोविरोधः सर्वलोकदृष्टविरोधरूपात्कारणात्तदसदित्यर्थः विरो

केचिद्वदन्तीतिवितर्कवादिनस्तदप्यसद्दृष्टविरोधकारणात् ॥
देहाभिमानादभिवर्धतेक्रियाविद्यागताहङ्कृतितःप्रसिद्ध्यति १४

धमेवाह देहाभिमानात्क्रियावर्धतेअनात्मनिदेहादावात्मत्वाभिमानात्क्रियावृद्धिः विद्यातुगताहङ्कृतितः गताहङ्कृतिर्यस्यतस्यनष्टाहङ्कृतेः प्रसिद्ध्यति सार्वविभक्तिकस्तासिः एवंचाहङ्कारसत्तामूलकत्वात्क्रियाज्ञानयोः समुच्चयोविरुद्धइत्यर्थः ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथपूर्वपक्षयुक्तानुमानंदूषयन्विद्यास्वरूपमाह विशुद्धंविज्ञानंयेभ्यस्तेषांवेदान्तवाक्यानांयद्विशेषेणरोचनंरलयोरभेदादालोचनंविचार
स्तेनाञ्चितामापितायाचरमाआत्मवृत्तिर्ब्रह्माकारांतःकरणवृत्तिः साविद्येतिभण्यतेविद्वद्भिरितिशेषः पुनःसमुच्चयवारणायविद्याकर्मणो
वैषम्यमाह कर्मयज्ञादिअखिलकारकादिभिःकर्तव्यकर्मादिभिरङ्गैश्चसहितंसदुदेति फलोन्मुखंभवति विद्यापुनरखिलकारकादीन्निहन्ति

विशुद्धविज्ञानविरोचनाञ्चिताविद्याऽऽत्मवृत्तिश्चरमेतिभण्यते ॥ उदेतिकर्माखिलकारकादिभिर्निहन्ति विद्याऽखिल कारकादि-कम् ॥ १५ ॥

तत्रकर्तृत्वादिबुद्धिंनिहन्ति सकलव्यापारपरित्यागेनब्रह्मणिसमाप्तिर्हिविद्या अतः स्वोत्पत्तौचित्तशुद्धिद्वाराकर्मसापेक्षास्वफलेजनयितव्यं-
तन्निरपेक्षैवान्यथाविद्यास्वरूपस्यैवभङ्गापत्तेरितिपूर्वपक्षयुक्तहेतोरसिद्धिरितिभावः ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपसंहरन्मुमुक्षोर्वृत्तिप्रकारमाह तस्मादिति विद्याविरोधाद्विद्यायाः कर्मणासह विरोधेनसमुच्चयोनभवेत्तस्मात्सुधीर्मुमुक्षुरशेषतः कर्मत्यजे-
त् काम्यंतुसर्वथात्याज्यमेवनित्यनैमित्तिकमपियावच्चित्तशुद्धिकर्तव्यमेव ततोऽपिब्रह्मणिचित्तस्थैर्यपर्यन्तं कर्तव्यमेव ततस्तदनुसन्धानप्र-

तस्मात्त्यजेत्कार्यमशेषतः सुधीर्विद्याविरोधान्नसमुच्चयोभवेत् ।
आत्मानुसन्धानपरायणःसदा निवृत्तसर्वेन्द्रियवृत्तिगोचरः १६

तिबन्धकत्वात्प्रयोजनाभावाच्चतदापित्याज्यमेवेतिभावः इदानींमुमुक्षुकर्तव्यमाह निवृत्ताःसर्वेषामिन्द्रियाणां गोचराविषयाःशब्दादयोय
स्मात्तादृशःसन् आत्मनःसच्चिदानन्दस्यानुसन्धानमेवपरमयनंप्राप्यंयस्यतथाविधोभवेत् अत्रेन्द्रियप्रत्याहारःकर्तव्यत्वेनोक्तस्तेनतत्पूर्वप्रा-
णायामाद्यर्थादाक्षिप्तम् ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 रागिविरागिभेदेनकर्मणोकर्तव्यताकर्त्तव्यतेआहयावदिति माययाविद्ययाशरीरादिष्ववानात्मसुआत्मधीरहङ्कर्तेत्यादिरूपायावद्वर्ततेतावद्वि
 धिवादकर्मणाम् विधिर्यजेतेत्यादिश्रुतिर्वादःकर्तव्यताबोधकोयेषांकर्मणांविधेयोवश्यवर्त्तितत्कर्मकर्ताभवेत तदपगमेतुतदाखिलं जगन्नेतीति

याबच्छरीरादिषुमाययात्मधीस्तावद्विधेयोविधिवादकर्मणाम् ॥
नेतीतिवाक्यैरखिलं निषिद्धय तज्ज्ञात्वापरात्मानमथत्यजेत्क्रि
याः ॥ १७ ॥

वाक्यैः अथातआदेशोनेतिनेतिइत्यादिवाक्यैर्निषिध्य मिथ्यात्वेननिर्णीयताद्विलक्षणतयासत्यत्वेनपरमात्मस्वरूपंज्ञात्वाक्रियास्त्यजेत्निरू
पितमेतत् ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मविज्ञानेसत्यवश्यमविद्या निवर्ततइत्याह यदेति आत्मनिशुद्धेन्तःकरणेपरमात्मनईशस्यात्मनोजीवस्यचयोविभेदोमायान्तःकरण रूपोपाधिद्वयकृतोविभेदोभेदस्तस्यभेदकं नाशकंभास्वरंप्रकाशशीलं यद्विज्ञानमितरवृत्त्युपमर्दनपूर्वकंब्रह्माकाराऽखण्डाद्वृत्तिर्यदाऽवभाति

यदापरात्मात्मविभेदभेदकंविज्ञानमात्मन्यवभाति भास्वरम् ॥
तदैवमायाप्रविलीयतेऽञ्जसासकारकाकारणमात्मसंसृतेः॥ १८॥

असंभावनादितिरस्कारेणोदेति तदैव सकारकाजन्मान्तरप्रापककर्मसहितामायातत्तज्जीवोपाधिभूताविद्याऽञ्जसाझटितिप्रविलीयतेनश्यति ननुतन्नाशेऽपिसंसारनाशःकथमतोमायाविशेषणम् आत्मसंसृतेःकारणंसंसारस्योपादानकारणमेवंचतन्नाशेकार्यनाशोभवत्येवेतिभावः १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं पुनर्दार्ढ्यायाह श्रुतीति तत्त्वमसीत्यादिश्रुतिरूपैःप्रमाणैस्तज्जानितज्ञानेन नाशितासाविद्याकथमपिकार्यकारिणीभविष्यतीति काकुरत्र सर्वथानेत्यर्थः असतःकार्यकारित्वासंभवादितिभावः पुनश्चतस्यानोद्भवइत्याह विज्ञानमात्रादिति अमलाशुद्धाद्वितीयतःद्विती

श्रुतिप्रमाणाभिविनाशिताचसाकथंभविष्यत्यपिकार्यकारिणी ॥
विज्ञानमात्रादमलाद्द्वितीयतस्तस्मादविद्यानपुनर्भविष्यति १९

यात्माविषयकाद्विज्ञानमात्रादितरासहकृतान्निदिध्यासनपरिपाकजज्ञानाद्यतोनष्टातस्मात्सापुनर्नभाविष्यति रज्ज्वज्ञानमूलकस्य सर्पस्य रज्जुज्ञानेन निवृत्तस्ययथानपुनरुत्पात्तिरितिभावः ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्यायाइतरनिरपेक्षायाएवमोक्षकारणत्वमुक्तंयुक्तिपूर्वकंपुनःकथयतिश्रोतृदार्ढ्याय। यदीति। यदिनष्टातत्त्वज्ञाननाशिता सा न पुनः प्रसूयतेनोत्पद्यतेतदाकारणाभावादहंमतिःकथंभवेत्। कथमपिनभवेदित्यर्थः। तदभावाच्चतत्कालेकर्माभावइतिस्वफलजननेसास्वतन्त्राइ

यदिस्मनष्टा नपुनःप्रसूयते कर्ताऽहमस्येति मतिः कथं भवेत् ॥
तस्मात्स्वतन्त्रा न किमप्यपेक्षते विद्या विमोक्षाय विभाति केवला ॥ २० ॥

तरनिरपेक्षैवनाकिमप्यपेक्षते द्वितीयस्य।संभवात् अतः केवलाऽसहायैवविमोक्षायविभातितत्फलिकाभवतीत्यर्थः ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अत्रार्थे श्रुतिरपिप्रमाणमित्याह सेति सा प्रसिद्धा नकर्मणानप्रजयाधनेनत्यागेनैके अमृतत्वमानशुः इत्यादिका तैत्तिरीयश्रुतिः प्रशस्तानामर्थवादैः प्राशस्त्येनबोधितानामपिकर्मणांन्यासंत्यागंसादरंस्फुटमाह नतुकर्मसमुच्चयमित्यर्थः तथावा[illegible]जिनां वाजसनेयिनाम् एतावदरे खल्वमृतत्वम् इत्यादिका ज्ञानंविमोक्षायसाधनं नकर्मेत्येतदाह ॥ २१ ॥

सातैत्तिरीयश्रुतिराहसादरंन्यासंप्रशस्ताखिलकर्मणां स्फुटम् ॥
एतावदित्याहचवाजिनांश्रुतिर्ज्ञानंविमोक्षायनकर्मसाधनम् २१

CC-0. In Public Domain. Digitization by eGangotri

अहङ्कारत्यागरूपकारणवैषम्यात् क्रियाज्ञानयोर्वैषम्यमुक्त्वा फलप्रयुक्तमपिवैषम्यमाह विद्येति हेसमुच्चयवादिन् त्वयाक्रतुरग्निष्टोमादिर्विद्यासमत्वेनदर्शितः परन्तुसमोदृष्टान्तोनोदाहृतः अनेनक्रतुर्विद्यासमः श्रुतिबोधितकर्तव्यताकत्वादित्यनुमानन्निरस्तम् दृष्टान्ताभावा-व अन्वय्येवानुमानन्नव्यतिरेकीतिभावः एतच्चाकरेविस्तरेणप्रपञ्चितम् ननुविद्याकर्मणीसमे एकफलत्वाच्चक्रदण्डादिवदित्यनुमान-

विद्या समत्वेनतु दर्शितस्त्वया क्रतुर्नदृष्टान्त उदाहृतः समः ॥
फलैःपृथक्त्वाद्बहुकारकैः क्रतुःसंसाध्यतेज्ञानमतोविपर्ययम् २२

मितिचेत्तत्राह फलैः पृथक्त्वात् षष्ठ्यर्थेतृतीया फलानांभेदादित्यर्थः एवंचस्वरूपासिद्धोहेतुरितिभावः समानकारकत्वमपिहेतुर्नेत्याह क्रतुर्बहुभिः कारकैरहंममताभिमानरूपैरान्तरैर्बाह्यैश्चदेशकालादिनियमैश्चसाध्यते ज्ञानन्त्वतोविपर्ययवदतोनतयोः साम्यमितिभावः २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वकरणे प्रत्यवायभिया कर्म कार्यमिति चेन्नेत्याह सप्रत्यवायइति कर्मत्यागेनाहं निश्चयेनाहं प्रत्यवायसहितोभविष्यामीत्येवंशुद्धात्मानि-
अनात्मधर्मस्य धीरप्रज्ञस्य तत्त्वज्ञानविकलस्य प्रसिद्धा नतु तत्त्वदर्शिनः तस्याहंबुद्धेरभावात् पापादेरनात्मधर्मतानिश्चयाच्च तस्माद्बुधैः कर्म

स प्रत्यवायो ह्यहमित्यनात्मधीरज्ञप्रसिद्धा नतु तत्वदर्शिनः ॥
तस्माद्बुधैस्त्याज्यमपि क्रियात्मभिर्विधानतः कर्मविधि प्रका-
शितम् ॥ २३ ॥

क्रियात्मभिः षष्ठ्यर्थे तृतीया क्रियाफलसक्तचित्तानां विधानतो विधानेनेतिकर्तव्यतया युक्तं कर्म विधिभिरवश्यकर्तव्यतया बोधितमपि
त्याज्यमित्यर्थः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविरक्तस्यकार्यमाह। श्रद्धेति । गुरुशास्त्रयोर्विश्वासःश्रद्धातदन्वितोबुभुत्सुःशुद्धमानसोऽपि निष्कामकर्मानुष्ठानाच्छुद्धमानसश्चगुरोः प्रसादाल्लब्धतत्त्वमसीतिवाक्यतः श्रुतमात्मजीवयोरैकात्म्यंविज्ञाय मनननिदिध्यासनपरिपाकाभ्यांसाक्षात्कृत्य। चएवार्थः । साक्षा

श्रद्धान्वितस्तत्त्वमसीतिवाक्यतो गुरोःप्रसादादपिशुद्धमानसः॥
विज्ञायचैकात्म्यमथात्मजीवयोः सुखी भवेन्मेरुरिवाप्रकम्पनः
॥ २४ ॥

त्कृत्यैवसुखी भवेत्। सकलदुःखहीनोभवेदित्यर्थः । अप्रकम्पनःविषयाभिलाषाक्षोभितान्तःकरणः ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

महावाक्यंविवरीतुंवाक्यार्थस्यपदार्थबोधपूर्वकत्वमाह । आदाविति । विधानतः श्रमप्रमादराहित्येनवाक्यार्थविज्ञानस्य विधावुत्पत्तौ आदौप्रथमंमुख्यमितियावत् । पदार्थावगतिःकारणम् । हिप्रसिद्धं तस्यपदद्वयंतत्त्वम्असीति । तत्रतत्पदार्थःपरमात्मासर्वज्ञत्वादिगुणः त्वं

आदौ पदार्थावगतिर्हिकारणं वाक्यार्थविज्ञानविधौ विधानतः ॥
तत्त्वंपदार्थौपरमात्मजीवकावसीतिचैकात्म्यमथानयोर्भवेत्
॥ २५ ॥

पदार्थोजीवः अनयोस्तत्त्वंपदार्थयोरैकात्म्यंतद्बोधकमसीतिपदम् ॥ २५ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुसर्वज्ञत्वादिगुणस्येशस्यकिञ्चिज्ज्ञत्वधर्मवताजीवेनैकात्म्यं विरुद्धमित्याशङ्क्याह । प्रत्यगिति । अहंबुद्धिवद्यत्वंप्रत्यक्त्वंजीवधर्मः परोक्षत्वमीशधर्मस्तदादिधर्मकृतमात्मनोःपरमात्मजीवात्मनोर्विरोधंविहायतयोः संशोधिताम् युक्तिभिःसम्यग्विचारितांतत्त्वंपदाश्याशक्त्यभावेऽपिवक्ष्यमाणप्रकारयालक्षणयालक्षितां ज्ञातांचिदात्मतां संगृह्य तत्त्वंपदोपास्थानिविषयांकृत्वा स्वमात्मानंतथाज्ञात्वाऽथएकात्मज्ञानानन्तरमद्वयोभवेत् । चित्स्वरूपतांप्राप्तइवभवेत् । पूर्वमपितत्स्वरूपएवविस्मृतकण्ठचामीकरन्यायेनचतत्प्राप्तिःतद्वदित्युक्तम् ।

प्रत्यक्परोक्षादिविरोधमात्मनोर्विहायसंगृह्यतयोश्चिदात्मताम् ॥
संशोधितांलक्षणयाचलक्षितांज्ञात्वास्वमात्मानमथाद्वयोभवेत्
॥ २६ ॥

अयंभावः तत्त्वंपदयोर्द्वावर्थौ वाच्योलक्ष्यश्च तत्रतत्पदस्यमायोपाधिःसर्वज्ञत्वादिविशिष्टोवाच्यः त्वंपदस्यापिकिञ्चिज्ज्ञत्वादिविशिष्टो मायाकार्याविद्योपाधिरविद्यावदन्तःकरणोपाधिर्वाच्यः उभयोरपिविशेषणांशत्यागेनशुद्धश्चिदात्मालक्ष्यः तत्रवाच्ययोर्विरुद्धधर्मकत्वादैक्यासंभवेऽपिलक्ष्ययोरैक्यंनिर्बाधमेवेति ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उक्तलक्षणास्वरूपमाह । एकात्मकत्वादिति जहतीलक्षणाजहत्स्वार्थलक्षणायथागङ्गायांघोषइत्यत्रगङ्गापदार्थस्यप्रवाहस्यघोषाधारता नुपपत्त्यासर्वथातत्परित्यागेनतीररूपार्थलक्षणा साप्रकृते न एकात्मत्वात् । विशेष्यांशस्यैकत्वात्सर्वथास्वार्थत्यागाभावात् । तथाज हल्लक्षणताजहत्स्वार्थलक्षणावत्त्वमपिअत्रनसंभवति । यथाकाकेभ्योदधिरक्ष्यतामित्यादौकाकपदस्यस्वार्थात्यागेनैवदध्युपघातकेलक्षणा सापिन । विरोधतःविशेषणत्यागेनसर्वथास्वार्थत्यागाभावात् । अतोभागलक्षणाजहदजहल्लक्षणायुज्यते । अदोषतःपूर्वोक्तदोषाभावात्

एकात्मकत्वाज्जहती न सम्भवेत्तथाऽजहल्लक्षणता विरोधतः॥
सोऽयंपदार्थाविवभागलक्षणायुज्येततत्त्वंपदयोरदोषतः॥२७॥

विशेष्यांशस्यात्यागाद्विशेषणांशस्यत्यागाच्च । तत्रदृष्टान्तः । सोऽयंपदार्थाविव । यथासोऽयंदेवदत्तइत्यत्रतद्देशादिविशिष्टोऽतीतानुभव विषयोवातत्पदार्थः एतद्देशादिविशिष्टोऽनुभूयमानोवेदंशब्दार्थः । तयोश्चाविरुद्धविशेषणकत्वादैक्यासंभवेनदेशादिरूपविशेषणत्यागेना नुभवगतातीतत्वादिविशेषणत्यागेनवालक्षणयैक्यंतद्वदितिभावः ॥ २७ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथत्याज्यत्वायजीवोपाधिमाह । रसादीति । रसापृथ्वीआदिर्येषांतानिपञ्चीकृतानियानिभूतानितेभ्यःसंभवोयस्यनत् । पञ्चीकरणंचे
त्थम् एकैकंभूतंद्विधाविभज्यतत्रैकंभागंचतुर्धाविभज्यतेषांभागानांस्वेतरभूतचतुष्टयार्धभागचतुष्टयेसंयोजनेएकैकंभूतंपञ्चात्मकंभवतिभा

**रसादिपञ्चीकृतभूतसंभवंभोगालयंदुःखसुखादिकर्मणाम् ॥ शरी
रमाद्यन्तवदादिकर्मजंमायामयंस्थूलमुपाधिमात्मनः ॥ २८ ॥**

गाधिक्याच्चप्रातिस्विकतयाभूरादिव्यवहारोऽपि । सुखदुःखयोरादीनियानिकर्माणितेषांभोगस्तत्कर्मजसुखदुःखानुभवस्तस्यालयमाश्र
यभूतमाद्यन्तवत्उत्पत्तिनाशयोगि आदिकर्मजंभाग्भवीयकर्मजन्यंमायामयंपरम्परयामायाविकारः तद्विकारभूतविकारत्वात् । एतच्छरी
रमात्मनःस्थूलमुपाधिंवदन्तीतिशेषः ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसूक्ष्मोपाधिमाह। सूक्ष्ममिति । बुधाःअन्यत्स्थूलशरीरविलक्षणंशरीरंलिङ्गदेहाख्यमात्मनउपाधिंविदुः । तत्स्वरूपमाह। सूक्ष्मंचक्षु-
राद्यविषयः मनोबुद्धिदशेन्द्रियैःप्राणैश्चयुतम् सङ्कल्पात्मकंमनः निश्चयात्मिकाबुद्धिः घ्राणरसनाचक्षुस्त्वक्श्रोत्रेतिपञ्चज्ञानेन्द्रियाणि वा-

सूक्ष्मंमनोबुद्धिदशेन्द्रियैर्युतंप्राणैरपञ्चीकृतभूतसंभवम् ॥ भोक्तुः सुखादेरनुसाधनंभवेच्छरीरमन्याद्विदुरात्मनोबुधाः ॥ २९ ॥

क्पाणिपादपायूपस्थानिकर्मेन्द्रियाणि प्राणापानव्यानोदानसमानाश्चप्राणास्तैर्युतमेतत्सप्तदशसमुदायात्मकम्। तदाधारभूतान्याह ।अप
ञ्चीकृतभूतसंभवंतेभ्यउत्पन्नमतएवादृश्यम्। तथाभोक्तुःसुखादेःसुखदुःखाद्यनुभवस्यानुसाधनम् स्थूलशरीरस्यतदनुगतस्यैवभोगसाधनत्व
मितिभावः । एतद्वियोगेनैवमरणव्यवहारइतिबोध्यम् ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिजीवोपाधिद्वयमुक्त्वाईशोपाधिमाह । अनादीति । अनादि उत्पत्तिहीनम् । नानाविधपरिणामशालितयापरिणामरूपेणनश्वरमिति अनादित्वमात्रेोक्त्यासूचितम् । अनिर्वाच्यम् सत्त्वासत्त्वाभ्यांनिर्वक्तुमशक्यम् कारणंसकलप्रपञ्चस्यजनकम् ईदृशीमायातुब्रह्मणःपरमी-

अनाद्यनिर्वाच्यमपीहकारणं मायाप्रधानंतुपरंशरीरकम् ॥ उपाधिभेदान्तुयतःपृथक्स्थितं स्वात्मानमात्मन्यवधारयेत्क्रमात् ॥ ३० ॥

श्वरव्यवहारसंपादकत्वादुत्कृष्टंप्रधानंशरीरकम् । स्वार्थेकः । एवमुपाधिभेदादेकमेवचैतन्यंयतः पृथक्स्थितंजीवईशइतिभेदबुद्धिविषय मतोलक्षणयोपाधिपरित्यागेनस्वात्मानमात्मनिअवधारयेदभेदेनजानीयात् । क्रमाच्छ्रवणमनननिदिध्यासनक्रमेणेत्यर्थः ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवाक्यार्थविचारफलमाह । कोशेष्विति । आनन्दमयस्य ब्रह्मत्वेअन्नमयप्राणमयमनोमयविज्ञानमयेषुचतुर्षुकोशेषुतत्तत्सङ्गात्तत्तदाकृ
तिर्विभाति यथाजपादिसङ्गात्स्फटिकोऽनेकाकृतिर्भाति । आनन्दमयस्यापि जीवत्ववादिनातुतेनसहपञ्चसु कोशेष्वितिबोध्यम् । अस्मि-

कोशेषुपञ्चस्वपितत्तदाकृतिर्विभातिसङ्गात्स्फटिकोपलोयथा ॥
असङ्गरूपोऽयमजोयतोऽद्वयोविज्ञायतेऽस्मिन्परितोविचारि-
ते ॥ ३१ ॥

न्महावाक्येपरितोविचारितेसम्यग्विचारितेसत्ययमात्माऽसङ्गरूपःअन्नमयादिभिःसङ्गरहितः । असङ्गोनहिसज्जते । इतिश्रुतेः । अजोऽद्व-
यश्चविज्ञायते । स्थूलोऽहमित्यादिस्त्वज्ञस्यतत्तत्कोशप्रसङ्गात्प्रतीतिःस्फटिकवत् तत्त्वज्ञस्यतुनतथाप्रतीतिरितिभावः । एवंचतत्तदुपाधि-
कृततत्तद्रूपताप्रतीतिनिरामएव विचारफलमितिभावः ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जाग्रदाद्यवस्थाऽपि बुद्धेर्धर्मोनात्मधर्मइत्याह । बुद्धेरिति । इहआत्मनिस्वप्नादिभेदेन जाग्रत्स्वप्नसुषुप्तिभेदेन यात्रिधावृत्तिर्दृश्यतेसाऽपि गुणत्रयात्मनः सत्त्वरजस्तमोरूपगुणत्रयस्वरूपाया बुद्धेर्धर्मः । उक्तावस्थात्रयस्योक्तमूलकत्वात् । एतदवस्थात्रयस्यास्मिन्नवस्थात्रय- साक्षिणि आत्मनि भानं मृषा बुद्ध्यध्यास निबन्धनं न तु वास्तव मित्यर्थः । अन्योऽन्यतोव्यभिचारतस्तस्यावस्था त्रयस्यस्व रूपतो

बुद्धेस्त्रिधा वृत्तिरपीह दृश्यते स्वप्नादि भेदेन गुणत्रयात्मनः ॥
अन्योऽन्यतोऽस्मिन्व्यभिचारतोमृषा नित्ये परे ब्रह्मणि केव
ले शिवे ॥ ३२ ॥

मृषात्वात्तज्ज्ञानस्य मृषात्वमेव । स्वप्नकाले जाग्रत्सुषुप्त्योरभावात् । जाग्रतिइतरद्वयस्याभावात् सुषुप्तावितरयोरभावात्परस्परं व्यभिचाराबोध्यः आत्मनस्तदनाश्रयत्वंविशेषणैराह । नित्येउत्पत्तिनाशशून्येपरेगुणत्रयातीते ब्रह्मणिव्यापकेकेवलेऽसङ्गेशिवआनन्दरूपे एवंभूतेसदेकरसेपरस्परव्यभिचारधर्माभानमसंभवीति भावः ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसाऽन्यत्वायसंसारमूलभूतांवृत्तिमाह । देहेति । एषांसङ्घातइतरेतराध्यासविषयात् अजस्रंयावाद्धियो बुद्धेर्वृत्तिस्तमोमूलतयाऽज्ञलक्षणाऽज्ञत्वज्ञापिका यावत्परिवर्तते तावद्भवोद्भवःसंसारोद्भवोभवेत् । तमःपदंरजसोऽप्युपलक्षणम् । रजस्तमःप्रधानाबुद्धिः संसारहेतु

देहेन्द्रियप्राण मनश्चिदात्मनां सङ्घादजस्रं परिवर्तते धियः ॥
वृत्तिस्तमोमूलतयाऽज्ञलक्षणा यावद्भवेत्तावदसौ भवोद्भवः॥३३॥

त्वात्सर्वथासाऽन्येति भावः ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत महावाक्यविचारस्य कर्तव्यमाह । नेतीति । अथात आदेशोनेतिनेति इति प्रमाणेननिराकृतं मिथ्यात्वेनगृहीतमखिलंजगत्येनसः ततोहृदामत्त्वप्रधानेनमनसासम्यगास्वादितं चिल्लक्षणंघनामृतंदुःखासंभिन्नंसुखंयेनसः । स्वर्गादितुपरिणामदुःखत्वात्तत्संभिन्नमेव । एवंभूतोऽशेषंजगद्देहेन्द्रियादिदृश्यसमूहंत्यजेत् हानोपादानबुद्धिविषयंनकुर्यात् । किन्तूदासीनस्तत्रभवेत् । ननुदेहेन्द्रियादिभिरेवतज्ज्ञान

नेतिप्रमाणेन निराकृताखिलो हृदासमास्वादितचिद्घनामृतः ॥
त्यजेदशेषं जगदात्तसद्रसं पीत्वा यथाऽम्भः प्रजहाति तत्फ-
लम् ॥ ३४ ॥

लाभात्कथमुपजीव्यस्यत्यागइत्याशङ्क्यदृष्टान्तदर्शनेनपरिहराति । यथातृषावानआत्तः सद्रसोमाधुर्ययेनताहशं नारिकेलनारङ्गादि फलान्तर्वर्त्यम्भःपीत्वा तत्स्थानभूतंतत्फलं जहाति तत्रोदासीनोभवति तद्वत्सर्वदृश्यसारांशोब्रह्मतज्ज्ञ्भसतिनिः सारंदृश्यंनोपादेयंनापिहेयमितिभावः । यतोभयादिसंभावनातद्धेयमित्युच्यते ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

इतरस्यानित्यत्वेनतत्रवैराग्यार्थमात्मनएवनित्यत्वमाह । कदाचिदिति । कदापीत्यर्थः । अनवः उत्पत्त्यनन्तरंविद्यमानोहिनवः । तेन जन्मानन्तरास्तित्वंव्यावर्तितं नवत्वाभावेनैवजीर्णत्वाभावादवस्थान्तरप्राप्तिरूप परिणामोऽपिनिरस्तः ।अनेनअस्तिजायतेवर्द्धतेविपरिणमतेऽपक्षीयते नश्यतीति षड्भाव विकार राहित्यमुक्तम् । एवंचैतद्भिन्नं सर्वमुक्तषड्भावविकारवत्त्वादनित्यमिति ततोविरज्येतेतिबोधित-

कदाचिदात्मा न मृतो न जायते न क्षीयते नापि विवर्धतेऽनवः ॥
निरस्तसर्वातिशयः सुखात्मकः स्वयम्प्रभः सर्वगतोऽयमद्वयः ३५

म् । यतऽईदृशोऽतएवनिरस्तः सर्वस्यदेहेन्द्रियादेरतिशयोमहत्त्वं येनस्वलाभात्सः यल्लाभान्नापरोलाभइतिःश्रुतेः यतःसुखात्मकः आनन्दस्वरूपः स्वयम्प्रभःस्वप्रकाशकश्च देहेन्द्रियादिस्तुदुःखस्वरूपः परप्रकाश्यश्च । यस्यभासासर्वमिदंविभाति । इतिश्रुतेः । सर्वगतोव्यापकः अयमहंबुद्धिविषयःप्रत्यगात्माऽपिअद्वयः उक्ताद्वयब्रह्मस्वरूपएव । नततोऽतिरिक्तइतिभावः । अयमात्माब्रह्म । इतिश्रुतेः ॥ ॥ ३८ ॥

CC-0. In Public Domain. Digitization by eGangotri

ननुएवंविधेविकारशून्येआत्मनिजन्ममरणादिप्रवाहरूपसंसारभानंकथमितिशङ्कते। एवंविधेइति।दुःखमयःदुःखप्रचुरः।उत्तरयति। अज्ञानतइ
तिअज्ञानमूलकोयोध्यासोदेहान्तः करणादौअहंममेत्यध्यासस्तद्वशात्। एवंचभ्रान्तिरूपातत्प्रतीतिरितिभावः। नन्वेवंकथंतस्यसंसारस्यनि

एवंविधे ज्ञानमये सुखात्मके कथंभवो दुःखमयःप्रतीयते ॥
अज्ञानतोऽध्यासवशात्प्रकाशतेज्ञानेविलीयेत विरोधतःक्षणात्॥
॥ ३६ ॥

वृत्तिस्तत्राह। ज्ञानेति। आविर्भूतइतिशेषः। ज्ञानस्याज्ञानविरोधित्वात्तदुत्पत्तिक्षणएवकारणभूताज्ञाननाशात्तत्कार्यसंसारस्यापि वि
लयइत्यर्थः। यथारज्जुज्ञानेनरज्जौसर्पस्यलयइत्यर्थः ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाध्यासलक्षणमाह । यदन्य दिति । यदन्यत्सर्पादिकमन्यत्ररज्ज्वादौभ्रमात्भ्रमजनकाद्दोषाद्विभाव्यतेविज्ञायतेअमुंविपश्चितोविद्वां- स.
सोऽध्यासइत्याहुः । यथाऽसर्पभूतेरज्ज्वादौ अहिविभावनंसर्पारोपोरज्ज्वबुद्धिमूलकस्तद्वदीश्वरेऽपिजगद्देहादिसंसारात्मकंसर्वंविभाव्य-

॥ १९ ॥ यदन्यदन्यत्र विभाव्यते भ्रमादध्यासमित्याहुरमुंविपश्चितः॥
असर्पभूतेऽहिविभावनंयथा रज्ज्वादिकेतद्वदपीश्वरेजगत्॥३७॥

॥ १९ ॥

तेआत्मज्ञानाभावाद्यथार्थतयाज्ञायते ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनिजगज्ज्ञानेकीदृशोऽध्यासोनिमित्तंतदाह विकल्पेति सर्वविकल्पकारणमायारहितेवस्तुतस्तत्सङ्गरहितेचिदात्मकेचित्स्वरूपेसर्वकारणेनिरामयेदुःखासंभिन्नानन्दमयेकेवलंसर्वविकारशून्यपरेदृश्यविलक्षणेब्रह्मणिव्यापके आत्मनिप्रथममहङ्कारः कल्पितः सएवाध्यासः ।

विकल्पमायारहितेचिदात्मके ऽहङ्कारएष प्रथमः प्रकल्पितः ॥
अध्यासएवात्मनिसर्वकारणे निरामयेब्रह्मणि केवलेपरे ॥ ३८॥

अहंबुद्ध्यात्मकोऽध्यासएवसर्वसंसारकारणमितिभावः ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बुद्धिनिष्ठएवसंसारोनत्वात्मनिष्ठइत्यत्रान्वयव्यतिरेकौप्रमाणयति । इच्छादीति । परेसर्वसाक्षिणिआत्मनिसंसृतिहेतवःभासमानसंसारकारणं
सदा कालत्रयेऽपिइच्छादिरागादिसुखादिधार्मिकाः इच्छांपक्षेरागद्वेषौसुखदुःखंइत्येवमादिद्वन्द्वधार्मिकाःधियएवधीषुसतीषुसंसारइत्यन्वयमु

इच्छादिरागादिसुखादिधार्मिकाः सदा धियः संसृतिहेतवः परे ॥
यस्मात्प्रसुप्तौतदभावतःपरः सुखस्वरूपेणविभाव्यतेहिनः ॥३९॥

क्त्वातद्व्यतिरेकमाहयस्मात्कारणात्प्रसुप्तौतदभावात्धीवृत्त्यभावात परआत्मानोऽस्माभिःतृतीयार्थेषुषष्ठी । सुखरूपेणस्वस्वरूपमात्रेणाविभा
व्यंतानिश्चीयते नतु संसारित्वेनेतिभावः सुप्तोत्थितस्तुसुखमहमस्वाप्समितिप्रत्यभिज्ञानुभवात्तदात्मस्वरूपनिश्चयोऽस्तीतितात्पर्यम् ॥ ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथपुनस्तत्त्वंपदार्थस्वरूपमाह ।अनादीति।अनादिर्याऽविद्यातदुद्भवोयस्या बुद्धेरन्तःकरणस्यतत्रबिम्बितःप्रतिबिम्बिताश्चितःप्रकाशः सजीवइतीर्यते आत्मापरमात्माधियः साक्षितयाधीधर्मासङ्गेनैवपृथक्स्थितः । अन्तर्यामितयेत्यर्थः जीवोऽहंसुखीत्यादिप्रकारेणान्तःकर

अनाद्यविद्योद्भवबुद्धिबिम्बितोजीवप्रकाशोऽयमितीर्यते चितः ॥
आत्माधियः साक्षितया पृथक् स्थितो बुद्ध्या परिच्छिन्नपरः
सएव हि ॥ ४० ॥

णधर्माध्यासवान्परमात्मातु साक्षितयासर्वत्रविद्यमानोऽपिनतथेतिभावः। अतएवबुद्ध्यापरिच्छिन्नपरः बुद्धिलक्षणपरिच्छेदरहितःअतएव परः । एवंचज्ञानेनप्रतिबिम्बाधार विलयप्रतिबिम्बस्यविलयात्सजीवः सएवपरमात्मैवहिप्रसिद्धं सइत्यस्यचात्रावृत्तिर्बोध्या ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 अथ बुद्ध्यात्मनोःपरस्पराध्यासवशात् परस्परधर्मभानमितिदार्ढ्यायपुनराह । चिद्बिम्बेति । चिदात्मचेतसोरन्योन्याध्यासवशात् पर
 स्परतादात्म्यारोपाज्जडाजडत्वंप्रतीयते । चेतसोवृत्तीनांज्ञानत्वं जीवात्मनोजडत्वंप्रतीयते । अतएवज्ञानाश्रयआत्मेति चितएवताकिं कव्यवहारः । जीवात्मनिजडात्मनिजडात्माकथ्यते बुधैरितिस्मार्तव्यवहारश्च । अत्रहेतुः । चिदित्यादि । चिद्बिम्बस्यसाचिदाभासः अ

चिद्बिम्बसाक्ष्यात्मधियांप्रसङ्गतस्त्वेकत्रवासादनलाक्तलोहवत् ॥
अन्योऽन्यमध्यासवशात्प्रतीयते जडाजडत्वंचचिदात्मचेतसोः
॥ ४१ ॥

क्षिःसहितः साक्षःसेन्द्रियः सचासावात्मामनःधीरन्तःकरणंतेषांप्रकृष्टसङ्गादतिसान्निकर्षादध्यासइत्यर्थः । अनलाक्तलोहवत् अग्नितप्तलो हपिण्डवत् अत्रदृष्टान्तः । अग्निधर्मोदाहकत्वं लोहधर्मश्चवर्तुलत्वाग्निनलेभासते । तत्रहेतुरेकत्रवासात् परस्पराविभागेनवृत्तेरित्यर्थः । तद्ब देतयोरपि परस्परधर्माध्यासइत्यर्थः ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं दार्ढ्यायपुनराह । गुरोरिति । वेदवाक्यतइत्यनेन श्रवणंगुरोःसकाशादपि । ततश्चानेनमननमुक्तम् । ताभ्यांसञ्जातोविद्यया ज्ञानरूपस्यात्मनोऽनुभवोयस्यसः । अनेनकृतनिदिध्यासनइत्यर्थः । तं चिदानन्दस्वरूपं स्वात्मानमुपाधिवर्जितं रहितोपाधिधर्ममात्मस्थं

गुरोःसकाशादपिवेदवाक्यतः सञ्जातविद्यानुभवोनिरीक्ष्य तम् । स्वात्मानमात्मस्थमुपाधिवर्जितं त्यजेदशेषं जडमात्मगोचरम् ॥ ४२ ॥

हृत्स्थंनिरीक्ष्य अपरोक्षीकृत्याशेषंजडं दृश्यंत्यजेत् । तत्रोदासीनोभवेदिति भावः ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञेयंनिरुपाधिकं स्वरूपंश्लोकद्वयेनाह प्रकाशोति अहंप्रकाशरूपः स्वप्रकाशः परप्रकाशहीनः परप्रकाशरूपोयथाघटादिः अजोजन्मादिहीनः अद्वयःसजातीयद्वितीयरहितः असकृद्विभातः सकृदपिपरेणभासकान्तरेणप्रकाशितः सकृद्विभातः नसकृद्विभातोसकृद्विभातः नत

प्रकाशरूपोऽहमजोऽहमद्वयोऽसकृद्विभातोऽहमतीवनिर्मलः ॥
विशुद्धविज्ञानघनोनिरामयःसम्पूर्णआनन्दमयोऽहमक्रियः॥४३॥

त्रसूर्योभातिनचन्द्रतारकमितिश्रुतेः नतद्भासयतेसूर्यइतिस्मृतेश्च अतीवनिर्मलः मायाकृतावरणविक्षेपरहितः विशुद्धविज्ञानघनः विशुद्धचिदेकरसः निरामयःकर्तृत्वाभिमानरहितः सम्पूर्णःदेशकालपरिच्छेदहीनः आनन्दमयः आनन्दरूपः स्वार्थेमयट् अक्रियः परिणामहीनः ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदैवेति अहंसदैवकालत्रयेऽपिमुक्तःसर्वधर्मरहितः अचिन्त्यशक्तिमान यःपरमात्मा अतिन्द्रियज्ञानमूइन्द्रियातिरिक्तज्ञानरूपःयतोवाचो निवर्त्तन्ते अप्राप्यमनसासहइतिश्रुतः अविक्रियात्मकोऽपरिणामी अनन्तपारःअन्तःकालतःपारःपरन्तीरन्तावविद्यमानौ यस्य तंनदेश

सदैवमुक्तोऽहमचिन्त्यशक्तिमानतीन्द्रियज्ञानमविक्रियात्मकः॥
अनन्तपारोऽहमहर्निशंबुधैर्विभावितोऽहंहृदिवेदवादिभिः ॥४४॥

कालपरिच्छेदहीनः ईदृशोयःपरमात्माबुधैर्हृदि अहर्निशंविभावितः सोऽहमित्यर्थः ॥ ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवभावनायाःफलमाह एवमिति उक्तरीत्यामदाआत्मानं अखण्डितात्मनाविषयानाकृष्टचित्तेन विचारमाणम्यध्यायतः धातूनामनेकार्थ स॰
 त्वात् चरमाणएवचारमाणःस्वार्थेऽण् विशुद्धभावनाब्रह्माकारान्तः करणवृत्तिरुदंतीतिशेषः सात्तोदिताकारकैर्देहान्तरप्रापककर्मभिः स

एवंसदात्मानमखण्डितात्मनाविचारमाणस्यविशुद्धभावना ॥
हन्यादविद्यामचिरेणकारकैरसायनंयद्वदुपासितंरुजः ॥ ४५ ॥

हाविद्यामचिरेणशीघ्रमेवहन्यात् यथापामितंसेवितंरसायनं रुजोहन्यात्तद्वत् ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रध्यानेइतिकर्तव्यतामाह विविक्तइति निर्जनइत्यर्थः आसीनोयथोचितंपद्मासनाद्युपविष्टः उपारतेन्द्रियः तेनशमदमादिसम्पन्नः विनिर्जितात्माप्राणायामादिभिर्जितान्तःकरणः अतएवविमलान्तराशयाविशुद्धचित्तः विज्ञानदृक्विज्ञानएवदृक्भानंयस्यसः द्रष्टृदृश्यभा

विविक्तआसीनउपारतेन्द्रियोविनिर्जितात्माविमलान्तराशयः॥
विभावयेदेकमनन्यसाधनोविज्ञानदृक्केवलआत्मसंस्थितः॥४६

नरहितः अनेननिर्विकल्पकसमाधिरुक्तः अनन्यसाधनः तत्त्वज्ञानातिरिक्तमुक्तिसाधनास्तित्वभ्रमरहितः केवलोऽसङ्गःआत्मसंस्थितः आत्मन्येवसंस्थासमाप्तिः सञ्जातायस्यसतेन नकदापिविषयान्तरसञ्चारवांचित्तः विभावयेत् ध्यायेत् ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंच यदेतत्भूतंभविष्यद्वर्तमानं विश्वंपरमात्मादर्शनंभासकोयस्यतत् तस्यभासासर्वमिदंविभातीति श्रुतेः तत्सर्वकारणेमायासान्निधाना
त्सर्वोपादानत्वेनाभिमतेआत्मनिविलापयेत् उपादानसत्ताव्यतिरेकेणकार्यसत्तांनपश्येत् तादृशस्यलक्षणमाह सम्पूर्णः अवाप्तसमस्तका

विश्वंयदेतत्परमात्मदर्शनं विलापयेदात्मनि सर्वकारणे ॥
पूर्णश्चिदानन्दमयोऽवतिष्ठते न वेद बाह्यं न च किञ्चिदान्त
रम् ॥ ४७ ॥

मः तस्यकाम्याभावात् चिदानन्दमयः तद्रूपोऽवतिष्ठते बाह्यमान्तरंच दृश्यंनजानाति सर्वत्रब्रह्मदर्शनादिति भावः ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाधिसिद्धेः पूर्वंयत्कर्तव्यंतदाह । पूर्वमिति । समाधेः सकलविषयव्यासङ्गनिवृत्तिपूर्वकं ब्रह्माकारवृत्तिः समाधिस्ततः पूर्वमखिलंस चराचरंजगत् ओङ्कारमात्रं विचिन्तयेत् । ओङ्कारोमीयतेऽनयेतिमात्रा प्रमाणं बोधकत्वेन परिच्छेदकायस्यतथाजानीयात् । तदेवविवृ

पूर्वं समाधे रखिलं विचिन्तये दोङ्कारमात्रं सचराचरं जगत् ॥
तदेव वाच्यं प्रणवो हि वाचको विभाव्यते ज्ञानवशान्न बो-
धतः ॥ ४८ ॥

णोति तदेवेति । जगदेवेत्यर्थः । प्रणवोवाचकोविभाव्यतेएतत्ह्रिप्रसिद्ध इत्यर्थः । इयंभावनाज्ञानवशादेवनबोधकः। बोधोनिर्विशेषब्रह्मसाक्षात्कारस्तद्रुत्तरंनेत्यर्थः । तस्यसर्ववृत्त्युपमर्दकत्वात् ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमर्थंविवृणोति । अकारेति । अकारसञ्ज्ञस्तद्वाच्यःपुरुषोहिविश्वकोविश्वएवविश्वकः विश्वशब्देनपरिभाषितःअयंजाग्रत्साक्षीविराट् ततःस्वप्नसाक्षीतैजसःतेनपदेनपरिभाषितःलिङ्गदेहाभिमानीहिरण्यगर्भउकारकः उकारप्रतिपाद्यईर्यते । ततः सुषुप्तिसाक्षीप्राज्ञपदवाच्यो

अकारसञ्ज्ञः पुरुषो हि विश्वको ह्युकारकस्तैजसईर्यते क्रमात् प्राज्ञो मकारः परिपठ्यतेऽखिलैः समाधि पूर्वं न तु तत्त्वतो भवेत् ॥ ४९ ॥

मायोपाधिकोमकारस्तद्वाच्यः परिपठ्यतेऽखिलैर्वेदैः । इयंभावनासमाधिपूर्वंसमाधेःपूर्वमेव नतत्त्वतः तत्त्वसाक्षात्कारेसतिनभवेत् । सर्वस्यब्रह्मणिप्रविलयात् ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविलापन प्रकारमाहद्वाभ्याम् । विश्वंत्विति । उकारमध्ये बहुधाव्यवस्थितं स्थूलदेहनिबंधनंस्थूलदेहाभिमानेन स्थितं विश्वम्पुरुषंत-द्वाचकमकारम् च विलापयेत् । तुश्चार्थे । विलीनम्भावयेत् ततस्तैजसंलिङ्गदेहाभिमानिनम् पुरुषं तद्वाचकंप्रणवद्वितीय वर्णमुकारं वि-

विश्वं त्वकारं पुरुषं विलापयेदुकारमध्येबहुधा व्यवस्थितम् ।
ततो मकारे प्रविलाप्यतैजसंद्वितीयवर्णं प्रणवस्य चान्तिमे ॥५०॥

लीनोविश्वकम्मकारे विलाप्याविलीनम्भावयित्वा ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततस्तादृशंमकारंतद्वाच्यंप्राज्ञंचकारणंकारणत्वाभिमानिनंपुरुषमिहात्मनि चिद्घनेपरे विलापयेत् तथाभावयेत् । ततः सोऽहंमर्वविला
पाधिष्ठानंपरब्रह्मविभावयेत् । तद्विशिनष्टि । सदाविमुक्तिमत् नित्यमुक्तम् । नन्वहंपदार्थस्यरागद्वेषादिमलिनस्यकथं ब्रह्मत्वभावनेसा

मकारमप्यात्मनि चिद्घने परे विलापयेत्प्राज्ञमपीह कारणम् ।
सोऽहं परं ब्रह्म सदा विमुक्तिमद्विज्ञानदृङ्मुक्त उपाधितोऽ
मलः ॥ ५१ ॥

शङ्क्याहंपदार्थंविशिनष्टि । उपाधितोमुक्तः अतएवामलःतथाभावनेसाधनं विज्ञानदृक्विज्ञानं ब्रह्ममात्रप्रत्ययाविच्छेदरूपाहक् निदिध्या
सनं सत्साक्षात्कारेसाधनंयस्यसः ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंभावनावतोलक्षणमाह । एवमिति । उक्तप्रकारेण सदा जातापरमात्मन्येकभावना यस्य सः परिविस्मृतमखिलंपुत्रदेहादि येन सः । अत एव स्वस्वरूपानन्देनैवतुष्टः नतुविषयानन्देन । तस्य कारणमिदुःखरूपत्वात्तेभ्यो विरक्तइत्यर्थः । साक्षान्नित्यात्मनिसुखप्रकाशकः साक्षा

एवं सदा जातपरात्मभावनः स्वानन्दतुष्टः परिविस्मृताखिलः ॥
आस्ते स नित्यात्मसुखप्रकाशकः साक्षाद्विमुक्तोऽचलवारिसि
न्धुवत् ॥ ५२ ॥

दौपाधिकनामरूपभेदराहित्येननित्यमखण्डितमात्मस्वरूपंयत्सुखंप्रकाशश्चतद्रूपः एवंरूपो विमुक्तोजीवन्मुक्तः । अचलंनिश्चलंवारियस्यतादृशसिन्धुवदास्ते । विषयसम्बन्धरूपकल्लोलरहितआस्तेइत्यर्थः ॥ ५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ईदृशस्यमत्प्राप्तिर्भवत्येवेत्याह । एवमिति । उक्तप्रकारेणसदाऽभ्यस्तसमाधेर्योगिनः निवृत्ताःसर्वेषामिन्द्रियाणांगोचराविषयाःशब्दादयो यस्य विनिर्जिताअशेषारिपवःकामादयोयेनतस्य । तज्जयेनविषयेष्वन्तःकरणाप्रवृत्तिः । अतएव सर्वज्ञत्वनित्यत्वनित्यतृप्तत्वबोध

एवं सदाऽभ्यस्तसमाधियोगिनो निवृत्तसर्वेन्द्रियगोचरस्य हि ॥ विनिर्जिताशेषरिपोरहंसदा दृश्यो भवेयं जितषड्गुणात्मनः ॥५३ ॥

रूपत्वस्वतन्त्रत्वनियमलुप्तत्वानन्तरूपाषड्गुणायस्यताहृशआत्मजितो वशीकृतोयेनतस्य सदादृश्योभवेयम् । एतेनमद्भक्तस्ययोगिनो ऽहंदृश्योनतुभक्तिविमुखस्येति सूचितम् ॥ ५३ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंविधोजीवन्मुक्तःप्रारब्धवशेन अनभिमानोभोगानश्नँस्तिष्ठेत् ततोमय्येवविलीयते मद्रूपोभवतीत्याह । ध्यात्वैवमिति ॥ ५४ ।

ध्यात्वैवमात्मानमहर्निशं मुनिस्तिष्ठेत्सदा मुक्तसमस्तबन्धनः ॥
प्रारब्धमश्नन्नभिमानवर्जितो मय्येवसाक्षात्प्रविलीयते ततः ५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वधर्मापेक्षयाऽयमेव धर्मो ज्यायानित्याह । आदौ चेति । भवसंसारपादिमध्यावसानेषु सर्वथा भयशोकयोः कारणं विदित्वा तत्कारणी
भूतं विधिवादयजनत्या। दिभिश्चोदितं विधितं समस्तं कर्ममार्गं काम्यं हित्वा अखिलात्मनां जीवानां स्वरूपभूतं मामात्मानं परमेश्वरं भजेत् । य

आदौ च मध्ये च तथैव चान्ततो भवं विदित्वा भयशोक कार
णम् ॥ हित्वा समस्तं विधिवादचोदितं भजेत्स्वमात्मान मथा
खिलात्मनाम् ॥ ५७ ॥

था धनस्य जनेनादौ दुःखं मध्ये पालनकृतं तत्र राजादिकृतं भयमन्ते नाशे शोकपर्यवसायि दुःखमेवं पदार्थमात्रं द्रष्टव्यम् ॥ ८५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मय्यभेदभावनया नामरूपाविभागेन तद्रूप एवभवतीत्यमुमर्थं सदृष्टान्तमाह । आत्मनीति । आत्मनिसर्वाधिष्ठानेमयिइदंस्वस्वरूपं जीव मभेदेनविभावयन्यदा । तिष्ठतीतिशेषः । तदामयात्मनापरमेश्वरेणाऽभेदेनभवति अभिन्नोभवति । तत्रदृष्टान्तः यथासमुद्रेप्रविष्टं नद्यादि

आत्मन्यभेदेन विभावयन्निदं भवत्यभेदेन मयाऽत्मनातदा ॥
यथाजलं वारिनिधौ यथापयः क्षीरेवियद्व्योम्न्यऽनिले यथाऽ
निलः ॥ ५६ ॥

जलंसमुद्रएव यथाक्षीरेगवादिक्षीरेप्रक्षिप्तंपयःक्षीरमेव यथाव्योम्निमहाकाशेघटाद्यवच्छिन्नाकाशोघटादिभङ्गे च यथाचर्मभस्त्रिकाद्यव च्छिन्नोवायुरनिलेमहावायौ नामरूपाविभागेनैकीभवतीत्यर्थः ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमात्मतत्त्वज्ञस्य जगत्सत्त्वभ्रमःस्वतएवापैतीत्याह । इत्थमिति । हिरण्यर्थे । लोकसंस्थितोऽपिजीवन्मुक्तिदशायांप्रारब्धवशाल्लोकव्यवहारंकुर्वन्नपिजगन्मृषैवेतिविभावयन्सन् यदियदा इत्थमीक्षते ऐकात्म्यं जानीयात्तदा निवृत्तजगत्सत्यत्वभ्रमो भवतीति शेषः। तत्र हेतुः श्रुतियुक्तिमानतोनिराकृतत्वात् । अतोऽन्यदार्तमित्यादिश्रुतिरूपात् जगन्मिथ्यादृश्यत्वात् शुक्तिरजतवदितितदुपबृंहितानुमानरू

इत्थं यदीक्षेत हि लोकसंस्थितो जगन्मृषैवेतिविभावयन्मुनिः ॥ निराकृतत्वाच्छ्रुतियुक्तिमानतो यथेन्दुभेदो दिशि दिग्भ्रमादयः ॥ ५७ ॥

पात्मानतःप्रमाणतोनिराकृतत्वात् तत्रदृष्टान्तोयथेन्दुभेदः एकचन्द्रेद्विचन्द्रत्वभ्रमस्तदेकत्वज्ञानेननिवर्तते यथाच दिशिप्राच्यादौअन्यदिक्त्वभ्रमः सोऽपितत्त्वज्ञानान्निवर्तते । एवंभ्रमतःपुरुषस्य दिक्षुभ्रमणाद्भ्रमोनिकटवर्तिवृक्षादौच भ्रमणभ्रमस्तत्स्थैर्यज्ञानेन निवर्तते तद्वत् ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशज्ञानेमदाराधनमेवोपायइत्याह । यावदिति । अखिलं जगन्मदात्मकंमदधिष्ठानकंमाद्विवर्तंभूतंयावन्नपश्येत्तावन्मत्प्राप्तयेश्रद्धालुः भगवदाराधनमेवज्ञानप्रापकमित्यत्र दृढविश्वासवान् अतिशयेनोर्जिताप्रवृद्धिमतीभक्तिर्मयिभगवतिपूज्यताबुद्धिरूपालक्षणं चिह्नंयस्यसः ।

यावन्नपश्येदखिलं मदात्मकं तावन्मदाराधनतत्परो भवेत् ॥
श्रद्धालुरत्यूर्जित भक्तिलक्षणो यस्तस्य दृश्यो ऽहमहर्निशं हृदि ॥ ५८ ॥

तावन्मदाराधननिष्ठोभवेत् एवंहितस्यहृदि अहमहर्निशंदृश्योभवामियेयथामांप्रपद्यन्ते तांस्तथैवभजाम्यहमितिस्मृतेः ॥ ५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वोक्तवचनजातस्य श्रुतिसमत्वं कथमेतदालोचनमपिमदाराधनप्रतिबन्धकदुरितध्वंसोपायइत्याह रहस्यमिति । श्रुतिसारसङ्ग्रहत्वेनाति

रहस्यमेतच्छ्रुतिसारसङ्ग्रहं मया विनिश्चित्य तवोदितं प्रिय ॥
यस्त्वेतदालोचयतीहबुद्धिमान् स मुच्यते पातकराशिभिः
क्षणात् ॥ ५९ ॥

गोपनीयता अप्रमाणशङ्काकलङ्कराहित्यंसूचितम् । आलोचयतिसम्यग्विचारयति ॥ ५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ भगवानुक्तमेवार्थंसङ्क्षेपेण दार्ढ्यायपुनराह भ्रातरिति । यदीतियादित्यर्थे । यदीदंजगत् परिदृश्यते तत्सर्वंमायैवेतिज्ञात्वेति शेषः चेतसासर्वंपरिहृत्यतत्रौदासीन्यंकृत्वामद्भावनयामदैक्यभावनया भावितंशुद्धंमानसंयस्यताद्दशास्तिष्ठ । इत्युपदिश्याशिषंप्राह निरामयः

भ्रातर्यदीदं परिदृश्यते जगन्मायैव सर्वं परिहृत्य चेतसा ॥ मद्भावनाभावितशुद्धमानसः सुखी भवाऽऽनन्दमयो निरामयः ६०

सन्सुखीभव । सर्वदुःखनिवृत्त्येति भावः । ततोऽन्तरङ्गामन्यामाशिषमाह आनन्दमयोभवेति तद्रूपोभवेत्यर्थः । यद्यपिपूर्वमानन्दरूपत्वमस्त्येवतथाऽपितत्प्राप्तिर्विस्मृतकंठस्थभूषणप्राप्तिवत ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंरीत्यास्वोपासकस्यलोकपावनत्वमाह। यइति । कदावा यदाकदाचिदित्यर्थः । हृदानिर्मलेनान्तःकरणेन यो मामगुणं प्राकृतसत्त्व रजस्तमोरूपगुणरहितम् । सच्चिदानन्दरूपत्वात् । अतएवगुणादव्याकृतात्परंमायातीतम् । यदिवायद्वत्वर्थे । गुणात्मकं सर्वज्ञत्वादिलोकोत्तरलावण्यादिगुणवानात्मासूर्तिर्यस्यतं दृश्यमानं रूपं सेवते । साद्विविधोऽप्युपासकःअहं मत्स्वरूपएव । मामकइत्यर्थोवा । भि-

य: सेवते मामगुणं गुणात्परं हृदा कदा वा यदि वा गुणात्मकम् ॥ सोऽहंस्वपादाञ्चितरेणुभिः स्पृशन्पुनाति लोकान्त्रितयं यथा रविः ॥ ६१ ॥

योऽहिज्ञानिनोऽत्यर्थमहंमचममप्रिय इत्युक्तेः । तादृशोभक्तःस्वपादलग्नरेणुभिःसंस्पृशन्लोकत्रयमपि पुनाति । अज्ञानध्वान्तनिरसने नपवित्रीकरोति । यथारविःस्वकरैर्जगद्वितिमिरीकरोति तद्वत् ॥ ६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानीमेतद्ग्रन्थार्थालोचनासमर्थस्यपाठमात्रतोऽपिमहत्फलमाह । विज्ञानंविज्ञानजनकं करणव्युत्पत्त्यैतिबोध्यम् । वेदान्तैरुपनिषद्वाक्यैर्वेद्यंचरणंजगज्जन्मादिलक्षणंकर्मयस्यतेन ननुपाठमात्रादेतादृशमहत्फलप्राप्तिःकथमित्याशङ्क्यभवत्येवेति सूचयंस्तत्रहेतुमाह । मद्वचने

विज्ञानमेतदखिलंश्रुतिसारमेकं वेदान्तवेद्यचरणेनमयैवगीतम् ।
यःश्रद्धया परिपठेद्गुरुभक्तियुक्तो मद्रूपमेति यदि मद्वचनेषुभक्तिः
॥ ६२ ॥ इतिश्री अध्यात्मरामायणे रामगीता समाप्ता ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसम्वादे उत्तरकाण्डे श्रीरामगीतायां पञ्चमःसर्गः ॥ ५ ॥

षुभक्तिर्विश्वासोयदीतिअर्थाद्गुरुवाक्यविश्वासस्यैव फलदायकत्वादितिभावः ॥६२॥ इत्यध्यात्मरामायणेउमामहेश्वरसम्वादे उत्तरकाण्डे सेतौपञ्चमःसर्गः ॥ ६२ ॥ श्रीरामचन्द्रार्पणमस्तु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीराममन्त्रःखलु तारकाख्यः संसारसन्तारणसुप्रसिद्धः ॥ भक्-
त्याऽप्यभक्त्या समुपासितोयः श्रेयांसि सर्वाणि ददात्यवश्य
म् ॥ १ ॥ तन्तारकंसम्प्रतिपादयन्ती श्रीरामगीता सकलैः सुसे
व्या ॥ विज्ञप्तिमित्थंजनको विनीतः समर्पयत्यार्यजनेषुहर्षात् २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प,	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति
स्यर्द्धि	स्पर्द्धि	१	२	१	शाघि	शाधि	३	२	६	नाशे	नाशो	६	१	१
जीव्य	जीव्य	१	२	३	व्यत्र	व्यत्र	४	१	१	नन्वितिश	नन्वितिशे	६	२	१
सम्बीन्धनीः	सम्बन्धिनीः	२	२	१	ष्ठामे	ष्ठानमे	४	२	३	विदा	विदा	६	२	२
व्रह्म	व्रह्म	२	१	२	व्रह्म	व्रह्म	४	२	१	मेत्रे	मेव	६	२	२
व्रह्म	व्रह्म	२	१	६	वलेन	वलेन	४	२	७	व्येतीत	व्यतेति	७	१	१
वोधोऽास्ति	वोधोऽसि	३	१	४	निघृत्ते	निवृत्ते	५	१	१	वीरहा	वीरहा	७	१	१
संवन्ध	सम्वन्ध	३	१	७	कत्व	कत्वा	५	१	१	सद्दष्ट	सद्दृष्ट	८	१	३
भवस्यंससार	भवस्यसंसार	३	२	१	नक	नैक	५	१	१	विशुद्धं	विशुद्ध	८	२	१
न्सार	सार	३	२	२	बेदान्त	वेदान्त	५	१	१	कारांतः	कारान्तः	८	२	२
पर्वग	पवर्ग	३	२	२	पूर्वे	पूर्वे	५	१	२	वृत्ति	वृत्ति	९	१	१
वारिधि	वारिधि	३	२	२	वुद्ध्या	बुद्ध्या	५	१	६	स्वत्राना	स्वना	९	२	१
					एवं	एव	५	१	६	वृत्यु	वृत्यु	१०	१	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
रीप	रपि	११	२	१
नर्दष्टा	र्नदष्टा	१२	१	४
र्वाद्धे	र्वाद्धे	१२	१	७
त्याभिः	त्माभिः	१२	२	६
शुद्द	शुद्ध	१३	१	१
जीवया	जीवयो	१३	१	२
निर्वाध	निर्वाध	१४	१	१०
भव	भव	१९	१	४
अर्जोद्व	अर्जोऽद्व	१६	२	६
द्व त्	द्वात्	१७	२	१

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
ह्लाभ	ह्लाभे	१८	१	८
इतिः	इति	१८	२	२
ज्ञानन	ज्ञानेन	१९	१	१
वुद्दया	वुद्धया	२०	१	९
रागादि	रागादे	२१	१	३
विलय	विलय	२१	१	७
धम	धर्म	२१	२	१
म्वस्य	म्वंयस्य	२१	२	२
वुवै	वुधै	२३	१	५
एव	एवं	२३	२	१
द्रष्ट	द्रष्टृ	२४	१	२

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
विभान्युत	विभान्यते	२५	१	४ मु
लिङ्गेद	लिङ्गदे	२६	१	२
बोधकः	बोधतः	२५	१	६
विज्ञानं ब्रह्म	विज्ञानंनिादि ध्यासनं ब्रह्म	२६	२ ६	३
भेदेरा	भेदरा	२७	१	६
रुपा	रूपाः	२७	२	९
आत्म	अत्मा	२७	२	९
मुनिति	मुनिस्ति	२८	१	२
भव	भवं	२८	२	१

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
तदकत्व	तदेकत्व	२६	२	७	वतथाऽ	वतथाऽ	३१	१	१	मद्वचने	मद्वचने	३२	१	२
भ्रमण	भ्रमणं	२६	२	८	कंठ	कण्ठ	३१	१	२	तन्तारकं	तत्तारकं	३२	२	३

नेपाल पाशुपत, यन्त्रालये मुद्रिता.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इती रामगीता सटीका समाप्ता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ठ. नं. १६६४४

अथ रामगीता सटीका प्रारभ्यते ॥

मू० ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ रामंरत्नकिरीटकुण्डलयुतं केयूरहारान्वितं
सीतालङ्कृतवामभागममलं सिंहासनस्थं विभुम् ॥ सुग्रीवादि
कपीश्वरैःसुरवरैः संसेव्यमानं सदा विश्वामित्रपराशरादिमुनि-
भिः संस्तूयमानं भजे ॥ १ ॥ इतिध्यात्वा ॥ श्रीमहादेवउवाच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ ध्यायेत्वाजानुबाहुं धृतशरधनुषं वद्धपद्मासनस्थं पीतंवासोवसानं नवकमलदलस्पर्द्धिनेत्रं प्रसन्नम् ॥ वामाङ्कारूढ सीतामुखकमलमिलल्लोचनं नीरदाभं नाना लङ्कारदीप्तं दधतमुरुजटामण्डलं रामचन्द्रम् ॥ १ ॥ ततइति जगतां यानि मङ्गलानि आनन्दास्तेषामुपजीव्यभूतं मङ्गलं ब्रह्मानन्दः सएवात्मास्वरूपं तेन तस्यैवानन्दस्यान्यानि भूतानिमात्रामुपजीवन्तीति श्रुतेः मङ्ग

ततोजगन्मङ्गलमङ्गलात्मना विधाय रामायणकीर्तिमुत्तमाम् ॥
चचार पूर्वाचरितं रघूत्तमो राजर्षिवर्य्यैरभिसेवितं यथा ॥ १ ॥

लानाञ्चमङ्गलमिति स्मृतेश्च किंच जगतां मङ्गलं कल्याणं यस्मात्तादृशकल्याणरूपआत्मामूर्तिस्तया उत्तमांश्रोत्रादीनां मोक्षदत्वेना त्युत्तमां रामायणकीर्तिं वाल्मीक्यादि कृत नानाविध रामायण प्रवर्तिकां रावणवधादिजां कीर्तिंविधाय स्थितोरघूत्तमः ततः सीताप रित्यागानन्तरं पूर्वैः स्ववंशजैराचरितं प्रजापालनसत्कथाश्रवणादिकं केवलंतत्पूर्वजैरेवाचरितमितिन किंत्वन्यैरपि राजर्षिश्रेष्ठैर्य थाऽभिसेवितं तथाचचार कृतवान् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदारागुरुदेवविश्वासलक्षणमहागुणवती यद्वा उदारा दानशीलाबुद्धिर्यस्य तेन पुरातनीः प्राचीनराजसम्बन्धिनीः शुभाः धर्माधर्मनिर्णेत्रीः प्रमत्तस्य स्वगोमण्डलमिश्रितब्राह्मणगोदानात् प्रमत्तस्य नृगस्य राज्ञो द्विजस्य शापात्तिर्यक्त्वमाह तेनाज्ञातकृतब्रह्मस्वापहारेण परमधा

सौमित्रिणापृष्ट उदारबुद्धिना रामःकथाःप्राह पुरातनीःशुभाः ॥
राज्ञः प्रमत्तस्य नृगस्य शापतो द्विजस्य तिर्यक्त्वमथाह राघवः
॥ २ ॥

र्मिकस्यापीदृश्यवस्थेति सर्वथाब्रह्मस्वविमुखताधर्मइतिसूचितम् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकान्तेविजने उपस्थितंप्राप्तम् विनयान्वितः सन् भक्त्यागुरुरयमिति बुद्ध्या प्रणम्य अनेनगुरूपसदनप्रकारउक्तः आसादितंशुद्धंभाव

कदाचिदेकान्त उपस्थितंप्रभुं रामं रमालालितपादपङ्कजम् ॥
सौमित्रिरासादितशुद्धभावनः प्रणम्यभक्त्याविनयान्वितोऽब्र-
वीत् ॥ ३ ॥

नं भावनाकरणमन्तः करणंयेनसः शुद्धान्तःकरणइतियावत् भगवदुक्तसत्कथाश्रवणेन शुद्धान्तःकरणइत्यर्थः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हे महामते महतीसर्वविषयामतिर्यस्य तस्य संबोधनं त्वं शुद्धबोधोऽसि अनवच्छिन्नचैतन्यरूपोऽसि सर्वदेहिनामात्माऽसि जीवानांतत्प्रतिबिम्बत्वात् अधीशोऽसि अन्तर्यामित्वान्नियन्ताऽसि वास्तवभेदाभावाच्च सर्वात्मत्वम् औपाधिकभेदाच्च नियन्तृनियम्यभावोबोध्यः निराकृतिः अस्मदादिवत्स्वार्जितकर्माधीनशरीराकृतिरहितः नन्वेवंसर्वैः कथमेवंनज्ञायतेऽतआह ज्ञानदृशां स्वयमेवप्रतीयसे ज्ञायतेऽ

त्वं शुद्धबोधोऽसि हि सर्वदेहिनामात्माऽस्यधीशोऽसि निराकृतिःस्वयम् ॥ प्रतीयसे ज्ञानदृशां महामते पादाब्जभृङ्गाहितसङ्गसाङ्गिनाम् ॥ ४ ॥

नेनेतिज्ञानं वेदान्तवाक्यजातं तदेवदृक्दर्शनसाधनंयेषां तेषामितिसंबन्धसामान्येषष्ठी तैरित्यर्थः तान्शब्दक्लाभश्च त्वद्भक्त्यधीनइत्याह पादेति त्वच्चरणकमलयोर्भृङ्गवदाहितःकृतः सङ्गोयेन तादृशान्तः करणसङ्गवतां त्वच्चरणकमल सक्षमान्तः करणवतामित्यर्थः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ प्रार्थयते अहमिति भवस्यसंसारस्यापवर्गो निवृत्तिर्यस्मात्तादृशंतवपादाम्बुजंप्रपन्नोऽस्मिशरणंप्राप्तोऽस्मि योगिभावितं योगीभिः सं-
न्सारमुक्तये भावितम् अनेनतस्य भवापवर्गत्वे सदाचारः प्रमाणमुक्तम् प्रार्थनीयमाह अपारवारिधिरूपंयदज्ञानंसंसारमूलकारणं यथासुखम्

अहं प्रपन्नोऽस्मि पदाम्बुजं प्रभो भवापवर्गं तव योगिभावितम् ॥ यथाञ्जसाज्ञानमपारवारिधिं सुखं तरिष्यामि तथाऽनुशाधि माम् ॥ ५ ॥

क्लेशेन तरिष्यामि तथा मामनुशाधिशिक्षय अपारवारिधिमित्यनेनसपारप्रसिद्धसमुद्राद्व्यतिरेकउक्तः अशक्यतरणताऽनेनध्वनिता ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्थोत्तरमवतारयति श्रुत्वेति रामः सौमित्रिवचः श्रुत्वा अथशब्दोवाक्यालङ्कारे तदा श्रवणाव्यवहितकाले एवप्रपन्नानां भक्तानामार्ति संसारदुःखंहरतितादृशः प्रपन्नाश्रमादिहीना भक्तानुग्रहपरा च धीर्यस्यसः क्षितिपालानां राज्ञां भूषणभूतोज्ञानरूपतमसउपशान्तये त

श्रुत्वाथ सौमित्रिवचोऽखिलं तदाप्राहप्रपन्नार्तिहरःप्रसन्नधीः ॥
विज्ञानमज्ञानतमोपशान्तये श्रुतिप्रपन्नं क्षितिपालभूषणः॥ ६॥

दर्थम् सन्धिरार्षः श्रुतिभिः तमेवविदित्वाऽतिमृत्युमेतीत्यादिश्रुतिभिः प्रपन्नं तत्फलकत्वेन बोधितं विज्ञानमात्मतत्वज्ञानमिति सामान्य तः प्रथमंप्राह ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथतादृशज्ञानप्राप्तये क्रमेणबहिरङ्गान्तरङ्गसाधनान्याह आदाविति स्ववर्णाश्रमेषु शास्त्रेण वर्णिता याः क्रियानित्यनैमित्तकयज्ञदानादिरूपास्ताः कृत्वा समासादितशुद्धमानसः प्राप्तान्तःकरणशुद्धिः तत्पूर्वमुपात्तसाधनः तदनुष्ठानपूर्वकमेवउपात्तानिसाधनानि शमदमादीनियेन तादृशः अनेनकर्मणां बहिरङ्गत्वं शमादीनामन्तरङ्गत्वं स्फुटमेवोक्तम् किंच शमदमवैराग्यदार्ढ्यपर्यन्तं कर्मानुष्ठानमेवेति

आदौ स्ववर्णाश्रमवर्णिताः क्रियाः कृत्वा समासादितशुद्धमानसः
समाप्य तत्पूर्वमुपात्तसाधनः समाश्रयेत्सद्गुरुमात्मलब्धये॥ ७॥

सूचितम् ततस्तत्कर्मानुष्ठानं समाप्य त्यक्त्वा संन्यस्येतियावत् आत्मलब्धये आत्मज्ञानाय तत्फलकाय तत्वमस्यादिवाक्यार्थविचाराय सद्गुरुं श्रोत्रियंब्रह्मनिष्ठमित्यादि लक्षणलक्षितं समाश्रयेत् सेवेत अनेनव्युत्पत्तिबलेन स्वयमेववाक्यार्थविचारः क्रियमाणो न फलायेति सूचितम् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसारस्यभ्रमिमच्चक्ररूपत्वात्तन्निवृत्तेश्चतत्कारणाज्ञाननिवृत्तिमूलकत्वदज्ञाननिवृत्तेश्चतत्त्वज्ञानकसाध्यत्वात्तत्त्वज्ञानस्यचवेदान्त विचारसा-
ध्यत्वात्तदर्थंगुरुसमाश्रयणमित्याह क्रियेति भवःसंसारश्चक्रवद्विपरिवर्तमानईर्यते कथ्यते तदेवोपपादयति आदृताआदरपूर्वंपूर्वजन्मार्जि
ताक्रियाएतस्यशरीरोद्भवस्यजन्मनोहेतुः तत्रजन्मनिसुरागिणोविषयाभिलाषवतः तौ शास्त्रप्रसिद्धौ धर्मेतरौ धर्माधर्मौ प्रियाप्रियौसुखदुः

क्रियाशरीरोद्भवहेतुरादृताप्रियाप्रियौतौभवतःसुरागिणः ॥
धर्मेतरौतत्रपुनः शरीरकंपुनः क्रियाचक्रवदीर्यतेभवः ॥ ८ ॥

खजनकौभवतःकस्यचिदधर्मएवसुखत्वबुद्ध्याप्रवृत्तिः कस्यचिद्धर्मएवंकदाचिदित्यप्यूह्यम् एवंतत्रोत्पादितकर्मणापुनःशरीरंपुनःक्रिया-
इत्येवंचक्रवद्विपरिवृत्तिः । यथाचक्रेभ्राम्यमाणेऽधोभागः कदाचिदुपरिउपरितनश्चाधः पुनरुपरिपुनरधएवंजन्मक्रिययोर्जन्यजनक-
भावेनपरिवृत्तिरिति बोध्यम् ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तस्यचाज्ञानमेवमूलमित्याह अज्ञानमेवेति अत्रविधौसंसारनिवृत्तिलक्षणेकर्तव्येऽर्थेतद्ज्ञानमेवमूलकारणत्वादज्ञानहानमेवविधीयते साध-
नत्वेनेतिशेषः ननुकर्मैवतन्नाशकमस्तुकिंज्ञानेनेत्याशङ्क्याह विद्यैवज्ञानमेवतन्नाशविधौमूलाज्ञाननाशनेपटीयसीसमर्थानकर्मसमर्थमितिशेषः

अज्ञानमेवास्यहिमूलकारणंतद्धानमेवात्रविधौविधीयते ॥ विद्यै
वतन्नाशविधौपटीयसीनकर्मतज्जंसविरोधमीरितम् ॥ ९ ॥

यतस्तत्तज्जमज्ञानजम् आत्मस्वरूपाज्ञानजन्यदेहाद्यभिमानजन्यत्वात्कर्मणोज्ञानजन्यत्वंबोध्यम् ननुतज्जन्यस्यापितन्नाशकत्वंवृश्चिककर्क
ट्यादौदृष्टमित्याशङ्क्यतज्जन्यत्वेवाननाशकत्वमप्रयोजकंकिन्तुसविरोधत्वमेवेत्याह यतसविरोधंतदीरितंनाशकमुक्तमित्यर्थः ॥ ९ ॥

अतएवकर्मणानाज्ञानहानिरित्याह नाज्ञानेत्यादि यतःकर्मणाविरोधाभावान्नाज्ञाननाशेनापिरागनाशोवस्तुतः कर्मानुष्ठानात्पुनः सदो
षंक्षयिफलत्वादिदोषविशिष्टंकर्मैवोद्भवेत्कर्मणश्चपुनःसंसारएवेतिनमुक्तिमत्याशा ततस्तस्माद्बुधोविवेकीज्ञानविचारवान् ज्ञायतेऽनेने·

नाज्ञानहानिर्नचरागसङ्क्षयोभवेत्ततः कर्मसदोषमुद्भवेत् ॥ ततः
पुनः संसृतिरप्यवारितातस्माद्बुधोज्ञानविचारवान्भवेत् ॥ १० ॥

तिज्ञानंवेदान्तवाक्यंतद्विचारवान्भवेत ॥ १० ॥

CC-0. In Public Domain. Digitization by eGangotri

इदानींज्ञानस्यैवमोक्षहेतुत्वंत्वकुंज्ञानकर्मसमुच्चयवादंदूषणायानुवदतिसार्धेन नन्विति नन्वितिशङ्कायाम् यथाविद्यावेदमुखेनश्रुतिपुराण-
लक्षणेन ब्रह्मविदाप्नोतिपरम् इत्यादिनापुरुषार्थसाधनमुक्ता तथा उभाभ्यामेवपक्षाभ्यांयथाखेपक्षिणांगतिः तथैवज्ञानकर्मभ्यांप्राप्यते
ब्रह्मशाश्वतम् इत्यादिनाक्रियाऽपितत्साधनत्वेनोक्ता किंच क्रियाकर्तव्यत। तृतीयार्थेप्रथमा कर्तव्यतयाआवश्यकेकृत्येअवश्यकर्तव्यत-

**ननुक्रियावेदमुखेनचोदितायथैवविद्यापुरुषार्थसाधनम् ॥ कर्तव्य
ताप्राणभृतःप्रचोदिताविद्यासहायत्वमुपैतिसापुनः ॥ ११ ॥**

यापचोदितानित्यनैमित्तिकरूपा एवंचनदकरणेप्रत्यवायोत्पत्त्याज्ञानोत्पत्तिरेवनस्यात् तस्मात्सापुनर्विद्यायाःसहायत्वंप्राप्नोतिघटेजन-
नीयेयथादण्डचक्रादीनांपरस्परसहायता ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्तव्यतेतिस्त्रोक्तमंत्रेविवृणोति कर्मेति वीरहावाएषदेवानांयोऽग्निमुद्वासयतेयावज्जीवमग्निहोत्रंजुहोति इतिश्रुतिः तत्रासिद्धान्तीशङ्कते नन्विति ध्रुवंस्थिरंकार्यमिदंपुरुषार्थमोक्षजनिकाविद्यायतः स्वतन्त्राविनाऽपिसहायेन स्वकार्यसंपादनेसमर्था यथातेजस्तिमिरनिवर्तन-

कर्माकृतौदोषमपिश्रुतिर्जगौतस्मात्सदाकार्यमिदंमुमुक्षुणा॥ननु स्वतन्त्राध्रुवकार्यकारिणीविद्यानकिञ्चिन्मनसाऽप्यपेक्षते ॥ १२

समर्थंमनसाऽपिकिञ्चित्सहायभूतंवस्तुनापेक्षते तथाफलेजननीयेसहायान्तरसंभावनाऽपिनेतिभावः अनेनविद्याफलजननेनिरपेक्षास्वतन्त्र-त्वात्तेजोवदित्यनुमानंसूचितम् ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समुच्चयवादीपरिहराति नेति त्वदुक्तेनेत्यर्थः सत्यकार्यः अक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवति इत्यादिवेदनवोधितःस्थिरकार्योऽपि-
अध्वरः यथाऽन्यानपिकारकादिकान् आरादुपकारकप्रयाजाद्यङ्गानिदेशकालादीनिचप्रकाङ्क्षते तथाविद्यापिअग्निहोत्रंजुहोतिइत्यादिवि

नसत्यकार्योऽपिहियद्वदध्वरः प्रकाङ्क्षतेऽन्यानपिकारकादिकान्
तथैवविद्याविधितः प्रकाशितैर्विशिष्यते कर्मभिरेवमुक्तये ॥ १३ ॥

धिवाक्यतःतत्समूहेनप्रकाशितैः कर्मभिः सहितैवमुक्तयेविशिष्यतइत्यर्थः विद्याफलदानेकर्मापेक्षा अङ्गित्वात् प्रयाजाद्यङ्गापेक्षदर्शा
दिवदितिसत्प्रतिपक्षानुमानमनेनसूचितम् ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदनूदयसिद्धान्तीदूषयति केचिदिति यत्केचिद्वितर्कवादिनइतिज्ञानकर्मणोसमुच्चित्यमुक्तिसाधनंवदन्तितदप्यसत् यथाकेवलंकर्म मोक्ष साधनमित्यमत्तथातन्मीलितमित्यप्यसत् तत्रहेतुर्दृष्टविरोधकारणात् दृष्टोयोविरोधः सर्वलोकदृष्टविरोधरूपात्कारणात्तदसदित्यर्थः विरो

केचिद्वदन्तीतिवितर्कवादिनस्तदप्यसद्दृष्टविरोधकारणात् ॥
देहाभिमानादभिवर्धतेक्रियाविद्यागताहङ्कृतितःप्रसिद्ध्यति १४

धमेवाह देहाभिमानात्क्रियावर्धतेअनात्मनिदेहादावात्मत्वाभिमानात्क्रियावृद्धिः विद्यातुगताहङ्कृतितः गताहङ्कृतिर्यस्यतस्यनष्टाहङ्कृतेः प्रसिद्ध्यति सार्वविभक्तिकस्तासिः एवंचाहङ्कारसत्तामूलकत्वात्क्रियाज्ञानयोः समुच्चयोविरुद्धइत्यर्थः ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथपूर्वपक्षयुक्तानुमानंदूषयनविद्यास्वरूपमाह विशुद्धंविज्ञानंयेभ्यस्तेषांवेदान्तवाक्यानांयाद्विशेषेणरोचनंरलयोरभेदादालोचनंविचार स्तेनाञ्चिताप्रापितायाचरमाआत्मवृत्तिर्ब्रह्माकारांतःकरणवृत्तिः साविद्येतिभण्यतेविद्वद्भिरितिशेषः पुनःसमुच्चयवारणायविद्याकर्मणो वैषम्यमाह कर्मयज्ञादिअखिलकारकादिभिःकर्तव्यकर्मादिभिरङ्गैश्चसहितंसदुदेति फलोन्मुखंभवति विद्यापुनरखिलकारकादिनिहन्ति

विशुद्धविज्ञानविरोचनाञ्चिताविद्याऽऽत्मवृत्तिश्चरमेतिभण्यते ॥ उदेतिकर्माखिलकारकादिभिर्निहन्ति विद्याऽखिल कारकादिकम् ॥ १५ ॥

तत्रकर्तृत्वादिबुद्धिंनिहन्ति सकलव्यापारपरित्यागेनब्रह्मणिसमाप्तिर्हिविद्या अतः स्वोत्पत्तौचित्तशुद्धिद्वाराकर्मसापेक्षास्वफलेजनयितव्यं-तान्निरपेक्षैवान्यथाविद्यास्वरूपस्यैवभङ्गापत्तेरितिपूर्वपक्षयुक्तहेतोरसिद्धिरितिभावः ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपसंहरन्मुमुक्षोर्वृत्तिप्रकारमाह तस्मादिति विद्याविरोधाद्विद्यायाःकर्मणासह विरोधेनसमुच्चयोनभवेत्तस्मात्सुधीर्मुमुक्षुरशेषतःकर्मत्यजे-
त् काम्यंतुसर्वथात्याज्यमेवनित्यनैमित्तिकमपियावाच्चित्तशुद्धिकर्तव्यमेव ततोऽपिब्रह्माणिचित्तस्थैर्यपर्यन्तं कर्तव्यमेव ततस्तदनुसन्धानप्र-

तस्मात्त्यजेत्कार्यमशेषतः सुधीर्विद्याविरोधान्नसमुच्चयोभवेत् ।
आत्मानुसन्धानपरायणःसदा निवृत्तसर्वेन्द्रियवृत्तिगोचरः १६

तिबन्धकत्वात्प्रयोजनाभावाच्चतदपित्याज्यमेवेतिभावः इदानींमुमुक्षुकर्तव्यमाह निवृत्ताःसर्वेषामिन्द्रियाणां गोचराविषयाःशब्दादयोय
स्मात्तादृशःसन् आत्मनःसच्चिदानन्दस्यानुसन्धानमेवपरमयनंप्राप्यंयस्यतथाविधोभवेत् अत्रेन्द्रियप्रत्याहारःकर्तव्यत्वेनोक्तस्तेनतत्पूर्वंप्रा-
णायामाद्यर्थादाक्षिप्तम् ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रागिविरागिभेदेनकर्मणोकर्तव्यताकर्त्तव्यतेआहयावदिति माययाविद्ययाशरीरादिष्ववानात्मसुआत्मधीरहङ्कर्तेत्यादिरूपायावद्वर्ततेतावद्वि
धिवादकर्मणाम् विधिर्यजेतेत्यादिश्रुतिर्वादःकर्तव्यताबोधकोयेषांकर्मणांविधेयोवश्यवर्त्तितत्कर्मकर्ताभवेत तदपगमेतुतदाखिलं जगन्नेतीति

याचच्छरीरादिषुमाययात्मधीस्तावद्विधेयोविधिवादकर्मणाम् ॥
नेतीतिवाक्यैरखिलं निषिद्ध्य तज्ज्ञात्वापरात्मानमथत्यजेत्क्रि
याः ॥ १७ ॥

वाक्यैः अथातआदेशोनेतिनेतिइत्यादिवाक्यैर्निषिध्य मिथ्यात्वेननिर्णीयताद्विलक्षणतयासत्यत्वेनपरमात्मस्वरूपंज्ञात्वाक्रियास्त्यजेत्नि
रूपितमेतत् ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मविज्ञानेसत्यवश्यमविद्या निवर्ततइत्याह यदेति आत्मनिशुद्धेन्तःकरणेपरमात्मनईशस्यात्मनोजीवस्यचयोविभेदोमायान्तःकरण रूपोपाधिद्वयकृतोविभेदोभेदस्तस्यभेदकं नाशकंभास्वरंप्रकाशशीलंयद्विज्ञानमितरवृत्त्युपमर्दनपूर्वकंब्रह्माकाराऽखण्डाद्वृत्तिर्यदाऽवभाति

यदापरात्मात्मविभेदभेदकंविज्ञानमात्मन्यवभाति भास्वरम् ॥
तदैवमायाप्रविलीयतेऽञ्जसासकारकाकारणमात्मसंसृतेः॥ १८॥

असंभावनादितिरस्कारेणोदेति तदैव सकारकाजन्मान्तरप्रापककर्मसहितामायातत्तज्जीवोपाधिभूताविद्याऽञ्जसाझदितिप्रविलीयतेनश्यति ननुतन्नाशेऽपिसंसारनाशःकथमतोमायाविशेषणम् आत्मसंसृतेःकारणंसंसारस्योपादानकारणमेवंचतन्नाशेकार्यनाशोभवत्येवेतिभावः १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उक्तमेवार्थं पुनर्दाढर्यायाह श्रुतीति तत्त्वमसीत्यादिश्रुतिरूपैःप्रमाणैस्तज्जनितज्ञानेन नाशितासाविद्याकथमपिकार्यकारिणीभविष्यतीति काकुरत्र सर्वथानेत्यर्थः असतःकार्यकारित्वासंभवादितिभावः पुनश्चतस्यानोद्भवइत्याह विज्ञानमात्रादिति अमलाशुद्धाद्वितीयतःद्विती

श्रुतिप्रमाणाभिविनाशिताचसाकथंभविष्यत्यपिकार्यकारिणी॥
विज्ञानमात्रादमलाद्वितीयतस्तस्मादविद्यानपुनर्भविष्यति १९

यात्मविषयकाद्विज्ञानमात्रादितरासहकृतान्निदिध्यासनपरिपाकजज्ञानाद्यतोनष्टातस्मात्सापुनर्नभविष्यति रज्ज्वज्ञानमूलकस्य सर्पस्य रज्जुज्ञानेन निवृत्तस्ययथानपुनरुत्पत्तिरितिभावः ॥ १९ ॥

CC-0. In Public Domain. Digitization by eGangotri

विद्यायाइतरनिरपेक्षायाएवमोक्षकारणत्वमुक्तंयुक्तिपूर्वकंपुनःकथयतिश्रोतृदार्ढ्याय।यदीति। यदिनष्टातत्त्वज्ञाननाशिता सा न पुनः मसूयतेनोत्पद्यतेतदाकारणाभावादहंमतिःकथंभवेत् । कथमपिनभवेदित्यर्थः। तदभावाच्चतत्कालेकर्माभावइतिस्वफलजननेसास्वतन्त्राइ

यदिस्मनष्टा नपुनःप्रसूयते कर्ताऽहमस्येति मतिः कथं भवेत् ॥
तस्मात्स्वतन्त्रा न किमप्यपेक्षते विद्या विमोक्षाय विभाति केव
ला ॥ २० ॥

तरनिरपेक्षैवनाकिमप्यपेक्षते द्वितीयस्यासंभवात् अतः केवलाऽसहायैवविमोक्षायविभातितत्फलिकाभवतीत्यर्थः ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रार्थे श्रुतिरपिप्रमाणमित्याह सेति साप्रसिद्धा नकर्मणानप्रजयाधनेनत्यागेनैके अमृतत्वमानशुः इत्यादिकातैत्तिरीयश्रुतिःप्रशस्तानामर्थ
वादैःप्राशस्त्येनबोधितानामपिकर्मणांन्यासंत्यागंसादरंस्फुटमाह नतुकर्मसमुच्चयमित्यर्थः तथावाजिनांवाजसनेयिनाम् एतावदरेखल्वमृत

सातैत्तिरीयश्रुतिराहसादरंन्यासंप्रशस्ताखिलकर्मणां स्फुटम् ॥
एतावदित्याहचवाजिनांश्रुतिर्ज्ञानंविमोक्षायनकर्मसाधनम् २१

त्वम् इत्यादिका ज्ञानंविमोक्षायसाधनं नकर्मेत्येतदाह ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहङ्कारत्यागरूपकारणवैषम्यात् क्रियाज्ञानयोर्वैषम्यमुक्त्वा फलमयुक्तमपिवैषम्यमाह विद्येति हेसमुच्चयवादिन् त्वयाक्रतुराग्निष्टोमादिर्वि द्यासमत्वेनदर्शितः परन्तुसमोदृष्टान्तोनोदाहृतः अनेनक्रतुर्विद्यासमः श्रुतिबोधितकर्तव्यताकत्वादित्यनुमानान्निरस्तम् दृष्टान्ताभावा-त् अन्वय्येवानुमानन्नव्यतिरेकीतिभावः एतच्चाकरेविस्तरेणप्रपञ्चितम् ननुविद्याकर्मणीसमे एकफलत्वाच्चक्रदण्डादिवदित्यनुमान-

विद्या समत्वेनतु दर्शितस्त्वया क्रतुर्नदृष्टान्त उदाहृतः समः ॥
फलैःपृथक्त्वाद्बहुकारकैः क्रतुःसंसाध्यतेज्ञानमतोविपर्ययम् २२

मितिचेत्तत्राह फलैः पृथक्त्वात् षष्ठ्यर्थेतृतीया फलानांभेदादित्यर्थः एवंचस्वरूपासिद्धोहेतुरितिभावः समानकारकत्वमपिहेतुर्नेत्याह क्रतुर्बहुभिः कारकैरहंममताभिमानरूपैरान्तरैर्बाह्यैश्चदेशकालादिनियमैश्चसाध्यते ज्ञानन्त्वतोविपर्ययवदतोनतयोः साम्यमितिभावः २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वकरणेप्रत्यवायभिया कर्मकार्यमितिचेन्नेत्याह सप्रत्यवायइति कर्मत्यागेनाहंनिश्चयेनाहंप्रत्यवायसंहितोभविष्यामीत्येवंशुद्धात्मानि-अनात्मधर्मस्यधीरप्रज्ञस्यतत्त्वज्ञानविकलस्यप्रसिद्धा नतुतत्त्वदर्शिनः तस्याहंबुद्धेरभावात् पापादेरज्ञात्मधर्मतानिश्चयाच्च तस्माद्बुधैःकर्म

स प्रत्यवायोह्यहमित्यनात्मधीरज्ञप्रसिद्धा नतु तत्वदर्शिनः ॥ तस्माद्बुधैस्त्याज्यमपि क्रियात्मभिर्विधानतःकर्मविधि प्रकाशितम् ॥ २३ ॥

क्रियात्मभिः षष्ठ्यर्थेतृतीया क्रियाफलसक्तचित्तानां विधानतोविधानेनेतिकर्तव्यतयायुक्तंकर्म विधिभिरवश्यकर्तव्यतयाबोधितमपि-त्याज्यमित्यर्थः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथविरक्तस्यकार्यमाह। श्रद्धेति । गुरुशास्त्रयोर्विश्वासःश्रद्धातदन्वितोबुभुत्सुःशुद्धमानसोऽपि निष्कामकर्मानुष्ठानाच्छुद्धमानसश्चगुरोः प्रसादाल्लब्धतत्त्वमसीतिवाक्यतः श्रुतमात्मजीवयोरैकात्म्यंविज्ञाय मननिदिध्यासनपरिपाकाभ्यांसाक्षात्कृत्य। चएवार्थः । साक्षा

श्रद्धान्वितस्तत्त्वमसीतिवाक्यतो गुरोःप्रसादादपिशुद्धमानसः॥
विज्ञायचैकात्म्यमथात्मजीवयोः सुखी भवेन्मेरुरिवाप्रकम्पनः
॥ २४ ॥

त्कृत्यवसुखी भवेत् । सकलदुःखहीनोभवेदित्यर्थः । अप्रकम्पनःविषयाभिलाषाक्षोभितान्तःकरणः ॥ २४ ॥

CC-0. In Public Domain. Digitization by eGangotri

 महावाक्यंविवरीतुंवाक्यार्थस्यपदार्थबोधपूर्वकत्वमाह । आदाविति । विधानतःभ्रमप्रमादराहित्येनवाक्यार्थविज्ञानस्यविधावुत्पत्तौआ
दौप्रथमंमुख्यमितियावत् । पदार्थावगतिःकारणम् । हिप्रसिद्धं तस्यपदत्रयंतत्त्वमसीति । तत्रतत्पदार्थःपरमात्मासर्वज्ञत्वादिगुणः त्वं

आदौ पदार्थावगतिर्हि कारणं वाक्यार्थविज्ञानविधौ विधानतः ॥
तत्त्वंपदार्थौपरमात्मजीवकावसीतिचैकात्म्यमथानयोर्भवेत्
॥ २५ ॥

पदार्थोजीवः अनयोस्तत्त्वंपदार्थयोरैकात्म्यंतद्बोधकमसीतिपदम् ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुसर्वज्ञत्वादिगुणस्येशस्यकिञ्चिज्ज्ञत्वधर्मवताजीवेनैकात्म्यं विरुद्धमित्याशङ्क्याह । प्रत्यागिति । अहंबुद्धिवद्यत्वंप्रत्यक्त्वंजीवधर्मः परोक्षत्वमीशधर्मस्तदादिधर्मकृतमात्मनोःपरमात्मजीवात्मनोर्विरोधंविहायत्यक्त्वातयोः संशोधिताम् युक्तिभिःसम्यग्विचारितांतत्त्वंपदाभ्यांशक्त्यभावेऽपिवक्ष्यमाणप्रकारयालक्षणयालक्षितां ज्ञाताञ्चिदात्मतां संगृह्य तत्त्वंपदोपास्थितिविषयांकृत्वा स्वमात्मानंतथाज्ञात्वाऽथएकात्मज्ञानानन्तरमद्वयोभवत् । चित्स्वरूपतांप्राप्तइवभवेत् । पूर्वमपितत्स्वरूपएवविस्मृतकण्ठचामीकरन्यायेनचतत्प्राप्तिःतद्वदित्युक्तम् ।

प्रत्यक्परोक्षादिविरोधमात्मनोर्विहायसंगृह्यतयोश्चिदात्मताम् ॥
संशोधितांलक्षणयाचलक्षितांज्ञात्वास्वमात्मानमथाद्वयोभवेत्
॥ २६ ॥

अयंभाव : तत्त्वंपदयोर्द्वावर्थौ वाच्योलक्ष्यश्च तत्रतत्पदस्यमायोपाधिःसर्वज्ञत्वादिविशिष्टोवाच्यः त्वंपदस्यापिकिञ्चिज्ज्ञत्वादिविशिष्टो मायाकार्याविद्योपाधिरविद्यावदन्तःकरणोपाधिर्वाच्यः उभयोरपिविशेषणांशत्यागेनशुद्धश्चिदात्मालक्ष्यः तत्रवाच्ययोर्विरुद्धधर्मकत्वादैक्यासंभवेऽपिलक्ष्ययोरैक्यंनिर्बाधमेवेति ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तलक्षणास्वरूपमाह । एकात्मकत्वादिति जहतीलक्षणाजहत्स्वार्थलक्षणायथागङ्गायांघोषइत्यत्रगङ्गापदार्थस्यप्रवाहस्यघोषाधारतानुपपत्त्यामर्वथातत्परित्यागेनतीररूपार्थलक्षणा साप्रकृते न एकात्मत्वात् । विशेष्यांशस्यैकत्वात्मर्वथास्वार्थत्यागाभावात् । तथाजहल्लक्षणताजहत्स्वार्थलक्षणात्वत्त्वमपिअत्रनसंभवति । यथाकाकेभ्योदधिरक्ष्यतामित्यादौकाकपदस्यस्वार्थात्यागेनैवदध्युपघातकेलक्षणा सापिन । विरोधतःविशेषणत्यागेनसर्वथास्वार्थत्यागाभावात् । अतोभागलक्षणाजहदजहल्लक्षणायुज्यते । अदोषतःपूर्वोक्तदोषाभावात्

एकात्मकत्वाज्जहती न सम्भवेत्तथाऽजहल्लक्षणता विरोधतः॥
सोऽयंपदार्थाविवभागलक्षणायुज्येततत्त्वंपदयोरदोषतः॥२७॥

विशेष्यांशस्यात्यागाद्विशेषणांशस्यत्यागाच्च । तत्रदृष्टान्तः । सोऽयंपदार्थाविव । यथासोऽयंदेवदत्तइत्यत्रतद्देशादिविशिष्टोऽतीतानुभवविषयोवातत्पदार्थः एतद्देशादिविशिष्टोऽनुभूयमानोवेदंशब्दार्थः । तयोश्चाविरुद्धविशेषणकत्वादैक्यासंभवेनदेशादिरूपविशेषणत्यागेनानुभवगतानांतत्वादिविशेषणत्यागेनवालक्षणयैक्यंतद्वदितिभावः ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथत्याज्यत्वायजीवोपाधिमाह । रसादी ति । रसापृथ्वीआदिर्येषांतानिपञ्चीकृतानियानिभूतानितेभ्यःसंभवोयस्यतत् । पञ्चीकरणंचेत्थम् एकैकंभूतंद्विधाविभज्यतत्रैकंभागंचतुर्धाविभज्यतेषांभागानांस्वेतरभूतचतुष्टयार्धभागचतुष्टयेसंयोजनेएकैकंभूतंपञ्चात्मकंभवतिभा

रसादिपञ्चीकृतभूतसंभवंभोगालयंदुःखसुखादिकर्मणाम् ॥ शरीरमाद्यन्तवदादिकर्मजंमायामयंस्थूलमुपाधिमात्मनः ॥ २८ ॥

गाधिक्याच्चप्रातिस्विकतयाभूगादिव्यवहारोऽपि । सुखदुःखयोरादीनियानिकर्माणितेषांभोगस्तत्कर्मजसुखदुःखानुभवस्तस्यालयमाश्रयभूतमाद्यन्तवत्उत्पत्तिनाशयोगि आदिकर्मजंभाग्भवीयकर्मजन्यंमायामयंपरम्परयामायाविकारः तद्विकारभूतविकारत्वात् । एतच्छरीरमात्मनःस्थूलमुपाधिंवदन्तीतिशेषः ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसूक्ष्मोपाधिमाह। सूक्ष्ममिति । बुधाःअन्यत्स्थूलशरीरविलक्षणंशरीरंलिङ्गदेहाख्यमात्मनउपाधिंविदुः । तत्स्वरूपमाह। सूक्ष्मंचक्षुराद्याविषयः मनोबुद्धिदशेन्द्रियैःप्राणैश्चयुतम् सङ्कल्पात्मकंमनः निश्चयात्मिकाबुद्धिः घ्राणरसनाचक्षुस्त्वक्श्रोत्रेतिपञ्चज्ञानेन्द्रियाणि वा-

सूक्ष्मंमनोबुद्धिदशेन्द्रियैर्युतंप्राणैरपञ्चीकृतभूतसंभवम् ॥ भोक्तुः सुखादेरनुसाधनंभवेच्छरीरमन्यद्विदुरात्मनोबुधाः ॥ २९ ॥

क्पाणिपादपायूपस्थानिकर्मेन्द्रियाणि प्राणापानव्यानोदानसमानाश्चप्राणास्तैर्युतमेतत्सप्तदशसमुदायात्मकम्। तदाधारभूतान्याह ।अपञ्चीकृतभूतसंभवंतेभ्यउत्पन्नमतएवादृश्यम् । तथाभोक्तुःसुखादेःसुखदुःखाद्यनुभवस्यानुसाधनम् स्थूलशरीरस्यैतदनुगतस्यैवभोगसाधनत्वमितिभावः । एताद्वियोगेनैवमरणव्यवहारइतिबोध्यम् ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिजीवोपाधिद्वयमुक्त्वाईशोपाधिमाह । अनादीति । अनादि उत्पत्तिहीनम् । नानाविधपरिणामशालितयापरिणामरूपेणनश्वरामिति अनादित्वमात्रोक्त्यासूचितम् । अनिर्वाच्यम् सत्त्वासत्त्वाभ्यांनिर्वक्तुमशक्यम् कारणंसकलप्रपञ्चस्यजनकम् ईदृशीमायातुब्रह्मणःपरमी-

अनाद्यनिर्वाच्यमपीहकारणं मायाप्रधानंतुपरंशरीरकम् ॥ उपाधिभेदान्तुयतःपृथक्स्थितं स्वात्मानमात्मन्यवधारयेत्क्रमात् ॥ ३० ॥

श्वरव्यवहारसंपादकत्वादुत्कृष्टंप्रधानंशरीरकम् । स्वार्थेकः । एवमुपाधिभेदादेकमेवचैतन्यंयतः पृथक्स्थितंजीवईशइतिभेदबुद्धिविषय मतोलक्षणयोपाधिपरित्यागेनस्वात्मानमात्मनिअवधारयेदभेदेनजानीयात् । क्रमाच्छ्रवणमनननिदिध्यासनक्रमेणेत्यर्थः ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवाक्यार्थविचारफलमाह । कोशेष्विति । आनन्दमयस्य ब्रह्मत्वेअन्नमयप्राणमयमनोमयविज्ञानमयेषुचतुर्षुकोशेषुतत्तत्सङ्गात्तत्तदाकृतिर्विभाति यथाजपादिसङ्गात्स्फटिकोऽनेकाकृतिर्भाति । आनन्दमयस्यापि जीवत्ववादिनातुतेनसहपञ्चसु कोशेष्वितिबोध्यम् । अस्मि-

कोशेषुपञ्चस्वपितत्तदाकृतिर्विभातिसङ्गात्स्फटिकोपलोयथा ॥ असङ्गरूपोऽयमजोयतोऽद्वयोविज्ञायतेऽस्मिन्परितोविचारिते ॥ ३१ ॥

न्महावाक्येपरितोविचारितेसत्यस्याविचारितेसत्ययमात्माऽसङ्गरूपःअन्नमयादिभिःसङ्गरहितः । असङ्गोनहिसज्जते । इतिश्रुतेः । अजोऽद्वयश्चविज्ञायते । स्थूलोऽहमित्यादिस्त्वज्ञस्यतत्तत्कोशप्रसङ्गात्प्रतीतिःस्फटिकवत् तत्त्वज्ञस्यतुनतथाप्रतीतिरितिभावः । एवंचतत्तदुपाधिकृततत्तद्रूपताप्रतीतिनिरासएव विचारफलमितिभावः ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जाग्रदाद्यवस्थाऽपि बुद्धेर्धर्मो नात्मधर्मइत्याह । बुद्धेरिति । इहआत्मनिस्वप्नादिभेदेन जाग्रत्स्वप्नसुषुप्तिभेदेन यात्रिधावृत्तिर्दृश्यतेसाऽपि गुणत्रयात्मनः सत्त्वरजस्तमोरूपगुणत्रयस्वरूपाया बुद्धेर्धर्मः । उक्तावस्थात्रयस्योक्तमूलकत्वात् । एतदवस्थात्रयस्यास्मिन्नवस्थात्रय-साक्षिणि आत्मनि भानं मृषा बुद्ध्यध्यास निबन्धनं न तु वास्तव मित्यर्थः । अन्योऽन्यतोव्यभिचारतस्तस्यावस्था त्रयस्यस्व रूपतो

बुद्धेस्त्रिधा वृत्तिरपीह दृश्यते स्वप्नादि भेदेन गुणत्रयात्मनः ॥
अन्योऽन्यतोऽस्मिन्व्यभिचारतोमृषा नित्ये परे ब्रह्मणि केवले शिवे ॥ ३२ ॥

मृषात्वात्तज्ज्ञानस्य मृषात्वमेव । स्वप्नकाले जाग्रत्सुषुप्त्योरभावात् । जाग्रतिइतरद्वयस्याभावात् सुषुप्तावितरयोरभावात्परस्परं व्यभिचारोबोध्यः आत्मनस्तदनाश्रयत्वंविशेषणैराह । नित्येउत्पत्तिनाशशून्येपरेगुणत्रयातीते ब्रह्मणिव्यापकेकेवलेऽसङ्गेशिवआनन्दरूपे एवंभूतेसदैकरसेपरस्परव्यभिचारधर्माभानमसंभवीति भावः ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथस्याज्यत्वायसंसारमूलभूतांवृत्तिमाह । देहेति । एषांसङ्घातइतरेतराध्यासविषयात् अजस्रंसंभावाद्धियो बुद्धेर्वृत्तिस्तमोमूलतयाऽज्ञ
लक्षणाऽज्ञत्वज्ञापिका यावत्परिवर्तते तावद्भवोद्भवःसंसारोद्भवोभवेत् । तमःपदंरजसोऽप्युपलक्षणम् । रजस्तमःप्रधानाबुद्धिः संसारहेतु

देहेन्द्रियप्राण मनश्चिदात्मनां सङ्घादजस्रं परिवर्तते धियः ॥
वृत्तिस्तमोमूलतयाऽज्ञलक्षणा यावद्भवेत्तावदसौ भवोद्भवः॥३३॥

त्वात्सर्वथात्याज्येति भावः ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत महावाक्यविचारस्य कर्तव्यमाह । नेतीति । अथात आदेशोनेतिनेति इति प्रमाणेननिराकृतं मिथ्यात्वेनगृहीतमखिलंजगत्येनसः ततोहृदासत्त्वप्रधानेनमनसासम्यगास्वादितं चिल्लक्षणंघनामृतंदुःखासंभिन्नंसुखंयेनसः । स्वर्गादितुपरिणामदुःखत्वात्तत्संभिन्नमेव । एवंभूतोऽशेषंजगद्देहेन्द्रियादिदृश्यसमूहंत्यजेत् हानोपादानबुद्धिविषयंनकुर्यात् । किन्तूदासीनस्तत्रभवेत् । ननुदेहेन्द्रियादिभिरेवतज्ज्ञान

नेतिप्रमाणेन निराकृताखिलो हृदासमास्वादितचिद्घनामृतः ॥ त्यजेदशेषं जगदात्तसद्रसं पीत्वा यथाऽम्भः प्रजहाति तत्फलम् ॥ ३४ ॥

लाभात्कथमुपजीव्यस्यत्यागइत्याशङ्क्यदृष्टान्तदर्शनेनपरिहरति । यथातृषावानआत्तः सद्रसोमाधुर्ययेनताहृशं नारिकेलनारङ्गादि फलान्तवर्त्यम्भःपीत्वा तत्स्थानभूतंतत्फलं जहाति तत्रोदासीनोभवति तद्वत्सर्वदृश्यसारांशोब्रह्मतल्लाभसतिनिः सारंदृश्यंनोपादेयंनापिहेयमितिभावः । यतोभयादिसंभावनातद्धेयमित्युच्यते ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतरस्यानित्यत्वेनतत्रवैराग्यार्थमात्मनएवनित्यत्वमाह । कदाचिदिति । कदापीत्यर्थः । अनवः उत्पत्त्यनन्तरंविद्यमानोहिनवः । तेन जन्मानन्तरास्तित्वंव्यावर्तितं नवत्वाभावेनवजीर्णत्वाभावादवस्थान्तरापत्तिरूप परिणामोऽपिनिरस्तः ।अनेनअस्तिजायतेवर्द्धतेविपरिणम तेऽपक्षीयते नश्यतीति षड्भाव विकार राहित्यमुक्तम् । एवंचैतद्भिन्नं सर्वमुक्तषड्भावविकारवत्त्वादनित्यमिति ततोविरज्येतेतिबोधित-

कदाचि दात्मान मृतोनजायते नक्षीयते नापिविवर्धतेऽनवः ॥
निरस्तसर्वातिशयः सुखात्मकः स्वयम्प्रभः सर्वगतोऽयमद्वयः ३५

म् । यतऽईदृशोऽतएवनिरस्तः सर्वस्यदेहेन्द्रियादेरतिशयोमहत्त्वं येनस्वलाभात्सः यल्लाभान्नापरोलाभइतिःश्रुतेः यतःसुखात्मकः आनन्द स्वरूपः स्वयम्प्रभःस्वप्रकाशकश्च देहेन्द्रियादिस्तुदुःखस्वरूपः परप्रकाश्यश्च । यस्यभासासर्वमिदंविभाति । इतिश्रुतेः । सर्वगतोव्यापकः अयमहंबुद्धिविषयःप्रत्यगात्माऽपिअद्वयः उक्ताद्वयब्रह्मस्वरूपएव । नततोऽतिरिक्तइतिभावः । अयमात्माब्रह्म । इतिश्रुतेः ॥ ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुएवंविधेविकारशून्येआत्मनिजन्ममरणादिप्रवाहरूपसंसारभानंकथमितिशङ्कते। एवंविधेइति।दुःखमयःदुःखप्रचुरः।उत्तरयति। अज्ञानतइ
तिअज्ञानमूलकोयोध्यासोदेहान्तः करणादौ अहंममेत्यध्यासस्तद्वशात्। एवंचभ्रान्तिरूपातत्प्रतीतिरितिभावः। नन्वेवंकथंतस्यसंसारस्यनि

एवंविधे ज्ञानमये सुखात्मके कथंभवो दुःखमयःप्रतीयते ॥
अज्ञानतोऽध्यासवशात्प्रकाशतेज्ञानेविलीयेत विरोधतःक्षणात्॥
॥ ३६ ॥

वृत्तिस्तत्राह। ज्ञानेति। आविर्भूतइतिशेषः। ज्ञानस्याज्ञानविरोधित्वात्तदुत्पत्तिक्षणएवकारणभूताज्ञाननाशात्तत्कार्यसंसारस्यापि वि
लयइत्यर्थः। यथारज्जुज्ञानेनरज्जौसर्पस्यलयइत्यर्थः ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाध्यासलक्षणमाह । यदन्यदिति । यदन्यत्सर्पादिकमन्यत्ररज्ज्वादौ भ्रमात्भ्रमजनकाद्दोषाद्विभाव्यतेविज्ञायतेअमुंविपश्चितोविद्वांसोऽध्यासइत्याहुः । यथाऽसर्पभूतेरज्ज्वादौ अहिविभावनंसर्पारोपोरज्ज्वबुद्धिमूलकस्तद्वदीश्वरेऽपिजगद्देहादिसंसारात्मकंसर्वंविभाव्य-

यदन्यदन्यत्र विभाव्यते भ्रमादध्यासमित्याहुरमुंविपश्चितः॥
असर्पभूतेऽहिविभावनंयथा रज्ज्वादिकेतद्वदपीश्वरे जगत्॥३७॥

तेआत्मज्ञानाभावात्सत्यार्थतयाज्ञायते ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनिनगड्ढानेकीदृशोऽध्यामोनिमित्तंतदाह विकल्पेति सर्वविकल्पकारणमायारहितेवस्तुतस्तत्सङ्गरहितेचिदात्मकेचित्स्वरूपेसर्वकारणेनिरामयेदुःखासंभिन्नानन्दमयेकेवलेसर्वविकारशून्येपरेदृश्याविलक्षणेब्रह्मणिव्यापके आत्मनिप्रथममहङ्कारः कल्पितः सएवाध्यासः ।

विकल्पमायारहितेचिदात्मके ऽहङ्कारएष प्रथमः प्रकल्पितः ॥
अध्यासएवात्मनिसर्वकारणे निरामयेब्रह्मणि केवलेपरे ॥ ३८॥

अहंबुद्ध्यात्मकोध्यासएवसर्वसंसारकारणमितिभावः ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बुद्धिनिष्ठएवसंसारोनत्वात्मनिष्ठइत्यत्रान्वयव्यतिरेकौप्रमाणयति । इच्छादीति । परेसर्वमाक्षिणिआत्मनिसंसृतिहेतवः भासमानसंसारकारणं
सदाकालत्रयेऽपिइच्छादिरागादिसुखादिधार्मिकाः इच्छांपक्षेरागद्वेषौसुखदुःखंइत्येवमादिद्वन्द्वधार्मिकाःधियएवधीषुसतीषुसंसारइत्यन्वयमु

इच्छादिरागादिसुखादिधार्मिकाः सदा धियः संसृतिहेतवः परे ॥
यस्मात्प्रसुप्तौतदभावतःपरः सुखस्वरूपेणविभाव्यतेहिनः ॥ ३९ ॥

क्त्वातद्व्यतिरेकमाहयस्मात्कारणात्प्रसुप्तौतदभावा त्धीवृत्त्यभावात परआत्मानोऽस्माभिःतृतीयार्थेषुषष्ठी । सुखरूपेणस्वस्वरूपमात्रेणाविभा
व्यतेनिश्चीयते नतु संसारित्वेनेतिभावः सुप्तोत्थितस्तुसुखमहमस्वाप्समितिप्रत्यभिज्ञानुभवात्तदात्मस्वरूपनिश्चयोऽस्तीतितात्पर्यम् ॥ ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथपुनस्तत्त्वंपदार्थस्वरूपमाह ।अनादीति ।अनादिर्याऽविद्यातदुद्भवोयस्या बुद्धेरन्तःकरणस्यतत्रबिम्बितःप्रतिबिम्बितश्चितःप्रकाशः सजीवइतीर्यते आत्मापरमात्माधियः साक्षितयाधीधर्मासङ्गेनैवपृथक्स्थितः । अन्तर्यामितयेत्यर्थः जीवोऽहंसुखीत्यादिप्रकारेणान्तःकर

अनाद्यविद्योद्भवबुद्धिबिम्बितोजीवप्रकाशोऽयमितीर्यते चितः॥ आत्माधियः साक्षितया पृथक् स्थितो बुद्ध्या परिच्छिन्नपरः सएव हि॥ ४० ॥

णधर्माध्यासवान्परमात्मातु साक्षितयासर्वत्रविद्यमानोऽपिनतथेतिभावः। अतएवबुद्ध्यापरिच्छिन्नपरः बुद्धिलक्षणपरिच्छेदरहितःअतएव परः । एवंचज्ञानेनप्रतिबिम्बाधार विलयप्रतिबिम्बस्यविलयात्सजीवः सएवपरमात्मैवहिप्रसिद्धं सइत्यस्यचावृत्तिर्बोध्या ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ बुद्ध्यात्मनोःपरस्पराध्यासवशात् परस्परधर्मभानमितिदार्ढ्यायपुनराह । चिद्बिम्बेति । चिद्रात्मचेतसोरन्योन्याध्यासवशात् परस्परतादात्म्यारोपाज्जडाजडत्वंप्रतीयते । चेतसोवृत्तीनांज्ञानत्वं जीवात्मनोजडत्वंप्रतीयते । अतएवज्ञानाश्रयआत्मेति चितएवता।किंकर्तृव्यवहारः । जीवात्मनिजडात्मनिजडात्माकथ्यते बुधैरितिस्मार्तव्यवहारश्च । अत्रहेतुः । चिदित्यादि । चिद्बिम्बस्यसाचिदाभासः अ

चिद्बिम्बसाक्ष्यात्मधियांप्रसङ्गतस्त्वेकत्रवासादनलाक्तलोहवत् ॥
अन्योऽन्यमध्यासवशात्प्रतीयते जडाजडत्वंचचिदात्मचेतसोः
॥ ४१ ॥

क्षैःसहितः साक्षःसेन्द्रियः सचासावात्मामनःधीरन्तःकरणंतेषांप्रकृष्टसङ्गादतिसान्निकर्षादध्यासइत्यर्थः । अनलाक्तलोहवत् अग्नितप्तलोहपिण्डवत् अत्रदृष्टान्तः । अग्निधर्मोदाहकत्वं लोहधर्मश्चवर्तुलत्वाद्यनलेभासते । तत्रहेतुरेकत्रवासात् परस्पराविभागेनवृत्तेरित्यर्थः । तद्वदेतयोरपि परस्परधर्माध्यासइत्यर्थः ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं दार्ढ्यायपुनराह । गुरोरिति । वेदवाक्यतइत्यनेन श्रवणंगुरोःसकाशादपि । ततश्चानेनमननमुक्तम् । ताभ्यांसञ्जातोविद्यया ज्ञानरूपस्यात्मनोऽनुभवोयस्यसः । अनेनकृतनिदिध्यासनइत्यर्थः । तं चिदानन्दस्वरूपं स्वात्मानमुपाधिवर्जितं रहितोपाधिधर्ममात्मस्थं

गुरोःसकाशादपिवेदवाक्यतः सञ्जातविद्यानुभवोनिरीक्ष्य तम् । स्वात्मानमात्मस्थमुपाधिवर्जितं त्यजेदशेषं जडमात्मगोचरम् ॥ ४२ ॥

हृत्स्थंनिरीक्ष्य अपरोक्षीकृत्याशेषंजडं दृश्यंत्यजेत् । तत्रोदासीनोभवेदिति भावः ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञेयंनिरुपाधिकं स्वरूपंश्लोकद्वयेनाह प्रकाशेति अहंप्रकाशरूपः स्वप्रकाशः परप्रकाशहीनः परप्रकाशरूपोयथाघटादिः अजोजन्मादि
हीनः अद्वयःसजातीयद्वितीयरहितः अभक्तद्विभातः सकृदपिपरेणभासकान्तरेणप्रकाशितः सकृद्विभातः नसकृद्विभातोसकृद्विभातः नत

प्रकाशरूपोऽहमजोऽहमद्वयोऽसकृद्विभातोऽहमतीवनिर्मलः ॥
विशुद्धविज्ञानघनोनिरामयःसम्पूर्णआनन्दमयोऽहमक्रियः॥४३॥

त्रसूर्योभातिनचन्द्रतारकमितिश्रुतेः नतद्भासयतेसूर्यइतिस्मृतेश्च अतीवनिर्मलः मायाकृतावरणविक्षेपरहितः विशुद्धविज्ञानघनःविशुद्धचि
देकरसः निरामयःकर्तृत्वाभिमानरहितः सम्पूर्णःदेशकालपरिच्छेदहीनः आनन्दमयः आनन्दरूपः स्वार्थेमयट् अक्रियः परिणामहीनः
॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदैवेति अहंसदैवकालत्रयेऽपिमुक्तःसर्वधर्मरहितः अचिन्त्यशक्तिमान् यः परमात्मा अतिन्द्रियज्ञानम्इन्द्रियातिरिक्तज्ञानरूपःयतोवाचो निवर्त्तन्ते अप्राप्यमनसासहइतिश्रुतेः अविक्रियात्मकोऽपरिणामी अनन्तपारःअन्तःकालतःपारःपरन्तीरन्तावविद्यमानौ यस्य तेनदेश

सदैवमुक्तोऽहमचिन्त्यशक्तिमानतीन्द्रियज्ञानमविक्रियात्मकः॥
अनन्तपारोऽहमहर्निशंबुधैर्विभावितोऽहंहृदिवेदवादिभिः ॥४५॥

कालपरिच्छेदहीनः ईदृशोयःपरमात्माबुधैर्हृदि अहर्निशंविभावितः सोऽहमित्यर्थः ॥ ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंभावनायाःफलमाह एवमिति उक्तरीत्यासदाआत्मानं अखण्डितात्मनाविषयानाकृष्टचित्तेन विचारमाणस्यध्यायतः धातूनामनेकार्थ
त्वात् चरमाणएवचारमाणःस्वार्थेऽण् विशुद्धभावनाब्रह्माकारान्तः करणवृत्तिरुदंतीतिशेषः साचेऽदिताकारकैर्देहान्तरप्रापककर्मभिः स

एवंसदात्मानमखण्डितात्मनाविचारमाणस्यविशुद्धभावना ॥
हन्यादविद्यामचिरेणकारकैरसायनंयद्वदुपासितंरुजः ॥ ४५ ॥

हाविद्यामचिरेणशीघ्रमेवहन्यात् यथोपासितंसेवितंरसायनं रुजोहन्यात्तद्वत् ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रध्यानेइतिकर्त्तव्यतामाह विविक्तइति निर्जनइत्यर्थः आसीनोयथोचितपद्मासनाद्युपविष्टः उपारतेन्द्रियः तेनशमदमादिसम्पन्नः विनिर्जितात्माप्राणायामादिभिर्जितान्तःकरणः अतएवविमलान्तराशयोविशुद्धचित्तः विज्ञानदृक्विज्ञानएवदृक्भानंयस्यसः द्रष्टृदृश्यभा

विविक्तआसीनउपारतेन्द्रियोविनिर्जितात्माविमलान्तराशयः।
विभावयेदेकमनन्यसाधनोविज्ञानदृक्केवलआत्मसंस्थितः॥४६

नरहितः अनेननिर्विकल्पकसमाधिरुक्तः अनन्यसाधनः तत्त्वज्ञानातिरिक्तमुक्तिसाधनास्तित्वभ्रमरहितः केवलोऽसङ्गःआत्मसंस्थितः आत्मन्येवसंस्थासमाप्तिः सञ्जातायस्यसतेन नकदापिविषयान्तरसञ्चारवच्चित्तः विभावयेत् ध्यायेत् ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंच यदेतत्भूतंभविष्यद्वर्तमानं विश्वंपरमात्मादर्शनंभासकोयस्यतत् तस्यभासासर्वमिदंविभातीति श्रुतेः तत्सर्वकारणेमायासान्निधाना
त्सर्वोपादानत्वेनाभिमतेआत्मनिविलापयेत् उपादानसत्ताव्यतिरेकेणकार्यसत्तांनपश्येत् तादृशस्यलक्षणमाह सम्पूर्णः अवाप्तसमस्तका

विश्वंयदेतत्परमात्मदर्शनं विलापयेदात्मनि सर्वकारणे ॥
पूर्णश्चिदानन्दमयोऽवतिष्ठते न वेद बाह्यं न च किञ्चिदान्तरम् ॥ ४७ ॥

मः तस्यकाम्याभावात् चिदानन्दमयः तद्रूपोऽवतिष्ठते बाह्यमान्तरंच दृश्यंनजानाति सर्वत्रब्रह्मदर्शनादिति भावः ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाधिसिद्धेः पूर्वंयत्कर्तव्यंतदाह । पूर्वमिति । समाधेः सकलविषयव्यासङ्गनिवृत्तिपूर्वकं ब्रह्माकारवृत्तिः समाधिस्ततः पूर्वमखिलंस चराचरंजगत् ओङ्कारमात्रं विचिन्तयेत् । ओङ्कारोमीयतेऽनयेतिमात्रा प्रमाणं बोधकत्वेन परिच्छेदकोयस्यतथाजानीयात् । तदेवविवृ

पूर्वं समाधे रखिलं विचिन्तये दोङ्कारमात्रं सचराचरं जगत् ॥
तदेव वाच्यं प्रणवो हि वाचको विभाव्यते ज्ञानवशान्न बोधतः ॥ ४८ ॥

णोति तदेवेति । जगदेवेत्यर्थः । प्रणवोवाचकोविभाव्यतेएतत्प्राहिप्रसिद्ध इत्यर्थः । इयंभावनाज्ञानवशादेवनबोधकः । बोधोनिर्विशेषब्रह्मसा क्षात्कारस्तदुत्तरंनेत्यर्थः । तस्यसर्ववृत्त्युपमर्दकत्वात् ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमर्थंविवृणोति । अकारेति । अकारसञ्ज्ञस्तद्वाच्यः पुरुषोहिविश्वकोविश्वएवविश्वकः विश्वशब्देनपरिभाषितः अयंजाग्रत्साक्षीविराट् ततःस्वप्नसाक्षीतैजसःतेनपदेनपरिभाषितःलिङ्गदेहाभिमानीहिरण्यगर्भउकारकः उकारप्रतिपाद्यईर्यते । ततः सुषुप्तिसाक्षीप्राज्ञपदवाच्यो

अकारसञ्ज्ञः पुरुषो हि विश्वको ह्युकारकस्तैजसईर्यते क्रमात्
प्राज्ञो मकारः परिपठ्यतेऽखिलैः समाधि पूर्वं न तु तत्त्वतो
भवेत् ॥ ४९ ॥

मायोपाधिकोमकारस्तद्वाच्यः परिपठ्यतेऽखिलैर्वेदैः । इयंभावनासमाधिपूर्वंसमाधेःपूर्वमेव नतत्त्वतः तत्त्वसाक्षात्कारेसतिनभवेत् । सर्वस्यप्रमाणिप्रविलयात् ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाविलापन प्रकारमाहद्वाभ्याम् । विश्वंत्विति । उकारमध्ये बहुधाव्यवस्थितं स्थूलदेहनिबंधनंस्थूलदेहाभिमानेन स्थितं विश्वम्पुरुषंतद्वाचकमकारम् च विलापयेत् । तुश्चार्थे । विलीनम्भावयेत् ततस्तैजसंलिङ्गदेहाभिमानिनम् पुरुषं तद्वाचकंप्रणवद्वितीय वर्णमुकारं विलीनविश्वकम्मकारे विलाप्याविलीनम्भावयित्वा ॥ ५० ॥

विश्वं त्वकारं पुरुषं विलापयेदुकारमध्येबहुधा व्यवस्थितम् ।
ततो मकारे प्रविलाप्यतैजसंद्वितीयवर्णं प्रणवस्य चान्तिमे ॥५०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततस्तादृशंमकारंतद्वाच्यंप्राज्ञंचकारणंकारणत्वाभिमानिनंपुरुषमिहात्मनि चिद्घनेपरे विलापयेत् तथाभावयेत् । ततः सोऽहंसर्वविला
पाधिष्ठानंपरब्रह्मविभावयेत् । तद्विशिनष्टि । सदाविमुक्तिमत् नित्यमुक्तम् । नन्वहंपदार्थस्यरागद्वेषादिमलिनस्यकथं ब्रह्मत्वभावनेत्या

मकारमप्यात्मनि चिद्घने परे विलापयेत्प्राज्ञमपीह कारणम् ।
सोऽहं परं ब्रह्म सदा विमुक्तिमद्विज्ञानदृङ्मुक्त उपाधितोऽमलः ॥ ५१ ॥

शङ्क्याहंपदार्थंविशिनष्टि । उपाधितोमुक्तः अतएवामलःतथाभावनेसाधनं विज्ञानदृक्विज्ञानं ब्रह्ममात्रप्रत्ययाविच्छेदरूपादृक् निदिध्या
सनं सत्साक्षात्कारेसाधनंयस्यसः ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंभावनावतोलक्षणमाह । एवमिति । उक्तप्रकारेणसदाजातापरमात्मन्येकभावना यस्यसः परिविस्मृतमखिलंपुत्रदेहादियेनसः। अत एवस्वस्वरूपानन्देनैवतुष्टःनतुविषयानन्देन । तस्यपरिणामेदुःखरूपत्वात्ततो विरक्तइत्यर्थः । साक्षान्नित्यात्मनिसुखप्रकाशकः साक्षा

एवं सदा जातपरात्मभावनः स्वानन्दतुष्टःपरिविस्मृताखिलः ॥
आस्ते स नित्यात्मसुखप्रकाशकः साक्षाद्विमुक्तोऽचलवारिसि
न्धुवत् ॥ ५२ ॥

दौपाधिकनामरूपभेदरहित्येननिसमखण्डितमात्मस्वरूपंयत्सुखंप्रकाशश्चतद्रूपः एवंरूपो विमुक्तोजीवन्मुक्तः । अचलंनिश्चलंवारियस्यतादृशसिन्धुवदास्ते । विषयसम्बन्धरूपलहरीरहितआस्तइत्यर्थः ॥ ५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशस्यमत्प्राप्तिर्भवत्येवेत्याह । एवमिति । उक्तप्रकारेणसदाऽभ्यस्तसमाधियोगिनः निवृत्ताःसर्वेषामिन्द्रियाणांगोचराविषयाःशब्दादयो यस्य विनिर्जिताअशेषारिपवःकामादयोयेनतस्य । तज्जयेनविषयेष्वन्तःकरणाप्रवृत्तेः । अतएव सर्वज्ञत्वनित्यत्वनित्यतृप्तत्वबोध

एवं सदाऽभ्यस्तसमाधियोगिनो निवृत्तसर्वेन्द्रियगोचरस्य हि ॥ विनिर्जिताशेषरिपोरहंसदा दृश्यो भवेयं जितषड्गुणात्मनः ॥५३ ॥

रूपत्वस्वतन्त्रत्वनियमलुप्तत्वानन्तरूपाषड्गुणायस्यतादृशआत्माजितो वशीकृतोयेनतस्य सदादृश्योभवेयम् । एतेनमद्भक्तस्ययोगिनो ऽहंदृश्यांनतुभक्तिविमुखस्येति सूचितम् ॥ ५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंविधोजीवन्मुक्तःप्रारब्धवशेन अनभिमानोभोगानश्नँस्तिष्ठेत् ततोमय्येवाविलीयते मद्रूपोभवतीत्याह । ध्यात्वैवमिति ॥ ५४ ।

ध्यात्वैवमात्मानमहर्निशं मुनितिष्ठेत्सदा मुक्तसमस्तबन्धनः ॥
प्रारब्धमश्नन्नभिमानवर्जितो मय्येवसाक्षात्प्रविलीयते ततः ५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सर्वधर्मापेक्षयाऽयमेवधर्मोज्यायानित्याह । आदौचेति । भवसंसारमादिमध्यान्तेष्वनेपुनर्यथाभयशोकयोः कारणंविदित्वातत्कारणीभूतंविधिवादैर्यजेतेत्यादिभिश्चोदितंबोधितंसमस्तंकर्ममार्गंकाम्यंहित्वा अखिलात्मनांजीवानांस्वरूपभूतंमामात्मानं परमेश्वरंभजेत् । य

आदौ च मध्ये च तथैव चान्ततो भवं विदित्वा भयशोक कारणम् ॥ हित्वा समस्तं विधिवादचोदितं भजेत्स्वमात्मान मथाखिलात्मनाम् ॥ ५५ ॥

थाधनस्यार्जनेनादौदुःखंमध्येपालनकृतं तत्र राजादिकृतं भयमन्तेनाशेशोकपर्यवसायिदुःखमेवं पदार्थमात्रेद्रष्टव्यम् ॥ ५५ ॥

CC-0. In Public Domain. Digitization by eGangotri

मय्यभेदभावनया नामरूपाविभागेन तद्रूप एवभवतीत्यमुमर्थं सदृष्टान्तमाह । आत्मनीति । आत्मनिसर्वाधिष्ठानेमयिइदंस्वस्वरूपं जीवमभेदेनविभावयन्यदा । तिष्ठतीतिशेषः । तदामयात्मनापरमेश्वरेणाऽभेदेनभवति अभिन्नोभवति । तत्रदृष्टान्तः यथासमुद्रेप्रविष्टं नद्यादि

आत्मन्यभेदेन विभावयन्निदं भवत्यभेदेन मयाऽत्मनातदा ॥
यथाजलं वारिनिधौ यथापयः क्षीरेवियद्व्योम्न्यऽनिले यथाऽनिलः ॥ ५६ ॥

जलंसमुद्रएव यथाक्षीरेगवादिक्षीरेप्रक्षिप्तंपयःक्षीरमेव यथाव्योम्निमहाकाशेघटाद्यवच्छिन्नाकाशोघटादिभङ्गे च यथाचर्मभस्त्रिकाद्यवच्छिन्नोवायुरनिलेमहावायौ नामरूपाविभागेनैकीभवतीत्यर्थः ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कारणंविदित्वातत्कारणी

एवमात्मतत्त्वज्ञस्य जगत्सत्यत्वभ्रमःस्वतएवापैतीत्याह । इत्थमिति । हिरण्यर्थे । लोकसंस्थितोऽपिजीवन्मुक्तिदशायांप्रारब्धवशाल्लोकव्यवहारंकुर्वन्नपिजगन्मृषैवेतिविभावयन्सन् यदियदा इत्थमीक्षते ऐकात्म्यं जानीयात्तदा निवृत्तजगत्सत्यत्वभ्रमो भवतीति शेषः । तत्र हेतुः श्रुतियुक्तिमानतोनिराकृतत्वात् । अतोऽन्यदार्तमित्यादिश्रुतिरूपात् जगन्मिथ्यादृश्यत्वात् शुक्तिरजतवदितितदुपबृंहितानुमानरू

इत्थं यदीक्षेत हि लोकसंस्थितो जगन्मृषैवेतिविभावयन्मुनिः ॥
निराकृतत्वाच्छ्रुतियुक्तिमानतो यथेन्दुभेदो दिशि दिग्भ्रमादयः ॥ ५७ ॥

पात्मानतःप्रमाणतोनिराकृतत्वात् तत्रदृष्टान्तोयथेन्दुभेदः एकचन्द्रेद्विचन्द्रत्वभ्रमस्तदेकत्वज्ञानेननिवर्तते यथाच दिशिप्राच्यादौअन्यदिक्त्वभ्रमः सोऽपितत्त्वज्ञानान्निवर्तते । एवंभ्रमतःपुरुषस्य दिक्षुभ्रमणाद्भ्रमोनिकटवर्तिवृक्षादौच भ्रमणभ्रमस्तत्स्थैर्यज्ञानेन निवर्तते तद्वत् ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशज्ञानेमदाराधनमेवोपायइत्याह । यावदिति । अखिलं जगन्मदात्मकंमदधिष्ठानकंमाद्विवर्तभूतंयावन्नपश्येत्तावन्मत्प्राप्तयेश्रद्धालुः भगवदाराधनमेवज्ञानप्रापकमित्यत्र दृढविश्वासवान् अतिशयेनोर्जिताप्रवृद्धिमतीभक्तिर्मयिभगवतिपूज्यताबुद्धिरूपालक्षणं चिह्नंयस्यसः ।

यावन्नपश्येदखिलं मदात्मकं तावन्मदाराधनतत्परो भवेत् ॥
श्रद्धालुरत्यूर्जित भक्तिलक्षणो यस्तस्य दृश्यो ऽहमहर्निशं हृदि ॥ ५८ ॥

तावन्मदाराधननिष्ठोभवेत् एवंहितस्यहृदि अहमहर्निशंदृश्योभवा मियेयथामांप्रपद्यन्ते तांस्तथैवभजाम्यहमितिस्मृतेः ॥ ५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वोक्तवचनजातस्य श्रुतिसमत्वं कथमेतदालोचनमपिमदाराधनप्रतिबन्धकदुरितध्वंसोपायइत्याह रहस्यमिति । श्रुतिसारसङ्ग्रहत्वेनाति स.

रहस्यमेतच्छ्रुतिसारसङ्ग्रहं मया विनिश्चित्य तवोदितं प्रिय ॥
यस्त्वेतदालोचयतीहबुद्धिमान् स मुच्यते पातकराशिभिः
क्षणात् ॥ ५९ ॥

गोपनीयता अप्रमाणशङ्काकलङ्कराहित्यंसूचितम् । आलोचयतिसम्यग्विचारयति ॥ ५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ भगवानुक्तमेवार्थसङ्क्षेपेण दार्ढ्यायपुनराह भ्रातरिति । यदीतियादित्यर्थे । यदीदंजगत् परिदृश्यते तत्सर्वंमायैवेतिज्ञात्वेति शेषः चेतसासर्वंपरिहृत्यतत्रौदासीन्यंकृत्वामद्भावनयामदैक्यभावनया भावितंशुद्धंमानसंयस्यताद्दशास्तिष्ठ । इत्युपदिश्याशिषंप्राह निरामयः

भ्रातर्यदीदं परिदृश्यते जगन्मायैव सर्वं परिहृत्य चेतसा ॥ मद्भावनाभावितशुद्धमानसः सुखी भवाऽऽनन्दमयो निरामयः ६०

सन्मुखीभव । सर्वंदुःखनिवृत्त्योतिभावः । ततोऽन्तरङ्गामन्यामाशिषमाह आनन्दमयोभवेति तद्रूपोभवेत्यर्थः । यद्यपिपूर्वमानन्दरूपत्वमस्त्ये वतथाऽपितत्प्राप्तिर्विस्मृतकंठस्थभूषणप्राप्तिवत ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंरीत्याम्बोपासकस्यलोकपावनत्वमाह। यइति । कदावा यदाकदाचिदित्यर्थः । हृदानिर्मलेनान्तःकरणेन यो मामगुणं प्राकृतसत्त्व रजस्तमोरूपगुणरहितम् । सच्चिदानन्दरूपत्त्वात् । अतएवगुणादव्याकृतात्परंमायातीतम् । यद्विवायद्वेत्यर्थे । गुणात्मकं सर्वज्ञत्वा- दिलोकोत्तरलावण्यादिगुणवानात्मामूर्तिर्यस्यतं दृश्यमानं रूपं सेवते । सद्विविधोऽप्युपासकःअहं मत्स्वरूपएव । मामकइत्यर्थोवा । प्रि-

य: सेवते मामगुणं गुणात्परं हृदा कदा वा यदि वा गुणात्मकम् ॥ सोऽहंस्वपादाञ्चितरेणुभिः स्पृशन्पुनाति लोकान्त्रितयं यथा रविः ॥ ६१ ॥

योहिज्ञानिनोऽत्यर्थमहंमचममप्रिय इत्युक्तेः । तादृशोभक्तःस्वपादलग्नरेणुभिःसंस्पृशन्लोकत्रयमपि पुनाति । अज्ञानध्वान्तनिरसने नपवित्रीकरोति । यथारविःस्वकरैर्जगद्विर्तिमिरीकरोति तद्वत् ॥ ६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानीमेतद्ग्रन्थार्थालोचनासमर्थस्यपाठमात्रतोऽपिमहत्फलमाह । विज्ञानंविज्ञानजनकं करणंव्युत्पत्त्येतिबोध्यम् । वेदान्तैरुपनिषद्वाक्यै
र्वेद्यंचरणंजगज्जन्मादिलक्षणंकर्मयस्यतेन ननुपाठमात्रादेतादृशमहत्फलप्राप्तिःकथमित्याशङ्क्यभवत्येवेति सूचयंस्तत्रहेतुमाह । मद्वचने

विज्ञानमेतदखिलंश्रुतिसारमेकं वेदान्तवेद्यचरणेनमयैवगीतम् ।
यःश्रद्धया परिपठेद्गुरुभक्तियुक्तो मद्रूपमेति यदि मद्वचनेषुभक्तिः
॥ ६२ ॥ इतिश्री अध्यात्मरामायणे रामगीता समाप्ता ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसम्वादे उत्तरकाण्डे श्रीरामगीतायां पञ्चमःसर्गः ॥ ५ ॥

षुभक्तिर्विश्वासोयदीतिअर्थाद्गुरुवाक्यविश्वासस्यैव फलदायकत्वादितिभावः ॥६२॥ इत्यध्यात्मरामायणेउमामहेश्वरसम्वादे उत्तरकाण्डे
सेतौपञ्चमःसर्गः ॥ ६२ ॥ श्रीरामचन्द्रार्पणमस्तु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ३२ ॥ श्रीराममन्त्रःखलु तारकाख्यः संसारसन्तारणसुप्रसिद्धः ॥ भक्-
त्याऽप्यभक्त्या समुपासितोयः श्रेयांसि सर्वाणि ददात्यवश्य
म् ॥ १ ॥ तन्तारकंसम्प्रतिपादयन्ती श्रीरामगीता सकलैः सुसे
व्या ॥ विज्ञप्तिमित्थंजनको विनीतः समर्पयत्यार्यजनेषुहर्षात् २ ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प,	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति
स्यर्द्धि	स्पर्द्धि	१	२	१	शाधि	शाधि	३	२	६	नाशे	नाशो	६	१	१
जीव्य	जीन्य	१	२	३	व्यत्र	व्यव	४	१	१	नन्वितिश	नन्वितिशे	६	२	१
सम्बीन्धनीः	सम्बन्धिनीः	२	२	१	ष्ठामे	ष्ठानमे	४	२	३	त्रिदा	विदा	६	२	२
ब्रह्म	ब्रह्म	२	१	२	ब्रह्म	ब्रह्म	४	२	१	मेवे	मेव	६	२	२
ब्रह्म	ब्रह्म	२	१	६	वलेन	वलेन	४	२	७	व्येतीत	व्यतेति	७	१	१
वोधोऽासि	वोधोऽसि	३	१	४	निघृत्ते	निवृत्ते	५	१	१	बीरहा	वीरहा	७	१	१
संवन्ध	सम्बन्ध	३	१	७	कत्व	कत्वा	५	१	१	सद्दष्ट	सद्दृष्ट	८	१	३
भवस्यंससार	भवस्यसंसार	३	२	१	नक	नैक	५	१	१	त्रिशुद्धं	विशुद्ध	८	२	१
न्सार	सार	३	२	२	बेदान्त	वेदान्त	५	१	१	कारांतः	कारान्तः	८	२	२
पर्वग	पवर्ग	३	२	२	पूर्वे	पूर्वे	५	१	२	वृत्ति	वृत्ति	९	१	१
बारिधि	वारिधि	३	२	२	बुद्ध्या	बुद्ध्या	५	१	६	स्वत्राना	स्वना	९	२	१
					एवं	एव	५	१	६	बृत्यु	वृत्यु	१०	१	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
रीप	रपि	११	२	१
नर्दष्टा	नर्दष्टा	१२	१	४
वर्द्धै	वर्द्धे	१२	१	७
त्याभिः	त्माभिः	१२	२	६
शुद्द	शुद्ध	१३	१	१
जीवया	नीवयो	१३	१	२
निर्वाध	निर्बाध	१४	१	१०
भव	भव	१९	१	४
अर्जोद्व	अर्जोऽद्व	१६	२	६
द्वात्	द्वाव्	१७	२	१

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
ह्लाभ	ह्लाभे	१८	१	८
इतिः	इति	१८	२	२
ज्ञानन	ज्ञानेन	१९	१	१
वुद्धया	वुद्ध्या	२०	१	९
रागादि	रागादि	२१	१	३
त्रिलय	विलय	२१	१	७
धम	धर्म	२१	२	१
म्वस्य	म्वंयस्य	२१	२	२
वुवै	बुधै	२३	१	५
एव	एवं	२३	२	१
द्रष्ट	द्रष्ट्ट	२४	१	२

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
बिभाव्यत्	विभाव्यते	२५	१	४ मु
लिङ्गद	लिङ्गदे	२६	१	२
वोधकः	वोधतः	२५	१	६
त्रिज्ञानं ब्रह्म	विज्ञानंनिादि ध्यासनं ब्रह्म	२६	२ ६	३
भेदेरा	भेदरा	२७	१	६
रुपा	रूपाः	२७	२	१
आत्म	अत्मा	२७	२	१
म्रुनिति	मुनिास्ति	२८	१	२
भव	भवं	२८	२	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
तदकत्व	तदेकत्व	२६	२	७	वतथाऽ	वतथाऽ	३१	१	१	मद्वचने	मद्वचने	३२	१	२
भ्रमण	भ्रमणं-	२६	२	८	कंठ	कण्ठ	३१	१	२	तन्तारकं	तत्तारकं	३२	२	३

नेपाल पाशुपत, यन्त्रालये मुद्रिता.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इती रामगीता सटीका समाप्ता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द० नं० १६६४२

अथ रामगीता सटीका प्रारभ्यते ॥

मू: ५।—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ रामंरत्नकिरीटकुण्डलयुतं केयूरहारान्वितं सीतालङ्कृतवामभागममलं सिंहासनस्थं विभुम् ॥ सुग्रीवादि कपीश्वरैःसुरवरैः संसेव्यमानं सदा विश्वामित्रपराशरादिमुनि-भिः संस्तूयमानं भजे ॥ १ ॥ इतिध्यात्वा ॥ श्रीमहादेवउवाच॥

Sampurnanand Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ ध्यायेत्वाजानुबाहुं धृतशरधनुषं वद्धपद्मासनस्थं पीतंवासोवसानं नवकमलदलस्पर्द्धिनेत्रं प्रसन्नम् ॥ वामाङ्कारूढ सीतामुखकमलमिलल्लोचनं नीरदाभं नाना लङ्कारदीप्तं दधतमुरुजटामण्डलं रामचन्द्रम् ॥ १ ॥ ततइति जगतां यानि मङ्गलानि आनन्दास्तेषामुपजीव्यभुतं मङ्गलं ब्रह्मानन्दः सएवात्मास्वरूपं तेन तस्यैवानन्दस्यान्यानि भूतानिमात्रामुपजीवन्तीति श्रुतेः मङ्ग

ततोजगन्मङ्गलमङ्गलात्मना विधाय रामायणकीर्तिमुत्तमाम्॥
चचार पूर्वाचरितं रघूत्तमो राजर्षिवर्य्यैरभिसेवितं यथा ॥ १ ॥

लानाञ्चमङ्गलमिति स्मृतेश्च किंच जगतां मङ्गलं कल्याणं यस्मात्तादृशकल्याणरूपआत्मामूर्तिस्तया उत्तमांश्रोत्रादीनां मोक्षदत्वेना त्युत्तमां रामायणकीर्तिं वाल्मीक्यादि कृत नानाविध रामायण प्रवर्तिकां रावणवधादिजां कीर्तिंविधाय स्थितोरघूत्तमः ततः सीताप रित्यागानन्तरं पूर्वैः स्ववंशजैराचारितं प्रजापालनसत्कथाश्रवणादिकं केवलंतत्पूर्वजैरेवाचरितमितिन किंत्वन्यैरपि राजर्षिश्रेष्ठैर्य थाऽभिसेवितं तथाचचार कृतवान् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदारागुरुदेवविश्वासलक्षणमहागुणवती यद्वा उदारा दानशीलाबुद्धिर्यस्य तेन पुरातनीः प्राचीनराजसम्बन्धिनीः शुभाः धर्माधर्मनिर्णेत्रीः प्रमत्तस्य स्वगोमण्डलमिश्रितब्राह्मणगोदानात् प्रमत्तस्य नृगस्य राज्ञो द्विजस्य शापात्तिर्यक्त्वमाह तेनाज्ञातकृतब्रह्मस्वापहारेण परमधा

सौमित्रिणापृष्ट उदारबुद्धिना रामःकथाःप्राह पुरातनीःशुभाः ॥
राज्ञः प्रमत्तस्य नृगस्य शापतो द्विजस्य तिर्यक्त्वमथाह राघवः
॥ २ ॥

र्मिकस्यापीदृश्यवस्थेति सर्वथाब्रह्मस्वविमुखताधर्मइतिसूचितम् ॥ १ ॥

CC-0. In Public Domain. Digitization by eGangotri

एकान्तेविजने उपस्थितंप्राप्तम् विनयान्वितः सन् भक्त्यागुरुरयमिति बुद्ध्या प्रणम्य अनेनगुरूपसदनप्रकारउक्तः आसादितंशुद्धंभाव

कदाचिदेकान्त उपस्थितंप्रभुं रामं रमालालितपादपङ्कजम् ॥
सौमित्रिरासादितशुद्धभावनः प्रणम्यभक्त्याविनयान्वितोऽब्र-
वीत् ॥ ३ ॥

नं भावनाकरणमन्तः करणंयेनसः शुद्धान्तःकरणइतियावत् भगवदुक्तसत्कथाश्रवणेन शुद्धान्तःकरणइत्यर्थः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हे महामते महतीसर्वविषयामतिर्यस्य तस्य संबोधनं त्वं शुद्धबोधोऽसि अनवच्छिन्नचैतन्यरूपोऽसि सर्वदेहिनामात्माऽसि जीवानांतत् प्रतिबिम्बत्वात् अधीशोऽसि अन्तर्यामित्वान्नियन्ताऽसि वास्तवभेदाभावाच्च सर्वात्मत्वम् औपाधिकभेदाच्च नियन्तृनियम्यभावोबोध्यः निराकृतिः अस्मदादिवत्स्वार्जितकर्माधीनशरीराकृतिरहितः नन्वेवंसर्वैः कथमेवंनज्ञायतेऽतआह ज्ञानदृशां स्वयमेवप्रतीयसे ज्ञायतेऽ

त्वं शुद्धबोधोऽसि हि सर्वदेहिनामात्माऽस्यधीशोऽसि निरा-
कृतिःस्वयम् ॥ प्रतीयसे ज्ञानदृशां महामते पादाब्जभृङ्गाहितस
ङ्गसाङ्गिनाम् ॥ ४ ॥

नेनेतिज्ञानं वेदान्तवाक्यजातं तदेवदृक्दर्शनसाधनंयेषां तेषामितिसंबन्धसामान्येषष्ठी तैरित्यर्थः तादृशदृक्लाभश्च त्वद्भक्त्यधीनइत्याह पादेति त्वच्चरणकमलयोर्भृङ्गवदाहितःकृतः सङ्गोयेन तादृशान्तः करणसङ्गवतां त्वच्चरणकमल सल्लग्नान्तः करणवतामित्यर्थः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ प्रार्थयते अहमिति भवस्य संसारस्यापवर्गो निवृत्तिर्यस्मात्तादृशं तव पादाम्बुजं प्रपन्नोऽस्मि शरणं प्राप्तोऽस्मि योगिभावितं योगिभिः संसारमुक्तये भावितम् अनेन तस्य भवापवर्गत्वे सदाचारः प्रमाणमुक्तम् प्रार्थनीयमाह अपारवारिधिरूपं यदज्ञानं संसारमूलकारणं यथा सुखम

अहं प्रपन्नोऽस्मि पदाम्बुजं प्रभो भवापवर्गं तव योगिभावितम् ॥ यथाञ्जसाज्ञानमपारवारिधिं सुखं तरिष्यामि तथाऽनुशाधि माम् ॥ ८ ॥

क्लेशेन तरिष्यामि तथा मामनुशाधि शिक्षय अपारवारिधिमित्यनेन सपारप्रसिद्धसमुद्राद्व्यतिरेक उक्तः अशक्यतरणताऽनेन ध्वनिता ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथोत्तरमवतारयति श्रुत्वेति रामः सौमित्रिवचः श्रुत्वा अथशब्दोवाक्यालङ्कारे तदा श्रवणाव्यवहितकाले एवप्रपन्नानां भक्तानामार्ति संसारदुःखंहरतितादृशः प्रपन्नाश्रमादिहीना भक्तानुग्रहपरा च धीर्यस्यसः क्षितिपालानां राज्ञां भूषणभूतोज्ञानरूपतमसउपशान्तये त

श्रुत्वाथ सौमित्रिवचोऽखिलं तदाप्राह प्रपन्नार्तिहरःप्रसन्नधीः ॥
विज्ञानमज्ञानतमोपशान्तये श्रुतिप्रपन्नं क्षितिपालभूषणः॥ ६॥

दर्थम् सन्धिरार्षः श्रुतिभिः तमेवविदित्वाऽतिमृत्युमेतीत्यादिश्रुतिभिः प्रपन्नं तत्फलकत्वेन बोधितं विज्ञानमात्मतत्वज्ञानमिति सामान्यतः प्रथमंप्राह ॥ ६ ॥

CC-0. In Public Domain. Digitization by eGangotri

अथताद‍ृशज्ञानप्राप्त्यै क्रमेणबहिरङ्गान्तरङ्गसाधनान्याह आदाविति स्ववर्णाश्रमेषु शास्त्रेण वर्णिता याः क्रियानित्यनैमित्तकयज्ञदाना दिरूपास्ताः कृत्वा समासादितशुद्धमानसः प्राप्तान्तःकरणशुद्धिः तत्पूर्वमुपात्तसाधनः तदनुष्ठानपूर्वकमेवउपात्तानिसाधनानि शम दमादीनियेन ताद‍ृशः अनेनकर्मणां बहिरङ्गत्वं शमादीनामन्तरङ्गत्वं स्फुटमेवोक्तम् किंच शमदमवैराग्यदार्ढ्यपर्यन्तं कर्मानुष्ठानमेवेति

आदौ स्ववर्णाश्रमवर्णिताः क्रियाः कृत्वा समासादितशुद्धमानसः
समाप्य तत्पूर्वमुपात्तसाधनः समाश्रयेत्सद्गुरुमात्मलब्धये॥ ७॥

सूचितम् ततस्तत्कर्मानुष्ठानं समाप्य त्यक्त्वा संन्यस्येतियावत् आत्मलब्धये आत्मज्ञानाय तत्फलकाय तत्वमस्यादिवाक्यार्थविचारा- य सद्गुरुं श्रोत्रियंब्रह्मनिष्ठमित्यादि लक्षणलक्षितं समाश्रयेत् सेवेत अनेनव्युत्पत्तिबलेन स्वयमेववाक्यार्थविचारः क्रियमाणो न फला- येति सूचितम् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसारस्यभ्रमिमच्चक्ररूपत्वात्तन्निवृत्तेश्चतत्कारणाज्ञाननिवृत्तिमूलकत्वदज्ञाननिवृत्तेश्चतत्त्वज्ञानकसाध्यत्वात्तत्त्वज्ञानस्यचवेदान्तविचारसाध्यत्वात्तदर्थंगुरुसमाश्रयणमित्याह क्रियेति भवःसंसारश्चक्रवद्विपरिवर्तमानईर्यते कथ्यते तदेवोपपादयति आदृताआदरपूर्वंपूर्वजन्मार्जिताक्रियाएतस्यशरीरोद्भवस्यजन्मनोहेतुः तत्रजन्मनिसुरागिणोविषयाभिलाषवतः तौ शास्त्रप्रसिद्धौ धर्मेतरौ धर्माधर्मौ प्रियाप्रियौसुखदुः

क्रियाशरीरोद्भवहेतुरादृताप्रियाप्रियौतौभवतःसुरागिणः ॥
धर्मेतरौतत्रपुनः शरीरकंपुनः क्रियाचक्रवदीर्यतेभवः ॥ ८ ॥

खजनकौभवतःकस्यचिदधर्मएवसुखत्वबुद्ध्याप्रवृत्तिः कस्यचिद्धर्मएवंकदाचिदित्यप्यूह्यम् एवंतत्रोत्पादितकर्मणापुनःशरीरंपुनःक्रियाइत्येवंचक्रवद्विपरिवृत्तिः । यथाचक्रेभ्राम्यमाणेऽधोभागः कदाचिदुपरिउपरितनश्चाधः पुनरुपरिपुनरधएवंजन्मक्रिययोर्जन्यजनकभावेनपरिवृत्तिरिति बोध्यम् ॥ ८ ॥

Nepal Sanskrit University, Balmeekī Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यचाज्ञानमेवमूलमित्याह अज्ञानमेवेति अत्रविधौसंसारनिवृत्तिलक्षणेकर्तव्येऽर्थेतज्ज्ञानमेवमूलकारणत्वादज्ञानहानमेवविधीयते साध-
नत्वेनेतिशेषः ननुकर्मैवतन्नाशकमस्तुकिंज्ञानेनेत्याशङ्क्याह विद्यैवज्ञानमेवतन्नाशविधौमूलाज्ञाननाशनेपटीयसीसमर्थानकर्मसमर्थमितिशेषः

अज्ञानमेवास्यहिमूलकारणंतद्धानमेवात्रविधौविधीयते॥ विद्यै
वतन्नाशविधौपटीयसीनकर्मतज्जंसविरोधमीरितम् ॥ ९ ॥

यतस्तत्तज्जमज्ञानजम् आत्मस्वरूपाज्ञानजन्यदेहाद्यभिमानजन्यत्वात्कर्मणोज्ञानजन्यत्वंबोध्यम् ननुतज्जन्यस्यापितन्नाशकत्वंवृश्चिककर्क
व्यादौदृष्टमित्याशङ्क्यतज्जन्यत्वंवाननाशकत्वेप्रयोजकंकिन्तुसविरोधत्वमेवेत्याह यतसविरोधंतदीरितंनाशकमुक्तमित्यर्थः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतएवकर्मणानाज्ञानहानिरित्याह नाज्ञानेत्यादि यतःकर्मणाविरोधाभावान्नाज्ञाननाशनापिरागनाशोवस्तुतः कर्मानुष्ठानात्पुनः सदोषंक्षयिफलत्वादिदोषविशिष्टंकर्मैवोद्भवेत्कर्मणश्चपुनःसंसारएवेतिनमुक्तिमत्याशा ततस्तस्माद्बुधोविवेकीज्ञानविचारवान् ज्ञायतेऽनेने·

नाज्ञानहानिर्नचरागसङ्क्षयोभवेत्ततः कर्मसदोषमुद्भवेत् ॥ ततः पुनः संसृतिरप्यवारितातस्माद्बुधोज्ञानविचारवान्भवेत् ॥ १० ॥

तिज्ञानंवेदान्तवाक्यंतद्विचारवान्भवेत ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानींज्ञानस्यैवमोक्षहेतुत्वंवक्तुंज्ञानकर्मसमुच्चयवादंदूषणायानुवदतिसार्धेन नन्विति नन्वितिशङ्कायाम् यथाविद्यावेदमुखेनश्रुतिपुराण-
लक्षणेन ब्रह्मविदाप्नोतिपरम् इत्यादिनापुरुषार्थसाधनमुक्ता तथा उभाभ्यामेवपक्षाभ्यांयथाखेपक्षिणांगतिः तथैवज्ञानकर्मभ्यांप्राप्यते
ब्रह्मशाश्वतम् इत्यादिनाक्रियाऽपितत्साधनत्वेनोक्ता किंच क्रियाकर्तव्यत। तृतीयार्थेप्रथमा कर्तव्यतयाआवश्यकेकृत्येअवश्यकर्तव्यत-

ननुक्रियावेदमुखेनचोदितायथैवविद्यापुरुषार्थसाधनम् ॥ कर्तव्यताप्राणभृतःप्रचोदिताविद्यासहायत्वमुपैतिसापुनः ॥ ११ ॥

याप्रचोदितानित्यनैमित्तिकरूपा एवंचनदकरणेप्रत्यवायोत्पत्त्याज्ञानोत्पत्तिरेवनस्यात् तस्मात्सापुनर्विद्यायाःसहायत्वंप्राप्नोतिघटेजन-
नीयेयथादण्डचक्रादीनांपरस्परसहायता ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्तव्येतीतस्वोक्तमेवेविवृणोति कर्मेति वीरहावाएषदेवानांयोऽग्निमुद्वासयतेयावज्जीवमग्निहोत्रंजुहोति इतिश्रुतिः तत्रासिद्धान्तीशङ्कते नन्विति ध्रुवंस्थिरंकार्यमिदंपुरुषार्थमोक्षजनिकाविद्यायतः स्वतन्त्राविनाऽपिसहायेन स्वकार्यसंपादनेसमर्था यथातेजस्तिमिरनिवर्तन-

कर्माकृतौदोषमपिश्रुतिर्जगौतस्मात्सदाकार्यमिदंमुमुक्षुणा॥ननु स्वतन्त्राध्रुवकार्यकारिणीविद्यानकिञ्चिन्मनसाऽप्यपेक्षते ॥ १२

समर्थंमनसाऽपिकिञ्चित्सहायभूतंवस्तुनापेक्षते तथाफलेजननीयेसहायान्तरसंभावनाऽपिनेतिभावः अनेनविद्याफलजननेनिरपेक्षास्वतन्त्रत्वात्तेजोवदित्यनुमानंसूचितम् ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समुच्चयवादीपरिहराति नेति त्वदुक्तंनेत्यर्थः सत्यकार्यः अक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवति इत्यादिवेदनबोधितःस्थिरकार्योऽपि-
अध्वरः यथाऽन्यानपिकारकादिकान् आरादुपकारकप्रयाजाद्यङ्गानिदेशकालादीनिचप्रकाङ्क्षते तथाविद्यापिअग्निहोत्रंजुहोतिइत्यादिवि

नसत्यकार्योऽपिहियद्वदध्वरः प्रकाङ्क्षतेऽन्यानपिकारकादिकान्
तथैवविद्याविधितः प्रकाशितैर्विशिष्यते कर्मभिरेवमुक्तये ॥ १३ ॥

धिवाक्यतःतत्समूहेनप्रकाशितैः कर्मभिः सहितैवमुक्तयेविशिष्यतइत्यर्थः विदषाफलदानेकर्मापेक्षा अङ्गित्वात् प्रयाजाद्यङ्गापेक्षदर्शा
दिवदितिसत्प्रतिपक्षानुमानमनेनसूचितम् ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदनूद्य सिद्धान्ती दूषयति केचिदिति यत्केचिद्वितर्कवादिनऽर्तज्ञानकर्मणोसमुच्चित्यमुक्तिसाधनंवदन्तितदप्यसत् यथाकेवलंकर्म मोक्ष साधनमित्यमत्तथातन्मीलितमित्यप्यसत् तत्रहेतुर्दृष्टविरोधकारणात् दृष्टायोर्विरोधः सवलोकदृष्टविरोधरूपात्कारणात्तदसदित्यर्थः विरो

केचिद्वदन्तीतिवितर्कवादिनस्तदप्यसद्दृष्टविरोधकारणात् ॥
देहाभिमानादभिवर्धतेक्रियाविद्यागताहङ्कृतितःप्रसिद्ध्यति १४

धमेवाह देहाभिमानात्क्रियावर्धतेअनात्मनिदेहादावात्मत्वाभिमानात्क्रियावृद्धिः विद्यातुगताहङ्कृतितः गताहङ्कृतिर्यस्यतस्यनष्टाहङ्कृतेः प्रसिद्ध्यति सार्वविभक्तिकस्तासिः एवंचाहङ्कारसत्तामूलकत्वात्क्रियाज्ञानयोः समुच्चयोविरुद्धइत्यर्थः ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus.

अथपूर्वपक्षयुक्तानुमानंदूषयनविद्यास्वरूपमाह विशुद्धंविज्ञानंयेभ्यस्तेषांवेदान्तवाक्यानांयद्विशेषेणरोचनंरलयोरभेदादालोचनंविचार स्तेनाञ्चिताप्रापितायाचरमाआत्मवृत्तिर्ब्रह्माकारांतःकरणवृत्तिः साविद्येतिभण्यते।विद्वाद्भिरितिशेषः पुनःसमुच्चयनिराकरणायविद्याकर्मणो वैषम्यमाह कर्मयज्ञादिअखिलकारकादिभिःकर्तव्यकर्मादिभिरङ्गैश्चसहितंसदुदेति फलोन्मुखंभवति विद्यापुनरखिलकारकादीन्निहन्ति

विशुद्धविज्ञानविरोचनाञ्चिताविद्याऽऽत्मवृत्तिश्चरमेतिभण्यते ॥ उदेतिकर्माखिलकारकादिभिर्निहन्ति विद्याऽखिल कारकादिकम् ॥ १५ ॥

तत्रकर्तृत्वादिबुद्धिंनिहन्ति सकलव्यापारपरित्यागेनब्रह्मणिसमाप्तिर्हिविद्या अतः स्वोत्पत्तौचित्तशुद्धिद्वाराकर्मसापेक्षास्वफलेजनायितव्ये तन्निरपेक्षैवान्यथाविद्यास्वरूपस्यैवभङ्गापत्तेरितिपूर्वपक्षयुक्तहेतोरसिद्धिरितिभावः ॥ १५ ॥

CC-0. In Public Domain. Digitization by eGangotri

उपसंहरन्मुमुक्षोर्वृत्तिप्रकारमाह तस्मादिति विद्याविरोधाद्विद्यायाःकर्मणासह विरोधेनसमुच्चयोनभवेत्तस्मात्सुधीर्मुमुक्षुरशेषतःकर्मत्यजे-
त् काम्यंतुसर्वथात्याज्यमेवनित्यनैमित्तिकमपियावच्चित्तशुद्धिकर्तव्यमेव ततोऽपिब्रह्मणिचित्तस्थैर्यपर्यन्तं कर्तव्यमेव ततस्तदनुसन्धानप्र-

तस्मात्त्यजेत्कार्यमशेषतः सुधीर्विद्याविरोधान्नसमुच्चयोभवेत् ।
आत्मानुसन्धानपरायणःसदा निवृत्तसर्वेन्द्रियवृत्तिगोचरः १६

तिबन्धकत्वात्प्रयोजनाभावाच्चतदपित्याज्यमेवेतिभावः इदानींमुमुक्षुकर्तव्यमाह निवृत्ताःसर्वेषामिन्द्रियाणां गोचराविषयाःशब्दादयोय
स्मात्तादृशःसन् आत्मनःसच्चिदानन्दस्यानुसन्धानमेवपरमयनंप्राप्यंयस्यतथाविधोभवेत् अत्रेन्द्रियप्रत्याहारःकर्तव्यत्वेनोक्तस्तेनतत्पूर्वप्रा-
णायामाद्यर्थादाक्षिप्तम् ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रागिविरागिभेदेनकर्मणोकर्तव्यताकर्त्तव्यतेआहयावदिति मायया विद्ययाशरीरादिष्ववानात्मसुआत्मधीरहङ्कृतेत्यादिरूपायावद्वर्त्ततेतावद्वि
धिवादकर्मणाम् विधिर्यजेतेत्यादिश्रुतिर्वाद:कर्तव्यताबोधकोयेषांकर्मणांविधेयोवशवर्त्तितत्कर्मकर्ताभवेत् तदपगमेतुतदाखिलं जगन्नेतीति

यावच्छरीरादिषुमाययात्मधीस्तावद्विधेयोविधिवादकर्मणाम् ॥
नेतीतिवाक्यैरखिलंनिषिद्धय तज्ज्ञात्वापरात्मानमथत्यजेत्क्रि
याः ॥ १७ ॥

वाक्यैः अथातआदेशोनेतिनेतिइत्यादिवाक्यैर्निषिध्य मिथ्यात्वेननिर्णीयताद्विलक्षणतयासत्यत्वेनपरमात्मस्वरूपंज्ञात्वाक्रियास्त्यजेत्निरू
पितमेतत् ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मविज्ञानेसत्यवश्यमविद्या निवर्ततइत्याह यदेति आत्मनिशुद्धेन्तःकरणेपरमात्मनईशस्यात्मनोजीवस्यचयोविभेदोमायान्तःकरण
रूपोपाधिद्वयकृतोविभेदोभेदस्तस्यभेदकं नाशकंभास्वरंप्रकाशशीलंयद्विज्ञानमितरवृत्त्युपमर्दनपूर्वकंब्रह्माकाराऽखण्डावृत्तिर्यदाऽवभाति

यदापरात्मात्मविभेदभेदकंविज्ञानमात्मन्यवभाति भास्वरम् ॥
तदैवमायाप्रविलीयतेऽञ्जसासकारकाकारणमात्मसंसृतेः॥ १८ ॥

असंभावनादितिरस्कारेणोदेति तदैव सकारकाजन्मान्तरप्रापककर्मसहितामायातत्तज्जीवोपाधिभूताविद्याऽञ्जसाझदितिप्रविलीयतेनश्यति
ननुतन्नाशेऽपिसंसारनाशःकथमतोमायाविशेषणम् आत्मसंसृतेःकारणंसंसारस्योपादानकारणमेवंचतन्नाशेकार्यनाशोभवत्येवेतिभावः १८

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं पुनर्दार्ढ्यायाह श्रुतीति तत्त्वमसीत्यादिश्रुतिरूपैःप्रमाणैस्तज्जनितज्ञानेन नाशितासाविद्याकथमपिकार्यकारिणीभविष्यतीति काकुरत्र सर्वथानेत्यर्थः असतःकार्यकारित्वासंभवादितिभावः पुनश्चतस्यानोद्भवइत्याह विज्ञानमात्रादिति अमलाशुद्धाद्वितीयतःद्विती

श्रुतिप्रमाणाभिविनाशिताचसाकथंभविष्यत्यपिकार्यकारिणी ॥
विज्ञानमात्रादमलाद्वितीयतस्तस्मादविद्यानपुनर्भविष्यति १९

यात्मविषयकाद्विज्ञानमात्रादितरासहकृतान्निदिध्यासनपरिपाकजज्ञानाद्यतोनष्टातस्मात्सापुनर्नभाविष्यति रज्ज्वज्ञानमूलकस्य सर्पस्य रज्जुज्ञानेन निवृत्तस्ययथानपुनरुत्पात्तिरितिभावः ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्यायाइतरनिरपेक्षायाएवमोक्षकारणत्वमुक्तंयुक्तिपूर्वकंपुनःकथयतिश्रोतृदार्ढ्याय। यदीति। यदिनष्टातत्त्वज्ञाननाशिता सा न पुनः प्रसूयतेनोत्पद्यतेतदाकारणाभावादहंमतिःकथंभवेत्। कथमपिनभवेदित्यर्थः। तदभावाच्चतत्कालेकर्माभावइतिस्वफलजननेसास्वतन्त्राइ

यदिस्मनष्टा नपुनःप्रसूयते कर्ताऽहमस्येति मतिः कथं भवेत्॥
तस्मात्स्वतन्त्रा न किमप्यपेक्षते विद्या विमोक्षाय विभाति केवला॥ २०॥

तरानिरपेक्षैवनाकिमप्यपेक्षते द्वितीयस्यासंभवात् अतः केवलाऽसहायैवविमोक्षायविभातितत्फलिकाभवतीत्यर्थः॥ २०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वकरणेप्रत्यवायभिया कर्मकार्यमितिचेन्नेत्याह सप्रत्यवायइति कर्मत्यागेनाहंनिश्चयेनाहंप्रत्यवायसंहितोभविष्यामीत्येवंशुद्धात्मनि-
अनात्मधर्मस्यधीरप्रज्ञस्यतत्त्वज्ञानविकलस्यप्रसिद्धा नतुतत्त्वदर्शिनः तस्याहंबुद्धेरभावात् पीपादेरनात्मधर्मतानिश्चयाच्च तस्माद्बुधैःकर्म

स प्रत्यवायोह्यहमित्यनात्मधीरज्ञप्रसिद्धा नतु तत्वदर्शिनः ॥
तस्माद्बुधैस्त्याज्यमपि क्रियात्मभिर्विधानतःकर्मविधि प्रका
शितम् ॥ २३ ॥

क्रियात्मभिः षष्ठ्यर्थेतृतीया क्रियाफलसक्तचित्तानां विधानतोविधानेनेतिकर्तव्यतयायुक्तंकर्म विधिभिरवश्यकर्तव्यतयाबोधितमपि-
त्याज्यमित्यर्थः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविरक्तस्यकार्यमाह। श्रद्धेति। गुरुशास्त्रयोर्विश्वासःश्रद्धातदन्वितोबुभुत्सुःशुद्धमानसोऽपि निष्कामकर्मानुष्ठानाच्छुद्धमानसश्चगुरोः प्रसादाल्लब्धतत्त्वमसीतिवाक्यतः श्रुतमात्मजीवयोरैकात्म्यंविज्ञाय मनननिदिध्यासनपरिपाकाभ्यांसाक्षात्कृत्य। चएवार्थः । साक्षा

श्रद्धान्वितस्तत्त्वमसीतिवाक्यतो गुरोःप्रसादादपिशुद्धमानसः॥
विज्ञायचैकात्म्यमथात्मजीवयोः सुखी भवेन्मेरुरिवाप्रकम्पनः
॥ २४ ॥

त्कृत्यैवसुखी भवेत्। सकलदुःखहीनोभवेदित्यर्थः। अप्रकम्पनःविषयाभिलाषाक्षोभितान्तःकरणः॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महावाक्यंविवरीतुंवाक्यार्थस्यपदार्थबोधपूर्वकत्वमाह । आदाविति । विधानतः भ्रमप्रमादराहित्येनवाक्यार्थविज्ञानस्यविधावुत्पत्तौआ
दौप्रथमंमुख्यमितियावत् । पदार्थावगतिःकारणम् । हिप्रसिद्धं तस्यपदद्वयंतत्त्वम्असीति । तत्रतत्पदार्थःपरमात्मासर्वज्ञत्वादिगुणः त्वं

आदौ पदार्थावगतिर्हिकारणं वाक्यार्थविज्ञानविधौ विधानतः ॥
तत्त्वंपदार्थौपरमात्मजीवकावसीतिचैकात्म्यमथानयोर्भवेत्
॥ २५ ॥

पदार्थोजीवः अनयोस्तत्त्वंपदार्थयोरैकात्म्यंतद्बोधकमसीतिपदम् ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननु सर्वज्ञत्वादिगुणस्येशस्य किञ्चिज्ज्ञत्वधर्मवता जीवेनैकात्म्यं विरुद्धमित्याशङ्क्याह । प्रत्यागिति । अहंबुद्धिविषयत्वं प्रत्यक्त्वं जीवधर्मः परोक्षत्वमीशधर्मस्तदादिधर्मकृतमात्मनोः परमात्मजीवात्मनोर्विरोधं विहाय त्यक्त्वा तयोः संशोधितां युक्तिभिः सम्यग्विचारितां तत्त्वंपदाभ्यां शक्त्यभावेऽपि वक्ष्यमाणप्रकारया लक्षणया लक्षितां ज्ञातां चिदात्मतां संगृह्य तत्त्वंपदोपास्थितिविषयां कृत्वा स्वमात्मानं तथा ज्ञात्वाऽथ एकात्मज्ञानानन्तरमद्वयो भवेत् । चित्स्वरूपतां प्राप्त इव भवेत् । पूर्वमपि तत्स्वरूप एव विस्मृतकण्ठचामीकरन्यायेन च तत्प्राप्तिः तद्वदित्युक्तम् ।

प्रत्यक्परोक्षादिविरोधमात्मनोर्विहाय संगृह्य तयोश्चिदात्मताम् ॥
संशोधितां लक्षणया च लक्षितां ज्ञात्वा स्वमात्मानमथाद्वयो भवेत्
॥ २६ ॥

अयं भावः तत्त्वंपदयोर्द्वावर्थौ वाच्यो लक्ष्यश्च तत्र तत्पदस्य मायोपाधिः सर्वज्ञत्वादिविशिष्टो वाच्यः त्वंपदस्यापि किञ्चिज्ज्ञत्वादिविशिष्टो मायाकार्याविद्योपाधिरविद्यावदन्तःकरणोपाधिर्वाच्यः उभयोरपि विशेषणांशत्यागेन शुद्धश्चिदात्मा लक्ष्यः तत्र वाच्ययोर्विरुद्धधर्मकत्वादैक्यासंभवेऽपि लक्ष्ययोरैक्यं निर्बाधमेवेति ॥ २६ ॥

CC-0. In Public Domain. Digitization by eGangotri

उक्तलक्षणास्वरूपमाह । एकात्मकत्वादिति जहतीलक्षणाजहत्स्वार्थलक्षणायथागङ्गायांघोषइत्यत्रगङ्गापदार्थस्यप्रवाहस्यघोषाधारता नुपपत्त्यासर्वथातत्परित्यागेनतीररूपार्थलक्षणा साप्रकृते न एकात्मत्वात् । विशेष्यांशस्यैकत्वात्सर्वथास्वार्थत्यागाभावात् । तथाज हल्लक्षणताजहत्स्वार्थलक्षणावत्त्वमपिअत्रनसंभवति । यथाकाकेभ्योदधिरक्ष्यतामित्यादौकाकश्रिदस्यस्वार्थात्यागेनैवदध्युपघातकेलक्षणा सापिन । विरोधतःविशेषणत्यागेनसर्वथास्वार्थत्यागाभावात् । अतोभागलक्षणाजहदजहल्लक्षणायुज्यते । अदोषतःपूर्वोक्तदोषाभावात्

एकात्मकत्वाज्जहती न सम्भवेत्तथाऽजहल्लक्षणता विरोधतः॥
सोऽयंपदार्थाविवभागलक्षणायुज्येततत्त्वंपदयोरदोषतः॥२७॥

विशेष्यांशस्यात्यागाद्विशेषणांशस्यत्यागाच्च । तत्रदृष्टान्तः । सोऽयंपदार्थाविव । यथासोऽयंदेवदत्तइत्यत्रतद्देशादिविशिष्टोऽतीतानुभव विषयोवातत्पदार्थः एतद्देशादिविशिष्टोऽनुभूयमानोवेदंशब्दार्थः । तयोश्चाविरुद्धविशेषणकत्वादैक्यासंभवेनदेशादिरूपविशेषणत्यागेना नुभवगतानीतत्वादिविशेषणत्यागेनवालक्षणयैक्यंतद्वदितिभावः ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथत्याज्यत्वायजीवोपाधिमाह । रसादी ति । रसापृथ्वीआदिर्येषांतानिपञ्चीकृतानियानिभूतानितेभ्यःसंभवोयस्यतत् । पञ्चीकरणंचे त्थम् एकैकंभूतंद्विधाविभज्यतत्रैकंभागंचतुर्धाविभज्यतेषांभागानांस्वेतरभूतचतुष्टयार्धभागचतुष्टयेसंयोजनेएकैकंभूतंपञ्चात्मकंभवतिभा

रसादिपञ्चीकृतभूतसंभवंभोगालयंदुःखसुखादिकर्मणाम् ॥ शरी
रमाद्यन्तवदादिकर्मजंमायामयंस्थूलमुपाधिमात्मनः ॥ २८ ॥

गाधिक्याच्चप्रातिस्विकतयाभूगादिव्यवहारोऽपि । सुखदुःखयोरादीनियानिकर्माणितेषांभेगास्तत्कर्मजसुखदुःखानुभवस्तस्यालयमाश्र यभूतमाद्यन्तवत् उत्पत्तिनाशयोगि आदिकर्मजंप्राग्भवीयकर्मजन्यंमायामयंपरम्परयामायाविकारः तद्विकारभूतविकारत्वात् । एतच्छरी रमात्मनःस्थूलमुपाधिंवदन्तीतिशेषः ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसूक्ष्मोपाधिमाह। सूक्ष्ममिति। बुधाःअन्यतस्थूलशरीराद्विलक्षणंशरीरंलिङ्गदेहाख्यमात्मनउपाधिंविदुः। तत्स्वरूपमाह। सूक्ष्मंचक्षु-
राद्याविषयः मनोबुद्धिदशेन्द्रियैःप्राणैश्चयुतम् सङ्कल्पात्मकंमनः निश्चयात्मिकाबुद्धिः घ्राणरसनाचक्षुस्त्वक्श्रोत्रेतिपञ्चज्ञानेन्द्रियाणि वा-

सूक्ष्मंमनोबुद्धिदशेन्द्रियैर्युतंप्राणैरपञ्चीकृतभूतसंभवम् ॥ भोक्तुः सुखादेरनुसाधनंभवेच्छरीरमन्याद्विदुरात्मनोबुधाः ॥ २९ ॥

क्पाणिपादपायूपस्थानिकर्मेन्द्रियाणि प्राणापानव्यानोदानसमानाश्चप्राणास्तैर्युतमेतत्सप्तदशसमुदायात्मकम्। तदाधारभूतान्याह। अप
ञ्चीकृतभूतसंभवंतेभ्यउत्पन्नमतएवादृश्यम्। तथाभोक्तुःसुखादेःसुखदुःखाद्यनुभवस्यानुसाधनम् स्थूलशरीरस्यैतदनुगतस्यैवभोगसाधनत्व
मितिभावः। एताद्वियोगेनैवमरणव्यवहारइतिबोध्यम् ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतजीवोपाधिद्वयमुक्त्वाईशोपाधिमाह । अनादीति । अनादि उत्पत्तिहीनम् । नानाविधपरिणामशालितयापरिणामरूपेणनश्वरामिति अनादित्वमात्रेणक्त्यासूचितम् । अनिर्वाच्यम् सत्त्वासत्त्वाभ्यांनिर्वक्तुमशक्यम् कारणंसकलप्रपञ्चस्यजनकम् ईदृशीमायातुब्रह्मणःपरमी-

अनाद्यनिर्वाच्यमपीहकारणं मायाप्रधानंतुपरंशरीरकम् ॥ उ-
पाधिभेदात्तुयतःपृथक्स्थितं स्वात्मानमात्मन्यवधारयेत्क्र-
मात् ॥ ३० ॥

श्वरव्यवहारसंपादकत्वादुत्कृष्टंप्रधानंशरीरकम् । स्वार्थेकः । एवमुपाधिभेदादेकमेवचैतन्यंयतः पृथक्स्थितंजीवईशइतिभेदबुद्धिविषय मतोलक्षणयोपाधिपरित्यागेनस्वात्मानमात्मनिअवधारयेदभेदेनजानीयात् । क्रमाच्छ्रवणमनननिदिध्यासनक्रमेणेत्यर्थः ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus

अथवाक्यार्थविचारफलमाह । कोशेष्विति । आनन्दमयस्य ब्रह्मत्वेअन्नमयप्राणमयमनोमयविज्ञानमयेषुचतुर्षुकोशेषुतत्तत्सङ्गात्तत्तदाकृतिर्विभाति यथाजपादिसङ्गात्स्फटिकोऽनेकाकृतिर्भाति । आनन्दमयस्यापि जीवत्ववादिनातुतेनसहपञ्चसु कोशेष्वितिबोध्यम् । अस्मि-

कोशेषुपञ्चस्वपितत्तदाकृतिर्विभातिसङ्गात्स्फटिकोपलोयथा ॥ असङ्गरूपोऽयमजोयतोऽद्वयोविज्ञायतेऽस्मिन्परितोविचारिते ॥ ३१ ॥

न्महावाक्येपरितोविचारितेसम्यग्विचारितेसत्ययमात्माऽसङ्गरूपःअन्नमयादिभिःसङ्गरहितः । असङ्गोनहिसज्जते । इतिश्रुतेः । अजोऽद्वयश्चविज्ञायते । स्थूलोऽहमित्यादिस्त्वज्ञस्यतत्तत्कोशप्रसङ्गात्प्रतीतिःस्फटिकवत् तत्त्वज्ञस्यतुनतथाप्रतीतिरितिभावः । एवंचतत्तदुपाधिकृततत्तद्रूपताप्रतीतिनिरासएव विचारफलमितिभावः ॥ ३१ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जाग्रदाद्यवस्थाऽपि बुद्धेर्धर्मोनात्मधर्मइत्याह । बुद्धेरिति । इहआत्मनिस्वप्नादिभेदेन जाग्रत्स्वप्नसुषुप्तिभेदेन यात्रिधावृत्तिर्दृश्यतेसाऽपि गुणत्रयात्मनः सत्त्वरजस्तमोरूपगुणत्रयस्वरूपाया बुद्धेर्धर्मः । उक्तावस्थात्रयस्योक्तमूलकत्वात् । एतदवस्थात्रयस्यास्मिन्नवस्थात्रय-साक्षिणि आत्मनि भानं मृषा बुद्ध्यध्यास निबन्धनं न तु वास्तव मित्यर्थः । अन्योऽन्यतोव्यभिचारतस्तस्यावस्था त्रयस्यस्व रूपतो

बुद्धेस्त्रिधा वृत्तिरपीह दृश्यते स्वप्नादि भेदेन गुणत्रयात्मनः ॥
अन्योऽन्यतोऽस्मिन्व्यभिचारतोमृषा नित्ये परे ब्रह्मणि केव
ले शिवे ॥ ३२ ॥

मृषात्वात्तज्ज्ञानस्य मृषात्वमेव । स्वप्नकाले जाग्रत्सुषुप्त्योरभावात् । जाग्रतिइतरद्वयस्याभावात् सुषुप्तावितरयोरभावात्परस्परं व्यभिचारोबोध्यः आत्मनस्तदनाश्रयत्वंविशेषणैराह । नित्येउत्पत्तिनाशशून्येपरेगुणत्रयातीते ब्रह्मणिव्यापकेकेवलेऽसङ्गेशिवआनन्दरूपे एवंभूतेसदैकरसेपरस्परव्यभिचारधर्माभानमसंभवीति भावः ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसाज्यत्वायसंसारमूलभूतांवृत्तिमाह । देहेति । एषांसङ्घातइतरेतराध्यासविषयात् अजस्रंयावद्धियो बुद्धेर्वृत्तिस्तमोमूलतयाऽज्ञ
लक्षणाऽज्ञत्वज्ञापिका यावत्परिवर्तते तावद्भवोद्भवःसंसारोद्भवोभवेत् । तमःपदंरजसोऽप्युपलक्षणम् । रजस्तमःप्रधानाबुद्धिः संसारहेतु

॥ १७ ॥

देहेन्द्रियप्राण मनश्चिदात्मनां सङ्घादजस्रं परिवर्तते धियः ॥
वृत्तिस्तमोमूलतयाऽज्ञलक्षणा यावद्भवेत्तावदसौ भवोद्भवः॥३३॥ ॥ १७ ॥

त्वात्सर्वथासाज्येति भावः ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत महावाक्यविचारस्य कर्तव्यमाह । नेतीति । अथात आदेशोनेतिनेति इति प्रमाणेननिराकृतं मिथ्यात्वेनगृहीतमखिलंजगत्येनसः ततोहृदासम्त्वप्रधानेनमनसासम्यगास्वादितं चिल्लक्षणंघनामृतंदुःखासंभिन्नंसुखंयेनसः । स्वर्गादितुपरिणामदुःखत्वात्तत्संभिन्नमेव । एवंभूतोऽशेषंजगद्देहेन्द्रियादिदृश्यमसूहंत्यजेत् ज्ञानोपादानबुद्धिविषयंनकुर्यात् । किन्तूदासीनस्तत्रभवेत् । ननुदेहेन्द्रियादिभिरेवतज्ज्ञान

नेतिप्रमाणेन निराकृताखिलो हृदासमास्वादितचिद्घनामृतः ॥
त्यजेदशेषं जगदात्तसद्रसं पीत्वा यथाऽम्भः प्रजहाति तत्फ-
लम् ॥ ३४ ॥

लाभात्कथमुपजीव्यस्यत्यागइत्याशङ्क्यदृष्टान्तदर्शनेनपरिहरति । यथातृषावान् आत्तः सद्रसोमाधुर्यंयेनतादृशं नारिकेलनारङ्गादि फलान्तर्वर्त्यम्भःपीत्वा तत्स्थानभूतंतत्फलं जहाति तत्रोदासीनोभवति तद्वत्सर्वदृश्यसारांशोत्रब्रह्मतल्लाभसतिनिःसारंदृश्यंनोपादेयंनापिहेयमितिभावः । यतोभयादिसंभावनातद्धेयमित्युच्यते ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतरस्यानित्यत्वेनतत्रवैराग्यार्थमात्मनएवनित्यत्वमाह । कदाचिदिति । कदापीत्यर्थः । अनवः उत्पत्त्यनन्तरंविद्यमानोहिनवः । तेन जन्मानन्तरास्तित्वंव्यावर्तितं नवत्वाभावेनेवजीर्णत्वाभावादवस्थान्तरापत्तिरूप परिणामोऽपिनिरस्तः ।अनेनअस्तिजायतेवर्द्धतेविपरिणम तेऽपक्षीयते नश्यतीति षड्भाव विकार राहित्यमुक्तम् । एवंचैतद्भिन्नं सर्वमुक्तषड्भावविकारवत्त्वादनित्यमिति ततोविरज्येतेतिबोधित-

कदाचि दात्मान मृतोनजायते नक्षीयते नापिविवर्धतेऽनवः ॥
निरस्तसर्वातिशयः सुखात्मकः स्वयम्प्रभः सर्वगतोऽयमद्वयः ३५

म् । यतऽईदृशोऽतएवनिरस्तः सर्वस्यदेहेन्द्रियादेरतिशयोमहत्त्वं येनस्वलाभात्सः यल्लाभान्नापरोलाभइतिःश्रुतेः यतःसुखात्मकः आनन्द स्वरूपः स्वयम्प्रभःस्वप्रकाशकश्च देहेन्द्रियादिस्तु दुःखस्वरूपः परप्रकाश्यश्च । यस्यभासासर्वमिदंविभाति । इतिश्रुतेः । सर्वगतोव्यापकः अयमहंबुद्धिविषयःप्रत्यगात्माऽपिअद्वयः उक्ताद्वयब्रह्मस्वरूपएव । नततोऽतिरिक्तइतिभावः । अयमात्माब्रह्म । इतिश्रुतेः ॥ ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुएवंविधेविकारशून्येआत्मनिजन्ममरणादिप्रवाहरूपसंसारभानंकथमितिशङ्कते। एवंविधेइति।दुःखमयःदुःखप्रचुरः।उत्तरयति। अज्ञानतइ
तिअज्ञानमूलकोयोध्यासोदेहान्तः करणादौअहंममेत्यध्यासस्तद्वशात्। एवंचभ्रान्तिरूपातत्प्रतीतिरितिभावः। नन्वेवंकथंतस्यसंसारस्यनि

एवंविधे ज्ञानमये सुखात्मके कथंभवो दुःखमयःप्रतीयते ॥
अज्ञानतोऽध्यासवशात्प्रकाशतेज्ञानेविलीयेत विरोधतःक्षणात्॥
॥ ३६ ॥

वृत्तिस्तत्राह। ज्ञानेति। आविर्भूतइतिशेषः। ज्ञानस्याज्ञानविरोधित्वात्तदुत्पत्तिक्षणएवकारणभूताज्ञाननाशात्तत्कार्यसंसारस्यापि वि
लयइत्यर्थः। यथारज्जुज्ञानेनरज्जौसर्पस्यलयइत्यर्थः ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाध्यासलक्षणमाह । यदन्य दि ति । यदन्यत्सर्पादिकमन्यत्ररज्ज्वादौ भ्रमात भ्रमजनकाद्दोषाद्विभाव्यते विज्ञायते अमुं विपश्चितो विद्वांसोऽध्यासइत्याहुः । यथाऽसर्पभूतेरज्ज्वादौ अहिविभावनं सर्पारोपो रज्ज्वबुद्धिमूलकस्तद्वदीश्वरेऽपि जगदेहादिसंसारात्मकं सर्वं विभाव्य-

यदन्यदन्यत्र विभाव्यते भ्रमादध्यासमित्याहुरमुं विपश्चितः॥
असर्पभूतेऽहिविभावनं यथा रज्ज्वादिके तद्वदपीश्वरे जगत्॥३७॥

तेआत्मज्ञानाभावाद्यथार्थतयाज्ञायते ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनिब्रगज्ज्ञानेकीदृशोऽध्यासोनिमित्तंतदाह विकल्पेति सर्वविकल्पकारणमायारहितेवस्तुतस्तत्सङ्गरहितेचिदात्मकेचित्स्वरूपेसर्वकारणेनिरामयेदुःखासंभिन्नानन्दमयेकेवलेसर्वविकारशून्यपरेदृश्यविलक्षणेब्रह्मणिव्यापकं आत्मनिप्रथममहङ्कारः कल्पितः सएवाध्यासः ।

विकल्पमायारहितेचिदात्मके ऽहङ्कारएष प्रथमः प्रकल्पितः ॥
अध्यासएवात्मनिसर्वकारणे निरामयेब्रह्मणि केवलेपरे ॥ ३८॥

अहंबुद्ध्यात्मकोऽध्यासएवसर्वसंसारकारणमितिभावः ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बुद्धिनिष्ठएवसंसारोनत्वात्मनिष्ठइत्यत्रान्वयव्यातिरेकौप्रमाणयति । इच्छादीति । परेसर्वसाक्षिणिआत्मनिसंस्तातिहेतवःभासमानसंसारकारणं
सदाकालत्रयेऽपिइच्छादिरागादिसुखादिधार्मिकाः इच्छांपेक्षेरागद्वेषौसुखदुःखंइत्येवमादिद्वन्द्वधर्मिकाःधियएवधीपुसतीषुसंसारइत्यन्वयमु

इच्छादिरागादिसुखादिधार्मिकाः सदा धियः संसृतिहेतवः परे ॥
यस्मात्प्रसुप्तौतदभावतःपरः सुखस्वरूपेणविभाव्यतेहिनः ॥३९॥

क्त्वातद्व्यतिरेकमाहयस्मात्कारणात्प्रसुप्तौतदभावा त्धीवृत्त्यभावात परआत्मानोऽस्माभिःतृतीयार्थेषुषष्ठी । सुखरूपेणस्वस्वरूपमात्रेणाविभा
व्यतेनिश्चीयते नतु संसारित्वेनेतिभावः सुप्तोत्थितस्तुसुखमहमस्वाप्समितिप्रत्यभिज्ञानुभवात्तदात्मस्वरूपनिश्चयोऽस्तीतितात्पर्यम् ॥ ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ पुनस्तत्त्वं पदार्थस्वरूपमाह । अनादीति । अनादिर्याऽविद्या ततउद्भवोयस्या बुद्धेरन्तःकरणस्यतत्रविम्बितःप्रतिबिम्बितश्चितःप्रकाशः सजीवइतीर्यते आत्मापरात्माधियः साक्षितया धीधर्मासङ्गेनैवपृथक्स्थितः । अन्तर्यामितयेत्यर्थः जीवोऽहंसुखीत्यादिप्रकारेणान्तःकर

अनाद्यविद्योद्भवबुद्धिबिम्बितोजीवप्रकाशोऽयमितीर्यते चितः ॥ आत्माधियः साक्षितया पृथक् स्थितो बुद्ध्या परिच्छिन्नपरः सएव हि ॥ ४० ॥

णवर्गाध्यासवान्परमात्मातु साक्षितयासर्वत्रविद्यमानोऽपितथेतिभावः । अतएवबुद्ध्यापरिच्छिन्नपरः बुद्धिलक्षणपरिच्छेदरहितःअतएव परः । एवंचज्ञानेनप्रतिबिम्बाधार विलयप्रतिबिम्बस्यविलयात्मजीवः सएवपरमात्मैवाहिप्रसिद्धं सइत्यस्यचानुवृत्तिबोध्या ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ बुद्ध्यात्मनोःपरस्पराध्यासवशात् परस्परधर्मभानमितिदार्ढ्यायपुनराह । चिद्बिम्बेति । चिदात्मचेतसोरन्योन्याध्यासवशात् पर
स्परतादात्म्यारोपाज्जडाजडत्वंप्रतीयते । चेतसोवृत्तीनांज्ञानत्वं जीवात्मनोजडत्वंप्रतीयते । अतएवज्ञानाश्रयआत्मेति चितएवताकि
र्कव्यवहारः । जीवात्मनिजडात्मनिजडात्माकथ्यते बुधैरितिस्मार्तव्यवहारश्च । अत्रहेतुः । चिदित्यादि । चिद्बिम्बस्यसाचिदाभासः अ

॥ २१ ॥ चिद्बिम्बसाक्ष्यात्मधियांप्रसङ्गतस्त्वेकत्रवासादनलाक्तलोहवत्॥
अन्योऽन्यमध्यासवशात्प्रतीयते जडाजडत्वंचचिदात्मचेतसोः

॥ ४१ ॥

क्षैःसहितः साक्षःसेन्द्रियः सचासावात्मामनःधीरन्तःकरणंतेषांप्रकृष्टसङ्गादतिसान्निकर्षादध्यासइत्यर्थः । अनलाक्तलोहवत् अग्नितप्तलो
हपिण्डवत् अत्रदृष्टान्तः । अग्निधर्मोदाहकत्वं लोहधर्मश्चवर्तुलत्वाद्यनलेभासते । तत्रहेतुरेकत्रवासात् परस्पराविभागेनवृत्तेरित्यर्थः । तद्व ॥ २१ ॥
देतयोरपि परस्परधर्माध्यासइत्यर्थः ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं दार्ढ्यायपुनराह । गुरोरिति । वेदवाक्यतइत्यनेन श्रवणंगुरोःसकाशादपि । ततश्चानेनमननमुक्तम् । ताभ्यांसञ्जातोविद्यया ज्ञानरूपस्यात्मनोऽनुभवोयस्यसः । अनेनकृतनिदिध्यासनइत्यर्थः । तं चिदानन्दस्वरूपं स्वात्मानमुपाधिवर्जितं रहितोपाधिधर्ममात्मस्थं

गुरोःसकाशादपिवेदवाक्यतः सञ्जातविद्यानुभवोनिरीक्ष्य तम् । स्वात्मानमात्मस्थमुपाधिवर्जितं त्यजेदशेषं जडमात्मगोचरम् ॥ ४२ ॥

हृत्स्थंनिरीक्ष्य अपरोक्षीकृत्याशेषंजडं दृश्यंत्यजेत् । तत्रोदासीनोभवेदिति भावः ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ज्ञेयंनिरुपाधिकं स्वरूपंश्लोकद्वयेनाह प्रकाशेति अहंप्रकाशरूपः स्वप्रकाशः परप्रकाशहीनः परप्रकाशरूपोयथाघटादिः अजोजन्मादि हीनः अद्वयःसजातीयद्वितीयरहितः असकृद्विभातः सकृदपिपरेणभासकान्तरेणप्रकाशितः सकृद्विभातः नसकृद्विभातोसकृद्विभातः नत

प्रकाशरूपोऽहमजोऽहमद्वयोऽसकृद्विभातोऽहमतीवनिर्मलः ॥
विशुद्धविज्ञानघनोनिरामयःसम्पूर्णआनन्दमयोऽहमक्रियः॥४३॥

त्रसूर्योभातिनचन्द्रतारकमितिश्रुतेः नतद्भासयतेसूर्यइतिस्मृतेश्च अतीवनिर्मलः मायाकृतावरणविक्षेपरहितः विशुद्धविज्ञानघनः विशुद्धचि देकरसः निरामयःकर्तृत्वाभिमानरहितः सम्पूर्णःदेशकालपरिच्छेदहीनः आनन्दमयः आनन्दरूपः स्वार्थेमयट् अक्रियः परिणामहीनः ॥ ४३ ॥

CC-0. In Public Domain. Digitization by eGangotri

सदैवेति अहंसदैवकालत्रयेऽपिमुक्तःसर्वधर्मरहितः अचिन्त्यशक्तिमान् यःपरमात्मा अतीन्द्रियज्ञानम्इन्द्रियातिरिक्तज्ञानरूपःयतोवाचो निवर्त्तन्ते अप्राप्यमनसासहइतिश्रुतेः अविक्रियात्मकोऽपरिणामी अनन्तपारःअन्तःकालतःपारःपरन्तीरन्तावविद्यमानौ यस्य तेनदेश

सदैवमुक्तोऽहमचिन्त्यशक्तिमानतीन्द्रियज्ञानमविक्रियात्मकः॥
अनन्तपारोऽहमहर्निशंबुधैर्विभावितोऽहंहृदिवेदवादिभिः ॥४४॥

कालपरिच्छेदहीनः ईदृशोयःपरमात्माबुधैर्हृदि अहर्निशंविभावितः सोऽहमित्यर्थः ॥ ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंभावनायाःफलमाह एवमिति उक्तरीत्यासदाआत्मानं अखण्डितात्मनाविषयानाकृष्टचित्तेन विचारमाणस्यध्यायतः धातूनामनेकार्थ त्वात् चरमाणएवचारमाणःस्वार्थेऽण् विशुद्धभावनाब्रह्माकारान्तः करणवृत्तिरुदंतीतिशेषः साचोदिताकारकैर्देहान्तरमापककर्मभिः स

एवंसदात्मानमखण्डितात्मनाविचारमाणस्यविशुद्धभावना ॥
हन्यादविद्यामचिरेणकारकैरसायनंयद्वदुपासितंरुजः ॥ ४५ ॥

हाविद्यामाचिरेणशीघ्रमेवहन्यात् यथांपामितंसेवितंरसायनं रुजोहन्यात्तद्वत् ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रध्यानेइतिकर्तव्यतामाह विविक्तइति निर्जनइत्यर्थः आसीनोयथोचितपद्मासनाद्युपविष्टः उपारतेन्द्रियः तेनशमदमादिसम्पन्नः विनिर्जितात्माप्राणायामादिभिर्जितान्तःकरणः अतएवविमलान्तराशयोविशुद्धचित्तः विज्ञानदृक्विज्ञानएवदृक्भानंयस्यसः द्रष्टृदृश्यभा

विविक्तआसीनउपारतेन्द्रियोविनिर्जितात्माविमलान्तराशयः॥
विभावयेदेकमनन्यसाधनोविज्ञानदृक्केवलआत्मसंस्थितः॥४६

नरहितः अनेननिर्विकल्पकसमाधिरुक्तः अनन्यसाधनः तत्त्वज्ञानातिरिक्तमुक्तिसाधनास्तित्वभ्रमरहितः केवलोऽसङ्गःआत्मसंस्थितः आत्मन्येवसंस्थासमाप्तिः सञ्जातायस्यसतेन नकदापिविषयान्तरसञ्चारर्वाचित्तः विभावयेत् ध्यायेत् ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंच यदेतत्भूतंभविष्यद्वर्तमानं विश्वंपरमात्मादर्शनंभासकोयस्यतत् तस्यभासासर्वमिदंविभातीति श्रुतेः तत्सर्वकारणेमायासान्निधाना
त्सर्वोपादानत्वेनाभिमतेआत्मनिविलापयेत् उपादानसत्ताव्यतिरेकेणकार्यसत्तांनपश्येत् तादृशस्यलक्षणमाह सम्पूर्णः अवाप्तसमस्तका

विश्वंयदेतत्परमात्मदर्शनं विलापयेदात्मनि सर्वकारणे ॥
पूर्णश्चिदानन्दमयोऽवतिष्ठते न वेद बाह्यं न च किञ्चिदान्त
रम् ॥ ४७ ॥

मः तस्यकाम्याभावात् चिदानन्दमयः तद्रूपोऽवतिष्ठते बाह्यमान्तरंच दृश्यंनजानाति सर्वत्रब्रह्मदर्शनादिति भावः ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाधिसिद्धेः पूर्वंयत्कर्तव्यंतदाह । पूर्वमिति । समाधेः सकलविषयव्यासङ्गनिवृत्तिपूर्वकं ब्रह्माकारवृत्तिः समाधिस्ततः पूर्वमखिलंस चराचरंजगत् ओङ्कारमात्रं विचिन्तयेत् । ओङ्कारोमायतेऽ नेनेतिमात्रा प्रमाणं बोधकत्वेन परिच्छेदकोयस्यतथाजानीयात् । तदेवविवृ

पूर्वं समाधे रखिलं विचिन्तये दोङ्कारमात्रं सचराचरं जगत् ॥
तदेव वाच्यं प्रणवो हि वाचको विभाव्यते ज्ञानवशान्न बोधतः ॥ ४८ ॥

णोति तदेवेति । जगदेवेत्यर्थः । प्रणवोवाचकोविभाव्यतेएतत्ाहिप्रसिद्ध इत्यर्थः । इयंभावनाज्ञानवशादेवनबोधकः । बोधोनिर्विशेषब्रह्मसाक्षात्कारस्तद्दुत्तरंनेत्यर्थः । तस्यसर्ववृत्त्युपमर्दकत्वात् ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमर्थं विवृणोति । अकारेति । अकारसञ्ज्ञस्तद्वाच्यःपुरुषोहिविश्वकोविश्वएवविश्वकः विश्वशब्देनपरिभाषितःअयंजाग्रत्साक्षीविराट्
ततःस्वप्नसाक्षीतैजसःतेनपदेनपरिभाषितःलिङ्गदेहाभिमानीहिरण्यगर्भउकारकः उकारप्रतिपाद्यईर्यते । ततः सुषुप्तिसाक्षीप्राज्ञपदवाच्यो

अकारसञ्ज्ञः पुरुषो हि विश्वको ह्युकारकस्तैजसईर्यते क्रमात्
प्राज्ञो मकारः परिपठ्यतेऽखिलैः समाधि पूर्वं न तु तत्त्वतो
भवेत् ॥ ४९ ॥

मायोपाधिकोमकारस्तद्वाच्यः परिपठ्यतेऽखिलैर्वेदैः । इयंभावनासमाधिपूर्वंसमाधेःपूर्वमेव नतत्त्वतः तत्त्वसाक्षात्कारेसतिनभवेत् । सर्व
स्यब्रह्मणिप्रविलयात् ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविलापन मकारमाहद्वाभ्याम् । विश्वंत्विति । उकारमध्ये बहुधाव्यवस्थितं स्थूलदेहनिबंधनंस्थूलदेहाभिमानेन स्थितं विश्वम्पुरुषंतद्वाचकमकारम् च विलापयेत् । तुश्चार्थे । विलीनम्भावयेत् ततस्तैजसंसालिङ्गदेहाभिममानिनम् पुरुषं तद्वाचकंप्रणवद्वितीय वर्णमुकारं वि-

विश्वं त्वकारं पुरुषं विलापयेदुकारमध्येबहुधा व्यवस्थितम् ।
ततो मकारे प्रविलाप्यतैजसंद्वितीयवर्णं प्रणवस्य चान्तिमे ॥५०॥

लीनविश्वकम्मकारे विलाप्याविलीनम्भावयित्वा ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततस्तादृशंमकारंतद्वाच्यंप्राज्ञंचकारणं कारणत्वाभिमानिनंपुरुषमिहात्मनि चिद्घनेपरे विलापयेत् तथाभावयेत् । ततः सोऽहंमर्वोविला
पाधिज्ञानंपरब्रह्मविभावयेत् । तद्विशिनष्टि । सदाविमुक्तिमत् नित्यमुक्तम । नन्वहंपदार्थस्यरागद्वेषादिमलिनस्यकथं ब्रह्मत्वभावनेसा

मकारमप्यात्मनि चिद्घने परे विलापयेत्प्राज्ञमपीह कारणम् ।
सोऽहं परं ब्रह्म सदा विमुक्तिमद्विज्ञानदृङ्मुक्त उपाधितोऽ
मलः ॥ ५१ ॥

शङ्क्याहंपदार्थंविशिनष्टि । उपाधितोमुक्तः अतएवामलःतथाभावेनसाधनं विज्ञानदृक्विज्ञानं ब्रह्ममात्रप्रसयाविच्छेदरूपादृक् निदिध्या
सनं सत्साक्षात्कारसाधनंयस्यसः ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंभावनावतोलक्षणमाह । एवमिति । उक्तप्रकारेणसदाजातापरमात्मन्येकभावना यस्यसः परिविस्मृतमखिलंपुत्रदेहादियेनसः। अत एवस्वस्वरूपानन्देनैवतुष्टःनतुविषयानन्देन । तस्यपरिणामेदुःखरूपत्वात्ततो विरक्तइत्यर्थः । साक्षान्नित्यात्मनिसुखप्रकाशकः साक्षा

एवं सदा जातपरात्मभावनः स्वानन्दतुष्टःपरिविस्मृताखिलः ॥
आस्ते स नित्यात्मसुखप्रकाशकः साक्षाद्विमुक्तोऽचलवारिसि
न्धुवत् ॥ ५२ ॥

दौपाधिकनामरूपभेदराहित्येननित्समखण्डितमात्मस्वरूपंयत्सुखंप्रकाशश्चतद्रूपः एवंरूपो विमुक्तोजीवन्मुक्तः । अचलंनिश्चलंवारिय स्यतादृशसिन्धुवदास्ते । विषयसम्बन्धरूपलहरीरहितआस्तइत्यर्थः ॥ ५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशस्यमत्प्राप्तिर्भवत्येवेत्याह । एवमिति । उक्तप्रकारेणसदाऽभ्यस्तसमाधियोगिनः निवृत्ताःसर्वेषामिन्द्रियाणांगोचराविषयाःशब्दादयो यस्य विनिर्जिताअशेषारिपवःकामादयोयेनतस्य । तज्जयेनविषयेष्वन्तःकरणाप्रवृत्तेः । अतएव सर्वज्ञत्वनित्यत्वनित्यतृप्तत्वबोध

एवं सदाऽभ्यस्तसमाधियोगिनो निवृत्तसर्वेन्द्रियगोचरस्य हि ॥ विनिर्जिताशेषरिपोरहंसदा दृश्यो भवेयं जितषड्गुणात्मनः ॥५३ ॥

रूपत्वस्वतन्त्रत्वनियमलुप्तत्वानन्तरूपाषड्गुणायस्यतादृशआत्माजितो वशीकृतोयेनतस्य सदादृश्योभवेयम् । एतेनमद्भक्तस्ययोगिनो ऽहंदृश्योनतुभक्तिविमुखस्येति सूचितम् ॥ ५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंविधोजीवन्मुक्तःप्रारब्धवशेन अनभिमानोभोगानश्नँस्तिष्ठेत् ततोमय्येवविलीयते मद्रूपोभवतीत्याह । ध्यात्वैवमिति ॥ ५४ ।

ध्यात्वैवमात्मानमहर्निशं मुनिस्तिष्ठेत्सदा मुक्तसमस्तबन्धनः ॥
प्रारब्धमश्नन्नभिमानवर्जितो मय्येवसाक्षात्प्रविलीयते ततः ५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वधर्मापेक्षयाऽयमेवधर्मोज्यायानित्याह । आदौचेति । भवसंसारमादिमध्यावसानेषुसर्वथाभयशोकयोः कारणंविदित्वातत्कारणी भूतंविधिवादैर्यजेतेत्यादिभिश्चोदितंबोधितंसमस्तंकर्ममार्गकाम्यंहित्वा अखिलात्मनांजीवानांस्वरूपभूतंमामात्मानं परमेश्वरंभजेत् । य

आदौ च मध्ये च तथैव चान्ततो भवं विदित्वा भयशोक कारणम् ॥ हित्वा समस्तं विधिवादचोदितं भजेत्स्वमात्मान मथाखिलात्मनाम् ॥ ५५ ॥

थाधनस्यार्जनेनादौदुःखंमध्येपालनकृतं तत्र राजादिकृतं भयमन्तेनाशेशोकपर्यंवसायिदुःखमेवं पदार्थमात्रेद्रष्टव्यम् ॥ ५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मय्यभेदभावनया नामरूपाविभागेन तद्रूप एवभवतीत्यमुमर्थं सदृष्टान्तमाह । आत्मनीति । आत्मनिसर्वाधिष्ठानेमयिइदंस्वस्वरूपं जीवमभेदेनविभावयन्यदा । तिष्ठतीतिशेषः । तदामयात्मनापरमेश्वरेणाऽभेदेनभवति अभिन्नोभवति । तत्रदृष्टान्तः यथासमुद्रेप्रविष्टं नद्यादि

आत्मन्यभेदेन विभावयन्निदं भवत्यभेदेन मयाऽत्मनातदा ॥
यथाजलं वारिनिधौ यथापयः क्षीरेवियद्व्योम्न्यऽनिले यथाऽनिलः ॥ ५६ ॥

जलंसमुद्रएव यथाक्षीरेगवादिक्षीरेप्रक्षिप्तंपयःक्षीरमेव यथाव्योम्निमहाकाशेघटाद्यवच्छिन्नाकाशोघटादिभङ्गे च यथाचर्मभस्त्रिकाद्यवच्छिन्नोवायुरनिलेमहावायौ नामरूपाविभागेनैकीभवतीत्यर्थः ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमात्मतत्त्वज्ञस्य जगत्सत्यत्वभ्रमःस्वतएवापैतीत्याह । इत्थमिति । हिरण्यर्थे । लोकसंस्थितोऽपिजीवन्मुक्तिदशायांप्रारब्धवशाल्लोकव्यवहारंकुर्वन्नपिजगन्मृषैवेतिविभावयनसन् यदियदा इत्थमीक्षते ऐकात्म्यं जानीयात्तदा निवृत्तजगत्सत्यत्वभ्रमो भवतीति शेषः। तत्र हेतुः श्रुतियुक्तिमानतोनिराकृतत्वात् । अतोऽन्यदार्तमित्यादिश्रुतिरूपात् जगन्मिथ्यादृश्यत्वात् शुक्तिरजतवदितितदुपबृंहितानुमानरू

इत्थं यदीक्षेत हि लोकसंस्थितो जगन्मृषैवेतिविभावयन्मुनिः॥ निराकृतत्वाच्छ्रुतियुक्तिमानतो यथेन्दुभेदो दिशि दिग्भ्रमादयः ॥ ५७ ॥

पात्मानतःप्रमाणतोनिराकृतत्वात् तत्रदृष्टान्तोयथेन्दुभेदः एकचन्द्रेद्विचन्द्रत्वभ्रमस्तदेकत्वज्ञानेनानिवर्तते यथाच दिशिप्राच्यादौअन्यदिक्त्वभ्रमः सोऽपितत्त्वज्ञानान्निवर्तते । एवंभ्रमतःपुरुषस्य दिक्षुभ्रमणाद्भ्रमोनिकटवर्तिवृक्षादौच भ्रमणभ्रमस्तत्स्थैर्यज्ञानेन निवर्तते तद्वत् ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशज्ञानेमदाराधनमेवोपायइत्याह । यावदिति । अखिलं जगन्मदात्मकंमदधिष्ठानकंमाद्विवर्तभूतंयावन्नपश्येत्तावन्मत्प्राप्तयेश्रद्धालुः भगवदाराधनमेवज्ञानप्रापकमित्यत्र दृढविश्वासवान् अतिशयेनोर्जितावृद्धिमतीभक्तिर्मयिभगवतिपूज्यताबुद्धिरूपालक्षणं चिह्नंयस्यसः ।

यावन्नपश्येदखिलं मदात्मकं तावन्मदाराधनतत्परो भवेत् ॥
श्रद्धालुरत्यूर्जित भक्तिलक्षणो यस्तस्य दृश्यो ऽहमहर्निशं
हृदि ॥ ५८ ॥

तावन्मदाराधननिष्ठोभवेत् एवंहितस्यहृदि अहमहर्निशंदृश्योभवा मियेयथामांप्रपद्यन्ते तांस्तथैवभजाम्यहमितिस्मृतेः ॥ ५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वोक्तवचनजातस्य श्रुतिसमत्वं कथमेतदालोचनमपिमदाराधनप्रतिबन्धकदुरितध्वंसोपायइत्याह रहस्यमिति । श्रुतिसारसङ्ग्रहत्वेनाति

रहस्यमेतच्छ्रुतिसारसङ्ग्रहं मया विनिश्चित्य तवोदितं प्रिय ॥
यस्त्वेतदालोचयतीहबुद्धिमान् स मुच्यते पातकराशिभिः
क्षणात् ॥ ५९ ॥

गोपनीयता अप्रमाणशङ्काकलङ्कराहित्यंसूचितम् । आलोचयतिसम्यग्विचारयति ॥ ५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ भगवानुक्तमेवार्थसंक्षेपेण दार्ढ्यायपुनराह भ्रातरिति । यदीतियादित्यर्थे । यदीदंजगत् परिदृश्यते तत्सर्वमायैवेतिज्ञात्वेति शेषः चेतसासर्वंपरिहृत्यतत्रौदासीन्यंकृत्वामद्भावनयामदैक्यभावनया भावितंशुद्धंमानसंयस्यतादृशास्तिष्ठ । इत्युपदिश्याशिषंप्राह निरामयः

भ्रातर्यदीदं परिदृश्यते जगन्मायैव सर्वं परिहृत्य चेतसा ॥ मद्भा
वनाभावितशुद्धमानसः सुखी भवाऽऽनन्दमयो निरामयः ६०

सन्सुखीभव । सर्वदुःखनिवृत्त्येतिभावः । ततोऽन्तरङ्गामन्यामाशिषमाह आनन्दमयोभवेति तद्रूपोभवेत्यर्थः । यद्यपिपूर्वमानन्दरूपत्वमस्त्येवतथाऽपितत्प्राप्तिर्विस्मृतकंठस्थभूषणप्राप्तिवत ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 एवंरीत्यास्वोपासकस्यलोकपावनत्वमाह। यइति । कदावा यदाकदाचिदित्यर्थः । हृदानिर्मलेनान्तःकरणेन यो मामगुणं प्राकृतसत्त्व
रजस्तमोरूपगुणरहितम् । सच्चिदानन्दरूपत्वात् । अतएवगुणादन्याकृतात्परंमायातीतम् । यदिवायद्वेत्यर्थे । गुणात्मकं सर्वज्ञत्वा-
 दिलोकोत्तरलावण्यादिगुणवानात्मामूर्तिर्यस्यतं दृश्यमानं रूपं सेवते । सद्विविधोऽप्युपासकःअहं मत्स्वरूपएव । मामकइत्यर्थोवा । प्रि-

यः सेवते मामगुणं गुणात्परंहृदा कदा वा यदि वा गुणात्मकम् ॥ सोऽहंस्वपादाञ्चितरेणुभिः स्पृशन्पुनाति लोकत्रितयं यथा रविः ॥ ६१ ॥

योहिज्ञानिनोऽत्यर्थमहंसचममप्रिय इत्युक्तेः । तादृशोभक्तःस्वपादलग्नरेणुभिःसंस्पृशन्लोकत्रयमपि पुनाति । अज्ञानध्वान्तनिरसनेन पवित्रीकरोति । यथारविःस्वकरैर्जगद्वितिमिरीकरोति तद्वत् ॥ ६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानीमेतद्ग्रन्थार्थालोचनासमर्थस्यपाठमात्रतोऽपिमहत्फलमाह । विज्ञानंविज्ञानजनकं करणंव्युत्पत्त्येतिबोध्यम् । वेदान्तैरुपनिषद्वाक्यैर्वेद्यंचरणंजगज्जन्मादिलक्षणंकर्मयस्यतेन ननुपाठमात्रादेतादृशमहत्फलप्राप्तिःकथमित्याशङ्क्यभवत्येवेति सूचयंस्तत्रहेतुमाह । मद्वचने

विज्ञानमेतदखिलंश्रुतिसारमेकं वेदान्तवेद्यचरणेनमयैवगीतम् ।
यःश्रद्धया परिपठेद्गुरुभक्तियुक्तो मद्रूपमेतियदि मद्वचनेषुभक्तिः
॥ ६२ ॥ इतिश्री अध्यात्मरामायणे रामगीता समाप्ता ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसम्वादे उत्तरकाण्डे श्रीरामगीतायां पञ्चमःसर्गः ॥ ५ ॥

षुभक्तिर्विश्वासोयदीतिअर्थाद्गुरुवाक्यविश्वासस्यैव फलदायकत्वादितिभावः ॥६२॥ इत्यध्यात्मरामायणेउमामहेश्वरसम्वादे उत्तरकाण्डे सेतौपञ्चमःसर्गः ॥ ६२ ॥ श्रीरामचन्द्रार्पणमस्तु ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

श्रीराममन्त्रःखलु तारकाख्यः संसारसन्तारणसुप्रसिद्धः ॥ भक्-
त्याऽप्यभक्त्या समुपासितोयः श्रेयांसि सर्वाणि ददात्यवश्य
म् ॥ १ ॥ तन्तारकंसम्प्रतिपादयन्ती श्रीरामगीता सकलैः सुसे
व्या ॥ विज्ञप्तिमित्थंजनको विनीतः समर्पयत्यार्यजनेषुहर्षात् २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प,	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति
स्यर्द्धि	स्पार्द्धि	१	२	१	शाधि	शाधि	३	२	६	नाशे	नाशो	६	१	१
जीव्य	जीव्य	१	२	३	व्यत्र	व्यत्र	४	१	१	नन्वितिश	नन्वितिशे	६	२	१
सम्बीन्धनीः	सम्बन्धिनीः	२	२	१	ष्ठामे	ष्ठानमे	४	२	३	त्रिदा	विदा	६	२	२
ब्रह्म	ब्रह्म	२	१	२	ब्रह्म	ब्रह्म	४	२	१	मेवे	मेव	६	२	२
ब्रह्म	ब्रह्म	२	१	६	वलेन	वलेन	४	२	७	व्येतीत	व्यतेति	७	१	१
वोधोऽसि	वोधोऽसि	३	१	४	निघृत्ते	निवृत्ते	५	१	१	वीरहा	वीरहा	७	१	१
संवन्ध	सम्बन्ध	३	१	७	कत्व	कत्वा	५	१	१	सद्दष्ट	सद्दृष्ट	८	१	३
भवस्यंससार	भवस्यसंसार	३	२	१	नक	नैक	५	१	१	विशुद्धं	विशुद्ध	८	२	१
न्सार	सार	३	२	२	बेदान्त	वेदान्त	५	१	१	कारांतः	कारान्तः	८	२	२
पर्वग	पवर्ग	३	२	२	पूर्वं	पूर्वं	५	१	२	वृत्ति	वृत्ति	९	१	१
वारिधि	वारिधि	३	२	२	वुद्ध्या	बुद्ध्या	५	१	६	स्त्रवाना	स्त्रना	९	२	१
					एवं	एत्र	५	१	६	वृत्यु	त्रृत्यु	१०	१	२

Nepal Sanskrit University, Balmeeki Campus, Kath...

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
रीप	रपि	११	२	१
नर्दृष्टा	र्नदृष्टा	१२	१	४
वर्द्धो	वर्द्धे	१२	१	७
त्याभिः	त्मभिः	१२	२	६
शुद्ध	शुद्ध	१३	१	१
जीवया	जीवयो	१३	१	२
निर्वाध	निर्बाध	१४	१	१०
भत्र	भव	१५	१	४
अर्जोद्व	अर्जोऽद्व	१६	२	६
द्वात्	द्वात्	१७	२	१
लाभ	लाभे	१८	१	८
इतिः	इति	१८	२	२
ज्ञानन	ज्ञानेन	१९	१	१
वुद्वया	वुद्ध्या	२०	१	५
रागदि	रागादि	२१	१	३
विलय	विलय	२१	१	७
धम	धर्म	२१	२	१
म्वस्य	म्वंयस्य	२१	२	२
वुधै	वुधे	२३	१	५
एव	एवं	२३	२	१
द्रष्ट	द्रष्टृ	२४	१	२
विभाव्यत	विभाव्यते	२५	१	४ मू
लिङ्गद	लिङ्गदे	२६	१	२
बोधकः	बोधतः	२५	१	६
विज्ञानं ब्रह्म	विज्ञानंनिादि ध्यासनं ब्रह्म	२६	२ ६	३
भेदेरा	भेदरा	२७	१	६
रुपा	रूपाः	२७	२	६
आत्म	अत्मा	२७	२	६
मुनिति	मुनास्ति	२८	१	२
भव	भवं	२८	२	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
तदकत्व	तदेकत्व	२६	२	७	वतथाऽ	वतथाऽ	३१	१	६	मद्वचने	मद्वचने	३२	१	२
भ्रमण	भ्रमणं	२६	२	८	कंठ	कण्ठ	३१	१	२	तन्तारकं	तत्तारकं	३२	२	३

नेपाल पाशुपत, यन्त्रालये मुद्रितः

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति रामगीता सटीका समाप्ता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द. नं. १६६४२

अथ रामगीता सटीका प्रारभ्यते ॥

मू० २।-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ रामंरत्नकिरीटकुण्डलयुतं केयूरहारान्वितं सीतालङ्कृतवामभागममलं सिंहासनस्थं विभुम् ॥ सुग्रीवादि कपीश्वरैःसुरवरैः संसेव्यमानं सदा विश्वामित्रपराशरादिमुनि-भिः संस्तूयमानं भजे ॥ १ ॥ इतिध्यात्वा ॥ श्रीमहादेवउवाच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशाय नमः ॥ ध्यायेत्वाजानुबाहुं धृतशरधनुषं बद्धपद्मासनस्थं पीतंवासोवसानं नवकमलदलस्पर्द्धिनेत्रं प्रसन्नम् ॥ वामाङ्कारूढ सीतामुखकमलमिलल्लोचनं नीरदाभं नाना लङ्कारदीप्तं दधतमुरुजटामण्डलं रामचन्द्रम् ॥ १ ॥ ततइति जगतां यानि मङ्गलानि आनन्दास्तेषामुपजीव्यभूतं मङ्गलं ब्रह्मानन्दः सएवात्मास्वरूपं तेन तस्यैवानन्दस्यान्यानि भूतानिमात्रामुपजीवन्तीति श्रुतेः मङ्ग

ततोजगन्मङ्गलमङ्गलात्मना विधाय रामायणकीर्तिमुत्तमाम् ॥
चचार पूर्वाचरितं रघूत्तमो राजर्षिवर्य्यैरभिसेवितं यथा ॥ १ ॥

लानाश्चमङ्गलमिति स्मृतेश्च किंच जगतां मङ्गलं कल्याणं यस्मात्तादृशकल्याणरूपआत्मामूर्तिस्तया उत्तमांश्रोत्रादीनां मोक्षदत्वेना त्युत्तमां रामायणकीर्तिं वाल्मीक्यादि कृत नानाविध रामायण प्रवर्तिकां रावणवधादिजां कीर्तिंविधाय स्थितोरघूत्तमः ततः सीताप रित्यागानन्तरं पूर्वैः स्ववंशजैराचारितं प्रजापालनसत्कथाश्रवणादिकं केवलंतत्पूर्वजैरेवाचरितमितिन किंत्वन्यैरपि राजर्षिश्रेष्ठैर्य थाऽभिसेवितं तथाचचार कृतवान् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदारागुरुदेवविश्वासलक्षणमहागुणवती यद्वा उदारा दानशीलाबुद्धिर्यस्य तेन पुरातनीः प्राचीनराजसम्बन्धिनीः शुभाः धर्माधर्मनिर्णेत्रीः प्रमत्तस्य स्वगोमण्डलमिश्रितब्राह्मणगोदानात् प्रमत्तस्य नृगस्य राज्ञो द्विजस्य शापात्तिर्यक्त्वमाह तेनाज्ञातकृतब्रह्मस्वापहारेण परमधा

सौमित्रिणापृष्ट उदारबुद्धिना रामःकथाःप्राह पुरातनीःशुभाः ॥
राज्ञः प्रमत्तस्य नृगस्य शापतो द्विजस्य तिर्यक्त्वमथाह राघवः
॥ २ ॥

र्मिकस्यापीदृश्यवस्थेति सर्वथाब्रह्मस्वविमुखताधर्मइतिसूचितम् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकान्तेविजने उपस्थितंप्राप्तम् विनयान्वितः सन् भक्त्यागुरुरयमिति बुद्ध्या प्रणम्य अनेनगुरूपसदनप्रकारउक्तः आसादितंशुद्धंभाव

कदाचिदेकान्त उपस्थितंप्रभुं रामं रमालालितपादपङ्कजम् ॥
सौमित्रिरासादितशुद्धभावनः प्रणम्यभक्त्याविनयान्वितोऽब्र-
वीत् ॥ ३ ॥

नं भावनाकरणमन्तः करणंयेनसः शुद्धान्तःकरणइतियावत् भगवदुक्तसत्कथाश्रवणेन शुद्धान्तःकरणइत्यर्थः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हे महामते महतीसर्वविषयामतिर्यस्य तस्य संबोधनं त्वं शुद्धबोधोऽसि अनवच्छिन्नचैतन्यरूपोऽसि सर्वदेहिनामात्माऽसि जीवानांतत् प्रतिबिम्बत्वात् अधीशोऽसि अन्तर्यामित्वान्नियन्ताऽसि वास्तवभेदाभावाच्च सर्वात्मत्वम् औपाधिकभेदाच्च नियन्तृनियम्यभावोबोध्यः निराकृतिः अस्मदादिवत्स्वार्जितकर्माधीनशरीराकृतिरहितः नन्वेवंसर्वैः कथमेवंनज्ञायतेऽतआह ज्ञानदृशां स्वयमेवप्रतीयसे ज्ञायतेऽ

त्वं शुद्धबोधोऽसि हि सर्वदेहिनामात्माऽस्यधीशोऽसि निरा-
कृतिःस्वयम् ॥ प्रतीयसे ज्ञानदृशां महामते पादाब्जभृङ्गाहितस
ङ्गसाङ्गिनाम् ॥ ४ ॥

नेनेतिज्ञानं वेदान्तवाक्यजातं तदेवदृक्दर्शनसाधनंयेषां तेषामितिसंबन्धसामान्येषष्ठी तैरित्यर्थः तादृशदृक्लाभश्च त्वद्भक्त्यधीनइत्याह पादेति त्वच्चरणकमलयोर्भृङ्गवदाहितःकृतः सङ्गोयेन तादृशान्तः करणसङ्गवतां त्वच्चरणकमल सङ्क्षान्तः करणवतामित्यर्थः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

अथ प्रार्थयते अहमिति भवरूपं संसारस्यापवर्गो निवृत्तिर्यस्मात्तादृशं तव पादाम्बुजं प्रपन्नोऽस्मि शरणं प्राप्तोऽस्मि योगिभावितं योगीभिः संसारमुक्तये भावितम् अनेन तस्य भवापवर्गत्वे सदाचारः प्रमाणमुक्तम् प्रार्थनीयमाह अपारवारिधिरूपं यदज्ञानं संसारमूलकारणं यथा सुखम

अहं प्रपन्नोऽस्मि पदाम्बुजं प्रभो भवापवर्गं तव योगिभावितम् ॥ यथाञ्जसाज्ञानमपारवारिधिं सुखं तरिष्यामि तथाऽनुशाधि माम् ॥ ५ ॥

क्लेशेन तरिष्यामि तथा मामनुशाधि शिक्षय अपारवारिधिमित्यनेन सपारप्रसिद्धसमुद्राद्व्यतिरेक उक्तः अशक्यतरणताऽनेन ध्वनिता ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथोत्तरमवतारयति श्रुत्वेति रामः सौमित्रिवचः श्रुत्वा अथशब्दोवाक्यालङ्कारे तदा श्रवणाऽव्यवहितकाले एवप्रपन्नानां भक्तानामार्ति संसारदुःखंहरतितादृशः प्रपन्नाभ्रमादिहीना भक्तानुग्रहपरा च धीर्यस्यसः क्षितिपालानां राज्ञां भूषणभूतोऽज्ञानरूपतमसउपशान्तये त

श्रुत्वाथ सौमित्रिवचोऽखिलं तदाप्राह प्रपन्नार्तिहरःप्रसन्नधीः ॥
विज्ञानमज्ञानतमोपशान्तये श्रुतिप्रपन्नं क्षितिपालभूषणः ॥ ६ ॥

दर्थम् सन्धिरार्षः श्रुतिभिः तमेवविदित्वाऽतिमृत्युमेतीत्यादिश्रुतिभिः प्रपन्नं तत्फलकत्वेन बोधितं विज्ञानमात्मतत्वज्ञानामिति सामान्य तः प्रथमंप्राह ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथतादृशज्ञानप्राप्तये क्रमेणबहिरङ्गान्तरङ्गसाधनान्याह आदाविति स्ववर्णाश्रमेषु शास्त्रेण वर्णिता याः क्रियानित्यनैमित्तकयज्ञदाना दिरूपास्ताः कृत्वा समासादितशुद्धमानसः प्राप्तान्तःकरणशुद्धिः तत्पूर्वमुपात्तसाधनः तदनुष्ठानपूर्वकमेवउपात्तानिसाधनानि शम दमादीनियेन तादृशः अनेनकर्मणां बहिरङ्गत्वं शमादीनामन्तरङ्गत्वं स्फुटमेवोक्तम् किंच शमदमवैराग्यदार्ढ्यपर्यन्तं कर्मानुष्ठामेवेति

आदौ स्ववर्णाश्रमवर्णिताःक्रियाः कृत्वा समासादितशुद्धमानसः
समाप्य तत्पूर्वमुपात्तसाधनः समाश्रयेत्सद्गुरुमात्मलब्धये॥ ७॥

सूचितम् ततस्तत्कर्मानुष्ठानं समाप्य त्यक्त्वा संन्यस्येतियावत् आत्मलब्धये आत्मज्ञानाय तत्फलकाय तत्वमस्यादिवाक्यार्थविचारा- ॥ ४ ॥
य सद्गुरुंश्रोत्रियंब्रह्मनिष्ठमित्यादि लक्षणलक्षितं समाश्रयेत् सेवेत अनेनव्युत्पत्तिबलेन स्वयमेववाक्यार्थविचारः क्रियमाणो न फला- येति सूचितम् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसारस्यभ्रमिमच्चक्ररूपत्वात्तन्निवृत्तश्चतत्कारणाज्ञाननिवृत्तिमूलकत्वदज्ञाननिवृत्तेश्चतत्त्वज्ञानकसाध्यत्वात्तत्त्वज्ञानस्यचवेदान्तविचारसाध्यत्वात्तदर्थंगुरुसमाश्रयणमित्याह क्रियेति भवःसंसारश्चक्रवद्विपरिवर्तमानईर्यते कथ्यते तदेवोपपादयति आदृताआदरपूर्वपूर्वजन्मार्जिताक्रियाएनस्यशरीरोद्भवस्यजन्मनोहेतुः तत्रजन्मनिसुरागिणोविषयाभिलाषवतः तौ शास्त्रप्रसिद्धौ धर्मेतरौ धर्माधर्मौ प्रियाप्रियौसुखदुः

क्रियाशरीरोद्भवहेतुरादृताप्रियाप्रियौतौभवतःसुरागिणः ॥
धर्मेतरौतत्रपुनः शरीरकंपुनः क्रियाचक्रवदीर्यतेभवः ॥ ८ ॥

खजनकौभवतःकस्यचिदधर्मएवसुखत्वबुद्ध्याप्रवृत्तिः कस्यचिद्धर्मएवंकदाचिदित्यप्यूह्यम् एवंतत्रोत्पादितकर्मणापुनःशरीरंपुनःक्रियाइत्येवंचक्रवद्विपरिवृत्तिः । यथाचक्रेभ्राम्यमाणेऽधोभागः कदाचिदुपरिउपरितनश्चाधः पुनरुपरिपुनरधएवंजन्मक्रिययोर्जन्यजनकभावेनपरिवृत्तिरिति बोध्यम् ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

स्यचाज्ञानमेवमूलमित्याह अज्ञानमेवेति अत्रविधौसंसारनिवृत्तिलक्षणेकर्तव्येऽर्थेतद्ज्ञानमेवमूलकारणत्वादज्ञानहानमेवविधीयते साध-
नत्वेनेतिशेषः ननुकर्मैवतन्नाशकमस्तुकिंज्ञानेनेत्याशङ्क्याह विद्यैवज्ञानमेवतन्नाशविधौमूलाज्ञाननाशनेपटीयसीसमर्थानकर्मसमर्थमितिशेषः

अज्ञानमेवास्याहिमूलकारणंतद्ज्ञानमेवात्रविधौविधीयते॥ विद्यैवतन्नाशविधौपटीयसीनकर्मतज्जंसविरोधमीरितम् ॥ ९ ॥

यतस्तत्तज्जमज्ञानजम् आत्मस्वरूपाज्ञानजन्यदेहाद्यभिमानजन्यत्वात्कर्मणोज्ञानजन्यत्वंबोध्यम् ननुतज्जन्यस्यापितन्नाशकत्वंवृश्चिककर्क
ट्यादौदृष्टमित्याशङ्क्यतज्जन्यत्वंवाननाशकत्वेप्रयोजकंकिन्तुसविरोधत्वमेवेत्याह यतसविरोधंतदीरितंनाशकमुक्तमित्यर्थः ॥ ९ ॥

CC-0. In Public Domain. Digitization by eGangotri

अतएवकर्मणानाज्ञानहानिरित्याह नाज्ञानेत्यादि यतःकर्मणाविरोधाभावान्नाज्ञाननाशनापिरागनाशोवस्तुतः कर्मानुष्ठानात्पुनः सदो
षंक्षयिफलत्वादिदोषविशिष्टंकर्मैवोद्भवेत्कर्मणश्चपुनःसंसारएवेतिनमुक्तिमत्याशा ततस्तस्माद्बुधोविवेकीज्ञानविचारवान् ज्ञायतेऽनेने·

नाज्ञानहानिर्नचरागसङ्क्षयोभवेत्ततः कर्मसदोषमुद्भवेत् ॥ ततः
पुनः संसृतिरप्यवारितातस्माद्बुधोज्ञानविचारवान्भवेत् ॥ १० ॥

तिज्ञानंवेदान्तवाक्यंतद्विचारवान्भवेत ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानींज्ञानस्यैवमोक्षहेतुत्वंवक्तुंज्ञानकर्मसमुच्चयवादंदूषणायानुवदतिसार्धेन नन्विति नान्वितिशङ्कायाम् यथाविद्यावेदमुखेनश्रुतिपुराण-लक्षणेन ब्रह्मविदाप्नोतिपरम् इत्यादिनापुरुषार्थसाधनमुक्ता तथा उभाभ्यामेवपक्षाभ्यांयथाखेपक्षिणांगतिः तथैवज्ञानकर्मभ्यांप्राप्यते ब्रह्मशाश्वतम् इत्यादिनाक्रियाऽपितत्साधनत्वेनोक्ता किंच क्रियाकर्तव्यत। तृतीयार्थेप्रथमा कर्तव्यतयाआवश्यकेकृत्येअवश्यकर्तव्यत-

ननुक्रियावेदमुखेनचोदितायथैवविद्यापुरुषार्थसाधनम् ॥ कर्तव्यताप्राणभृतःप्रचोदिताविद्यासहायत्वमुपैतिसापुनः ॥ ११ ॥

याप्रचोदितानित्यनैमित्तिकरूपा एवंचतदकरणेप्रत्यवायोत्पत्त्याज्ञानोत्पत्तिरेवनस्यात् तस्मात्सापुनर्विद्यायाःसहायत्वंप्राप्नोतिघटेजन-नीयेयथादण्डचक्रादीनांपरस्परसहायता ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्तव्यमेतत्तस्मात्कर्मवेविद्रुणाति कर्मेति वीग्हावाएषदेवानांयोऽग्निमुद्दानयतेयावज्जीवमग्निहोत्रंजुहोति इतिश्रुतिः तत्रासिद्धान्तीशङ्कते
नान्वाति ध्रुवंस्थिरंकार्यमिदंपुरुषार्थमोक्षजनिकाविद्यायतः स्वतन्त्राविनाऽपिसहायेन स्वकार्यसंपादनेसमर्था यथातेजस्तिमिरनिवर्तन-

कर्माकृतौदोषमपिश्रुतिर्जगौतस्मात्सदाकार्यमिदंमुमुक्षुणा॥ननु
स्वतन्त्राध्रुवकार्यकारिणीविद्यानकिञ्चिन्मनसाऽप्यपेक्षते ॥ १२

समर्थंमनसाऽपिकिञ्चित्सहायभूतंवस्तुनापेक्षते तथाफलेजननीयेसहायान्तरसंभावनाऽपिनेतिभावः अनेनविद्याफलजननेनिरपेक्षास्वतन्त्र-
त्वात्तेजोवदित्यनुमानंसूचितम् ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समुच्चयवादीपरिहराति नेति त्वदुक्तंनेत्यर्थः सत्यकार्यः अक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवति इत्यादिवेदनबोधितःस्थिरकार्योऽपि-
अध्वरः यथाऽन्यानपिकारकादिकान् आरादुपकारकप्रयाजाद्यङ्गानिदेशकालादीनिचप्रकाङ्क्षते तथाविद्यापिअग्निहोत्रंजुहोतिइत्यादिवि

नसत्यकार्योऽपिहियद्वदध्वरः प्रकाङ्क्षतेऽन्यानपिकारकादिकान्
तथैवविद्याविधितः प्रकाशितैर्विशिष्यते कर्मभिरेवमुक्तये ॥ १३ ॥

धिवाक्यतःतत्समूहेनप्रकाशितैः कर्मभिः सहितैवमुक्तयेविशिष्यतइत्यर्थः विदयाफलदानेकर्मापेक्षा अङ्गित्वात् प्रयाजाद्यङ्गापेक्षदर्शा
दिवादितिसत्प्रतिपक्षानुमानमनेनसूचितम् ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदनूद्यसिद्धान्तीदूषयति केचिदिति यत्केचिद्वितर्कवादिनश्शतिज्ञानकर्मणोस्समुच्चित्यमुक्तिसाधनंवदन्तितदप्यसत् यथाकेवलंकर्म मोक्ष साधनमित्यमत्तथातन्मीलितमित्यप्यसत् तत्रहेतुर्दृष्टविरोधकारणात् दृष्टायोविरोधः सर्वलोकदृष्टविरोधरूपात्कारणात्तदसदित्यर्थः विरो

केचिद्वदन्तीतिवितर्कवादिनस्तदप्यसद्दृष्टविरोधकारणात् ॥
देहाभिमानादभिवर्धतेक्रियाविद्यागताहङ्कृतितःप्रसिद्ध्यति १४

धमेवाह देहाभिमानात्क्रियावर्धतेअनात्मनिदेहादावात्मत्वाभिमानात्क्रियावृद्धिः विद्यातुगताहङ्कृतितः गताहङ्कृतिर्यस्यतस्यनष्टाहङ्कृतेः प्रसिद्ध्यति सार्वविभक्तिकस्तासिः एवंचाहङ्कारसत्तामूलकत्वात्क्रियाज्ञानयोः समुच्चयोविरुद्धइत्यर्थः ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथपूर्वपक्ष्युक्तानुमानंदूषयन्विद्यास्वरूपमाह विशुद्धंविज्ञानंयेभ्यस्तेषांवेदान्तवाक्यानांयाद्विशेषेणरोचनंरलयोरभेदादालोचनंविचार
स्तेनाञ्चिताप्रापितायाचरमाआत्मवृत्तिर्ब्रह्माकारांतःकरणवृत्तिः साविद्येतिभण्यते।विद्वद्भिरितिशेषः पुनःसमुच्चयवारणायविद्याकर्मणो
वैषम्यमाह कर्मयज्ञादिअखिलकारकादिभिःकर्तव्यकर्मादिभिरङ्गैश्चसहितंसदुदेति फलोन्मुखंभवति विद्यापुनरखिलकारकादिनिहन्ति

विशुद्धविज्ञानविरोचनाञ्चिताविद्याऽऽत्मवृत्तिश्चरमेतिभण्यते ॥
उदेतिकर्माखिलकारकादिभिर्निहन्ति विद्याऽखिल कारकादि-
कम् ॥ १५ ॥

तत्रकर्तृत्वादिबुद्धिंनिहन्ति सकलव्यापारपरित्यागेनब्रह्मणिसमाप्तिर्हिविद्या अतःस्वोत्पत्तौचित्तशुद्धिद्वाराकर्मसापेक्षास्वफलेजनायितव्यं-
तन्निरपेक्षैवान्यथाविद्यास्वरूपस्यैवभङ्गापत्तेरितिपूर्वपक्ष्युक्तहेतोरसिद्धिरितिभावः ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपसंहरन्मुमुक्षोर्वृत्तिप्रकारमाह तस्मादिति विद्याविरोधाद्विद्यायाःकर्मणासह विरोधेनसमुच्चयोनभवेत्तस्मात्सुधीर्मुमुक्षुरशेषतःकर्मत्यजेत् काम्यंतुसर्वथात्याज्यमेवनित्यनैमितिकमापियावच्चित्तशुद्धिकर्तव्यमेव ततोऽपिब्रह्माणिचित्तस्थैर्यपर्यन्तं कर्तव्यमेव ततस्तदनुसन्धानप्र-

तस्मात्त्यजेत्कार्यमशेषतः सुधीर्विद्याविरोधान्नसमुच्चयोभवेत् ।
आत्मानुसन्धानपरायणःसदा निवृत्तसर्वेन्द्रियवृत्तिगोचरः १६

तिबन्धकत्वात्प्रयोजनाभावाच्चतदापित्याज्यमेवेतिभावः इदानींमुमुक्षुकर्तव्यमाह निवृत्ताःसर्वेषामिन्द्रियाणां गोचराविषयाःशब्दादयोयस्मात्तादृशःसन् आत्मनःसच्चिदानन्दस्यानुसन्धानमेवपरमयनंप्राप्यंयस्यतथाविधोभवेत् अत्रेन्द्रियप्रत्याहारःकर्तव्यत्वेनोक्तस्तेनतत्पूर्वप्राणायामाद्यर्थादाक्षिप्तम् ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रागिविरागिभेदेनकर्मणोकर्तव्यताकर्त्तव्यतेआहयावदिति माययाविद्ययाशरीरादिष्वनात्मसुआत्मधीरहङ्कर्तेत्यादिरूपायावद्वर्ततेतावद्वि
धिवादकर्मणाम् विधिर्यजेतेत्यादिश्रुतिर्वादःकर्तव्यतावोधकोयेषांकर्मणांविधेयोवशवर्त्तितत्कर्मकर्ताभवेत् तदपगमेतुतदाखिलं जगन्नेतीति

यावच्छरीरादिषुमाययात्मधीस्तावद्विधेयोविधिवादकर्मणाम् ॥
नेतीतिवाक्यैरखिलं निषिद्ध्य तज्ज्ञात्वापरात्मानमथत्यजेत्क्रि
याः ॥ १७ ॥

वाक्यैः अथातआदेशोनेतिनेतिइत्यादिवाक्यैर्निषिध्य मिथ्यात्वेननिर्णीयतद्विलक्षणतयासत्यत्वेनपरमात्मस्वरूपंज्ञात्वाक्रियास्त्यजेत्निरू
पितमेतत् ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मविज्ञानेसत्यवश्यमविद्या निवर्ततइत्याह यदेति आत्मनिशुद्धेन्तःकरणेपरमात्मनईशस्यात्मनोजीवस्यचयोविभेदोमायान्तःकरण
रूपोपाधिद्वयकृतोविभेदोभेदस्तस्यभेदकं नाशकंभास्वरंप्रकाशशीलं यद्विज्ञानमितरवृत्त्युपमर्दनपूर्वकंब्रह्माकाराऽखण्डाद्याकृत्तिर्यदाऽवभाति

यदापरात्मात्मविभेदभेदकंविज्ञानमात्मन्यवभाति भास्वरम् ॥
तदैवमायाप्रविलीयतेऽञ्जसासकारकाकारणमात्मसंसृतेः॥१८॥

असंभावनादितिरस्कारेणोदेति तदैव सकारकाजन्मान्तरप्रापककर्मसहितामायातत्तज्जीवोपाधिभूताविद्याऽञ्जसाझदितिप्रविलीयतेनश्यति
ननुतन्नाशेऽपिसंसारनाशःकथमतोमायाविशेषणम् आत्मसंसृतेःकारणंसंसारस्योपादानकारणमेवंचतन्नाशेकार्यनाशोभवत्येवेतिभावः १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं पुनर्दार्ढ्यायाह श्रुतीति तत्त्वमसीत्यादिश्रुतिरूपैःप्रमाणैस्तज्जानितज्ञानेन नाशितासाविद्याकथमपिकार्यकारिणीभविष्यतीति काकुरत्र सर्वथानेत्यर्थः असतःकार्यकारित्वासंभवादितिभावः पुनश्चतस्यानोद्भवइत्याह विज्ञानमात्रादिति अमलाशुद्धाद्वितीयतःद्विती

श्रुतिप्रमाणाभिविनाशिताचसाकथंभविष्यत्यपिकार्यकारिणी ॥
विज्ञानमात्रादमलाद्वितीयतस्तस्मादविद्यानपुनर्भविष्यति १९

यात्मविषयकाद्विज्ञानमात्रादितरासहकृतान्निदिध्यासनपरिपाकजज्ञानाचसोनष्टातस्मात्सापुनर्नभाविष्याति रज्ज्वज्ञानमूलकस्य सर्पस्य रज्जुज्ञानेन निवृत्तस्ययथानपुनरुत्पात्तिरितिभावः ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्यायाइतरनिरपेक्षायाएवमोक्षकारणत्वमुक्तंयुक्तिपूर्वकंपुनःकथयतिश्रोतृदार्ढ्याय।यदीति। यदिनष्टातत्त्वज्ञाननाशिता सा न पुनः प्रसूयतेनोत्पद्यतेतदाकारणाभावादहंमतिःकथंभवेत्। कथमपिनभवेदित्यर्थः। तदभावाच्चतत्कालेकर्माभावइतिस्वफलजननेसास्वतन्त्राइ

यदिस्मनष्टा नपुनःप्रसूयते कर्ताऽहमस्येति मतिः कथं भवेत् ॥
तस्मात्स्वतन्त्रा न किमप्यपेक्षते विद्या विमोक्षाय विभाति केवला ॥ २० ॥

तरनिरपेक्षैवनकिमप्यपेक्षते द्वितीयस्यासंभवात् अतः केवलाऽसहायैवविमोक्षायविभातितत्फलिकाभवतीत्यर्थः ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रार्थे श्रुतिरपिप्रमाणमित्याह सेति साप्रसिद्धा नकर्मणानप्रजयाधनेनत्यागेनैके अमृतत्वमानशुः इत्यादिकातैत्तिरीयश्रुतिःप्रशस्तानामर्थ वादैःप्राशस्त्येनबोधितानामपिकर्मणांन्यासंत्यागंसादरंस्फुटमाह नतुकर्मसमुच्चयमित्यर्थः तथावाजिनां वाजसनेयिनाम् एतावदरे खल्वमृत

सातैत्तिरीयश्रुतिराहसादरंन्यासंप्रशस्ताखिलकर्मणां स्फुटम् ॥
एतावदित्याहचवाजिनांश्रुतिर्ज्ञानंविमोक्षायनकर्मसाधनम् २१

त्वम् इत्यादिका ज्ञानंविमोक्षायसाधनं नकर्मेत्येतदाह ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहङ्कारत्यागरूपकारणवैषम्यात् क्रियाज्ञानयोर्वैषम्यमुक्त्वा फलभयुक्तमपिवैषम्यमाह विद्येति हेसमुच्चयवादिन् त्वयाक्रतुरग्निष्टोमादिर्विद्यासमत्वेनदर्शितः परन्तुसमोदृष्टान्तोनोदाहृतः अनेनक्रतुर्विद्यासमः श्रुतिबोधितकर्तव्यताकत्वादित्यनुमानान्निरस्तम् दृष्टान्ताभावाद् अन्वय्येवानुमानन्नव्यातिरेकीतिभाव; एतच्चाकरेविस्तरेणप्रपञ्चितम् ननुविद्याकर्मणीसमे एकफलत्वाच्चक्रदण्डादिवदित्यनुमान-

विद्या समत्वेनतु दर्शितस्त्वया क्रतुर्नदृष्टान्त उदाहृतः समः ॥
फलैःपृथक्त्वाद्बहुकारकैः क्रतुःसंसाध्यतेज्ञानमतोविपर्ययम् २२

मितिचेत्तत्राह फलैः पृथक्त्वात षष्ठ्यर्थेतृतीया फलानांभेदादित्यर्थः एवंचस्वरूपासिद्धोहेतुरितिभावः समानकारकत्वमपिहेतुर्नेत्याह क्रतुर्बहुभिः कारकैरहंममताभिमानरूपैरान्तरैर्बाह्यैश्चदेशकालादिनियमैश्चसाध्यते ज्ञानन्त्वतोविपर्ययवदतोनतयोः साम्यमितिभावः २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वकरणेप्रत्यवायभिया कर्मकार्यमितिचेन्नेत्याह सप्रत्यवायइति कर्मत्यागेनाहंनिश्चयेनाहंप्रत्यवायसहितोभविष्यामीत्येवंशुद्धात्मानि-अनात्मधर्मस्यधीरप्रज्ञस्यतत्त्वज्ञानविकलस्यप्रसिद्धा नतुतत्त्वदर्शिनः तस्याहंबुद्धेरभावात् पापादेरनात्मधर्मतानिश्चयाच्च तस्माद्बुधैःकर्म

स प्रत्यवायोह्यहमित्यनात्मधीरज्ञप्रसिद्धा नतु तत्वदर्शिनः ॥
तस्माद्बुधैस्त्याज्यमपि क्रियात्मभिर्विधानतःकर्मविधि प्रकाशितम् ॥ २३ ॥

क्रियात्यभिः षष्ठ्यर्थेतृतीया क्रियाफलसक्तचित्तानां विधानतोविधानेनेतिकर्तव्यतयायुक्तंकर्म विधिभिरवश्यकर्तव्यतयाबोधितमपि-त्याज्यमित्यर्थः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविरक्तस्यकार्यमाह। श्रद्धेति । गुरुशास्त्रयोर्विश्वासःश्रद्धातदन्वितोबुभुत्सुःशुद्धमानसोऽपि निष्कामकर्मानुष्ठानाच्छुद्धमानसश्चगुरोः प्रसादाल्लब्धतत्त्वमसीतिवाक्यतः श्रुतमात्मजीवयोरैकात्म्यंविज्ञाय मननिदिध्यासनपरिपाकाभ्यांसाक्षात्कृत्य। चएवार्थः । साक्षा

श्रद्धान्वितस्तत्त्वमसीतिवाक्यतो गुरोःप्रसादादपिशुद्धमानसः॥
विज्ञायचैकात्म्यमथात्मजीवयोः सुखी भवेन्मेरुरिवाप्रकम्पनः
॥ २४ ॥

त्कृत्यैवसुखी भवेत्। सकलदुःखहीनोभवेदित्यर्थः । अप्रकम्पनःविषयाभिलाषाक्षोभितान्तःकरणः ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महान् क्थंविचरीतुंवाक्यार्थस्यपदार्थबोधपूर्वकत्वमाह । आदाविति । विधानतःभ्रमप्रमादर्गाहित्येनवाक्यार्थविज्ञानस्य विधावुत्पत्तौआ दौप्रथमंमुख्यमितियावत् । पदार्थावगतिःकारणम् । हिप्रसिद्धं तस्यपदत्रयंतत्त्वम्असीति । तत्रतत्पदार्थःपरमात्मासर्वज्ञत्वादिगुणः त्वं

आदौ पदार्थावगतिर्हिकारणं वाक्यार्थविज्ञानविधौ विधानतः ॥
तत्त्वंपदार्थौपरमात्मजीवकावसीतिचैकात्म्यमथानयोर्भवेत्
॥ २५ ॥

पदार्थोजीवः अनयोस्तत्त्वंपदार्थयोरैकात्म्यंतद्बोधकमसीतिपदम् ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननु सर्वज्ञत्वादिगुणस्येशस्य किञ्चिज्ज्ञत्वधर्मवता जीवेनैकात्म्यं विरुद्धमित्याशङ्क्याह । प्रत्यगिति । अहंबुद्धिविषयत्वं प्रत्यक्त्वं जीवधर्मः परोक्षत्वमीशधर्मस्तदादिधर्मकृतमात्मनोः परमात्मजीवात्मनोर्विरोधं विहाय त्यक्त्वा तयोः संशोधिताम् युक्तिभिः सम्यग्विचारितां तत्त्वंपदाभ्यां शक्त्यभावेऽपि वक्ष्यमाणप्रकारया लक्षणया लक्षितां ज्ञातां चिदात्मतां संगृह्य तत्त्वंपदोपास्थितिविषयां कृत्वा स्वमात्मानं तथा ज्ञात्वाऽथ एकात्मज्ञानानन्तरमद्वयो भवेत् । चित्स्वरूपतां प्राप्तो भवेत् । पूर्वमपि तत्स्वरूप एव विस्मृतकण्ठचामीकरन्यायेन च तत्प्राप्तिः तद्वदित्युक्तम् ।

प्रत्यक्परोक्षादिविरोधमात्मनोर्विहाय संगृह्य तयोश्चिदात्मताम् ॥
संशोधितां लक्षणया च लक्षितां ज्ञात्वा स्वमात्मानमथाद्वयो भवेत्
॥ २६ ॥

अयं भावः तत्त्वंपदयोर्द्वावर्थौ वाच्यो लक्ष्यश्च तत्र तत्पदस्य मायोपाधिः सर्वज्ञत्वादिविशिष्टो वाच्यः त्वंपदस्यापि किञ्चिज्ज्ञत्वादिविशिष्टो मायाकार्याविद्योपाधिरविद्यावदन्तःकरणोपाधिर्वाच्यः उभयोरपि विशेषणांशत्यागेन शुद्धश्चिदात्मा लक्ष्यः तत्र वाच्ययोर्विरुद्धधर्मकत्वादैक्यासंभवेऽपि लक्ष्ययोरैक्यं निर्बाधमेवेति ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तलक्षणास्वरूपमाह । एकात्मकत्वादिति जहतीलक्षणाजहत्स्वार्थलक्षणायथागङ्गायांघोषइत्यत्रगङ्गापदार्थस्यप्रवाहस्यघोषाधारता नुपपत्त्यामर्वथातत्परित्यागेनतीररूपार्थलक्षणा साप्रकृते न एकात्मत्वात् । विशेष्यांशस्यैकत्वात्सर्वथास्वार्थत्यागाभावात् । तथाज हल्लक्षणताजहत्स्वार्थलक्षणात्वत्त्वमपिअत्रनसंभवति । यथाकाकेभ्योदधिरक्ष्यतामित्यादौकाकपदस्यस्वार्थात्यागेनैवदध्युपघातकेलक्षणा सापिन । विरोधतःविशेषणत्यागेनसर्वथास्वार्थत्यागाभावात् । अतोभागलक्षणाजहदजहल्लक्षणायुज्यते । अदोषतःपूर्वोक्तदोषाभावात्

एकात्मकत्वाज्जहती न सम्भवेत्तथाऽजहल्लक्षणता विरोधतः॥
सोऽयंपदार्थाविवभागलक्षणायुज्येततत्त्वंपदयोरदोषतः॥२७॥

विशेष्यांशस्यात्यागाद्विशेषणांशस्यत्यागाच्च । तत्रदृष्टान्तः । सोऽयंपदार्थाविव । यथासोऽयंदेवदत्तइत्यत्रतद्देशादिविशिष्टोऽतीतानुभव विषयोवातत्पदार्थः एतद्देशादिविशिष्टोऽनुभूयमानोवेदंशब्दार्थः । तयोश्चाविरुद्धविशेषणकत्वादैक्यासंभवेनदेशादिरूपविशेषणत्यागेना नुभवगतानीतत्वादिविशेषणत्यागेनवालक्षणयैक्यंतद्वदितिभावः ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथत्याज्यत्वायजीवोपाधिमाह । रसादीति । रसापृथ्वीआदिर्येषांतानिपञ्चीकृतानियानिभूतानितेभ्यःसंभवोयस्यतत् । पञ्चीकरणंचेत्थम् एकैकंभूतंद्विधाविभज्यतत्रैकंभागंचतुर्धाविभज्यतेषांभागानांस्वेतरभूतचतुष्टयार्धभागचतुष्टयेसंयोजनेएकैकंभूतंपञ्चात्मकंभवतिभा

रसादिपञ्चीकृतभूतसंभवंभोगालयंदुःखसुखादिकर्मणाम् ॥ शरीरमाद्यन्तवदादिकर्मजंमायामयंस्थूलमुपाधिमात्मनः ॥ २८ ॥

गाधिक्याच्चप्रातिस्विकतयाभूम्यादिव्यवहारोऽपि । सुखदुःखयोरादीनियानिकर्माणितेषांभोगस्तत्कर्मजन्यसुखदुःखानुभवस्तस्यालयमाश्रयभूतमाद्यन्तवत् उत्पत्तिनाशयोगि आदिकर्मजंप्राग्भवीयकर्मजन्यंमायामयंपरम्परयामायाविकारः तद्विकारभूतविकारत्वात् । एतच्छरीरमात्मनःस्थूलमुपाधिंवदन्तीतिशेषः ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसूक्ष्मोपाधिमाह। सूक्ष्ममिति । बुधाःअन्यत्स्थूलशरीरविलक्षणंशरीरंलिङ्गदेहाख्यमात्मनउपाधिंविदुः । तत्स्वरूपमाह। सूक्ष्मंचक्षु-
राद्यविषयः मनोबुद्धिदशेन्द्रियैःप्राणैश्चयुतम् सङ्कल्पात्मकंमनः निश्चयात्मिकाबुद्धिः घ्राणरसनाचक्षुस्त्वक्श्रोत्रेतिपञ्चज्ञानेन्द्रियाणि वा-

सूक्ष्मंमनोबुद्धिदशेन्द्रियैर्युतंप्राणैरपञ्चीकृतभूतसंभवम् ॥ भोक्तुः सुखादेरनुसाधनंभवेच्छरीरमन्याद्विदुरात्मनोबुधाः ॥ २९ ॥

क्पाणिपादपायूपस्थानिकर्मेन्द्रियाणि प्राणापानव्यानोदानसमानाश्चप्राणास्तैर्युतमेतत्सप्तदशसमुदायात्मकम्। तदाधारभूतान्याह ।अप
ञ्चीकृतभूतसंभवंतेभ्यउत्पन्नमतएवादृश्यम् ।तथाभोक्तुःसुखादेःसुखदुःखाद्यनुभवस्यानुसाधनम् स्थूलशरीरस्यतदनुगतस्यैवभोगसाधनत्व
मितिभावः । एताद्रियोगेनैवमरणव्यवहारइतिबोध्यम् ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिजीवोपाधिद्वयमुक्त्वाईशोपाधिमाह । अनादीति । अनादि उत्पत्तिहीनम् । नानाविधपरिणामशालितयापरिणामरूपेणनश्वरामिति अनादित्वमात्रोक्त्यासूचितम् । अनिर्वाच्यम् सत्त्वासत्त्वाभ्यांनिर्वक्तुमशक्यम् कारणंसकलप्रपञ्चस्यजनकम् ईदृशीमायातुब्रह्मणःपरमी-

अनाद्यनिर्वाच्यमपीहकारणं मायाप्रधानंतुपरंशरीरकम् ॥ उपाधिभेदात्तुयतःपृथक्स्थितं स्वात्मानमात्मन्यवधारयेत्क्रमात् ॥ ३० ॥

श्वरव्यवहारसंपादकत्वादुत्कृष्टंप्रधानंशरीरकम् । स्वार्थेकः । एवमुपाधिभेदादेकमेवचैतन्यंयतः पृथक्स्थितंजीवईशइतिभेदबुद्धिविषय मतोलक्षणयोपाधिपरित्यागेनस्वात्मानमात्मनिअवधारयेदभेदेनजानीयात् । क्रमाच्छ्रवणमनननिदिध्यासनक्रमेणेत्यर्थः ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवाक्यार्थविचारफलमाह । कोशेष्विति । आनन्दमयस्य ब्रह्मत्वेअन्नमयप्राणमयमनोमयविज्ञानमयेषुचतुर्षुकोशेषुतत्तत्सङ्गात्तत्तदाकृतिर्विभाति यथाजपादिसङ्गात्स्फटिकोऽनेकाकृतिर्भाति । आनन्दमयस्यापि जीवत्ववादिनातुतेनसहपञ्चसु कोशेष्वितिबोध्यम् । अस्मि-

कोशेषुपञ्चस्वपितत्तदाकृतिर्विभातिसङ्गात्स्फटिकोपलोयथा ॥
असङ्गरूपोऽयमजोयतोऽद्वयोविज्ञायतेऽस्मिन्परितोविचारि-
ते ॥ ३१ ॥

न्महावाक्येपरितोविचारितेसम्याग्विचारितेसत्ययमात्माऽसङ्गरूपःअन्नमयादिभिःसङ्गरहितः । असङ्गोनहिसज्जते । इतिश्रुतेः । अजोऽद्वयश्चविज्ञायते । स्थूलोऽहमित्यादिस्त्वज्ञस्यतत्तत्कोशप्रसङ्गात्प्रतीतिःस्फटिकवत् तत्त्वज्ञस्यतुनतथाप्रतीतिरितिभावः । एवंचतत्तदुपाधिकृततत्तद्रूपताप्रतीतिनिरासएव विचारफलमितिभावः ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जाग्रदाद्यवस्थाऽपि बुद्धेर्धर्मोनात्मधर्मइत्याह । बुद्धेरिति । इहआत्मनिस्वप्नादिभेदेन जाग्रत्स्वप्नसुषुप्तिभेदेन यात्रिधावृत्तिर्दृश्यतेसाऽपि गुणत्रयात्मनः सत्त्वरजस्तमोरूपगुणत्रयस्वरूपाया बुद्धेर्धर्मः । उक्तावस्थात्रयस्योक्तमूलकत्वात् । एतदवस्थात्रयस्यास्मिन्नवस्थात्रय-साक्षिणि आत्मनि भानं मृषा बुद्ध्यध्यास निबन्धनं न तु वास्तव मित्यर्थः । अन्योऽन्यतोव्यभिचारतस्तस्यावस्था त्रयस्यस्व रूपतो

बुद्धेस्त्रिधा वृत्तिरपीह दृश्यते स्वप्नादि भेदेन गुणत्रयात्मनः ॥ अन्योऽन्यतोऽस्मिन्व्यभिचारतोमृषा नित्ये परे ब्रह्मणि केवले शिवे ॥ ३२ ॥

मृषात्वात्तज्ज्ञानस्य मृषात्वमेव । स्वप्नकाले जाग्रत्सुषुप्त्योरभावात् । जाग्रतिइतरद्वयस्याभावात् सुषुप्ताावितरयोरभावात्परस्परं व्यभिचारोबोध्यः आत्मनस्तदनाश्रयत्वं विशेषणैराह । नित्येउत्पत्तिनाशशून्येपरेगुणत्रयातीते ब्रह्मणिव्यापकेकेवलेऽसङ्गेशिवआनन्दरूपे एवंभूतेसदैकरसेपरस्परव्यभिचारधर्माभानमसंभवीति भावः ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रा. गी. अथस्याज्यत्वायमंसारमूलभूतांवृत्तिमाह । देहेति । एषांसङ्घातइतरेतराध्यासविषयात् अजस्रंयावाद्धियो बुद्धेर्वृत्तिस्तमोमूलतयाऽज्ञ
लक्षणाऽज्ञत्वज्ञापिका यावत्परिवर्ततें तावद्भवोद्भवःसंसारोद्भवोभवेत् । तमःपदंरजसोऽप्युपलक्षणम् । रजस्तमःप्रधानाबुद्धिः संसारहेतु स.

॥ १७ ॥

देहेन्द्रियप्राण मनश्चिदात्मनां सङ्घादजस्रं परिवर्तते धियः ॥
वृत्तिस्तमोमूलतयाऽज्ञलक्षणा यावद्भवेत्तावदसौ भवोद्भवः॥३३॥ ॥ १७ ॥

त्वात्सर्वथास्याज्येति भावः ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

कृत महावाक्यविचारस्य कर्तव्यमाह । नेतीति । अथात आदेशो नेति नेति इति प्रमाणेन निराकृतं मिथ्यात्वेन गृहीतमखिलं जगत् येन सः ततो हृदा सत्त्वप्रधानेन मनसा सम्यगास्वादितं चिल्लक्षणं घनामृतं दुःखासंभिन्नं सुखं येन सः । स्वर्गादि तु परिणामदुःखत्वात्तत्संभिन्नमेव । एवंभूतोऽशेषं जगद्देहेन्द्रियादिदृश्यसमूहं त्यजेत् हानोपादानबुद्धिविषयं न कुर्यात् । किन्तूदासीनस्तत्र भवेत् । ननु देहेन्द्रियादिभिरेव तज्ज्ञान

नेतिप्रमाणेन निराकृताखिलो हृदा समास्वादितचिद्घनामृतः ॥ त्यजेदशेषं जगदात्तसद्रसं पीत्वा यथाऽम्भः प्रजहाति तत्फलम् ॥ ३४ ॥

लाभात् कथमुपजीव्यस्य त्याग इत्याशङ्क्य दृष्टान्तदर्शनेन परिहरति । यथा तृषावान् आत्तः सद्रसो माधुर्यं येन तादृशं नारिकेलनारङ्गादि फलान्तवर्त्यम्भः पीत्वा तत्स्थानभूतं तत्फलं जहाति तत्रोदासीनो भवति तद्वत् सर्वदृश्यसारांशो ब्रह्म तल्लाभसति निःसारं दृश्यं नोपादेयं नापि हेयमिति भावः । यतो भयादिसंभावनात द्वैयापित्युच्यते ॥ ३५ ॥

CC-0. In Public Domain. Digitization by eGangotri

इतरस्यानित्यत्वेनतत्रवैराग्यार्थमात्मनएवनित्यत्वमाह । कदाचिदिति । कदापीत्यर्थः । अनवः उत्पत्त्यनन्तरंविद्यमानोहिनवः । तेन
जन्मानन्तरास्तित्वंव्यावर्तितं नवत्वाभावेनैवजीर्णत्वाभावादवस्थान्तरापत्तिरूप परिणामोऽपिनिरस्तः ।अनेनअस्तिजायतेवर्द्धतेविपारिणम
तेऽपक्षीयते नश्यतीति षड्भाव विकार राहित्यमुक्तम् । एवंचैतद्भिन्नं सर्वमुक्तषड्भावविकारवत्त्वादनित्यमिति ततोविरज्येतेतिबोधित-

कदाचि दात्मान मृतोनजायते नक्षीयते नापिविवर्धतेऽनवः ॥
निरस्तसर्वातिशयः सुखात्मकः स्वयम्प्रभः सर्वगतोऽयमद्वयः ३५

म् । यतऽईदृशोऽतएवनिरस्तः सर्वस्यदेहेन्द्रियादेरतिशयोमहत्त्वं येनस्वलाभात्सः यल्लाभान्नापरोलाभइतिःश्रुतेः यतःसुखात्मकः आनन्द
स्वरूपः स्वयम्प्रभःस्वप्रकाशकश्च देहेन्द्रियादिस्तु दुःखस्वरूपः परप्रकाश्यश्च । यस्यभासासर्वमिदंविभाति । इतिश्रुतेः । सर्वगतोव्यापकः
अयमहंबुद्धिविषयःप्रत्यगात्माऽपिअद्वयः उक्ताद्वयब्रह्मस्वरूपएव । नततोऽतिरिक्तइतिभावः । अयमात्माब्रह्म । इतिश्रुतेः ॥ ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुएवंविधेविकारशून्येआत्मनिजन्ममरणादिप्रवाहरूपसंसारभानंकथमितिशङ्कते। एवंविधेइति।दुःखमयःदुःखप्रचुरः।उत्तरयति। अज्ञानतइ
तिअज्ञानमूलकोयोध्यासोदेहान्तः करणादौअहममेत्यध्यासस्तद्वशात्। एवंचभ्रान्तिरूपातत्प्रतीतिरितिभावः। नन्वेवंकथंतस्यसंसारस्यनि

एवंविधे ज्ञानमये सुखात्मके कथंभवो दुःखमयःप्रतीयते ॥
अज्ञानतोऽध्यासवशात्प्रकाशतेज्ञानेविलीयेत विरोधलःक्षणात्॥
॥ ३६ ॥

वृत्तिस्तत्राह। ज्ञानेति। आविर्भूतइतिशेषः। ज्ञानस्याज्ञानविरोधित्वात्तदुत्पत्तिक्षणएवकारणभूताज्ञाननाशात्तत्कार्यसंसारस्यापि वि
लयइत्यर्थः। यथारज्जुज्ञानेनरज्जौसर्पस्यलयइत्यर्थः ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाध्यासलक्षणमाह । यदन्यदिति । यदन्यत्सर्पादिकमन्यत्ररज्ज्वादौ भ्रमात् भ्रमजनकाद्दोषाद्विभाव्यते विज्ञायते अमुं विपश्चितो विद्वांसोऽध्यास इत्याहुः । यथाऽसर्पभूते रज्ज्वादौ अहिविभावनं सर्पारोपो रज्ज्वबुद्धिमूलकस्तद्वदीश्वरेऽपि जगद्देहादिसंसारात्मकं सर्वं विभाव्यते आत्मज्ञानाभावाद्यथार्थतया ज्ञायते ॥ ३७ ॥

यदन्यदन्यत्र विभाव्यते भ्रमादध्यासमित्याहुरमुं विपश्चितः ॥
असर्पभूतेऽहिविभावनं यथा रज्ज्वादिके तद्वदपीश्वरे जगत् ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आतमनिब्रगद्धानेकीदृशोऽध्यामोनिमित्तंतदाह विकल्पेति सर्वविकल्पकारणमायारहितेवस्तुतस्तत्सङ्गराहितेचिदात्मकेचित्स्वरूपेसर्वकारणेनिरामयेदुःखासंभिन्नानन्दमयेकेवलंसर्वविकारशून्यपरेदृश्याविलक्षणेब्रह्मणिव्यापकं आत्मनिप्रथममहङ्कारः कल्पितः सएवाध्यासः ।

विकल्पमायारहितेचिदात्मके ऽहङ्कारएष प्रथमः प्रकल्पितः ॥
अध्यासएवात्मनिसर्वकारणे निरामयेब्रह्मणि केवलेपरे ॥ ३८ ॥

अहंबुद्ध्यात्मकोऽध्यासएवसर्वसंसारकारणमितिभावः ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बुद्धिनिष्ठएवसंसारोनत्वात्मनिष्ठइत्यत्रान्वयव्यतिरेकौप्रमाणयति। इच्छादीति। परेसर्वसाक्षिणिआत्मनिसंसृतिहेतवःभासमानसंसारकारणं सदाकालत्रयेऽपिइच्छादिरागादिसुखादिधार्मिकाः इच्छापक्षेरागद्वेषौसुखदुःखंइत्येवमादिद्वन्द्वधार्मिकाःधियएवधीषुसतीषुसंसारइत्यन्वयमु

इच्छादिरागादिसुखादिधार्मिकाः सदा धियः संसृतिहेतवः परे ॥
यस्मात्प्रसुप्तौतदभावतःपरः सुखस्वरूपेणविभाव्यतेहिनः ॥३९॥

क्त्वातद्व्यतिरेकमाहयस्मात्कारणात्प्रसुप्तौतदभावात् धीवृत्त्यभावात परआत्मानोऽस्माभिःतृतीयार्थेषुषष्ठी। सुखरूपेणस्वस्वरूपमात्रेणाविभा
व्यतेनिश्चीयते नतु संसारित्वेनेतिभावः सुप्तोत्थितस्तुसुखमहमस्वाप्समितिप्रत्यभिज्ञानुभवात्तदात्मस्वरूपनिश्चयोऽस्तीतितात्पर्यम् ॥ ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथपुनस्तत्त्वं पदार्थस्वरूपमाह ।अनादीति। अनादिर्याऽविद्यातत्तदुद्भवायस्या बुद्धेरन्तःकरणस्यतत्रविम्बितःप्रतिबिम्बिताश्चितःप्रकाशः
सजीवइतीर्यते आत्मापरात्माधियः साक्षितया धीधर्मासङ्गेनैवपृथक्स्थितः । अन्तर्यामितयेत्यर्थः जीवोऽहंसुखीत्याद्यप्रकारेणान्तःकर

अनाद्यविद्योद्भवबुद्धिबिम्बितोजीवप्रकाशोऽयमितीर्यते चितः ॥
आत्माधियः साक्षितया पृथक् स्थितो बुद्ध्या परिच्छिन्नपरः
सएव हि॥ ४० ॥

णधर्माध्यासवान्परमात्मातु साक्षितयासर्वत्राविद्यमानोऽपिनतथेतिभावः। अतएवबुद्ध्यापरिच्छिन्नपरः बुद्धिलक्षणपरिच्छेदरहितःअतएव
परः। एवंचज्ञानेनप्रतिबिम्बाधार विलयप्रतिबिम्बस्यविलयात्सजीवः सएवपरमात्मैवहिप्रसिद्धं सइत्यस्यचानुवृत्तिबोध्या ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ बुद्ध्यात्मनोःपरस्पराध्यासवशात् परस्परधर्मभानमितिदार्ढ्यायपुनराह । चिद्बिम्बेति । चिदात्मचेतसोरन्योन्याध्यासवशात् पर स्परतादात्म्यारोपाज्जडाजडत्वंप्रतीयते । चेतसोवृत्तीनांज्ञानत्वं जीवात्मनोजडत्वंप्रतीयते । अतएवज्ञानाश्रयआत्मेति चितएवताकिं कर्तृव्यवहारः । जीवात्मनिजडात्मनिजडात्माकथ्यते बुधैरितिस्मार्तव्यवहारश्च । अत्रहेतुः । चिदित्यादि । चिद्बिम्बस्यसाचिदाभासः अ

चिद्बिम्बसाक्ष्यात्मधियांप्रसङ्गतस्त्वेकत्रवासादनलाक्तलोहवत् ॥
अन्योऽन्यमध्यासवशात्प्रतीयते जडाजडत्वंचचिदात्मचेतसोः
॥ ४१ ॥

क्षेःसहितः साक्षःसेन्द्रियः सचासावात्मामनःधीरन्तःकरणंतेषांप्रकृष्टसङ्गादतिसान्निकर्षादध्यासइत्यर्थः । अनलाक्तलोहवत् अग्नितप्तलो हपिण्डवत् अत्रदृष्टान्तः । अग्निधर्मोदाहकत्वं लोहधर्मश्चवर्तुलत्वाद्यनलेभासते । तत्रहेतुरेकत्रवासात् परस्पराविभागेनवृत्तेरित्यर्थः । तद्व देतयोरपि परस्परधर्माध्यासइत्यर्थः ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं दार्ढ्यायपुनराह । गुरोरिति । वेदवाक्यतइत्यनेन श्रवणंगुरोःसकाशादपि । ततश्चानेनमननमुक्तम् । ताभ्यांसञ्जातोविद्यया ज्ञानरूपस्यात्मनोऽनुभवोयस्यसः । अनेनकृतनिदिध्यासनइत्यर्थः । तं चिदानन्दस्वरूपं स्वात्मानमुपाधिवर्जितं रहितोपाधिधर्मंमात्मस्थं

गुरोःसकाशादपिवेदवाक्यतः सञ्जातविद्यानुभवोनिरीक्ष्य तम् । स्वात्मानमात्मस्थमुपाधिवर्जितं त्यजेदशेषं जडमात्मगोचरम् ॥ ४२ ॥

हृत्स्थंनिरीक्ष्य अपरोक्षीकृत्याशेषंजडं दृश्यंत्यजेत् । तत्रोदासीनोभवेदिति भावः ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

ज्ञेयंनिरुपाधिकं स्वरूपंश्लोकद्वयेनाह प्रकाशेति अहंप्रकाशरूपः स्वप्रकाशः परप्रकाशहीनः परप्रकाशरूपोयथाघटादिः अजोजन्मादि हीनः अद्वयःसजातीयद्वितीयरहितः असकृद्विभातः सकृदपिपरेणभासकान्तरेणप्रकाशितः सकृद्विभातः नसकृद्विभातोसकृद्विभातः नत

प्रकाशरूपोऽहमजोऽहमद्वयोऽसकृद्विभातोऽहमतीवनिर्मलः ॥
विशुद्धविज्ञानघनोनिरामयःसम्पूर्णआनन्दमयोऽहमक्रियः॥४३॥

त्रसूर्योभातिनचन्द्रतारकमितिश्रुतेः नतद्भासयतेसूर्यइतिस्मृतेश्च अतीवनिर्मलः मायाकृतावरणविक्षेपरहितः विशुद्धविज्ञानघनः विशुद्धचिदेकरसः निरामयःकर्तृत्वाभिमानरहितः सम्पूर्णःदेशकालपरिच्छेदहीनः आनन्दमयः आनन्दरूपः स्वार्थेमयट् अक्रियः परिणामहीनः ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदैवेति अहंसदैवकालत्रयेऽपिमुक्तःसर्वधर्मरहितः अचिन्त्यशक्तिमान् यःपरमात्मा अतिन्द्रियज्ञानमृइन्द्रियातिरिक्तज्ञानरूपःयतोवाचो निवर्त्तन्ते अप्राप्यमनसासहइतिश्रुतेः अविक्रियात्मकोऽपरिणामी अनन्तपारःअन्तःकालतःपारःपरन्तीरन्तावविद्यमानौ यस्य तेनदेश

सदैवमुक्तोऽहमचिन्त्यशक्तिमानतीन्द्रियज्ञानमविक्रियात्मकः॥
अनन्तपारोऽहमहर्निशंबुधैर्विभावितोऽहंहृदिवेदवादिभिः ॥४४॥

कालपरिच्छेदहीनः ईदृशोयःपरमात्माबुधैर्हृदि अहर्निशंविभावितः सोऽहमित्यर्थः ॥ ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंभावनायाःफलमाह एवमिति उक्तरीत्यासदाआत्मानं अखण्डितात्मनाविषयानाकृष्टचित्तेन विचारमाणस्यध्यायतः धातूनामनेकार्थत्वात् चरमाणएवंचारमाणःस्वार्थेऽण् विशुद्धभावनाब्रह्माकारान्तःकरणवृत्तिरुदेतीतिशेषः साचोदितासतीकारकैर्देहान्तरप्रापककर्मभिः स

एवंसदात्मानमखण्डितात्मनाविचारमाणस्यविशुद्धभावना ॥
हन्यादविद्यामचिरेणकारकैरसायनंयद्वदुपासितंरुजः ॥ ४५ ॥

हाविद्यामाचिरेणशीघ्रमेवहन्यात् यथोपामितंसेवितंरसायनं रुजोहन्यात्तद्वत् ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रध्यानेइतिकर्तव्यतामाह विविक्तइति निर्जनइत्यर्थः आसीनोयथोचितपद्मासनाद्युपविष्टः उपारतेन्द्रियः तेनशमदमादिसम्पन्नः विनिर्जितात्माप्राणायामादिभिर्जितान्तःकरणः अतएवविमलान्तराशयोविशुद्धचित्तः विज्ञानदृक्विज्ञानएवदृक्भानंयस्यसः द्रष्टृदृश्यभा

विविक्तआसीनउपारतेन्द्रियोविनिर्जितात्माविमलान्तराशयः॥
विभावयेदेकमनन्यसाधनोविज्ञानदृक्केवलआत्मसंस्थितः॥४६

नरहितः अनेननिर्विकल्पकसमाधिरुक्तः अनन्यसाधनः तत्त्वज्ञानातिरिक्तमुक्तिसाधनास्तित्वभ्रमरहितः केवलोऽसङ्गःआत्मसंस्थितः आत्मन्येवसंस्थासमाप्तिः सञ्जातायस्यसतेन नकदापिविषयान्तरसञ्चारवच्चित्तः विभावयेत् ध्यायेत्॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 किंच यदेतत्भूतंभविष्यद्वर्तमानं विश्वंपरमात्मादर्शनंभासकोयस्यतत तस्यभासासर्वमिदंविभातीति श्रुतेः तत्सर्वकारणेमायासान्निधाना
तत्सर्वोपादानत्वेनाभिमतेआत्मनिविलापयेत् उपादानसत्ताव्यतिरेकेणकार्यसत्तांनपश्येत् तादृशस्यलक्षणमाह सम्पूर्णः अवाप्तसमस्तका

विश्वंयदेतत्परमात्मदर्शनं विलापयेदात्मनि सर्वकारणे ॥
पूर्णश्चिदानन्दमयोऽवतिष्ठते न वेद बाह्यं न च किञ्चिदान्तरम् ॥ ४७ ॥

मः तस्यकाम्याभावात् चिदानन्दमयः तद्रूपोऽवतिष्ठते बाह्यमान्तरंच दृश्यंनजानाति सर्वत्रब्रह्मदर्शनादिति भावः ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाधिसिद्धेः पूर्वंयत्कर्तव्यंतदाह । पूर्वमिति । ममाधेः सकलविषयव्यासङ्गनिवृत्तिपूर्वकं ब्रह्माकारवृत्तिः समाधिस्ततः पूर्वमखिलंस चराचरंजगत् ओङ्कारमात्रं विचिन्तयेत् । ओङ्कारोमीयतेऽ नयेतिमात्रा प्रमाणं बोधकत्वेन परिच्छेदकायस्यतथाजानीयात् । तदेवविवृ

पूर्वं समाधे रखिलं विचिन्तये दोङ्कारमात्रं सचराचरं जगत् ॥ तदेव वाच्यं प्रणवो हि वाचको विभाव्यते ज्ञानवशान्न बोधतः ॥ ४८ ॥

णोति तदेवेति । जगदेवेत्यर्थः । प्रणवोवाचकोविभाव्यतेएतत्ताहिप्रसिद्ध इत्यर्थः । इयंभावनाज्ञानवशादेवनबोधकः। बोधोनिर्विशेषब्रह्मसा क्षात्कारस्तदुत्तरंनेत्यर्थः । तस्यसर्ववृत्त्युपमर्दकत्वात् ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमर्थंविवृणोति । अकारेति । अकारसञ्ज्ञस्तद्वाच्यः पुरुषोहिविश्वकोविश्वएवविश्वकः विश्वशब्देनपरिभाषितः अयंजाग्रत्साक्षीविराट् ततःस्वप्नसाक्षीतैजसःतेनपदेनपरिभाषितःलिङ्गदेहाभिमानीहिरण्यगर्भउकारकः उकारप्रतिपाद्यईर्यते । ततः सुषुप्तिसाक्षीप्राज्ञपदवाच्यो

अकारसञ्ज्ञः पुरुषो हि विश्वको ह्युकारकस्तैजसईर्यते क्रमात् प्राज्ञो मकारः परिपठ्यतेऽखिलैः समाधि पूर्वं न तु तत्त्वतो भवेत् ॥ ४९ ॥

मायोपाधिकोमकारस्तद्वाच्यः परिपठ्यतेऽखिलैर्वेदैः । इयंभावनासमाधिपूर्वंसमाधेःपूर्वमेव नतत्त्वतः तत्त्वसाक्षात्कारेसतिनभवेत् । रुर्वस्यब्रह्मणिप्रविलयात् ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाविलापन प्रकारमाहद्वाभ्याम् । विश्वंत्विति । उकारमध्ये बहुधाव्यवस्थितं स्थूलदेहनिबंधनंस्थूलदेहाभिमानेन स्थितं विश्वम्पुरुषंत-द्वाचकंमकारम् च विलापयेत् । तुश्चार्थे । विलीनम्भावयेत् ततस्तैजसंलिङ्गदेहाभिमानिनम् पुरुषं तद्वाचकंप्रणवस्यद्वितीय वर्णमुकारं वि-

विश्वं त्वकारं पुरुषं विलापयेदुकारमध्येबहुधा व्यवस्थितम् ।
ततो मकारे प्रविलाप्यतैजसंद्वितीयवर्णं प्रणवस्य चान्तिमे ॥५०॥

लीनविश्वकम्मकारे विलाप्याविलीनम्भावयित्वा ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तनस्तादृशंमकारंतद्वाच्यंप्राज्ञंचकारणंकारणत्वाभिमानिनंपुरुषमिहात्मनि चिद्घनेपरे विलापयेत् तथाभावयेत् । ततः सोऽहंमर्वोपला पाधिष्ठानंपरब्रह्मविभावयेत् । तद्विशिनष्टि । सदाविमुक्तिमत् नित्यमुक्तम् । नन्वहंपदार्थस्यरागद्वेषादिमलिनस्यकथं ब्रह्मत्वभावनेत्या

मकारमप्यात्मनि चिद्घने परे विलापयेत्प्राज्ञमपीह कारणम् ।
सोऽहं परं ब्रह्म सदा विमुक्तिमद्विज्ञानदृङ्मुक्त उपाधितोऽमलः ॥ ५१ ॥

शङ्क्याहंपदार्थंविशिनष्टि । उपाधितोमुक्तः अतएवामलःतथाभावनेसाधनं विज्ञानदृक्विज्ञानं ब्रह्ममात्रप्रत्ययाविच्छेदरूपादृक् निदिध्यासनं सत्साक्षात्कारेसाधनंयस्यसः ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एवंभावनवतो लक्षणमाह । एवमिति । उक्तप्रकारेण सदा जाता परमात्मन्येकभावना यस्य सः परिविस्मृतमखिलं पुत्रदेहादि येन सः । अत एव स्वस्वरूपानन्देनैव तुष्टः न तु विषयानन्देन । तस्य परिणामे दुःखरूपत्वात्ततो विरक्त इत्यर्थः । साक्षान्नित्यात्मसुखप्रकाशकः साक्षा

एवं सदा जातपरात्मभावनः स्वानन्दतुष्टःपरिविस्मृताखिलः ॥
आस्ते स नित्यात्मसुखप्रकाशकः साक्षाद्विमुक्तोऽचलवारिसिन्धुवत् ॥ ५२ ॥

दौपाधिकनामरूपभेदराहित्येन नित्यमखण्डितमात्मस्वरूपं यत्सुखं प्रकाशश्च तद्रूपः एवंरूपो विमुक्तो जीवन्मुक्तः । अचलं निश्चलं वारि यस्य तादृशसिन्धुवदास्ते । विषयसम्बन्धरूपलहरीरहित आस्त इत्यर्थः ॥ ५२ ॥

CC-0. In Public Domain. Digitization by eGangotri

ईदृशस्यमत्प्राप्तिर्भवत्येवेत्याह । एवमिति । उक्तप्रकारेणसदाऽभ्यस्तसमाधेर्योगिनः निवृत्ताःसर्वेषामिन्द्रियाणांगोचराविषयाःशब्दादयो यस्य विनिर्जिताअशेषारिपवःकामादयोयेनतस्य । तज्जयेनविषयेष्वन्तःकरणाप्रवृत्तिः । अतएव सर्वज्ञत्वनित्यत्वनित्यतृप्तत्वबोध

एवं सदाऽभ्यस्तसमाधियोगिनो निवृत्तसर्वेन्द्रियगोचरस्य हि ॥ विनिर्जिताशेषरिपोरहंसदा दृश्यो भवेयं जितषड्गुणात्मनः ॥५३ ॥

रूपत्वस्वतन्त्रत्वनित्यमलुप्तत्वानन्तरूपाषड्गुणायस्यताद‍ृशआत्माजितो वशीकृतोयेनतस्य सदादृश्योभवेयम् । एतेनमद्भक्तस्ययोगिनो ऽहंदृश्योनतुभक्तिविमुखस्येति सूचितम् ॥ ८१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंविधोजीवन्मुक्तःप्रारब्धवशेन अनभिमानोभोगानश्नँस्तिष्ठेत् ततोमय्येवाविलीयते मद्रूपोभवतीत्याह । ध्यात्वैवमिति ॥ ५४ ।

ध्यात्वैवमात्मानमहर्निशं मुनितिष्ठेत्सदा मुक्तसमस्तबन्धनः ॥
प्रारब्धमश्नन्नभिमानवर्जितो मय्येवसाक्षात्प्रविलीयते ततः ५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सर्वधर्मापेक्षयाऽयंमन्त्रधर्मोऽयायानित्याह । आदाविति । भवसंसारमादिमध्यान्तमानेषुसर्वथाभयशोकयोः कारणंविदित्वातत्कारणीभूतंविधिवादचोदितंकर्मसमस्तंकर्ममार्गकाम्यंहित्वा अखिलात्मनांजीवानांस्वरूपभूतंमामात्मानं परमेश्वरंभजेत् । य

आदौ च मध्ये च तथैव चान्ततो भवं विदित्वा भयशोककारणम् ॥ हित्वा समस्तं विधिवादचोदितं भजेत्स्वमात्मानमथाखिलात्मनाम् ॥ ५५ ॥

थाधनस्यार्जनेनादौदुःखंमध्येपालनकृतं तत्र राजादिकृतं भयमन्तेनाशेशोकपर्यवसायिदुःखमेवं पदार्थमात्रेद्रष्टव्यम् ॥ ५५ ॥

CC-0. In Public Domain. Digitization by eGangotri

मय्यभेदभावनया नामरूपाविभागेन तद्रूप एवभवतीत्यमुमर्थं सदृष्टान्तमाह । आत्मनीति । आत्मनिसर्वाधिष्ठानेमयिइदंस्वस्वरूपं जीवमभेदेनविभावयन्यदा । तिष्ठतीतिशेषः । तदामयात्मनापरमेश्वरेणाऽभेदेनभवति अभिन्नोभवति । तत्रदृष्टान्तः यथासमुद्रेप्रविष्टं नद्यादि

आत्मन्यभेदेन विभावयन्निदं भवत्यभेदेन मयाऽऽत्मनातदा ॥ यथाजलं वारिनिधौ यथापयः क्षीरेवियद्व्योम्न्यनिले यथाऽनिलः ॥ ५६ ॥

जलंसमुद्रएव यथाक्षीरेगवादिक्षीरेप्रक्षिप्तंपयःक्षीरमेव यथाव्योम्निमहाकाशेघटाद्यवच्छिन्नाकाशोघटादिभङ्गे च यथाचर्मभस्त्रिकाद्यवच्छिन्नोवायुरनिलेमहावायौ नामरूपाविभागेनैकीभवतीत्यर्थः ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमात्मतत्त्वज्ञस्य जगत्सत्यत्वभ्रमःस्वतएवापैतीत्याह । इत्थमिति । हिरण्यर्थे । लोकसंस्थितोऽपिजीवन्मुक्तिदशायांप्रारब्धवशाल्लोकव्यवहारंकुर्वन्नपिजगन्मृषैवेतिविभावयन्सन् यदियदा इत्थमीक्षते ऐकात्म्यं जानीयात्तदा निवृत्तजगत्सत्यत्वभ्रमो भवतीति शेषः। तत्र हेतुः श्रुतियुक्तिमानतोनिराकृतत्वात् । अतोऽन्यदार्तमित्यादिश्रुतिरूपात् जगन्मिथ्यादृश्यत्वात् शुक्तिरजतवदितितदुपबृंहितानुमानरू

इत्थं यदीक्षेत हि लोकसंस्थितो जगन्मृषैवेतिविभावयन्मुनिः ॥
निराकृतत्वाच्छ्रुतियुक्तिमानतो यथेन्दुभेदो दिशि दिग्भ्रमादयः ॥ ५७ ॥

पात्मानतःप्रमाणतोनिराकृतत्वात् तत्रदृष्टान्तोयथेन्दुभेदः एकचन्द्रेद्विचन्द्रत्वभ्रमस्तदेकत्वज्ञानेननिवर्तते यथाच दिशिप्राच्यादौअन्यदिक्त्वभ्रमः सोऽपितत्त्वज्ञानान्निवर्तते । एवंभ्रमतःपुरुषस्य दिक्षुभ्रमणाद्भमोनिकटवर्तिवृक्षादौच भ्रमणभ्रमस्तत्स्थैर्यज्ञानेन निवर्तते तद्वत् ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशज्ञानेमदाराधनमेवोपायइत्याह । यावदिति । अखिलं जगन्मदात्मकंमदधिष्ठानकंमाद्विवर्तंभूतंयावन्नपश्येत्तावन्मत्प्राप्तयेश्रद्धालुः भगवदाराधनमेवज्ञानप्रापकमित्यत्र दृढविश्वासवान् अतिशयेनोर्जिताद्वृद्धिमतीभक्तिर्मयिभगवतिपूज्यताबुद्धिरूपालक्षणं चिह्नंयस्यसः ।

यावन्नपश्येदखिलं मदात्मकं तावन्मदाराधनतत्परो भवेत् ॥
श्रद्धालुरत्यूर्जित भक्तिलक्षणो यस्तस्य दृश्यो ऽहमहर्निशं हृदि ॥ ५८ ॥

तावन्मदाराधननिष्ठोभवेत् एवंहितस्यहृदि अहमहर्निशंदृश्योभवा मियेयथामांप्रपद्यन्ते तांस्तथैवभजाम्यहमितिस्मृतेः ॥ ५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वोक्तवचनजातस्य श्रुतिसमत्वं कथमेतदालोचनमपिमदाराधनप्रतिबन्धकदुरितध्वंसोपायइत्याह रहस्यमिति । श्रुतिसारसङ्ग्रहत्वेनाति

रहस्यमेतच्छ्रुतिसारसङ्ग्रहं मया विनिश्चित्य तवोदितं प्रिय ॥ यस्त्वेतदालोचयतीहबुद्धिमान् स मुच्यते पातकराशिभिः क्षणात् ॥ ५९ ॥

गोपनीयता अप्रमाणशङ्काकलङ्कराहित्यंसूचितम् । आलोचयतिसम्यग्विचारयति ॥ ५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथ भगवानुक्तमेवार्थसंक्षेपेण दार्ढ्यायपुनराह भ्रातरिति । यदीतियादित्यर्थे । यदीदंजगत् परिदृश्यते तत्सर्वंमायैवेतिज्ञात्वेति शेषः चेतसासर्वंपरिहृत्यतत्रौदासीन्यंकृत्वामद्भावनयामदैक्यभावनया भावितंशुद्धंमानसंयस्यतादृशास्तिष्ठ । इत्युपदिश्याशिषंप्राह निरामयः

भ्रातर्यदीदं परिदृश्यते जगन्मायैव सर्वं परिहृत्य चेतसा॥मद्भा वनाभावितशुद्धमानसः सुखी भवाऽऽनन्दमयो निरामयः ६०

सन्सुखीभव। सर्वदुःखनिवृत्तस्येतिभावः। ततोऽन्तरङ्गामन्यामाशिषमाह आनन्दमयोभवेति तद्रूपोभवेत्यर्थः । यद्यपिपूर्वमानन्दरूपत्वमस्त्ये वतथाऽपितत्प्राप्तिर्विस्मृतकंठस्थभूषणप्राप्तिवत ॥ ६० ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 एवंरीत्यास्वोपासकस्यलोकपावनत्वमाह। यइति । कदावा यदाकदाचिदित्यर्थः । हृदानिर्मलेनान्तःकरणेन यो मामगुणं प्राकृतसत्त्व
रजस्तमोरूपगुणरहितम् । सच्चिदानन्दरूपत्वात् । अतएवगुणादव्याकृतात्परंमायातीतम् । यदिवायद्वेत्यर्थे । गुणात्मकं सर्वज्ञत्वा-
॥ ३१ ॥ दिलोकोत्तरलावण्यादिगुणवानात्मामूर्तिर्यस्यतं दृश्यमानं रूपं सेवते । सद्विविधोऽप्युपासकः अहं मत्स्वरूपएव । मामकइत्यर्थोवा । प्रि-

यः सेवते मामगुणं गुणात्परं हृदा कदा वा यदि वा गुणात्मकम्
॥ सोऽहंस्वपादाञ्चितरेणुभिः स्पृशन्पुनाति लोकत्रितयं यथा
रविः ॥ ६१ ॥

योहिज्ञानिनोऽत्यर्थमहंसचममप्रिय इत्युक्तेः । तादृशोभक्तःस्वपादलग्नरेणुभिःसंस्पृशन्लोकत्रयमपि पुनाति । अज्ञानध्वान्तनिरसने ॥ ३१ ॥
नपवित्रीकरोति । यथारविःस्वकरैर्जगद्वितिमिरीकरोति तद्वत् ॥ ६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानीमेतद्ग्रन्थार्थालोचनासमर्थस्यपाठमात्रतोऽपिमहत्फलमाह । विज्ञानंविज्ञानजनकं करणव्युत्पत्त्येतिबोध्यम् । वेदान्तैरुपनिषद्वाक्यैर्वेद्यंचरणंजगज्जन्मादिलक्षणंकर्मयस्यतेन ननुपाठमात्रादेतादृशमहत्फलप्राप्तिःकथमित्याशङ्क्यभवत्येवेति सूचयंस्तत्रहेतुमाह । मद्वचने

विज्ञानमेतदखिलंश्रुतिसारमेकं वेदान्तवेद्यचरणेनमयैवगीतम् ।
यःश्रद्धया परिपठेद्गुरुभक्तियुक्तो मद्रूपमेति यदि मद्वचनेषुभक्तिः
॥ ६२ ॥ इतिश्री अध्यात्मरामायणे रामगीता समाप्ता ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसम्वादे उत्तरकाण्डे श्रीरामगीतायां पञ्चमःसर्गः ॥ ५ ॥

षुभक्तिर्विश्वासोयदीतिअर्थाद्गुरुवाक्यविश्वासस्यैव फलदायकत्वादितिभावः ॥६२॥ इत्यध्यात्मरामायणेउमामहेश्वरसम्वादे उत्तरकाण्डेसेतौपञ्चमःसर्गः ॥ ६२ ॥ श्रीरामचन्द्रार्पणमस्तु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीराममन्त्रःखलु तारकाख्यः संसारसन्तारणसुप्रसिद्धः ॥ भक्-
त्याऽप्यभक्त्या समुपासितोयः श्रेयांसि सर्वाणि ददात्यवश्य
म् ॥ १ ॥ तन्तारकंसम्प्रतिपादयन्ती श्रीरामगीता सकलैः सुसे
व्या ॥ विज्ञप्तिमित्थंजनको विनीतः समर्पयत्यार्यजनेषुहर्षात् २

॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प,	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति
स्यर्द्धि	स्पार्द्धि	१	२	१	शाधि	शाधि	३	२	६	नाशे	नाशो	६	१	१
जींव्य	जीन्य	१	२	३	व्यत्र	व्यव	४	१	१	नन्विविशि	नन्वितिशे	६	२	१
सम्वीन्धनी:	सम्बन्धिनी:	२	२	१	ष्ठामे	ष्ठानमे	४	२	३	त्रिदा	विदा	६	२	२
व्रह्म	ब्रह्म	२	१	२	व्रह्म	ब्रह्म	४	२	१	मेत्रे	मेव	६	२	२
व्रह्म	ब्रह्म	२	१	६	वलेन	वलेन	४	२	७	व्येतीत	व्यतेति	७	१	१
वोधोऽासि	बोधोऽसि	३	१	४	निघृत्ते	निवृत्ते	५	१	१	वीरहा	वीरहा	७	१	१
संवन्ध	सम्बन्ध	३	१	७	कत्व	कत्वा	५	१	१	सद्दष्ट	सद्‌दृष्ट	८	१	३
भवस्यंससार	भवस्यसंसार	३	२	१	नक	नैक	५	१	१	विशुद्धं	विशुद्ध	८	२	१
न्सार	सार	३	२	२	बेदान्त	वेदान्त	५	१	१	कारांत:	कारान्त:	८	२	२
पर्वग	पवर्ग	३	२	२	पूर्वे	पूर्वे	५	१	२	वृत्ति	वृत्ति	९	१	१
वारिधि	वारिधि	३	२	२	वुद्‌ध्या	बुद्‌ध्या	५	१	६	स्ववाना	स्वना	९	२	१
					एवं	एव	५	१	६	बृत्यु	वृत्यु	१०	१	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
रीप	रपि	११	२	१
नर्दष्टा	र्नदष्टा	१२	१	४
र्वाद्यै	र्वाद्यै	१२	१	७
त्याभि:	त्माभिः	१२	२	६
शुद्द	शुद्ध	१३	१	१
जीवया	जीवयो	१३	१	२
निर्वाध	निर्वाध	१४	१	१०
गव	भव	१५	१	४
अर्जोद्व	अर्जोऽद्व	१६	२	६
द्वात्	द्वात्	१७	२	१

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
ह्लाभ	ह्लाभे	१८	१	८
इतिः	इति	१८	२	२
ज्ञानन	ज्ञानेन	१९	१	१
वुद्दया	वुद्धया	२०	१	५
रागादि	रागादि	२१	१	३
त्रिलय	विलय	२१	१	७
धम	धर्म	२१	२	१
म्वस्य	म्वंयस्य	२१	२	२
वुवै	वुधै	२३	१	५
एव	एवं	२३	२	१
द्रष्ट	द्रष्टृ	२४	१	२

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
विभाव्यत	विभाव्यते	२५	१	४ मू
लिङ्गेद	लिङ्गदे	२६	१	२
वोधकः	वोधतः	२५	१	६
{ त्रिज्ञानं ब्रह्म }	{ विज्ञानंनिादि ध्यासनं ब्रह्म }	२६	२ ६	३
भेदेरा	भेदरा	२७	१	६
रुपा	रूपाः	२७	२	१
आतम	अतमा	२७	२	१
मुनिति	मुनिास्ति	२८	१	२
भव	भवं	२८	२	१

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
तदकत्व	तदेकत्व	२९	२	७	वतथाऽ	वतथाऽ	३१	१	६	मद्वचने	मद्वचने	३२	१	२
भ्रमण	भ्रमणं	२९	२	८	कंठ	कण्ठ	३१	१	२	तन्तारकं	तत्तारकं	३२	२	३

नेपाल पाशुपत, यन्त्रालये मुद्रिता.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इती रामगीता सटीका समाप्ता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ढ़ं.नं.१६६४२

अथ रामगीता सटीका प्रारभ्यते ॥

मू० २।—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ रामंरत्नकिरीटकुण्डलयुतं केयूरहारान्वितं
सीतालङ्कृतवामभागममलं सिंहासनस्थं विभुम् ॥ सुग्रीवादि
कपीश्वरैः सुरवरैः संसेव्यमानं सदा विश्वामित्रपराशरादिमुनि-
भिः संस्तूयमानं भजे ॥ १ ॥ इतिध्यात्वा ॥ श्रीमहादेवउवाच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशाय नमः ॥ ध्यायेत्वाजानुबाहुं धृतशरधनुषं बद्धपद्मासनस्थं पीतंवासोवसानं नवकमलदलस्पर्द्धिनेत्रं प्रसन्नम् ॥ वामाङ्कारूढ सीतामुखकमलमिलल्लोचनं नीरदाभं नाना लङ्कारदीप्तं दधतमुरुजटामण्डलं रामचन्द्रम् ॥ १ ॥ ततइति जगतां यानि मङ्गलानि आनन्दास्तेषामुपजीव्यभूतं मङ्गलं ब्रह्मानन्दः सएवात्मास्वरूपं तेन तस्यैवानन्दस्यान्यानि भूतानिमात्रामुपजीवन्तीति श्रुतेः मङ्ग

ततोजगन्मङ्गलमङ्गलात्मना विधाय रामायणकीर्तिमुत्तमाम् ॥
चचार पूर्वाचरितं रघूत्तमो राजर्षिवर्य्यैरभिसेवितं यथा ॥ १ ॥

लानाञ्चमङ्गलमिति स्मृतेश्च किंच जगतां मङ्गलं कल्याणं यस्मात्तादृशकल्याणरूपआत्मामूर्तिस्तया उत्तमांश्रोत्रादीनां मोक्षदत्वेना त्युत्तमां रामायणकीर्तिं वाल्मीक्यादि कृत नानाविध रामायण प्रवर्तिकां रावणवधादिजां कीर्तिंविधाय स्थितोरघूत्तमः ततः सीताप रित्यागानन्तरं पूर्वैः स्ववंशजैराचरितं प्रजापालनसत्कथाश्रवणादिकं केवलंतत्पूर्वजैरेवाचरितमितिन किंत्वन्यैरपि राजर्षिश्रेष्ठैर्य थाऽभिसेवितं तथाचचार कृतवान् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदारागुरुदेवविश्वासलक्षणमहागुणवती यद्वा उदारा दानशीलाबुद्धिर्यस्य तेन पुरातनीः प्राचीनराजसम्बन्धिनीः शुभाः धर्माधर्मनिर्णेत्रीः प्रमत्तस्य स्वगोमण्डलमिश्रितब्राह्मणगोदानात् प्रमत्तस्य नृगस्य राज्ञो द्विजस्य शापात्तिर्यक्त्वमाह तेनाज्ञातकृतब्रह्मस्वापहारेण परमधा

सौमित्रिणापृष्ट उदारबुद्धिना रामःकथाःप्राह पुरातनीःशुभाः ॥
राज्ञः प्रमत्तस्य नृगस्य शापतो द्विजस्य तिर्यक्त्वमथाह राघवः
॥ २ ॥

र्मिकस्यापीदृश्यवस्थेति सर्वथाब्रह्मस्वविमुखताधर्मइतिसूचितम् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकान्तेविजने उपस्थितंप्राप्तम् विनयान्वितः सन् भक्त्यागुरुरयमिति बुद्ध्या प्रणम्य अनेनगुरूपसदनप्रकारउक्तः आसादितंशुद्धंभाव

कदाचिदेकान्त उपस्थितंप्रभुं रामं रमालालितपादपङ्कजम् ॥
सौमित्रिरासादितशुद्धभावनः प्रणम्यभक्त्याविनयान्वितोऽब्र-
वीत् ॥ ३ ॥

नं भावनाकरणमन्तः करणंयेनसः शुद्धान्तःकरणइतियावत् भगवदुक्तसत्कथाश्रवणेन शुद्धान्तःकरणइत्यर्थः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हे महामते महतीसर्वविषयामतिर्यस्य तस्य संबोधनं त्वं शुद्धबोधोऽसि अनवच्छिन्नचैतन्यरूपोऽसि सर्वदेहिनामात्माऽसि जीवानांतद् गतिबिम्बत्वात्अधीशोऽसि अन्तर्यामित्वान्नियन्ताऽसि वास्तवभेदाभावाच्च सर्वात्मत्वम् औपाधिकभेदाच्च नियन्तृनियम्यभावोबोध्यः निराकृतिः अस्मदादिवत्स्वार्जितकर्माधीनशरीराकृतिरहितः नन्वेवंसर्वैः कथमेवंनज्ञायतेऽतआह ज्ञानदृशां स्वयमेवप्रतीयसे ज्ञायतेऽ

त्वं शुद्धबोधोऽसि हि सर्वदेहिनामात्माऽस्यधीशोऽसि निरा-
कृतिःस्वयम् ॥ प्रतीयसे ज्ञानदृशां महामते पादाब्जभृङ्गाहितस
ङ्गसाङ्गिनाम् ॥ ४ ॥

नेनेतिज्ञानं वेदान्तवाक्यजातं तदेवदृक्दर्शनसाधनंयेषां तेषामितिसंबन्धसामान्येषष्ठी तैरित्यर्थः तादृशदृक्लाभश्च त्वद्भक्त्यधीनइत्याह पादेति त्वच्चरणकमलयोर्भृङ्गवदाहितःकृतः सङ्गोयेन तादृशान्तः करणसङ्गवतां त्वच्चरणकमल सङ्ग्रान्तः करणवतामित्यर्थः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ प्रार्थयते अहमिति भवस्यं संसारस्यापवर्गो निवृत्तिर्यस्मात्ताहशं तव पादाम्बुजं प्रपन्नोऽस्मि शरणं प्राप्तोऽस्मि योगिभावितं योगीभिः संसारमुक्त्यै भावितम् अनेन तस्य भवापवर्गत्वे सदाचारः प्रमाणमुक्तम् प्रार्थनीयमाह अपारवारिधिरूपं पंथिदज्ञानं संसारमूलकारणं यथासुखम

अहं प्रपन्नोऽस्मि पदाम्बुजं प्रभो भवापवर्गं तव योगिभावितम् ॥ यथाञ्जसाज्ञानमपारवारिधिं सुखं तरिष्यामि तथाऽनुशाधि माम् ॥ ५ ॥

क्लेशेन तरिष्यामि तथा मामनुशाधि शिक्षय अपारवारिधिमित्यनेन सपारप्रसिद्धसमुद्राद्व्यतिरेक उक्तः अशक्यतरणताऽनेन ध्वनिता ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथोत्तरमवतारयति श्रुत्वेति रामः सौमित्रिवचः श्रुत्वा अथशब्दोवाक्यालङ्कारे तदा श्रवणाव्यवहितकाले एवप्रपन्नानां भक्तानामार्ति संसारदुःखहरतितादृशः प्रपन्नाश्रमादिहीना भक्तानुग्रहपरा च धीर्यस्यसः क्षितिपालानां राज्ञां भूषणभूतोऽज्ञानरूपतमसउपशान्तये त

श्रुत्वाथ सौमित्रिवचोऽखिलं तदाप्राह प्रपन्नार्तिहरः प्रसन्नधीः ॥
विज्ञानमज्ञानतमोपशान्तये श्रुतिप्रपन्नं क्षितिपालभूषणः ॥ ६ ॥

दर्थम् सन्धिरार्षः श्रुतिभिः तमेवविदित्वाऽतिमृत्युमेतीत्यादिश्रुतिभिः प्रपन्नं तत्फलकत्वेन बोधितं विज्ञानमात्मतत्वज्ञानामिति सामान्य तः प्रथमंप्राह ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथताद्दशज्ञानप्राप्तये क्रमेणबहिरङ्गान्तरङ्गसाधनान्याह आदाविति स्ववर्णाश्रमेषु शास्त्रेण वर्णिता याः क्रियानित्यनैमित्तकयज्ञदानादिरूपास्ताः कृत्वा समासादितशुद्धमानसः प्राप्तान्तःकरणशुद्धिः तत्पूर्वमुपात्तसाधनः तदनुष्ठानपूर्वकमेवउपात्तानिसाधनानि शमदमादीनियेन तादृशः अनेनकर्मणां बहिरङ्गत्वं शमादीनामन्तरङ्गत्वं स्फुटमेवोक्तम् किंच शमदमवैराग्यदार्ढ्यपर्यन्तं कर्मानुष्ठामेवेति

आदौ स्ववर्णाश्रमवर्णिताःक्रियाः कृत्वा समासादितशुद्धमानसः
समाप्य तत्पूर्वमुपात्तसाधनः समाश्रयेत्सद्गुरुमात्मलब्धये॥ ७ ॥

सूचितम् ततस्तत्कर्मानुष्ठानं समाप्य त्यक्त्वा संन्यस्येतियावत् आत्मलब्धये आत्मज्ञानाय तत्फलकाय तत्वमस्यादिवाक्यार्थविचाराय सद्गुरुंश्रोत्रियंब्रह्मनिष्ठमित्यादि लक्षणलक्षितं समाश्रयेत् सेवेत अनेनव्युत्पत्तिबलेन स्वयमेववाक्यार्थविचारः क्रियमाणो न फलायेति सूचितम् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसारस्यभ्रमिमच्चक्ररूपत्वात्तन्निवृत्तेश्चतत्कारणाज्ञाननिवृत्तिमूलकत्वदज्ञाननिवृत्तेश्चतत्त्वज्ञानकसाध्यत्वात्तत्त्वज्ञानस्यचवेदान्त विचारसाध्यत्वात्तदर्थंगुरुसमाश्रयणमित्याह क्रियेति भवःसंसारश्चक्रवद्विपरिवर्तमानईर्यते कथ्यते तदेवोपपादयति आदृताआदरपूर्वपूर्वजन्मार्जिताक्रियाएनस्यशरीरोद्भवस्यजन्मनोहेतुः तत्रजन्मनिसुरागिणोविषयाभिलाषवतः तौ शास्त्रप्रसिद्धौ धर्मेतरौ धर्माधर्मौ प्रियाप्रियौसुखदुः

क्रियाशरीरोद्भवहेतुराद्दताप्रियाप्रियौतौभवतःसुरागिणः ॥
धर्मेतरौतत्रपुनः शरीरकंपुनः क्रियाचक्रवदीर्यतेभवः ॥ ८ ॥

खजनकौभवतःकस्यचिदधर्मएवसुखत्वबुद्ध्याप्रवृत्तिः कस्यचिद्धर्मएवंकदाचिदित्यप्यूह्यम् एवंतत्रोत्पादितकर्मणापुनःशरीरंपुनःक्रियाइत्येवंचक्रवद्विपरिवृत्तिः । यथाचक्रेभ्राम्यमाणेऽधोभागः कदाचिदुपरिउपरितनश्चाधः पुनरुपरिपुनरधएवंजन्मक्रियोर्जन्यजनकभावेनपरिवृत्तिरिति बोध्यम् ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यचाज्ञानमेवमूलमित्याह अज्ञानमेवेति अत्रविधौसंसारनिवृत्तिलक्षणेकर्तव्येऽर्थेतद्ज्ञानमेवमूलकारणत्वादज्ञानहानमेवविधीयते साधनत्वेनेतिशेषः ननुकर्मैवतन्नाशकमस्तुकिंज्ञानेनेत्याशङ्क्याह विद्यैवज्ञानमेवतन्नाशविधौमूलाज्ञाननाशनेपटीयसीसमर्थानकर्मसमर्थमितिशेषः

अज्ञानमेवास्यहिमूलकारणंतद्धानमेवात्रविधौविधीयते ॥ विद्यैवतन्नाशविधौपटीयसीनकर्मतज्जंसविरोधमीरितम् ॥ ९ ॥

यतस्तत्तज्जमज्ञानजम् आत्मस्वरूपाज्ञानजन्यदेहाद्यभिमानजन्यत्वात्कर्मणोज्ञानजन्यत्वंबोध्यम् ननुतज्जन्यस्यापितन्नाशकत्वंवृश्चिककर्कव्यादौदृष्टमित्याशङ्क्यतज्जन्यत्वेवाननाशकत्वप्रयोजकंकिन्तुसविरोधत्वमेवेत्याह यतसविरोधंतदीरितंनाशकमुक्तमित्यर्थः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतएवकर्मणानाज्ञानहानिरित्याह नाज्ञानेत्यादि यतःकर्मणाविरोधाभावान्नाज्ञाननाशनापिरागनाशोवस्तुतः कर्मानुष्ठानात्पुनः सदो षंक्षयिफलत्वादिदोषविशिष्टकर्मैवोद्भवेत्कर्मणश्चपुनःसंसारएवेतिनमुक्तिप्रत्याशा ततस्तस्माद्बुधोविवेकीज्ञानविचारवान् ज्ञायतेऽनेने·

नाज्ञानहानिर्नचरागसङ्क्षयोभवेत्ततः कर्मसदोषमुद्भवेत् ॥ ततः पुनः संसृतिरप्यवारितातस्माद्बुधोज्ञानविचारवान्भवेत् ॥ १० ॥

तिज्ञानंवेदान्तवाक्यंतद्विचारवान्भवेत ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानीं ज्ञानस्यैवमोक्षहेतुत्वंवक्तुं ज्ञानकर्मसमुच्चयवादंदूषणायानुवदतिसार्धेन नन्विति नन्वितिशङ्कायाम् यथाविद्यावेदमुखेनश्रुतिपुराण-लक्षणेन ब्रह्मविदाप्नोतिपरम् इत्यादिनापुरुषार्थसाधनमुक्ता तथा उभाभ्यांमवपक्षाभ्यांयथाखेपक्षिणांगतिः तथैवज्ञानकर्मभ्यांप्राप्यते ब्रह्मशाश्वतम् इत्यादिनाक्रियाऽपितत्साधनत्वेनोक्ता किंच क्रियाकर्तव्यता तृतीयार्थेप्रथमा कर्तव्यतयाआवश्यकेकृत्येअवश्यकर्तव्यत-

ननुक्रियावेदमुखेनचोदितायथैवविद्यापुरुषार्थसाधनम् ॥ कर्त्तव्यताप्राणभृतःप्रचोदिताविद्यासहायत्वमुपैतिसापुनः ॥ ११ ॥

याप्रचोदितानित्यनैमित्तिकरूपा एवंचनदकरणेप्रत्यवायोत्पत्त्याज्ञानोत्पत्तिरेवनस्यात् तस्मात्सापुनर्विद्यायाःसहायत्वंप्राप्नोतिघटेजन-नीयेयथादण्डचक्रादीनांपरस्परसहायता ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्तव्यमेतीतिमन्त्रवाक्यमेवेविवृणोति कर्मेति वीरहावाएषदेवानांयोऽग्निमुद्वासयते यावज्जीवमग्निहोत्रंजुहोति इतिश्रुतिः तत्रासिद्धान्तीशङ्कते नन्विति ध्रुवंस्थिरंकार्यमिदंपुरुषार्थमोक्षजनिकाविद्यायतः स्वतन्त्राविनाऽपिसहायेन स्वकार्यसंपादनेसमर्था यथातेजस्तिमिरनिवर्तन-

कर्माकृतौदोषमपिश्रुतिर्जगौतस्मात्सदाकार्यमिदंमुमुक्षुणा॥ननु स्वतन्त्राध्रुवकार्यकारिणीविद्यानकिञ्चिन्मनसाऽप्यपेक्षते ॥ १२

समर्थंमनसाऽपिकिञ्चित्सहायभूतंवस्तुनापेक्षते तथाफलेजननीयेसहायान्तरसंभावनाऽपिनेतिभावः अनेनविद्याफलजननेनिरपेक्षास्वतन्त्र-त्वात्तेजोवदित्यनुमानंसूचितम् ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समुच्चयवादीपरिहराति नेति त्वदुक्तंनेत्यर्थः सत्यकार्यः अक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवति इत्यादिवेदनबोधितःस्थिरकार्योऽपि-
अध्वरः यथाऽन्यानापिकारकादिकान् आरादुपकारकप्रयाजाद्यङ्गानिदेशकालादीनिचप्रकाङ्क्षते तथाविद्यापिअग्निहोत्रंजुहोतिइत्यादिवि

नसत्यकार्योऽपिहियद्वदध्वरः प्रकाङ्क्षतेऽन्यानपिकारकादिकान्
तथैवविद्याविधितः प्रकाशितैर्विशिष्यते कर्मभिरेवमुक्तये ॥ १३ ॥

धिवाक्यतःतत्समूहेनप्रकाशितैः कर्मभिः सहितैवमुक्त्येविशिष्यतइत्यर्थः विद्याफलदानेकर्मापेक्षा अङ्गित्वात् प्रयाजाद्यङ्गापेक्षदर्शा
दिवादितिसत्प्रतिपक्षानुमानमनेनसूचितम् ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदनूद्यसिद्धान्तीदूषयति केचिदिति यत्केचिद्वितर्कवादिनश्शतिज्ञानकर्मणीसमुच्चित्यमुक्तिसाधनंवदन्तितदप्यसत् यथाकेवलंकर्म मोक्ष साधनमित्यमत्तथातन्मीलितमित्यप्यसत् तत्रहेतुर्दृष्टविरोधकारणात् दृष्टायोविरोधः सर्वलोकदृष्टविरोधरूपात्कारणात्तदसदित्यर्थः विरो

केचिद्वदन्तीतिवितर्कवादिनस्तदप्यसद्दृष्टविरोधकारणात् ॥
देहाभिमानादभिवर्धतेक्रियाविद्यागताहङ्कृतितःप्रसिद्ध्यति १४

धमेवाह देहाभिमानात्क्रियावर्धतेअनात्मनिदेहादावात्मत्वाभिमानात्क्रियावृद्धिः विद्यातुगताहङ्कृतितः गताहङ्कृतिर्यस्यतस्यनष्टाहङ्कृतेः प्रसिद्ध्यति सार्वविभक्तिकस्तसिः एवंचाहङ्कारसत्तामूलकत्वात्क्रियाज्ञानयोः समुच्चयोविरुद्धइत्यर्थः ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथपूर्वपक्षयुक्तानुमानंदूषयन्विद्यास्वरूपमाह विशुद्धंविज्ञानंयेभ्यस्तेषांवेदान्तवाक्यानांयद्विशेषेणरोचनंरलयोरभेदादालोचनंविचार
स्तेनाञ्चितामापितायाचरमाआत्मवृत्तिर्ब्रह्माकारान्तःकरणवृत्तिः साविद्येतिभण्यतेविद्वद्भिरितिशेषः पुनःसमुच्चयवारणायविद्याकर्मणो
वैषम्यमाह कर्मयज्ञादिअखिलकारकादिभिःकर्तव्यकर्मादिभिरङ्गैश्चसहितंसदुदेति फलोन्मुखंभवति विद्यापुनरखिलकारकादीन्निहन्ति

विशुद्धविज्ञानविरोचनाञ्चिताविद्याऽऽत्मवृत्तिश्चरमेतिभण्यते ॥ उदेतिकर्माखिलकारकादिभिर्निहन्ति विद्याऽखिल कारकादि-कम् ॥ १५ ॥

तत्रकर्तृत्वादिबुद्धिंनिहन्ति सकलव्यापारपरित्यागेनब्रह्मणिसमाप्तिर्हिविद्या अतःस्वोत्पत्तौचित्तशुद्धिद्वाराकर्मसापेक्षास्वफलेजनयितव्ये-
तन्निरपेक्षैवान्यथाविद्यास्वरूपस्यैवभङ्गापत्तेरितिपूर्वपक्षयुक्तहेतोरसिद्धिरितिभावः ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपसंहरन्मुमुक्षोर्वृत्तिप्रकारमाह तस्मादिति विद्याविरोधाद्विद्यायाःकर्मणासह विरोधेनसमुच्चयोनभवेत्तस्मात्सुधीर्मुमुक्षुरशेषतःकर्मत्यजे-
त् काम्यंतुसर्वथात्याज्यमेवनित्यनैमितिकमापियावच्चित्तशुद्धिकर्तव्यमेव ततोऽपिब्रह्मणिचित्तस्थैर्यपर्यन्तं कर्तव्यमेव ततस्तदनुसन्धानप्र-

तस्मात्त्यजेत्कार्यमशेषतः सुधीर्विद्याविरोधान्नसमुच्चयोभवेत् ।
आत्मानुसन्धानपरायणःसदा निवृत्तसर्वेन्द्रियवृत्तिगोचरः १६

तिबन्धकत्वात्प्रयोजनाभावाच्चतदापित्याज्यमेवेतिभावः इदानींमुमुक्षुकर्तव्यमाह निवृत्ताःसर्वेषामिन्द्रियाणां गोचराविषयाःशब्दादयोय
स्मात्तादृशःसन् आत्मनःसच्चिदानन्दस्यानुसन्धानमेवपरमयनंप्राप्यंयस्यतथाविधोभवेत् अत्रेन्द्रियप्रत्याहारःकर्तव्यत्वेनोक्तस्तेनतत्पूर्वप्रा-
णायामाद्यर्थादाक्षिप्तम् ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रागिविरागिभेदेनकर्मणोकर्तव्यताकर्त्तव्यतेआहयावदिति माययाविद्ययाशरीरादिष्ववानात्मस्वात्मधीरहङ्कर्तेत्यादिरूपायावद्वर्ततेतावद्वि
धिवादकर्मणाम् विधिर्यजेतत्यादिश्रुतिर्वादः कर्तव्यतावोधकोयेषांकर्मणांविधेयोवशवर्त्तितत्कर्मकर्ताभवेत तदपगमेतुतदाखिलं जगन्नेतीति

याविच्छरीरादिषुमाययात्मधीस्तावद्विधेयोविधिवादकर्मणाम् ॥
नेतीतिवाक्यैरखिलं निषिद्ध्य तज्ज्ञात्वापरात्मानमथत्यजेत्क्रि
याः ॥ १७ ॥

वाक्यैः अथातआदेशोनेतिनेतिइत्यादिवाक्यैर्निषिध्य मिथ्यात्वेननिर्णीयताद्विलक्षणतयासत्यत्वेनपरमात्मस्वरूपंज्ञात्वाक्रियास्त्यजेत्निरू
पितमेतत् ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मविज्ञानेसत्यवश्यमविद्या निवर्ततइत्याह यदेति आत्मनिशुद्धेन्तःकरणेपरमात्मनईशस्यात्मनोजीवस्यचयोविभेदोमायान्तःकरण रूपोपाधिद्वयकृतोविभेदोभेदस्तस्यभेदकं नाशकंभास्वरंप्रकाशशीलंयद्विज्ञानमितरवृत्त्युपमर्दनपूर्वकंब्रह्माकाराऽखण्डाद्यावृत्तिर्यदाऽवभाति

यदापरात्मात्मविभेदभेदकंविज्ञानमात्मन्यवभाति भास्वरम् ॥
तदैवमायाप्रविलीयतेऽञ्जसासकारकाकारणमात्मसंसृतेः॥ १८॥

असंभावनादितिरस्कारेणोदेति तदैव सकारकाजन्मान्तरप्रापककर्मसहितामायातत्तज्जीवोपाधिभूताविद्याऽञ्जसाझटितिप्रविलीयतेनश्यति ननुतन्नाशेऽपिसंसारनाशःकथमतोमायाविशेषणम् आत्मसंसृतेःकारणंसंसारस्योपादानकारणमेवंचतन्नाशेकार्यनाशोभवत्येवेतिभावः १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं पुनर्दार्ढ्यायाह श्रुतीति तत्त्वमसीत्यादिश्रुतिरूपैःप्रमाणैस्तज्जनितज्ञानेन नाशितासाविद्याकथमपिकार्यकारिणीभविष्यतीति काकुरत्र सर्वथानेत्यर्थः असतःकार्यकारित्वासंभवादितिभावः पुनश्चतस्यानोद्भवइत्याह विज्ञानमात्रादिति अमलाशुद्धाद्वितीयतःद्विती

श्रुतिप्रमाणाभिर्विनाशिताचसाकथंभविष्यत्यपिकार्यकारिणी ॥
विज्ञानमात्रादमलाद्वितीयतस्तस्मादविद्यानपुनर्भविष्यति १९

यात्मविषयकाद्विज्ञानमात्रादितरासहकृतान्निदिध्यासनपरिपाकजज्ञानाद्यतोनष्टातस्मात्सापुनर्नभविष्यति रज्ज्वज्ञानमूलकस्य सर्पस्य रज्जुज्ञानेन निवृत्तस्ययथानपुनरुत्पत्तिरितिभावः ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्यायाइतरनिरपेक्षायाएवमोक्षकारणत्वमुक्तंयुक्तिपूर्वकंपुनःकथयतिश्रोतृदार्ढ्याय।यदीति। यदिनष्टातत्त्वज्ञाननाशिता सा न पुनः प्रसूयतेनोत्पद्यतेतदाकारणाभावादहंमतिःकथंभवेत्। कथमपिनभवेदित्यर्थः। तदभावाच्चतत्कालेकर्माभावइतिस्वफलजननेसास्वतन्त्राइ

यदिस्मनष्टा नपुनःप्रसूयते कर्ताऽहमस्येति मतिः कथं भवेत् ॥ तस्मात्स्वतन्त्रा न किमप्यपेक्षते विद्या विमोक्षाय विभाति केवला ॥ २० ॥

तरनिरपेक्षैवनाकिमप्यपेक्षते द्वितीयस्यासंभवात् अतः केवलाऽसहायैवविमोक्षायविभातितत्फलिकाभवतीत्यर्थः ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अत्रार्थे श्रुतिरपिप्रमाणमित्याह सेति साप्रसिद्धा नकर्मणानप्रजयाधनेनत्यागेनैके अमृतत्वमानशुः इत्यादिकातैत्तिरीयश्रुतिःप्रशस्तानामर्थवादैःप्राशस्त्येनबोधितानामपिकर्मणांन्यासंत्यागंसादरंस्फुटमाह नतुकर्मसमुच्चयमित्यर्थः तथावाजिनां वाजसनेयिनाम् एतावदरेखल्वमृतत्वम् इत्यादिका ज्ञानंविमोक्षायसाधनं नकर्मेत्येतदाह ॥ २१ ॥

सातैत्तिरीयश्रुतिराहसादरंन्यासंप्रशस्ताखिलकर्मणां स्फुटम् ॥
एतावदित्याहचवाजिनांश्रुतिर्ज्ञानंविमोक्षायनकर्मसाधनम् २१

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहङ्कारत्यागरूपकारणवैषम्यात् क्रियाज्ञानयोर्वैषम्यमुक्त्वा फलमयुक्तमपिवैषम्यमाह विद्येति हेसमुच्चयवादिन् त्वयाक्रतुरग्निष्टोमादिर्वि द्यासमत्वेनदर्शितः परन्तुसमोदृष्टान्तोनोदाहृतः अनेनक्रतुर्विद्यासमः श्रुतिबोधितकर्तव्यताकत्वादित्यनुमानन्निरस्तम् दृष्टान्ताभावा-व अन्वय्येवानुमानन्नव्यातिरेकीतिभावः एतच्चाकरेविस्तरेणप्रपञ्चितम् ननुविद्याकर्मणीसमे एकफलत्वाच्चक्रदण्डादिवदित्यनुमान-

विद्या समत्वेनतु दर्शितस्त्वया क्रतुर्नदृष्टान्त उदाहृतः समः ॥
फलैःपृथक्त्वाद्बहुकारकैः क्रतुःसंसाध्यतेज्ञानमतोविपर्ययम् २२

मितिचेत्तत्राह फलैः पृथक्त्वात षष्ठ्यर्थेतृतीया फलानांभेदादित्यर्थः एवंचस्वरूपासिद्धोहेतुरितिभावः समानकारकत्वमपिहेतुर्नेत्याह क्रतुर्बहुभिः कारकैरहंममताभिमानरूपैरान्तरैर्बाह्यैश्चदेशकालादिनियमैश्चसाध्यते ज्ञानन्त्वतोविपर्ययवदतोनतयोः साम्यमितिभावः २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वकरणेप्रत्यवायभिया कर्मकार्यमितिचेन्नेत्याह सप्रत्यवायइति कर्मत्यागेनाहिनिश्चयेनाहंप्रत्यवायसंहितोभविष्यामीत्येवंशुद्धात्मानि-
अनात्मधर्मस्यधीरप्रज्ञस्यतत्त्वज्ञानविकलस्यप्रसिद्धा नतुतत्त्वदर्शिनः तस्याहंबुद्धेरभावात् पापादेरनात्मधर्मतानिश्चयाच्च तस्माद्बुधैःकर्म

स प्रत्यवायोह्यहमित्यनात्मधीरज्ञप्रसिद्धा नतु तत्वदर्शिनः ॥
तस्माद्बुधैस्त्याज्यमपि क्रियात्माभिर्विधानतःकर्मविधि प्रका
शितम् ॥ २३ ॥

क्रियात्मभिः षष्ठ्यर्थेतृतीया क्रियाफलसक्तचित्तानां विधानतोविधानेनेतिकर्तव्यतयायुक्तंकर्म विधिभिरवश्यकर्तव्यतयाबोधितमपि·
त्याज्यमित्यर्थः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविरक्तस्यकार्यमाह। श्रद्धेति । गुरुशास्त्रयोर्विश्वासःश्रद्धातदन्वितोबुभुत्सुःशुद्धमानसोऽपि निष्कामकर्मानुष्ठानाच्छुद्धमानसश्चगुरोः प्रसादाल्लब्धतत्त्वमसीतिवाक्यतः श्रुतमात्मजीवयोरैकात्म्यंविज्ञाय मनननिदिध्यासनपरिपाकाभ्यांसाक्षात्कृत्य। चएवार्थः । साक्षा

श्रद्धान्वितस्तत्त्वमसीतिवाक्यतो गुरोःप्रसादादपिशुद्धमानसः॥
विज्ञायचैकात्म्यमथात्मजीवयोः सुखी भवेन्मेरुरिवाप्रकम्पनः
॥ २४ ॥

त्कृत्यैवसुखी भवेत्। सकलदुःखहीनोभवेदित्यर्थः। अप्रकम्पनःविषयाभिलाषाक्षोभितान्तःकरणः ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

महावाक्यंविवरीतुंवाक्यार्थस्यपदार्थबोधपूर्वकत्वमाह । आदाविति । विधानतःश्रमप्रमादराहित्येनवाक्यार्थविज्ञानस्यविधावुत्पत्तौआ
दौप्रथमंमुख्यमितियावत्। पदार्थावगतिःकारणम्। हिप्रसिद्धं तस्यपदत्रयंतत्त्वमसीति । तत्रतत्पदार्थःपरमात्मासर्वज्ञत्वादिगुणः त्वं

आदौ पदार्थावगतिर्हि कारणं वाक्यार्थविज्ञानविधौ विधानतः ॥
तत्त्वंपदार्थौ परमात्मजीवकावसीति चैकात्म्यमथानयोर्भवेत्
॥ २५ ॥

पदार्थोजीवःअनयोस्तत्त्वंपदार्थयोरैकात्म्यंतद्बोधकमसीतिपदम् ॥ २५ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुसर्वज्ञत्वादिगुणस्येशस्यकिञ्चिज्ज्ञत्वधर्मवताजीवेनैकात्म्यं विरुद्धमित्याशङ्क्याह । प्रत्यगिति । अहंबुद्धिवेद्यत्वंप्रत्यक्त्वंजीवधर्मः परोक्षत्वमीशधर्मस्तदादिधर्मकृतमात्मनोःपरमात्मजीवात्मनोर्विरोधंविहायत्यक्त्वातयोः संशोधितामुयुक्तिभिःसम्यग्विचारितांतत्त्वंपदाभ्यांशक्त्यभावेऽपिवक्ष्यमाणप्रकारयालक्षणयालक्षितां ज्ञातांचिदात्मतां संगृह्य तत्त्वंपदोपास्थानिविषयांकृत्वा स्वमात्मानंतथाज्ञात्वाऽथएकात्मज्ञानानन्तरमद्वयोभवेत् । चित्स्वरूपतांप्राप्तइवभवेत् । पूर्वमपितत्स्वरूपएवविस्मृतकण्ठचामीकरन्यायेनचतत्प्राप्तिरितउक्तवत्युक्तम् ।

प्रत्यक्परोक्षादिविरोधमात्मनोर्विहायसंगृह्यतयोश्चिदात्मताम् ॥
संशोधितांलक्षणयाचलक्षितांज्ञात्वास्वमात्मानमथाद्वयोभवेत्
॥ २६ ॥

अयंभावः तत्त्वंपदयोर्द्वावर्थौ वाच्योलक्ष्यश्च तत्रतत्पदस्यमायोपाधिःसर्वज्ञत्वादिविशिष्टोवाच्यः त्वंपदस्यापिकिञ्चिज्ज्ञत्वादिविशिष्टो मायाकार्याविद्योपाधिरविद्यावदन्तःकरणोपाधिर्वाच्यः उभयोरपिविशेषणांशत्यागेनशुद्धाश्चिदात्मालक्ष्यः तत्रवाच्ययोर्विरुद्धधर्मकत्वादैक्यासंभवेऽपिलक्ष्ययोरैक्यंनिर्बाधमेवेति ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तलक्षणास्वरूपमाह । एकात्मकत्वादिति जहतीलक्षणाजहत्स्वार्थलक्षणायथागङ्गायांघोषइत्यत्रगङ्गापदार्थस्यप्रवाहस्यघोषाधारता
नुपपत्त्यासर्वथातत्परित्यागेनतीररूपार्थलक्षणा साप्रकृते न एकात्मत्वात् । विशेष्यांशस्यैकत्वात्सर्वथास्वार्थत्यागाभावात् । तथाज
हल्लक्षणताजहत्स्वार्थलक्षणावत्त्वमपिअत्रनसंभवति । यथाकाकेभ्योदधिरक्ष्यतामित्यादौकाकपदस्यस्वार्थात्यागेनैवदध्युपघातकेलक्षणा
सापिन । विरोधतःविशेषणत्यागेनसर्वथास्वार्थत्यागाभावात् । अतोभागलक्षणाजहदजहल्लक्षणायुज्यते । अदोषतःपूर्वोक्तदोषाभावात्

एकात्मकत्वाज्जहती न सम्भवेत्तथाऽजहल्लक्षणता विरोधतः॥
सोऽयंपदार्थाविवभागलक्षणायुज्येततत्त्वंपदयोरदोषतः॥२७॥

विशेष्यांशस्यात्यागाद्विशेषणांशस्यत्यागाच्च । तत्रदृष्टान्तः । सोऽयंपदार्थाविव । यथासोऽयंदेवदत्तइत्यत्रतद्देशादिविशिष्टोऽतीतानुभव
विषयोवातत्पदार्थः एतद्देशादिविशिष्टोऽनुभूयमानोवेदंशब्दार्थः । तयोश्चाविरुद्धविशेषणकत्वादैक्यासंभवेनदेशादिरूपविशेषणत्यागेना
नुभवगतातीतत्वादिविशेषणत्यागेनवालक्षणयैक्यंतद्वदितिभावः ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथत्याज्यत्वायजीवोपाधिमाह । रसादीति । रसापृथ्वीआदिर्येषांतानिपञ्चीकृतानियानिभूतानितेभ्यःसंभवोयस्यनत् । पञ्चीकरणंचे
त्थम् एकैकंभूतंद्विधाविभज्यतत्रैकंभागंचतुर्धाविभज्यतेषांभागानांस्वेतरभूतचतुष्टयार्धभागचतुष्टयेसंयोजनेएकैकंभूतंपञ्चात्मकंभवतिभा

रसादिपञ्चीकृतभूतसंभवंभोगालयंदुःखसुखादिकर्मणाम् ॥ शरी
रमाद्यन्तवदादिकर्मजंमायामयंस्थूलमुपाधिमात्मनः ॥ २८ ॥

गाधिक्याच्चप्रातिस्विकतयाभूगादिव्यवहारोऽपि । सुखदुःखयोरादीनियानिकर्माणितेषांभोगस्तत्कर्मजसुखदुःखानुभवस्तस्यालयमाश्र
यभूतमाद्यन्तवत्उत्पत्तिनाशयोगि आदिकर्मजंप्राग्भवीयकर्मजन्यंमायामयंपरम्परयामायाविकारः तद्विकारभूतविकारत्वात् । एतच्छरी
रमात्मनःस्थूलमुपाधिंवदन्तीतिशेषः ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसूक्ष्मोपाधिमाह। सूक्ष्ममिति । बुधाःअन्यतस्थूलशरीरविलक्षणंशरीरंलिङ्गदेहाख्यमात्मनउपाधिंविदुः । तत्स्वरूपमाह। सूक्ष्मंचक्षु-
राद्यविषयः मनोबुद्धिदशेन्द्रियैःप्राणैश्चयुतम् सङ्कल्पात्मकंमनः निश्चयात्मिकाबुद्धिः घ्राणरसनाचक्षुस्त्वक्श्रोत्रेतिपञ्चज्ञानेन्द्रियाणि वा-

सूक्ष्मंमनोबुद्धिदशेन्द्रियैर्युतंप्राणैरपञ्चीकृतभूतसंभवम् ॥ भोक्तुः सुखादेरनुसाधनंभवेच्छरीरमन्याद्विदुरात्मनोबुधाः ॥ २९ ॥

क्पाणिपादपायूपस्थानिकर्मेन्द्रियाणि प्राणापानव्यानोदानसमानाश्चप्राणास्तैर्युतमेतत्सप्तदशसमुदायात्मकम्। तदाधारभूतान्याह ।अप
ञ्चीकृतभूतसंभवंतेभ्यउत्पन्नमतएवादृश्यम् ।तथाभोक्तुःसुखादेःसुखदुःखाद्यनुभवस्यानुसाधनम् स्थूलशरीरस्यतदनुगतस्यैवभोगसाधनत्व
मितिभावः । एतद्वियोगेनैवमरणव्यवहारइतिबोध्यम् ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिजीवोपाधिद्वयमुक्त्वाईशोपाधिमाह । अनादीति । अनादि उत्पत्तिहीनम् । नानाविधपरिणामशालितयापरिणामरूपेणनश्वरामिति अनादित्वमात्रेोक्त्यासूचितम् । अनिर्वाच्यम् सत्त्वासत्त्वाभ्यांनिर्वक्तुमशक्यम् कारणंसकलप्रपञ्चस्यजनकम् ईदृशीमायातुब्रह्मणःपरमी-

अनाद्यनिर्वाच्यमपीहकारणं मायाप्रधानंतुपरंशरीरकम् ॥ उपाधिभेदात्तुयतःपृथक्स्थितं स्वात्मानमात्मन्यवधारयेत्क्रमात् ॥ ३० ॥

श्वरव्यवहारसंपादकत्वादुत्कृष्टंप्रधानंशरीरकम् । स्वार्थेकः । एवमुपाधिभेदादेकमेवचैतन्यंयतः पृथक्स्थितंजीवईशइतिभेदबुद्धिविषय मतोलक्षणयोपाधिपरित्यागेनस्वात्मानमात्मानिअवधारयेदभेदेनजानीयात् । क्रमाच्छ्रवणमनननिदिध्यासनक्रमेणेत्यर्थः ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवाक्यार्थविचारफलमाह । कोशेष्विति । आनन्दमयस्य ब्रह्मत्वेअन्नमयप्राणमयमनोमयविज्ञानमयेषुचतुर्षुकोशेषुतत्तत्सङ्गात्तत्तदाकृतिर्विभाति यथाजपादिसङ्गात्स्फटिकोऽनेकाकृतिर्भाति । आनन्दमयस्यापि जीवत्ववादिनातुतेनसहैपञ्चसु कोशेष्वितिबोध्यम् । अस्मि-

कोशेषुपञ्चस्वपितत्तदाकृतिर्विभातिसङ्गात्स्फटिकोपलोयथा ॥
असङ्गरूपोऽयमजोयतोऽद्वयोविज्ञायतेऽस्मिन्परितोविचारि-
ते ॥ ३१ ॥

न्महावाक्येपरितोविचारितेसम्यग्विचारितेसत्ययमात्माऽसङ्गरूपःअन्नमयादिभिःसङ्गरहितः । असङ्गोनहिसज्जते । इतिश्रुतेः । अजोऽद्व-यश्चविज्ञायते । स्थूलोऽहमित्यादिस्त्वज्ञस्यतत्तत्कोशप्रसङ्गात्प्रतीतिःस्फटिकवत् तत्त्वज्ञस्यतुनतथाप्रतीतिरितिभावः । एवंचतत्तदुपाधिकृततत्तद्रूपताप्रतीतिनिरासएव विचारफलमितिभावः ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जाग्रदाद्यवस्थाऽपि बुद्धेर्धर्मोनात्मधर्मइत्याह । बुद्धेरिति । इहआत्मनिस्वप्नादिभेदेन जाग्रत्स्वप्नसुषुप्तिभेदेन यात्रिधावृत्तिर्दृश्यतेसाऽपि गुणत्रयात्मनः सत्त्वरजस्तमोरूपगुणत्रयस्वरूपाया बुद्धेर्धर्मः । उक्तावस्थात्रयस्योक्तमूलकत्वात् । एतदवस्थात्रयस्यास्मिन्नवस्थात्रय-साक्षिणि आत्मनि भानं मृषा बुद्ध्यध्यास निबन्धनं न तु वास्तव मित्यर्थः । अन्योऽन्यतोव्यभिचारतस्तस्यावस्था त्रयस्यस्व रूपतो

बुद्धेस्त्रिधा वृत्तिरपीह दृश्यते स्वप्नादि भेदेन गुणत्रयात्मनः ॥ अन्योऽन्यतोऽस्मिन्व्यभिचारतोमृषा नित्ये परे ब्रह्मणि केवले शिवे ॥ ३२ ॥

मृषात्वात्तज्ज्ञानस्य मृषात्वमेव । स्वप्नकाले जाग्रत्सुषुप्त्योरभावात् । जाग्रतिइतरद्वयस्याभावात सुषुप्तावितरयोरभावात्परस्परं व्यभिचारोबोध्यः आत्मनस्तद्रनाश्रयत्वंविशेषणैराह । नित्येउत्पत्तिनाशशून्येपरेगुणत्रयातीते ब्रह्मणिव्यापकेकेवलेऽसङ्गेशिवआनन्दरूपे एवंभूतेसदेकरसेपरस्परव्यभिचारधर्माभानमसंभवीति भावः ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसाऽन्यत्वायसंसारमूलभूतांवृत्तिमाह । देहेति । एषांसङ्घातइतरेतराध्यासविषयात् अजस्रंयावाद्धियो बुद्धेर्वृत्तिस्तमोमूलतयाऽज्ञलक्षणाऽज्ञत्वज्ञापिका यावत्परिवर्तते तावद्भवोद्भवःसंसारोद्भवोभवेत् । तमःपदंरजसोऽप्युपलक्षणम् । रजस्तमःप्रधानाबुद्धिः संसारहेतु

देहेन्द्रियप्राण मनश्चिदात्मनां सङ्घादजस्रं परिवर्तते धियः ॥
वृत्तिस्तमोमूलतयाऽज्ञलक्षणा यावद्भवेत्तावदसौ भवोद्भवः॥३३॥

त्वात्सर्वथासाऽन्येति भावः ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत महावाक्यविचारस्य कर्तव्यमाह । नेतीति । अथात आदेशोनेतिनेति इति प्रमाणेननिराकृतं मिथ्यात्वेनगृहीतमखिलंजगत्येनसः ततोहृदामस्त्वप्रधानेनमनसासम्यगास्वादितं चिल्लक्षणंघनामृतंदुःखासंभिन्नंसुखंयेनसः । स्वर्गादितुपरिणामदुःखत्वात्तत्संभिन्नमेव । एवंभूतोऽशेषंजगद्देहेन्द्रियादिदृश्यसमूहंत्यजेत् हानोपादानबुद्धिविषयंनकुर्यात् । किन्तुदासीनस्तत्रभवेत् । ननुदेहेन्द्रियादिभिरेवतज्ज्ञान

नेतिप्रमाणेन निराकृताखिलो हृदासमास्वादितचिद्घनामृतः ॥ त्यजेदशेषं जगदात्तसद्रसं पीत्वा यथाऽम्भः प्रजहाति तत्फलम् ॥ ३४ ॥

लाभात्कथमुपजीव्यस्यत्यागइत्याशङ्क्यदृष्टान्तदर्शनेनपरिहरति । यथातृषावानआत्तः सद्रसोमाधुर्यंयेनतादृशं नारिकेलनारङ्गादि फलान्तर्वर्त्यम्भःपीत्वा तत्स्थानभूतंतत्फलं जहाति तत्रोदासीनोभवति तद्वत्सर्वदृश्यसारांशोब्रह्मतल्लाभसतिनिःसारंदृश्यंनोपादेयंनापिहेयमितिभावः । यतोभयादिसंभावनातद्धेयमित्युच्यते ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

इतरस्यानित्यत्वेनतत्रवैराग्यार्थमात्मनएवनित्यत्वमाह । कदाचिदिति । कदापीत्यर्थः । अनवः उत्पत्त्यनन्तरंविद्यमानोहिनवः । तेन जन्मानन्तरास्तित्वंव्यावर्तितं नवत्वाभावेनैवजीर्णत्वाभावादवस्थान्तरापत्तिरूप परिणामोऽपिनिरस्तः ।अनेनअस्तिजायतेवर्द्धतेविपरिणमतेऽपक्षीयते नश्यतीति षड्भाव विकार राहित्यमुक्तम् । एवंचैतद्भिन्नं सर्वमुक्तषड्भावविकारवत्त्वादनित्यमिति ततोविरज्येतेतिबोधित-

कदाचि दात्मान मृतोनजायते नक्षीयते नापिविवर्धतेऽनवः ॥
निरस्तसर्वातिशयःसुखात्मकःस्वयम्प्रभःसर्वगतोऽयमद्वयः ३५

म् । यतऽईदृशोऽतएवनिरस्तः सर्वस्यदेहेन्द्रियादेरतिशयोमहत्त्वं येनस्वलाभात्सः यल्लाभान्नापरोलाभइतिःश्रुतेः यतःसुखात्मकः आनन्द स्वरूपः स्वयम्प्रभःस्वप्रकाशकश्च देहेन्द्रियादिस्तुदुःखस्वरूपः परप्रकाश्यश्च । यस्यभासासर्वमिदंविभाति । इतिश्रुतेः । सर्वगतोव्यापकः अयमहंबुद्धिविषयःप्रत्यगात्माऽपिअद्वयः उक्ताद्वयब्रह्मस्वरूपएव । नततोऽतिरिक्तइतिभावः । अयमात्माब्रह्म । इतिश्रुतेः ॥ ॥ ३५ ॥

CC-0. In Public Domain. Digitization by eGangotri

ननुएवंविधेविकारशून्येआत्मनिजन्ममरणादिप्रवाहरूपसंसारभानंकथमितिशङ्कते। एवंविधेइति।दुःखमयःदुःखप्रचुरः।उत्तरयति। अज्ञानतइ
तिअज्ञानमूलकोयोध्यासोदेहान्तःकरणादौअहंममेत्यध्यासस्तद्वशात्। एवंचभ्रान्तिरूपातत्प्रतीतिरितिभावः। नन्वेवंकथंतस्यसंसारस्यनि

एवंविधे ज्ञानमये सुखात्मके कथंभवो दुःखमयःप्रतीयते ॥
अज्ञानतोऽध्यासवशात्प्रकाशतेज्ञानेविलीयेत विरोधतःक्षणात्॥
॥ ३६ ॥

वृत्तिस्तत्राह। ज्ञानेति। आविर्भूतइतिशेषः। ज्ञानस्याज्ञानविरोधित्वात्तदुत्पत्तिक्षणएवकारणभूताज्ञाननाशात्तत्कार्यसंसारस्यापि वि
लयइत्यर्थः। यथारज्जुज्ञानेनरज्जौसर्पस्यलयइत्यर्थः ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाध्यासलक्षणमाह । यदन्य दिति । यदन्यत्सर्पादिकमन्यत्ररज्ज्वादौ भ्रमात्भ्रमजनकाद्दोषाद्विभाव्यतेविज्ञायतेअमुंविपश्चितोविद्वांसोऽध्यासइत्याहुः । यथाऽसर्पभूतेरज्ज्वादौ अहिविभावनंसर्पारोपोरज्ज्वबुद्धिमूलकस्तद्वदीश्वरेऽपिजगद्देहादिसंसारात्मकंसर्वंविभाव्य-

यदन्यदन्यत्र विभाव्यते भ्रमादध्यासमित्याहुरमुंविपश्चितः॥
असर्पभूतेऽहिविभावनंयथा रज्ज्वादिकेतद्वदपीश्वरेजगत्॥३७॥

तेआत्मज्ञानाभावाद्यथार्थतयाज्ञायते ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनि जगज्ज्ञाने कीदृशोऽध्यासो निमित्तं तदाह विकल्पेति सर्वविकल्पकारणमायारहिते वस्तुतस्तत्सङ्गरहिते चिदात्मके चित्स्वरूपे सर्वकारणे निरामये दुःखासंभिन्नानन्दमये केवलं सर्वविकारशून्ये परे दृश्यविलक्षणे ब्रह्मणि व्यापके आत्मनि प्रथममहङ्कारः कल्पितः स एवाध्यासः ।

विकल्पमायारहिते चिदात्मके ऽहङ्कार एष प्रथमः प्रकल्पितः ॥
अध्यास एवात्मनि सर्वकारणे निरामये ब्रह्मणि केवले परे ॥ ३८ ॥

अहंबुद्ध्यात्मकोऽध्यास एव सर्वसंसारकारणमिति भावः ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बुद्धिनिष्ठएवसंसारोनत्वात्मनिष्ठइत्यत्रान्वयव्यतिरेकौप्रमाणयति। इच्छादीति। परेसर्वसाक्षिणिआत्मनिसंसृतिहेतवःभासमानसंसारकारणं सदाकालत्रयेऽपिइच्छादिरागादिसुखादिधार्मिकाः इच्छापक्षेरागद्वेषौसुखदुःखंइत्येवमादिद्वन्द्वधार्मिकाःधियएवधीषुसतीषुसंसारइत्यन्वयमु

इच्छादिरागादिसुखादिधार्मिकाः सदा धियः संसृतिहेतवः परे ॥
यस्मात्प्रसुप्तौतदभावतःपरः सुखस्वरूपेणविभाव्यतेहिनः ॥ ३९ ॥

क्त्वातद्व्यतिरेकमाहयस्मात्कारणात्प्रसुप्तौतदभावात् धीवृत्त्यभावात् परआत्मानोऽस्माभिःतृतीयार्थेषुषष्ठी। सुखरूपेणस्वस्वरूपमात्रेणाविभा व्यतेनिश्चीयते नतु संसारित्वेनेतिभावः सुप्तोत्थितस्तुसुखमहमस्वाप्समितिप्रत्यभिज्ञानुभवात्तदात्मस्वरूपनिश्चयोऽस्तीतितात्पर्यम् ॥ ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ पुनस्तत्त्वं पदार्थस्वरूपमाह ।अनादीति।अनादिर्याऽविद्यातत उद्भवो यस्या बुद्धेरन्तःकरणस्यतत्रविम्बितःप्रतिबिम्बितश्चितःप्रकाशः
सजीवइतीर्यते आत्मापगतस्माधियः साक्षितयाधीधर्मासङ्गेनैवपृथक्स्थितः । अन्तर्यामितयेत्यर्थः जीवोऽहंसुखीत्यादिप्रकारेणान्तःकर

अनाद्यविद्योद्भवबुद्धिबिम्बितोजीवप्रकाशोऽयमितीर्यते चितः ॥
आत्माधियः साक्षितया पृथक् स्थितो बुद्ध्या परिच्छिन्नपरः
सएव हि ॥ ४० ॥

णधर्माध्यासवानपरमात्मातु साक्षितयासर्वत्रविद्यमानोऽपिनतथेतिभावः। अतएवबुद्ध्यापरिच्छिन्नपरः बुद्धिलक्षणपरिच्छेदरहितःअतएव
परः । एवंचज्ञानेनप्रतिबिम्वाधार विलयप्रतिबिम्बस्यविलयात्सजीवः सएवपरमात्मैवहिप्रसिद्धं सइत्यस्यचात्रार्त्तबोध्या ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ बुद्ध्यात्मनोःपरस्पराध्यासवशात् परस्परधर्मभानमितिदार्ढ्यायपुनराह । चिद्बिम्बेति । चिदात्मचेतसोरन्योन्याध्यासवशात् परस्परतादात्म्यारोपाज्जडाजडत्वंप्रतीयते । चेतसोवृत्तीनांज्ञानत्वं जीवात्मनोजडत्वंप्रतीयते । अतएवज्ञानाश्रयआत्मेति चितएवताकिंकव्यवहारः । जीवात्मनिजडात्मनिजडात्माकथ्यते बुधैरितिस्मार्तव्यवहारश्च । अत्रहेतुः । चिदित्यादि । चिद्बिम्बस्यसाचिदाभासः अ

चिद्बिम्बसाक्ष्यात्मधियांप्रसङ्गतस्त्वेकत्रवासादनलाक्तलोहवत् ॥
अन्योऽन्यमध्यासवशात्प्रतीयते जडाजडत्वंचचिदात्मचेतसोः

॥ ४१ ॥

क्षिःसहितः साक्षःसेन्द्रियः सचासावात्मामनःधीरन्तःकरणंतेषांप्रकृष्टसङ्गादतिसान्निकर्षादध्यासइत्यर्थः । अनलाक्तलोहवत् अग्नितप्तलोहपिण्डवत् अत्रदृष्टान्तः । अग्निधर्मोदाहकत्वं लोहधर्मश्चवर्तुलत्वाद्यनलेभासते । तत्रहेतुरेकत्रवासात् परस्पराविभागेनवृत्तेरित्यर्थः । तद्वदेतयोरपि परस्परधर्माध्यासइत्यर्थः ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं दार्ढ्यायपुनराह । गुरोरिति । वेदवाक्यतइत्यनेन श्रवणंगुरोःसकाशादपि । ततश्चानेनमननमुक्तम् । ताभ्यांसञ्जातोविद्यया ज्ञानरूपस्यात्मनोऽनुभवोयस्यसः । अनेनकृतनिदिध्यासनइत्यर्थः । तं चिदानन्दस्वरूपं स्वात्मानमुपाधिवर्जितं रहितोपाधिधर्ममात्मस्थं

गुरोःसकाशादपिवेदवाक्यतः सञ्जातविद्यानुभवोनिरीक्ष्य तम् ।
स्वात्मानमात्मस्थमुपाधिवर्जितं त्यजेदशेषं जडमात्मगोचरम् ॥ ४२ ॥

हृत्स्थंनिरीक्ष्य अपरोक्षीकृत्याशेषंजडं दृश्यंत्यजेत् । तत्रोदासीनोभवेदिति भावः ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ज्ञेयंनिरुपाधिकं स्वरूपंश्लोकद्वयेनाह प्रकाशेति अहंप्रकाशरूपः स्वप्रकाशः परप्रकाशहीनः परप्रकाशरूपोयथाघटादिः अजोजन्मादि
हीनः अद्वयःसजातीयद्वितीयरहितः असकृद्विभातः सकृदपिपरेणभासकान्तरेणप्रकाशितः सकृद्विभातः नसकृद्विभातोसकृद्विभातः नत

प्रकाशरूपोऽहमजोऽहमद्वयोऽसकृद्विभातोऽहमतीवनिर्मलः ॥
विशुद्धविज्ञानघनोनिरामयःसम्पूर्णआनन्दमयोऽहमक्रियः॥४३॥

त्रसूर्योभातिनचन्द्रतारकमितिश्रुतेः नतद्भासयतेसूर्यइतिस्मृतेश्च अतीवनिर्मलः मायाकृतावरणविक्षेपरहितः विशुद्धविज्ञानघनः विशुद्धचि
देकरसः निरामयःकर्तृत्वाभिमानरहितः सम्पूर्णःदेशकालपरिच्छेदहीनः आनन्दमयः आनन्दरूपः स्वार्थेमयट् अक्रियः परिणामहीनः
॥ ४३ ॥

CC-0. In Public Domain. Digitization by eGangotri

सदैवेति अहंसदैवकालत्रयेऽपिमुक्तःसर्वधर्मरहितः अचिन्त्यशक्तिमान यः परमात्मा अतिन्द्रियज्ञानमूइन्द्रियातिरिक्तज्ञानरूपःयतोवाचो निवर्त्तन्ते अप्राप्यमनसासहइतिश्रुतः अविक्रियात्मकोऽपरिणामी अनन्तपारःअन्तःकालतःपारःपरन्तीरन्तावविद्यमानौ यस्य तंनदेश

सदैवमुक्तोऽहमचिन्त्यशक्तिमानतीन्द्रियज्ञानमविक्रियात्मकः॥
अनन्तपारोऽहमहर्निशंबुधैर्विभावितोऽहंहृदिवेदवादिभिः ॥४४॥

कालपरिच्छेदहीनः ईदृशोयःपरमात्माबुधैर्हृदि अहर्निशंविभावितः सोऽहमित्यर्थः ॥ ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंभावनायाःफलमाह एवमिति उक्तरीत्यासदाआत्मानं अखण्डितात्मनाविषयानाकृष्टचित्तेन विचारमाणम्यध्यायतः धातूनामनेकार्थ स॰
त्वात् चरमाणएवचारमाणःस्वार्थेऽण् विशुद्धभावनाब्रह्माकारान्तः करणवृत्तिरुदेतीतिशेषः सात्वोदिताकारकैर्देहान्तरप्रापककर्मभिः स

एवंसदात्मानमखण्डितात्मनाविचारमाणस्यविशुद्धभावना ॥
हन्यादविद्यामचिरेणकारकैरसायनंयद्वदुपासितंरुजः ॥ ४५ ॥

हाविद्यामचिरेणशीघ्रमेवहन्यात् यथापामितंसेवितंरसायनं रुजोहन्यात्तद्वत् ॥ ४५ ॥ ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रध्यानेइतिकर्तव्यतामाह विविक्तइति निर्जनइत्यर्थः आसीनोयथोचितपद्मासनाद्युपविष्टः उपारतेन्द्रियः तेनशमदमादिसम्पन्नः विनि र्जितात्माप्राणायामादिभिर्जितान्तःकरणः अतएवविमलान्तराशयोविशुद्धचित्तः विज्ञानदृक्विज्ञानएवदृक्भानंयस्यसः द्रष्टृदृश्यभा

विविक्तआसीनउपारतेन्द्रियोविनिर्जितात्माविमलान्तराशयः॥
विभावयेदेकमनन्यसाधनोविज्ञानदृक्केवलआत्मसंस्थितः॥४६

नरहितः अनेननिर्विकल्पकसमाधिरुक्तः अनन्यसाधनः तत्त्वज्ञानातिरिक्तमुक्तिसाधनास्तित्वभ्रमरहितः केवलोऽसङ्गःआत्मसंस्थितः आत्मन्येवसंस्थासमाप्तिः सञ्जातायस्यसतेन नकदापिविषयान्तरसञ्चारवांश्चित्तः विभावयेत् ध्यायेत् ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंच यदेतत्भूतंभाविष्यद्वर्तमानं विश्वंपरमात्मादर्शनंभासकोयस्यतत् तस्यभासासर्वमिदंविभातीति श्रुतेः तत्सर्वकारणेमायासान्निधाना
त्सर्वोपादानत्वेनाभिमतेआत्मनिविलापयेत् उपादानसत्ताव्यतिरेकेणकार्यसत्तांनपश्येत् तादृशस्यलक्षणमाह सम्पूर्णः अवाप्तसमस्तका

विश्वंयदेतत्परमात्मदर्शनं विलापयेदात्मनि सर्वकारणे ॥
पूर्णश्चिदानन्दमयोऽवतिष्ठते न वेद बाह्यं न च किञ्चिदान्त
रम् ॥ ४७ ॥

मः तस्यकाम्याभावात् चिदानन्दमयः तद्रूपोऽवतिष्ठते बाह्यमान्तरंच दृश्यंनजानाति सर्वत्रब्रह्मदर्शनादिति भावः ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाधिसिद्धेः पूर्वंयत्कर्तव्यंतदाह । पूर्वमिति । समाधेः सकलविषयव्यासङ्गनिवृत्तिपूर्वकं ब्रह्माकारवृत्तिः समाधिस्ततः पूर्वमखिलंस चराचरंजगत् ओङ्कारमात्रं विचिन्तयेत् । ओङ्कारोमीयतेऽ नयेतिमात्रा प्रमाणं बोधकत्वेन परिच्छेदकोयस्यतथाजानीयात् । तदेवविवृ

पूर्वं समाधे रखिलं विचिन्तये दोङ्कारमात्रं सचराचरं जगत् ॥
तदेव वाच्यं प्रणवो हि वाचको विभाव्यते ज्ञानवशान्न बो-
धतः ॥ ४८ ॥

णोति तदेवेति । जगदेवेत्यर्थः । प्रणवोवाचकोविभाव्यतेएतत्ताहिप्रसिद्ध इत्यर्थः । इयंभावनाज्ञानवशादेवनबोधकः । बोधोनिर्विशेषब्रह्मसा क्षात्कारस्तद्बृत्तरंनेत्यर्थः । तस्यसर्ववृत्त्युपमर्दकत्वात् ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमर्थंविवृणोति । अकारेति । अकारसञ्ज्ञस्तद्वाच्यःपुरुषोहिविश्वकोविश्वएवविश्वकः विश्वशब्देनपरिभाषितःअयंजाग्रत्साक्षीविराट् ततःस्वप्नसाक्षीतैजसःतेनपदेनपरिभाषितःलिङ्गदेहाभिमानीहिरण्यगर्भउकारकः उकारप्रतिपाद्यईर्यते । ततः सुषुप्तिसाक्षीप्राज्ञपदवाच्यो

अकारसञ्ज्ञः पुरुषो हि विश्वको ह्युकारकस्तैजसईर्यते क्रमात्
प्राज्ञो मकारः परिपठ्यतेऽखिलैः समाधि पूर्वं न तु तत्त्वतो
भवेत् ॥ ४९ ॥

मायोपाधिकोमकारस्तद्वाच्यः परिपठ्यतेऽखिलैर्वेदैः । इयंभावनासमाधिपूर्वंसमाधेःपूर्वमेव नतत्त्वतः तत्त्वसाक्षात्कारेसतिनभवेत् । सर्व स्यब्रह्मणिप्रविलयात् ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविलापन प्रकारमाहद्वाभ्याम् । विश्वंत्विति । उकारमध्ये बहुधाव्यवस्थितं स्थूलदेहनिबंधनं स्थूलदेहाभिमानेन स्थितं विश्वम्पुरुषं तद्वाचकमकारम् च विलापयेत् । तुश्चार्थे । विलीनम्भावयेत् ततस्तैजसं लिङ्गदेहाभिमानिनम् पुरुषं तद्वाचकं प्रणवस्य द्वितीय वर्णमुकारं वि-

विश्वं त्वकारं पुरुषं विलापयेदुकारमध्येबहुधा व्यवस्थितम् ।
ततो मकारे प्रविलाप्यतैजसं द्वितीयवर्णं प्रणवस्य चान्तिमे ॥५०॥

लीनोविश्वकम्मकारे विलाप्याविलीनम्भावयित्वा ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततस्तादृशंमकारंतद्वाच्यंप्राज्ञंचकारणंकारणत्वाभिमानिनंपुरुषमिहात्मनि चिद्घनेपरे विलापयेत् तथाभावयेत् । ततः सोऽहंमर्षविला पाधिष्ठानंपरब्रह्मविभावयेत् । तद्विशिनष्टि । सदाविमुक्तिमत् नित्यमुक्तम् । नन्वहंपदार्थस्यरागद्वेषादिमलिनस्यकथं ब्रह्मत्वभावनेत्या

मकारमप्यात्मनि चिद्घने परे विलापयेत्प्राज्ञमपीह कारणम् ।
सोऽहं परं ब्रह्म सदा विमुक्तिमद्विज्ञानदृङ्मुक्त उपाधितोऽमलः ॥ ५१ ॥

शङ्क्याहंपदार्थंविशिनष्टि । उपाधितोमुक्तः अतएवामलःतथाभावनेसाधनं विज्ञानदृक्विज्ञानं ब्रह्ममात्रप्रत्ययाविच्छेदरूपाहक् निदिध्या सनं सत्साक्षात्कारेसाधनंयस्यसः ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एवंभावनावतोलक्षणमाह । एवमिति । उक्तप्रकारेणसदाजातापरमात्मन्येकभावना यस्यसः परिविस्मृतमखिलंपुत्रदेहादियेनसः। अत
एवस्वस्वरूपानन्देनैवतुष्टःनतुविषयानन्देन । तस्यपरिणामेदुःखरूपत्वात्ततो विरक्तइत्यर्थः । साक्षान्नित्यात्मनिसुखप्रकाशकः साक्षा

एवं सदा जातपरात्मभावनः स्वानन्दतुष्टःपरिविस्मृताखिलः ॥
आस्ते स नित्यात्मसुखप्रकाशकः साक्षाद्विमुक्तोऽचलवारिसि
न्धुवत् ॥ ५२ ॥

दौपाधिकनामरूपभेदरहितत्वेननित्यमखण्डितमात्मस्वरूपंयत्सुखंप्रकाशश्चतद्रूपः एवंरूपो विमुक्तोजीवन्मुक्तः । अचलंनिश्चलंवारियस्यतादृशसिन्धुवदास्ते । विषयसम्बन्धरूपकल्लोलरहितआस्तइत्यर्थः ॥ ५२ ॥

CC-0. In Public Domain. Digitization by eGangotri

ईदृशस्यमत्प्राप्तिर्भवत्येवेत्याह । एवमिति । उक्तप्रकारेणसदाऽभ्यस्तसमाधेर्योगिनः निवृत्ताःसर्वेषामिन्द्रियाणांगोचराविषयाःशब्दादयो यस्य विनिर्जिताअशेषारिपवःकामादयोयेनतस्य । तज्जयेनविषयेष्वन्तःकरणाप्रवृत्तिः । अतएव सर्वज्ञत्वनित्यत्वनित्यतृप्तत्वबोध

एवं सदाऽभ्यस्तसमाधियोगिनो निवृत्तसर्वेन्द्रियगोचरस्य हि ॥ विनिर्जिताशेषरिपोरहंसदा दृश्यो भवेयं जितषड्गुणात्मनः ॥५३ ॥

रूपत्वस्वतन्त्रत्वनित्यमलुप्तत्वानन्तरूपाषड्गुणायस्यतादृशआत्मजितो वशीकृतोयेनतस्य सदादृश्योभवेयम् । एतेनमद्भक्तस्ययोगिनो ऽहंदृश्योनतुभक्तिविमुखस्येति सूचितम् ॥ ५३ ॥ ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंविधोजीवन्मुक्तःप्रारब्धवशेन अनभिमानोभोगानश्नँस्तिष्ठेत् ततोमय्येवविलीयते मद्रूपोभवतीत्याह । ध्यात्वैवमिति ॥ ५४ ।

ध्यात्वैवमात्मानमहर्निशं मुनिस्तिष्ठेत्सदा मुक्तसमस्तबन्धनः ॥
प्रारब्धमश्नन्नभिमानवर्जितो मय्येवसाक्षात्प्रविलीयते ततः ५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वधर्मापेक्षया ऽयमेव धर्मो ज्यायानित्याह । आदाविति । भवसंसारमादिमध्यावसानेषु सर्वथा भयशोकयोः कारणं विदित्वा तत्कारणीभूतं विधिवादयजनं त्यागादिभिः श्रौतादितं वा विहितं समस्तं कर्ममार्गं काम्यं हित्वा अखिलात्मनां जीवानां स्वरूपभूतं मामात्मानं परमेश्वरं भजेत् । य

आदौ च मध्ये च तथैव चान्ततो भवं विदित्वा भयशोक कारणम् ॥ हित्वा समस्तं विधिवादचोदितं भजेत्स्वमात्मान मथाखिलात्मनाम् ॥ ५७ ॥

थाधनस्य. जनेनादौ दुःखं मध्ये पालनकृतं तत्र राजादिकृतं भयमन्ते नाशे शोकपर्यवसायि दुःखमेवं पदार्थमात्रं द्रष्टव्यम् ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मय्यभेदभावनया नामरूपाविभागेन तद्रूप एवभवतीत्यमुमर्थं सदृष्टान्तमाह । आत्मनीति । आत्मनिसर्वाधिष्ठानेमयिइदंस्वस्वरूपं जीव मभेदेनविभावयन्यदा । तिष्ठतीतिशेषः । तदामयात्मनापरमेश्वरेणाऽभेदेनभवति अभिन्नोभवति । तत्रदृष्टान्तः यथासमुद्रेप्रविष्टं नद्यादि

आत्मन्यभेदेन विभावयन्निदं भवत्यभेदेन मयाऽत्मनातदा ॥ यथाजलं वारिनिधौ यथापयः क्षीरेवियद्व्योम्न्यनिले यथाऽनिलः ॥ ५६ ॥

जलंसमुद्रएव यथाक्षीरेगवादिक्षीरेप्रक्षिप्तंपयःक्षीरमेव यथाव्योम्निमहाकाशेघटाद्यवच्छिन्नाकाशोघटादिभङ्गे च यथाचर्मभस्त्रिकाद्यव च्छिन्नोवायुरनिलेमहावायौ नामरूपाविभागेनैकीभवतीत्यर्थः ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमात्मतत्त्वज्ञस्य जगत्ससत्त्वभ्रमःस्वतएवापैतीत्याह । इत्थमिति । हिरण्यर्थे । लोकसंस्थितोऽपिजीवन्मुक्तिदशायांप्रारब्धवशाल्लोकव्यवहारंकुर्वन्नपिजगन्मृषैवेतिविभावयन्सन् यदियदा इत्थमीक्षते ऐकात्म्यं जानीयात्तदा निवृत्तजगत्सत्यत्वभ्रमो भवतीति शेषः। तत्र हेतुः श्रुतियुक्तिमानतोनिराकृतत्वात् । अतोऽन्यदार्तमित्यादिश्रुतिरूपात् जगन्मिथ्यादृश्यत्वात् शुक्तिरजतवदितितदुपबृंहितानुमानरू

इत्थं यदीक्षेत हि लोकसंस्थितो जगन्मृषैवेतिविभावयन्मुनिः॥ निराकृतत्वाच्छ्रुतियुक्तिमानतो यथेन्दुभेदो दिशि दिग्भ्रमादयः॥ ५७॥

पात्मानतःप्रमाणतोनिराकृतत्वात् तत्रदृष्टान्तोयथेन्दुभेदः एकचन्द्रेद्विचन्द्रत्वभ्रमस्तदेकत्वज्ञानेननिवर्तते यथाच दिशिप्राच्यादौअन्यदिक्त्वभ्रमः सोऽपितत्त्वज्ञानान्निवर्तते । एवंभ्रमतःपुरुषस्य दिक्षुभ्रमणाद्भ्रमोनिकटवर्तिवृक्षादौच भ्रमणभ्रमस्तत्स्थैर्यज्ञानेन निवर्तते तद्वत् ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशज्ञानेमदाराधनमेवोपायइत्याह । यावदिति । अखिलं जगन्मदात्मकंमदधिष्ठानकंमाद्विवर्तभूतंयावन्नपश्येत्तावन्मत्प्राप्त्येश्रद्धालुः भगवदाराधनमेवज्ञानप्रापकमित्यत्र दृढविश्वासवान् अतिशयेनोर्जिताद्वृद्धिमतीभक्तिर्मयिभगवतिपूज्यताबुद्धिरूपालक्षणं चिह्नंयस्यसः ।

यावन्नपश्येदखिलं मदात्मकं तावन्मदाराधनतत्परो भवेत् ॥
श्रद्धालुरत्यूर्जित भक्तिलक्षणो यस्तस्य दृश्यो ऽहमहर्निशं
हृदि ॥ ५८ ॥

तावन्मदाराधननिष्ठोभवेत् एवंहितस्यहृदि अहमहर्निशंदृश्योभवामियेयथामांप्रपद्यन्ते तांस्तथैवभजाम्यहमितिस्मृतेः ॥ ५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वोक्तवचनजातस्य श्रुतिसमत्वं कथमेतदालोचनमपिमदाराधनप्रतिबन्धकदुरितध्वंसोपायइत्याह रहस्यमिति। श्रुतिसारसङ्ग्रहत्वेनाति

रहस्यमेतच्छ्रुतिसारसङ्ग्रहं मया विनिश्चित्य तवोदितं प्रिय ॥
यस्त्वेतदालोचयतीहबुद्धिमान् स मुच्यते पातकराशिभिः
क्षणात् ॥ ५९ ॥

गोपनीयता अप्रमाणशङ्काकलङ्कराहित्यंसूचितम्। आलोचयतिसम्यग्विचारयति ॥ ५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ भगवानुक्तमेवार्थंसङ्क्षेपेण दार्ढ्यायपुनराह भ्रातरिति । यदीतियदित्यर्थे । यदीदंजगत् परिदृश्यते तत्सर्वंमायैवेतिज्ञात्वेति शेषः चेतसासर्वंपरिहृत्यतत्रौदासीन्यंकृत्वामद्भावनयामदैक्यभावनया भावितंशुद्धंमानसंयस्यताहशास्तिष्ठ । इत्युपदिश्याशिषंप्राह निरामयः

भ्रातर्यदीदं परिदृश्यते जगन्मायैव सर्वं परिहृत्य चेतसा ॥ मद्भावनाभावितशुद्धमानसः सुखी भवाऽऽनन्दमयो निरामयः ६०

सन्सुखीभव । सर्वदुःखनिवृत्त्येति भावः । ततोऽन्तरङ्गामन्यामाशिषमाह आनन्दमयोभवेति तद्रूपोभवेत्यर्थः । यद्यपिपूर्वमानन्दरूपत्वमस्त्येवतथाऽपितत्प्राप्तिर्विस्मृतकंठस्थभूषणप्राप्तिवत ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एवंरीत्याम्वोपासकस्यलोकपावनत्वमाह। यइति । कदावा यदाकदाचिदित्यर्थः । हृदानिर्मलेनान्तःकरणेन यो मामगुणं प्राकृतसत्त्व रजस्तमोरूपगुणरहितम् । सच्चिदानन्दरूपत्वात् । अतएवगुणादव्याकृतात्परंमायातीतम् । यदिवायद्वेत्यर्थे । गुणात्मकं सर्वज्ञत्वादिलोकोत्तरलावण्यादिगुणवानात्मामूर्तिर्यस्यतं दृश्यमानं रूपं सेवते । साद्विविधोऽप्युपासकःअहं मत्स्वरूपएव । मामकइत्यर्थोवा । भि-

य: सेवते मामगुणं गुणात्परं हृदा कदा वा यदि वा गुणात्मकम् ॥ सोऽहंस्वपादाञ्चितरेणुभिः स्पृशन्पुनाति लोकान्त्रितयं यथा रविः ॥ ६१ ॥

योऽद्विज्ञानिनोऽत्यर्थमहंसचममप्रिय इत्युक्तेः । तादृशोभक्तःस्वपादलग्नरेणुभिःसंस्पृशन्लोकत्रयमपि पुनाति । अज्ञानध्वान्तनिरसनेनपवित्रीकरोति । यथारविःस्वकरैर्जगद्वितिमिरीकरोति तद्वत् ॥ ६१ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानीमेतद्ग्रन्थार्थालोचनासमर्थस्यपाठमात्रतोऽपिमहत्फलमाह । विज्ञानंविज्ञानजनकं करणव्युत्पत्त्येतिबोध्यम् । वेदान्तैरुपनिषद्वाक्यैर्वेद्यंचरणंजगज्जन्मादिलक्षणंकर्मयस्यतेन ननुपाठमात्रादेतादृशमहत्फलप्राप्तिःकथमित्याशङ्क्यभवत्येवेति सूचयंस्तत्रहेतुमाह । मद्वचने

विज्ञानमेतदखिलंश्रुतिसारमेकं वेदान्तवेद्यचरणेनमयैवगीतम् ।
यःश्रद्धया परिपठेद्गुरुभक्तियुक्तो मद्रूपमेतियदि मद्वचनेषुभक्तिः
॥ ६२ ॥ इतिश्री अध्यात्मरामायणे रामगीता समाप्ता ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसम्वादे उत्तरकाण्डे श्रीरामगीतायां पञ्चमःसर्गः ॥ ५ ॥

षुभक्तिर्विश्वासोयदीतिअर्थाद्गुरुवाक्यविश्वासस्यैव फलदायकत्वादितिभावः ॥६२॥ इत्यध्यात्मरामायणेउमामहेश्वरसम्वादे उत्तरकाण्डे सेतौपञ्चमःसर्गः ॥ ६२ ॥ श्रीरामचन्द्रार्पणमस्तु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीराममन्त्रःखलु तारकाख्यः संसारसन्तारणसुप्रसिद्धः ॥ भक्-
त्याऽप्यभक्त्या समुपासितोयः श्रेयांसि सर्वाणि ददात्यवश्य
म् ॥ १ ॥ तन्तारकंसम्प्रतिपादयन्ती श्रीरामगीता सकलैः सुसे
व्या ॥ विज्ञप्तिमित्थंजनको विनीतः समर्पयत्यार्यजनेषुहर्षात् २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प,	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति
स्यर्द्धि	स्पर्द्धि	१	२	१	शाधि	शाधि	३	२	६	नाशे	नाशो	६	१	१
जींव्य	जींव्य	१	२	३	व्यत्र	व्यव	४	१	१	नन्वितिश	नन्वितिशे	६	२	१
सम्वींन्धनीः	सम्बन्धिनीः	२	२	१	ष्टामे	ष्टानमे	४	२	३	त्रिदा	त्रिदा	६	२	२
ब्रह्म	ब्रह्म	२	१	२	ब्रह्म	ब्रह्म	४	२	१	मेत्रे	मेव	६	२	२
ब्रह्म	ब्रह्म	२	१	६	वलेन	वलेन	४	२	७	व्येतीत	व्यतेति	७	१	१
वोधोऽस्ति	वोधोऽसि	३	१	४	निघृत्ते	निवृत्ते	५	१	१	वीरहा	वीरहा	७	१	१
संवन्ध	सम्बन्ध	३	१	७	कत्व	कत्वा	५	१	१	सद्दष्ट	सद्दृष्ट	८	१	३
भवस्यंससार	भवस्यसंसार	३	२	१	नक	नैक	५	१	१	विशुद्धं	विशुद्ध	८	२	१
न्सार	सार	३	२	२	बेदान्त	वेदान्त	५	१	१	कारांतः	कारान्तः	८	२	२
पर्वग	पवर्ग	३	२	२	पूर्व्रे	पूर्वे	५	१	२	वृत्ति	वृत्ति	९	१	१
वारिधि	वारिधि	३	२	२	बुद्ध्या	बुद्ध्या	५	१	६	स्वत्राना	स्वना	९	२	१
					एवं	एव	५	१	६	वृत्यु	वृत्यु	१०	१	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
रपि	रपि	११	२	१	ह्लाभ	ह्लाभे	१८	१	८	विभाव्यत	विभाव्यते	२५	१	४ मु
नर्दष्टा	र्नदष्टा	१२	१	४	इतिः	इति	१८	२	२	लिङ्गेद	लिङ्गदे	२६	१	२
वर्द्धे	वर्द्धे	१२	१	७	ज्ञानन	ज्ञानेन	१९	१	१	बोधकः	बोधतः	२५	१	६
त्याभिः	त्माभिः	१२	२	६	वुद्वया	वुद्धया	२०	१	५	विज्ञानं ब्रह्म	विज्ञानंनिदिध्यासनं ब्रह्म	२६	२ ६	३
					रागादि	रागादि	२१	१	३					
शुद्द	शुद्ध	१३	१	१	विलय	विलय	२१	१	७	भेदेरा	भेदरा	२७	१	६
जीवया	जीवयो	१३	१	२	धम	धर्म	२१	२	१	रुपा	रूपाः	२७	२	६
निर्वाध	निर्बाध	१४	१	१०	म्वस्य	म्वंयस्य	२१	२	२	आत्म	अत्मा	२७	२	६
भव	भव	१५	१	४	वुवै	वुधै	२३	१	५	सुनिति	सुनिस्ति	२८	१	२
अर्जोद्द	अर्जोऽद्द	१६	२	६	एव	एवं	२३	२	१	भव	भवं	२८	२	१
द्द त्	द्दात्	१७	२	१	द्रष्ट	द्रष्टृ	२४	१	२					

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
तदकत्व	तदेकत्व	२६	२	७	वतथाऽ	वतथाऽ	३१	१	१	मद्वचने	मद्वचने	३२	१	२
भ्रमण	भ्रमणं	२६	२	८	कंठ	कण्ठ	३१	१	२	तन्तारकं	तत्तारकं	३२	२	३

नेपाल पाशुपत, यन्त्रालये मुद्रिता.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इती रामगीता सटीका समाप्ता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द. नं. १६६४४

अथ रामगीता सटीका प्रारभ्यते ॥

मू० ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ रामंरत्नकिरीटकुण्डलयुतं केयूरहारान्वितं सीतालङ्कृतवामभागममलं सिंहासनस्थं विभुम् ॥ सुग्रीवादि कपीश्वरैःसुरवरैः संसेव्यमानं सदा विश्वामित्रपराशरादिमुनि-भिः संस्तूयमानं भजे ॥ १ ॥ इतिध्यात्वा ॥ श्रीमहादेवउवाच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशाय नमः ॥ ध्यायेत्वाजानुबाहुं धृतशरधनुषं बद्धपद्मासनस्थं पीतंवासोवसानं नवकमलदलस्पर्द्धिनेत्रं प्रसन्नम् ॥ वामाङ्कारूढ सीतामुखकमलमिलल्लोचनं नीरदाभं नाना लङ्कारदीप्तं दधतमुरुजटामण्डलं रामचन्द्रम् ॥ १ ॥ ततइति जगतां यानि मङ्गलानि आनन्दास्तेषामुपजीव्यभूतं मङ्गलं ब्रह्मानन्दः सएवात्मास्वरूपं तेन तस्यैवानन्दस्यान्यानि भूतानिमात्रामुपजीवन्तीति श्रुतेः मङ्ग

ततोजगन्मङ्गलमङ्गलात्मना विधाय रामायणकीर्तिमुत्तमाम् ॥ चचार पूर्वाचरितं रघूत्तमो राजर्षिवर्य्यैरभिसेवितं यथा ॥ १ ॥

लानाञ्चमङ्गलमिति स्मृतेश्च किंच जगतां मङ्गलं कल्याणं यस्मात्तादृशकल्याणरूपआत्मामूर्तिस्तया उत्तमांश्रोत्रादीनां मोक्षदत्वेना त्युत्तमां रामायणकीर्तिं वाल्मीक्यादि कृत नानाविध रामायण प्रवर्तिकां रावणवधादिजां कीर्तिंविधाय स्थितोरघूत्तमः ततः सीताप रित्यागानन्तरं पूर्वैः स्ववंशजैराचरितं प्रजापालनसत्कथाश्रवणादिकं केवलंतत्पूर्वजैरेवाचरितमितिन किंत्वन्यैरपि राजर्षिश्रेष्ठैर्य थाऽभिसेवितं तथाचचार कृतवान् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदारागुरुदेवविश्वासलक्षणमहागुणवती यद्वा उदारा दानशीलाबुद्धिर्यस्य तेन पुरातनीः प्राचीनराजसम्बन्धिनीः शुभाः धर्माधर्मनिर्णेत्रीः प्रमत्तस्य स्वगोमण्डलमिश्रितब्राह्मणगोदानात् प्रमत्तस्य नृगस्य राज्ञो द्विजस्य शापात्तिर्यक्त्वमाह तेनाज्ञातकृतब्रह्मस्वापहारेण परमधा

सौमित्रिणापृष्ट उदारबुद्धिना रामःकथाःप्राह पुरातनीःशुभाः ॥
राज्ञः प्रमत्तस्य नृगस्य शापतो द्विजस्य तिर्यक्त्वमथाह राघवः
॥ २ ॥

र्मिकस्यापीदृश्यवस्थेति सर्वथाब्रह्मस्वविमुखताधर्मइतिसूचितम् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकान्तेविजने उपस्थितंप्राप्तम् विनयान्वितः सन् भक्त्यागुरुरयमिति बुद्ध्या प्रणम्य अनेनगुरूपसदनप्रकारउक्तः आसादितंशुद्धंभाव

कदाचिदेकान्त उपस्थितंप्रभुं रामं रमालालितपादपङ्कजम् ॥
सौमित्रिरासादितशुद्धभावनः प्रणम्यभक्त्याविनयान्वितोऽब्र-
वीत् ॥ ३ ॥

नं भावनाकरणमन्तः करणंयेनसः शुद्धान्तःकरणइतियावत् भगवदुक्तसत्कथाश्रवणेन शुद्धान्तःकरणइत्यर्थः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हे महामते महतीसर्वविषयामतिर्यस्य तस्य संबोधनं त्वं शुद्धबोधोऽसि अनवच्छिन्नचैतन्यरूपोऽसि सर्वदेहिनामात्माऽसि जीवानांतत् प्रतिविम्बत्वात् अधीशोऽसि अन्तर्यामित्वान्नियन्ताऽसि वास्तवभेदाभावाच्च सर्वात्मत्वम् औपाधिकभेदाच्च नियन्तृनियम्यभावोबोध्यः निराकृतिः अस्मदादिवत्स्वार्जितकर्माधीनशरीराकृतिरहितः नन्वेवंसर्वैः कथमेवंनज्ञायतेऽतआह ज्ञानदृशां स्वयमेवप्रतीयसे ज्ञायतेऽ

त्वं शुद्धबोधोऽसि हि सर्वदेहिनामात्माऽस्यधीशोऽसि निरा-कृतिःस्वयम् ॥ प्रतीयसे ज्ञानदृशां महामते पादाब्जभृङ्गाहितसङ्गसाङ्गिनाम् ॥ ४ ॥

नेनेतिज्ञानं वेदान्तवाक्यजातं तदेवदृक्दर्शनसाधनंयेषां तेषामितिसंबन्धसामान्येषष्ठी तैरित्यर्थः तान्शद्दक्लाभश्च त्वद्भक्त्यधीनइत्याह पादेति त्वच्चरणकमलयोर्भृङ्गवदाहितःकृतः सङ्गोयेन तादृशान्तः करणसङ्गवतां त्वच्चरणकमल सङ्लग्नान्तः करणवतामित्यर्थः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ प्रार्थयते अहमिति भवस्यंससारस्यापवर्गो निवृत्तिर्यस्मात्ताद्दशंतवपादाम्बुजंप्रपन्नोऽस्मिशरणंप्राप्तोऽस्मि योगिभाबितं योगीभिः संन्सारमुक्तये भाावितम् अनेनतस्य भवापर्वगत्वे सदाचारः प्रमाणमुक्तम् प्रार्थनीयमाह अपारवारिधिरूपंयदज्ञानंसंसारमूलकारणं यथासुखम

अहं प्रपन्नोऽस्मि पदाम्बुजं प्रभो भवापवर्गं तव योगिभावितम् ॥ यथाञ्जसाज्ञानमपारवारिधिं सुखं तरिष्यामि तथाऽनुशाधि माम् ॥ ५ ॥

क्लेशेन तरिष्यामि तथा मामनुशाधिशिक्षय अपारवारिधिमित्यनेनसपारप्रसिद्धसमुद्राद्व्यतिरेकउक्तः अशक्यतरणताऽनेनध्वनिता ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्थोत्तरमवतारयति श्रुत्वेति रामः सौमित्रिवचः श्रुत्वा अथशब्दोवाक्यालङ्कारे तदा श्रवणाव्यवहितकाले एवंप्रपन्नानां भक्तानामार्ति संसारदुःखंहरतितादृशः प्रपन्नाश्रमादिहीना भक्तानुग्रहपरा च धीर्यस्यसः क्षितिपालानां राज्ञां भूषणभूतोज्ञानरूपतमसउपशान्तये त.

श्रुत्वाथ सौमित्रिवचोऽखिलं तदाप्राह प्रपन्नार्तिहरःप्रसन्नधीः ॥
विज्ञानमज्ञानतमोपशान्तये श्रुतिप्रपन्नं क्षितिपालभूषणः॥ ६ ॥

दर्थम् सन्धिरार्षः श्रुतिभिः तमेवविदित्वाऽतिमृत्युमेतीत्यादिश्रुतिभिः प्रपन्नं तत्फलकत्वेन वोधितं विज्ञानमात्मतत्वज्ञानामिति सामान्यतः प्रथमंप्राह ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथतादृशज्ञानप्राप्त्यै क्रमेणबहिरङ्गान्तरङ्गसाधनान्याह आदाविति स्ववर्णाश्रमेषु शास्त्रेण वर्णिता याः क्रियानित्यनैमित्तकयज्ञदानादिरूपास्ताः कृत्वा समासादितशुद्धमानसः प्राप्तान्तःकरणशुद्धिः तत्पूर्वमुपात्तसाधनः तदनुष्ठानपूर्वकमेवउपात्तानिसाधनानि शमदमादीनियेन तादृशः अनेनकर्मणां बहिरङ्गत्वं शमादीनामन्तरङ्गत्वं स्फुटमेवोक्तम् किंच शमदमवैराग्यदार्ढ्यपर्यन्तं कर्मानुष्ठानमेवेति

आदौ स्ववर्णाश्रमवर्णिताः क्रियाः कृत्वा समासादितशुद्धमानसः
समाप्य तत्पूर्वमुपात्तसाधनः समाश्रयेत्सद्गुरुमात्मलब्धये ॥ ७ ॥

सूचितम् ततस्तत्कर्मानुष्ठानं समाप्य त्यक्त्वा संन्यस्येतियावत् आत्मलब्धये आत्मज्ञानाय तत्फलकाय तत्वमस्यादिवाक्यार्थविचाराय सद्गुरुं श्रोत्रियंब्रह्मनिष्ठमित्यादि लक्षणलक्षितं समाश्रयेत् सेवेत अनेनव्युत्पत्तिबलेन स्वयमेववाक्यार्थविचारः क्रियमाणो न फलायेति सूचितम् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसारस्यभ्रमिमच्चक्ररूपत्वात्तन्निवृत्तेश्चतत्कारणाज्ञाननिवृत्तिमूलकत्वदज्ञानानिवृत्तेश्चतत्त्वज्ञानकसाध्यत्वात्तत्त्वज्ञानस्यचवेदान्त विचारसा-
ध्यत्वात्तदर्थंगुरुसमाश्रयणमित्याह क्रियेति भवःसंसारश्चक्रवद्विपरिवर्तमानईर्यते कथ्यते तदेवोपपादयति आदृताआदरपूर्वंपूर्वजन्मार्जि
ताक्रियाएनस्यशरीरोद्भवस्यजन्मनोहेतुः तत्रजन्मनिसुरागिणोविषयाभिलाषवतः तौ शास्त्रप्रसिद्धौ धर्मेतरौ धर्माधर्मौ प्रियाप्रियौसुखदुः

क्रियाशरीरोद्भवहेतुरादृताप्रियाप्रियौतौभवतःसुरागिणः ॥
धर्मेतरौतत्रपुनः शरीरकंपुनः क्रियाचक्रवदीर्यतेभवः ॥ ८ ॥

खजनकौभवतःकस्यचिदधर्मएवसुखत्वबुद्ध्याप्रवृत्तिः कस्यचिद्धर्मएवंकदाचिदित्यप्यूह्यम् एवंतत्रोत्पादितकर्मणापुनःशरीरंपुनःक्रिया-
इत्येवंचक्रवद्विपरिवृत्तिः । यथाचक्रेभ्राम्यमाणेऽधोभागः कदाचिदुपरिउपरितनश्चाधः पुनरुपरिपुनरधएवंजन्मक्रिययोर्जन्यजनक-
भावेनपरिवृत्तिरिति बोध्यम् ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 तस्यचाज्ञानमेवमूलमित्याह अज्ञानमेवेति अत्रविधौसंसारनिवृत्तिलक्षणेकर्तव्येऽर्थेतद्धानमेवमूलकारणत्वादज्ञानहानमेवविधीयते साध-
नत्वेनेतिशेषः ननुकर्मैवतन्नाशकमस्तुकिंज्ञानेनेत्याशङ्क्याह विद्यैवज्ञानमेवतन्नाशविधौमूलाज्ञाननाशनेपटीयसीसमर्थानकर्मसमर्थमितिशेषः

अज्ञानमेवास्यहिमूलकारणंतद्धानमेवात्रविधौविधीयते ॥ विद्यै
वतन्नाशविधौपटीयसीनकर्मतज्जंसविरोधमीरितम् ॥ ९ ॥

यतस्तत्तज्जमज्ञानजम् आत्मस्वरूपाज्ञानजन्यंदेहाद्यभिमानजन्यत्वात्कर्मणोज्ञानजन्यत्वंबोध्यम् ननुतज्जन्यस्यापितन्नाशकत्वंवृश्चिककर्क
व्यादौदृष्टमित्याशङ्क्यतज्जन्यत्वंवाननाशकत्वेप्रयोजकंकिन्तुसविरोधत्वमेवेत्याह यतसविरोधंतदीरितंनाशकमुक्तमित्यर्थः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतएवकर्मणानाज्ञानहानिरित्याह नाज्ञानेत्यादि यतःकर्मणाविरोधाभावान्नाज्ञाननाशोनापिरागनाशोवस्तुतः कर्मानुष्ठानात्पुनः सदो
षंक्षयिफलत्वादिदोषविशिष्टंकर्मैवोद्भवेत्कर्मणश्चपुनःसंसारएवेतिनमुक्तिप्रत्याशा ततस्तस्माद्बुधोविवेकीज्ञानविचारवान् ज्ञायतेऽनेने-

नाज्ञानहानिर्नचरागसङ्क्षयोभवेत्ततः कर्मसदोषमुद्भवेत् ॥ ततः
पुनः संसृतिरप्यवारितातस्माद्बुधोज्ञानविचारवान्भवेत् ॥ १० ॥

तिज्ञानंवेदान्तवाक्यंतद्विचारवान्भवेत ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानींज्ञानस्यैवमोक्षहेतुत्वंनतुज्ञानकर्मसमुच्चयवादंदूषणायानुवदतिसार्धेन नन्विति नान्वितिशङ्कायाम् यथाविद्यावेदमुखेनश्रुतिपुराण-
लक्षणेन ब्रह्मविदाप्नोतिपरम् इत्यादिनापुरुषार्थसाधनमुक्ता तथा उभाभ्यामेवपक्षाभ्यांयथाखेपक्षिणांगतिः तथैवज्ञानकर्मभ्यांप्राप्यते
ब्रह्मशाश्वतम् इत्यादिनाक्रियाऽपितत्साधनत्वेनोक्ता किंच क्रियाकर्तव्यता तृतीयार्थेप्रथमा कर्तव्यतयाआवश्यकेकृत्यअवश्यकर्तव्यत-

नन्नुक्रियावेदमुखेनचोदितायथैवविद्यापुरुषार्थसाधनम् ॥ कर्तव्य
ताप्राणभृतःप्रचोदिताविद्यासहायत्वमुपैतिसापुनः ॥ ११ ॥

याप्रचोदितानित्यनैमित्तिकरूपा एवंचनदकरणेप्रत्यवायोत्पत्त्याज्ञानोत्पत्तिरेवनस्यात् तस्मात्सापुनर्विद्यायाःसहायत्वंप्राप्नोतिघटेजन-
नीयेयथादण्डचक्रादीनांपरस्परसहायता ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्तव्यतेतिस्त्रोक्तमंत्रेविवृणोति कर्मेति वीरहावाएषदेवानांयोऽग्निमुद्वासयतेयावज्जीवमग्निहोत्रंजुहोति इतिश्रुतिः तत्रासिद्धान्तीशङ्कते नन्विति ध्रुवंस्थिरंकार्यमिदंपुरुषार्थमोक्षजनिकाविद्यायतः स्वतन्त्राविनाऽपिसहायेन स्वकार्यसंपादनेसमर्था यथातेजस्तिमिरनिवर्तन-

कर्माकृतौदोषमपिश्रुतिर्जगौतस्मात्सदाकार्यमिदंमुमुक्षुणा॥ननु
स्वतन्त्राध्रुवकार्यकारिणीविद्यानकिञ्चिन्मनसाऽप्यपेक्षते ॥ १२

समर्थंमनसाऽपिकिञ्चित्सहायभूतंवस्तुनापेक्षते तथाफलेजननीयेसहायान्तरसंभावनाऽपिनेतिभावः अनेनविद्याफलजननेनिरपेक्षास्वतन्त्र-त्वात्तेजोवदित्यनुमानंसूचितम् ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समुच्चयवादीपरिहराति नेति त्वदुक्तंनेत्यर्थः सत्यकार्यः अक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवति इत्यादिवेदनबोधितःस्थिरकार्योऽपि-
अध्वरः यथाऽन्यानपिकारकादिकान् आरादुपकारकप्रयाजाद्यङ्गानिदेशकालादीनिचप्रकाङ्क्षते तथाविद्यापिअग्निहोत्रंजुहोतिइत्यादिवि

नसत्यकार्योऽपिहियद्वदध्वरः प्रकाङ्क्षतेऽन्यानपिकारकादिकान्
तथैवविद्याविधितः प्रकाशितैर्विशिष्यते कर्मभिरेवमुक्तये ॥ १३ ॥

धिवाक्यतःतत्समूहेनप्रकाशितैः कर्मभिः सहितैवमुक्तयेविशिष्यतइत्यर्थः विद्याफलदानेकर्मापेक्षा अङ्गित्वात् प्रयाजाद्यङ्गापेक्षदर्शा
दिवादितिसत्प्रतिपक्षानुमानमनेनसूचितम् ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदनूदयसिद्धान्तीदूषयति केचिदिति यत्केचिद्वितर्कवादिनश्शतिज्ञानकर्मणोस्समुच्चित्यमुक्तिसाधनंवदान्तितदप्यसत् यथाकेवलंकर्म मोक्ष साधनमित्यमत्तथातन्मीलितमित्यप्यसत् तत्रहेतुर्दृष्टविरोधकारणात् दृष्टोयोविरोधः सर्वलोकदृष्टविरोधरूपात्कारणात्तदसदित्यर्थः विरो

केचिद्वदन्तीतिवितर्कवादिनस्तदप्यसदृष्टविरोधकारणात् ॥
देहाभिमानादभिवर्धतेक्रियाविद्यागताहङ्कृतितःप्रसिद्ध्यति १४

धमेवाह देहाभिमानात्क्रियावर्धतेअनात्मनिदेहादावात्मत्वाभिमानात्क्रियावृद्धिः विद्यातुगताहङ्कृतितः गताहङ्कृतिर्यस्यतस्यनष्टाहङ्कृतेः प्रसिद्ध्यति सार्वविभक्तिकस्तासिः एवंचाहङ्कारसत्तामूलकत्वात्क्रियाज्ञानयोः समुच्चयोविरुद्धइत्यर्थः ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथपूर्वपक्षयुक्तानुमानंदूषयनविद्यास्वरूपमाह विशुद्धंविज्ञानंयेभ्यस्तेषांवेदान्तवाक्यानांयाद्विशेषेणरोचनंरलयोरभेदादालोचनंविचार
स्तेनाञ्चितामापितायाचरमाआत्मवृत्तिर्ब्रह्माकारांतःकरणवृत्तिः साविद्येतिभण्यतेविद्वद्भिरितिशेषः पुनःसमुच्चयवारणायविद्याकर्मणो
वैषम्यमाह कर्मयज्ञादिअखिलकारकादिभिःकर्तव्यकर्मादिभिरङ्गैश्चसहितंसदुदेति फलोन्मुखंभवति विद्यापुनरखिलकारकादिनिहन्ति

विशुद्धविज्ञानविरोचनाञ्चिताविद्याऽऽत्मवृत्तिश्चरमेतिभण्यते ॥ उदेतिकर्माखिलकारकादिभिर्निहन्ति विद्याऽखिल कारकादि-कम् ॥ १५ ॥

तत्रकर्तृत्वादिबुद्धिंनिहन्ति सकलव्यापारपरित्यागेनब्रह्मणिसमाप्तिर्हिविद्या अतः स्वोत्पत्तौचित्तशुद्धिद्वाराकर्मसापेक्षास्वफलेजनायितव्यं-
तान्निरपेक्षैवान्यथाविद्यास्वरूपस्यैवभङ्गापत्तेरितिपूर्वपक्षयुक्तहेतोरसिद्धिरितिभावः ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपसंहरन्मुमुक्षोर्वृत्तिप्रकारमाह तस्मादिति विद्याविरोधाद्विद्यायाःकर्मणासह विरोधेनसमुच्चयोनभवेत्तस्मात्सुधीर्मुमुक्षुरशेषतःकर्मत्यजे-
त् काम्यंतुसर्वथात्याज्यमेवनित्यनैमित्तिकमपियावाच्चित्तशुद्धिकर्तव्यमेव ततोऽपिब्रह्मणिचित्तस्थैर्यपर्यन्तं कर्तव्यमेव ततस्तदनुसन्धानप्र-

तस्मात्त्यजेत्कार्यमशेषतः सुधीर्विद्याविरोधान्नसमुच्चयोभवेत् ।
आत्मानुसन्धानपरायणःसदा निवृत्तसर्वेन्द्रियवृत्तिगोचरः १६

तिबन्धकत्वात्प्रयोजनाभावाच्चतदपित्याज्यमेवेतिभावः इदानींमुमुक्षुकर्तव्यमाह निवृत्ताःसर्वेषामिन्द्रियाणां गोचराविषयाःशब्दादयोय
स्मात्तादृशःसन् आत्मनःसच्चिदानन्दस्यानुसन्धानमेवपरमयनंप्राप्यंयस्यतथाविधोभवेत् अत्रेन्द्रियप्रत्याहारःकर्तव्यत्वेनोक्तस्तेनतत्पूर्वंप्रा-
णायामाद्यर्थादाक्षिप्तम् ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रागिविरागिभेदेनकर्मणोकर्तव्यताकर्त्तव्यतेआहयावदिति माययाविद्ययाशरीरादिष्ववानात्मस्वात्मधीरहङ्कृतेत्यादिरूपायावद्वर्ततेतावद्वि
धिवादकर्मणाम् विधिर्यजेतेत्यादिश्रुतिर्वादःकर्तव्यताबोधकोयेषांकर्मणांविधेयोवश्यवर्त्तितत्कर्मकर्ताभवेत तदपगमेतुतदाखिलं जगन्नेतीति

यावच्छरीरादिषुमाययात्मधीस्तावद्विधेयोविधिवादकर्मणाम् ॥
नेतीतिवाक्यैरखिलंनिषिद्धय तज्ज्ञात्वापरात्मानमथत्यजेत्क्रि
याः ॥ १७ ॥

वाक्यैः अथातआदेशोनेतिनेतिइत्यादिवाक्यैर्निषिध्य मिथ्यात्वेननिर्णीयतद्विलक्षणतयासत्यत्वेनपरमात्मस्वरूपंज्ञात्वाक्रियास्त्यजेत्निरू
पितमेतत् ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मविज्ञानेसत्यवश्यमविद्या निवर्ततइत्याह यदेति आत्मनिशुद्धेन्तःकरणेपरमात्मनईशस्यात्मनोजीवस्यचयोविभेदोमायान्तःकरण
रूपोपाधिद्वयकृतोविभेदोभेदस्तस्यभेदकं नाशकंभास्वरंप्रकाशशीलं यद्विज्ञानमितरवृत्त्युपमर्दनपूर्वकंब्रह्माकाराऽखण्डाद्वृत्तिर्यदाऽवभाति

यदापरात्मात्मविभेदभेदकंविज्ञानमात्मन्यवभाति भास्वरम् ॥
तदैवमायाप्रविलीयतेऽञ्जसासकारकाकारणमात्मसंसृतेः॥ १८॥

असंभावनादितिरस्कारेणोदेति तदैव सकारकाजन्मान्तरप्रापककर्मसहितामायातत्तज्जीवोपाधिभूता विद्याऽञ्जसाझटितिप्रविलीयतेनश्यति
ननुतन्नाशेऽपिसंसारनाशःकथमतोमायाविशेषणम् आत्मसंसृतेःकारणंसंसारस्योपादानकारणमेवंचतन्नाशेकार्यनाशोभवत्येवेतिभावः १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं पुनर्दार्ढ्यायाह श्रुतीति तत्त्वमसीत्यादिश्रुतिरूपैः प्रमाणैस्तज्जनितज्ञानेन नाशितासाविद्याकथमपिकार्यकारिणीभविष्यतीति काकुरत्र सर्वथानेत्यर्थः असतःकार्यकारित्वासंभवादितिभावः पुनश्चतस्यानोद्भवइत्याह विज्ञानमात्रादिति अमलाशुद्धाद्वितीयतःद्विती

श्रुतिप्रमाणाभिविनाशिताचसाकथंभविष्यत्यपिकार्यकारिणी ॥
विज्ञानमात्रादमलाद्वितीयतस्तस्मादविद्यानपुनर्भविष्यति १९

यात्मविषयकाद्विज्ञानमात्रादितरासहकृतान्निदिध्यासनपरिपाकजज्ञानाद्यतोनष्टातस्मात्सापुनर्नभविष्यति रज्ज्वज्ञानमूलकस्य सर्पस्य रज्जुज्ञानेन निवृत्तस्ययथानपुनरुत्पत्तिरितिभावः ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्यायाइतरनिरपेक्षायाएवमोक्षकारणत्वमुक्तंयुक्तिपूर्वकंपुनःकथयतिश्रोतृदार्ढ्याय।यदीति। यदिनष्टातत्त्वज्ञाननाशिता सा न पुनः मसूयतेनोत्पद्यतेतदाकारणाभावादहंमतिःकथंभवेत्। कथमपिनभवेदित्यर्थः। तदभावाच्चतत्कालेकर्माभावइतिस्वफलजननेसास्वतन्त्राइ

यदिस्मिन्नष्टा नपुनःप्रसूयते कर्ताऽहमस्येति मतिः कथं भवेत् ॥
तस्मात्स्वतन्त्रा न किमप्यपेक्षते विद्या विमोक्षाय विभाति केव
ला ॥ २० ॥

तरनिरपेक्षैवनाकिमप्यपेक्षते द्वितीयस्यासंभवात् अतः केवलाऽसहायैवविमोक्षायविभातितत्फलिकाभवतीत्यर्थः ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रार्थे श्रुतिरपिप्रमाणमित्याह सेति साप्रसिद्धा नकर्मणानप्रजयाधनेनत्यागेनैके अमृतत्वमानशुः इत्यादिकातैत्तिरीयश्रुतिःप्रशस्तानामर्थ
 वादैःप्राशस्त्येनबोधितानामपिकर्मणांन्यासंत्यागंसादरंस्फुटमाह नतुकर्मसमुच्चयमित्यर्थः तथावाजिनांवाजसनेयिनाम् एतावदरेखल्वमृत

सातैत्तिरीयश्रुतिराहसादरंन्यासंप्रशस्ताखिलकर्मणां स्फुटम् ॥
एतावदित्याहचवाजिनांश्रुतिर्ज्ञानंविमोक्षायनकर्मसाधनम् २१

त्वम् इत्यादिका ज्ञानंविमोक्षायसाधनं नकर्मेत्येतदाह ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहङ्कारत्यागरूपकारणवैषम्यात् क्रियाज्ञानयोर्वैषम्यमुक्त्वा फलमयुक्तमापिवैषम्यमाह विद्येति हेसमुच्चयवादिन् त्वयाक्रतुरग्निष्टोमादिर्वि द्यासमत्वेनदर्शितः परन्तुसमोदृष्टान्तोनोदाहृतः अनेनक्रतुर्विद्यासमः श्रुतिबोधितकर्तव्यताकत्वादित्यनुमानन्निरस्तम् दृष्टान्ताभावा- त् अन्वय्येवानुमानन्नव्यतिरेकीतिभावः एतच्चाकरेविस्तरेणप्रपञ्चितम् ननुविद्याकर्मणीसमे एकफलत्वाच्चक्रदण्डादिवदित्यनुमान-

विद्या समत्वेनतु दर्शितस्त्वया क्रतुर्नदृष्टान्त उदाहृतः समः ॥
फलैःपृथक्त्वाद्बहुकारकैः क्रतुःसंसाध्यतेज्ञानमतोविपर्ययम् २२

मितिचेत्तत्राह फलैः पृथक्त्वात षष्ठ्यर्थेतृतीया फलानांभेदादित्यर्थः एवंचस्वरूपासिद्धोहेतुरितिभावः समानकारकत्वमपिहेतुर्नेत्याह क्रतुर्बहुभिः कारकैरहंममताभिमानरूपैरान्तरैर्बाह्यैश्चदेशकालादिनियमैश्चसाध्यते ज्ञानन्त्वतोविपर्ययवदतोनतयोः साम्यमितिभावः २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वकरणेप्रत्यवायभिया कर्मकार्यमितिचेन्नेत्याह सप्रत्यवायइति कर्मत्यागेनाहंनिश्चयेनाहंप्रत्यवायसहितोभविष्यामीत्येवंशुद्धात्मानि-
अनात्मधर्मस्यधीरप्रज्ञस्यतत्त्वज्ञानविकलस्यप्रसिद्धा नतुतत्त्वदर्शिनः तस्याहंबुद्धेरभावात् पापादेरज्ञात्मधर्मतानिश्चयाच्च तस्माद्बुधैःकर्म

स प्रत्यवायोह्यहमित्यनात्मधीरज्ञप्रसिद्धा नतु तत्वदर्शिनः ॥
तस्माद्बुधैस्त्याज्यमपि क्रियात्मभिर्विधानतःकर्मविधि प्रका
शितम् ॥ २३ ॥

क्रियात्मभिः षष्ठ्यर्थेतृतीया क्रियाफलसक्तचित्तानां विधानतोविधानेनेतिकर्तव्यतयायुक्तंकर्म विधिभिरवश्यकर्तव्यतयाबोधितमपि
त्याज्यमित्यर्थः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविरक्तस्यकार्यमाह। श्रद्धेति। गुरुशास्त्रयोर्विश्वासःश्रद्धानदन्वितोमुमुक्षुःशुद्धमानसोऽपि निष्कामकर्मानुष्ठानाच्छुद्धमानसश्चगुरोः प्रसादाल्लब्धतत्त्वमसीतिवाक्यतः श्रुतमात्मजीवयोरैकात्म्यंविज्ञाय मननिदिध्यासनपरिपाकाभ्यांसाक्षात्कृत्य। चएवार्थः। साक्षा

श्रद्धान्वितस्तत्त्वमसीतिवाक्यतो गुरोःप्रसादादपिशुद्धमानसः॥
विज्ञायचैकात्म्यमथात्मजीवयोः सुखी भवेन्मेरुरिवाप्रकम्पनः
॥ २४ ॥

त्कृत्यवसुखीभवेत्। सकलदुःखहीनोभवेदित्यर्थः। अप्रकम्पनःविषयाभिलाषाक्षोभितान्तःकरणः॥ २४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महावाक्यंविवरीतुंवाक्यार्थस्यपदार्थबोधपूर्वकत्वमाह । आदाविति । विधानतःभ्रमप्रमादराहित्येनवाक्यार्थविज्ञानस्यविधावुत्पत्तौआ
दौप्रथमंमुख्यमितियावत् । पदार्थावगतिःकारणम् । हिप्रसिद्धं तस्यपदत्रयंतत्त्वम्असीति । तत्रतत्पदार्थःपरमात्मासर्वज्ञत्वादिगुणः त्वं

आदौ पदार्थावगतिर्हिकारणं वाक्यार्थविज्ञानविधौ विधानतः ॥
तत्त्वंपदार्थौपरमात्मजीवकावसीतिचैकात्म्यमथानयोर्भवेत्
॥ २५ ॥

पदार्थोजीवःअनयोस्तत्त्वंपदार्थयोरैकात्म्यंतद्बोधकमसीतिपदम् ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुसर्वज्ञत्वादिगुणस्येशस्यकिञ्चिज्ज्ञत्वधर्मवताजीवेनैकात्म्यं विरुद्धमित्याशङ्क्याह । प्रत्यगिति । अहंबुद्धिवद्यत्वंप्रत्यक्त्वंजीवधर्मः परोक्षत्वमीशधर्मस्तदादिधर्मकृतमात्मनोःपरमात्मजीवात्मनोर्विरोधंविहायत्यक्त्वातयोः संशोधिताम् युक्तिभिःसम्यग्विचारितांतत्त्वंपदाभ्यांशक्त्यभावेऽपिवक्ष्यमाणप्रकारयालक्षणयालक्षितां ज्ञाताञ्चिदात्मतां संगृह्य तत्त्वंपदोपास्थितिविषयांकृत्वा स्वमात्मानंतथाज्ञात्वाऽथएकात्मज्ञानानन्तरमद्वयोभवत् । चित्स्वरूपतांप्राप्तइवभवेत् । पूर्वमपितत्स्वरूपएवविस्मृतकण्ठचामीकरन्यायेनचतत्प्राप्तिः तदुक्तम् ।

प्रत्यक्परोक्षादिविरोधमात्मनोर्विहायसंगृह्यतयोश्चिदात्मताम् ॥
संशोधितांलक्षणयाचलक्षितांज्ञात्वास्वमात्मानमथाद्वयोभवेत्
॥ २६ ॥

अयंभाव ः तत्त्वंपदयोर्द्वावर्थौ वाच्योलक्ष्यश्च तत्रतत्पदस्यमायोपाधिःसर्वज्ञत्वादिविशिष्टोवाच्यः त्वंपदस्यापिकिञ्चिज्ज्ञत्वादिविशिष्टो मायाकार्याविद्योपाधिरविद्यावदन्तःकरणोपाधिर्वाच्यः उभयोरपिविशेषणांशत्यागेनशुद्धश्चिदात्मालक्ष्यः तत्रवाच्ययोर्विरुद्धधर्मकत्वादैक्यासंभवेऽपिलक्ष्ययोरैक्यंनिर्बाधमेवेति ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तलक्षणास्वरूपमाह । एकात्मकत्वादिति जहतीलक्षणाजहत्स्वार्थलक्षणायथागङ्गायांघोषइत्यत्रगङ्गापदार्थस्यप्रवाहस्यघोषाधारता
नुपपत्त्यामर्वथातत्परित्यागेनतीररूपार्थलक्षणा साप्रकृते न एकात्मत्वात् । विशेष्यांशस्यैकत्वात्सर्वथास्वार्थत्यागाभावात् । तथाज
हल्लक्षणताजहत्स्वार्थलक्षणात्त्वमपिअत्रनसंभवति । यथाकाकेभ्योदधिरक्ष्यतामित्यादौकाकपदस्यस्वार्थात्यागेनैवदध्युपघातकेलक्षणा
सापिन । विरोधतःविशेषणत्यागेनसर्वथास्वार्थत्यागाभावात् । अतोभागलक्षणाजहदजहल्लक्षणायुज्यते । अदोषतःपूर्वोक्तदोषाभावात्

एकात्मकत्वाज्जहती न सम्भवेत्तथाऽजहल्लक्षणता विरोधतः॥
सोऽयंपदार्थाविवभागलक्षणायुज्येततत्त्वंपदयोरदोषतः॥२७॥

विशेष्यांशस्यात्यागाद्विशेषणांशस्यत्यागाच्च । तत्रदृष्टान्तः । सोऽयंपदार्थाविव । यथासोऽयंदेवदत्तइत्यत्रतद्देशादिविशिष्टोऽतीतानुभव
विषयोवातत्पदार्थः एतद्देशादिविशिष्टोऽनुभूयमानोवेदंशब्दार्थः । तयोश्चाविरुद्धविशेषणकत्वादैक्यासंभवेनदेशादिरूपविशेषणत्यागेना
नुभवगतानांतत्वादिविशेषणत्यागेनवालक्षणयैक्यंतद्वदितिभावः ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथत्याज्यत्वायजीवोपाधिमाह । रसादी ति । रसापृथ्वीआदिर्येषांतानिपञ्चीकृतानियानिभूतानितेभ्यःसंभवोयस्यतत् । पञ्चीकरणंचे
त्थम् एकैकंभूतंद्विधाविभज्यतत्रैकंभागंचतुर्धाविभज्यतेषांभागानांस्वेतरभूतचतुष्टयार्धभागचतुष्टयेसंयोजनेएकैकंभूतंपञ्चात्मकंभवतिभा

रसादिपञ्चीकृतभूतसंभवंभोगालयंदुःखसुखादिकर्मणाम् ॥ शरी
रमाद्यन्तवदादिकर्मजंमायामयंस्थूलमुपाधिमात्मनः ॥ २८ ॥

गाधिक्याच्चप्रातिस्विकतयाभूगादिव्यवहारोऽपि । सुखदुःखयोरादीनियानिकर्माणितेषांभोगस्तत्कर्मजसुखदुःखानुभवस्तस्यालयमाश्र
यभूतमाद्यन्तवतउत्पत्तिनाशयोगि आदिकर्मजंभाग्भवीयकर्मजन्यंमायामयंपरम्परयामायाविकारः तद्द्वारभूतविकारत्वात् । एतच्छरी
रमात्मनःस्थूलमुपाधिंवदन्तीतिशेषः ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसूक्ष्मोपाधिमाह। सूक्ष्ममिति । बुधाःअन्यत्स्थूलशरीरविलक्षणंशरीरंलिङ्गदेहाख्यमात्मनउपाधिंविदुः । तत्स्वरूपमाह। सूक्ष्मंचक्षु-
राद्यविषयः मनोबुद्धिदशेन्द्रियैःप्राणैश्चयुतम् सङ्कल्पात्मकंमनः निश्चयात्मिकाबुद्धिः घ्राणरसनाचक्षुस्त्वक्श्रोत्रेतिपञ्चज्ञानेन्द्रियाणि वा-

सूक्ष्मंमनोबुद्धिदशेन्द्रियैर्युतंप्राणैरपञ्चीकृतभूतसंभवम् ॥ भोक्तुः
सुखादेरनुसाधनंभवेच्छरीरमन्याद्विदुरात्मनोबुधाः ॥ २९ ॥

क्पाणिपादपायूपस्थानिकर्मेन्द्रियाणि प्राणापानव्यानोदानसमानाश्चप्राणास्तैर्युतमेतत्सप्तदशसमुदायात्मकम्। तदाधारभूतान्याह ।अप
ञ्चीकृतभूतसंभवंतेभ्यउत्पन्नमतएवाऽदृश्यम् । तथाभोक्तुःसुखादेःसुखदुःखाद्यनुभवस्यानुसाधनम् स्थूलशरीरस्यैतदनुगतस्यैवभोगसाधनत्व
मितिभावः । एतद्वियोगेनैवमरणव्यवहारइतिबोध्यम् ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिजीवोपाधिद्वयमुक्त्वाईशोपाधिमाह । अनादीति । अनादि उत्पत्तिहीनम् । नानाविधपरिणामशालितयापरिणामरूपेणनश्वरामिति अनादित्वमात्रोक्त्यासूचितम् । अनिर्वाच्यम् सत्त्वासत्त्वाभ्यांनिर्वक्तुमशक्यम् कारणंसकलप्रपञ्चस्यजनकम् ईदृशीमायातुब्रह्मणःपरमी-

अनाद्यनिर्वाच्यमपीहकारणं मायाप्रधानंतुपरंशरीरकम् ॥ उपाधिभेदान्तुयतःपृथक्स्थितं स्वात्मानमात्मन्यवधारयेत्क्रमात् ॥ ३० ॥

श्वरव्यवहारसंपादकत्वादुत्कृष्टंप्रधानंशरीरकम् । स्वार्थेकः । एवमुपाधिभेदादेकमेवचैतन्यंयतः पृथक्स्थितंजीवईशइतिभेदबुद्धिविषय मतोलक्षणयोपाधिपरित्यागेनस्वात्मानमात्मनिअवधारयेदभेदेनजानीयात् । क्रमाच्छ्रवणमनननिदिध्यासनक्रमेणेत्यर्थः ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवाक्यार्थविचारफलमाह । कोशेष्विति । आनन्दमयस्य ब्रह्मत्वेअन्नमयप्राणमयमनोमयविज्ञानमयेषुचतुर्षुकोशेषुतत्तत्सङ्गात्तत्तदाकृतिर्विभाति यथाजपादिसङ्गात्स्फटिकोऽनेकाकृतिर्भाति । आनन्दमयस्यापि जीवत्ववादिनातुतेनसहपञ्चसु कोशेष्वितिबोध्यम् । अस्मि-

कोशेषुपञ्चस्वपितत्तदाकृतिर्विभातिसङ्गात्स्फटिकोपलोयथा ॥ असङ्गरूपोऽयमजोयतोऽद्वयोविज्ञायतेऽस्मिन्परितोविचारिते ॥ ३१ ॥

न्महावाक्येपरितोविचारितेसत्यस्याविचारितेसत्ययमात्माऽसङ्गरूपःअन्नमयादिभिःसङ्गरहितः । असङ्गोनहिसज्जते । इतिश्रुतेः । अजोऽद्वयश्चविज्ञायते । स्थूलोऽहमित्यादिरत्वज्ञस्यतत्तत्कोशप्रसङ्गात्प्रतीतिःस्फटिकवत् तत्त्वज्ञस्यतुनतथाप्रतीतिरितिभावः । एवंचतत्तदुपाधिकृततत्तद्रूपताप्रतीतिनिरासएव विचारफलमितिभावः ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जाग्रदाद्यवस्थाऽपि बुद्धेर्धर्मोनात्मधर्मइत्याह । बुद्धेरिति । इहआत्मनिस्वप्नादिभेदेन जाग्रत्स्वप्नसुषुप्तिभेदेन यात्रिधावृत्तिर्दृश्यतेसाऽपि गुणत्रयात्मनः सत्त्व रजस्तमोरूपगुणत्रयस्वरूपाया बुद्धेर्धर्मः। उक्तावस्थात्रयस्योक्तमूलकत्वात् । एतदवस्थात्रयस्यास्मिन्नवस्थात्रय-साक्षिणि आत्मनि भानं मृषा बुद्ध्यध्यास निबन्धनं न तु वास्तव मित्यर्थः । अन्योऽन्यतोव्यभिचारतस्तस्यावस्था त्रयस्यस्व रूपतो

बुद्धेस्त्रिधा वृत्तिरपीह दृश्यते स्वप्नादि भेदेन गुणत्रयात्मनः ॥ अन्योऽन्यतोऽस्मिन्व्यभिचारतोमृषा नित्ये परे ब्रह्मणि केवले शिवे ॥ ३२ ॥

मृषात्वात्तज्ज्ञानस्य मृषात्वमेव । स्वप्नकाले जाग्रत्सुषुप्त्योरभावात् । जाग्रतिइतरद्वयस्याभावात् सुषुप्तावितरयोरभावात्परस्परं व्यभिचारोबोध्यः आत्मनस्तदनाश्रयत्वंविशेषणैराह । नित्येउत्पत्तिनाशशून्येपरेगुणत्रयातीते ब्रह्मणिव्यापकेकेवलेऽसङ्गेशिवआनन्दरूपे एवंभूतेसदैकरसेपरस्परव्यभिचारधर्माभानमसंभवीति भावः ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसाज्यत्वायसंसारमूलभूतांवृत्तिमाह । देहेति । एषांसङ्घातइतरेतराध्यासविषयात् अजस्रंसावाद्धियो बुद्धेर्वृत्तिस्तमोमूलतयाऽज्ञ लक्षणाऽज्ञत्वज्ञापिका यावत्परिवर्तते तावद्भवोद्भवःसंसारोद्भवोभवेत् । तमःपदंरजसोऽप्युपलक्षणम् । रजस्तमःप्रधाना बुद्धिः संसारहेतु

देहेन्द्रियप्राण मनश्चिदात्मनां सङ्घादजस्रं परिवर्तते धियः ॥
वृत्तिस्तमोमूलतयाऽज्ञलक्षणा यावद्भवेत्तावदसौ भवोद्भवः॥३३॥

त्वात्सर्वथात्याज्येति भावः ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत महावाक्यविचारस्य कर्तव्यमाह । नेतीति । अथात आदेशोनेतिनेति इति प्रमाणेननिराकृतं मिथ्यात्वेनगृहीतमखिलंजगत्येनसः ततोहृदासत्त्वप्रधानेनमनसासम्यगास्वादितं चिल्लक्षणंघनामृतंदुःखासंभिन्नंसुखंयेनसः । स्वर्गादितुपरिणामदुःखत्वात्तत्संभिन्नमेव । एवंभूतोऽशेषंजगदेहेन्द्रियादिदृश्यसमूहंत्यजेत् हानोपादानबुद्धिविषयंनकुर्यात् । किन्तूदासीनस्तत्रभवेत् । ननुदेहेन्द्रियादिभिरेवतज्ज्ञान

नेतिप्रमाणेन निराकृताखिलो हृदासमास्वादितचिद्घनामृतः ॥ त्यजेदशेषं जगदात्तसद्रसं पीत्वा यथाऽम्भः प्रजहाति तत्फलम् ॥ ३४ ॥

लाभात्कथमुपजीव्यस्यत्यागइत्याशङ्क्यदृष्टान्तदर्शनेनपरिहराति । यथातृषावानआत्तः सद्रसोमाधुर्यंयेनताद्दशं नारिकेलनारङ्गादि फलान्तवर्त्यम्भःपीत्वा तत्स्थानभूतंतत्फलं जहाति तत्रोदासीनोभवति तद्वत्सर्वदृश्यसारांशोब्रह्मतल्लाभसतिनिः सारंदृश्यंनोपादेयंनापिहेयमितिभावः । यतोभयादिसंभावनातद्धेयमित्युच्यते ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतरस्यानित्यत्वेनतत्रवैराग्यार्थमात्मनएवनित्यत्वमाह । कदाचिदिति । कदापीत्यर्थः । अनवः उत्पत्त्यनन्तरंविद्यमानोहिनवः । तेन जन्मानन्तरास्तित्वंव्यावर्तितं नवत्वाभावेनैवजीर्णत्वाभावादवस्थान्तरापत्तिरूप परिणामोऽपिनिरस्तः ।अनेनअस्तिजायतेवर्द्धतेविपरिणमतेऽपक्षीयते नश्यतीति षड्भाव विकार राहित्यमुक्तम् । एवंचैतद्भिन्नं सर्वमुक्तषड्भावविकारवत्त्वादनित्यमिति ततोविरज्येतेतिबोधित-

कदाचि दात्मान मृतोनजायते नक्षीयते नापिविवर्धतेऽनवः ॥
निरस्तसर्वातिशयः सुखात्मकः स्वयम्प्रभः सर्वगतोऽयमद्वयः ३५

म् । यतऽईदृशोऽतएवनिरस्तः सर्वस्यदेहेन्द्रियादेरतिशयोमहत्त्वं येनस्वलाभात्सः यल्लाभान्नापरोलाभइतिःश्रुतेः यतःसुखात्मकः आनन्दस्वरूपः स्वयम्प्रभःस्वप्रकाशकश्च देहेन्द्रियादिस्तु दुःखस्वरूपः परप्रकाश्यश्च । यस्यभासासर्वमिदंविभाति । इतिश्रुतेः । सर्वगतोव्यापकः अयमहंबुद्धिविषयःप्रत्यगात्माऽपिअद्वयः उक्ताद्वयब्रह्मस्वरूपएव । नततोऽतिरिक्तइतिभावः । अयमात्माब्रह्म । इतिश्रुतेः ॥ ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुएवंविधेविकारशून्येआत्मनिजन्ममरणादिप्रवाहरूपसंसारभानंकथमितिशङ्कते। एवंविधेइति।दुःखमयःदुःखप्रचुरः।उत्तरयाति। अज्ञानतइ तिअज्ञानमूलकोयोध्यासोदेहान्तःकरणादौअहंममेत्यध्यासस्तद्वशात्। एवंचभ्रान्तिरूपातत्प्रतीतिरितिभावः। नन्वेवंकथंतस्यसंसारस्यनि

एवंविधे ज्ञानमये सुखात्मके कथंभवो दुःखमयःप्रतीयते ॥
अज्ञानतोऽध्यासवशात्प्रकाशतेज्ञानेविलीयेत विरोधतःक्षणात्॥
॥ ३६ ॥

वृत्तिस्तत्राह। ज्ञानेनि। आविर्भूतइतिशेषः। ज्ञानस्याज्ञानविरोधित्वात्तदुत्पत्तिक्षणएवकारणभूताज्ञाननाशात्तत्कार्यसंसारस्यापि वि लयइत्यर्थः। यथारज्जुज्ञाननरज्जौसर्पस्यलयइत्यर्थः ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाध्यासलक्षणमाह । यदन्यदिति । यदन्यत्सर्पादिकमन्यत्ररज्ज्वादौ भ्रमात्भ्रमजनकाद्दोषाद्विभाव्यतेविज्ञायतेअमुंविपश्चितोविद्वांसोऽध्यासइत्याहुः । यथाऽसर्पभूतेरज्ज्वादौ अहिविभावनंसर्पारोपोरज्ज्वबुद्धिमूलकस्तद्वदीश्वरेऽपिजगदेहादिसंसारात्मकंसर्वंविभाव्य-

यदन्यदन्यत्र विभाव्यते भ्रमादध्यासमित्याहुरमुंविपश्चितः॥
असर्पभूतेऽहिविभावनंयथा रज्ज्वादिकेतद्वदपीश्वरेजगत्॥३७॥

तेआत्मज्ञानाभावात्त्वयार्थतयाज्ञायते ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनिजगद्धानेकीदृशोऽध्यासोनिमित्तंतदाह विकल्पेति सर्वविकल्पकारणमायारहितेवस्तुतस्तत्सङ्गरहितेचिदात्मकेचित्स्वरूपेसर्वकारणानिरामयेदुःखासंभिन्नानन्दमयेकेवलेसर्वविकारशून्यपरेदृश्यविलक्षणेब्रह्मणिव्यापके आत्मनिप्रथममहङ्कारः कल्पितः सएवाध्यासः ।

विकल्पमायारहितेचिदात्मके ऽहङ्कारएष प्रथमः प्रकल्पितः ॥
अध्यासएवात्मनिसर्वकारणे निरामयेब्रह्मणि केवलेपरे ॥ ३८॥

अहंबुद्ध्यात्मकोऽध्यासएवसर्वसंसारकारणमितिभावः ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बुद्धिनिष्ठएवसंसारोनत्वात्मनिष्ठइत्यत्रान्वयव्यतिरेकौप्रमाणयति। इच्छादीति। परेसर्वसाक्षिणिआत्मनिसंसृतिहेतवःभासमानसंसारकारणं सदाकालत्रयेऽपिइच्छादिरागादिसुखादिधार्मिकाः इच्छाप्रेक्षेरागद्वेषौसुखदुःखंइत्येवमादिद्वन्द्वधार्मिकाःधियएवधीषुसतीषुसंसारइत्यन्वयमु

इच्छादिरागादिसुखादिधार्मिकाः सदा धियः संसृतिहेतवः परे ॥
यस्मात्प्रसुप्तौतदभावतःपरः सुखस्वरूपेणविभाव्यतेहिनः॥३९॥

क्त्वातद्व्यतिरेकमाहयस्मात्कारणात्प्रसुप्तौतदभावात्तधीवृत्त्यभावात परआत्मानोऽस्माभिःतृतीयार्थेषुषष्ठी। सुखरूपेणस्वस्वरूपमात्रेणाविभा व्यतेनिश्चीयते नतु संसारित्वेनेतिभावः सुप्तोत्थितस्तुसुखमहमस्वाप्समितिप्रत्यभिज्ञानुभवात्तदात्मस्वरूपनिश्चयोऽस्तीतितात्पर्यम् ॥ ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथपुनस्तत्त्वं पदार्थस्वरूपमाह ।अनादीति।अनादिर्याऽविद्यातत उद्भवोयस्या बुद्धेरन्तःकरणस्यतत्रबिम्बितःप्रतिबिम्बितश्चितःप्रकाशः सजीवइतीर्यते आत्मापरात्माधियः साक्षितयाधीधर्मासङ्गेनैवपृथक्स्थितः । अन्तर्यामितयेत्यर्थः जीवोऽहंसुखीत्यादिप्रकारेणान्तःकर

अनाद्यविद्योद्भवबुद्धिबिम्बितोजीवप्रकाशोऽयमितीर्यते चितः॥ आत्माधियः साक्षितया पृथक् स्थितो बुद्ध्या परिच्छिन्नपरः सएव हि॥ ४० ॥

णधर्माध्यासवान्परमात्मातु साक्षितयासर्वत्रविद्यमानोऽपिनतथेतिभावः। अतएवबुद्ध्यापरिच्छिन्नपरः बुद्धिलक्षणपरिच्छेदरहितःअतएव परः। एवंचज्ञानेनप्रतिबिम्बाधार विलयप्रतिबिम्बस्यविलयात्सजीवः सएवपरमात्मैवहिप्रसिद्धं सइत्यस्यचावृत्तिर्वोध्या ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ बुद्ध्यात्मनोःपरस्पराध्यासवशात् परस्परधर्मभानमितिदार्ढ्यायपुनराह । चिद्बिम्बेति । चिद्रात्मचेतसोरन्योन्याध्यासवशात् पर स्परतादात्म्यारोपाज्जडाजडत्वंप्रतीयते । चेतसोवृत्तीनांज्ञानत्वं जीवात्मनोजडत्वंप्रतीयते । अतएवज्ञानाश्रयआत्मेति चितएवता।किं कर्तृव्यवहारः । जीवात्मनिजडात्मनिजडात्माकथ्यते बुधैरितिस्मार्तव्यवहारश्च । अत्रहेतुः । चिदित्यादि । चिद्बिम्बस्यमाचिदाभासः अ

चिद्बिम्बसाक्ष्यात्मधियांप्रसङ्गतस्त्वेकत्रवासादनलाक्तलोहवत् ॥
अन्योऽन्यमध्यासवशात्प्रतीयते जडाजडत्वंचचिदात्मचेतसोः

॥ ४१ ॥

क्षैःमहितः साक्षःसेन्द्रियः सचासावात्मामनःधीरन्तःकरणंतेषांप्रकृष्टसङ्गादतिसन्निकर्षादध्यासइत्यर्थः । अनलाक्तलोहवत् अग्नितप्तलो हपिण्डवत् अत्रदृष्टान्तः । अग्निधर्मोदाहकत्वं लोहधर्मश्चवर्तुलत्वाद्यनलेभासते । तत्रहेतुरेकत्रवासात् परस्पराविभागेनवृत्तेरित्यर्थः । तद्व द्वतयोरपि परस्परधर्माध्यासइत्यर्थः ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं दार्ढ्यार्यपुनराह । गुरोरिति । वेदवाक्यतइत्यनेन श्रवणंगुरोःसकाशादपि । ततश्चानेनमननमुक्तम् । ताभ्यांसञ्जातोविद्यया ज्ञानरूपस्यात्मनोऽनुभवोयस्यसः । अनेनकृतनिदिध्यासनइत्यर्थः । तं चिदानन्दस्वरूपं स्वात्मानमुपाधिवर्जितं रहितोपाधिधर्ममात्मस्थं

गुरोःसकाशादपिवेदवाक्यतः सञ्जातविद्यानुभवोनिरीक्ष्य तम् ।
स्वात्मानमात्मस्थमुपाधिवर्जितं त्यजेदशेषं जडमात्मगोचरम् ॥ ४२ ॥

हृत्स्थंनिरीक्ष्य अपरोक्षीकृत्याशेषंजडं दृश्यंत्यजेत् । तत्रोदासीनोभवेदिति भावः ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञेयंनिरुपाधिकं स्वरूपंश्लोकद्वयेनाह प्रकाशेति अहंप्रकाशरूपः स्वप्रकाशः परप्रकाशहीनः परप्रकाशरूपोयथाघटादिः अजोजन्मादि
हीनः अद्वयःसजातीयद्वितीयरहितः अभक्तद्विभातः सकृदपिपरेणभासकान्तरेणप्रकाशितः सकृद्विभातः नसकृद्विभातोसकृद्विभातः नत

प्रकाशरूपोऽहमजोऽहमद्वयोऽसकृद्विभातोऽहमतीवनिर्मलः ॥
विशुद्धविज्ञानघनोनिरामयःसम्पूर्णआनन्दमयोऽहमक्रियः॥४३॥

त्रसूर्योभातिनचन्द्रतारकमितिश्रुतेः नतद्भासयतेसूर्यइतिस्मृतेश्च अतीवनिर्मलः मायाकृतावरणविक्षेपरहितः विशुद्धविज्ञानघनः विशुद्धचि
देकरसः निरामयःकर्तृत्वाभिमानरहितः सम्पूर्णःदेशकालपरिच्छेदहीनः आनन्दमयः आनन्दरूपः स्वार्थेमयट् अक्रियः परिणामहीनः
॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदैवेति अहंसदैवकालत्रयेऽपिमुक्तःसर्वधर्मरहितः अचिन्त्यशक्तिमान् यः परमात्मा अतिन्द्रियज्ञानम् इन्द्रियातिरिक्तज्ञानरूपःयतोवाचो निवर्त्तन्ते अप्राप्यमनसासहइतिश्रुतः अविक्रियात्मकोऽपरिणामी अनन्तपारःअन्तःकालतःपारःपरन्तीरन्तावविद्यमानौ यस्य तेनदेश

सदैवमुक्तोऽहमचिन्त्यशक्तिमानतीन्द्रियज्ञानमविक्रियात्मकः॥
अनन्तपारोऽहमहर्निशंबुधैर्विभावितोऽहंहृदिवेदवादिभिः ॥४५॥

कालपरिच्छेदहीनः ईदृशोयःपरमात्माबुधैर्हृदि अहर्निशंविभावितः सोऽहमित्यर्थः ॥ ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवभावनायाःफलमाह एवमिति उक्तरीत्यासदाआत्मानं अखण्डितात्मनाविषयानाकृष्टचित्तेन विचारमाणस्यध्यायतः धातूनामनेकार्थ
त्वात् चरमाणएवचारमाणःस्वार्थेऽण् विशुद्धभावनाब्रह्माकारान्तः करणवृत्तिरुदंतीतिशेषः साचेत्सिद्धाकारकैर्देहान्तरप्रापककर्मभिः स स॰

एवंसदात्मानमखण्डितात्मनाविचारमाणस्यविशुद्धभावना ॥
हन्यादविद्यामचिरेणकारकैरसायनंयद्वदुपासितंरुजः ॥ ४५ ॥

हाविद्यामचिरेणशीघ्रमेवहन्यात् यथापामितंसेवितंरसायनं रुजोहन्यात्तद्वत् ॥ ४५ ॥ ॥ २२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रध्यानेइतिकर्तव्यतामाह विविक्तइति निर्जनइत्यर्थः आसीनोयथोचितपद्मासनाद्युपविष्टः उपारतेन्द्रियः तेनशमदमादिसम्पन्नः विनि र्जितात्माप्राणायामादिभिर्जितान्तःकरणः अतएवविमलान्तराशयोविशुद्धचित्तः विज्ञानदृक्विज्ञानएवदृक्भानंयस्यसः द्रष्टृदृश्यभा

विविक्तआसीनउपारतेन्द्रियोविनिर्जितात्माविमलान्तराशयः॥
विभावयेदेकमनन्यसाधनोविज्ञानदृक्केवलआत्मसंस्थितः॥४६

नरहितः अनेननिर्विकल्पकसमाधिरुक्तः अनन्यसाधनः तत्त्वज्ञानातिरिक्तमुक्तिसाधनास्तित्वभ्रमरहितः केवलोऽसङ्गःआत्मसंस्थितः आत्मन्येवसंस्थासमाप्तिः सञ्जातायस्यसतेन नकदापिविषयान्तरसञ्चारवच्चित्तः विभावयेत् ध्यायेत् ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंच यदेतत्भूतंभविष्यद्वर्तमानं विश्वंपरमात्मादर्शनंभासकोयस्यतत् तस्यभासासर्वमिदंविभातीति श्रुतेः तत्सर्वकारणेमायासान्निधाना
त्सर्वोपादानत्वेनाभिमतेआत्मनिविलापयेत् उपादानसत्ताव्यतिरेकेणकार्यसत्तांनपश्येत् तादृशस्यलक्षणमाह सम्पूर्णः अवाप्तसमस्तका

विश्वंयदेतत्परमात्मदर्शनं विलापयेदात्मनि सर्वकारणे ॥
पूर्णश्चिदानन्दमयोऽवतिष्ठते न वेद बाह्यं न च किञ्चिदान्त
रम् ॥ ४७ ॥

मः तस्यकाम्याभावात् चिदानन्दमयः तद्रूपोऽवतिष्ठते बाह्यमान्तरंच दृश्यंनजानाति सर्वत्रब्रह्मदर्शनादिति भावः ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाधिसिद्धेः पूर्वंयत्कर्तव्यंतदाह । पूर्वमिति । समाधेः सकलविषयव्यासङ्गनिवृत्तिपूर्वकं ब्रह्माकारवृत्तिः समाधिस्ततः पूर्वमखिलंस चराचरंजगत् ओङ्कारमात्रं विचिन्तयेत् । ओङ्कारोमीयतेऽ नयेतिमात्रा प्रमाणं बोधकत्वेन परिच्छेदकोयस्यतथाजानीयात् । तदेववित्रृ

पूर्वं समाधे रखिलं विचिन्तये दोङ्कारमात्रं सचराचरं जगत् ॥ तदेव वाच्यं प्रणवो हि वाचको विभाव्यते ज्ञानवशान्न बोधतः ॥ ४८ ॥

णोति तदेवेति । जगदेवेत्यर्थः । प्रणवोवाचकोविभाव्यतेएतत्राहिप्रसिद्ध इत्यर्थः । इयंभावनाज्ञानवशादेवनबोधकः । बोधोनिर्विशेषब्रह्मसाक्षात्कारस्तदुत्तरंनेत्यर्थः । तस्यसर्ववृत्त्युपमर्दकत्वात् ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमर्थंविवृणोति । अकारंति । अकारसञ्ज्ञस्तद्वाच्यःपुरुषोहिविश्वकोविश्वएवविश्वकः विश्वशब्देनपरिभाषितःअयंजाग्रत्साक्षीविराट् ततःस्वप्नसाक्षीतैजसःतेनपदेनपरिभाषितःलिङ्गदेहाभिमानीहिरण्यगर्भउकारकः उकारप्रतिपाद्यईर्यते । ततः सुषुप्तिसाक्षीप्राज्ञपदवाच्यो

अकारसञ्ज्ञः पुरुषो हि विश्वको ह्युकारकस्तैजसईर्यते क्रमात् प्राज्ञो मकारः परिपठ्यतेऽखिलैः समाधि पूर्वं न तु तत्त्वतो भवेत् ॥ ४९ ॥

मायोपाधिकोमकारस्तद्वाच्यः परिपठ्यतेऽखिलैर्वेदैः । इयंभावनासमाधिपूर्वंसमाधेःपूर्वमेव नतत्त्वतः तत्त्वसाक्षात्कारेसतिनभवेत् । सर्वस्यब्रह्मणिप्रविलयात् ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाविलापन प्रकारमाहद्वाभ्याम् । विश्वंत्विति । उकारमध्ये बहुधाव्यवस्थितं स्थूलदेहनिबंधनंस्थूलदेहाभिमानेन स्थितं विश्वम्पुरुषंतद्वाचकमकारम् च विलापयेत् । तुश्चार्थे । विलीनम्भावयेत् ततस्तैजसंसलिङ्गदेहाभिमानिनम् पुरुषं तद्वाचकंप्रणवद्वितीय वर्णमुकारं विलीनविश्वकम्मकारे विलाप्याविलीनम्भावयित्वा ॥ ५० ॥

विश्वं त्वकारं पुरुषं विलापयेदुकारमध्येबहुधा व्यवस्थितम् ।
ततो मकारे प्रविलाप्यतैजसंद्वितीयवर्णं प्रणवस्य चान्तिमे ॥५०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततस्तादृशंमकारंतद्वाच्यंप्राज्ञंचकारणंकारणत्वाभिमानिनंपुरुषमिहात्मनि चिद्घनेपरे विलापयेत् तथाभावयेत् । ततः सोऽहंसर्वविला पाधिष्ठानंपरब्रह्मविभावयेत् । तद्विशिनष्टि । सदाविमुक्तिमत् नित्यमुक्तम् । नन्वहंपदार्थस्यरागद्वेषादिमलिनस्यकथं ब्रह्मत्वभावनेत्या

मकारमप्यात्मनि चिद्घने परे विलापयेत्प्राज्ञमपीह कारणम् ।
सोऽहं परं ब्रह्म सदा विमुक्तिमद्विज्ञानदृङ्मुक्त उपाधितोऽमलः ॥ ५१ ॥

शङ्क्याहंपदार्थंविशिनष्टि । उपाधितोमुक्तः अतएवामलःतथाभावनेसाधनं विज्ञानदृक्विज्ञानं ब्रह्ममात्रप्रत्ययाविच्छेदरूपादृक् निदिध्यासनं सत्साक्षात्कारेसाधनंयस्यसः ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंभावनावतोलक्षणमाह । एवमिति । उक्तप्रकारेणसदाजातापरमात्मन्येकभावना यस्यसः परिविस्मृतमखिलंपुत्रदेहादियेनसः । अत
एवस्वस्वरूपानन्देनैवतुष्टःनतुविषयानन्देन । तस्यपरिणामेदुःखरूपत्वात्ततो विरक्तइत्यर्थः । साक्षान्नित्यात्मनिसुखप्रकाशकः साक्षा

एवं सदा जातपरात्मभावनः स्वानन्दतुष्टःपरिविस्मृताखिलः ॥
आस्ते स नित्यात्मसुखप्रकाशकः साक्षाद्विमुक्तोऽचलवारिसि
न्धुवत् ॥ ५२ ॥

दौपाधिकनामरूपभेदराहित्येननित्समखण्डितमात्मस्वरूपंयत्सुखंप्रकाशश्चतद्रूपः एवंरूपो विमुक्तोजीवन्मुक्तः । अचलंनिश्चलंवारियि
स्यताद्दशसिन्धुवदास्ते । विषयसम्बन्धरूपलहरीरहितआस्तइत्यर्थः ॥ ५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशस्यमत्प्राप्तिर्भवत्येवेत्याह । एवमिति । उक्तप्रकारेणसदाऽभ्यस्तसमाधियोगिनः निवृत्ताःसर्वेषामिन्द्रियाणांगोचराविषयाःशब्दादयो यस्य विनिर्जिताअशेषारिपवःकामादयोयेनतस्य । तज्जयेनविषयेष्वन्तःकरणाप्रवृत्तेः । अतएव सर्वज्ञत्वनित्यत्वनित्यतृप्तत्वबोध

एवं सदाऽभ्यस्तसमाधियोगिनो निवृत्तसर्वेन्द्रियगोचरस्य हि ॥ विनिर्जिताशेषरिपोरहंसदा दृश्यो भवेयं जितषड्गुणात्मनः ॥५३ ॥

रूपत्वस्वतन्त्रत्वनित्यमलुप्तत्वानन्तरूपाषड्गुणायस्यतादृशआत्माजितो वशीकृतोयेनतस्य सदादृश्योभवेयम् । एतेनमद्भक्तस्ययोगिनो ऽहंदृश्योनतुभक्तिविमुखस्येति सूचितम् ॥ ५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंविधोजीवन्मुक्तःप्रारब्धवशेन अनभिमानोभोगानश्नँस्तिष्ठेत् ततोमय्येवाविलीयते मद्रूपोभवतीत्याह । ध्यात्वैवमिति ॥ ५४ ।

ध्यात्वैवमात्मानमहर्निशं मुनिस्तिष्ठेत्सदा मुक्तसमस्तबन्धनः ॥
प्रारब्धमश्नन्नभिमानवर्जितो मय्येवसाक्षात्प्रविलीयते ततः ५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सर्वधर्मापेक्षयाऽयमेवधर्मोज्यायानित्याह । आदौचेति । भवसंसारमादिमध्यान्तमानेषुमर्वथाभयशोकयोः कारणंविदित्वातत्कारणी
भूतंविधिवादैर्यजेतेत्यादिभिश्चोदितंबोधितंसमस्तंकर्ममार्गकाम्यंहित्वा अखिलात्मनांजीवानांस्वरूपभूतंमामात्मानं परमेश्वरंभजेत् । य

आदौ च मध्ये च तथैव चान्ततो भवं विदित्वा भयशोक कार
णम् ॥ हित्वा समस्तं विधिवादचोदितं भजेत्स्वमात्मान मथा
खिलात्मनाम् ॥ ५५ ॥

थाधनस्यार्जनेनादौदुःखंमध्येपालनकृतं तत्र राजादिकृतं भयमन्तेनाशेशोकपर्यवसायिदुःखमेवं पदार्थमात्रेद्रष्टव्यम् ॥ ५५ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मय्यभेदभावनया नामरूपाविभागेन तद्रूप एवभवतीत्यमुमर्थं सदृष्टान्तमाह । आत्मनीति । आत्मनिसर्वाधिष्ठानेमयिइदंस्वस्वरूपं जीवमभेदेनविभावयन्यदा । तिष्ठतीतिशेषः । तदामयात्मनापरमेश्वरेणाऽभेदेनभवति अभिन्नोभवति । तत्रदृष्टान्तः यथासमुद्रेप्रविष्टं नद्यादि

आत्मन्यभेदेन विभावयन्निदं भवत्यभेदेन मयाऽत्मनातदा ॥
यथाजलं वारिनिधौ यथापयः क्षीरेवियद्व्योम्न्यऽनिले यथाऽनिलः ॥ ५६ ॥

जलंसमुद्रएव यथाक्षीरेगवादिक्षीरेप्रक्षिप्तंपयःक्षीरमेव यथाव्योम्निमहाकाशेघटाद्यवच्छिन्नाकाशोघटादिभङ्गे च यथाचर्मभस्त्रिकाद्यवच्छिन्नोवायुरनिलेमहावायौ नामरूपाविभागेनैकीभवतीत्यर्थः ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कारणंविदित्वातत्कारणी

एवमात्मतत्त्वज्ञस्य जगत्सत्यत्वभ्रमःस्वतएवापैतीत्याह । इत्थमिति । हिरण्यर्थे । लोकसंस्थितोऽपिजीवन्मुक्तिदशायांप्रारब्धवशाल्लोक व्यवहारंकुर्वन्नपिजगन्मृषैवेतिविभावयन्सन् यदियदा इत्थमीक्षते ऐकात्म्यं जानीयात्तदा निवृत्तजगत्सत्यत्वभ्रमो भवतीति शेषः। तत्र हेतुः श्रुतियुक्तिमानतोनिराकृतत्वात् । अतोऽन्यदार्तमित्यादिश्रुतिरूपात् जगन्मिथ्यादृश्यत्वात् शुक्तिरजतवादितितदुपबृंहितानुमानरू

इत्थं यदीक्षेत हि लोकसंस्थितो जगन्मृषैवेतिविभावयन्मुनिः॥
निराकृतत्वाच्छ्रुतियुक्तिमानतो यथेन्दुभेदो दिशि दिग्भ्रमादयः॥ ५७ ॥

पात्मानतःप्रमाणतोनिराकृतत्वात् तत्रदृष्टान्तोयथेन्दुभेदः एकचन्द्रेद्विचन्द्रत्वभ्रमस्तदेकत्वज्ञानेननिवर्तते यथाच दिशिप्राच्यादौअन्यदिक्त्वभ्रमः सोऽपितत्त्वज्ञानान्निवर्तते । एवंभ्रमतःपुरुषस्य दिक्षुभ्रमणाद्भ्रमोनिकटवर्तिवृक्षादौच भ्रमणभ्रमस्तत्स्थैर्यज्ञानेन निवर्तते तद्वत् ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशज्ञानेमदाराधनमेवोपायइत्याह । यावदिति । अखिलं जगन्मदात्मकंमदधिष्ठानकंमाद्विवर्तभूतंयावन्नपश्येत्तावन्मत्प्राप्त्येश्रद्धालुः भगवदाराधनमेवज्ञानप्रापकमित्यत्र दृढविश्वासवान् अतिशयेनोर्जितावृद्धिमतीभक्तिर्मयिभगवतिपूज्यताबुद्धिरूपालक्षणं चिह्नंयस्यसः ।

यावन्नपश्येदखिलं मदात्मकं तावन्मदाराधनतत्परो भवेत् ॥
श्रद्धालुरत्यूर्जित भक्तिलक्षणो यस्तस्य दृश्यो ऽहमहर्निशं हृदि ॥ ५८ ॥

तावन्मदाराधननिष्ठोभवेत् एवंहितस्यहृदि अहमहर्निशंदृश्योभवामियेयथामांप्रपद्यन्ते तांस्तथैवभजाम्यहमितिस्मृतेः ॥ ५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वोक्तवचनजातस्य श्रुतिसमत्वं कथमेतदालोचनमपिमदाराधनप्रतिबन्धकदुरितध्वंसोपायइत्याह रहस्यमिति । श्रुतिसारसङ्ग्रहत्वेनाति

रहस्यमेतच्छ्रुतिसारसङ्ग्रहं मया विनिश्चित्य तवोदितं प्रिय ॥
यस्त्वेतदालोचयतीहबुद्धिमान् स मुच्यते पातकराशिभिः
क्षणात् ॥ ५९ ॥

गोपनीयता अप्रमाणशङ्काकलङ्कराहित्यंसूचितम् । आलोचयतिसम्यग्विचारयति ॥ ५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ भगवानुक्तमेवार्थसङ्क्षेपेण दार्ढ्यायपुनराह भ्रातरिति । यदीतियादित्यर्थे । यदीदंजगत् परिदृश्यते तत्सर्वंमायैवेतिज्ञात्वेति शेषः चेतसासर्वंपरिहृत्यतत्रौदासीन्यंकृत्वामद्भावनयामदैक्यभावनया भावितंशुद्धंमानसंयस्यताहृशास्तिष्ठ । इत्युपदिश्याशिषंमाह निरामयः

भ्रातर्यदीदं परिदृश्यते जगन्मायैव सर्वं परिहृत्य चेतसा ॥ मद्भा
वनाभावितशुद्धमानसः सुखी भवाऽऽनन्दमयो निरामयः ६०

सन्मुखीभव । सर्वदुःखनिवृत्त्येतिभावः । ततोऽन्तरङ्गामन्यामाशिषमाह आनन्दमयोभवेति तद्रूपोभवेत्यर्थः । यद्यपिपूर्वमानन्दरूपत्वमस्त्ये वतथाऽपितत्प्राप्तिर्विस्मृतकंठस्थभूषणप्राप्तिवत ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंरीत्याम्बोपासकस्यलोकपावनत्वमाह। यइति । कदावा यदाकदाचिदित्यर्थः । हृदानिर्मलेनान्तःकरणेन यो मामगुणं प्राकृतसत्त्व रजस्तमोरूपगुणरहितम् । सच्चिदानन्दरूपत्वात् । अतएवगुणादव्याकृतात्परंमायातीतम् । यद्विवायद्वृत्यर्थे । गुणात्मकं सर्वज्ञत्वा-दिलोकोत्तरलावण्यादिगुणवानात्मामूर्तिर्यस्यतं दृश्यमानं रूपं सेवते । सद्विविधोऽप्युपासकःअहं मत्स्वरूपएव । मामकइत्यर्थोवा । प्रि-

य: सेवते मामगुणं गुणात्परंहृदा कदा वा यदि वा गुणात्मकम् ॥ साऽहंस्वपादाञ्चितरेणुभिः स्पृशन्पुनाति लोकान्त्रितयं यथा रविः ॥ ६१ ॥

योहिज्ञानिनोऽत्यर्थमहंसचममप्रिय इत्युक्तेः । तादृशोभक्तःस्वपादलग्नरेणुभिःसंस्पृशन्लोकत्रयमपि पुनाति । अज्ञानध्वान्तनिरसने नपवित्रीकरोति । यथारविःस्वकरैर्जगद्वितिमिरीकरोति तद्वत् ॥ ६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानीमेतद्ग्रन्थार्थालोचनासमर्थस्यपाठमात्रतोऽपिमहत्फलमाह । विज्ञानंविज्ञानजनकं करणंव्युत्पत्त्यंतिबोध्यम् । वेदान्तैरुपनिषद्वाक्यै
र्वेद्यंचरणंजगज्जन्मादिलक्षणंकर्मयस्यतेन ननुपाठमात्रादेतादृशमहत्फलप्राप्तिःकथमित्याशङ्क्यभवत्येवेति सूचयंस्तत्रहेतुमाह । मद्वचने

विज्ञानमेतदखिलंश्रुतिसारमेकं वेदान्तवेद्यचरणेनमयैवगीतम् ।
यःश्रद्धया परिपठेद्गुरुभक्तियुक्तो मद्रूपमेति यदि मद्वचनेषुभक्तिः
॥ ६२ ॥ इतिश्री अध्यात्मरामायणे रामगीता समाप्ता ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसम्वादे उत्तरकाण्डे श्रीरामगीतायां पञ्चमःसर्गः ॥ ५ ॥

षुभक्तिर्विश्वासोयदीतिअर्थाद्गुरुवाक्यविश्वासस्यैव फलदायकत्वादितिभावः ॥६२॥ इत्यध्यात्मरामायणेउमामहेश्वरसम्वादे उत्तरकाण्डे
सेतौपञ्चमःसर्गः ॥ ६२ ॥ श्रीरामचन्द्रार्पणमस्तु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीराममन्त्रःखलु तारकाख्यः संसारसन्तारणसुप्रसिद्धः ॥ भक्-
त्याऽप्यभक्त्या समुपासितोयः श्रेयांसि सर्वाणि ददात्यवश्य
म् ॥ १ ॥ तन्तारकंसम्प्रतिपादयन्ती श्रीरामगीता सकलैः सुसे
व्या ॥ विज्ञप्तिमित्थंजनको विनीतः समर्पयत्यार्यजनेषुहर्षात् २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प,	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति
स्यर्द्धि	स्पर्द्धि	१	२	१	शाधि	शाधि	३	२	६	नाशे	नाशो	६	१	१
जीव्य	जीन्य	१	२	३	व्यत्र	व्यव	४	१	१	नन्वितिश	नन्वितिशे	६	२	१
सम्बीन्धनीः	सम्बन्धिनीः	२	२	१	ष्ठामे	ष्ठानमे	४	२	३	त्रिदा	विदा	६	२	२
व्रह्म	व्रह्म	२	१	२	व्रह्म	व्रह्म	४	२	१	मेवे	मेव	६	२	२
व्रह्म	व्रह्म	२	१	६	वलेन	बलेन	४	२	७	व्येतीत	व्यतेति	७	१	१
वोधोऽसि	वोधोऽसि	३	१	४	निघृत्ते	निवृत्ते	५	१	१	बीरहा	वीरहा	७	१	१
संवन्ध	सम्बन्ध	३	१	७	कत्व	कत्वा	५	१	१	सद्दष्ट	सद्द्दष्ट	८	१	३
भवस्यंससार	भवस्यसंसार	३	२	१	नक	नैक	५	१	१	त्रिशुद्धं	विशुद्ध	८	२	१
न्सार	सार	३	२	२	बेदान्त	वेदान्त	५	१	१	कारांतः	कारान्तः	८	२	२
पर्वग	पवर्ग	३	२	२	पूर्वे	पूर्वे	५	१	२	वृत्ति	वृत्ति	९	१	१
बारिधि	वारिधि	३	२	२	बुद्ध्या	बुद्ध्या	५	१	६	स्वत्राना	स्वना	९	२	१
					एवं	एव	५	१	६	वृत्यु	वृत्यु	१०	१	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
रीप	रपि	११	२	१
नर्द्दिष्टा	र्निद्दिष्टा	१२	१	४
वर्द्धि	वर्द्धि	१२	१	७
त्याभि:	त्माभिः	१२	२	६
शुद्द	शुद्ध	१३	१	१
जीवया	नीवयो	१३	१	२
निर्वाध	निर्बाध	१४	१	१०
भब	भव	१५	१	४
अर्जोद्रू	अर्जोऽद्रू	१६	२	६
द्वात्	द्वाव्	१७	२	१

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
ह्लाभ	ह्लाभे	१८	१	८
इतिः	इति	१८	२	२
ज्ञानन	ज्ञानेन	१९	१	१
वुद्दया	वुद्धया	२०	१	५
रागादि	रागादे	२१	१	३
त्रिलय	विलय	२१	१	७
धम	धर्म	२१	२	१
म्वस्य	म्वंयस्य	२१	२	२
वुवै	बुधै	२३	१	५
एव	एवं	२३	२	१
द्रष्ट	द्रष्टृ	२४	१	२

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
बिभाव्यत्	विभाव्यते	२५	१	४ मु
लिङ्गद	लिङ्गदे	२६	१	२
वोधकः	वोधतः	२५	१	६
त्रिज्ञानं ब्रह्म	विज्ञानंनिदि ध्यासनं ब्रह्म	२६	२ ६	३
भेदेरा	भेदरा	२७	१	६
रुपा	रूपाः	२७	२	१
आत्म	अत्मा	२७	२	१
म्रुनिति	मुनास्ति	२८	१	२
भव	भवं	२८	२	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
तदकत्व	तदेकत्व	२६	२	७	वतथाऽ	वतथाऽ	३१	१	१	मद्वचने	मद्वचने	३२	१	२
भ्रमण	भ्रमणं-	२६	२	८	कंठ	कण्ठ	३१	१	२	तन्तारकं	तत्तारकं	३२	२	३

नेपाल पाशुपत, यन्त्रालये मुद्रिता.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इती रामगीता सटीका समाप्ता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द. नं. १६६४१

अथ रामगीता सटीका प्रारभ्यते ॥

मू० ५।-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ रामंरत्नकिरीटकुण्डलयुतं केयूरहारान्वितं
सीतालङ्कृतवामभागममलं सिंहासनस्थं विभुम् ॥ सुग्रीवादि
कपीश्वरैःसुरवरैः संसेव्यमानं सदा विश्वामित्रपराशरादिमुनि-
भिः संस्तूयमानं भजे ॥ १ ॥ इतिध्यात्वा ॥ श्रीमहादेवउवाच॥

Sampurnanand Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ ध्यायेत्वाजानुबाहुं धृतशरधनुषं वद्धपद्मासनस्थं पीतंवासोवसानं नवकमलदलस्पर्द्धिनेत्रं प्रसन्नम् ॥ वामाङ्कारूढ सीतामुखकमलमिलल्लोचनं नीरदाभं नाना लङ्कारदीप्तं दधतमुरुजटामण्डलं रामचन्द्रम् ॥ १ ॥ ततइति जगतां यानि मङ्गलानि आनन्दास्तेषामुपजीव्यभुतं मङ्गलं ब्रह्मानन्दः सएवात्मास्वरूपं तेन तस्यैवानन्दस्यान्यानि भूतानिमात्रामुपजीवन्तीति श्रुतेः मङ्ग

ततोजगन्मङ्गलमङ्गलात्मना विधाय रामायणकीर्तिमुत्तमाम्॥ चचार पूर्वाचरितं रघूत्तमो राजर्षिवर्य्यैरभिसेवितं यथा ॥ १ ॥

लानाञ्चमङ्गलमिति स्मृतेश्च किंच जगतां मङ्गलं कल्याणं यस्मात्तादृशकल्याणरूपआत्मामूर्तिस्तया उत्तमांश्रोत्रादीनां मोक्षदत्वेना त्युत्तमां रामायणकीर्तिं वाल्मीक्यादि कृत नानाविध रामायण प्रवर्तिकां रावणवधादिजां कीर्तिंविधाय स्थितोरघूत्तमः ततः सीताप रित्यागानन्तरं पूर्वैः स्ववंशजैराचारितं प्रजापालनसत्कथाश्रवणादिकं केवलंतत्पूर्वजैरेवाचरितमितिन किंत्वन्यैरपि राजर्षिश्रेष्ठैर्य थाऽभिसेवितं तथाचचार कृतवान् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदारागुरुदेवविश्वासलक्षणमहागुणवती यद्वा उदारा दानशीलाबुद्धिर्यस्य तेन पुरातनीः प्राचीनराजसम्बन्धिनीः शुभाः धर्माधर्मनिर्णेत्रीः प्रमत्तस्य स्वगोमण्डलमिश्रितब्राह्मणगोदानात् प्रमत्तस्य नृगस्य राज्ञो द्विजस्य शापात्तिर्यक्त्वमाह तेनाज्ञातकृतब्रह्मस्वापहारेण परमधा

सौमित्रिणापृष्ट उदारबुद्धिना रामःकथाःप्राह पुरातनीःशुभाः ॥
राज्ञः प्रमत्तस्य नृगस्य शापतो द्विजस्य तिर्यक्त्वमथाह राघवः
॥ २ ॥

र्मिकस्यापीदृश्यवस्थेति सर्वथाब्रह्मस्वविमुखताधर्मइतिसूचितम् ॥ १ ॥

CC-0. In Public Domain. Digitization by eGangotri

एकान्तेविजने उपस्थितंप्राप्तम् विनयान्वितः सन् भक्त्यागुरुरयमिति बुद्ध्या प्रणम्य अनेनगुरूपसदनप्रकारउक्तः आसादितंशुद्धंभाव

कदाचिदेकान्त उपस्थितंप्रभुं रामं रमालालितपादपङ्कजम् ॥
सौमित्रिरासादितशुद्धभावनः प्रणम्यभक्त्याविनयान्वितोऽब्र-
वीत् ॥ ३ ॥

नं भावनाकरणमन्तः करणंयेनसः शुद्धान्तःकरणइतियावत् भगवदुक्तसत्कथाश्रवणेन शुद्धान्तःकरणइत्यर्थः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हे महामते महतीसर्वविषयामतिर्यस्य तस्य संबोधनं त्वं शुद्धबोधोऽसि अनवच्छिन्नचैतन्यरूपोऽसि सर्वदेहिनामात्माऽसि जीवानांतत् प्रतिविम्बत्वात् अधीशोऽसि अन्तर्यामित्वान्नियन्ताऽसि वास्तवभेदाभावाच्च सर्वात्मत्वम् औपाधिकभेदाच्च नियन्तृनियम्यभावोबोध्यः निराकृतिः अस्मदादिवत्स्वार्जितकर्माधीनशरीराकृतिरहितः नन्वेवंसर्वैः कथमेवंनज्ञायतेऽतआह ज्ञानदृशां स्वयमेवप्रतीयसे ज्ञायतेऽ

त्वं शुद्धबोधोऽसि हि सर्वदेहिनामात्माऽस्यधीशोऽसि निरा-कृतिःस्वयम् ॥ प्रतीयसे ज्ञानदृशां महामते पादाब्जभृङ्गाहितसङ्गसाङ्गिनाम् ॥ ४ ॥

नेनेतिज्ञानं वेदान्तवाक्यजातं तदेवदृक्दर्शनसाधनंयेषां तेषामितिसंबन्धसामान्येषष्ठी तैरित्यर्थः तादृशदृक्लाभश्च त्वद्भक्त्यधीनइत्याह पादेति त्वच्चरणकमलयोर्भृङ्गवदाहितःकृतः सङ्गोयेन तादृशान्तः करणसङ्गवतां त्वच्चरणकमल सल्लग्नान्तः करणवतामित्यर्थः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथ प्रार्थयते अहमिति भवस्य संसारस्यापवर्गो निवृत्तिर्यस्मात्तादृशं तव पादाम्बुजं प्रपन्नोऽस्मि शरणं प्राप्तोऽस्मि योगिभावितं योगिभिः सं
न्सारमुक्तये भावितम् अनेन तस्य भवापवर्गत्वे सदाचारः प्रमाणमुक्तम् प्रार्थनीयमाह अपारवारिधिरूपं यदज्ञानं संसारमूलकारणं यथासुखम

अहं प्रपन्नोऽस्मि पदाम्बुजं प्रभो भवापवर्गं तव योगिभावितम्॥ यथाञ्जसाज्ञानमपारवारिधिं सुखं तरिष्यामि तथाऽनुशाधि माम् ॥ ५ ॥

क्लेशेन तरिष्यामि तथा मामनुशाधि शिक्षय अपारवारिधिमित्यनेन सपारप्रसिद्धसमुद्राद्व्यतिरेक उक्तः अशक्यतरणताऽनेन ध्वनिता ॥ ५ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथोत्तरमवतारयति श्रुत्वेति रामः सौमित्रिवचः श्रुत्वा अथशब्दोवाक्यालङ्कारे तदा श्रवणाव्यवहितकाले एवप्रपन्नानां भक्तानामार्ति संसारदुःखंहरतितादृशः प्रपन्नाश्रमादिहीना भक्तानुग्रहपरा च धीर्यस्यसः क्षितिपालानां राज्ञां भूषणभूतोऽज्ञानरूपतमसउपशान्तये त

श्रुत्वाथ सौमित्रिवचोऽखिलं तदाप्राह प्रपन्नार्तिहरःप्रसन्नधीः ॥
विज्ञानमज्ञानतमोपशान्तये श्रुतिप्रपन्नं क्षितिपालभूषणः॥ ६॥

दर्थम् सन्धिरार्षः श्रुतिभिः तमेवविदित्वाऽतिमृत्युमेतीत्यादिश्रुतिभिः प्रपन्नं तत्फलकत्वेन बोधितं विज्ञानमात्मतत्वज्ञानमिति सामान्यतः प्रथमंप्राह ॥ ६ ॥

CC-0. In Public Domain. Digitization by eGangotri

अथतादृशज्ञानप्राप्त्यै क्रमेणबहिरङ्गान्तरङ्गसाधनान्याह आदाविति स्ववर्णाश्रमेषु शास्त्रेण वर्णिता याः क्रियानित्यनैमित्तकयज्ञदाना
दिरूपास्ताः कृत्वा समासादितशुद्धमानसः प्राप्तान्तःकरणशुद्धिः तत्पूर्वमुपात्तसाधनः तदनुष्ठानपूर्वकमेवउपात्तानिसाधनानि शम
दमादीनियेन तादृशः अनेनकर्मणां बहिरङ्गत्वं शमादीनामन्तरङ्गत्वं स्फुटमेवोक्तम् किंच शमदमवैराग्यदार्ढ्यपर्यन्तं कर्मानुष्ठानमेवेति

आदौ स्ववर्णाश्रमवर्णिताः क्रियाः कृत्वा समासादितशुद्धमानसः
समाप्य तत्पूर्वमुपात्तसाधनः समाश्रयेत्सद्गुरुमात्मलब्धये॥ ७॥

सूचितम् ततस्तत्कर्मानुष्ठानं समाप्य त्यक्त्वा संन्यस्येतियावत् आत्मलब्धये आत्मज्ञानाय तत्फलकाय तत्त्वमस्यादिवाक्यार्थविचारा-
य सद्गुरुं श्रोत्रियंब्रह्मनिष्ठमित्यादि लक्षणलक्षितं समाश्रयेत् सेवेत अनेनव्युत्पत्तिबलेन स्वयमेववाक्यार्थविचारः क्रियमाणो न फला-
येति सूचितम् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसारस्यभ्रमिमचक्ररूपत्वात्तन्निवृत्तेश्चतत्कारणाज्ञाननिवृत्तिमूलकत्वदज्ञाननिवृत्तेश्चतत्त्वज्ञानकसाध्यत्वात्तत्त्वज्ञानस्यचवेदान्त विचारसा-
ध्यत्वात्तदर्थंगुरुसमाश्रयणमित्याह क्रियेति भवःसंसारश्चक्रवद्विपरिवर्तमानईर्यते कथ्यते तदेवोपपादयाति आदृताआदरपूर्वपूर्वजन्मार्जि
ताक्रियाएतस्यशरीरोद्भवस्यजन्मनोहेतुः तत्रजन्मनिसुरागिणोविषयाभिलाषवतः तौ शास्त्रप्रसिद्धौ धर्मेतरौ धर्माधर्मौ प्रियाप्रियौसुखदु:

क्रियाशरीरोद्भवहेतुराहृताप्रियाप्रियौतौभवतःसुरागिणः ॥
धर्मेतरौतत्रपुनः शरीरकंपुनः क्रियाचक्रवदीर्यतेभवः ॥ ८ ॥

खजनकौभवतःकस्यचिदधर्मएवसुखत्वबुद्ध्याप्रवृत्तिः कस्यचिद्धर्मएवंकदाचिदित्यप्यूह्यम् एवंतत्रोत्पादितकर्मणापुनःशरीरंपुनःक्रिया-
इत्येवंचक्रवद्विपरिवृत्तिः । यथाचक्रेभ्राम्यमाणेऽधोभागः कदाचिदुपरिउपरितनश्चाधः पुनरुपरिपुनरधएवंजन्मक्रिययोर्जन्यजनक-
भावेनपरिवृत्तिरिति बोध्यम् ॥ ८ ॥

Nepal Sanskrit University, Balmeekri Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्य चाज्ञानमेव मूलमित्याह अज्ञानमेवेति अत्र विधौ संसारनिवृत्तिलक्षणे कर्तव्येऽर्थे तज्ज्ञानमेव मूलकारणत्वादज्ञानहानमेव विधीयते साधनत्वेनेति शेषः ननु कर्मैव तन्नाशकमस्तु किं ज्ञानेनेत्याशङ्क्याह विद्यैवेति ज्ञानमेव तन्नाशविधौ मूलाज्ञाननाशने पटीयसी समर्था न कर्म समर्थमिति शेषः

अज्ञानमेवास्य हि मूलकारणं तद्धानमेवात्र विधौ विधीयते ॥ विद्यैव तन्नाशविधौ पटीयसी न कर्म तज्जं सविरोधमीरितम् ॥ ९ ॥

यतस्तत्तज्जमज्ञानजम् आत्मस्वरूपाज्ञानजन्यदेहाद्यभिमानजन्यत्वात्कर्मणोऽज्ञानजन्यत्वं बोध्यम् ननु तज्जन्यस्यापि तन्नाशकत्वं वृश्चिककर्कव्यादौ दृष्टमित्याशङ्क्य तज्जन्यत्वं वा न नाशकत्वप्रयोजकं किन्तु सविरोधत्वमेवेत्याह यत्सविरोधं तदीरितं नाशकमुक्तमित्यर्थः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतएवकर्मणानाज्ञानहानिरित्याह नाज्ञानेत्यादि यतःकर्मणाविरोधाभावान्नाज्ञाननाशनापिरागनाशोवस्तुतः कर्मानुष्ठानात्पुनः सदो
षंक्षयिफलत्वादिदोषविशिष्टंकर्मैवोद्भवेत्कर्मणश्चपुनःसंसारएवेतिनमुक्तिमत्याशा ततस्तस्माद्बुधोविवेकीज्ञानविचारवान् ज्ञायतेऽनेने·

नाज्ञानहानिर्नचरागसङ्क्षयोभवेत्ततः कर्मसदोषमुद्भवेत् ॥ ततः
पुनः संसृतिरप्यवारितातस्माद्बुधोज्ञानविचारवान्भवेत् ॥ १० ॥

तिज्ञानंवेदान्तवाक्यंतद्विचारवान्भवेत ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

इदानींज्ञानस्यैवमोक्षहेतुत्वंवक्तुंज्ञानकर्मसमुच्चयवादंदूषणायानुवदतिसार्धेन नन्विति नन्वितिशङ्कायाम् यथाविद्यावेदमुखेनश्रुतिपुराण-
लक्षणेन ब्रह्मविदाप्नोतिपरम् इत्यादिनापुरुषार्थसाधनमुक्ता तथा उभाभ्यामेवपक्षाभ्यांयथाखेपक्षिणांगतिः तथैवज्ञानकर्मभ्यांप्राप्यते
ब्रह्मशाश्वतम् इत्यादिनाक्रियाऽपितत्साधनत्वेनोक्ता किंच क्रियाकर्तव्यत। तृतीयार्थेप्रथमा कर्तव्यतयाआवश्यकेकृत्येअवश्यकर्तव्यत-

ननुक्रियावेदमुखेनचोदितायथैवविद्यापुरुषार्थसाधनम् ॥ कर्तव्यताप्राणभृतःप्रचोदिताविद्यासहायत्वमुपैतिसापुनः ॥ ११ ॥

याप्रचोदितानित्यनैमित्तिकरूपा एवंचनदकरणेप्रत्यवायोत्पत्त्याज्ञानोत्पत्तिरेवनस्यात् तस्मात्सापुनर्विद्यायाःसहायत्वंप्राप्नोतिघटेजन-
नीयेयथादण्डचक्रादीनांपरस्परसहायता ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्तव्येतीतस्योक्तमेवेविवृणोति कर्मेति वीरहावाएषदेवानांयोऽग्निमुद्वासयतेयावज्जीवमग्निहोत्रंजुहोति इतिश्रुतिः तत्रासिद्धान्तीशङ्कते नन्विति ध्रुवंस्थिरंकार्यमिदंपुरुषार्थमोक्षजनिकाविद्यायतः स्वतन्त्राविनाऽपिसहायेन स्वकार्यसंपादनेसमर्था यथातेजस्तिमिरनिवर्तन-

कर्माकृतौदोषमपिश्रुतिर्जगौतस्मात्सदाकार्यमिदंमुमुक्षुणा॥ननु स्वतन्त्राध्रुवकार्यकारिणीविद्यानकिञ्चिन्मनसाऽप्यपेक्षते ॥ १२

समर्थंमनसाऽपिकिञ्चित्सहायभूतंवस्तुनापेक्षते तथाफलेजननीयेसहायान्तरसंभावनाऽपिनेतिभावः अनेनविद्याफलजननेनिरपेक्षास्वतन्त्र-त्वात्तेजोवदित्यनुमानंसूचितम् ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समुच्चयवादीपरिहराति नेति त्वदुक्तंनेत्यर्थः सत्यकार्यः अक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवति इत्यादिवेदनबोधितःस्थिरकार्योऽपि-
अध्वरः यथाऽन्यानपिकारकादिकान् आरादुपकारकप्रयाजाद्यङ्गानिदेशकालादीनिचप्रकाङ्क्षते तथाविद्यापिअग्निहोत्रंजुहोतिइत्यादिवि

नसत्यकार्योऽपिहियद्वदध्वरः प्रकाङ्क्षतेऽन्यानपिकारकादिकान्
तथैवविद्याविधितः प्रकाशितैर्विशिष्यते कर्मभिरेवमुक्तये ॥ १३ ॥

धिवाक्यतःतत्समूहेनप्रकाशितैः कर्मभिः सहितैवमुक्तयेविशिष्यतइत्यर्थः विदषाफलदानेकर्मापेक्षा अङ्गित्वात् प्रयाजाद्यङ्गापेक्षदर्शा
दिवादितिसत्प्रतिपक्षानुमानमनेनसूचितम् ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदनूद्यसिद्धान्तीदूषयति केचिदिति यत्केचिद्वितर्कवादिनश्ज्ञानकर्मणोसमुच्चित्यमुक्तिसाधनंवदन्तितदप्यसत् यथाकेवलंकर्म मोक्ष
साधनमित्यसत्तथातन्मीलितमित्यप्यसत् तत्रहेतुर्दृष्टविरोधकारणात् दृष्टोयोविरोधः सर्वलोकदृष्टविरोधरूपात्कारणात्तदसदित्यर्थः विरो

केचिद्वदन्तीतिवितर्कवादिनस्तदप्यसद्दृष्टविरोधकारणात् ॥
देहाभिमानादभिवर्धतेक्रियाविद्यागताहङ्कृतितःप्रसिद्धयति १४

धमेवाह देहाभिमानात्क्रियावर्धतेअनात्मनिदेहादावात्मत्वाभिमानात्क्रियाद्वृद्धिः विद्यातुगताहङ्कृतितः गताहङ्कृतिर्यस्यतस्यनष्टाहङ्कृतेः
प्रसिद्धयति सार्वविभक्तिकस्तासिः एवंचाहङ्कारसत्तामूलकत्वात्क्रियाज्ञानयोः समुच्चयोविरुद्धइत्यर्थः ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus.

अथपूर्वपक्ष्युक्तानुमानंदूषयन विद्यास्वरूपमाह विशुद्धंविज्ञानंयेभ्यस्तेषांवेदान्तवाक्यानांयाद्विशेषेणरोचनंरलयोरभेदादालोचनंविचार स्तेनाञ्चिताप्रापितायाचरमाआत्मवृत्तिर्ब्रह्माकारांतःकरणवृत्तिः साविद्यतिभण्यतेविद्वद्भिरितिशेषः पुनःसमुच्चयनिराकरणायविद्याकर्मणो वैषम्यमाह कर्मयज्ञादिअखिलकारकादिभिःकर्तव्यकर्मादिभिरङ्गैश्चसहितंसदुदेति फलोन्मुखंभवति विद्यापुनरखिलकारकादीन्निहन्ति

विशुद्धविज्ञानविरोचनाञ्चिताविद्याऽत्मवृत्तिश्चरमेतिभण्यते ॥ उदेतिकर्माखिलकारकादिभिर्निहन्ति विद्याऽखिल कारकादि-कम् ॥ १५ ॥

तत्रकर्तृत्वादिबुद्धिंनिहन्ति सकलव्यापारपरित्यागेनब्रह्मणिसमाप्तिर्हिविद्या अतः स्वोत्पत्तौचित्तशुद्धिद्वाराकर्मसापेक्षास्वफलेजनयितव्ये तन्निरपेक्षैवान्यथाविद्यास्वरूपस्यैवभङ्गापत्तेरितिपूर्वपक्ष्युक्तहेतोरासिद्धिरितिभावः ॥ १५ ॥

CC-0. In Public Domain. Digitization by eGangotri

उपसंहरन्मुमुक्षोर्वृत्तिप्रकारमाह तस्मादिति विद्याविरोधाद्विद्यायाःकर्मणासह विरोधेनसमुच्चयोनभवेत्तस्मात्सुधीर्मुमुक्षुरशेषतःकर्मत्यजे-
त् काम्यंतुसर्वथात्याज्यमेवनित्यनैमित्तिकमपियावाच्चित्तशुद्धिकर्तव्यमेव ततोऽपिब्रह्माणिचित्तस्थैर्यपर्यन्तं कर्तव्यमेव ततस्तदनुसन्धानप्र-

तस्मात्त्यजेत्कार्यमशेषतः सुधीर्विद्याविरोधान्नसमुच्चयोभवेत् ।
आत्मानुसन्धानपरायणःसदा निवृत्तसर्वेन्द्रियवृत्तिगोचरः १६

तिबन्धकत्वात्प्रयोजनाभावाच्चतदपित्याज्यमेवेतिभावः इदानींमुमुक्षुकर्तव्यमाह निवृत्ताःसर्वेषामिन्द्रियाणां गोचराविषयाःशब्दादयोय
स्मात्तादृशःसन् आत्मनःसच्चिदानन्दस्यानुसन्धानमेवपरमयनंप्राप्यंयस्यतथाविधोभवेत् अत्रेन्द्रियप्रत्याहारःकर्तव्यत्वेनोक्तस्तेनतत्पूर्वप्रा-
णायामाद्यर्थादाक्षिप्तम् ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रागिविरागिभेदेनकर्मणोकर्तव्यताकर्त्तव्यतेआहयावदिति माययाविद्ययाशरीरादिष्वनात्मसुआत्मधीरहङ्कृतेत्यादिरूपायावद्वर्तंतेतावद्वि
 धिवादकर्मणाम् विधिर्यजेतेत्यादिश्रुतिर्वादःकर्तव्यतावोधकोयेषांकर्मणांविधेयोवशवर्त्तितत्कर्मकर्ताभवेत् तदपगमेतुतदाखिलं जगन्नेतीति

यावच्छरीरादिषुमाययात्मधीस्तावद्विधेयोविधिवादकर्मणाम् ॥
नेतीतिवाक्यैरखिलं निषिद्ध्य तज्ज्ञात्वापरात्मानमथत्यजेत्क्रि
याः ॥ १७ ॥

वाक्यैः अथातआदेशोनेतिनेतिइत्यादिवाक्यैर्निषिध्य मिथ्यात्वेननिर्णीयताद्विलक्षणतयासत्यत्वेनपरमात्मस्वरूपंज्ञात्वाक्रियास्त्यजेत्निरू
पितमेतत् ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मविज्ञानेसत्यवश्यमविद्या निवर्ततइत्याह यदेति आत्मनिशुद्धेन्तःकरणेपरमात्मनईशस्यात्मनोजीवस्यचयोविभेदोमायान्तःकरण रूपोपाधिद्वयकृतोविभेदोभेदस्तस्यभेदकं नाशकंभास्वरंप्रकाशशीलंयद्विज्ञानमितरवृत्युपमर्दनपूर्वकंब्रह्माकाराऽखण्डाद्वृत्तिर्यदाऽवभाति

यदापरात्मात्मविभेदभेदकंविज्ञानमात्मन्यवभाति भास्वरम् ॥
तदैवमायाप्रविलीयतेऽञ्जसासकारकाकारणमात्मसंसृतेः॥ १८॥

असंभावनादितिरस्कारेणोदेति तदैव सकारकाजन्मान्तरप्रापककर्मसहितामायातत्तज्जीवोपाधिभूताविद्याऽञ्जसाझदितिप्रविलीयतेनश्यति ननुतन्नाशेऽपिसंसारनाशःकथमतोमायाविशेषणम् आत्मसंसृतेःकारणंसंसारस्योपादानकारणमेवंचतन्नाशेकार्यनाशोभवत्येवेतिभावः १८

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं पुनर्दार्ढ्यायाह श्रुतीति तत्त्वमसीत्यादिश्रुतिरूपैः प्रमाणैस्तज्जनितज्ञानेन नाशितासाविद्याकथमपिकार्यकारिणीभविष्यतीति काकुरत्र सर्वथानेत्यर्थः असतःकार्यकारित्वासंभवादितिभावः पुनश्चतस्यानोद्भवइत्याह विज्ञानमात्रादिति अमलाशुद्धाद्द्वितीयतःद्विती

श्रुतिप्रमाणाभिविनाशिताचसाकथंभविष्यत्यपिकार्यकारिणी ॥
विज्ञानमात्रादमलाद्द्वितीयतस्तस्मादविद्यानपुनर्भविष्यति १९

यात्मविषयकाद्विज्ञानमात्रादितरासहकृतान्निदिध्यासनपरिपाकजज्ञानाद्यतोनष्टातस्मात्सापुनर्नभविष्यति रज्ज्वज्ञानमूलकस्य सर्पस्य रज्जुज्ञानेन निवृत्तस्ययथानपुनरुत्पत्तिरितिभावः ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्यायाइतरनिरपेक्षायाएवमोक्षकारणत्वमुक्तंयुक्तिपूर्वकंपुनःकथयतिश्रोतृदार्ढ्याय। यदीति। यदिनष्टातत्वज्ञाननाशिता सा न पुनः प्रसूयतेनोत्पद्यतेतदाकारणाभावादहंमतिःकथंभवेत्। कथमपिनभवेदित्यर्थः। तदभावाच्चतत्कालेकर्माभावइतिस्वफलजननेसास्वतन्त्राइ

यदिस्मनष्टा नपुनःप्रसूयते कर्ताऽहमस्येति मतिः कथं भवेत् ॥ तस्मात्स्वतन्त्रा न किमप्यपेक्षते विद्या विमोक्षाय विभाति केवला ॥ २० ॥

तरानिरपेक्षैवनाकिमप्यपेक्षते द्वितीयस्याऽसंभवात् अतः केवलाऽसहायैवविमोक्षायविभातितत्फलिकाभवतीत्यर्थः ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नन्वकरणेप्रत्यवायभिया कर्मकार्यमितिचेन्नेत्याह सप्रत्यवायइति कर्मत्यागेनाहिनिश्चयेनाहंप्रत्यवायसहितोभविष्यामीत्येवंशुद्धात्मानि-
अनात्मधर्मस्यधीरप्रज्ञस्यतत्त्वज्ञानविकलस्यप्रसिद्धा नतुतत्त्वदर्शिनः तस्याहंबुद्धेरभावात् पीपादेरनात्मधर्मतानिश्चयाच्च तस्माद्बुधैःकर्म

स प्रत्यवायोह्यहमित्यनात्मधीरज्ञप्रसिद्धा नतु तत्त्वदर्शिनः ॥
तस्माद्बुधैस्त्याज्यमपि क्रियात्मभिर्विधानतःकर्मविधि प्रका
शितम् ॥ २३ ॥

क्रियात्मभिः षष्ठ्यर्थेतृतीया क्रियाफलसक्तचित्तानां विधानतोविधानेनेतिकर्तव्यतयायुक्तंकर्म विधिभिरवश्यकर्तव्यतयाबोधितमपि-
त्याज्यमित्यर्थः ॥ २३ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविरक्तस्यकार्यमाह। श्रद्धेति । गुरुशास्त्रयोर्विश्वासःश्रद्धातदन्वितोबुभुत्सुःशुद्धमानसोऽपि निष्कामकर्मानुष्ठानाच्छुद्धमानसश्चगुरोः प्रसादाल्लब्धतत्त्वमसीतिवाक्यतः श्रुतमात्मजीवयोरैकात्म्यंविज्ञाय मनननिदिध्यासनपरिपाकाभ्यांसाक्षात्कृत्य। चएवार्थः । साक्षा

श्रद्धान्वितस्तत्त्वमसीतिवाक्यतो गुरोःप्रसादादपिशुद्धमानसः॥
विज्ञायचैकात्म्यमथात्मजीवयोः सुखी भवेन्मेरुरिवाप्रकम्पनः
॥ २४ ॥

त्कृत्यैवसुखी भवेत्। सकलदुःखहीनोभवेदित्यर्थः। अप्रकम्पनःविषयाभिलाषाक्षोभितान्तःकरणः ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

महावाक्यंविवरीतुंवाक्यार्थस्यपदार्थवोधपूर्वकत्वमाह । आदाविति । विधानतःभ्रमप्रमादराहित्येनवाक्यार्थविज्ञानस्यविधावुत्पत्तौआदौप्रथमंमुख्यमितियावत् । पदार्थावगतिःकारणम् । हिप्रसिद्धं तस्यपदत्रयंतत्त्वम् असीति । तत्रतत्पदार्थःपरमात्मासर्वज्ञत्वादिगुणः त्वं

आदौ पदार्थावगतिर्हिकारणं वाक्यार्थविज्ञानविधौ विधानतः ॥
तत्त्वंपदार्थौपरमात्मजीवकावसीतिचैकात्म्यमथानयोर्भवेत्
॥ २५ ॥

पदार्थोजीवः अनयोस्तत्त्वंपदार्थयोरैकात्म्यंतद्बोधकमसीतिपदम् ॥ २५ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुसर्वज्ञत्वादिगुणस्येशस्याकिञ्चिज्ज्ञत्वधर्मवता जीवेनैकात्म्यं विरुद्धमित्याशङ्क्याह । प्रत्यागिति । अहंबुद्धिविषयत्वंप्रत्यक्त्वंजीवधर्मः परोक्षत्वमीशधर्मस्तदादिधर्मकृतमात्मनोःपरमात्मजीवात्मनोर्विरोधंविहायत्यक्त्वातयोः संशोधिताम् युक्तिभिःसम्यग्विचारितांतत्त्वंपदाभ्यांशक्त्यभावेऽपिवक्ष्यमाणप्रकारयालक्षणयालक्षितां ज्ञाताञ्चिदात्मतां संगृह्य तत्त्वंपदोपास्थितांविषयांकृत्वा स्वमात्मानंतथाज्ञात्वाऽथएकात्मज्ञानानन्तरमद्वयोभवत् । चित्स्वरूपतांप्राप्तइवभवेत् । पूर्वमपितत्स्वरूपएवविस्मृतकण्ठचामीकरन्यायेनचतत्प्राप्तिःतद्वत्युक्तम् ।

प्रत्यक्परोक्षादिविरोधमात्मनोर्विहायसंगृह्यतयोश्चिदात्मताम् ॥ संशोधितांलक्षणयाचलक्षितांज्ञात्वास्वमात्मानमथाद्वयोभवेत् ॥ २६ ॥

अयंभावः तत्त्वंपदयोर्द्वावर्थौ वाच्योलक्ष्यश्च तत्रतत्पदस्यमायोपाधिःसर्वज्ञत्वादिविशिष्टोवाच्यः त्वंपदस्यापिकिञ्चिज्ज्ञत्वादिविशिष्टो मायाकार्याविद्योपाधिरविद्यावदन्तःकरणोपाधिर्वाच्यः उभयोरपिविशेषणांशत्यागेनशुद्धश्चिदात्मालक्ष्यः तत्रवाच्ययोर्विरुद्धधर्मकत्वादैक्यासंभवेऽपिलक्ष्ययोरैक्यंनिर्बाधमेवेति ॥ २६ ॥

CC-0. In Public Domain. Digitization by eGangotri

उक्तलक्षणास्वरूपमाह । एकात्मकत्वादिति जहतीलक्षणाजहत्स्वार्थलक्षणायथागङ्गायांघोषइत्यत्रगङ्गापदार्थस्यप्रवाहस्यघोषाधारता नुपपत्त्यासर्वथातत्परित्यागेनतीररूपार्थलक्षणा साप्रकृते न एकात्मत्वात् । विशेष्यांशस्यैकत्वात्सर्वथास्वार्थत्यागाभावात् । तथाज हल्लक्षणताजहत्स्वार्थलक्षणावत्त्वमपिअत्रनसंभवति । यथाकाकेभ्योदधिरक्ष्यतामित्यादौकाकशब्दस्यस्वार्थात्यागेनैवदध्युपघातकेलक्षणा सापिन । विरोधतःविशेषणत्यागेनसर्वथास्वार्थत्यागाभावात् । अतोभागलक्षणाजहदजहल्लक्षणायुज्यते । अदोषतःपूर्वोक्तदोषाभावात्

एकात्मकत्वाज्जहती न सम्भवेत्तथाऽजहल्लक्षणता विरोधतः॥
सोऽयंपदार्थाविवभागलक्षणायुज्येततत्त्वंपदयोरदोषतः॥२७॥

विशेष्यांशस्यात्यागाद्विशेषणांशस्यत्यागाच्च । तत्रदृष्टान्तः । सोऽयंपदार्थाविव । यथासोऽयंदेवदत्तइत्यत्रतद्देशादिविशिष्टोऽतीतानुभव विषयोवातत्पदार्थः एतद्देशादिविशिष्टोऽनुभूयमानोवेदंशब्दार्थः । तयोश्चाविरुद्धविशेषणकत्वादैक्यासंभवेनदेशादिरूपविशेषणत्यागेना नुभवगतानीतत्वादिविशेषणत्यागेनवालक्षणयैक्यंतद्वदिदितिभावः ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथत्याज्यत्वायजीवोपाधिमाह । रसादी ति । रसापृथ्वीआदिर्येषांतानिपञ्चीकृतानियानिभूतानितेभ्यःसंभवोयस्यतत् । पञ्चीकरणंचे त्थम् एकैकंभूतंद्विधाविभज्यतत्रैकंभागंचतुर्धाविभज्यतेषांभागानांस्वेतरभूतचतुष्टयार्धभागचतुष्टयेसंयोजनेएकैकंभूतंपञ्चात्मकंभवतिभा

रसादिपञ्चीकृतभूतसंभवंभोगालयंदुःखसुखादिकर्मणाम् ॥ शरी
रमाद्यन्तवदादिकर्मजंमायामयंस्थूलमुपाधिमात्मनः ॥ २८ ॥

गाधिक्याच्चप्रातिस्विकतयाभूगादिव्यवहारोऽपि । सुखदुःखयोरादीनियानिकर्माणितेषांभेाास्तत्कर्मजसुखदुःखानुभवस्तस्यालयमाश्रयभूतमाद्यन्तवत्उत्पत्तिनाशयोगि आदिकर्मजंप्राग्भवीयकर्मजन्यंमायामयंपरम्परयामायाविकारः तद्विकारभूताविकारत्वात् । एतच्छरीरमात्मनःस्थूलमुपाधिंवदन्तीतिशेषः ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसूक्ष्मोपाधिमाह। सूक्ष्ममिति । बुधाःअन्यतस्थूलशरीरविलक्षणंशरीरंलिङ्गदेहाख्यमात्मनउपाधिंविदुः । तत्स्वरूपमाह। सूक्ष्मंचक्षु-
राद्यार्विपयः मनोबुद्धिदशेन्द्रियैःप्राणैश्चयुतम् सङ्कल्पात्मकंमनः निश्चयात्मिकाबुद्धिः घ्राणरसनाचक्षुस्त्वक्श्रोत्रेतिपञ्चज्ञानेन्द्रियाणि वा- स.

सूक्ष्मंमनोबुद्धिदशेन्द्रियैर्युतंप्राणैरपञ्चीकृतभूतसंभवम् ॥ भोक्तुः
सुखादेरनुसाधनंभवेच्छरीरमन्याद्विदुरात्मनोबुधाः ॥ २९ ॥

क्पाणिपादपायूपस्थानिकर्मेन्द्रियाणि प्राणापानव्यानोदानसमानाश्चप्राणास्तैर्युतमेतत्सप्तदशसमुदायात्मकम्। तदाधारभूतान्याह ।अप
ञ्चीकृतभूतसंभवंतेभ्यउत्पन्नमतएवाद्दश्यम्।तथाभोक्तुःसुखादेःसुखदुःखाद्यनुभवस्यानुसाधनम् स्थूलशरीरस्यैतदनुगतस्यैवभोगसाधनत्व ॥ १९ ॥
मितिभावः । एताद्वियोगेनैवमरणव्यवहारइतिबोध्यम् ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतजीवोपाधिद्वयमुक्त्वाईशोपाधिमाह । अनादीति । अनादि उत्पत्तिहीनम् । नानाविधपरिणामशालितयापरिणामरूपेणनश्वरामिति अनादित्वमात्रोक्त्यासूचितम् । अनिर्वाच्यम् सत्त्वासत्त्वाभ्यांनिर्वक्तुमशक्यम् कारणंसकलप्रपञ्चस्यजनकम् ईदृशीमायातुब्रह्मणःपरमी-

अनाद्यनिर्वाच्यमपीहकारणं मायाप्रधानंतुपरंशरीरकम् ॥ उ-
पाधिभेदात्तुयतःपृथक्स्थितं स्वात्मानमात्मन्यवधारयेत्क्र-
मात् ॥ ३० ॥

श्वरव्यवहारसंपादकत्वादुत्कृष्टंप्रधानंशरीरकम् । स्वार्थेकः । एवमुपाधिभेदादेकमेवचैतन्यंयतः पृथक्स्थितंजीवईशइतिभेदबुद्धिविषय मतोलक्षणयोपाधिपरित्यागेनस्वात्मानमात्मनिअवधारयेदभेदेनजानीयात् । क्रमाच्छ्रवणमनननिदिध्यासनक्रमेणेत्यर्थः ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

अथवाक्यार्थविचारफलमाह । कोशेष्विति । आनन्दमयस्य ब्रह्मत्वेऽन्नमयप्राणमयमनोमयविज्ञानमयेषुचतुर्षुकोशेषुतत्तत्सङ्गात्तत्तदाकृतिर्विभाति यथाजपादिसङ्गात्स्फटिकोऽनेकाकृतिर्भाति । आनन्दमयस्यापि जीवत्ववादिनातुतेनसहपञ्चसु कोशेष्वितिबोध्यम् । अस्मि-

कोशेषुपञ्चस्वपितत्तदाकृतिर्विभातिसङ्गात्स्फटिकोपलोयथा ॥ असङ्गरूपोऽयमजोयतोऽद्वयोविज्ञायतेऽस्मिन्परितोविचारिते ॥ ३१ ॥

न्महावाक्येपरितोविचारितेसम्यग्विचारितेसत्ययमात्माऽसङ्गरूपः अन्नमयादिभिःसङ्गरहितः । असङ्गोनहिसज्जते । इतिश्रुतेः । अजोऽद्वयश्चविज्ञायते । स्थूलोऽहमित्यादिस्त्वज्ञस्यतत्तत्कोशप्रसङ्गात्प्रतीतिःस्फटिकवत् तत्त्वज्ञस्यतुनतथाप्रतीतिरितिभावः । एवंचतत्तदुपाधिकृततत्तद्रूपताप्रतीतिनिरासएव विचारफलमितिभावः ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

जाग्रदाद्यवस्थाऽपि बुद्धेर्धर्मोनात्मधर्मइत्याह । बुद्धेरिति । इहआत्मनिस्वप्नादिभेदेन जाग्रत्स्वप्नसुषुप्तिभेदेन यात्रिधावृत्तिर्दृश्यतेसाऽपि गुणत्रयात्मनः सत्त्वरजस्तमोरूपगुणत्रयस्वरूपाया बुद्धेर्धर्मः । उक्तावस्थात्रयस्योक्तमूलकत्वात् । एतदवस्थात्रयस्यास्मिन्नवस्थात्रय-साक्षिणि आत्मनि भानं मृषा बुद्ध्यध्यास निबन्धनं न तु वास्तव मित्यर्थः । अन्योऽन्यतोव्यभिचारतस्तस्यावस्था त्रयस्यस्व रूपतो

बुद्धेस्त्रिधा वृत्तिरपीह दृश्यते स्वप्नादि भेदेन गुणत्रयात्मनः ॥
अन्योऽन्यतोऽस्मिन्व्यभिचारतोमृषा नित्ये परे ब्रह्मणि केव
ले शिवे ॥ ३२ ॥

मृषात्वात्तज्ज्ञानस्य मृषात्वमेव । स्वप्नकाले जाग्रत्सुषुप्त्योरभावात् । जाग्रतिइतरद्वयस्याभावात् सुषुप्तावितरयोरभावात्परस्परं व्यभि चारोबोध्यः आत्मनस्तदनाश्रयत्वंविशेषणैराह । नित्येउत्पत्तिनाशशून्येपरेगुणत्रयातीते ब्रह्मणिव्यापकेकेवलेऽसङ्गेशिवआनन्दरूपे एवंभूतेसदेकरसेपरस्परव्यभिचारधर्माभानमसंभवीति भावः ॥ ३२ ॥

CC-0. In Public Domain. Digitization by eGangotri

अथसाज्यत्वायसंसारमूलभूतांवृत्तिमाह । देहेति । एषांसङ्घातइतरेतराध्यासविषयात् अजस्रंयावाद्धियो बुद्धेर्वृत्तिस्तमोमूलतयाऽज्ञ
लक्षणाऽज्ञत्वज्ञापिका यावत्परिवर्तते तावद्भवोद्भवःसंसारोद्भवोभवेत् । तमःपदंरजसोऽप्युपलक्षणम् । रजस्तमःप्रधानाबुद्धिः संसारहेतु

देहेन्द्रियप्राण मनश्चिदात्मनां सङ्घादजस्रं परिवर्तते धियः ॥
वृत्तिस्तमोमूलतयाऽज्ञलक्षणा यावद्भवेत्तावदसौ भवोद्भवः॥३३॥

त्वात्सर्वथासाज्येति भावः ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत महावाक्यविचारस्य कर्तव्यमाह । नेतीति । अथात आदेशो नेति नेति इति प्रमाणेन निराकृतं मिथ्यात्वेन गृहीतमखिलं जगत् येन सः ततो हृदा स्वत्वप्रधानेन मनसा सम्यगास्वादितं चिल्लक्षणं घनामृतं दुःखासंभिन्नं सुखं येन सः । स्वर्गादितु परिणामदुःखत्वात्तत्संभिन्नमेव । एवंभूतोऽशेषं जगद्देहेन्द्रियादिदृश्यमखूहं त्यजेत् ज्ञानोपादानबुद्धिविषयं न कुर्यात् । किन्तूदासीनस्तत्र भवेत् । ननु देहेन्द्रियादिभिरेव तज्ज्ञान

नेतिप्रमाणेन निराकृताखिलो हृदा समास्वादितचिद्घनामृतः ॥ त्यजेदशेषं जगदात्तसद्रसं पीत्वा यथाऽम्भः प्रजहाति तत्फलम् ॥ ३४ ॥

लाभात्कथमुपजीव्यस्य त्यागइत्याशङ्क्य दृष्टान्तदर्शनेन परिहरति । यथा तृषावान् आत्तः सद्रसो माधुर्यं येन तादृशं नारिकेलनारङ्गादि फलान्तर्वर्त्यम्भः पीत्वा तत्स्थानभूतं तत्फलं जहाति तत्रोदासीनो भवति तद्वत् सर्वदृश्यसारांशो ब्रह्मतल्लाभसतिनिःसारं दृश्यं नोपादेयं नापि हेयमिति भावः । यतो भयादिसंभावनात द्धेयमित्युच्यते ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतरस्यानित्यत्वेनतत्रवैराग्यार्थमात्मनएवनित्यत्वमाह । कदाचिदिति । कदापीत्यर्थः । अनवः उत्पत्त्यनन्तरंविद्यमानोऽभिनवः । तेन जन्मानन्तरास्तित्वंव्यावर्तितं नवत्वाभावेनैवजीर्णत्वाभावादवस्थान्तरापत्तिरूप परिणामोऽपिनिरस्तः ।अनेनअस्तिजायतेवर्द्धतेविपरिणमतेऽपक्षीयते नश्यतीति षड्भाव विकार राहित्यमुक्तम् । एवंचैतद्विशं सर्वमुक्तषड्भावविकारवत्त्वादनित्यमिति ततोविरज्येतेतिबोधित-

कदाचि दात्मान मृतोनजायते नक्षीयते नापिविवर्धतेऽनवः ॥
निरस्तसर्वातिशयः सुखात्मकः स्वयम्प्रभः सर्वगतोऽयमद्वयः ३५

म् । यतऽईदृशोऽतएवनिरस्तः सर्वस्यदेहेन्द्रियादेरतिशयोमहत्त्वं येनस्वलाभात्सः यल्लाभान्नापरोलाभइतिःश्रुतेः यतःसुखात्मकः आनन्दस्वरूपः स्वयम्प्रभःस्वप्रकाशकश्च देहेन्द्रियादिस्तु दुःखस्वरूपः परप्रकाश्यश्च । यस्यभासासर्वमिदंविभाति । इतिश्रुतेः । सर्वगतोव्यापकः अयमहंबुद्धिविषयःप्रत्यगात्माऽपिअद्वयः उक्ताद्वयब्रह्मस्वरूपएव । नततोऽतिरिक्तइतिभावः । अयमात्माब्रह्म । इतिश्रुतेः ॥ ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुएवंविधेविकारशून्येआत्मनिजन्ममरणादिप्रवाहरूपसंसारभानंकथमितिशङ्कते। एवंविधेइति।दुःखमयःदुःखप्रचुरः।उत्तरयति। अज्ञानतइ
तिअज्ञानमूलकोयोध्यासोदेहान्तःकरणादौअहंममेत्यध्यासस्तद्वशात्। एवंचभ्रान्तिरूपातत्प्रतीतिरितिभावः। नन्वेवंकथंतस्यसंसारस्यनि

एवंविधे ज्ञानमये सुखात्मके कथंभवो दुःखमयःप्रतीयते ॥
अज्ञानतोऽध्यासवशात्प्रकाशतेज्ञानेविलीयेत विरोधतःक्षणात्॥
॥ ३६ ॥

वृत्तिस्तत्राह। ज्ञानेति। आविर्भूतइतिशेषः। ज्ञानस्याज्ञानविरोधित्वात्तदुत्पत्तिक्षणएवकारणभूताज्ञाननाशात्तत्कार्यसंसारस्यापि वि
लयइत्यर्थः। यथारज्जुज्ञानेनरज्जौसर्पस्यलयइत्यर्थः ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाध्यासलक्षणमाह । यदन्यदिति । यदन्यत्सर्पादिकमन्यत्ररज्ज्वादौ भ्रमात भ्रमजनकाद्दोषाद्विभाव्यते विज्ञायते अमुं विपश्चितो विद्वांसोऽध्यासइत्याहुः । यथाऽसर्पभूतेरज्ज्वादौ अहिविभावनं सर्पारोपे रज्ज्वबुद्धिमूलकस्तद्वदीश्वरेऽपि जगद्देहादिसंसारात्मकं सर्वं विभाव्यते आत्मज्ञानाभावाद्यथार्थतया ज्ञायते ॥ ३७ ॥

यदन्यदन्यत्र विभाव्यते भ्रमादध्यासमित्याहुरमुं विपश्चितः॥
असर्पभूतेऽहिविभावनं यथा रज्ज्वादिके तद्वदपीश्वरे जगत्॥३७॥

CC-0. In Public Domain. Digitization by eGangotri

आत्मनिष्ठगज्ञानेकीदृशोऽध्यासोनिमित्तंतदाह विकल्पेति सर्वविकल्पकारणमायारहितेवस्तुतस्तत्सङ्गरहितेचिदात्मकेचित्स्वरूपेसर्वकारणेनिरामयेदुःखासंभिन्नानन्दमयेकेवलेसर्वविकारशून्येपरेदृश्यविलक्षणेब्रह्मणिव्यापकं आत्मनिप्रथममहङ्कारः कल्पितः सएवाध्यासः ।

विकल्पमायारहितेचिदात्मके ऽहङ्कारएष प्रथमः प्रकल्पितः ॥
अध्यासएवात्मनिसर्वकारणे निरामयेब्रह्मणि केवलेपरे ॥ ३८॥

अहंबुद्ध्यात्मकोऽध्यासएवसर्वसंसारकारणमितिभावः ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बुद्धिनिष्ठएवसंसारोनत्वात्मनिष्ठइत्यत्रान्वयव्यातिरेकौप्रमाणयति। इच्छादीति। परेसर्वसाक्षिणिआत्मनिसंसृतिहेतवःभासमानसंसारकारणं
सदाकालत्रयेऽपिइच्छादिरागादिसुखादिधार्मिकाः इच्छांपेक्षेरागद्वेषौसुखदुःखंइत्येवमादिद्वन्द्वधर्मिकाःधियएवधीषुसतीषुसंसारइत्यन्वयमु

इच्छादिरागादिसुखादिधार्मिकाः सदा धियः संसृतिहेतवः परे ॥
यस्मात्प्रसुप्तौतदभावतःपरः सुखस्वरूपेणविभाव्यतेहिनः॥३९॥

क्त्वातद्व्यतिरेकमाहयस्मात्कारणात्प्रसुप्तौतदभावा त्धीवृत्त्यभावात परआत्मानोऽस्माभिःतृतीयार्थेषुषष्ठी। सुखरूपेणस्वस्वरूपमात्रेणाविभा
व्यतेनिश्चीयते नतु संसारित्वेनेतिभावः सुप्तोत्थितस्तुसुखमहमस्वाप्समितिप्रत्यभिज्ञानुभवात्तदात्मस्वरूपनिश्चयोऽस्तीतितात्पर्यम् ॥ ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ पुनस्तत्त्वं पदार्थस्वरूपमाह । अनादीति । अनादिर्याऽविद्या ततउद्भवोयस्या बुद्धेरन्तःकरणस्यतत्रबिम्बितःप्रतिबिम्बितश्चित:प्रकाशः सजीवइतीर्यते आत्मापरात्माधियः साक्षितया धीधर्मासङ्गेनैवपृथक्स्थितः । अन्तर्यामितयेत्यर्थः जीवोऽहंसुखीत्यादिप्रकारेणान्तःकरणधर्मोध्यासवानपरमात्मातु साक्षितयासर्वत्रविद्यमानोऽपितथेतिभावः । अतएवबुद्ध्यापरिच्छिन्नपरः बुद्धिलक्षणपरिच्छेदरहितःअतएव परः । एवंचज्ञानेनप्रतिबिम्बाधार विलयप्रतिबिम्बस्यविलयात्मजीवः सएवपरमात्मैवहिप्रसिद्धं सइत्यस्यचानुवृत्तिर्बोध्या ॥ ४० ॥

अनाद्यविद्योद्भवबुद्धिबिम्बितोजीवप्रकाशोऽयमितीर्यते चितः ॥
आत्माधियः साक्षितया पृथक् स्थितो बुद्ध्या परिच्छिन्नपरः
सएव हि ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ बुद्ध्यात्मनोःपरस्पराध्यासवशात परस्परधर्मभानमितिदार्ढ्यायपुनराह । चिद्बिम्बेति । चिदात्मचेतसोरन्योन्याध्यासवशात् पर स.
 स्परतादात्म्यारोपाज्जडाजडत्वंप्रतीयते । चेतसोवृत्तीनांज्ञानत्वं जीवात्मनोजडत्वंप्रतीयते । अतएवज्ञानाश्रयआत्मेति चितएवताकिर्कि
कव्यवहारः । जीवात्मनिजडात्मनिजडात्माकथ्यते बुधैरितिस्मार्तव्यवहारश्च । अत्रहेतुः । चिदित्यादि । चिद्बिम्बस्यसाचिदाभासः अ
॥ २१ ॥

चिद्बिम्बसाक्ष्यात्मधियांप्रसङ्गतस्त्वेकत्रवासादनलाक्तलोहवत् ॥ अन्योऽन्यमध्यासवशात्प्रतीयते जडाजडत्वंचचिदात्मचेतसोः ॥ ४१ ॥

क्षैःसहितः साक्षःसेन्द्रियः सचासावात्मामनःधीरन्तःकरणंतेषांप्रकृष्टसङ्गादतिसान्निकर्षादध्यासइत्यर्थः । अनलाक्तलोहवत् अग्नितप्तलो
हपिण्डवत् अत्रदृष्टान्तः । अग्निधर्मोदाहकत्वं लोहधर्मश्चवर्तुलत्वाद्यनलेभासते । तत्रहेतुरेकत्रवासात् परस्पराविभागेनवृत्तेरित्यर्थः । तद्व ॥ २१ ॥
देतयोरपि परस्परधर्माध्यासइत्यर्थः ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं दार्ढ्यायपुनराह । गुरोरिति । वेदवाक्यतइत्यनेन श्रवणंगुरोःसकाशादपि । ततश्चानेनमननमुक्तम् । ताभ्यांसञ्जातोविद्यया ज्ञानरूपस्यात्मनोऽनुभवोयस्यसः । अनेनकृतनिदिध्यासनइत्यर्थः । तं चिदानन्दस्वरूपं स्वात्मानमुपाधिवर्जितं रहितोपाधिधर्ममात्मस्थं

गुरोःसकाशादपिवेदवाक्यतः सञ्जातविद्यानुभवोनिरीक्ष्य तम् । स्वात्मानमात्मस्थमुपाधिवर्जितं त्यजेदशेषं जडमात्मगोचरम् ॥ ४२ ॥

हृत्स्थंनिरीक्ष्य अपरोक्षीकृत्याशेषंजडं दृश्यंत्यजेत् । तत्रोदासीनोभवेदिति भावः ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञेयंनिरुपाधिकं स्वरूपंश्लोकद्वयेनाह प्रकाशेति अहंप्रकाशरूपः स्वप्रकाशः परप्रकाशहीनः परप्रकाशरूपोयथाघटादिः अजोजन्मादि हीनः अद्वयःसजातीयद्वितीयरहितः असकृद्विभातः सकृदपिपरेणभासकान्तरेणप्रकाशितः सकृद्विभातः नसकृद्विभातोसकृद्विभातः नत

प्रकाशरूपोऽहमजोऽहमद्वयोऽसकृद्विभातोऽहमतीवनिर्मलः ॥
विशुद्धविज्ञानघनोनिरामयःसम्पूर्णआनन्दमयोऽहमक्रियः॥४३॥

त्रसूर्योभातिनचन्द्रतारकमितिश्रुतेः नतद्भासयतेसूर्यइतिस्मृतेश्च अतीवनिर्मलः मायाकृतावरणविक्षेपरहितः विशुद्धविज्ञानघनः विशुद्धचि देकरसः निरामयःकर्तृत्वाभिमानरहितः सम्पूर्णःदेशकालपरिच्छेदहीनः आनन्दमयः आनन्दरूपः स्वार्थेमयट् अक्रियः परिणामहीनः ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदैवेति अहंसदैवकालत्रयेऽपिमुक्तःसर्वधर्मरहितः अचिन्त्यशक्तिमान यः परमात्मा अतिन्द्रियज्ञानम् इन्द्रियातिरिक्तज्ञानरूपःयतोवाचो निवर्त्तन्ते अप्राप्यमनसासहइतिश्रुतेः अविक्रियात्मकोऽपरिणामी अनन्तपारःअन्तःकालतःपारःपरन्तीरन्तावविद्यमानौ यस्य तेनदेश

सदैवमुक्तोऽहमचिन्त्यशक्तिमानतीन्द्रियज्ञानमविक्रियात्मकः॥
अनन्तपारोऽहमहर्निशंबुधैर्विभावितोऽहंहृदिवेदवादिभिः ॥४४॥

कालपरिच्छेदहीनः ईदृशोयःपरमात्माबुधैर्हृदि अहर्निशंविभावितः सोऽहमित्यर्थः ॥ ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंभावनायाःफलमाह एवमिति उक्तरीत्यासदाआत्मानं अखण्डितात्मनाविषयानाकृष्टचित्तेन विचारमाणस्यध्यायतः धातूनामनेकार्थ
त्वात् चरमाणएवचारमाणःस्वार्थेऽण् विशुद्धभावनाब्रह्माकारान्तःकरणवृत्तिरुदंतीतिशेषः साचोदिताकारकैर्देहान्तरमापककर्मभिः स

एवंसदात्मानमखण्डितात्मनाविचारमाणस्यविशुद्धभावना ॥
हन्यादविद्यामचिरेणकारकैरसायनंयद्वदुपासितंरुजः ॥ ४५ ॥

हाविद्यामाचिरेणशीघ्रमेवहन्यात् यथांपामितंसेवितंरसायनं रुजोहन्यात्तद्वत् ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रध्यानेइतिकर्तव्यतामाह विविक्तइति निर्जनइत्यर्थः आसीनोयथोचितपद्मासनाद्युपविष्टः उपारतेन्द्रियः तेनशमदमादिसम्पन्नः विनि र्जितात्माप्राणायामादिभिर्जितान्तःकरणः अतएवविमलान्तराशयोविशुद्धचित्तः विज्ञानदृक्विज्ञानएवदृक्भानंयस्यसः द्रष्टृदृश्यभा

विविक्तआसीनउपारतेन्द्रियोविनिर्जितात्माविमलान्तराशयः॥
विभावयेदेकमनन्यसाधनोविज्ञानदृक्केवलआत्मसंस्थितः॥४६

नरहितः अनेननिर्विकल्पकसमाधिरुक्तः अनन्यसाधनः तत्त्वज्ञानातिरिक्तमुक्तिसाधनास्तित्वभ्रमरहितः केवलोऽसङ्गःआत्मसंस्थितः आत्मन्येवसंस्थासमाप्तिः सञ्जातायस्यसतेन नकदापिविषयान्तरसञ्चारर्वाचित्तः विभावयेत् ध्यायेत् ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंच यदेतत्भूतंभविष्यद्वर्तमानं विश्वंपरमात्मादर्शनंभासकोयस्यतत् तस्यभासासर्वमिदंविभातीति श्रुतेः तत्सर्वकारणेमायासान्निधाना
त्सर्वोपादानत्वेनाभिमतेआत्मनिविलापयेत् उपादानसत्ताव्यतिरेकेणकार्यसत्तांनपश्येत् तादृशस्यलक्षणमाह सम्पूर्णः अवाप्तसमस्तका

विश्वंयदेतत्परमात्मदर्शनं विलापयेदात्मनि सर्वकारणे ॥
पूर्णश्चिदानन्दमयोऽवतिष्ठते न वेद बाह्यं न च किञ्चिदान्त
रम् ॥ ४७ ॥

मः तस्यकाम्याभावात् चिदानन्दमयः तद्रूपोऽवतिष्ठते बाह्यमान्तरंच दृश्यंनजानाति सर्वत्रब्रह्मदर्शनादिति भावः ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाधिसिद्धेः पूर्वंयत्कर्तव्यंतदाह । पूर्वमिति । समाधेः सकलविषयव्यासङ्गनिवृत्तिपूर्वकं ब्रह्माकारवृत्तिः समाधिस्ततः पूर्वमखिलंस चराचरंजगत् ओङ्कारमात्रं विचिन्तयेत् । ओङ्कारोमायतेऽ नेनेतिमात्रा प्रमाणं बोधकत्वेन परिच्छेदकोयस्यतथाजानीयात् । तदेवाविवृ

पूर्वं समाधे रखिलं विचिन्तये दोङ्कारमात्रं सचराचरं जगत् ॥ तदेव वाच्यं प्रणवो हि वाचको विभाव्यते ज्ञानवशान्न बोधतः ॥ ४८ ॥

णोति तदेवेति । जगदेवेत्यर्थः । प्रणवोवाचकोविभाव्यतेएतत्त्वाहिप्रसिद्ध इत्यर्थः । इयंभावनाज्ञानवशादेवनबोधकः । बोधोनिर्विशेषब्रह्मसाक्षात्कारस्तदुत्तरंनेत्यर्थः । तस्यसर्ववृत्त्युपमर्दकत्वात् ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमर्थं विवृणोति । अकारेति । अकारसञ्ज्ञस्तद्वाच्यः पुरुषो हि विश्वको विश्व एव विश्वकः विश्वशब्देन परिभाषितः अयं जाग्रत्साक्षी विराट् ततः स्वप्नसाक्षी तैजसः तेन पदेन परिभाषितः लिङ्गदेहाभिमानी हिरण्यगर्भ उकारकः उकारप्रतिपाद्य ईर्यते । ततः सुषुप्तिसाक्षी प्राज्ञपदवाच्यो

**अकारसञ्ज्ञः पुरुषो हि विश्वको ह्युकारकस्तैजस ईर्यते क्रमात्
प्राज्ञो मकारः परिपठ्यतेऽखिलैः समाधिपूर्वं न तु तत्त्वतो
भवेत् ॥ ४९ ॥**

मायोपाधिको मकारस्तद्वाच्यः परिपठ्यतेऽखिलैर्वेदैः । इयं भावना समाधिपूर्वं समाधेः पूर्वमेव न तत्त्वतः तत्त्वसाक्षात्कारे सति न भवेत् । सर्वस्य ब्रह्माणि प्रविलयात् ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविलापन प्रकारमाहद्वाभ्याम् । विश्वंत्विति । उकारमध्ये बहुधाव्यवस्थितं स्थूलदेहनिबंधनंस्थूलदेहाभिमानेन स्थितं विश्वम्पुरुषंतद्वाचकमकारम् च विलापयेत् । तुश्चार्थे । विलीनम्भावयेत् ततस्तैजसंलिङ्गदेहाभिमानिनम् पुरुषं तद्वाचकंप्रणवद्वितीय वर्णमुकारं वि-

विश्वं त्वकारं पुरुषं विलापयेदुकारमध्येबहुधा व्यवस्थितम् ।
ततोमकारेप्रविलाप्यतैजसंद्वितीयवर्णं प्रणवस्य चान्तिमे ॥५०॥

लीनविश्वकम्मकारे विलाप्याविलीनम्भावयित्वा ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततस्तादृशंमकारंतद्वाच्यंप्राज्ञंचकारणं कारणत्वाभिमानिनंपुरुषमिहात्मनि चिद्घनेपरे विलापयेत् तथाभावयेत् । ततः सोऽहंसर्वविला
पाधिष्ठानंपरब्रह्मेतिभावयेत् । तादृशंनष्टि । सदाविमुक्तिमत् नित्यमुक्तम् । नन्वहंपदार्थस्यरागद्वेषादिमलिनस्यकथं ब्रह्मत्वभावनेत्या

मकारमप्यात्मनि चिद्घने परे विलापयेत्प्राज्ञमपीह कारणम् ।
सोऽहं परं ब्रह्म सदा विमुक्तिमद्विज्ञानदृङ्मुक्त उपाधितोऽमलः ॥ ५१ ॥

शङ्क्याहंपदार्थंविशिनष्टि । उपाधितोमुक्तः अतएवामलःतथाभावनेसाधनं विज्ञानदृक्विज्ञानं ब्रह्ममात्रप्रसयावृत्तिच्छेदरूपादृक् निदिध्या
सनं सत्साक्षात्कारसाधनंयस्यसः ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंभावनावतोलक्षणमाह । एवमिति । उक्तप्रकारेणसदाजातापरमात्मन्येकभावना यस्यसः परिविस्मृतमखिलंपुत्रदेहादियेनसः। अत एवस्वस्वरूपानन्देनैवतुष्टःनतुविषयानन्देन । तस्यपरिणामेदुःखरूपत्वात्ततो विरक्तइत्यर्थः । साक्षान्नित्यात्मनिसुखप्रकाशकः साक्षा

एवं सदा जातपरात्मभावनः स्वानन्दतुष्टःपरिविस्मृताखिलः ॥
आस्ते स नित्यात्मसुखप्रकाशकः साक्षाद्विमुक्तोऽचलवारिसि
न्धुवत् ॥ ५२ ॥

दौपाधिकनामरूपभेदराहित्येननित्यमखण्डितमात्मस्वरूपंयत्सुखंप्रकाशश्चंतद्रूपः एवंरूपो विमुक्तोजीवन्मुक्तः । अचलंनिश्चलंवारियस्यतादृशसिन्धुवदास्ते । विषयसम्बन्धरूपलहरीरहितआस्तइत्यर्थः ॥ ५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशस्य मत्प्राप्तिर्भवत्येवेत्याह । एवमिति । उक्तप्रकारेण सदाऽभ्यस्तसमाधियोगिनः निवृत्ताः सर्वेषामिन्द्रियाणां गोचराः विषयाः शब्दादयो यस्य विनिर्जिता अशेषा रिपवः कामादयो येन तस्य । तज्जयेन विषयेष्वन्तःकरणाप्रवृत्तेः । अतएव सर्वज्ञत्वनित्यत्वनित्यतृप्तत्वबोध

एवं सदाऽभ्यस्तसमाधियोगिनो निवृत्तसर्वेन्द्रियगोचरस्य हि ॥ विनिर्जिताशेषरिपोरहं सदा दृश्यो भवेयं जितषड्गुणात्मनः ॥५३ ॥

रूपत्वस्वतन्त्रत्वनित्यमलुप्तत्वानन्तरूपाः षड्गुणा यस्य तादृश आत्मा जितो वशीकृतो येन तस्य सदा दृश्यो भवेयम् । एतेन मद्भक्तस्य योगिनोऽहं दृश्यो न तु भक्तिविमुखस्येति सूचितम् ॥ ५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंविधोजीवन्मुक्तःप्रारब्धवशेन अनभिमानोभोगानश्नँस्तिष्ठेत् ततोमय्येवविलीयते मद्रूपोभवतीत्याह । ध्यात्वैवमिति ॥ ५४ ।

ध्यात्वैवमात्मानमहर्निशं मुनिस्तिष्ठेत्सदा मुक्तसमस्तबन्धनः ॥
प्रारब्धमश्नन्नभिमानवर्जितो मय्येवसाक्षात्प्रविलीयते ततः ५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वधर्मापेक्षयाऽयमेवधर्मोज्यायानित्याह । आदौचेति । भवसंसारमादिमध्यावसानेषुसर्वथाभयशोकयोः कारणंविदित्वातत्कारणीभूतंविधिवादैर्यजेतेत्यादिभिश्चोदितंबोधितंसमस्तंकर्ममार्गकाम्यंहित्वा अखिलात्मनांजीवानांस्वरूपभूतंमामात्मानं परमेश्वरंभजेत् । य

आदौ च मध्ये च तथैव चान्ततो भवं विदित्वा भयशोक कारणम् ॥ हित्वा समस्तं विधिवादचोदितं भजेत्स्वमात्मान मथाखिलात्मनाम् ॥ ५५ ॥

थाधनस्यार्जनेनादौदुःखंमध्येपालनकृतं तत्र राजादिकृतं भयमन्तेनाशेशोकपर्यंवसायिदुःखमेवं पदार्थमात्रेद्रष्टव्यम् ॥ ५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मय्यभेदभावनया नामरूपाविभागेन तद्रूप एवभवतीत्यमुमर्थं सदृष्टान्तमाह । आत्मनीति । आत्मनिसर्वाधिष्ठानेमयिइदंस्वस्वरूपं जीवमभेदेनविभावयन्यदा । तिष्ठतीतिशेषः । तदामयात्मनापरमेश्वरेणाऽभेदेनभवति अभिन्नोभवति । तत्रदृष्टान्तः यथासमुद्रेप्रविष्टं नद्यादि

आत्मन्यभेदेन विभावयन्निदं भवत्यभेदेन मयाऽत्मनातदा ॥ यथाजलं वारिनिधौ यथापयः क्षीरेवियद्व्योम्न्यऽनिले यथाऽनिलः ॥ ५६ ॥

जलंसमुद्रएव यथाक्षीरेगवादिक्षीरेप्रक्षिप्तंपयःक्षीरमेव यथाव्योम्निमहाकाशेघटाद्यवच्छिन्नाकाशोघटादिभङ्गे च यथाचर्मभस्त्रिकाद्यवच्छिन्नोवायुरनिलेमहावायौ नामरूपाविभागेनैकीभवतीत्यर्थः ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमात्मतत्त्वज्ञस्य जगत्सत्यत्वभ्रमःस्वतएवापैतीत्याह । इत्थमिति । हिरप्यर्थे । लोकसंस्थितोऽपिजीवन्मुक्तिदशायांप्रारब्धवशाल्लोक व्यवहारंकुर्वन्नपिजगन्मृषैवेतिविभावयन्सन् यदियदा इत्थमीक्षते ऐकात्म्यं जानीयात्तदा निवृत्तजगत्सत्यत्वभ्रमो भवतीति शेषः। तत्र हेतुः श्रुतियुक्तिमानतोनिराकृतत्वात् । अतोऽन्यदार्तमित्यादिश्रुतिरूपात् जगन्मिथ्यादृश्यत्वात् शुक्तिरजतवदितितदुपबृंहितानुमान

इत्थं यदीक्षेत हि लोकसंस्थितो जगन्मृषैवेतिविभावयन्मुनिः ॥ निराकृतत्वाच्छ्रुतियुक्तिमानतो यथेन्दुभेदो दिशि दिग्भ्रमादयः ॥ ५७ ॥

पात्मानतःप्रमाणतोनिराकृतत्वात् तत्रदृष्टान्तोयथेन्दुभेदः एकचन्द्रेद्विचन्द्रत्वभ्रमस्तदेकत्वज्ञानेननिवर्तते यथाच दिशिप्राच्यादौअ न्यदिक्त्वभ्रमः सोऽपितत्त्वज्ञानान्निवर्तते । एवंभ्रमतःपुरुषस्य दिक्षुभ्रमणाद्भ्रमोनिकटवर्तिवृक्षादौच भ्रमणभ्रमस्तत्स्थैर्यज्ञानेन निवर्तते तद्वत् ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशज्ञानेमदाराधनमेवोपायइत्याह । यावदिति । अखिलं जगन्मदात्मकंमदधिष्ठानकंमद्विवर्तभूतंयावन्नपश्येत्तावन्मत्प्राप्तयेश्रद्धालुः भगवदाराधनमेवज्ञानप्रापकमित्यत्र दृढविश्वासवान् अतिशयेनोर्जितावृद्धिमतीभक्तिर्मयिभगवतिपूज्यताबुद्धिरूपालक्षणं चिह्नंयस्यसः ।

यावन्नपश्येदखिलं मदात्मकं तावन्मदाराधनतत्परो भवेत् ॥
श्रद्धालुरत्यूर्जित भक्तिलक्षणो यस्तस्य दृश्यो ऽहमहर्निशं
हृदि ॥ ५८ ॥

तावन्मदाराधननिष्ठोभवेत् एवंहितस्यहृदि अहमहर्निशंदृश्योभवा मियेयथामांप्रपद्यन्ते तांस्तथैवभजाम्यहमितिस्मृतेः ॥ ५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वोक्तवचनजातस्य श्रुतिसमत्वं कथमेतदालोचनमपिमदाराधनप्रतिबन्धकदुरितध्वंसोपायइत्याह रहस्यमिति । श्रुतिसारसङ्ग्रहत्वेनाति

रहस्यमेतच्छ्रुतिसारसङ्ग्रहं मया विनिश्चित्य तवोदितं प्रिय ॥
यस्त्वेतदालोचयतीहबुद्धिमान् स मुच्यते पातकराशिभिः
क्षणात् ॥ ५९ ॥

गोपनीयता अप्रमाणशङ्काकलङ्कराहित्यंसूचितम् । आलोचयतिसम्यग्विचारयति ॥ ५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ भगवानुक्तमेवार्थसंक्षेपेण दार्ढ्यायपुनराह भ्रातरिति । यदीतियादित्यर्थे । यदीदंजगत् परिदृश्यते तत्सर्वमायैवेतिज्ञात्वेति शेषः चेतसासर्वंपरिहृत्यतत्रौदासीन्यंकृत्वामद्भावनयामदैक्यभावनया भावितंशुद्धंमानसंयस्यतादृशास्तिष्ठ । इत्युपदिश्याशिषंप्राह निरामयः

भ्रातर्यदीदं परिदृश्यते जगन्मायैव सर्वं परिहृत्य चेतसा॥मद्भावनाभावितशुद्धमानसः सुखी भवाऽऽनन्दमयो निरामयः ६०

सन्सुखीभव । सर्वदुःखनिवृत्त्येतिभावः । ततोऽन्तरङ्गामन्यामाशिषमाह आनन्दमयोभवेति तद्रूपोभवेत्यर्थः । यद्यपिपूर्वमानन्दरूपत्वमस्त्येवतथाऽपितत्प्राप्तिर्विस्मृतकंठस्थभूषणप्राप्तिवत ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंरीत्यास्वोपासकस्यलोकपावनत्वमाह। यइति । कदावा यदाकदाचिदित्यर्थः । हृदानिर्मलेनान्तःकरणेन यो मामगुणं प्राकृतसत्त्व
रजस्तमोरूपगुणरहितम् । सच्चिदानन्दरूपत्वात् । अतएवगुणादन्याकृतात्परंमायातीतम् । यदिवायद्वेत्यर्थे । गुणात्मकं सर्वज्ञत्वा- स.
 दिलोकोत्तरलावण्यादिगुणवानात्मामूर्तिर्यस्यतं दृश्यमानं रूपं सेवते । सद्विविधोऽप्युपासकःअहं मत्स्वरूपएव । मामकइत्यर्थोवा । प्रि-

यः सेवते मामगुणं गुणात्परं हृदा कदा वा यदि वा गुणात्मकम् ॥ सोऽहं स्वपादाञ्चितरेणुभिः स्पृशन्पुनाति लोकत्रितयं यथा रविः ॥ ६१ ॥

योहिज्ञानिनोऽत्यर्थमहंसचममप्रिय इत्युक्तेः । तादृशोभक्तःस्वपादलग्नरेणुभिःसंस्पृशन् लोकत्रयमपि पुनाति । अज्ञानध्वान्तनिरसने
नपवित्रीकरोति । यथारविःस्वकरैर्जगद्वितिमिरीकरोति तद्वत् ॥ ६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानीमेतद्ग्रन्थार्थालोचनासमर्थस्यपाठमात्रतोऽपिमहत्फलमाह । विज्ञानंविज्ञानजनकं करणंव्युत्पत्त्येतिबोध्यम् । वेदान्तैरुपनिषद्वाक्यै र्वेद्यंचरणंजगज्जन्मादिलक्षणंकर्मयस्यतेन ननुपाठमात्रादेतादृशमहत्फलप्राप्तिःकथमित्याशङ्क्यभवत्येवेति सूचयंस्तत्रहेतुमाह । मद्वचने

विज्ञानमेतदखिलंश्रुतिसारमेकं वेदान्तवेद्यचरणेनमयैवगीतम् ।
यःश्रद्धया परिपठेद्गुरुभक्तियुक्तो मद्रूपमेतियदि मद्वचनेषुभक्तिः
॥ ६२ ॥ इतिश्री अध्यात्मरामायणे रामगीता समाप्ता ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसम्वादे उत्तरकाण्डे श्रीरामगीतायां पञ्चमःसर्गः ॥ ५ ॥

षुभक्तिर्विश्वासोयदीतिअर्थाद्गुरुवाक्यविश्वासस्यैव फलदायकत्वादितिभावः ॥६२॥ इत्यध्यात्मरामायणेउमामहेश्वरसम्वादे उत्तरकाण्डे सेतौपञ्चमःसर्गः ॥ ६२ ॥ श्रीरामचन्द्रार्पणमस्तु ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

श्रीराममन्त्रःखलु तारकाख्यः संसारसन्तारणसुप्रसिद्धः ॥ भक्-
त्याऽप्यभक्त्या समुपासितोयः श्रेयांसि सर्वाणि ददात्यवश्य
म् ॥ १ ॥ तन्तारकंसम्प्रतिपादयन्ती श्रीरामगीता सकलैः सुसे
व्या ॥ विज्ञप्तिमित्थंजनको विनीतः समर्पयत्यार्यजनेषुहर्षात् २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प,	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति
स्यर्द्धि	स्पार्द्धि	१	२	१	शाधि	शाधि	३	२	६	नाशे	नाशो	६	१	१
जीब्य	जीव्य	१	२	३	व्यत्र	व्यत्र	४	१	१	नन्वितिश	नन्वितिशे	६	२	१
सम्बीन्धनी:	सम्बन्धिनी:	२	२	१	ष्ठामे	ष्ठानमे	४	२	३	त्रिदा	विदा	६	२	२
व्रह्म	व्रह्म	२	१	२	व्रह्म	व्रह्म	४	२	१	मंवे	मेव	६	२	२
व्रह्म	व्रह्म	२	१	६	वलेन	वलेन	४	२	७	व्येतीत	व्यतेति	७	१	१
वोधोऽसि	वोधोऽसि	३	१	४	निघृत्ते	निवृत्ते	५	१	१	वीरहा	वीरहा	७	१	१
संवन्ध	सम्बन्ध	३	१	७	कत्व	कत्वा	५	१	१	सदृष्ट	सद्दृष्ट	८	१	३
भवस्यंससार	भवस्यसंसार	३	२	१	नक	नैक	५	१	१	विशुद्धं	विशुद्ध	८	२	१
न्सार	सार	३	२	२	बेदान्त	वेदान्त	५	१	१	कारांत:	कारान्त:	८	२	२
पर्वग	पवर्ग	३	२	२	पूर्वं	पूर्वं	५	१	२	वृत्ति	वृत्ति	९	१	१
वारिधि	वारिधि	३	२	२	बुद्ध्या	बुद्ध्या	५	१	६	स्त्रवाना	स्त्रना	९	२	१
					एवं	एत्र	५	१	६	वृत्यु	वृत्यु	१०	१	२

Nepal Sanskrit University, Balmeeki Campus, Kath...

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
रीप	रपि	११	२	१
नर्द्दष्टा	र्नद्दष्टा	१२	१	४
वांह्ये	वांह्ये	१२	१	७
त्याभिः	त्माभिः	१२	२	६
शुद्ब	शुद्ध	१३	१	१
जीवया	जीवयो	१३	१	२
निर्वाध	निर्बाध	१४	१	१०
भत्र	भव	१५	१	४
अर्जोद्व	अर्जोऽद्व	१६	२	६
द्वात्	द्वातू	१७	२	१

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
ह्लाभ	ह्लाभे	१८	१	८
इतिः	इति	१८	२	२
ज्ञानन	ज्ञानेन	१९	१	१
वुद्दया	वुद्ध्या	२०	१	५
रागादि	रागादि	२१	१	३
विलय	विलय	२१	१	७
धम	धर्म	२१	२	१
म्त्रस्य	म्वंयस्य	२१	२	२
वुवै	बुधै	२३	१	५
एव	एवं	२३	२	१
द्रष्ट	द्रष्टृ	२४	१	२

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
विभाव्यत	विभाव्यते	२५	१	४ मू
लिङ्गद	लिङ्गदे	२६	१	२
वोधकः	वोधतः	२५	१	६
विज्ञानं ब्रह्म	विज्ञानंनिादि ध्यासनं ब्रह्म	२६	२ ६	३
भेदेरा	भेदरा	२७	१	६
रुपा	रूपाः	२७	२	६
आत्म	अत्मा	२७	२	६
मुनिति	मुनिास्ति	२८	१	२
भव	भवं	२८	२	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
तदकत्व	तदेकत्व	२६	२	७	वतथाऽ	वतथाऽ	३१	१	६	मद्वचने	मद्वचने	३२	१	२
भ्रमण	भ्रमणं	२६	२	८	कंठ	कण्ठ	३१	१	२	तन्त्तारकं	तत्तारकं	३२	२	३

नेपाल पाशुपत, यन्त्रालये मुद्रितं

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति रामगीता सटीका समाप्ता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ह.नं. १६६४२

अथ रामगीता सटीका प्रारभ्यते ॥

मू० २।-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ रामंरत्नकिरीटकुण्डलयुतं केयूरहारान्वितं सीतालङ्कृतवामभागममलं सिंहासनस्थं विभुम् ॥ सुग्रीवादि कपीश्वरैःसुरवरैः संसेव्यमानं सदा विश्वामित्रपराशरादिमुनि-भिः संस्तूयमानं भजे ॥ १ ॥ इतिध्यात्वा ॥ श्रीमहादेवउवाच॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ ध्यायेत्वाजानुबाहुं धृतशरधनुषं वद्धपद्मासनस्थं पीतंवासोवसानं नवकमलदलस्पर्द्धिनेत्रं प्रसन्नम् ॥ वामाङ्कारूढ सीतामुखकमलमिलल्लोचनं नीरदाभं नाना लङ्कारदीप्तं दधतमुरुजटामण्डलं रामचन्द्रम् ॥ १ ॥ ततइति जगतां यानि मङ्गलानि आनन्दास्तेषामुपजीव्यभूतं मङ्गलं ब्रह्मानन्दः सएवात्मास्वरूपं तेन तस्यैवानन्दस्यान्यानि भूतानिमात्रामुपजीवन्तीति श्रुतेः मङ्ग

ततोजगन्मङ्गलमङ्गलात्मना विधाय रामायणकीर्तिमुत्तमाम् ॥
चचार पूर्वाचरितं रघूत्तमो राजर्षिवर्य्यैरभिसेवितं यथा ॥ १ ॥

लानाश्चमङ्गलमिति स्मृतेश्च किंच जगतां मङ्गलं कल्याणं यस्मात्तादृशकल्याणरूपआत्मामूर्तिस्तया उत्तमांश्रोत्रादीनां मोक्षदत्वेना त्युत्तमां रामायणकीर्तिं वाल्मीक्यादि कृत नानाविध रामायण प्रवर्तिकां रावणवधादिजां कीर्तिंविधाय स्थितोरघूत्तमः ततः सीताप रित्यागानन्तरं पूर्वैः स्ववंशजैराचारितं प्रजापालनसत्कथाश्रवणादिकं केवलंतत्पूर्वजैरेवाचरितमितिन किंत्वन्यैरपि राजर्षिश्रेष्ठैर्य थाऽभिसेवितं तथाचचार कृतवान् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदारागुरुदेवविश्वासलक्षणमहागुणवती यद्वा उदारा दानशीलाबुद्धिर्यस्य तेन पुरातनीः प्राचीनराजसम्बन्धिनीः शुभाः धर्माधर्मनिर्णेत्रीः प्रमत्तस्य स्वगोमण्डलमिश्रितब्राह्मणगोदानात् प्रमत्तस्य नृगस्य राज्ञो द्विजस्य शापात्तिर्यक्त्वमाह तेनाज्ञातकृतब्रह्मस्वापहारेण परमधा

सौमित्रिणापृष्ट उदारबुद्धिना रामःकथाःप्राह पुरातनीःशुभाः ॥
राज्ञः प्रमत्तस्य नृगस्य शापतो द्विजस्य तिर्यक्त्वमथाह राघवः
॥ २ ॥

र्मिकस्यापीदृश्यवस्थेति सर्वथाब्रह्मस्वविमुखताधर्मइतिसूचितम् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकान्तेविजने उपस्थितंप्राप्तम् विनयान्वितः सन् भक्त्यागुरुरयमिति बुद्ध्या प्रणम्य अनेनगुरूपसदनप्रकारउक्तः आसादितंशुद्धंभाव

कदाचिदेकान्त उपस्थितंप्रभुं रामं रमालालितपादपङ्कजम् ॥
सौमित्रिरासादितशुद्धभावनः प्रणम्यभक्त्याविनयान्वितोऽब्र-
वीत् ॥ ३ ॥

नं भावनाकरणमन्तः करणंयेनसः शुद्धान्तःकरणइतियावत् भगवदुक्तसत्कथाश्रवणेन शुद्धान्तःकरणइत्यर्थः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हे महामते महतीसर्वविषयामतिर्यस्य तस्य संवोधनं त्वं शुद्धवोधोऽसि अनवच्छिन्नचैतन्यरूपोऽसि सर्वदेहिनामात्माऽसि जीवानांतत् प्रतिविम्बत्वात् अधीशोऽसि अन्तर्यामित्वान्नियन्ताऽसि वास्तवभेदाभावाच्च सर्वात्मत्वम् औपाधिकभेदाच्च नियन्तृनियम्यभावोवोध्यः निराकृतिः अस्मदादिवत्स्वार्जितकर्माधीनशरीराकृतिरहितः नन्वेवंसर्वैः कथमेवंनज्ञायतेऽतआह ज्ञानदृशां स्वयमेवप्रतीयसे ज्ञायतेऽ

त्वं शुद्धवोधोऽसि हि सर्वदेहिनामात्माऽस्यधीशोऽसि निरा-कृतिःस्वयम् ॥ प्रतीयसे ज्ञानदृशां महामते पादाब्जभृङ्गाहितसङ्गसाङ्गिनाम् ॥ ४ ॥

नेनेतिज्ञानं वेदान्तवाक्यजातं तदेवदृक्दर्शनसाधनंयेषां तेषामितिसंवन्धसामान्येषष्ठी तैरित्यर्थः ताहशदृक्लाभश्च त्वद्भक्त्यधीनइत्याह पादेति त्वच्चरणकमलयोर्भृङ्गवदाहितःकृतः सङ्गोयेन तादृशान्तः करणसङ्गवतां त्वच्चरणकमल सङ्गिशान्तः करणवतामित्यर्थः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

अथ प्रार्थयते अहमिति भवस्यं ससारस्यापवर्गो निवृत्तिर्यस्मात्तादृशंतवपादाम्बुजंप्रपन्नोऽस्मिशरणंप्राप्तोऽस्मि योगिभावितं योगीभिः सं
न्सारमुक्तये भावितम् अनेनतस्य भवापवर्गत्वं सदाचारः प्रमाणमुक्तम् प्रार्थनीयमाह अपारवारिधिरूपंयदज्ञानंसंसारमूलकारणं यथासुखम

अहं प्रपन्नोऽस्मि पदाम्बुजं प्रभो भवापवर्गं तव योगिभावितम् ॥ य
थाञ्जसाज्ञानमपारवारिधिं सुखं तरिष्यामि तथाऽनुशाधि मा
म् ॥ ५ ॥

क्लेशेन तरिष्यामि तथा मामनुशाधिशिक्षय अपारवारिधिमित्यनेनसपारप्रसिद्धसमुद्राद्व्यतिरेकउक्तः अशक्यतरणताऽनेनध्वनिता ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथोत्तरमवतारयति श्रुत्वेति रामः सौमित्रिवचः श्रुत्वा अथशब्दोवाक्यालङ्कारे तदा श्रवणाऽव्यवहितकाले एवप्रपन्नानां भक्तानामार्ति संसारदुःखंहरतिताद्दशः प्रपन्नाभ्रमादिहीना भक्तानुग्रहपरा च धीर्यस्यसः क्षितिपालानां राज्ञां भूषणभूतोऽज्ञानरूपतमसउपशान्तये त

श्रुत्वाथ सौमित्रिवचोऽखिलं तदाप्राह प्रपन्नार्तिहरःप्रसन्नधीः ॥
विज्ञानमज्ञानतमोपशान्तये श्रुतिप्रपन्नं क्षितिपालभूषणः ॥ ६ ॥

दर्थम् सन्धिरार्षः श्रुतिभिः तमेवविदित्वाऽतिमृत्युमेतीत्यादिश्रुतिभिः प्रपन्नं तत्फलकत्वेन बोधितं विज्ञानमात्मतत्वज्ञानामिति सामान्यतः प्रथमंप्राह ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथतादृशज्ञानप्राप्तये क्रमेणबहिरङ्गान्तरङ्गसाधनान्याह आदाविति स्ववर्णाश्रमेषु शास्त्रेण वर्णिता याः क्रियानित्यनैमित्तकयज्ञदाना दिरूपास्ताः कृत्वा समासादितशुद्धमानसः प्राप्तान्तःकरणशुद्धिः तत्पूर्वमुपात्तसाधनः तदनुष्ठानपूर्वकमेवउपात्तानिसाधनानि शम दमादीनियेन तादृशः अनेनकर्मणां बहिरङ्गत्वं शमादीनामन्तरङ्गत्वं स्फुटमेवोक्तम् किंच शमदमवैराग्यदार्ढ्यपर्यन्तं कर्मानुष्ठामेवेति

आदौ स्ववर्णाश्रमवर्णिताः क्रियाः कृत्वा समासादितशुद्धमानसः
समाप्य तत्पूर्वमुपात्तसाधनः समाश्रयेत्सद्गुरुमात्मलब्धये॥ ७॥

सूचितम् ततस्तत्कर्मानुष्ठानं समाप्य त्यक्त्वा संन्यस्येतियावत् आत्मलब्धये आत्मज्ञानाय तत्फलकाय तत्वमस्यादिवाक्यार्थविचारा- ॥ ४ ॥
य सद्गुरुंश्रोत्रियंब्रह्मनिष्ठमित्यादि लक्षणलक्षितं समाश्रयेत् सेवेत अनेनव्युत्पत्तिवलेन स्वयमेववाक्यार्थविचारः क्रियमाणो न फला- येति सूचितम् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसारस्यभ्रमिमच्चक्ररूपत्वात्तन्निवृत्तेश्चतत्कारणाज्ञाननिवृत्तिमूलकत्वदज्ञाननिवृत्तेश्चतत्त्वज्ञानकसाध्यत्वात्तत्त्वज्ञानस्यचवेदान्तविचारसा-
ध्यत्वात्तदर्थंगुरुसमाश्रयणमित्याह क्रियेति भवःसंसारश्चक्रवद्विपरिवर्तमानईर्यते कथ्यते तदेवोपपादयति आदृताआदरपूर्वपूर्वजन्मार्जि
ताक्रियाएनस्यशरीरोद्भवस्यजन्मनोहेतुः तत्रजन्मनिसुरागिणोविषयाभिलाषवतः तौ शास्त्रप्रसिद्धौ धर्मेतरौ धर्माधर्मौ प्रियाप्रियौसुखदुः

क्रियाशरीरोद्भवहेतुरादृताप्रियाप्रियौतौभवतःसुरागिणः ॥
धर्मेतरौतत्रपुनः शरीरकंपुनः क्रियाचक्रवदीर्यतेभवः ॥ ८ ॥

खजनकौभवतःकस्यचिदधर्मएवसुखत्वबुद्ध्याप्रवृत्तिः कस्यचिद्धर्मएवंकदाचिदित्यप्यूह्यम् एवंतत्रोत्पादितकर्मणापुनःशरीरंपुनःक्रिया-
इत्येवंचक्रवद्विपरिवृत्तिः । यथाचक्रेभ्राम्यमाणेऽधोभागः कदाचिदुपरिउपरितनश्चाधः पुनरुपरिपुनरधएवंजन्मक्रिययोर्जन्यजनक-
भावेनपरिवृत्तिरिति बोध्यम् ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्स्यचाज्ञानमेवमूलमित्याह अज्ञानमेवेति अत्रविधौसंसारनिवृत्तिलक्षणेकर्तव्येऽर्थेतद्ज्ञानमेवमूलकारणत्वादज्ञानज्ञानमेवविधीयते साध-
नत्वेनेतिशेषः ननुकर्मैवतन्नाशकमस्तुकिंज्ञानेनेत्याशङ्क्याह विद्यैवज्ञानमेवतन्नाशविधौमूलाज्ञाननाशनेपटीयसीसमर्थानकर्मसमर्थमितिशेषः

अज्ञानमेवास्याहिमूलकारणंतद्ज्ञानमेवात्रविधौविधीयते ॥ विद्यै
वतन्नाशविधौपटीयसीनकर्मतज्जंसविरोधमीरितम् ॥ ९ ॥

यतस्तत्तज्जमज्ञानजम् आत्मस्वरूपाज्ञानजन्यदेहाद्यभिमानजन्यत्वात्कर्मणोज्ञानजन्यत्वंबोध्यम् ननुतज्जन्यस्यापितन्नाशकत्वंवृश्चिककर्क
व्यादौदृष्टमित्याशङ्क्यतज्जन्यत्वंवाननाशकत्वप्रयोजकंकिन्तुसविरोधत्वमेवेत्याह यतसविरोधंतदीरितंनाशकमुक्तमित्यर्थः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतएवकर्मणानाज्ञानहानिरित्याह नाज्ञानेत्यादि यतःकर्मणाविरोधाभावान्नाज्ञाननाशनापिरागनाशोवस्तुतः कर्मानुष्ठानात्पुनः सदो षंक्षयिफलत्वादिदोषविशिष्टकर्मैवोद्भवेत्कर्मणश्चपुनःसंसारएवेतिनमुक्तिमत्याशा ततस्तस्माद्बुधोविवेकीज्ञानविचारवान् ज्ञायतेऽनेने·

नाज्ञानहानिर्नचरागसङ्क्षयोभवेत्ततः कर्मसदोषमुद्भवेत् ॥ ततः पुनः संसृतिरप्यवारितातस्माद्बुधोज्ञानविचारवान्भवेत् ॥ १० ॥

तिज्ञानंवेदान्तवाक्यंतद्विचारवान्भवेत ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

इदानींज्ञानस्यैवमोक्षहेतुत्वंवक्तुंज्ञानकर्मसमुच्चयवादंदूषणायानुवदतिसार्धेन नन्विति नान्वितिशङ्कायाम् यथाविद्यावेदमुखेनश्रुतिपुराण-
लक्षणेन ब्रह्मविदाप्नोतिपरम् इत्यादिनापुरुषार्थसाधनमुक्ता तथा उभाभ्यामवपक्षाभ्यांयथाखेपक्षिणांगातिः तथैवज्ञानकर्मभ्यांप्राप्यते
ब्रह्मशाश्वतम् इत्यादिनाक्रियाऽपितत्साधनत्वेनोक्ता किंच क्रियाकर्तव्यता तृतीयार्थेप्रथमा कर्तव्यतयाआवश्यकेकृत्येअवश्यकर्तव्यत-

ननुक्रियावेदमुखेनचोदितातथैवविद्यापुरुषार्थसाधनम् ॥ कर्तव्य
ताप्राणभृतःप्रचोदिताविद्यासहायत्वमुपैतिसापुनः ॥ ११ ॥

याप्रचोदितानित्यनैमित्तिकरूपा एवंचनदकरणेप्रत्यवायोत्पत्त्याज्ञानोत्पत्तिरेवनस्यात् तस्मात्सापुनर्विद्यायाःसहायत्वंप्राप्नोतिघटेजन-
नीयेयथादण्डचक्रादीनांपरस्परसहायता ॥ ११ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्तव्यमेतीतस्त्वात्कर्मवेविहितत्वात्कर्मेति वीरहा वा एष देवानां योऽग्निमुद्वासयते यावज्जीवमग्निहोत्रं जुहोति इतिश्रुतिः तत्रासिद्धान्तीशङ्कते नान्विति ध्रुवंस्थिरंकार्यमिदंपुरुषार्थमोक्षजनिकाविद्यायतः स्वतन्त्राविनाऽपिसहायेन स्वकार्यसंपादनेसमर्था यथातेजस्तिमिरनिवर्तन-

कर्माकृतौदोषमपिश्रुतिर्जगौतस्मात्सदाकार्यमिदंमुमुक्षुणा॥ननु स्वतन्त्राध्रुवकार्यकारिणीविद्यानकिञ्चिन्मनसाऽप्यपेक्षते ॥ १२

समर्थंमनसाऽपिकिञ्चित्सहायभूतंवस्तुनापेक्षते तथाफलेजननीयेसहायान्तरसंभावनाऽपिनेतिभावः अनेनविद्याफलजननेनिरपेक्षास्वतन्त्र-त्वात्तेजोवदित्यनुमानंसूचितम् ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समुच्चयवादीपरिहराति नेति त्वदुक्तंनेत्यर्थः सत्यकार्यः अक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवति इत्यादिवेदनबोधितःस्थिरकार्योऽपि-
अध्वरः यथाऽन्यानपिकारकादिकान् आरादुपकारकप्रयाजाद्यङ्गानिदेशकालादीनिचप्रकाङ्क्षते तथाविद्यापिअग्निहोत्रंजुहोतिइत्यादिवि

नसत्यकार्योऽपिहियद्वदध्वरः प्रकाङ्क्षतेऽन्यानपिकारकादिकान्
तथैवविद्याविधितःप्रकाशितैर्विशिष्यते कर्मभिरेवमुक्तये ॥ १३ ॥

धिवाक्यतःतत्समूहेनप्रकाशितैः कर्मभिः सहितैवमुक्तयेविशिष्यतइत्यर्थः विद्याफलदानेकर्मापेक्षा अङ्गित्वात् प्रयाजाद्यङ्गापेक्षदर्शा
दिवादितिसत्प्रतिपक्षानुमानमनेनसूचितम् ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदनूद्यसिद्धान्तीदूषयति केचिदिति यत्केचिद्वितर्कवादिनइतिज्ञानकर्मणीसमुच्चित्यमुक्तिसाधनंवदन्तितदप्यसत् यथाकेवलंकर्म मोक्ष साधनमित्यमत्तथातन्मीलितमित्यप्यसत् तत्रहेतुर्दृष्टविरोधकारणात् दृष्टायोविरोधः सर्वलोकदृष्टविरोधरूपात्कारणात्तादसदित्यर्थः विरो

केचिद्वदन्तीतिवितर्कवादिनस्तदप्यसद्दृष्टविरोधकारणात् ॥
देहाभिमानादभिवर्धतेक्रियाविद्यागताहङ्कृतितःप्रसिद्ध्यति १४

धमेवाह देहाभिमानात्क्रियावर्धतेअनात्मनिदेहादावात्मत्वाभिमानात्क्रियावृद्धिः विद्यातुगताहङ्कृतितः गताहङ्कृतिर्यस्यतस्यनष्टाहङ्कृतेः प्रसिद्ध्यति सार्वविभक्तिकस्तासिः एवंचाहङ्कारसत्तामूलकत्वात्क्रियाज्ञानयोः समुच्चयोविरुद्धइत्यर्थः ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथपूर्वपक्षयुक्तानुमानंदूषयन्विद्यास्वरूपमाह   विशुद्धंविज्ञानंयेभ्यस्तेषांवेदान्तवाक्यानांयाद्विशेषेणरोचनंरलयोरभेदादालोचनंविचार
 स्तेनाञ्चिताप्रापितायाचरमाआत्मवृत्तिर्ब्रह्माकारांतःकरणवृत्तिः   साविद्येतिभण्यतेविद्वद्भिरितिशेषः पुनःसमुच्चयवारणायविद्याकर्मणो
 वैषम्यमाह कर्मयज्ञादिअखिलकारकादिभिःकर्तव्यकर्मादिभिरङ्गैश्चसहितंसदुदेति फलोन्मुखंभवति   विद्यापुनरखिलकारकादीन्निहन्ति

विशुद्धविज्ञानविरोचनाञ्चिताविद्याऽऽत्मवृत्तिश्चरमेतिभण्यते ॥
उदेतिकर्माखिलकारकादिभिर्निहन्ति विद्याऽखिल कारकादि-
कम् ॥ १५ ॥

तत्रकर्तृत्वादिबुद्धिंनिहन्ति सकलव्यापारपरित्यागेनब्रह्मणिसमाप्तिर्हिविद्या अतःस्वोत्पत्तौचित्तशुद्धिद्वाराकर्मसापेक्षास्वफलेजनायितव्यं-
तन्निरपेक्षैवान्यथाविद्यास्वरूपस्यैवभङ्गापत्तेरितिपूर्वपक्षयुक्तहेतोरसिद्धिरितिभावः ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपसंहरन्मुमुक्षोर्वृत्तिप्रकारमाह तस्मादिति विद्याविरोधाद्विद्यायाः कर्मणासह विरोधेनसमुच्चयोनभवेत्तस्मात्सुधीर्मुमुक्षुरशेषतः कर्मत्यजे-
त् काम्यंतुसर्वथात्याज्यमेवनित्यनैमितिकमपियावच्चित्तशुद्धिकर्तव्यमेव ततोऽपिब्रह्मणिचित्तस्थैर्यपर्यन्तं कर्तव्यमेव ततस्तदनुसन्धानप्र-

तस्मात्त्यजेत्कार्यमशेषतः सुधीर्विद्याविरोधान्नसमुच्चयोभवेत् ।
आत्मानुसन्धानपरायणःसदा निवृत्तसर्वेन्द्रियवृत्तिगोचरः १६

तिबन्धकत्वात्प्रयोजनाभावाच्चतदपित्याज्यमेवेतिभावः इदानींमुमुक्षुकर्तव्यमाह निवृत्ताःसर्वेषामिन्द्रियाणां गोचराविषयाःशब्दादयोय
स्मात्तादृशःसन् आत्मनःसच्चिदानन्दस्यानुसन्धानमेवपरमयनंप्राप्यंयस्यतथाविधोभवेत् अत्रेन्द्रियप्रत्याहारःकर्तव्यत्वेनोक्तस्तेनतत्पूर्वप्रा-
णायामाद्यर्थादाक्षिप्तम् ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रागिविरागिभेदेनकर्मणोकर्तव्यताकर्त्तव्यतेआहयावदिति माययाविद्ययाशरीरादिष्ववानात्मसुआत्मधीरहङ्कर्तेत्यादिरूपायावद्वर्ततेतावद्वि धिवादकर्मणाम् विर्यजेतेत्यादिश्रुतिर्वादःकर्तव्यताबोधकोयेषांकर्मणांविधेयोवशवर्त्तितत्कर्मकर्ताभवेत तदपगमेतुतदाखिलं जगन्नेतीति

यावच्छरीरादिषुमाययात्मधीस्तावद्विधेयोविधिवादकर्मणाम् ॥ नेतीतिवाक्यैरखिलं निषिद्धय तज्ज्ञात्वापरात्मानमथत्यजेत्क्रियाः ॥ १७ ॥

वाक्यैः अथातआदेशोनेतिनेतिइत्यादिवाक्यैर्निषिध्य मिथ्यात्वेननिर्णीयतद्विलक्षणतयासत्यत्वेनपरमात्मस्वरूपंज्ञात्वाक्रियास्त्यजेत् निरूपितमेतत् ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मविज्ञानेसत्यवश्यमविद्या निवर्ततइत्याह यदेति आत्मनिशुद्धेन्तःकरणेपरमात्मनईशस्यात्मनोजीवस्यचयोविभेदोमायान्तःकरण
रूपोपाधिद्वयकृतोविभेदोभेदस्तस्यभेदकं नाशकंभास्वरंप्रकाशशीलं यद्विज्ञानमितरवृत्त्युपमर्दनपूर्वकंब्रह्माकाराऽखण्डाद्यावृत्तिर्यदाऽवभाति

यदापरात्मात्मविभेदभेदकंविज्ञानमात्मन्यवभाति भास्वरम् ॥
तदैवमायाप्रविलीयतेऽञ्जसासकारकाकारणमात्मसंसृतेः॥१८॥

असंभावनादितिरस्कारेणोदेति तदैव सकारकाजन्मान्तरप्रापककर्मसहितामायातत्तज्जीवोपाधिभूताविद्याऽञ्जसाझदितिप्रविलीयतेनश्यति
ननुतन्नाशेऽपिसंसारनाशःकथमतोमायाविशेषणम् आत्मसंसृतेःकारणंसंसारस्योपादानकारणमेवंचतन्नाशेकार्यनाशोभवत्येवेतिभावः १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं पुनर्दार्ढ्यायाह श्रुतीति तत्त्वमसीत्यादिश्रुतिरूपैःप्रमाणैस्तज्जानितज्ञानेन नाशितासाविद्याकथमपिकार्यकारिणीभविष्यतीति काकुरत्र सर्वथानेत्यर्थः असतःकार्यकारित्वासंभवादितिभावः पुनश्चतस्यानोद्भवइत्याह विज्ञानमात्रादिति अमलाशुद्धाद्वितीयतःद्विती

श्रुतिप्रमाणाभिविनाशिताचसाकथंभविष्यत्यपिकार्यकारिणी ॥
विज्ञानमात्रादमलाद्द्वितीयतस्तस्मादविद्यानपुनर्भविष्यति १९

यात्मविषयकाद्विज्ञानमात्रादितरासहकृतान्निदिध्यासनपरिपाकजज्ञानाचसोनष्टातस्मात्सापुनर्नभाविष्याति रज्ज्वज्ञानमूलकस्य सर्पस्य रज्जुज्ञानेन निवृत्तस्ययथानपुनरुत्पात्तिरितिभावः ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्यायाइतरनिरपेक्षायाएवमोक्षकारणत्वमुक्तंयुक्तिपूर्वकंपुनःकथयतिश्रोतृदार्ढ्याय।यदीति। यदिनष्टातत्त्वज्ञाननाशिता सा न पुनः प्रसूयतेनोत्पद्यतेतदाकारणाभावादहंमतिःकथंभवेत्। कथमपिनभवेदित्यर्थः। तदभावाच्चतत्कालेकर्माभावइतिस्वफलजननेसास्वतन्त्राइ

यदिस्मनष्टा नपुनःप्रसूयते कर्ताऽहमस्येति मतिः कथं भवेत् ॥ तस्मात्स्वतन्त्रा न किमप्यपेक्षते विद्या विमोक्षाय विभाति केवला ॥ २० ॥

तरनिरपेक्षैवनकिमप्यपेक्षते द्वितीयस्य।संभवात् अतः केवलाऽसहायैवविमोक्षायविभातितत्फलिकाभवतीत्यर्थः ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रार्थेश्रुतिरपिप्रमाणमित्याह सेति साप्रसिद्धा नकर्मणानप्रजयाधनेनत्यागेनैकेअमृतत्वमानशुः इत्यादिकातैत्तिरीयश्रुतिःप्रशस्तानामर्थ
वादैःप्राशस्त्येनबोधितानामपिकर्मणांन्यासंत्यागंसादरंस्फुटमाह नतुकर्मसमुच्चयमित्यर्थः तथावाजिनां वाजसनेयिनाम् एतावदरेखल्वमृत

सातैत्तिरीयश्रुतिराहसादरंन्यासंप्रशस्ताखिलकर्मणां स्फुटम् ॥
एतावदित्याहचवाजिनांश्रुतिर्ज्ञानंविमोक्षायनकर्मसाधनम् २१

त्वम् इत्यादिका ज्ञानंविमोक्षायसाधनं नकर्मेत्येतदाह ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहङ्कारत्यागरूपकारणवैषम्यात् क्रियाज्ञानयोर्वैषम्यमुक्त्वा फलमयुक्तमपिवैषम्यमाह विद्येति हेसमुच्चयवादिन् त्वयाक्रतुरग्निष्टोमादिर्विद्यासमत्वेनदर्शितः परन्तुसमोदृष्टान्तोनोदाहृतः अनेनक्रतुर्विद्यासमः श्रुतिबोधितकर्तव्यताकत्वादित्यनुमानान्निरस्तम् दृष्टान्ताभावात् अन्वय्येवानुमानन्नव्यातिरेकीतिभावः एतच्चाकरेविस्तरेणप्रपञ्चितम् ननुविद्याकर्मणीसमे एकफलत्वाच्चक्रदण्डादिवदित्यनुमान-

विद्या समत्वेनतु दर्शितस्त्वया क्रतुर्नदृष्टान्त उदाहृतः समः ॥
फलैःपृथक्त्वाद्बहुकारकैः क्रतुःसंसाध्यतेज्ञानमतोविपर्ययम् २२

मितिचेत्तत्राह फलैः पृथक्त्वात षष्ठ्यर्थेतृतीया फलानांभेदादित्यर्थः एवंचस्वरूपासिद्धोहेतुरितिभावः समानकारकत्वमपिहेतुर्नेत्याह क्रतुर्बहुभिः कारकैरहंममताभिमानरूपैरान्तरैर्वाह्यैश्चदेशकालादिनियमैश्चसाध्यते ज्ञानन्त्वतोविपर्ययवदतोनतयोः साम्यमितिभावः २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वकरणेप्रत्यवायभिया कर्मकार्यमितिचेन्नेत्याह सप्रत्यवायइति कर्मत्यागेनाहंनिश्चयेनाहंप्रत्यवायसंहितोभविष्यामीत्येवंशुद्धात्मानि-
अनात्मधर्मस्यधीरमज्ञस्यतत्त्वज्ञानविकलस्यप्रसिद्धा नतुतत्त्वदर्शिनः तस्याहंबुद्धेरभावात् पापादेरनात्मधर्मतानिश्चयाच्च तस्माद्बुधैःकर्म

स प्रत्यवायोह्यहमित्यनात्मधीरज्ञप्रसिद्धा नतु तत्वदर्शिनः ॥
तस्माद्बुधैस्त्याज्यमपि क्रियात्मभिर्विधानतःकर्मविधि प्रका
शितम् ॥ २३ ॥

क्रियात्यभिः षष्ठ्यर्थेतृतीया क्रियाफलसक्तचित्तानां विधानतोविधानेनेतिकर्तव्यतयायुक्तंकर्म विधिभिरवश्यकर्तव्यतयाबोधितमपि
त्याज्यमित्यर्थः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाविरक्तस्यकार्यमाह। श्रद्धेति। गुरुशास्त्रयोर्विश्वासःश्रद्धातदन्वितोबुभुत्सुःशुद्धमानसोऽपि निष्कामकर्मानुष्ठानाच्छुद्धमानसश्चगुरोः प्रसादाल्लब्धतत्त्वमसीतिवाक्यतः श्रुतमात्मजीवयोरैकात्म्यंविज्ञाय मननिदिध्यासनपरिपाकाभ्यांसाक्षात्कृत्य। चएवार्थः। साक्षा

श्रद्धान्वितस्तत्त्वमसीतिवाक्यतो गुरोःप्रसादादपिशुद्धमानसः॥
विज्ञायचैकात्म्यमथात्मजीवयोः सुखी भवेन्मेरुरिवाप्रकम्पनः
॥ २४ ॥

त्कृत्यैवसुखी भवेत्। सकलदुःखहीनोभवेदित्यर्थः। अप्रकम्पनःविषयाभिलाषाक्षोभितान्तःकरणः ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महान्वयंविवरीतुंवाक्यार्थस्यपदार्थबोधपूर्वकत्वमाह । आदाविति । विधानतःभ्रमप्रमादगर्हितेनवाक्यार्थविज्ञानस्य विधावुत्पत्तौआ
दौप्रथमंमुख्यमितियावत् । पदार्थावगतिःकारणम् । हिप्रसिद्धं तस्यपदत्रयंतत्त्वम्असीति । तत्रतत्पदार्थःपरमात्मासर्वज्ञत्वादिगुणः त्वं

आदौ पदार्थावगतिर्हिकारणं वाक्यार्थविज्ञानविधौ विधानतः ॥
तत्त्वंपदार्थौपरमात्मजीवकावसीतिचैकात्म्यमथानयोर्भवेत्
॥ २५ ॥

पदार्थोजीवःअनयोस्तत्त्वंपदार्थयोरैकात्म्यंतद्बोधकमसीतिपदम् ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुसर्वज्ञत्वादिगुणस्येशस्यकिञ्चिज्ज्ञत्वधर्मवता जीवेनैकात्म्यं विरुद्धमित्याशङ्क्याह । प्रत्यागिति । अहंबुद्धिविषयत्वंप्रत्यक्त्वंजीवधर्मः परोक्षत्वमीशधर्मस्तदादिधर्मकृतमात्मनोःपरमात्मजीवात्मनोर्विरोधंविहायत्यक्त्वातयोः संशोधिताम् युक्तिभिःसम्यग्विचारितांतत्त्वंपदाभ्यांशक्त्यभावेऽपिवक्ष्यमाणप्रकारयालक्षणयालक्षितां ज्ञातांचिदात्मतां संगृह्य तत्त्वंपदोपास्थानिविषयांकृत्वा स्वमात्मानंतथाज्ञात्वाऽथएकात्मज्ञानानन्तरमद्वयोभवत् । चित्स्वरूपतांप्राप्तइवभवत् । पूर्वमपितत्स्वरूपएवविस्मृतकण्ठचामीकरन्यायेनचतत्प्राप्तिः तद्वदत्युक्तम् ।

प्रत्यक्परोक्षादिविरोधमात्मनोर्विहायसंगृह्यतयोश्चिदात्मताम् ॥ संशोधितांलक्षणयाचलक्षितांज्ञात्वास्वमात्मानमथाद्वयोभवेत् ॥ २६ ॥

अयंभावः तत्त्वंपदयोर्द्वावर्थौ वाच्योलक्ष्यश्च तत्रतत्पदस्यमायोपाधिःसर्वज्ञत्वादिविशिष्टोवाच्यः त्वंपदस्यापिकिञ्चिज्ज्ञत्वादिविशिष्टो मायाकार्याविद्योपाधिरविद्यावदन्तःकरणोपाधिर्वाच्यः उभयोरपिविशेषणांशत्यागेनशुद्धश्चिदात्मालक्ष्यः तत्रवाच्ययोर्विरुद्धधर्मकत्वादैक्यासंभवेऽपिलक्ष्ययोरैक्यंनिर्बाधमेवेति ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तलक्षणास्वरूपमाह । एकात्मकत्वादिति जहतीलक्षणाजहत्स्वार्थलक्षणायथागङ्गायांघोषइत्यत्रगङ्गापदार्थस्यप्रवाहस्यघोषाधारता नुपपत्त्यासर्वथातत्परित्यागेनतीररूपार्थलक्षणा साप्रकृते न एकात्मत्वात् । विशेष्यांशस्यैकत्वात्सर्वथास्वार्थत्यागाभावात् । तथाज हल्लक्षणताजहत्स्वार्थलक्षणात्वत्त्वमपिअत्रनसंभवति । यथाकाकेभ्योदधिरक्ष्यतामित्यादौकाकपदस्यस्वार्थात्यागेनैवदध्युपघातकेलक्षणा सापिन । विरोधतःविशेषणत्यागेनसर्वथास्वार्थत्यागाभावात् । अतोभागलक्षणाजहदजहल्लक्षणायुज्यते । अदोषतःपूर्वोक्तदोषाभावात्

एकात्मकत्वाज्जहती न सम्भवेत्तथाऽजहल्लक्षणता विरोधतः॥
सोऽयंपदार्थाविवभागलक्षणायुज्येततत्त्वंपदयोरदोषतः॥२७॥

विशेष्यांशस्यात्यागाद्विशेषणांशस्यत्यागाच्च । तत्रदृष्टान्तः । सोऽयंपदार्थाविव । यथासोऽयंदेवदत्तइत्यत्रतद्देशादिविशिष्टोऽतीतानुभव विषयोवातत्पदार्थः एतद्देशादिविशिष्टोऽनुभूयमानोवेदंशब्दार्थः । तयोश्चाविरुद्धविशेषणकत्वादैक्यासंभवेनदेशादिरूपविशेषणत्यागेना नुभवगतानीतत्वादिविशेषणत्यागेनवालक्षणयैक्यंतद्वदितिभावः ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथत्याज्यत्वायजीवोपाधिमाह । रसादीति । रसापृथ्वीआदिर्येषांतानिपञ्चीकृतानियानिभूतानितेभ्यःसंभवोयस्यतत् । पञ्चीकरणंचे त्थम् एकैकंभूतंद्विधाविभज्यतत्रैकंभागंचतुर्धाविभज्यतेषांभागानांस्वेतरभूतचतुष्टयार्धभागचतुष्टयेसंयोजनेएकैकंभूतंपञ्चात्मकंभवतिभा

रसादिपञ्चीकृतभूतसंभवंभोगालयंदुःखसुखादिकर्मणाम् ॥ शरी
रमाद्यन्तवदादिकर्मजंमायामयंस्थूलमुपाधिमात्मनः ॥ २८ ॥

गाधिक्याच्चप्रातिस्विकतयाभूगादिव्यवहारोऽपि । सुखदुःखयोरादीनियानिकर्माणितेषांभोगस्तत्कर्मजन्यसुखदुःखानुभवस्तस्यालयमाश्र यभूतमाद्यन्तवत् उत्पत्तिनाशयोगि आदिकर्मजंप्राग्भवीयकर्मजन्यंमायामयंपरम्परयामायाविकारः तद्विकारभूतविकारत्वात् । एतच्छरी रमात्मनःस्थूलमुपाधिंवदन्तीतिशेषः ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसूक्ष्मोपाधिमाह। सूक्ष्ममिति । बुधाःअन्यतस्थूलशरीरविलक्षणंशरीरंलिङ्गदेहाख्यमात्मनउपाधिंविदुः । तत्स्वरूपमाह। सूक्ष्मंचक्षु-
राद्यविषयः मनोबुद्धिदशेन्द्रियैःप्राणैश्चयुतम् सङ्कल्पात्मकंमनः निश्चयात्मिकाबुद्धिः घ्राणरसनाचक्षुस्त्वक्श्रोत्रेतिपञ्चज्ञानेन्द्रियाणि वा-

सूक्ष्मंमनोबुद्धिदशेन्द्रियैर्युतंप्राणैरपञ्चीकृतभूतसंभवम् ॥ भोक्तुः
सुखादेरनुसाधनंभवेच्छरीरमन्यद्विदुरात्मनोबुधाः ॥ २९ ॥

क्पाणिपादपायूपस्थानिकर्मेन्द्रियाणि प्राणापानव्यानोदानसमानाश्चप्राणास्तैर्युतमेतत्सप्तदशसमुदायात्मकम्। तदाधारभूतान्याह ।अप
ञ्चीकृतभूतसंभवंतेभ्यउत्पन्नमतएवादृश्यम् । तथाभोक्तुःसुखादेःसुखदुःखाद्यनुभवस्यानुसाधनम् स्थूलशरीरस्यैतदनुगतस्यैवभोगसाधनत्व
मितिभावः । एतद्वियोगेनैवमरणव्यवहारइतिबोध्यम् ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिजीवोपाधिद्वयमुक्त्वाईशोपाधिमाह । अनादीति । अनादिउत्पत्तिहीनम् । नानाविधपरिणामशालितयापरिणामरूपेणनश्वरामिति अनादित्वमात्रोक्त्यासूचितम् । अनिर्वाच्यम् सत्त्वासत्त्वाभ्यांनिर्वक्तुमशक्यम् कारणंसकलप्रपञ्चस्यजनकम् ईदृशीमायातुब्रह्मणःपरमी-

अनाद्यनिर्वाच्यमपीहकारणं मायाप्रधानंतुपरंशरीरकम् ॥ उ-
पाधिभेदात्तुयतःपृथक्स्थितं स्वात्मानमात्मन्यवधारयेत्क्र-
मात् ॥ ३० ॥

श्वरव्यवहारसंपादकत्वादुत्कृष्टंप्रधानंशरीरकम् । स्वार्थेकः । एवमुपाधिभेदादेकमेवचैतन्यंयतः पृथक्स्थितंजीवईशइतिभेदबुद्धिविषय मतोलक्षणयोपाधिपरित्यागेनस्वात्मानमात्मनिअवधारयेदभेदेनजानीयात् । क्रमाच्छ्रवणमनननिदिध्यासनक्रमेणेत्यर्थः ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवाक्यार्थविचारफलमाह । कोशेष्विति । आनन्दमयस्य ब्रह्मत्वेअन्नमयप्राणमयमनोमयविज्ञानमयेषुचतुर्षुकोशेषुतत्तत्सङ्गात्तत्सदाकृतिर्विभाति यथाजपादिसङ्गात्स्फटिकोऽनेकाकृतिर्भाति । आनन्दमयस्यापि जीवत्ववादिनातुतेनसहपञ्चसु कोशेष्वितिबोध्यम् । अस्मि-

कोशेषुपञ्चस्वपितत्तदाकृतिर्विभातिसङ्गात्स्फटिकोपलोयथा ॥
असङ्गरूपोऽयमजोयतोऽद्वयोविज्ञायतेऽस्मिन्परितोविचारि-
ते ॥ ३१ ॥

न्महावाक्येपरितोविचारितेसम्यग्विचारितेसत्ययमात्माऽसङ्गरूपःअन्नमयादिभिःसङ्गरहितः । असङ्गोनहिसज्जते । इतिश्रुतेः । अजोऽद्वयश्चविज्ञायते । स्थूलोऽहमित्यादिस्त्वज्ञस्यतत्तत्कोशप्रसङ्गात्प्रतीतिःस्फटिकवत् तत्त्वज्ञस्यतुनतथाप्रतीतिरितिभावः । एवंचतत्तदुपाधिकृततत्तद्रूपताप्रतीतिनिरासएव विचारफलमितिभावः ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जाग्रदाद्यवस्थाऽपि बुद्धेर्धर्मोनात्मधर्मइत्याह । बुद्धेरिति । इहआत्मनिस्वप्नादिभेदेन जाग्रत्स्वप्नसुषुप्तिभेदेन यात्रिधावृत्तिर्दृश्यतेसाऽपि गुणत्रयात्मनः सत्त्वरजस्तमोरूपगुणत्रयस्वरूपाया बुद्धेर्धर्मः । उक्तावस्थात्रयस्योक्तमूलकत्वात् । एतदवस्थात्रयस्यास्मिन्नवस्थात्रय-साक्षिणि आत्मनि भानं मृषा बुद्ध्यध्यास निबन्धनं न तु वास्तव मित्यर्थः । अन्योऽन्यतोव्यभिचारतस्तस्यावस्था त्रयस्यस्व रूपतो

बुद्धेस्त्रिधा वृत्तिरपीह दृश्यते स्वप्नादि भेदेन गुणत्रयात्मनः ॥ अन्योऽन्यतोऽस्मिन्व्यभिचारतोमृषा नित्ये परे ब्रह्मणि केवले शिवे ॥ ३२ ॥

मृषात्वात्तज्ज्ञानस्य मृषात्वमेव । स्वप्नकाले जाग्रत्सुषुप्त्योरभावात् । जाग्रतिइतरद्वयस्याभावात् सुषुप्ताबितरयोरभावात्परस्परं व्यभिचारोबोध्यः आत्मनस्तदनाश्रयत्वं विशेषणैराह । नित्येउत्पत्तिनाशशून्येपरेगुणत्रयातीते ब्रह्मणिव्यापकेकेवलेऽसङ्गेशिवआनन्दरूपे एवंभूतेसदैकरसेपरस्परव्यभिचारधर्माभानमसंभवीति भावः ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथत्याज्यत्वायसंसारमूलभूतांवृत्तिमाह । देहेति । एषांसङ्घातइतरेतराध्यासविषयात् अजस्रंयावद्धियो बुद्धेर्वृत्तिस्तमोमूलतयाऽज्ञ
लक्षणाऽज्ञत्वज्ञापिका यावत्परिवर्तते तावद्भवोद्भवःसंसारोद्भवोभवेत् । तमःपदंरजसोऽप्युपलक्षणम् । रजस्तमःप्रधानाबुद्धिः संसारहेतु

देहेन्द्रियप्राण मनश्चिदात्मनां सङ्घादजस्रं परिवर्तते धियः ॥
वृत्तिस्तमोमूलतयाऽज्ञलक्षणा यावद्भवेत्तावदसौ भवोद्भवः॥३३॥

त्वात्सर्वथात्याज्येति भावः ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत महावाक्यविचारस्य कर्तव्यमाह । नेतीति । अथात आदेशो नेति नेति इति प्रमाणेन निराकृतं मिथ्यात्वेन गृहीतमखिलं जगत् येन सः ततो हृदा सत्त्वप्रधानेन मनसा सम्यगास्वादितं चिल्लक्षणं घनामृतं दुःखासंभिन्नं सुखं येन सः । स्वर्गादि तु परिणामदुःखत्वात्तत्संभिन्नमेव । एवंभूतोऽशेषं जगद्देहेन्द्रियादिदृश्यसमूहं त्यजेत् हानोपादानबुद्धिविषयं न कुर्यात् । किन्तूदासीनस्तत्र भवेत् । ननु देहेन्द्रियादिभिरेव तज्ज्ञान

नेतिप्रमाणेन निराकृताखिलो हृदा समास्वादितचिद्घनामृतः ॥ त्यजेदशेषं जगदात्तसद्रसं पीत्वा यथाऽम्भः प्रजहाति तत्फलम् ॥ ३४ ॥

लाभात् कथमुपजीव्यस्य त्याग इत्याशङ्क्य दृष्टान्तदर्शनेन परिहरति । यथा तृषावान् आत्तः सद्रसो माधुर्यं येन तादृशं नारिकेलनारङ्गादि फलान्तवर्त्यम्भः पीत्वा तत्स्थानभूतं तत्फलं जहाति तत्रोदासीनो भवति तद्वत् सर्वदृश्यसारांशो ब्रह्म तल्लाभसति निःसारं दृश्यं नोपादेयं नापि हेयमिति भावः । यतो भयादिसंभावनातद्धेयमित्युच्यते ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतरस्यानित्यत्वेनतत्रवैराग्यार्थमात्मनएवनित्यत्वमाह । कदाचिदिति । कदापीत्यर्थः । अनवः उत्पत्त्यनन्तरंविद्यमानोहिनवः । तेन जन्मानन्तरास्तित्वंव्यावर्तितं नवत्वाभावेनैवजीर्णत्वाभावादवस्थान्तरापत्तिरूप परिणामोऽपिनिरस्तः ।अनेनअस्तिजायतेवर्द्धतेविपारिणम तेऽपक्षीयते नश्यतीति षड्भाव विकार राहित्यमुक्तम् । एवंचैतद्भिन्नं सर्वमुक्तषड्भावविकारवत्त्वादानित्यमिति ततोविरज्येतेतिबोधित-

कदाचि दात्मान मृतोनजायते नक्षीयते नापिविवर्धतेऽनवः ॥
निरस्तसर्वातिशयः सुखात्मकः स्वयम्प्रभः सर्वगतोऽयमद्वयः ३५

म् । यतऽईदृशोऽतएवनिरस्तः सर्वस्यदेहेन्द्रियादेरतिशयोमहत्त्वं येनस्वलाभात्सः यल्लाभान्नापरोलाभइतिःश्रुतेः यतःसुखात्मकः आनन्द स्वरूपः स्वयम्प्रभःस्वप्रकाशकश्च देहेन्द्रियादिस्तु दुःखस्वरूपः परप्रकाश्यश्च । यस्यभासासर्वमिदंविभाति । इतिश्रुतेः । सर्वगतोव्यापकः अयमहंबुद्धिविषयःप्रत्यगात्माऽपिअद्वयः उक्ताद्वयब्रह्मस्वरूपएव । नततोऽतिरिक्तइतिभावः । अयमात्माब्रह्म । इतिश्रुतेः ॥ ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुएवंविधेविकारशून्येआत्मनिजन्ममरणादिप्रवाहरूपसंसारभानंकथमितिशङ्कते। एवंविधेइति।दुःखमयःदुःखप्रचुरः।उत्तरयति। अज्ञानतइ तिअज्ञानमूलकोयोध्यासोदेहान्तः करणादौअहंममेत्यध्यासस्तद्वशात्। एवंचभ्रान्तिरूपातत्प्रतीतिरितिभावः। नन्वेवंकथंतस्यसंसारस्यनि

एवंविधे ज्ञानमये सुखात्मके कथंभवो दुःखमयःप्रतीयते ॥
अज्ञानतोऽध्यासवशात्प्रकाशतेज्ञानेविलीयेत विरोधलःक्षणात्॥
॥ ३६ ॥

वृत्तिस्तत्राह । ज्ञानेति । आविर्भूतइतिशेषः । ज्ञानस्याज्ञानविरोधित्वात्तदुत्पत्तिक्षणएवकारणभूताज्ञाननाशात्तत्कार्यसंसारस्यापि वि लयइत्यर्थः । यथारज्जुज्ञाननरज्जौसर्पस्यलयइत्यर्थः ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाध्यासलक्षणमाह । यदन्यदिति । यदन्यत्सर्पादिकमन्यत्ररज्ज्वादौभ्रमात्भ्रमजनकाद्दोषाद्विभाव्यतेविज्ञायतेअमुंविपश्चितोविद्वांसोऽध्यासइत्याहुः । यथाऽसर्पभूतेरज्ज्वादौ अहिविभावनंसर्पारोपोरज्ज्वबुद्धिमूलकस्तद्वदीश्वरेऽपिजगद्देहादिसंसारात्मकंसर्वंविभाव्यतेआत्मज्ञानाभावाद्यथार्थतयाज्ञायते ॥ ३७ ॥

यदन्यदन्यत्र विभाव्यते भ्रमादध्यासमित्याहुरमुंविपश्चितः॥
असर्पभूतेऽहिविभावनंयथा रज्ज्वादिकेतद्वदपीश्वरेजगत्॥३७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनिव्रगद्धानेकीदृशोऽध्यामोनिमित्तंतदाह विकल्पेति सर्वविकल्पकारणमायारहितेवस्तुतस्तत्सङ्गरहितेचिदात्मकेचित्स्वरूपेसर्वकारणेनिरामयेदुःखासंभिन्नानन्दमयेकेवलेसर्वविकारशून्येपरेदृश्याविलक्षणेब्रह्मणिव्यापके आत्मनिप्रथममहङ्कारः कल्पितः सएवाध्यासः ।

विकल्पमायारहितेचिदात्मके ऽहङ्कारएष प्रथमः प्रकल्पितः ॥
अध्यासएवात्मनिसर्वकारणे निरामयेब्रह्मणि केवलेपरे ॥ ३८॥

अहंबुद्ध्यात्मकोऽध्यासएवसर्वसंसारकारणमितिभावः ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बुद्धिनिष्ठएवसंसारोनत्वात्मनिष्ठइत्यत्रान्वयव्यतिरेकौप्रमाणयति। इच्छादीति। परेसर्वसाक्षिणिआत्मनिसंसृतिहेतवःभासमानसंसारकारणं
सदाकालत्रयेऽपिइच्छादिरागादिसुखादिधार्मिकाः इच्छापक्षेरागद्वेषौसुखदुःखंइत्येवमादिद्वन्द्वधार्मिकाःधियएवधीषुसतीषुसंसारइत्यन्वयमु

इच्छादिरागादिसुखादिधार्मिकाः सदा धियः संसृतिहेतवः परे ॥
यस्मात्प्रसुप्तौतदभावतःपरः सुखस्वरूपेणविभाव्यतेहिनः ॥३९॥

क्त्वातद्व्यतिरेकमाहयस्मात्कारणात्प्रसुप्तौतदभावा त्धीवृत्त्यभावात परआत्मानोऽस्माभिःतृतीयार्थेषुषष्ठी। सुखरूपेणस्वस्वरूपमात्रेणाविभा
व्यतेनिश्चीयते नतु संसारित्वेनेतिभावः सुप्तोत्थितस्तुसुखमहमस्वाप्समितिप्रत्यभिज्ञानुभवात्तदात्मस्वरूपनिश्चयोऽस्तीतितात्पर्यम् ॥ ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथपुनस्तत्त्वं पदार्थस्वरूपमाह । अनादीति । अनादिर्याऽविद्यातत उद्भवोयस्याः बुद्धेरन्तःकरणस्यतत्रविम्बितःप्रतिबिम्बिताश्चितःप्रकाशः सजीवइतीर्यते आत्मापरात्माधियः साक्षितयाधीधर्मासङ्गेनैवपृथक्स्थितः । अन्तर्यामितयेत्यर्थः जीवोऽहंसुखीत्यादिप्रकारेणान्तःकर

अनाद्यविद्योद्भवबुद्धिबिम्बितोजीवप्रकाशोऽयमितीर्यते चितः ॥ आत्माधियः साक्षितया पृथक् स्थितो बुद्ध्या परिच्छिन्नपरः सएव हि ॥ ४० ॥

णधर्माध्यासवान्परमात्मातु साक्षितयासर्वत्रविद्यमानोऽपिनतथेतिभावः । अतएवबुद्ध्यापरिच्छिन्नपरः बुद्धिलक्षणपरिच्छेदरहितःअतएव परः । एवंचज्ञानेनप्रतिबिम्बाधार विलयप्रतिबिम्बस्यविलयात्सजीवः सएवपरमात्मैवहिप्रसिद्धं सइत्यस्यचानुवृत्तिर्बोध्या ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ बुद्ध्यात्मनोःपरस्पराध्यासवशात् परस्परधर्मभानमितिदार्ढ्यायपुनराह । चिद्बिम्बेति । चिदात्मचेतसोरन्योन्याध्यासवशात् पर
स्परतादात्म्यारोपाज्जडाजडत्वंप्रतीयते । चेतसांवृत्तीनांज्ञानत्वं जीवात्मनांजडत्वंप्रतीयते । अतएवज्ञानाश्रयआत्मेति चितएवताकिं
कव्यवहारः । जीवात्मनिजडात्मानिजडात्माकथ्यते बुधैरितिस्मार्तव्यवहारश्च । अत्रहेतुः । चिदित्यादि । चिद्बिम्बस्यसाचिदाभासः अ

चिद्बिम्बसाक्ष्यात्मधियांप्रसङ्गतस्त्वेकत्रवासादनलाक्तलोहवत्॥
अन्योऽन्यमध्यासवशात्प्रतीयते जडाजडत्वंचचिदात्मचेतसोः
॥ ४१ ॥

क्षेःसहितः साक्षःसेन्द्रियः सचासावात्मामनःशरीरन्तःकरणंतेषांप्रकृष्टसङ्गादतिसान्निकर्षादध्यासइत्यर्थः । अनलाक्तलोहवत् अग्नितप्तलो
हपिण्डवत् अत्रदृष्टान्तः । अग्निधर्मोदाहकत्वं लोहधर्मश्चवर्तुलत्वाद्यनलेभासते । तत्रहेतुरेकत्रवासात् परस्पराविभागेनवृत्तेरित्यर्थः । तद्व ॥ २१ ॥
देतयोरपि परस्परधर्माध्यासइत्यर्थः ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं दाढ्यार्यपुनराह । गुरोरिति । वेदवाक्यतइत्यनेन श्रवणंगुरोःसकाशादपि । ततश्चानेनमननमुक्तम् । ताभ्यांसञ्जातोविद्यया ज्ञानरूपस्यात्मनोऽनुभवोयस्यसः । अनेनकृतनिदिध्यासनइत्यर्थः । तं चिदानन्दस्वरूपं स्वात्मानमुपाधिवर्जितं रहितोपाधिधर्ममात्मस्थं

गुरोःसकाशादपिवेदवाक्यतः सञ्जातविद्यानुभवोनिरीक्ष्य तम् ।
स्वात्मानमात्मस्थमुपाधिवर्जितं त्यजेदशेषं जडमात्मगोचरम् ॥ ४२ ॥

हृत्स्थंनिरीक्ष्य अपरोक्षीकृत्याशेषंजडं दृश्यंत्यजेत् । तत्रोदासीनोभवेदिति भावः ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

ज्ञेयंनिरुपाधिकं स्वरूपंश्लोकद्वयेनाह प्रकाशेति अहंप्रकाशरूपः स्वप्रकाशः परप्रकाशहीनः परप्रकाशरूपोयथाघटादिः अजोजन्मादि हीनः अद्वयः सजातीयद्वितीयरहितः असकृद्विभातः सकृदपिपरेणभासकान्तरेणप्रकाशितः सकृद्विभातः नसकृद्विभातोसकृद्विभातः नत

प्रकाशरूपोऽहमजोऽहमद्वयोऽसकृद्विभातोऽहमतीवनिर्मलः ॥
विशुद्धविज्ञानघनोनिरामयःसम्पूर्णआनन्दमयोऽहमक्रियः॥४३॥

त्रसूर्योभातिनचन्द्रतारकमितिश्रुतेः नतद्भासयतेसूर्यइतिस्मृतेश्च अतीवनिर्मलः मायाकृतावरणविक्षेपरहितः विशुद्धविज्ञानघनः विशुद्धचि दकरसः निरामयःकर्तृत्वाभिमानरहितः सम्पूर्णःदेशकालपरिच्छेदहीनः आनन्दमयः आनन्दरूपः स्वार्थेमयट् अक्रियः परिणामहीनः ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदैवेति अहंसदैवकालत्रयेऽपिमुक्तःसर्वधर्मरहितः अचिन्त्यशक्तिमान यः परमात्मा अतिन्द्रियज्ञानमूइन्द्रियातिरिक्तज्ञानरूपःयतोवाचो निवर्त्तन्ते अप्राप्यमनसासहइतिश्रुतः अविक्रियात्मकोऽपरिणामी अनन्तपारःअन्तःकालतःपारःपरन्तीरन्तावविद्यमानौ यस्य तेनदेश

सदैवमुक्तोऽहमचिन्त्यशक्तिमानतीन्द्रियज्ञानमविक्रियात्मकः॥
अनन्तपारोऽहमहर्निशंबुधैर्विभावितोऽहंहृदिवेदवादिभिः ॥४४॥

कालपरिच्छेदहीनः ईदृशोयःपरमात्माबुधैर्हृदि अहर्निशंविभावितः सोऽहमित्यर्थः ॥ ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंभावनायाःफलमाह एवमिति उक्तरीत्यामदाआत्मानं अखण्डितात्मनाविषयानाकृष्टचित्तेन विचारमाणस्यध्यायतः धातूनामनेकार्थ त्वात् चरमाणएवंचारमाणःस्वार्थेऽण् विशुद्धभावनाब्रह्माकारान्तः करणवृत्तिरुदंतीतिशेषः साचोदितानाकारकैर्देहान्तरप्रापककर्मभिः स

एवंसदात्मानमखण्डितात्मनाविचारमाणस्यविशुद्धभावना ॥
हन्यादविद्यामचिरेणकारकैरसायनंयद्वदुपासितंरुजः ॥ ४५ ॥

हाविद्यामाचिरेणशीघ्रमेवहन्यात् यथापामितंसेवितंरसायनं रुजोहन्यात्तद्वत् ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रध्यानेइतिकर्तव्यतामाह विविक्तइति निर्जनइत्यर्थः आसीनोयथोचितपद्मासनाद्युपविष्टः उपारतेन्द्रियः तेनशमदमादिसम्पन्नः विनिर्जितात्माप्राणायामादिभिर्जितान्तःकरणः अतएवविमलान्तराशयोविशुद्धचित्तः विज्ञानदृक्विज्ञानएवदृक्भानंयस्यसः द्रष्टृदृश्यभा

विविक्तआसीनउपारतेन्द्रियोविनिर्जितात्माविमलान्तराशयः॥
विभावयेदेकमनन्यसाधनोविज्ञानदृक्केवलआत्मसंस्थितः॥४६

नरहितः अनेननिर्विकल्पकसमाधिरुक्तः अनन्यसाधनः तत्त्वज्ञानातिरिक्तमुक्तिसाधनास्तित्वभ्रमरहितः केवलोऽसङ्गः आत्मसंस्थितः आत्मन्येवसंस्थासमाप्तिः सञ्जातायस्यसतेन नकदापिविषयान्तरसञ्चारवच्चित्तः विभावयेत् ध्यायेत् ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंच यदेतत्भूतंभविष्यद्वर्तमानं विश्वंपरमात्मादर्शनंभासकोयस्यतत् तस्यभासासर्वमिदंविभातीति श्रुतेः तत्सर्वकारणेमायासान्निधाना
त्सर्वोपादानत्वेनाभिमतेआत्मनिविलापयेत् उपादानसत्ताव्यतिरेकेणकार्यसत्तांनपश्येत् तादृशस्यलक्षणमाह सम्पूर्णः अवाप्तसमस्तका

विश्वंयदेतत्परमात्मदर्शनं विलापयेदात्मनि सर्वकारणे ॥
पूर्णश्चिदानन्दमयोऽवतिष्ठते न वेद बाह्यं न च किञ्चिदान्त
रम् ॥ ४७ ॥

मः तस्यकाम्याभावात् चिदानन्दमयः तद्रूपोऽवतिष्ठते बाह्यमान्तरंच दृश्यंनजानाति सर्वत्रब्रह्मदर्शनादिति भावः ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाधिसिद्धेः पूर्वंयत्कर्तव्यंतदाह । पूर्वमिति । ममाधेः सकलविषयव्यासङ्गनिवृत्तिपूर्वकं ब्रह्माकारवृत्तिः समाधिस्ततः पूर्वमखिलंस चराचरंजगत् ओङ्कारमात्रं विचिन्तयेत् । ओङ्कारोमीयतेऽ नयेतिमात्रा प्रमाणं बोधकत्वेन परिच्छेदकोयस्यतथाजानीयात् । तदेवविवृ

पूर्वं समाधे रखिलं विचिन्तये दोङ्कारमात्रं सचराचरं जगत् ॥
तदेव वाच्यं प्रणवो हि वाचको विभाव्यते ज्ञानवशान्न बो-
धतः ॥ ४८ ॥

णोति तदेवेति । जगदेवेत्यर्थः । प्रणवोवाचकोविभाव्यतेएतत्तुहिप्रसिद्ध इत्यर्थः । इयंभावनाज्ञानवशादेवनबोधकः। बोधोनिर्विशेषब्रह्मसा क्षात्कारस्तदुत्तरंनेत्यर्थः । तस्यसर्ववृत्त्युपमर्दकत्वात् ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमर्थंविवृणोति ।अकारेति । अकारसञ्ज्ञस्तद्वाच्यःपुरुषोहिविश्वकोविश्वएवविश्वकः विश्वशब्देनपरिभाषितःअयंजाग्रत्साक्षीविराट् ततःस्वप्नसाक्षीतैजसःतेनपदेनपरिभाषितःलिङ्गदेहाभिमानीहिरण्यगर्भउकारकः उकारप्रतिपाद्यईर्यते । ततः सुषुप्तिसाक्षीप्राज्ञपदवाच्यो

अकारसञ्ज्ञः पुरुषो हि विश्वको ह्युकारकस्तैजसईर्यते क्रमात्
प्राज्ञो मकारः परिपठ्यतेऽखिलैः समाधि पूर्वं न तु तत्त्वतो
भवेत् ॥ ४९ ॥

मायोपाधिकोमकारस्तद्वाच्यः परिपठ्यतेऽखिलैर्वेदैः । इयंभावनासमाधिपूर्वंसमाधेःपूर्वमेव नतत्त्वतः तत्त्वसाक्षात्कारेसतिनभवेत् । सर्वस्यब्रह्मणिप्रविलयात् ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाविलापन प्रकारमाहद्वाभ्याम् । विश्वंत्विति । उकारमध्ये बहुधाव्यवस्थितं स्थूलदेहनिबंधनंस्थूलदेहाभिमानेन स्थितं विश्वम्पुरुषंत-द्वाचकमकारम् च विलापयेत् । तुश्चार्थे । विलीनम्भावयेत् ननस्तैजसंलिङ्गदेहाभिमानिनम् पुरुषं तद्वाचकंप्रणवस्य द्वितीय वर्णमुकारं वि-

विश्वं त्वकारं पुरुषं विलापयेदुकारमध्ये बहुधा व्यवस्थितम् ।
ततो मकारे प्रविलाप्य तैजसं द्वितीयवर्णं प्रणवस्य चान्तिमे ॥५०॥

लीनविश्वकमकारं विलाप्याविलीनम्भावयित्वा ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तनस्तादृशंमकारंतद्वाच्यंप्राज्ञंचकारणंकारणत्वाभिमानिनंपुरुषमिहात्मनि चिद्घनेपरे विलापयेत् तथाभावयेत् । ततः सोऽहंमर्वोपाधिला
पाधिष्ठानंपरब्रह्मविभावयेत् । तद्विशिनष्टि । सदाविमुक्तिमत् नित्यमुक्तम् । नन्वहंपदार्थस्यरागद्वेषादिमलिनस्यकथं ब्रह्मत्वभावनेसा

मकारमप्यात्मनि चिद्घने परे विलापयेत्प्राज्ञमपीह कारणम् ।
सोऽहं परं ब्रह्म सदा विमुक्तिमद्विज्ञानदृङ्मुक्त उपाधितोऽ
मलः ॥ ५१ ॥

शङ्क्याहंपदार्थंविशिनष्टि । उपाधितोमुक्तः अतएवामलःतथाभावनेसाधनं विज्ञानदृक्विज्ञानं ब्रह्ममात्रप्रत्ययाविच्छेदरूपादृक् निदिध्या
सनं सत्साक्षात्कारेसाधनंयस्यसः ॥ ५१ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंभावनावतोलक्षणमाह । एवमिति । उक्तप्रकारेणसदाजातापरमात्मन्येकभावना यस्यसः परिविस्मृतमखिलंपुत्रदेहादियेनसः । अत एवस्वस्वरूपानन्देनैवतुष्टःनतुविषयानन्देन । तस्यपरिणामेदुःखरूपत्वात्ततोविरक्तइत्यर्थः । साक्षान्नित्यात्मानिसुखप्रकाशकः साक्षा

एवं सदा जातपरात्मभावनः स्वानन्दतुष्टःपरिविस्मृताखिलः ॥
आस्ते स नित्यात्मसुखप्रकाशकः साक्षाद्विमुक्तोऽचलवारिसि
न्धुवत् ॥ ८२ ॥

दौपाधिकनामरूपभेदराहित्येननित्यमखण्डितमात्मस्वरूपंयत्सुखंप्रकाशश्चतद्रूपः एवंरूपो विमुक्तोजीवन्मुक्तः । अचलंनिश्चलंवारियस्यतादृशासिन्धुवदास्ते । विषयमरुद्वन्यरूपलहरीरहितआस्तइत्यर्थः ॥ ८२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशस्यमत्प्राप्तिर्भवत्येवेत्याह । एवमिति । उक्तप्रकारेणसदाऽभ्यस्तसमाधेर्योगिनः निवृत्ताःसर्वेषामिन्द्रियाणांगोचराविषयाःशब्दादयो यस्य विनिर्जिताअशेषारिपवःकामादयोयेनतस्य । तज्जयेनविषयेष्वन्तःकरणाप्रवृत्तिः । अतएव सर्वज्ञत्वनित्यत्वनित्यतृप्तत्वबोध

एवं सदाऽभ्यस्तसमाधियोगिनो निवृत्तसर्वेन्द्रियगोचरस्य हि ॥ विनिर्जिताशेषरिपोरहंसदा दृश्यो भवेयं जितषड्गुणात्मनः ॥५३ ॥

रूपत्वस्वतन्त्रत्वनित्यमलुप्तत्वानन्तरूपाषड्गुणायस्यताद्दशआत्माजितो वशीकृतोयेनतस्य सदादृश्योभवेयम् । एतेनमद्भक्तस्ययोगिनो ऽहंदृश्योनतुभक्तिविमुखस्येति सूचितम् ॥ ८१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंविधोजीवन्मुक्तःप्रारब्धवशेन अनभिमानोभोगानश्नँस्तिष्ठेत् ततोमय्येवविलीयते मद्रूपोभवतीत्याह । ध्यात्वैवमिति ॥ ५४ ।

ध्यात्वैवमात्मानमहर्निशं मुनिस्तिष्ठेत्सदा मुक्तसमस्तबन्धनः ॥
प्रारब्धमश्नन्नभिमानवर्जितो मय्येवसाक्षात्प्रविलीयते ततः ५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सर्वधर्मापेक्षयाऽयमन्यधर्मोऽप्यायानित्याह । आदाविति । भवसंसारमादिमध्यान्तमानेषुसर्वथाभयशोकयोः कारणंविदित्वातत्कारणीभूतंविधिवादप्रेरितंसर्वमित्यादिचोदितंबोधितंसमस्तंकर्ममार्गकाम्यादिहित्वा अखिलात्मनांजीवानांस्वरूपभूतंमामात्मानं परमेश्वरंभजेत् । य

आदौ च मध्ये च तथैव चान्ततो भवं विदित्वा भयशोक कारणम् ॥ हित्वा समस्तं विधिवादचोदितं भजेत्स्वमात्मान मथाखिलात्मनाम् ॥ ५५ ॥

थाधनस्यार्जनेनादौदुःखंमध्येपालनकृतं तत्र राजादिकृतं भयमन्तेनाशेशोकपर्यवसानायदुःखमेवं पदार्थमात्रेद्रष्टव्यम् ॥ ५५ ॥

CC-0. In Public Domain. Digitization by eGangotri

मय्यभेदभावनया नामरूपाविभागेन तद्रूप एवभवतीत्यमुमर्थं सदृष्टान्तमाह । आत्मनीति । आत्मनिसर्वाधिष्ठानेमयिइदंस्वस्वरूपं जीव मभेदेनविभावयन्यदा । तिष्ठतीतिशेषः । तदामयात्मनापरमेश्वरेणाऽभेदेनभवति अभिन्नोभवति । तत्रदृष्टान्तः यथासमुद्रेप्रविष्टं नद्यादि

आत्मन्यभेदेन विभावयन्निदं भवत्यभेदेन मयाऽत्मनातदा ॥
यथाजलं वारिनिधौ यथापयः क्षीरेवियद्व्योम्न्यऽनिले यथाऽ
निलः ॥ ५६ ॥

जलंसमुद्रएव यथाक्षीरेगवादिक्षीरेप्रक्षिप्तंपयःक्षीरमेव यथाव्योम्निमहाकाशेघटाद्यवच्छिन्नाकाशोघटादिभङ्गे च यथाचर्मभस्त्रिकाद्यव च्छिन्नोवायुरनिलेमहावायौ नामरूपाविभागेनैकीभवतीत्यर्थः ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमात्मतत्त्वज्ञस्य जगत्सत्यत्वभ्रमःस्वतएवापैतीत्याह । इत्थमिति । हिरण्यर्थे । लोकसंस्थितोऽपिजीवन्मुक्तिदशायांप्रारब्धवशाल्लोकव्यवहारंकुर्वन्नपिजगन्मृषैवेतिविभावयनसन् यदियदा इत्थमीक्षते ऐकात्म्यं जानीयात्तदा निवृत्तजगत्सत्यत्वभ्रमो भवतीति शेषः।तत्र हेतुः श्रुतियुक्तिमानतोनिराकृतत्वात् । अतोऽन्यदार्तमित्यादिश्रुतिरूपात् जगन्मिथ्यादृश्यत्वात् शुक्तिरजतवदितितदुपबृंहितानुमानरू

इत्थं यदीक्षेत हि लोकसंस्थितो जगन्मृषैवेतिविभावयन्मुनिः ॥
निराकृतत्वाच्छ्रुतियुक्तिमानतो यथेन्दुभेदो दिशिदिग्भ्रमादयः ॥ ५७ ॥

पात्मानतःप्रमाणतोनिराकृतत्वात् तत्रदृष्टान्तोयथेन्दुभेदः एकचन्द्रेद्विचन्द्रत्वभ्रमस्तदेकत्वज्ञानेननिवर्तते यथाच दिशिप्राच्यादौअन्यदिक्त्वभ्रमः सोऽपितत्त्वज्ञानान्निवर्तते । एवंभ्रमतःपुरुषस्य दिक्षुभ्रमणाद्भूमौनिकटवर्तिवृक्षादौच भ्रमणभ्रमस्तत्स्थैर्यज्ञानेन निवर्तते तद्वत् ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशज्ञानेमदाराधनमेवोपायइत्याह । यावदिति । अखिलं जगन्मदात्मकंमदधिष्ठानकंमाद्विवर्तभूतंयावन्नपश्येत्तावन्मत्प्राप्तयेश्रद्धालुः भगवदाराधनमेवज्ञानप्रापकमित्यत्र दृढविश्वासवान् अतिशयेनोर्जिताऽद्धिमतीभक्तिर्मयिभगवतिपूज्यताबुद्धिरूपालक्षणं चिह्नंयस्यसः ।

यावन्नपश्येदखिलं मदात्मकं तावन्मदाराधनतत्परो भवेत् ॥
श्रद्धालुरत्यूर्जित भक्तिलक्षणो यस्तस्य दृश्यो ऽहमहर्निशं हृदि ॥ ५८ ॥

तावन्मदाराधननिष्ठोभवेत् एवंहितस्यहृदि अहमहर्निशंदृश्योभवा मियेयथामांप्रपद्यन्ते तांस्तथैवभजाम्यहमितिस्मृतेः ॥ ५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वोक्तवचनजातस्य श्रुतिसमत्वं कथमेतदालोचनमपिमदाराधनप्रतिबन्धकदुरितध्वंसोपायइत्याह रहस्यमिति । श्रुतिसारसङ्ग्रहत्वेनाति

रहस्यमेतच्छ्रुतिसारसङ्ग्रहं मया विनिश्चित्य तवोदितं प्रिय ॥
यस्त्वेतदालोचयतीहबुद्धिमान् स मुच्यते पातकराशिभिः
क्षणात् ॥ ५९ ॥

गोपनीयता अप्रमाणशङ्काकलङ्कराहित्यंसूचितम् । आलोचयतिसम्यग्विचारयति ॥ ५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथ भगवानुक्तमेवार्थसंक्षेपेण दार्ढ्यायपुनराह भ्रातरिति । यदीतियदित्यर्थे । यदीदंजगत् परिदृश्यते तत्सर्वंमायैवेतिज्ञात्वेति शेषः चेतसासर्वपरिहृत्यतत्रौदासीन्यंकृत्वामद्भावनयामदैक्यभावनया भावितंशुद्धंमानसंयस्यतादृशास्तिष्ठ । इत्युपदिश्याशिषंप्राह निरामयः

भ्रातर्यदीदं परिदृश्यते जगन्मायैव सर्वं परिहृत्य चेतसा॥मद्भा
वनाभावितशुद्धमानसः सुखी भवाऽऽनन्दमयो निरामयः ६०

सन्सुखीभव। सर्वदुःखनिवृत्त्येतिभावः। ततोऽन्तरङ्गामन्यामाशिषमाह आनन्दमयोभवेति तद्रूपोभवेत्यर्थः। यद्यपिपूर्वमानन्दरूपत्वमस्त्ये वतथाऽपितत्प्राप्तिर्विस्मृतकंठस्थभूषणप्राप्तिवत ॥ ६० ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंरीत्यास्वोपासकस्यलोकपावनत्वमाह। यइति । कदावा यदाकदाचिदित्यर्थः । हृदानिर्मलेनान्तःकरणेन यो मामगुणं प्राकृतसत्त्व रजस्तमोरूपगुणरहितम् । सच्चिदानन्दरूपत्वात् । अतएवगुणादव्याकृतात्परंमायातीतम् । यदिवायद्वेत्यर्थे । गुणात्मकं सर्वज्ञत्वादिलोकोत्तरलावण्यादिगुणवानात्मामूर्तिर्यस्यतं दृश्यमानं रूपं सेवते । सद्विविधोऽप्युपासकःअहं मत्स्वरूपएव । मामकइत्यर्थोवा । भि-

यः सेवते मामगुणं गुणात्परंहृदा कदा वा यदि वा गुणात्मकम् ॥ सोऽहंस्वपादाञ्चितरेणुभिः स्पृशन्पुनाति लोकत्रितयं यथा रविः ॥ ६१ ॥

योऽहिज्ञानिनोऽत्यर्थमहंमचममप्रिय इत्युक्तेः । तादृशोभक्तःस्वपादलग्नरेणुभिःसंस्पृशन्लोकत्रयमपि पुनाति । अज्ञानध्वान्तनिरसनेनपवित्रीकरोति । यथारविःस्वकरैर्जगद्वितिमिरीकरोति तद्वत् ॥ ६१ ॥ ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानीमेतद्ग्रन्थार्थालोचनासमर्थस्यपाठमात्रतोऽपिमहत्फलमाह । विज्ञानंविज्ञानजनकं करणव्युत्पत्त्येतिबोध्यम् । वेदान्तैरुपनिषद्वाक्यै र्वेद्यंचरणंजगज्जन्मादिलक्षणंकर्मयस्यतेन ननुपाठमात्रादेतादृशमहत्फलप्राप्तिःकथमित्याशङ्क्यभवत्येवेति सूचयंस्तत्रहेतुमाह । मद्वचने

विज्ञानमेतदखिलंश्रुतिसारमेकं वेदान्तवेद्यचरणेनमयैवगीतम् ।
यःश्रद्धया परिपठेद्गुरुभक्तियुक्तो मद्रूपमेति यदि मद्वचनेषुभक्तिः
॥ ६२ ॥ इतिश्री अध्यात्मरामायणे रामगीता समाप्ता ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसम्वादे उत्तरकाण्डे श्रीरामगीतायां पञ्चमःसर्गः ॥ ५ ॥

षुभक्तिर्विश्वासोयदीतिअर्थाद्गुरुवाक्यविश्वासस्यैव फलदायकत्वादितिभावः ॥६२॥ इत्यध्यात्मरामायणेउमामहेश्वरसम्वादे उत्तरकाण्डे सेतौपञ्चमःसर्गः ॥ ६२ ॥ श्रीरामचन्द्रार्पणमस्तु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीराममन्त्रःखलु तारकाख्यः संसारसन्तारणसुप्रसिद्धः ॥ भक्-
त्याऽप्यभक्त्या समुपासितोयः श्रेयांसि सर्वाणि ददात्यवश्य
म् ॥ १ ॥ तन्तारकंसम्प्रतिपादयन्ती श्रीरामगीता सकलैः सुसे
व्या ॥ विज्ञप्तिमित्थंजनको विनीतः समर्पयत्यार्यजनेषुहर्षात् २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प,	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति
स्पर्द्धि	स्पार्द्धि	१	२	१	शाधि	शाधि	३	२	६	नाशे	नाशो	६	१	१
जीव्य	जीन्य	१	२	३	व्यत्र	व्यव	४	१	१	नन्वितिश	नन्वितिशे	६	२	१
सम्वीन्धनीः	सम्वन्धिनीः	२	२	१	ष्ठामे	ष्ठानमे	४	२	३	विदा	विदा	६	२	२
व्रह्म	ब्रह्म	२	१	२	व्रह्म	व्रह्म	४	२	१	मेवे	मेव	६	२	२
व्रह्म	ब्रह्म	२	१	६	वलेन	वलेन	४	२	७	व्येतीत	व्यतेति	७	१	१
वोधोऽसि	बोधोऽसि	३	१	४	निघृत्ते	निवृत्ते	५	१	१	वीरहा	वीरहा	७	१	१
संवन्ध	सम्बन्ध	३	१	७	कत्व	कत्वा	५	१	१	सद्दष्ट	सद्दृष्ट	८	१	३
भवस्यंससार	भवस्यसंसार	३	२	१	नक	नैक	५	१	१	विशुद्धं	विशुद्ध	८	२	१
न्सार	सार	३	२	२	.बेदान्त	वेदान्त	५	१	१	कारांतः	कारान्तः	८	२	२
पर्वग	पवर्ग	३	२	२	पूर्व	पूर्वे	५	१	२	वृत्ति	वृत्ति	९	१	१
वारिधि	वारिधि	३	२	२	वुद्ध्या	बुद्ध्या	५	१	६	स्वबाना	स्वना	९	२	१
					एवं	एव	५	१	६	वृत्यु	वृत्यु	१०	१	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
रीप	रपि	११	२	१
नर्दृष्टा	र्नदृष्टा	१२	१	४
र्वाद्धे	र्वाद्धे	१२	१	७
त्याभिः	त्माभिः	१२	२	६
शुद्द	शुद्ध	१३	१	१
जीवया	जीवयो	१३	१	२
निर्वाध	निर्ब्राध	१४	१	१०
गव्र	भव्र	१९	१	४
अर्जोद्र	अर्जोऽद्र	१६	२	६
द्रत्	द्रात्	१७	२	१

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
ह्लाभ	ह्लाभे	१८	१	८
इतिः	इति	१८	२	२
ज्ञानन	ज्ञानेन	१९	१	१
वुद्दया	वुद्धया	२०	१	५
रागादि	रागादि	२१	१	३
त्रिलय	विलय	२१	१	७
धम	धर्म	२१	२	१
म्वस्य	म्वंयस्य	२१	२	२
वुवै	वुधै	२३	१	५
एव	एवं	२३	२	१
द्रष्ट	द्रष्टृ	२४	१	२

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
विभाव्यत	विभाव्यते	२५	१	४ मू
लिङ्गेद	लिङ्गदे	२६	१	२
वोधकः	वोधतः	२५	१	६
त्रिज्ञानं ब्रह्म	विज्ञानंनिादि ध्यासनं ब्रह्म	२६	२ ६	३
भेदेरा	भेदरा	२७	१	६
रुपा	रूपाः	२७	२	१
आत्म	अत्मा	२७	२	१
सुनिति	सुनास्ति	२८	१	२
भव	भवं	२८	२	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
तदकत्व	तदेकत्व	२६	२	७	वतथाऽ	वतथाऽ	३१	१	६	मद्वचने	मद्वचने	३२	१	२
भ्रमण	भ्रमणं	२६	२	८	कंठ	कण्ठ	३१	१	२	तन्तारकं	तत्तारकं	३२	२	३

नेपाल पाशुपत, यन्त्रालये मुद्रिता.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इती रामगीता सटीका समाप्ता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

८.नं.१६६४२

अथ रामगीता सटीका प्रारभ्यते ॥

मू० २।—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ रामंरत्नकिरीटकुण्डलयुतं केयूरहारान्वितं
सीतालङ्कृतवामभागममलं सिंहासनस्थं विभुम् ॥ सुग्रीवादि
कपीश्वरैःसुरवरैः संसेव्यमानं सदा विश्वामित्रपराशरादिमुनि-
भिः संस्तूयमानं भजे ॥ १ ॥ इतिध्यात्वा ॥ श्रीमहादेवउवाच॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशाय नमः ॥ ध्यायेत्वाजानुवाहुं धृतशरधनुपं वद्धपद्मासनस्थं पीतंवासोवसानं नवकमलदलस्पर्द्धिनेत्रं प्रसन्नम् ॥ वामाङ्कारूढ सीतामुखकमलमिलल्लोचनं नीरदाभं नाना लङ्कारदीप्तं दधतमुरुजटामण्डलं रामचन्द्रम् ॥ १ ॥ ततइति जगतां यानि मङ्गलानि आनन्दास्तेषामुपजीव्यभूतं मङ्गलं ब्रह्मानन्दः सएवात्मास्वरूपं तेन तस्यैवानन्दस्यान्यानि भूतानिमात्रामुपजीवन्तीति श्रुतेः मङ्ग

ततोजगन्मङ्गलमङ्गलात्मना विधाय रामायणकीर्तिमुत्तमाम् ॥
चचार पूर्वाचरितं रघूत्तमो राजर्षिवर्य्यैरभिसेवितं यथा ॥ १ ॥

लानाञ्चमङ्गलमिति स्मृतेश्च किंच जगतां मङ्गलं कल्याणं यस्मात्तादृशकल्याणरूपआत्मामूर्तिस्तया उत्तमांश्रोत्रादीनां मोक्षदत्वेना त्युत्तमां रामायणकीर्तिं वाल्मीक्यादि कृत नानाविध रामायण प्रवर्तिकां रावणवधादिजां कीर्तिंविधाय स्थितोरघूत्तमः ततः सीताप रित्यागानन्तरं पूर्वैः स्ववंशजैराचरितं प्रजापालनसत्कथाश्रवणादिकं केवलंतत्पूर्वजैरेवाचरितमितिन किंत्वन्यैरपि राजर्षिश्रेष्ठैर्य थाऽभिसेवितं तथाचचार कृतवान् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदारागुरुदेवविश्वासलक्षणमहागुणवती यद्वा उदारा दानशीलाबुद्धिर्यस्य तेन पुरातनीः प्राचीनराजसम्बन्धिनीः शुभाः धर्माधर्मनिर्णेत्रीः प्रमत्तस्य स्वगोमण्डलमिश्रितब्राह्मणगोदानात् प्रमत्तस्य नृगस्य राज्ञो द्विजस्य शापात्तिर्यक्त्वमाह तेनाज्ञातकृतब्रह्मस्वापहारेण परमधा

सौमित्रिणापृष्ट उदारबुद्धिना रामःकथाःप्राह पुरातनीःशुभाः ॥
राज्ञः प्रमत्तस्य नृगस्य शापतो द्विजस्य तिर्यक्त्वमथाह राघवः
॥ २ ॥

र्मिकस्यापीदृश्यवस्थेति सर्वथाब्रह्मस्वविमुखताधर्मइतिसूचितम् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकान्तेविजने उपस्थितंप्राप्तम् विनयान्वितः सन् भक्त्यागुरुरयमिति बुद्ध्या प्रणम्य अनेनगुरूपसदनप्रकारउक्तः आसादितंशुद्धंभाव

कदाचिदेकान्त उपस्थितंप्रभुं रामं रमालालितपादपङ्कजम् ॥
सौमित्रिरासादितशुद्धभावनः प्रणम्यभक्त्याविनयान्वितोऽब्र-
वीत् ॥ ३ ॥

नं भावनाकरणमन्तः करणंयेनसः शुद्धान्तःकरणइतियावत् भगवदुक्तसत्कथाश्रवणेन शुद्धान्तःकरणइत्यर्थः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हे महामते महतीसर्वविषयामतिर्यस्य तस्य संबोधनं त्वं शुद्धबोधोऽसि अनवच्छिन्नचैतन्यरूपोऽसि सर्वदेहिनामात्माऽसि जीवानांतत्प्रतिबिम्बत्वात् अधीशोऽसि अन्तर्यामित्वान्नियन्ताऽसि वास्तवभेदाभावाच्च सर्वात्मत्वम् औपाधिकभेदाच्च नियन्तृनियम्यभावोबोध्यः निराकृतिः अस्मदादिवत्स्वार्जितकर्माधीनशरीराकृतिरहितः नन्वेवंसर्वैः कथमेवंनज्ञायतेऽतआह ज्ञानदृशां स्वयमेवप्रतीयसे ज्ञायतेऽ

त्वं शुद्धबोधोऽसि हि सर्वदेहिनामात्माऽस्यधीशोऽसि निराकृतिःस्वयम् ॥ प्रतीयसे ज्ञानदृशां महामते पादाब्जभृङ्गाहितसङ्गसाङ्गिनाम् ॥ ४ ॥

नेनेतिज्ञानं वेदान्तवाक्यजातं तदेवदृक्दर्शनसाधनंयेषां तेषामितिसंबन्धसामान्येषष्ठी तैरित्यर्थः तादृशदृक्लाभश्च त्वद्भक्त्यधीनइत्याह पादेति त्वच्चरणकमलयोर्भृङ्गवदाहितः कृतः सङ्गोयेन तादृशान्तः करणसङ्गवतां त्वच्चरणकमल सङ्लग्नान्तः करणवतामित्यर्थः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ प्रार्थयते अहमिति भवस्त्वं संसारस्यापवर्गो निवृत्तिर्यस्मात्तादृशं तव पादाम्बुजं प्रपन्नोऽस्मि शरणं प्राप्तोऽस्मि योगिभावितं योगीभिः संसारमुक्तये भावितम् अनेन तस्य भवापवर्गत्वे सदाचारः प्रमाणमुक्तम् प्रार्थनीयमाह अपारवारिधिरूपं यदज्ञानं संसारमूलकारणं यथासुखम

अहं प्रपन्नोऽस्मि पदाम्बुजं प्रभो भवापवर्गं तव योगिभावितम् ॥ यथाञ्जसाज्ञानमपारवारिधिं सुखं तरिष्यामि तथाऽनुशाधि माम् ॥ ५ ॥

अक्लेशेन तरिष्यामि तथा मामनुशाधि शिक्षय अपारवारिधिमित्यनेन सपारप्रसिद्धसमुद्राद्व्यतिरेक उक्तः अशक्यतरणताऽनेन ध्वनिता ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथोत्तरमवतारयति श्रुत्वेति रामः सौमित्रिवचः श्रुत्वा अथशब्दोवाक्यालङ्कारे तदा श्रवणाव्यवहितकाले एवंप्रपन्नानां भक्तानामार्ति संसारदुःखहरतितादृशः प्रपन्नाश्रमादिहीना भक्तानुग्रहपरा च धीर्यस्यसः क्षितिपालानां राज्ञां भूषणभूतोऽज्ञानरूपतमस उपशान्तये त

श्रुत्वाथ सौमित्रिवचोऽखिलं तदाप्राह प्रपन्नार्तिहरःप्रसन्नधीः ॥
विज्ञानमज्ञानतमोपशान्तये श्रुतिप्रपन्नं क्षितिपालभूषणः॥ ६ ॥

दर्थम् सन्धिरार्षः श्रुतिभिः तमेवविदित्वाऽतिमृत्युमेतीत्यादिश्रुतिभिः प्रपन्नं तत्फलकत्वेन बोधितं विज्ञानमात्मतत्वज्ञानामिति सामान्य तः प्रथमंप्राह ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथताद्दशज्ञानप्राप्तये क्रमेणबहिरङ्गान्तरङ्गसाधनान्याह आदाविति स्ववर्णाश्रमेषु शास्त्रेण वर्णिता याः क्रियानित्यनैमित्तकयज्ञदानादिरूपास्ताः कृत्वा समासादितशुद्धमानसः प्राप्तान्तःकरणशुद्धिः तत्पूर्वमुपात्तसाधनः तदनुष्ठानपूर्वकमेवउपात्तानिसाधनानि शमदमादीनियेन तादृशः अनेनकर्मणां बहिरङ्गत्वं शमादीनामन्तरङ्गत्वं स्फुटमेवोक्तम् किंच शमदमवैराग्यदार्ढ्यपर्यन्तं कर्मानुष्ठामेवेति

आदौ स्ववर्णाश्रमवर्णिताः क्रियाः कृत्वा समासादितशुद्धमानसः
समाप्य तत्पूर्वमुपात्तसाधनः समाश्रयेत्सद्गुरुमात्मलब्धये ॥ ७ ॥

सूचितम् ततस्तत्कर्मानुष्ठानं समाप्य त्यक्त्वा संन्यस्येतियावत् आत्मलब्धये आत्मज्ञानाय तत्फलकाय तत्त्वमस्यादिवाक्यार्थविचाराय सद्गुरुं श्रोत्रियंब्रह्मनिष्ठमित्यादि लक्षणलक्षितं समाश्रयेत् सेवेत अनेनव्युत्पत्तिवलेन स्वयमेववाक्यार्थविचारः क्रियमाणो न फलायेति सूचितम् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसारस्यभ्रमिमच्चक्ररूपत्वात्तन्निवृत्तेश्चतत्कारणाज्ञाननिवृत्तिमूलकत्वदज्ञाननिवृत्तेश्चतत्त्वज्ञानकसाध्यत्वात्तत्त्वज्ञानस्यचवेदान्तविचारसाध्यत्वात्तदर्थंगुरुसमाश्रयणमित्याह क्रियेति भवःसंसारश्चक्रवद्विपरिवर्तमानईर्यते कथ्यते तदेवोपपादयति आदृताआदरपूर्वंपूर्वजन्मार्जिताक्रियाएनस्यशरीरोद्भवस्यजन्मनोहेतुः तत्रजन्मनिसुरागिणोविषयाभिलाषवतः तौ शास्त्रप्रसिद्धौ धर्मेतरौ धर्माधर्मौ प्रियाप्रियौसुखदुः

क्रियाशरीरोद्भवहेतुरादृताप्रियाप्रियौतौभवतःसुरागिणः ॥
धर्मेतरौतत्रपुनः शरीरकंपुनः क्रियाचक्रवदीर्यतेभवः ॥ ८ ॥

खजनकौभवतःकस्यचिदधर्मएवसुखत्वबुद्ध्याप्रवृत्तिः कस्यचिद्धर्मएवंकदाचिदित्यप्यूह्यम् एवंतत्रोत्पादितकर्मणापुनःशरीरंपुनःक्रियाइत्येवंचक्रवद्विपरिवृत्तिः । यथाचक्रेभ्राम्यमाणेऽधोभागः कदाचिदुपरिउपरितनश्चाधः पुनरुपरिपुनरधएवंजन्मक्रिययोर्जन्यजनकभावेनपरिवृत्तिरिति बोध्यम् ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यचाज्ञानमेवमूलमित्याह अज्ञानमेवेति अत्रविधौसंसारनिवृत्तिलक्षणेकर्तव्येऽर्थेतज्ज्ञानमेवमूलकारणत्वादज्ञानहानमेवविधीयते साध-
नत्वेनेतिशेषः ननुकर्मैवतन्नाशकमस्तुकिंज्ञानेनेत्याशङ्क्याह विद्यैवज्ञानमेवतन्नाशविधौमूलाज्ञाननाशनेपटीयसीसमर्थानकर्मसमर्थमितिशेषः

अज्ञानमेवास्यहिमूलकारणंतद्धानमेवात्रविधौविधीयते ॥ विद्यै
वतन्नाशविधौपटीयसीनकर्मतज्जंसविरोधमीरितम् ॥ ९ ॥

यतस्तत्तज्जमज्ञानजम् आत्मस्वरूपाज्ञानजन्यदेहाद्यभिमानजन्यत्वात्कर्मणोज्ञानजन्यत्वंबोध्यम् ननुतज्जन्यस्यापितन्नाशकत्वंवृश्चिककर्क
व्यादौदृष्टमित्याशङ्क्यतज्जन्यत्वंवाननाशकत्वप्रयोजकंकिन्तुसविरोधत्वमेवेत्याह यतसविरोधंतदीरितंनाशकमुक्तमित्यर्थः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अतएवकर्मणानाज्ञानहानिरित्याह नाज्ञानेत्यादि यतःकर्मणाविरोधाभावान्नाज्ञाननाशनापिरागनाशोवस्तुतः कर्मानुष्ठानात्पुनः सदो षंक्षयिफलत्वादिदोषविशिष्टंकर्मैवोद्भवेत्कर्मणश्चपुनःसंसारएवेतिनमुक्तिप्रत्याशा ततस्तस्माद्बुधोविवेकीज्ञानविचारवान् ज्ञायतेऽनेने·

नाज्ञानहानिर्नचरागसङ्क्षयोभवेत्ततः कर्मसदोषमुद्भवेत् ॥ ततः
पुनः संसृतिरप्यवारितातस्माद्बुधोज्ञानविचारवान्भवेत् ॥ १० ॥

तिज्ञानंवेदान्तवाक्यंतद्विचारवान्भवेत ॥ १० ॥

CC-0. In Public Domain. Digitization by eGangotri

इदानींज्ञानस्यैवमोक्षहेतुत्वंनतुज्ञानकर्मसमुच्चयत्वादंदूषणायानुवदतिसार्धेन नन्विति नान्विार्तशङ्कायाम् यथाविद्यावेदमुखेनश्रुतिपुराण-
लक्षणेन ब्रह्मविदाप्नोतिपरम् इत्यादिनापुरुषार्थसाधनमुक्ता तथा उभाभ्यांमवपक्षाभ्यांयथाखेपक्षिणांगातिः तथैवज्ञानकर्मभ्यांप्राप्यते
ब्रह्मशाश्वतम् इत्यादिनाक्रियाऽपितत्साधनत्वेनोक्ता किंच क्रियाकर्तव्यत। तृतीयार्थेप्रथमा कर्तव्यतयाआवश्यकेकृत्येअवश्यकर्तव्यत-

ननुक्रियावेदमुखेनचोदितायथैवविद्यापुरुषार्थसाधनम् ॥ कर्त्तव्य
ताप्राणभृतःप्रचोदिताविद्यासहायत्वमुपैतिसापुनः ॥ ११ ॥

याप्रचोदितानित्यनैमित्तिकरूपा एवंचनदकरणेप्रत्यवायोत्पत्त्याज्ञानोत्पत्तिरेवनस्यात् तस्मात्सापुनर्विद्यायाःसहायत्वंप्राप्नोतिघटेजन-
नीयेयथादण्डचक्रादीनांपरस्परसहायता ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्तव्येतीतम्वाक्यमवेविदूणाति कर्मेति वीरहावाएषदेवानांयोऽग्निमुद्वासयतेयावज्जीवमग्निहोत्रंजुहोति इतिश्रुतिः तत्रासिद्धान्तीशङ्कते
नान्वाति ध्रुवंस्थिरंकार्यमिदंपुरुषार्थमोक्षजनिकाविद्यायतः स्वतन्त्राविनाऽपिसहायेन स्वकार्यसंपादनेसमर्था यथातेजस्तिमिरनिवर्तन-

कर्माकृतौदोषमपिश्रुतिर्जगौतस्मात्सदाकार्यमिदंमुमुक्षुणा॥ननु
स्वतन्त्राध्रुवकार्यकारिणीविद्यानकिञ्चिन्मनसाऽप्यपेक्षते ॥ १२

समर्थंमनसाऽपिकिञ्चित्सहायभूतंवस्तुनापेक्षते तथाफलेजननीयेसहायान्तरसंभावनाऽपिनेतिभावः अनेनविद्याफलजननेनिरपेक्षास्वतन्त्र-
त्वात्तेजोवदित्यनुमानंसूचितम् ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समुच्चयवादीपरिहराति नेति त्वदुक्तंनेत्यर्थः सत्यकार्यः अक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवति इत्यादिवेदनबोधितःस्थिरकार्योऽपि-
अध्वरः यथाऽन्यानापिकारकादिकान् आरादुपकारकप्रयाजाद्यङ्गानिदेशकालादीनिचप्रकाङ्क्षते तथाविद्यापिअग्निहोत्रंजुहोतिइत्यादिवि

नसत्यकार्योऽपिहियद्वदध्वरः प्रकाङ्क्षतेऽन्यानपिकारकादिकान्
तथैवविद्याविधितः प्रकाशितैर्विशिष्यते कर्मभिरेवमुक्तये ॥ १३ ॥

धिवाक्यतःतत्समूहेनप्रकाशितैः कर्मभिः सहितैवमुक्तयेविशिष्यतइत्यर्थः विद्याफलदानेकर्मापेक्षा अङ्गित्वात् प्रयाजाद्यङ्गापेक्षदर्शा
दिवदितिसत्प्रतिपक्षानुमानमनेनसूचितम् ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदनूद्यसिद्धान्तीदूषयति केचिदिति यत्केचिद्वितर्कवादिनइतिज्ञानकर्मणीसमुच्चित्यमुक्तिसाधनंवदन्तितदप्यसत् यथाकेवलंकर्म मोक्ष साधनमित्यमत्तथातन्मीलितमित्यप्यसत् तत्रहेतुर्दृष्टविरोधकारणात् दृष्टयोर्विरोधः सर्वलोकदृष्टविरोधरूपात्कारणात्तदसदित्यर्थः विरो

केचिद्वदन्तीतिवितर्कवादिनस्तदप्यसद्दृष्टविरोधकारणात् ॥
देहाभिमानादभिवर्धतेक्रियाविद्यागताहङ्कृतितःप्रसिद्ध्यति १४

धमेवाह देहाभिमानात्क्रियावर्धतेअनात्मनिदेहादावात्मत्वाभिमानात्क्रियावृद्धिः विद्यातुगताहङ्कृतितः गताहङ्कृतिर्यस्यतस्यनष्टाहङ्कृतेः प्रसिद्ध्यति सार्वविभक्तिकस्तासिः एवंचाहङ्कारसत्तामूलकत्वात्क्रियाज्ञानयोः समुच्चयोविरुद्धइत्यर्थः ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथपूर्वपक्ष्युक्तानुमानंदूषयन्विद्यास्वरूपमाह विशुद्धंविज्ञानंयेभ्यस्तेषांवेदान्तवाक्यानांयद्विशेषेणरोचनंरलयोरभेदादालोचनंविचार स्तेनाञ्चिताप्रापिताया चरमाआत्मवृत्तिर्ब्रह्माकारांतःकरणवृत्तिः साविद्येतिभण्यतेविद्वद्भिरितिशेषः पुनःसमुच्चयवारणायविद्याकर्मणो वैषम्यमाह कर्मयज्ञादिअखिलकारकादिभिःकर्तव्यकर्मादिभिरङ्गैश्चसहितंसदुदेति फलोन्मुखंभवति विद्यापुनरखिलकारकादीन्निहन्ति

विशुद्धविज्ञानविरोचनाञ्चिताविद्याऽऽत्मवृत्तिश्चरमेतिभण्यते ॥ उदेतिकर्माखिलकारकादिभिर्निहन्ति विद्याऽखिल कारकादि-कम् ॥ १५ ॥

तत्रकर्तृत्वादिबुद्धिंनिहन्ति सकलव्यापारपरित्यागेनब्रह्मणिसमाप्तिहिंविद्या अतःस्वोत्पत्तौचित्तशुद्धिद्वाराकर्मसापेक्षास्वफलेजनयितव्यं-तन्निरपेक्षैवान्यथाविद्यास्वरूपस्यैवभङ्गापत्तेरितिपूर्वपक्ष्युक्तहेतोरसिद्धिरितिभावः ॥ १५ ॥ ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपसंहरन्मुमुक्षोर्वृत्तिप्रकारमाह तस्मादिति विद्याविरोधाद्विद्यायाःकर्मणासह विरोधेनसमुच्चयोनभवेत्तस्मात्सुधीर्मुमुक्षुरशेषतःकर्मत्यजे-त् काम्यंतुसर्वथात्याज्यमेवनित्यनैमितिकमापियावाच्चित्तशुद्धिकर्तव्यमेव ततोऽपिब्रह्माणिचित्तस्थैर्यपर्यन्तं कर्तव्यमेव ततस्तदनुसन्धानप्र-

तस्मात्त्यजेत्कार्यमशेषतः सुधीर्विद्याविरोधान्नसमुच्चयोभवेत् ।
आत्मानुसन्धानपरायणःसदा निवृत्तसर्वेन्द्रियवृत्तिगोचरः १६

तिबन्धकत्वात्प्रयोजनाभावाच्चतदापित्याज्यमेवेतिभावः इदानींमुमुक्षुकर्तव्यमाह निवृत्ताःसर्वेषामिन्द्रियाणां गोचराविषयाःशब्दादयोय स्मात्तादृशःसन् आत्मनःसच्चिदानन्दस्यानुसन्धानमेवपरमयनंप्राप्यंयस्यतथाविधोभवेत् अत्रेन्द्रियप्रत्याहारःकर्तव्यत्वेनोक्तस्तेनतत्पूर्वंप्रा-णायामाद्यर्थादाक्षिप्तम् ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रागिविरागिभेदेनकर्मणोकर्तव्यताकर्त्तव्यतेआहयावदिति माययाविद्ययाशरीरादिष्ववानात्मसुआत्मधीरहङ्कर्तेत्यादिरूपायावद्वर्ततेतावद्वि
धिवादकर्मणाम् विधिर्यजेतत्यादिश्रुतिर्वादः कर्तव्यताबोधकोयेषांकर्मणांविधेयोवश्यवर्त्तितत्कर्मकर्ताभवेत तदपगमेतुतदाखिलं जगन्नेतीति

यावच्छरीरादिषुमाययात्मधीस्तावद्विधेयोविधिवादकर्मणाम् ॥
नेतीतिवाक्यैरखिलं निषिद्ध्य तज्ज्ञात्वापरात्मानमथत्यजेत्क्रि
याः ॥ १७ ॥

वाक्यैः अथातआदेशोनेतिनेतिइत्यादिवाक्यैर्निषिध्य मिथ्यात्वेननिर्णीयताद्विलक्षणतयासत्यत्वेनपरमात्मस्वरूपंज्ञात्वाक्रियास्त्यजेत्निरू ॥ ९ ॥
पितमेतत् ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मविज्ञानेसत्यवश्यमविद्या निवर्ततइत्याह यदेति आत्मनिशुद्धेन्तःकरणेपरमात्मनईशस्यात्मनोजीवस्यचयोविभेदोमायान्तःकरण रूपोपाधिद्वयकृतोविभेदोभेदस्तस्यभेदकं नाशकंभास्वरंप्रकाशशीलं यद्विज्ञानमितरवृत्त्युपमर्दनपूर्वकंब्रह्माकाराऽखण्डाद्वृत्तिर्यदाऽवभाति

यदापरात्मात्मविभेदभेदकंविज्ञानमात्मन्यवभाति भास्वरम् ॥
तदैवमायाप्रविलीयतेऽञ्जसासकारकाकारणमात्मसंसृतेः॥ १८॥

असंभावनादितिरस्कारेणोदेति तदैव सकारकाजन्मान्तरप्रापककर्मसहितामाथातत्तज्जीवोपाधिभूताविद्याऽञ्जसाझदितिप्रविलीयतेनश्यति ननुतन्नाशेऽपिसंसारनाशःकथमतोमायाविशेषणम् आत्मसंसृतेःकारणंसंसारस्योपादानकारणमेवंचतन्नाशेकार्यनाशोभवत्येवेतिभावः १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं पुनर्दार्ढ्यायाह श्रुतीति तत्त्वमसीत्यादिश्रुतिरूपैःप्रमाणैस्तज्जानितज्ञानेन नाशितासाविद्याकथमपिकार्यकारिणीभविष्यतीति काकुरत्र सर्वथानेत्यर्थः असतःकार्यकारित्वासंभवादितिभावः पुनश्चतस्यानोद्भवइत्याह विज्ञानमात्रादिति अमलाशुद्धाद्द्वितीयतःद्विती

श्रुतिप्रमाणाभिविनाशिताचसाकथंभविष्यत्यपिकार्यकारिणी ॥
विज्ञानमात्रादमलाद्द्वितीयतस्तस्मादविद्यानपुनर्भविष्यति १९

यात्मविषयकाद्विज्ञानमात्रादितरासहकृतान्निदिध्यासनपरिपाकजज्ञानाद्यतोनष्टातस्मात्सापुनर्नभविष्यति रज्ज्वज्ञानमूलकस्य सर्पस्य रज्जुज्ञानेन निवृत्तस्ययथानपुनरुत्पत्तिरितिभावः ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्यायाइतरनिरपेक्षायाएवमोक्षकारणत्वमुक्तंयुक्तिपूर्वकंपुनःकथयतिश्रोतृदार्ढ्याय। यदीति। यदिनष्टातत्त्वज्ञाननाशिता सा न पुनः प्रसूयतेनोत्पद्यतेतदाकारणाभावादहंमतिःकथंभवेत्। कथमपिनभवेदित्यर्थः। तदभावाच्चतत्कालेकर्माभावइतिस्वफलजननेसास्वतन्त्राइ

यदिस्मनष्टा नपुनःप्रसूयते कर्ताऽहमस्येति मतिः कथं भवेत् ॥ तस्मात्स्वतन्त्रा न किमप्यपेक्षते विद्या विमोक्षाय विभाति केवला ॥ २० ॥

तरनिरपेक्षैवनाकिमप्यपेक्षते द्वितीयस्य।संभवात् अतः केवलाऽसहायैवविमोक्षायविभातितत्फलिकाभवतीत्यर्थः ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अत्रार्थेश्रुतिरपिप्रमाणमित्याह सेति साप्रसिद्धा नकर्मणानप्रजयाधनेनत्यागेनैके अमृतत्वमानशुः इत्यादिकातैत्तिरीयश्रुतिःप्रशस्तानामर्थ वादैःप्राशस्त्येनबोधितानामपिकर्मणांन्यासंत्यागंसादरंस्फुटमाह नतुकर्मसमुच्चयमित्यर्थः तथावाजिनां वाजसनेयिनाम् एतावदरेखल्वमृत

सातैत्तिरीयश्रुतिराहसादरंन्यासंप्रशस्ताखिलकर्मणां स्फुटम् ॥
एतावदित्याहचवाजिनांश्रुतिर्ज्ञानंविमोक्षायनकर्मसाधनम् २१

त्वम् इत्यादिका ज्ञानंविमोक्षायसाधनं नकर्मेत्येतदाह ॥ २१ ॥

CC-0. In Public Domain. Digitization by eGangotri

अहङ्कारत्यागरूपकारणवैषम्यात् क्रियाज्ञानयोर्वैषम्यमुक्त्वा फलमप्युक्तमपिवैषम्यमाह विद्येति हेसमुच्चयवादिन् त्वयाक्रतुरग्निष्टोमादिर्विद्यासमत्वेनदर्शितः परन्तुसमोदृष्टान्तोनोदाहृतः अनेनक्रतुर्विद्यासमः श्रुतिबोधितकर्तव्यताकत्वादित्यनुमानन्निरस्तम् दृष्टान्ताभावाव अन्वय्येवानुमानन्नव्यतिरेकीतिभावः एतच्चाकरेविस्तरेणप्रपञ्चितम् ननुविद्याकर्मणीसमे एकफलत्वाच्चक्रदण्डादिवदित्यनुमान-

विद्या समत्वेनतु दर्शितस्त्वया क्रतुर्नदृष्टान्त उदाहृतः समः ॥
फलैःपृथक्त्वाद्बहुकारकैः क्रतुःसंसाध्यतेज्ञानमतोविपर्ययम् २२

मितिचेत्तत्राह फलैः पृथक्त्वात षष्ठ्यर्थेतृतीया फलानांभेदादित्यर्थः एवंचस्वरूपासिद्धोहेतुरितिभावः समानकारकत्वमपिहेतुर्नेत्याह क्रतुर्बहुभिः कारकैरहंममताभिमानरूपैरान्तरैर्बाह्यैश्चदेशकालादिनियमैश्चसाध्यते ज्ञानन्त्वतोविपर्ययवदतोनतयोः साम्यमितिभावः २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वकरणेप्रत्यवायभिया कर्मकार्यमितिचेन्नेत्याह सप्रत्यवायइति कर्मत्यागेनाहंनिश्चयेनाहंप्रत्यवायसहितोभविष्यामीत्येवंशुद्धात्मानि-
अनात्मधर्मस्यधीरप्रज्ञस्यतत्त्वज्ञानविकलस्यप्रसिद्धा नतुतत्त्वदर्शिनः तस्याहंबुद्धेरभावात् पापादेरनात्मधर्मतानिश्चयाच्च तस्माद्बुधैःकर्म

स प्रत्यवायोह्यहमित्यनात्मधीरज्ञप्रसिद्धा नतु तत्वदर्शिनः ॥
तस्माद्बुधैस्त्याज्यमपि क्रियात्माभिर्विधानतःकर्मविधि प्रका-
शितम् ॥ २३ ॥

क्रियात्मभिः षष्ठ्यर्थेतृतीया क्रियाफलसक्तचित्तानां विधानतोविधानेनेतिकर्तव्यतयायुक्तंकर्म विधिभिरवश्यकर्तव्यतयाबोधितमपि-
त्याज्यमित्यर्थः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविरक्तस्यकार्यमाह। श्रद्धेति। गुरुशास्त्रयोर्विश्वासःश्रद्धातदन्वितोबुभुत्सुःशुद्धमानसोऽपि निष्कामकर्मानुष्ठानाच्छुद्धमानसश्चगुरोः प्रसादाल्लब्धतत्त्वमसीतिवाक्यतः श्रुतमात्मजीवयोरैकात्म्यंविज्ञाय मनननिदिध्यासनपरिपाकाभ्यांसाक्षात्कृत्य। चएवार्थः । साक्षा

श्रद्धान्वितस्तत्त्वमसीतिवाक्यतो गुरोःप्रसादादपिशुद्धमानसः॥
विज्ञायचैकात्म्यमथात्मजीवयोः सुखी भवेन्मेरुरिवाप्रकम्पनः
॥ २४ ॥

त्कृत्यैवसुखी भवेत्। सकलदुःखहीनोभवेदित्यर्थः। अप्रकम्पनःविषयाभिलाषाक्षोभितान्तःकरणः॥ २४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 महावाक्यंविवरीतुंवाक्यार्थस्यपदार्थबोधपूर्वकत्वमाह । आदाविति । विधानतःक्रमप्रमादर्गादिर्देनवाक्यार्थविज्ञानस्य विधावुत्पत्तौआ
 दौप्रथमंमुख्यमितियावत्। पदार्थावगतिःकारणम्। हिप्रसिद्धं तस्यपदत्रयंतत्त्वम्असीति। तत्रतत्पदार्थःपरमात्मासर्वज्ञत्वादिगुणः त्वं

आदौ पदार्थावगतिर्हि कारणं वाक्यार्थविज्ञानविधौ विधानतः ॥
तत्त्वंपदार्थौ परमात्मजीवकावसीतिचैकात्म्यमथानयोर्भवेत्
॥ २५ ॥

पदार्थोजीवः अनयोस्तत्त्वंपदार्थयोरैकात्म्यंतद्बोधकमसीतिपदम् ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुसर्वज्ञत्वादिगुणस्येशस्य किञ्चिज्ज्ञत्वधर्मवता जीवेनैकात्म्यं विरुद्धमित्याशङ्क्याह । प्रत्यगिति । अहंबुद्धिविषयत्वं प्रत्यक्त्वं जीवधर्मः परोक्षत्वमीशधर्मस्तदादिधर्मकृतमात्मनोः परमात्मजीवात्मनोर्विरोधं विहाय त्यक्त्वा तयोः संशोधिताम् युक्तिभिः सम्यग्विचारितां तत्त्वंपदाभ्यां शक्त्यभावेऽपि वक्ष्यमाणप्रकारया लक्षणया लक्षितां ज्ञातां चिदात्मतां संगृह्य तत्त्वंपदोपास्थानिविषयां कृत्वा स्वमात्मानं तथा ज्ञात्वाऽथ एकात्मज्ञानानन्तरमद्वयो भवेत् । चित्स्वरूपतां प्राप्त इव भवेत् । पूर्वमपि तत्स्वरूप एव विस्मृतकण्ठचामीकरन्यायेन च तत्प्राप्तिः तद्वदित्युक्तम् ।

प्रत्यक्परोक्षादिविरोधमात्मनोर्विहाय संगृह्य तयोश्चिदात्मताम् ॥
संशोधितां लक्षणया च लक्षितां ज्ञात्वा स्वमात्मानमथाद्वयो भवेत्
॥ २६ ॥

अयंभावः तत्त्वंपदयोर्द्वावर्थौ वाच्यो लक्ष्यश्च तत्र तत्पदस्य मायोपाधिः सर्वज्ञत्वादिविशिष्टो वाच्यः त्वंपदस्यापि किञ्चिज्ज्ञत्वादिविशिष्टो मायाकार्याविद्योपाधिरविद्यावदन्तःकरणोपाधिर्वाच्यः उभयोरपि विशेषणांशत्यागेन शुद्धश्चिदात्मा लक्ष्यः तत्र वाच्ययोर्विरुद्धधर्मकत्वादैक्यासंभवेऽपि लक्ष्ययोरैक्यं निर्बाधमेवेति ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तलक्षणास्वरूपमाह । एकात्मकत्वादिति जहतीलक्षणाजहत्स्वार्थलक्षणायथागङ्गायांघोषइत्यत्रगङ्गापदार्थस्यप्रवाहस्यघोषाधारता
नुपपत्त्यासर्वथातत्परित्यागेनतीररूपार्थलक्षणा साप्रकृते न एकात्मत्वात् । विशेष्यांशस्यैकत्वात्सर्वथास्वार्थत्यागाभावात् । तथाज
हल्लक्षणताजहत्स्वार्थलक्षणावत्त्वमपिअत्रनसंभवति । यथाकाकेभ्योदधिरक्ष्यतामित्यादौकाकपदस्यस्वार्थात्यागेनैवदध्युपघातकेलक्षणा
सापिन । विरोधतःविशेषणत्यागेनसर्वथास्वार्थत्यागाभावात् । अतोभागलक्षणाजहदजहल्लक्षणायुज्यते । अदोषतःपूर्वोक्तदोषाभावात्

एकात्मकत्वाज्जहती न सम्भवेत्तथाऽजहल्लक्षणता विरोधतः॥
सोऽयंपदार्थाविवभागलक्षणायुज्येततत्त्वंपदयोरदोषतः॥२७॥

विशेष्यांशस्यात्यागाद्विशेषणांशस्यत्यागाच्च । तत्रदृष्टान्तः । सोऽयंपदार्थाविव । यथासोऽयंदेवदत्तइत्यत्रतद्देशादिविशिष्टोऽतीतानुभव
विषयोवातत्पदार्थः एतद्देशादिविशिष्टोऽनुभूयमानोवेदंशब्दार्थः । तयोश्चाविरुद्धविशेषणकत्वादैक्यासंभवेनदेशादिरूपविशेषणत्यागेना
नुभवगतातीतत्वादिविशेषणत्यागेनवालक्षणयैक्यंतद्वदिदितिभावः ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथत्याज्यत्वायजीवोपाधिमाह । रसादीति। रसापृथ्वीआदिर्येषांतानिपञ्चीकृतानियानिभूतानितेभ्यःसंभवोयस्यतत् । पञ्चीकरणंचेत्थम् एकैकंभूतंद्विधाविभज्यतत्रैकंभागंचतुर्धाविभज्यतेषांभागानांस्वेतरभूतचतुष्टयार्धभागचतुष्टयेसंयोजनेएकैकंभूतंपञ्चात्मकंभवतिभा

रसादिपञ्चीकृतभूतसंभवंभोगालयंदुःखसुखादिकर्मणाम् ॥ शरीरमाद्यन्तवदादिकर्मजंमायामयंस्थूलमुपाधिमात्मनः ॥ २८ ॥

गाधिक्याच्चप्रातिस्विकतयाभूगादिव्यवहारोऽपि । सुखदुःखयोरादीनियानिकर्माणितेषांभोगस्तत्कर्मजसुखदुःखानुभवस्तस्यालयमाश्रयभूतमाद्यन्तवत्उत्पत्तिनाशयोगि आदिकर्मजंप्राग्भवीयकर्मजन्यंमायामयंपरम्परयामायाविकारः तद्विकारभूतविकारत्वात् । एतच्छरीरमात्मनःस्थूलमुपाधिंवदन्तीतिशेषः ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसूक्ष्मोपाधिमाह। सूक्ष्ममिति । बुधाःअन्यत्स्थूलशरीरविलक्षणंशरीरंलिङ्गदेहाख्यमात्मनउपाधिंविदुः । तत्स्वरूपमाह। सूक्ष्मंचक्षु-
 राद्यविषयः मनोबुद्धिदशेन्द्रियैःप्राणैश्चयुतम् सङ्कल्पात्मकंमनः निश्चयात्मिकाबुद्धिः घ्राणरसनाचक्षुस्त्वक्श्रोत्रेतिपञ्चज्ञानेन्द्रियाणि वा-

सूक्ष्मंमनोबुद्धिदशेन्द्रियैर्युतंप्राणैरपञ्चीकृतभूतसंभवम् ॥ भोक्तुः
सुखादेरनुसाधनंभवेच्छरीरमन्याद्विदुरात्मनोबुधाः ॥ २९ ॥

क्पाणिपादपायूपस्थानिकर्मेन्द्रियाणि प्राणापानव्यानोदानसमानाश्चप्राणास्तैर्युतमेतत्सप्तदशसमुदायात्मकम्। तदाधारभूतान्याह ।अप
ञ्चीकृतभूतसंभवंतेभ्यउत्पन्नमतएवादृश्यम् । तथाभोक्तुःसुखादेःसुखदुःखाद्यनुभवस्यानुसाधनम् स्थूलशरीरस्यतदनुगतस्यैवभोगसाधनत्व
मितिभावः । एतद्वियोगेनैवमरणव्यवहारइतिबोध्यम् ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिजीवोपाधिद्वयमुक्त्वाईशोपाधिमाह । अनादीति । अनादि उत्पत्तिहीनम् । नानाविधपरिणामशालितयापरिणामरूपेणनश्वरामिति अनादित्वमात्रेोक्त्यासूचितम् । अनिर्वाच्यम् सत्त्वासत्त्वाभ्यांनिर्वक्तुमशक्यम् कारणंसकलप्रपञ्चस्यजनकम् ईदृशीमायातुब्रह्मणःपरमी-

अनाद्यनिर्वाच्यमपीहकारणं मायाप्रधानंतुपरंशरीरकम् ॥ उ-पाधिभेदान्तुयतःपृथक्स्थितं स्वात्मानमात्मन्यवधारयेत्क्र-मात् ॥ ३० ॥

श्वरव्यवहारसंपादकत्वादुत्कृष्टंप्रधानंशरीरकम् । स्वार्थेकः । एवमुपाधिभेदादेकमेवचैतन्यंयतः पृथक्स्थितंजीवईशइतिभेदबुद्धिविषय मतोलक्षणयोपाधिपरित्यागेनस्वात्मानमात्मनिअवधारयेदभेदेनजानीयात् । क्रमाच्छ्रवणमनननिदिध्यासनक्रमेणेत्यर्थः ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवाक्यार्थविचारफलमाह । कोशेष्विति । आनन्दमयस्य ब्रह्मत्वेअन्नमयप्राणमयमनोमयविज्ञानमयेषुचतुर्षुकोशेषुतत्तत्सङ्गात्तत्तदाकृतिर्विभाति यथाजपादिसङ्गात्स्फटिकोऽनेकाकृतिर्भाति । आनन्दमयस्यापि जीवत्ववादिनातुतेनसहपञ्चसु कोशेष्वितिबोध्यम् । अस्मि-

कोशेषुपञ्चस्वपितत्तदाकृतिर्विभातिसङ्गात्स्फटिकोपलोयथा ॥
असङ्गरूपोऽयमजोयतोऽद्वयोविज्ञायतेऽस्मिन्परितोविचारि-
ते ॥ ३१ ॥

न्महावाक्येपरितोविचारितेसम्यग्विचारितेसत्ययमात्माऽसङ्गरूपःअन्नमयादिभिःसङ्गरहितः । असङ्गोनहिसज्जते । इतिश्रुतेः । अजोऽद्वयश्चविज्ञायते । स्थूलोऽहमित्यादिस्त्वज्ञस्यतत्तत्कोशप्रसङ्गात्प्रतीतिःस्फटिकवत् तत्त्वज्ञस्यतुनतथाप्रतीतिरितिभावः । एवंचतत्तदुपाधिकृततत्तद्रूपताप्रतीतिनिरासएव विचारफलमितिभावः ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जाग्रदाद्यवस्थाऽपि बुद्धेर्धर्मोनात्मधर्मइत्याह । बुद्धेरिति । इहआत्मनिस्वप्नादिभेदेन जाग्रत्स्वप्नसुषुप्तिभेदेन यात्रिधावृत्तिर्दृश्यतेसाऽपि गुणत्रयात्मनः सत्त्वरजस्तमोरूपगुणत्रयस्वरूपाया बुद्धेर्धर्मः । उक्तावस्थात्रयस्योक्तमूलकत्वात् । एतदवस्थात्रयस्यास्मिन्नवस्थात्रय-साक्षिणि आत्मनि भानं मृषा बुद्ध्यध्यास निबन्धनं न तु वास्तव मित्यर्थः । अन्योऽन्यतोव्यभिचारतस्तस्यावस्था त्रयस्यस्व रूपतो

बुद्धेस्त्रिधा वृत्तिरपीह दृश्यते स्वप्नादि भेदेन गुणत्रयात्मनः ॥ अन्योऽन्यतोऽस्मिन्व्यभिचारतोमृषा नित्ये परे ब्रह्मणि केवले शिवे ॥ ३२ ॥

मृषात्वात्तज्ज्ञानस्य मृषात्वमेव । स्वप्नकाले जाग्रत्सुषुप्त्योरभावात् । जाग्रतिइतरद्वयस्याभावात् सुषुप्तावितरयोरभावात्परस्परं व्यभिचारोबोध्यः आत्मनस्तदनाश्रयत्वंविशेषणैराह । नित्येउत्पत्तिनाशशून्येपरेगुणत्रयातीते ब्रह्मणिव्यापकेकेवलेऽसङ्गेशिवआनन्दरूपे एवंभूतेसदेकरसेपरस्परव्यभिचारधर्माभानमसंभवीति भावः ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथसाऽज्यत्वायमंसारमूलभूतांवृत्तिमाह । देहेति । एषांसङ्घातइतरेतराध्यासविषयात् अजस्रंयावाद्धियो बुद्धेर्वृत्तिस्तमोमूलतयाऽज्ञ
लक्षणाऽज्ञत्वज्ञापिका यावत्परिवर्तते तावद्भवोद्भवःसंसारोद्भवोभवेत् । तमःपदंरजसोऽप्युपलक्षणम् । रजस्तमःप्रधानाबुद्धिः संसारहेतु

देहेन्द्रियप्राण मनश्चिदात्मनां सङ्घादजस्रं परिवर्तते धियः ॥
वृत्तिस्तमोमूलतयाऽज्ञलक्षणा यावद्भवेत्तावदसौ भवोद्भवः ॥ ३३ ॥

त्वात्सर्वथासाऽज्येति भावः ॥ ३३ ॥

CC-0. In Public Domain. Digitization by eGangotri

कृत महावाक्यविचारस्य कर्तव्यमाह । नेतीति । अथात आदेशोनेतिनेति इति प्रमाणेननिराकृतं मिथ्यात्वेनगृहीतमखिलंजगत्येनसः ततोहृदामस्त्वप्रधानेनमनसासम्यगास्वादितं चिल्लक्षणंघनामृतंदुःखासंभिन्नंसुखंयेनसः । स्वर्गादितुपरिणामदुःखत्वात्तत्संभिन्नमेव । एवंभूतोऽशेषंजगद्देहेन्द्रियादिदृश्यसमूहंत्यजेत् हानोपादानबुद्धिविषयंनकुर्यात् । किन्तूदासीनस्तत्रभवेत् । ननुदेहेन्द्रियादिभिरेवतज्ज्ञान

नेतिप्रमाणेन निराकृताखिलो हृदासमास्वादितचिद्घनामृतः ॥
त्यजेदशेषं जगदात्तसद्रसं पीत्वा यथाऽम्भः प्रजहाति तत्फ-
लम् ॥ ३४ ॥

लाभात्कथमुपजीव्यस्यत्यागइत्याशङ्क्यदृष्टान्तदर्शनेनपरिहराति । यथातृषावानआत्तः सद्रसोमाधुर्ययेनतादृशं नारिकेलनारङ्गादि फलान्तर्वर्त्यम्भःपीत्वा तत्स्थानभूतंतत्फलं जहाति तत्रोदासीनोभवति तद्वत्सर्वदृश्यसारांशोब्रह्मतल्लाभसतिनिः सारंदृश्यंनोपादेयंनापिहेयमितिभावः । यतोभयादिसंभावनातद्धेयमित्युच्यते ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

इतरस्यानित्यत्वेनतत्रवैराग्यार्थमात्मनएवनित्यत्वमाह । कदाचिदिति । कदापीत्यर्थः । अनवः उत्पत्त्यनन्तरंविद्यमानोहिनवः । तेन जन्मानन्तरास्तित्वंव्यावर्तितं नवत्वाभावेनैवजीर्णत्वाभावादवस्थान्तरापत्तिरूप परिणामोऽपिनिरस्तः ।अनेनअस्तिजायतेवर्द्धतेविपरिणमतेऽपक्षीयते नश्यतीति षड्भाव विकार राहित्यमुक्तम् । एवंचैतद्भिन्नं सर्वमुक्तषड्भावविकारवत्त्वादनित्यमिति ततोविरज्येतेतिबोधित-

कदाचि दात्मान मृतोनजायते नक्षीयते नापिविवर्धतेऽनवः ॥
निरस्तसर्वातिशयःसुखात्मकःस्वयम्प्रभःसर्वगतोऽयमद्वयः ३५

म् । यतऽईदृशोऽतएवनिरस्तः सर्वस्यदेहेन्द्रियादेरतिशयोमहत्त्वं येनस्वलाभात्सः यल्लाभान्नापरोलाभइतिःश्रुतेः यतःसुखात्मकः आनन्दस्वरूपः स्वयम्प्रभःस्वप्रकाशकश्च देहेन्द्रियादिस्तु दुःखस्वरूपः परप्रकाश्यश्च । यस्यभासासर्वमिदंविभाति । इतिश्रुतेः । सर्वगतोव्यापकः अयमहंबुद्धिविषयःप्रत्यगात्माऽपिअद्वयः उक्ताद्वयब्रह्मस्वरूपएव । नततोऽतिरिक्तइतिभावः । अयमात्माब्रह्म । इतिश्रुतेः ॥ ॥ ३५ ॥

CC-0. In Public Domain. Digitization by eGangotri

ननुएवंविधेविकारशून्येआत्मनिजन्ममरणादिप्रवाहरूपसंसारभानंकथमितिशङ्कते। एवंविधेइति।दुःखमयःदुःखप्रचुरः।उत्तरयति। अज्ञानतइ तिअज्ञानमूलकोयोध्यासोदेहान्तः करणादौअहंममेत्यध्यासस्तद्वशात्। एवंचभ्रान्तिरूपातत्प्रतीतिरितिभावः। नन्वेवंकथंतस्यसंसारस्यनि

एवंविधे ज्ञानमये सुखात्मके कथंभवो दुःखमयःप्रतीयते ॥
अज्ञानतोऽध्यासवशात्प्रकाशतेज्ञानेविलीयेत विरोधतःक्षणात्॥
॥ ३६ ॥

वृत्तिस्तत्राह। ज्ञानेति। आविर्भूतइतिशेषः। ज्ञानस्याज्ञानाविरोधित्वात्तदुत्पत्तिक्षणएवकारणभूताज्ञाननाशात्तत्कार्यसंसारस्यापि वि लयइत्यर्थः। यथारज्जुज्ञाननरज्जौसर्पस्यलयइत्यर्थः ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाध्यासलक्षणमाह । यदन्य दिति । यदन्यत्सर्पादिकमन्यत्ररज्ज्वादौभ्रमात्भ्रमजनकाद्दोषाद्विभाव्यतेविज्ञायतेअमुंविपश्चितोविद्वां-
सोऽध्यासइत्याहुः । यथाऽसर्पभूतेरज्ज्वादौ अहिविभावनंसर्पारोपोरज्ज्वबुद्धिमूलकस्तद्वदीश्वरेऽपिजगद्देहादिसंसारात्मकंसर्वंविभाव्य- स.

॥ १९ ॥ यदन्यदन्यत्र विभाव्यते भ्रमादध्यासमित्याहुरमुंविपश्चितः॥
असर्पभूतेऽहिविभावनंयथा रज्ज्वादिकेतद्वदपीश्वरेजगत्॥३७॥

॥ १९ ॥

तेआत्मज्ञानाभावाद्यथार्थतयाज्ञायते ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनि जगज्ज्ञाने कीदृशोऽध्यासो निमित्तं तदाह विकल्पेति सर्वविकल्पकारणमायारहिते वस्तुतस्तत्सङ्गरहिते चिदात्मके चित्स्वरूपे सर्वकारणे निरामये दुःखासंभिन्नानन्दमये केवलं सर्वविकारशून्ये परे दृश्यविलक्षणे ब्रह्मणि व्यापके आत्मनि प्रथमम् अहङ्कारः कल्पितः स एवाध्यासः ।

विकल्पमायारहिते चिदात्मके ऽहङ्कार एष प्रथमः प्रकल्पितः ॥
अध्यास एवात्मनि सर्वकारणे निरामये ब्रह्मणि केवले परे ॥ ३८ ॥

अहंबुद्ध्यात्मकोऽध्यास एव सर्वसंसारकारणमिति भावः ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

बुद्धिनिष्ठएवसंसारोनत्वात्मनिष्ठइत्यत्रान्वयव्यतिरेकौप्रमाणयति। इच्छादीति। परेसर्वसाक्षिणिआत्मनिसंसृतिहेतवःभासमानसंसारकारणं
सदाकालत्रयेऽपिइच्छादिरागादिसुखादिधार्मिकाः इच्छांपक्षेरागद्वेषौसुखदुःखंइत्येवमादिद्वन्द्वधार्मिकाःधियएवधीषुसतीषुसंसारइत्यन्वयमु

इच्छादिरागादिसुखादिधार्मिकाः सदा धियः संसृतिहेतवः परे ॥
यस्मात्प्रसुप्तौतदभावतःपरः सुखस्वरूपेणविभाव्यतेहिनः ॥३९॥

क्त्वातद्व्यतिरेकमाहयस्मात्कारणात्प्रसुप्तौतदभावात्धीवृत्त्यभावात परआत्मानोऽस्माभिःतृतीयार्थेषुषष्ठी। सुखरूपेणस्वस्वरूपमात्रेणाविभा
व्यतेनिश्चीयते नतु संसारित्वेनेतिभावः सुप्तोत्थितस्तुसुखमहमस्वाप्समितिप्रत्यभिज्ञानुभवात्तदात्मस्वरूपनिश्चयोऽस्तीतितात्पर्यम् ॥ ३९

CC-0. In Public Domain. Digitization by eGangotri

अथपुनस्तत्त्वंपदार्थस्वरूपमाह । अनादीति । अनादिर्याऽविद्यातदुद्भवो यस्या बुद्धेरन्तःकरणस्यतत्रबिम्बितःप्रतिबिम्बितश्चितःप्रकाशः सजीवइतीर्यते आत्मापगात्माधियः साक्षितयाधीधर्मासङ्गेनैवपृथक्स्थितः । अन्तर्यामितयेत्यर्थः जीवोऽहंसुखीत्यादिप्रकारेणान्तःकर

अनाद्यविद्योद्भवबुद्धिबिम्बितोजीवप्रकाशोऽयमितीर्यते चितः ॥
आत्माधियः साक्षितया पृथक् स्थितो बुद्ध्या परिच्छिन्नपरः
सएव हि ॥ ४० ॥

णधर्माध्यासवानप्यात्मातु साक्षितयासर्वत्रविद्यमानोऽपिनतथेतिभावः । अतएवबुद्ध्यापरिच्छिन्नपरः बुद्धिलक्षणपरिच्छेदरहितःअतएव परः । एवंचज्ञानेनप्रतिबिम्बाधार विलयप्रतिबिम्बस्यविलयात्सजीवः सएवपरमात्मैवहिप्रसिद्धं सइत्यस्यचात्रापिवर्तिबोध्या ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ बुद्ध्यात्मनोःपरस्पराध्यासवशात् परस्परधर्मभानमितिदार्ढ्यायपुनराह । चिद्बिम्बेति । चिदात्मचेतसोरन्योन्याध्यासवशात् परस्परतादात्म्यारोपाज्जड.जडत्वंप्रतीयते । चेतसोवृत्तीनांज्ञानत्वं जीवात्मनोजडत्वंप्रतीयते । अतएवज्ञानाश्रयआत्मेति चितएवताकिर्कव्यवहारः । जीवात्मनिजडात्मनिजडात्माकथ्यते बुधैरितिस्मार्तव्यवहारश्च । अत्रहेतुः । चिदित्यादि । चिद्बिम्बस्यसाचिदाभासः अ

चिद्बिम्बसाक्ष्यात्मधियांप्रसङ्गतस्त्वेकत्रवासादनलाक्तलोहवत् ॥
अन्योऽन्यमध्यासवशात्प्रतीयते जडाजडत्वंचचिदात्मचेतसोः
॥ ४१ ॥

क्षिःसहितः साक्षःसेन्द्रियः सचासावात्मामनःधीरन्तःकरणंतेषांप्रकृष्टसङ्गादतिसान्निकर्षादध्यासइत्यर्थः । अनलाक्तलोहवत् अग्नितप्तलोहपिण्डवत् अत्रदृष्टान्तः । अग्निधर्मोदाहकत्वं लोहधर्मश्चवर्तुलत्वाग्नलेभासते । तत्रहेतुरेकत्रवासात् परस्पराविभागेनवृत्तेरित्यर्थः । तद्वदेतयोरपि परस्परधर्माध्यासइत्यर्थः ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं दार्ढ्यायपुनराह । गुरोरिति । वेदवाक्यतइत्यनेन श्रवणंगुरोःसकाशादपि । ततश्चानेनमननमुक्तम् । ताभ्यांसञ्जातोविद्यया ज्ञानरूपस्यात्मनोऽनुभवोयस्यसः । अनेनकृतनिदिध्यासनइत्यर्थः । तं चिदानन्दस्वरूपं स्वात्मानमुपाधिवर्जितं रहितोपाधिधर्ममात्मस्थं

गुरोःसकाशादपिवेदवाक्यतः सञ्जातविद्यानुभवोनिरीक्ष्य तम् । स्वात्मानमात्मस्थमुपाधिवर्जितं त्यजेदशेषं जडमात्मगोचरम् ॥ ४२ ॥

हृत्स्थंनिरीक्ष्य अपरोक्षीकृत्याशेषंजडं दृश्यंत्यजेत् । तत्रोदासीनोभवेदिति भावः ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ज्ञेयंनिरुपाधिकं स्वरूपंश्लोकद्वयेनाह प्रकाशेति अहंप्रकाशरूपः स्वप्रकाशः परप्रकाशहीनः परप्रकाशरूपोयथाघटादिः अजोजन्मादि हीनः अद्वयःसजातीयद्वितीयरहितः असकृद्विभातः सकृदपिपरेणभासकान्तरेणप्रकाशितः सकृद्विभातः नसकृद्विभातोसकृद्विभातः नत

प्रकाशरूपोऽहमजोऽहमद्वयोऽसकृद्विभातोऽहमतीवनिर्मलः ॥
विशुद्धविज्ञानघनोनिरामयःसम्पूर्णआनन्दमयोऽहमक्रियः॥४३॥

त्रसूर्योभातिनचन्द्रतारकमितिश्रुतेः नतद्भासयतेसूर्यइतिस्मृतेश्च अतीवनिर्मलः मायाकृतावरणविक्षेपरहितः विशुद्धविज्ञानघनः विशुद्धचिदेकरसः निरामयःकर्तृत्वाभिमानरहितः सम्पूर्णःदेशकालपरिच्छेदहीनः आनन्दमयः आनन्दरूपः स्वार्थेमयट् अक्रियः परिणामहीनः ॥ ४३ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदैवेति अहंसदैवकालत्रयेऽपिमुक्तःसर्वधर्मरहितः अचिन्त्यशक्तिमान यः परमात्मा अतिन्द्रियज्ञानमूइन्द्रियातिरिक्तज्ञानरूपःयतोवाचो निवर्त्तन्ते अप्राप्यमनसासहइतिश्रुतः अविक्रियात्मकोऽपरिणामी अनन्तपारःअन्तःकालतःपारःपरन्तीरन्तावविद्यमानौ यस्य तंनदेश

सदैवमुक्तोऽहमचिन्त्यशक्तिमानतीन्द्रियज्ञानमविक्रियात्मकः॥
अनन्तपारोऽहमहर्निशंबुधैर्विभावितोऽहंहृदिवेदवादिभिः ॥४४॥

कालपरिच्छेदहीनः ईदृशोयःपरमात्माबुधैर्हृदि अहर्निशंविभावितः सोऽहमित्यर्थः ॥ ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवभावनायाःफलमाह एवमिति उक्तरीत्यामदाआत्मानं अखण्डितात्मनाविषयानाकृष्टचित्तेन विचारमाणम्यध्यायतः धातूनामनेकार्थ त्वात् चरमाणएवचारमाणःस्वार्थेऽण् विशुद्धभावनाब्रह्माकारान्तः करणवृत्तिरुदेतीतिशेषः सात्तोदिनाकारकैर्देहान्तरप्रापककर्मभिः स

एवंसदात्मानमखण्डितात्मनाविचारमाणस्यविशुद्धभावना ॥
हन्यादविद्यामचिरेणकारकैरसायनंयद्वदुपासितंरुजः ॥ ४५ ॥

हाविद्यामचिरेणशीघ्रमेवहन्यात् यथापामितंसेवितंरसायनं रुजोहन्यात्तद्वत् ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रध्यानेइतिकर्तव्यतामाह विविक्तइति निर्जनइत्यर्थः आसीनोयथोचितपद्मासनाद्युपविष्टः उपारतेन्द्रियः तेनशमदमादिसम्पन्नः विनि
र्जितात्माप्राणायामादिभिर्जितान्तःकरणः अतएवविमलान्तराशयोविशुद्धचित्तः विज्ञानदृक्विज्ञानएवदृक्भानंयस्यसः द्रष्टृदृश्यभा

विविक्तआसीनउपारतेन्द्रियोविनिर्जितात्माविमलान्तराशयः॥
विभावयेदेकमनन्यसाधनोविज्ञानदृक्केवलआत्मसंस्थितः॥४६

वरहितः अनेननिर्विकल्पकसमाधिरुक्तः अनन्यसाधनः तत्त्वज्ञानातिरिक्तमुक्तिसाधनास्तित्वभ्रमरहितः केवलोऽसङ्गःआत्मसंस्थितः
आत्मन्येवसंस्थासमाप्तिः सञ्जातायस्यसतेन नकदापिविषयान्तरसञ्चारवांचित्तः विभावयेत् ध्यायेत् ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंच यदेतत्भूतंभविष्यद्वर्तमानं विश्वंपरमात्मादर्शनंभासकोयस्यतत् तस्यभासासर्वमिदंविभातीति श्रुतेः तत्सर्वकारणेमायासान्निधाना
त्सर्वोपादानत्वेनाभिमतेआत्मनिविलापयेत् उपादानसत्ताव्यतिरेकेणकार्यसत्तांनपश्येत् तादृक्स्यलक्षणमाह सम्पूर्णः अवाप्तसमस्तका

विश्वंयदेतत्परमात्मदर्शनं विलापयेदात्मनि सर्वकारणे ॥
पूर्णश्चिदानन्दमयोऽवतिष्ठते न वेद बाह्यं न च किञ्चिदान्त
रम् ॥ ४७ ॥

मः तस्यकाम्याभावात् चिदानन्दमयः तद्रूपोऽवतिष्ठते बाह्यमान्तरंच दृश्यंनजानाति सर्वत्रब्रह्मदर्शनादिति भावः ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाधिसिद्धेः पूर्वंयत्कर्तव्यंतदाह । पूर्वमिति । समाधेः सकलविषयव्यासङ्गनिवृत्तिपूर्वकं ब्रह्माकारवृत्तिः समाधिस्ततः पूर्वमखिलंस चराचरंजगत् ओङ्कारमात्रं विचिन्तयेत् । ओङ्कारोमीयतेऽनयेतिमात्रा प्रमाणं बोधकत्वेन परिच्छेदकोयस्यतथाजानीयात् । तदेवविवृ

पूर्वं समाधे रखिलं विचिन्तये दोङ्कारमात्रं सचराचरं जगत् ॥
तदेव वाच्यं प्रणवो हि वाचको विभाव्यते ज्ञानवशान्न बो-
धतः ॥ ४८ ॥

णोति तदेवेति । जगदेवेत्यर्थः । प्रणवोवाचकोविभाव्यतेएतत्प्रसिद्ध इत्यर्थः । इयंभावनाज्ञानवशादेवनबोधकः । बोधोनिर्विशेषब्रह्मसाक्षात्कारस्तद्युत्तरंनेत्यर्थः । तस्यसर्ववृत्त्युपमर्दकत्वात् ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमर्थं विवृणोति । अकारेति । अकारसञ्ज्ञस्तद्वाच्यः पुरुषो हि विश्वको विश्व एव विश्वकः विश्वशब्देन परिभाषितः अयं जाग्रत्साक्षी विराट् ततः स्वप्नसाक्षी तैजसः तैजसपदेन परिभाषितः लिङ्गदेहाभिमानी हिरण्यगर्भ उकारकः उकारप्रतिपाद्य ईर्यते । ततः सुषुप्तिसाक्षी प्राज्ञपदवाच्यो

अकारसञ्ज्ञः पुरुषो हि विश्वको ह्युकारकस्तैजस ईर्यते क्रमात्
प्राज्ञो मकारः परिपठ्यतेऽखिलैः समाधिपूर्वं न तु तत्त्वतो
भवेत् ॥ ४९ ॥

मायोपाधिको मकारस्तद्वाच्यः परिपठ्यतेऽखिलैर्वेदैः । इयं भावना समाधिपूर्वं समाधेः पूर्वमेव न तत्त्वतः तत्त्वसाक्षात्कारे सति न भवेत् । सर्वस्य ब्रह्मणि प्रविलयात् ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविलापन प्रकारमाहद्वाभ्याम । विश्वंत्विति । उकारमध्ये बहुधाव्यवस्थितं स्थूलदेहनिबंधनंस्थूलदेहाभिमानेन स्थितं विश्वम्पुरुषंतद्वाचकमकारम् च विलापयेत् । तुश्चार्थे । विलीनम्भावयेत् ततस्तैजसं लिङ्गदेहाभिमानिनम् पुरुषं तद्वाचकंप्रणवद्वितीय वर्णमुकारं वि-

विश्वं त्वकारं पुरुषं विलापयेदुकारमध्येबहुधा व्यवस्थितम् ।
ततो मकारे प्रविलाप्य तैजसं द्वितीयवर्णं प्रणवस्य चान्तिमे ॥५०॥

लीनोविश्वकम्मकारे विलाप्याविलीनम्भावयित्वा ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततस्तादृशंमकारंतद्वाच्यंप्राज्ञंचकारणंकारणत्वाभिमानिनंपुरुषमिहात्मनि चिद्घनेपरे विलापयेन् तथाभावयेत् । ततः सोऽहंमर्वविला
पाधिष्ठानंपरब्रह्माविभावयेत् । तद्विशिनष्टि । सदाविमुक्तिमत् नित्यमुक्तम् । नन्वहंपदार्थस्यरागद्वेषादिमलिनस्यकथं ब्रह्मत्वभावनेत्या

मकारमप्यात्मनि चिद्घने परे विलापयेत्प्राज्ञमपीह कारणम् ।
सोऽहं परं ब्रह्म सदा विमुक्तिमद्विज्ञानदृङ्मुक्त उपाधितोऽमलः ॥ ५१ ॥

शङ्क्याहंपदार्थंविशिनष्टि । उपाधितोमुक्तः अतएवामलःतथाभावनेसाधनं विज्ञानदृक्विज्ञानं ब्रह्ममात्रप्रत्ययाविच्छेदरूपाहक् निदिध्या
सनं सत्साक्षात्कारेसाधनंयस्यसः ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंभावनावतोलक्षणमाह । एवमिति । उक्तप्रकारेण सदा जातापरमात्मन्येकभावना यस्य सः परिविस्मृतमखिलंपुत्रदेहादिर्येनसः। अत एवस्वस्वरूपानन्देनैवतुष्टःनतुविषयानन्देन । तस्यपारणामेदुःखरूपत्वात्ततो विरक्तइत्यर्थः । साक्षान्नित्यात्मनिसुखप्रकाशकः साक्षा

एवं सदा जातपरात्मभावनः स्वानन्दतुष्टःपरिविस्मृताखिलः ॥
आस्ते स नित्यात्मसुखप्रकाशकः साक्षाद्विमुक्तोऽचलवारिसि
न्धुवत् ॥ ५२ ॥

दौपाधिकनामरूपभेदरहितत्वेननित्यमखण्डितमात्मस्वरूपंयत्सुखंप्रकाशश्चतद्रूपः एवंरूपो विमुक्तोजीवन्मुक्तः । अचलंनिश्चलंवारियस्यतादृशसिन्धुवदास्ते । विषयसम्बन्धरूपकल्लोलरहितआस्तइत्यर्थः ॥ ५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशस्यमत्प्राप्तिर्भवत्येवेत्याह । एवमिति । उक्तप्रकारेणसदाऽभ्यस्तसमाधेर्योगिनः निवृत्ताःसर्वेषामिन्द्रियाणांगोचराविषयाःशब्दादयो यस्य विनिर्जिताअशेषारिपवःकामादयोयेनतस्य । तज्जयेनविषयेष्वन्तःकरणाप्रवृत्तिः । अतएव सर्वज्ञत्वनित्यत्वनित्यतृप्तत्वबोध

एवं सदाऽभ्यस्तसमाधियोगिनो निवृत्तसर्वेन्द्रियगोचरस्य हि ॥ विनिर्जिताशेषरिपोरहंसदा दृश्यो भवेयं जितषड्गुणात्मनः ॥५३ ॥

रूपत्वस्वतन्त्रत्वनित्यमलुप्तत्वानन्तरूपाषड्गुणायस्यतादृशआत्मजितो वशीकृतोयेनतस्य सदादृश्योभवेयम् । एतेनमद्भक्तस्ययोगिनो ऽहंदृश्योनतुभक्तिविमुखस्येति सूचितम् ॥ ५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंविधोजीवन्मुक्तःप्रारब्धवशेन अनभिमानोभोगानश्नँस्तिष्ठेत् ततोमय्येवविलीयते मद्रूपोभवतीत्याह । ध्यात्वैवमिति ॥ ५४ ।

ध्यात्वैवमात्मानमहर्निशं मुनिस्तिष्ठेत्सदा मुक्तसमस्तबन्धनः ॥
प्रारब्धमश्नन्नभिमानवर्जितो मय्येवसाक्षात्प्रविलीयते ततः ५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सर्वधर्मापेक्षयाऽयमेव धर्मो ज्यायानित्याह । आदाविति । भवसंसारपादिमध्यावसानेषु सर्वथा भयशोकयोः कारणं विदित्वा तत्कारणीभूतं विधिवादचोदितं त्यागादि समस्तं कर्ममार्गं काम्यं हित्वा अखिलात्मनां जीवानां स्वरूपभूतं मामात्मानं परमेश्वरं भजेत् । य

आदौ च मध्ये च तथैव चान्ततो भवं विदित्वा भयशोककारणम् ॥ हित्वा समस्तं विधिवादचोदितं भजेत्स्वमात्मानमथाखिलात्मनाम् ॥ ५७ ॥

थाधनस्य जनेनादौ दुःखं मध्ये पालनकृतं तत्र राजादिकृतं भयमन्ते नाशे शोकपर्यवसायि दुःखमेवं पदार्थमात्रे द्रष्टव्यम् ॥ ५७ ॥

CC-0. In Public Domain. Digitization by eGangotri

मय्यभेदभावनया नामरूपाविभागेन तद्रूप एवभवतीत्यमुमर्थं सदृष्टान्तमाह । आत्मनीति । आत्मनिसर्वाधिष्ठानेमयिइदंस्वस्वरूपं जीवमभेदेनविभावयन्यदा । तिष्ठतीतिशेषः । तदामयात्मनापरमेश्वरेणाऽभेदेनभवति अभिन्नोभवति । तत्रदृष्टान्तः यथासमुद्रेप्रविष्टं नद्यादि

आत्मन्यभेदेन विभावयन्निदं भवत्यभेदेन मयाऽत्मनातदा ॥ यथाजलं वारिनिधौ यथापयः क्षीरेवियद्व्योम्न्यऽनिले यथाऽनिलः ॥ ५६ ॥

जलंसमुद्रएव यथाक्षीरेगवादिक्षीरेप्रक्षिप्तंपयःक्षीरमेव यथाव्योम्निमहाकाशेघटाद्यवच्छिन्नाकाशोघटादिभङ्गे च यथाचर्मभस्त्रिकाद्यवच्छिन्नोवायुरनिलेमहावायौ नामरूपाविभागेनैकीभवतीत्यर्थः ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमात्मतत्त्वज्ञस्य जगत्ससत्यत्वभ्रमःस्वतएवापैतीत्याह । इत्थमिति । हिरण्यर्थे । लोकसंस्थितोऽपिजीवन्मुक्तिदशायांप्रारब्धवशाल्लोक
व्यवहारंकुर्वन्नपिजगन्मृषैवेतिविभावयन्सन् यदियदा इत्थमीक्षते ऐकात्म्यं जानीयात्तदा निवृत्तजगत्सत्यत्वभ्रमो भवतीति शेषः। तत्र
हेतुः श्रुतियुक्तिमानतोनिराकृतत्वात् । अतोऽन्यदार्तमित्यादिश्रुतिरूपात् जगन्मिथ्यादृश्यत्वात् शुक्तिरजतवादितितदुपबृंहितानुमानरू

इत्थं यदीक्षेत हि लोकसंस्थितो जगन्मृषैवेतिविभावयन्मुनिः॥
निराकृतत्वाच्छ्रुतियुक्तिमानतो यथेन्दुभेदो दिशि दिग्भ्रमादयः ॥ ५७ ॥

पात्मानतःप्रमाणतोनिराकृतत्वात् तत्रदृष्टान्तोयथेन्दुभेदः एकचन्द्रेद्विचन्द्रत्वभ्रमस्तदेकत्वज्ञानेननिवर्तते यथाच दिशिप्राच्यादौअ
न्यदिक्त्वभ्रमः सोऽपितत्त्वज्ञानान्निवर्तते । एवंभ्रमतःपुरुषस्य दिक्षुभ्रमणाद्भ्रमोनिकटवर्तिवृक्षादौच भ्रमणभ्रमस्तत्स्थैर्यज्ञानेन निवर्तते
तद्वत् ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशज्ञानेमदाराधनमेवोपायइत्याह । यावदिति । अखिलं जगन्मदात्मकंमदधिष्ठानकंमाद्विवर्तंभूतंयावन्नपश्येत्तावन्मत्प्राप्तयेश्रद्धालुः भगवदाराधनमेवज्ञानप्रापकमित्यत्र दृढविश्वासवान् अतिशयेनोर्जिताप्रवृद्धिमतीभक्तिर्मयिभगवतिपूज्यताबुद्धिरूपालक्षणं चिह्नंयस्यसः ।

यावन्नपश्येदखिलं मदात्मकं तावन्मदाराधनतत्परो भवेत् ॥
श्रद्धालुरत्यूर्जित भक्तिलक्षणो यस्तस्य दृश्यो ऽहमहर्निशं
हृदि ॥ ५८ ॥

तावन्मदाराधननिष्ठोभवेत् एवंहितस्यहृदि अहमहर्निशंदृश्योभवा मियेयथामांप्रपद्यन्ते तांस्तथैवभजाम्यहमितिस्मृतेः ॥ ५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वोक्तवचनजातस्य श्रुतिसमत्वं कथमेतदालोचनमपिमदाराधनप्रतिबन्धकदुरितध्वंसोपायइत्याह रहस्यमिति । श्रुतिसारसङ्ग्रहत्वेनाति

रहस्यमेतच्छ्रुतिसारसङ्ग्रहं मया विनिश्चित्य तवोदितं प्रिय ॥
यस्त्वेतदालोचयतीहबुद्धिमान् स मुच्यते पातकराशिभिः
क्षणात् ॥ ५९ ॥

गोपनीयता अप्रमाणशङ्काकलङ्कराहित्यंसूचितम् । आलोचयतिसम्यग्विनारयति ॥ ५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ भगवानुक्तमेवार्थंसङ्क्षेपेण दार्ढ्यायपुनराह भ्रातरिति । यदीतियादित्यर्थे । यदीदंजगत् परिदृश्यते तत्सर्वंमायैवेतिज्ञात्वेति शेषः चेतसासर्वंपरिहृत्यतत्रौदासीन्यंकृत्वामद्भावनयामदैक्यभावनया भावितंशुद्धंमानसंयस्यतादृशास्तिष्ठ । इत्युपदिश्याशिषंप्राह निरामयः

भ्रातर्यदीदं परिदृश्यते जगन्मायैव सर्वं परिहृत्य चेतसा ॥ मद्भा
वनाभावितशुद्धमानसः सुखी भवाऽऽनन्दमयो निरामयः ६०

सन्सुखीभव । सर्वदुःखनिवृत्त्येतिभावः । ततोऽन्तरङ्गामन्यामाशिषमाह आनन्दमयोभवेति तद्रूपोभवेत्यर्थः । यद्यपिपूर्वमानन्दरूपत्वमस्त्येवतथाऽपितत्प्राप्तिर्विस्मृतकंठस्थभूषणप्राप्तिवत ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एवंरीत्याम्बोपासकस्यलोकपावनत्वमाह। यइति । कदावा यदाकदाचिदित्यर्थः । हृदानिर्मलेनान्तःकरणेन यो मामगुणं प्राकृतसत्त्व
रजस्तमोरूपगुणरहितम् । सच्चिदानन्दरूपत्वात् । अतएवगुणाद्व्याकृतात्परंमायातीतम् । यदिवायद्वेत्यर्थे । गुणात्मकं सर्वज्ञत्वा-
दिलोकोत्तरलावण्यादिगुणवानात्मामूर्तिर्यस्यतं दृश्यमानं रूपं सेवते । सद्विविधोऽप्युपासकःअहं मत्स्वरूपएव । मामकइत्यर्थोवा । प्रि-

यः सेवते मामगुणं गुणात्परं हृदा कदा वा यदि वा गुणात्मकम् ॥ सोऽहंस्वपादाञ्चितरेणुभिः स्पृशन्पुनाति लोकान्त्रितयं यथा रविः ॥ ६१ ॥

योऽहिज्ञानिनोऽत्यर्थमहंमचममप्रिय इत्युक्तेः । तादृशोभक्तःस्वपादलग्नरेणुभिःसंस्पृशन्लोकत्रयमपि पुनाति । अज्ञानध्वान्तनिरसने
नपवित्रीकरोति । यथारविःस्वकरैर्जगद्वितिमिरीकरोति तद्वत् ॥ ६१ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानीमेतद्ग्रन्थार्थालोचनासमर्थस्यपाठमात्रतोऽपिमहत्फलमाह । विज्ञानंविज्ञानजनकं करणव्युत्पत्त्यंतिबोध्यम् । वेदान्तैरुपनिषद्वाक्यैर्वेधंचरणंजगज्जन्मादिलक्षणंकर्मयस्यतेन ननुपाठमात्रादेतादृशमहत्फलप्राप्तिःकथमित्याशङ्क्यभवत्येवेति सूचयंस्तत्रहेतुमाह । मद्वचने

विज्ञानमेतदखिलंश्रुतिसारमेकं वेदान्तवेद्यचरणेनमयैवगीतम् ।
यःश्रद्धया परिपठेद्गुरुभक्तियुक्तो मद्रूपमेति यदि मद्वचनेषुभक्तिः
॥ ६२ ॥ इतिश्री अध्यात्मरामायणे रामगीता समाप्ता ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसम्वादे उत्तरकाण्डे श्रीरामगीतायां पञ्चमःसर्गः ॥ ५ ॥

षुभक्तिर्विश्वासोयदीतिअर्थाद्गुरुवाक्यविश्वासस्यैव फलदायकत्वादितिभावः ॥६२॥ इत्यध्यात्मरामायणेउमामहेश्वरसम्वादे उत्तरकाण्डे सेतौपञ्चमःसर्गः ॥ ६२ ॥ श्रीरामचन्द्रार्पणमस्तु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीराममन्त्रःखलु तारकाख्यः संसारसन्तारणसुप्रसिद्धः ॥ भक्-
त्याऽप्यभक्त्या समुपासितोयः श्रेयांसि सर्वाणि ददात्यवश्य
म् ॥ १ ॥ तन्तारकंसम्प्रतिपादयन्ती श्रीरामगीता सकलैः सुसे
व्या ॥ विज्ञप्तिमित्थंजनको विनीतः समर्पयत्यार्यजनेषुहर्षात् २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प,	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति
स्पर्द्धि	स्पर्द्धि	१	२	१	शाधि	शाधि	३	२	६	नाशे	नाशो	६	१	१
जीव्य	जीव्य	१	२	३	व्यत्र	व्यव	४	१	१	नन्वितिश	नन्वितिशे	६	२	१
सम्बीन्धनीः	सम्बन्धिनीः	२	२	१	ष्ठामे	ष्ठानमे	४	२	३	विदा	विदा	६	२	२
ब्रह्म	ब्रह्म	२	१	२	ब्रह्म	ब्रह्म	४	२	१	मेत्रे	मेव	६	२	२
ब्रह्म	ब्रह्म	२	१	६	वलेन	वलेन	४	२	७	व्येतीत	व्यतेति	७	१	१
वोधोऽसि	वोधोऽसि	३	१	४	निघृत्ते	निवृत्ते	५	१	१	वीरहा	वीरहा	७	१	१
संवन्ध	सम्बन्ध	३	१	७	कत्व	कत्वा	५	१	१	सहष्ट	सद्दृष्ट	८	१	३
भवस्यंससार	भवस्यसंसार	३	२	१	नक	नैक	५	१	१	विशुद्धं	विशुद्ध	८	२	१
न्सार	सार	३	२	२	बेदान्त	वेदान्त	५	१	१	कारांतः	कारान्तः	८	२	२
पर्वग	पवर्ग	३	२	२	पूर्वे	पूर्वे	५	१	२	वृत्ति	वृत्ति	९	१	१
वारिधि	वारिधि	३	२	२	वुद्ध्या	बुद्ध्या	५	१	६	स्वत्राना	स्वना	९	२	१
					एवं	एव	५	१	६	वृत्यु	वृत्यु	१०	१	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
रीप	रपि	११	२	१
नर्दष्टा	र्नदष्टा	१२	१	४
र्वाद्धे	र्वाद्धे	१२	१	७
त्याभिः	त्माभिः	१२	२	६
शुद्द	शुद्ध	१३	१	१
जीवया	जीवयो	१३	१	२
निर्वाध	निर्बाध	१४	१	१०
भव	भव	१९	१	४
अर्जोद्व	अर्जोऽद्व	१६	२	६
द्व त्	द्वात्	१७	२	१

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
ह्लाभ	ह्लाभे	१८	१	८
इतिः	इति	१८	२	२
ज्ञानन	ज्ञानेन	१९	१	१
वुद्दया	वुद्धया	२०	१	५
रागादि	रागादे	२१	१	३
विलय	विलय	२१	१	७
धम	धर्म	२१	२	१
म्वस्य	म्वंयस्य	२१	२	२
वुवै	वुधै	२३	१	५
एव	एवं	२३	२	१
द्रष्ट	द्रष्ट्ट	२४	१	२

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
विभांव्युत	विभाव्यते	२५	१	४ मु
लिङ्गेद	लिङ्गदे	२६	१	२
वोधकः	वोधतः	२५	१	६
विज्ञानं ब्रह्म	विज्ञानंनिादि ध्यासनं ब्रह्म	२६	२ ६	३
भेदेरा	भेदरा	२७	१	६
रुपा	रूपाः	२७	२	१
आत्म	अत्मा	२७	२	१
मुनिति	मुनास्ति	२८	१	२
भव	भवं	२८	२	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
तदकत्व	तदेकत्व	२९	२	७	वतथाऽ	वतथाऽ	३१	१	१	मद्वचने	मद्वचने	३२	१	२
भ्रमण	भ्रमणं	२९	२	८	कंठ	कण्ठ	३१	१	२	तन्तारकं	तत्तारकं	३२	२	३

नेपाल पाशुपत, यन्त्रालये मुद्रिता.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इती रामगीता सटीका समाप्ता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द. नै. १६६४४

अथ रामगीता सटीका प्रारभ्यते ॥

मू० ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ रामंरत्नकिरीटकुण्डलयुतं केयूरहारान्वितं
सीतालङ्कृतवामभागममलं सिंहासनस्थं विभुम् ॥ सुग्रीवादि
कपीश्वरैःसुरवरैः संसेव्यमानं सदा विश्वामित्रपराशरादिमुनि-
भिः संस्तूयमानं भजे ॥ १ ॥ इतिध्यात्वा ॥ श्रीमहादेवउवाच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशाय नमः ॥ ध्यायेत्वाजानुबाहुं धृतशरधनुषं वद्धपद्मासनस्थं पीतंवासोवसानं नवकमलदलस्पर्द्धिनेत्रं प्रसन्नम् ॥ वामाङ्कारूढ सीतामुखकमलमिलल्लोचनं नीरदाभं नाना लङ्कारदीप्तं दधतमुरुजटामण्डलं रामचन्द्रम् ॥ १ ॥ ततइति जगतां यानि मङ्गलानि आनन्दास्तेषामुपजीव्यभूतं मङ्गलं ब्रह्मानन्दः सएवात्मास्वरूपं तेन तस्यैवानन्दस्यान्यानि भूतानिमात्रामुपजीवन्तीति श्रुतेः मङ्ग

ततोजगन्मङ्गलमङ्गलात्मना विधाय रामायणकीर्तिमुत्तमाम् ॥ चचार पूर्वाचरितं रघूत्तमो राजर्षिवर्य्यैरभिसेवितं यथा ॥ १ ॥

लानाञ्चमङ्गलमिति स्मृतेश्च किंच जगतां मङ्गलं कल्याणं यस्मात्तादृशकल्याणरूपआत्मामूर्तिस्तया उत्तमांश्रोत्रादीनां मोक्षदत्वेना त्युत्तमां रामायणकीर्तिं वाल्मीक्यादि कृत नानाविध रामायण प्रवर्तिकां रावणवधादिजां कीर्तिंविधाय स्थितोरघूत्तमः ततः सीताप रित्यागानन्तरं पूर्वैः स्ववंशजैराचरितं प्रजापालनसत्कथाश्रवणादिकं केवलंतत्पूर्वजैरेवाचरितमितिन किंत्वन्यैरपि राजर्षिश्रेष्ठैर्य थाऽभिसेवितं तथाचचार कृतवान् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदारागुरुदेवविश्वासलक्षणमहागुणवती यद्वा उदारा दानशीलाबुद्धिर्यस्य तेन पुरातनीः प्राचीनराजसम्बन्धिनीः शुभाः धर्माधर्मनिर्णेत्रीः प्रमत्तस्य स्वगोमण्डलमिश्रितब्राह्मणगोदानात् प्रमत्तस्य नृगस्य राज्ञो द्विजस्य शापात्तिर्यक्त्वमाह तेनाज्ञातकृतब्रह्मस्वापहारेण परमधा

सौमित्रिणापृष्ट उदारबुद्धिना रामःकथाःप्राह पुरातनीःशुभाः ॥
राज्ञः प्रमत्तस्य नृगस्य शापतो द्विजस्य तिर्यक्त्वमथाह राघवः
॥ २ ॥

र्मिकस्यापीदृश्यवस्थेति सर्वथाब्रह्मस्वविमुखताधर्मइतिसूचितम् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकान्तेविजने उपस्थितंप्राप्तम् विनयान्वितः सन् भक्त्यागुरुरयमिति बुद्ध्या प्रणम्य अनेनगुरूपसदनप्रकारउक्तः आसादितंशुद्धंभाव

कदाचिदेकान्त उपस्थितंप्रभुं रामं रमालालितपादपङ्कजम् ॥
सौमित्रिरासादितशुद्धभावनः प्रणम्यभक्त्याविनयान्वितोऽब्र-
वीत् ॥ ३ ॥

नं भावनाकरणमन्तः करणंयेनसः शुद्धान्तःकरणइतियावत् भगवदुक्तसत्कथाश्रवणेन शुद्धान्तःकरणइत्यर्थः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हे महामते महतीसर्वविषयामतिर्यस्य तस्य संबोधनं त्वं शुद्धबोधोऽसि अनवच्छिन्नचैतन्यरूपोऽसि सर्वदेहिनामात्माऽसि जीवानांतत्प्रतिबिम्बत्वात् अधीशोऽसि अन्तर्यामित्वान्नियन्ताऽसि वास्तवभेदाभावाच्च सर्वात्मत्वम् औपाधिकभेदाच्च नियन्तृनियम्यभावोबोध्यः निराकृतिः अस्मदादिवत्स्वार्जितकर्माधीनशरीराकृतिरहितः नन्वेवंसर्वैः कथमेवंनज्ञायतेऽतआह ज्ञानदृशां स्वयमेवप्रतीयसे ज्ञायतेऽ

त्वं शुद्धबोधोऽसि हि सर्वदेहिनामात्माऽस्यधीशोऽसि निराकृतिःस्वयम् ॥ प्रतीयसे ज्ञानदृशां महामते पादाब्जभृङ्गाहितसङ्गसाङ्गिनाम् ॥ ४ ॥

नेनेतिज्ञानं वेदान्तवाक्यजातं तदेवदृक्दर्शनसाधनंयेषां तेषामितिसंबन्धसामान्येषष्ठी तैरित्यर्थः तान्शद्दक्लाभश्च त्वद्भक्त्यधीनइत्याह पादेति त्वच्चरणकमलयोर्भृङ्गवदाहितःकृतः सङ्गोयेन तादृशान्तः करणसङ्गवतां त्वच्चरणकमल सङ्लग्नान्तः करणवतामित्यर्थः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ प्रार्थयते अहमिति भवस्यसंसारस्यापवर्गो निवृत्तिर्यस्मात्तादृशंतवपादाम्बुजंप्रपन्नोऽस्मिशरणंप्राप्तोऽस्मि योगिभावितं योगिभिः सं-
न्सारमुक्तये भावितम् अनेनतस्य भवापवर्गत्वे सदाचारः प्रमाणमुक्तम् प्रार्थनीयमाह अपारवारिधिरूपंयदज्ञानंसंसारमूलकारणं यथासुखम्

अहं प्रपन्नोऽस्मि पदाम्बुजं प्रभो भवापवर्गं तव योगिभावितम् ॥ यथाञ्जसाज्ञानमपारवारिधिं सुखं तरिष्यामि तथाऽनुशाधि माम् ॥ ५ ॥

क्लेशेन तरिष्यामि तथा मामनुशाधिशिक्षय अपारवारिधिमित्यनेनसपारप्रसिद्धसमुद्राद्व्यतिरेकउक्तः अशक्यतरणताऽनेनध्वनिता ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्थोत्तरमवतारयति श्रुत्वेति रामः सौमित्रिवचः श्रुत्वा अथशब्दोवाक्यालङ्कारे तदा श्रवणाव्यवहितकाले एवप्रपन्नानां भक्तानामार्ति संसारदुःखंहरतितादृशः प्रपन्नार्त्तिहरः प्रसन्नाभ्रमादिहीना भक्तानुग्रहपरा च धीर्यस्यसः क्षितिपालानां राज्ञां भूषणभूतोऽज्ञानरूपतमसउपशान्तये त

श्रुत्वाथ सौमित्रिवचोऽखिलं तदाप्राह प्रपन्नार्तिहरः प्रसन्नधीः ॥
विज्ञानमज्ञानतमोपशान्तये श्रुतिप्रपन्नं क्षितिपालभूषणः ॥ ६ ॥

दर्थम् सन्धिरार्षः श्रुतिभिः तमेवविदित्वाऽतिमृत्युमेतीत्यादिश्रुतिभिः प्रपन्नं तत्फलकत्वेन बोधितं विज्ञानमात्मतत्वज्ञानमिति सामान्यतः प्रथमंप्राह ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथतादृशज्ञानप्राप्त्यै क्रमेणबहिरङ्गान्तरङ्गसाधनान्याह आदाविति स्ववर्णाश्रमेषु शास्त्रेण वर्णिता याः क्रियानित्यनैमित्तिकयज्ञदाना दिरूपास्ताः कृत्वा समासादितशुद्धमानसः प्राप्तान्तःकरणशुद्धिः तत्पूर्वमुपात्तसाधनः तदनुष्ठानपूर्वकमेवउपात्तानिसाधनानि शम दमादीनियेन तादृशः अनेनकर्मणां बहिरङ्गत्वं शमादीनामन्तरङ्गत्वं स्फुटमेवोक्तम् किंच शमदमवैराग्यदार्ढ्यपर्यन्तं कर्मानुष्ठानमेवेति

आदौ स्ववर्णाश्रमवर्णिताःक्रियाः कृत्वा समासादितशुद्धमानसः
समाप्य तत्पूर्वमुपात्तसाधनः समाश्रयेत्सद्गुरुमात्मलब्धये॥ ७॥

सूचितम् ततस्तत्कर्मानुष्ठानं समाप्य त्यक्त्वा संन्यस्येतियावत् आत्मलब्धये आत्मज्ञानाय तत्फलकाय तत्वमस्यादिवाक्यार्थविचारा- य सद्गुरुंश्रोत्रियंब्रह्मनिष्ठमित्यादि लक्षणलक्षितं समाश्रयेत् सेवेत अनेनव्युत्पत्तिबलेन स्वयमेववाक्यार्थविचारः क्रियमाणो न फला- येति सूचितम् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसारस्यभ्रमिमच्चक्ररूपत्वात्तन्निवृत्तेश्चतत्कारणाज्ञाननिवृत्तिमूलकत्वदज्ञाननिवृत्तेश्चतत्त्वज्ञानकसाध्यत्वात्तत्त्वज्ञानस्यचवेदान्त विचारसाध्यत्वात्तदर्थंगुरुसमाश्रयणमित्याह क्रियेति भवःसंसारश्चक्रवद्विपरिवर्तमानईर्यते कथ्यते तदेवोपपादयति आहता आदरपूर्वंपूर्वजन्मार्जिताक्रियाएतस्यशरीरोद्भवस्यजन्मनोहेतुः तत्रजन्मनिसुरागिणोविषयाभिलाषवतः तौ शास्त्रप्रसिद्धौ धर्मेतरौ धर्माधर्मौ प्रियाप्रियौसुखदुः

क्रियाशरीरोद्भवहेतुरादृताप्रियाप्रियौतौभवतःसुरागिणः ॥
धर्मेतरौतत्रपुनः शरीरकंपुनः क्रियाचक्रवदीर्यतेभवः ॥ ८ ॥

खजनकौभवतःकस्यचिदधर्मएवसुखत्वबुद्ध्याप्रवृत्तिः कस्यचिद्धर्मएवंकदाचिदित्यप्यूह्यम् एवंतत्रोत्पादितकर्मणापुनःशरीरंपुनःक्रियाइत्येवंचक्रवद्विपरिवृत्तिः । यथाचक्रेभ्राम्यमाणेऽधोभागः कदाचिदुपरिउपरितनश्चाधः पुनरुपरिपुनरधएवंजन्मक्रिययोर्जन्यजनकभावेनपरिवृत्तिरिति बोध्यम् ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

तस्य चाज्ञानमेव मूलमित्याह अज्ञानमेवेति अत्र विधौ संसारनिवृत्तिलक्षणे कर्तव्येऽर्थे तद्धानमेव मूलकारणत्वादज्ञानहानमेव विधीयते साध-
नत्वेनेति शेषः ननु कर्मैव तन्नाशकमस्तु किं ज्ञानेनेत्याशङ्क्याह विद्यैवेति ज्ञानमेव तन्नाशविधौ मूलाज्ञाननाशने पटीयसी समर्था न कर्म समर्थमिति शेषः

अज्ञानमेवास्य हि मूलकारणं तद्धानमेवात्र विधौ विधीयते ॥ विद्यैव तन्नाशविधौ पटीयसी न कर्म तज्जं सविरोधमीरितम् ॥ ९ ॥

यतस्तत्तज्जमज्ञानजम् आत्मस्वरूपाज्ञानजन्यदेहाद्यभिमानजन्यत्वात्कर्मणोऽज्ञानजन्यत्वं बोध्यम् ननु तज्जन्यस्यापि तन्नाशकत्वं वृश्चिककर्क-
व्यादौ दृष्टमित्याशङ्क्य तज्जन्यत्वं वाननाशकत्वप्रयोजकं किन्तु सविरोधत्वमेवेत्याह यत सविरोधं तदीरितं नाशकमुक्तमित्यर्थः ॥ ९ ॥

CC-0. In Public Domain. Digitization by eGangotri

अतएवकर्मणानाज्ञानहानिरित्याह नाज्ञानेत्यादि यतःकर्मणाविरोधाभावान्नाज्ञाननाशनापिरागनाशोवस्तुतः कर्मानुष्ठानात्पुनः सदो
षंक्षयिफलत्वादिदोषविशिष्टंकर्मैवोद्भवेत्कर्मणश्चपुनःसंसारएवेतिनमुक्तिमत्याशा ततस्तस्माद्बुधोविवेकीज्ञानविचारवान् ज्ञायतेऽनेने·

नाज्ञानहानिर्नचरागसङ्क्षयोभवेत्ततः कर्मसदोषमुद्भवेत् ॥ ततः
पुनः संसृतिरप्यवारितातस्माद्बुधोज्ञानविचारवान्भवेत् ॥ १० ॥

तिज्ञानंवेदान्तवाक्यंतद्विचारवान्भवेत ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानींज्ञानस्यैवमोक्षहेतुत्वंनतुज्ञानकर्मसमुच्चयवादंदूषणायानुवदतिसार्धेन नन्विति नन्वितिशङ्कायाम् यथाविद्यावेदमुखेनश्रुतिपुराण-
लक्षणेन ब्रह्मविदाप्नोतिपरम् इत्यादिनापुरुषार्थसाधनमुक्ता तथा उभाभ्यांमवपक्षाभ्यांयथाखेपक्षिणांगतिः तथैवज्ञानकर्मभ्यांप्राप्यते
ब्रह्मशाश्वतम् इत्यादिनाक्रियाऽपितत्साधनत्वेनोक्ता किंच क्रियाकर्तव्यत। तृतीयार्थेप्रथमा कर्तव्यतयाआवश्यकेकृत्यअवश्यकर्तव्यत-

ननुक्रियावेदमुखेनचोदितायथैवविद्यापुरुषार्थसाधनम् ॥ कर्तव्य
ताप्राणभृतःप्रचोदिताविद्यासहायत्वमुपैतिसापुनः ॥ ११ ॥

याप्रचोदितानित्यनैमित्तिकरूपा एवंचतदकरणेप्रत्यवायोत्पत्त्याज्ञानोत्पत्तिरेवनस्यात् तस्मात्सापुनर्विद्यायाःसहायत्वंप्राप्नोतिघटेजन-
नीयेयथादण्डचक्रादीनांपरस्परसहायता ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्तव्येतीतस्त्रोक्तमंत्रेविदृणोाति कर्मेति वीरहावाएषदेवानांयोऽग्निमुद्वासयतेयावज्जीवमग्निहोत्रंजुहोति इतिश्रुतिः तत्रासिद्धान्तीशङ्कते
नान्विति ध्रुवंस्थिरंकार्यमिदंपुरूषार्थमोक्षजनिकाविद्यायतः स्वतन्त्राविनाऽपिसहायेन स्वकार्यसंपादनेसमर्था यथातेजस्तिमिरनिवर्तन-

कर्माकृतौदोषमपिश्रुतिर्जगौतस्मात्सदाकार्यमिदंमुमुक्षुणा॥ननु
स्वतन्त्राध्रुवकार्यकारिणीविद्यानकिञ्चिन्मनसाऽप्यपेक्षते ॥ १२

समर्थेमनसाऽपिकिञ्चित्सहायभूतंवस्तुनापेक्षते तथाफलेजननीयेसहायान्तरसंभावनाऽपिनेतिभावः अनेनविद्याफलजननेनिरपेक्षास्वतन्त्र-
त्वात्तेजोवदित्यनुमानंसूचितम् ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समुच्चयवादीपरिहराति नेति त्वदुक्तेनेत्यर्थः सत्यकार्यः अक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवति इत्यादिवेदनबोधितःस्थिरकार्योऽपि-
अध्वरः यथाऽन्यानपिकारकादिकान् आरादुपकारकप्रयाजाद्यङ्गानिदेशकालादीनिचप्रकाङ्क्षते तथाविद्यापिअग्निहोत्रंजुहोतिइत्यादिवि

नसत्यकार्योऽपिहियद्वदध्वरः प्रकाङ्क्षतेऽन्यानपिकारकादिकान्
तथैवविद्याविधितः प्रकाशितैर्विशिष्यते कर्मभिरेवमुक्तये ॥ १३ ॥

धिवाक्यतःतत्समूहेनप्रकाशितैः कर्मभिः सहितैवमुक्तयेविशिष्यतइत्यर्थः विद्याफलदानेकर्मापेक्षा अङ्गित्वात् प्रयाजाद्यङ्गापेक्षदर्शा
दिवदितिसत्प्रतिपक्षानुमानमनेनसूचितम् ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदनूद्य सिद्धान्ती दूषयति केचिदिति यत्केचिद्वितर्कवादिनः ज्ञानकर्मणोः समुच्चित्य मुक्तिसाधनं वदन्ति तदप्यसत् यथा केवलं कर्म मोक्ष साधनमित्यसत्तथा तन्मीलितमित्यप्यसत् तत्र हेतुर्दृष्टविरोधकारणात् दृष्टो यो विरोधः सर्वलोकदृष्टविरोधरूपात्कारणात्तदसदित्यर्थः विरो

केचिद्वदन्तीति वितर्कवादिनस्तदप्यसद्दृष्टविरोधकारणात् ॥
देहाभिमानादभिवर्धते क्रिया विद्या गताहङ्कृतितः प्रसिद्ध्यति १४

धमेवाह देहाभिमानात्क्रिया वर्धते अनात्मनि देहादावात्मत्वाभिमानात्क्रियाऽभिवृद्धिः विद्या तु गताहङ्कृतितः गताहङ्कृतिर्यस्य तस्य नष्टाहङ्कृतेः प्रसिद्ध्यति सार्वविभक्तिकस्तसिः एवं चाहङ्कारसत्तामूलकत्वात्क्रियाज्ञानयोः समुच्चयो विरुद्ध इत्यर्थः ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथपूर्वपक्षयुक्तानुमानंदूषयनविद्यास्वरूपमाह विशुद्धंविज्ञानंयेभ्यस्तेषांवेदान्तवाक्यानांयाद्विशेषेणरोचनंरलयोरभेदादालोचनंविचार
स्तेनाञ्चितामापितायाचरमाआत्मवृत्तिर्ब्रह्माकारांतःकरणवृत्तिः साविद्येतिभण्यतेविद्वद्भिरितिशेषः पुनःसमुच्चयवारणायविद्याकर्मणो
वैषम्यमाह कर्मयज्ञादिअखिलकारकादिभिःकर्तव्यकर्मादिभिरङ्गैश्चसहितंसदुदेतिफलोन्मुखंभवति विद्यापुनरखिलकारकादिनिहन्ति

विशुद्धविज्ञानविरोचनाञ्चिताविद्याऽऽत्मवृत्तिश्चरमेतिभण्यते ॥ उदेतिकर्माखिलकारकादिभिर्निहन्ति विद्याऽखिल कारकादि-कम् ॥ १५ ॥

तत्रकर्तृत्वादिबुद्धिंनिहन्ति सकलव्यापारपरित्यागेनब्रह्मणिसमाप्तिर्हिविद्या अतःस्वोत्पत्तौचित्तशुद्धिद्वाराकर्मसापेक्षास्वफलेजनायितव्यं-
तान्निरपेक्षैवान्यथाविद्यास्वरूपस्यैवभङ्गापत्तेरितिपूर्वपक्षयुक्तहेतोरासिद्धिरितिभावः ॥ १५ ॥

CC-0. In Public Domain. Digitization by eGangotri

उपसंहरन्मुमुक्षोर्वृत्तिप्रकारमाह तस्मादिति विद्याविरोधाद्विद्यायाः कर्मणासह विरोधेनसमुच्चयोनभवेत्तस्मात्सुधीर्मुमुक्षुरशेषतः कर्मत्यजे-
त् काम्यंतुसर्वथात्याज्यमेवनित्यनैमित्तिकमपियावच्चित्तशुद्धिकर्तव्यमेव ततोऽपित्रह्माणिचित्तस्थैर्यपर्यन्तं कर्तव्यमेव ततस्तदनुसन्धानप्र-

तस्मात्त्यजेत्कार्यमशेषतः सुधीर्विद्याविरोधान्नसमुच्चयोभवेत् ।
आत्मानुसन्धानपरायणःसदा निवृत्तसर्वेन्द्रियवृत्तिगोचरः १६

तिबन्धकत्वात्प्रयोजनाभावाच्चतदपित्याज्यमेवेतिभावः इदानींमुमुक्षुकर्तव्यमाह निवृत्ताःसर्वेषामिन्द्रियाणां गोचराविषयाःशब्दादयोय
स्मात्तादृशःसन् आत्मनःसच्चिदानन्दस्यानुसन्धानमेवपरमयनंप्राप्यंयस्यतथाविधोभवेत् अत्रेन्द्रियप्रत्याहारःकर्तव्यत्वेनोक्तस्तेनतत्पूर्वंप्रा-
णायामाद्यर्थादाक्षिप्तम् ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रागिविरागिभेदेनकर्मणोकर्तव्यताकर्त्तव्यतेआहयावदिति माययाविद्ययाशरीरादिष्ववानात्मसुआत्मधीरहङ्कृतेत्यादिरूपायावद्वर्ततेतावद्वि
धिवादकर्मणाम् विधिर्यजेतेत्यादिश्रुतिर्वादःकर्तव्यतावोधकोयेषांकर्मणांविधेयोवश्यवर्त्तितत्कर्मकर्ताभवेत तदपगमेतुतदाखिलं जगन्नेतीति

यावच्छरीरादिषुमाययात्मधीस्तावद्विधेयोविधिवादकर्मणाम् ॥
नेतीतिवाक्यैरखिलं निषिद्ध्य तज्ज्ञात्वापरात्मानमथत्यजेत्क्रि
याः ॥ १७ ॥

वाक्यैः अथातआदेशोनेतिनेतिइत्यादिवाक्यैर्निषिध्य मिथ्यात्वेननिर्णीयताद्विलक्षणतयासत्यत्वेनपरमात्मस्वरूपंज्ञात्वाक्रियास्त्यजेत्निरू
पितमेतत् ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मविज्ञानेसत्यवश्यमविद्या निवर्ततइत्याह यदेति आत्मनिशुद्धेन्तःकरणेपरमात्मनईशस्यात्मनोजीवस्यचयोविभेदोमायान्तःकरण रूपोपाधिद्वयकृतोविभेदोभेदस्तस्यभेदकं नाशकंभास्वरंप्रकाशशीलंयद्विज्ञानमितरवृत्युपमर्दनपूर्वकंब्रह्माकाराऽखण्डाद्वृत्तिर्यदाऽवभाति

यदापरात्मात्मविभेदभेदकंविज्ञानमात्मन्यवभाति भास्वरम् ॥
तदैवमायाप्रविलीयतेऽञ्जसासकारकाकारणमात्मसंसृतेः॥ १८॥

असंभावनादितिरस्कारेणोदेति तदैव सकारकाजन्मान्तरप्रापककर्मसहितामायातत्तज्जीवोपाधिभूता विद्याऽञ्जसाझदितिप्रविलीयतेनश्यति ननुतन्नाशेऽपिसंसारनाशःकथमतोमायाविशेषणम् आत्मसंसृतेःकारणंसंसारस्योपादानकारणमेवंचतन्नाशेकार्यनाशोभवत्येवेतिभावः १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं पुनर्दार्ढ्यायाह श्रुतीति तत्त्वमसीत्यादिश्रुतिरूपैःप्रमाणैस्तज्जनितज्ञानेन नाशितासाविद्याकथमपिकार्यकारिणीभविष्यतीति काकुरत्र सर्वथानेत्यर्थः असतःकार्यकारित्वासंभवादितिभावः पुनश्चतस्यानोद्भवइत्याह विज्ञानमात्रादिति अमलाशुद्धाद्वितीयतःद्विती

श्रुतिप्रमाणाभिविनाशिताचसाकथंभविष्यत्यपिकार्यकारिणी ॥
विज्ञानमात्रादमलाद्वितीयतस्तस्मादविद्यानपुनर्भविष्यति १९

यात्मविषयकाद्विज्ञानमात्रादितरासहकृतान्निदिध्यासनपरिपाकजज्ञानाद्यतोनष्टातस्मात्सापुनर्नभविष्यति रज्ज्वज्ञानमूलकस्य सर्पस्य रज्जुज्ञानेन निवृत्तस्ययथानपुनरुत्पत्तिरितिभावः ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्यायाइतरनिरपेक्षायाएवमोक्षकारणत्वमुक्तंयुक्तिपूर्वकंपुनःकथयतिश्रोतृदार्ढ्याय।यदीति। यदिनष्टातत्त्वज्ञाननाशिता सा न पुनः मसूयतेनोत्पद्यतेतदाकारणाभावादहंमतिःकथंभवेत्। कथमपिनभवेदित्यर्थः। तदभावाच्चतत्कालेकर्माभावइतिस्वफलजननेसास्वतन्त्राइ

यदिस्मनष्टा नपुनःप्रसूयते कर्ताऽहमस्येति मतिः कथं भवेत् ॥
तस्मात्स्वतन्त्रा न किमप्यपेक्षते विद्या विमोक्षाय विभाति केवला ॥ २० ॥

तरनिरपेक्षैवनाकिमप्यपेक्षते द्वितीयस्यासंभवात् अतः केवलाऽसहायैवविमोक्षायविभातितत्फलिकाभवतीत्यर्थः ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रार्थेश्रुतिरपिप्रमाणमित्याह सेति साप्रसिद्धा नकर्मणानप्रजयाधनेनत्यागेनैके अमृतत्वमानशुः इत्यादिकातैत्तिरीयश्रुतिःप्रशस्तानामर्थ वादैःप्राशस्त्येनबोधितानामपिकर्मणांन्यासंत्यागंसादरंस्फुटमाह नतुकर्मसमुच्चयमित्यर्थः तथावाजिनांवाजसनेयिनाम् एतावदरेखल्वमृत

सातैत्तिरीयश्रुतिराहसादरंन्यासंप्रशस्ताखिलकर्मणां स्फुटम् ॥
एतावदित्याहचवाजिनांश्रुतिर्ज्ञानंविमोक्षायनकर्मसाधनम् २१

त्वम् इत्यादिका ज्ञानंविमोक्षायसाधनं नकर्मेत्येतदाह ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहङ्कारत्यागरूपकारणवैषम्यात् क्रियाज्ञानयोर्वैषम्यमुक्त्वा फलमयुक्तमापिवैषम्यमाह विद्येति हेसमुच्चयवादिन् त्वयाक्रतुराग्निष्टोमादिर्वि द्यासमत्वेनदर्शितः परन्तुसमोदृष्टान्तोनोदाहृतः अनेनक्रतुर्विद्यासमः श्रुतिबोधितकर्तव्यताकत्वादित्यनुमानन्निरस्तम् दृष्टान्ताभावा- त् अन्वय्येवानुमानन्नव्यतिरेकीतिभावः एतच्चाकरेविस्तरेणप्रपञ्चितम् ननुविद्याकर्मणीसमे एकफलत्वाच्चक्रदण्डादिवदित्यनुमान-

विद्या समत्वेनतु दर्शितस्त्वया क्रतुर्नदृष्टान्त उदाहृतः समः ॥
फलैःपृथक्त्वाद्बहुकारकैः क्रतुःसंसाध्यतेज्ञानमतोविपर्ययम् २२

मितिचेत्तत्राह फलैः पृथक्त्वात षष्ठ्यर्थेतृतीया फलानांभेदादित्यर्थः एवंचस्वरूपासिद्धोहेतुरितिभावः समानकारकत्वमपिहेतुर्नेत्याह क्रतुर्बहुभिः कारकैरहंममताभिमानरूपैरान्तरैर्बाह्यैश्चदेशकालादिनियमैश्चसाध्यते ज्ञानन्त्वतोविपर्ययवदतोनतयोः साम्यमितिभावः २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वकरणेप्रत्यवायभिया कर्मकार्यमितिचेन्नेत्याह सप्रत्यवायइति कर्मत्यागेनाहंनिश्चयेनाहंप्रत्यवायसहितोभविष्यामीत्येवंशुद्धात्मनि-
अनात्मधर्मस्यधीरप्रज्ञस्यतत्त्वज्ञानविकलस्यप्रसिद्धा नतुतत्त्वदर्शिनः तस्याहंबुद्धेरभावात् पापादेरज्ञात्मधर्मतानिश्चयाच्च तस्माद्बुधैःकर्म

स प्रत्यवायोह्यहमित्यनात्मधीरज्ञप्रसिद्धा नतु तत्वदर्शिनः ॥
तस्माद्बुधैस्त्याज्यमपि क्रियात्मभिर्विधानतःकर्मविधि प्रका
शितम् ॥ २३ ॥

क्रियात्यभिः षष्ठ्यर्थेतृतीया क्रियाफलसक्तचित्तानां विधानतोविधानेनेतिकर्तव्यतयायुक्तंकर्म विधिभिरवश्यकर्तव्यतयाबोधितमपि-
त्याज्यमित्यर्थः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविरक्तस्यकार्यमाह। श्रद्धेति। गुरुशास्त्रयोर्विश्वासःश्रद्धानदान्वितोबुभुत्सुःशुद्धमानसोऽपि निष्कामकर्मानुष्ठानाच्छुद्धमानसश्चगुरोः प्रसादाल्लब्धतत्त्वमसीतिवाक्यतः श्रुतमात्मजीवयोरैकात्म्यंविज्ञाय मनननिदिध्यासनपरिपाकाभ्यांसाक्षात्कृत्य। चएवार्थः । साक्षा

श्रद्धान्वितस्तत्त्वमसीतिवाक्यतो गुरोःप्रसादादपिशुद्धमानसः॥
विज्ञायचैकात्म्यमथात्मजीवयोः सुखी भवेन्मेरुरिवाप्रकम्पनः
॥ २४ ॥

त्कृत्यचसुखी भवेत्। सकलदुःखहीनोभवेदित्यर्थः। अप्रकम्पनःविषयाभिलाषाक्षोभितान्तःकरणः ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 महावाक्यंविवरीतुंवाक्यार्थस्यपदार्थबोधपूर्वकत्वमाह । आदाविति । विधानतः भ्रमप्रमादराहित्येनवाक्यार्थविज्ञानस्यविधावुत्पत्तौआ
 दौप्रथमंमुख्यमितियावत्। पदार्थावगतिःकारणम्। हिप्रसिद्धं तस्यपदत्रयंतत्त्वमसि इति । तत्रतत्पदार्थःपरमात्मासर्वज्ञत्वादिगुणः त्वं

आदौ पदार्थावगतिर्हिकारणं वाक्यार्थविज्ञानविधौ विधानतः ॥
तत्त्वंपदार्थौपरमात्मजीवकावसीतिचैकात्म्यमथानयोर्भवेत्
॥ २५ ॥

पदार्थोजीवः अनयोस्तत्त्वंपदार्थयोरैकात्म्यंतद्बोधकमसीतिपदम् ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुसर्वज्ञत्वादिगुणस्येशस्यकिञ्चिज्ज्ञत्वधर्मवताजीवेनैकात्म्यं विरुद्धमित्याशङ्क्याह । प्रत्यागिति । अहंबुद्धिवेद्यत्वंप्रत्यक्त्वंजीवधर्मः परोक्षत्वमीशधर्मस्तदादिधर्मकृतमात्मनोःपरमात्मजीवात्मनोर्विरोधंविहायत्यक्त्वातयोः संशोधिताम् युक्तिभिःसम्यग्विचारितांतत्त्वंपदाभ्यांशक्त्यभावेऽपिवक्ष्यमाणप्रकारयालक्षणयालक्षितां ज्ञाताञ्चिदात्मतां संगृह्य तत्त्वंपदोपास्थितिविषयांकृत्वा स्वमात्मानंतथाज्ञात्वाऽथएकात्मज्ञानानन्तरमद्वयोभवेत् । चित्स्वरूपतांप्राप्तइवभवेत् । पूर्वमपितत्स्वरूपएवविस्मृतकण्ठचामीकरन्यायेनचतत्प्राप्तिः तदुक्तमुक्तम् ।

प्रत्यक्परोक्षादिविरोधमात्मनोर्विहायसंगृह्यतयोश्चिदात्मताम् ॥
संशोधितांलक्षणयाचलक्षितांज्ञात्वास्वमात्मानमथाद्वयोभवेत्
॥ २६ ॥

अयंभाव ः तत्त्वंपदयोर्द्वावर्थौ वाच्योलक्ष्यश्च तत्रतत्पदस्यमायोपाधिःसर्वज्ञत्वादिविशिष्टोवाच्यः त्वंपदस्यापिकिञ्चिज्ज्ञत्वादिविशिष्टो मायाकार्याविद्योपाधिरविद्यावदन्तःकरणोपाधिर्वाच्यः उभयोरपिविशेषणांशत्यागेनशुद्धश्चिदात्मालक्ष्यः तत्रवाच्ययोर्विरुद्धधर्मकत्वादैक्यासंभवेऽपिलक्ष्ययोरैक्यंनिर्बाधमेवेति ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तलक्षणास्वरूपमाह । एकात्मकत्वादिति जहतीलक्षणाजहत्स्वार्थलक्षणायथागङ्गायांघोषइत्यत्रगङ्गापदार्थस्यप्रवाहस्यघोषाधारतानुपपत्त्यामर्वथातत्परित्यागेनतीररूपार्थलक्षणा साप्रकृते न एकात्मत्वात् । विशेष्यांशस्यैकत्वात्सर्वथास्वार्थत्यागाभावात् । तथाजहल्लक्षणताजहत्स्वार्थलक्षणावत्त्वमपिअत्रनसंभवति । यथाकाकेभ्योदधिरक्ष्यतामित्यादौकाकपदस्यस्वार्थात्यागेनैवदध्युपघातकेलक्षणासापिन । विरोधतःविशेषणत्यागेनसर्वथास्वार्थत्यागाभावात् । अतोभागलक्षणाजहदजहल्लक्षणायुज्यते । अदोषतःपूर्वोक्तदोषाभावात्

एकात्मकत्वाज्जहती न सम्भवेत्तथाऽजहल्लक्षणता विरोधतः॥
सोऽयंपदार्थाविवभागलक्षणायुज्येततत्त्वंपदयोरदोषतः॥२७॥

विशेष्यांशस्यात्यागाद्विशेषणांशस्यत्यागाच्च । तत्रदृष्टान्तः । सोऽयंपदार्थाविव । यथासोऽयंदेवदत्तइत्यत्रतद्देशादिविशिष्टोऽतीतानुभवविषयोवातत्पदार्थः एतद्देशादिविशिष्टोऽनुभूयमानोवेदंशब्दार्थः । तयोश्चाविरुद्धविशेषणकत्वादैक्यासंभवेनदेशादिरूपविशेषणत्यागेनानुभवगतानांतत्त्वादिविशेषणत्यागेनवालक्षणयैक्यंतद्वदितिभावः ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथत्याज्यत्वायजीवोपाधिमाह । रसादी ति । रसापृथ्वीआदिर्येषांतानिपञ्चीकृतानियानिभूतानितेभ्यःसंभवोयस्यतत् । पञ्चीकरणंचे त्थम् एकैकंभूतंद्विधाविभज्यतत्रैकंभागंचतुर्धाविभज्यतेषांभागानांस्वेतरभूतचतुष्टयार्धभागचतुष्टयेसंयोजनेएकैकंभूतंपञ्चात्मकंभवतिभा

रसादिपञ्चीकृतभूतसंभवंभोगालयंदुःखसुखादिकर्मणाम् ॥ शरी रमाद्यन्तवदादिकर्मजंमायामयंस्थूलमुपाधिमात्मनः ॥ २८ ॥

गाधिक्याच्चप्रातिस्विकतयाभूगादिव्यवहारोऽपि । सुखदुःखयोरादीनियानिकर्माणितेषांभोगस्तत्कर्मजसुखदुःखानुभवस्तस्यालयमाश्र यभूतमाद्यन्तवत्उत्पत्तिनाशयोगि आदिकर्मजंभाग्भवीयकर्मजन्यंमायामयंपरम्परयामायाविकारः तद्विकारभूतविकारत्वात् । एतच्छरी रमात्मनःस्थूलमुपाधिंवदन्तीतिशेषः ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसूक्ष्मोपाधिमाह। सूक्ष्ममिति । बुधाःअन्यत्स्थूलशरीरविलक्षणंशरीरंलिङ्गदेहाख्यमात्मनउपाधिंविदुः । तत्स्वरूपमाह। सूक्ष्मंचक्षु-
राद्याविषयः मनोबुद्धिदशेन्द्रियैःप्राणैश्चयुतम् सङ्कल्पात्मकंमनः निश्चयात्मिकाबुद्धिः घ्राणरसनाचक्षुस्त्वक्श्रोत्रेतिपञ्चज्ञानेन्द्रियाणि वा-

सूक्ष्मंमनोबुद्धिदशेन्द्रियैर्युतंप्राणैरपञ्चीकृतभूतसंभवम् ॥ भोक्तुः
सुखादेरनुसाधनंभवेच्छरीरमन्याद्विदुरात्मनोबुधाः ॥ २९ ॥

क्पाणिपादपायूपस्थानिकर्मेन्द्रियाणि प्राणापानव्यानोदानसमानाश्चप्राणास्तैर्युतमेतत्सप्तदशसमुदायात्मकम्। तदाधारभूतान्याह ।अप
ञ्चीकृतभूतसंभवंतेभ्यउत्पन्नमतएवाऽदृश्यम् । तथाभोक्तुःसुखादेःसुखदुःखाद्यनुभवस्यानुसाधनम् स्थूलशरीरस्यैतदनुगतस्यैवभोगसाधनत्व
मितिभावः । एतद्वियोगेनैवमरणव्यवहारइतिबोध्यम् ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिजीवोपाधिद्वयमुक्त्वाईशोपाधिमाह । अनादीति । अनादि उत्पत्तिहीनम् । नानाविधपरिणामशालितयापरिणामरूपेणनश्वरामिति अनादित्वमात्रोक्त्यासूचितम् । अनिर्वाच्यम् सत्त्वासत्त्वाभ्यांनिर्वक्तुमशक्यम् कारणंसकलप्रपञ्चस्यजनकम् ईदृशीमायातुब्रह्मणःपरमी-

अनाद्यनिर्वाच्यमपीहकारणं मायाप्रधानंतुपरंशरीरकम् ॥ उ-
पाधिभेदान्तुयतःपृथक्स्थितं स्वात्मानमात्मन्यवधारयेत्क्र-
मात् ॥ ३० ॥

श्वरव्यवहारसंपादकत्वादुत्कृष्टंप्रधानंशरीरकम् । स्वार्थेकः । एवमुपाधिभेदादेकमेवचैतन्यंयतः पृथक्स्थितंजीवईशइतिभेदबुद्धिविषय मतोलक्षणयोपाधिपरित्यागेनस्वात्मानमात्मनिअवधारयेदभेदेनजानीयात् । क्रमाच्छ्रवणमनननिदिध्यासनक्रमेणेत्यर्थः ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवाक्यार्थविचारफलमाह । कोशेष्विति । आनन्दमयस्य ब्रह्मत्वेअन्नमयप्राणमयमनोमयविज्ञानमयेषुचतुर्षुकोशेषुतत्तत्सङ्गात्तत्तदाकृतिर्विभाति यथाजपादिसङ्गात्स्फटिकोऽनेकाकृतिर्भाति । आनन्दमयस्यापि जीवत्ववादिनातुतेनसहपञ्चसु कोशेष्वितिबोध्यम् । अस्मि-

कोशेषुपञ्चस्वपितत्तदाकृतिर्विभातिसङ्गात्स्फटिकोपलोयथा ॥ असङ्गरूपोऽयमजोयतोऽद्वयोविज्ञायतेऽस्मिन्परितोविचारिते ॥ ३१ ॥

न्महावाक्येपरितोविचारितेसम्यग्विचारितेसत्ययमात्माऽसङ्गरूपःअन्नमयादिभिःसङ्गरहितः । असङ्गोनहिसज्जते। इतिश्रुतेः । अजोऽद्वयश्चविज्ञायते । स्थूलोऽहमित्यादिस्त्वज्ञस्यतत्तत्कोशप्रसङ्गात्प्रतीतिःस्फटिकवत् तत्त्वज्ञस्यतुनतथाप्रतीतिरितिभावः । एवंचतत्तदुपाधिकृततत्तद्रूपताप्रतीतिनिरासएव विचारफलमितिभावः ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जाग्रदाद्यवस्थाऽपि बुद्धेर्धर्मोनात्मधर्मइत्याह । बुद्धेरिति । इहआत्मनिस्वप्नादिभेदेन जाग्रत्स्वप्नसुषुप्तिभेदेन यात्रिधावृत्तिर्दृश्यतेसाऽपि गुणत्रयात्मनः सत्त्वरजस्तमोरूपगुणत्रयस्वरूपाया बुद्धेर्धर्मः । उक्तावस्थात्रयस्योक्तमूलकत्वात् । एतदवस्थात्रयस्यास्मिन्नवस्थात्रय-साक्षिणि आत्मनि भानं मृषा बुद्ध्यध्यास निबन्धनं न तु वास्तव मित्यर्थः । अन्योऽन्यतोव्यभिचारतस्तस्यावस्था त्रयस्यस्व रूपतो

बुद्धेस्त्रिधा वृत्तिरपीह दृश्यते स्वप्नादि भेदेन गुणत्रयात्मनः ॥ अन्योऽन्यतोऽस्मिन्व्यभिचारतोमृषा नित्ये परे ब्रह्मणि केवले शिवे ॥ ३२ ॥

मृषात्वात्तद्भानस्य मृषात्वमेव । स्वप्नकाले जाग्रत्सुषुप्त्योरभावात् । जाग्रतिइतरद्वयस्याभावात् सुषुप्तावितरयोरभावात्परस्परं व्यभि चारोबोध्यः आत्मनस्तदनाश्रयत्वंविशेषणैराह । नित्येउत्पत्तिनाशशून्येपरेगुणत्रयातीते ब्रह्मणिव्यापकेकेवलेऽसङ्गेशिवआनन्दरूपे एवंभूतेसदैकरसेपरस्परव्यभिचारधर्माभानमसंभवीति भावः ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथत्याज्यत्वायसंसारमूलभूतांवृत्तिमाह । देहेति । एषांसङ्घातइतरेतराध्यासविषयात् अजस्रंसावद्धियो बुद्धेर्वृत्तिस्तमोमूलतयाऽज्ञलक्षणाऽज्ञत्वज्ञापिका यावत्परिवर्तते तावद्भवोद्भवःसंसारोद्भवोभवेत् । तमःपदंरजसोऽप्युपलक्षणम् । रजस्तमःप्रधानाबुद्धिः संसारहेतुत्वात्सर्वथात्याज्येति भावः ॥ ३३ ॥

देहेन्द्रियप्राण मनश्चिदात्मनां सङ्घादजस्रं परिवर्तते धियः ॥
वृत्तिस्तमोमूलतयाऽज्ञलक्षणा यावद्भवेत्तावदसौ भवोद्भवः॥३३॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत महावाक्यविचारस्य कर्तव्यमाह । नेतीति । अथात आदेशो नेति नेति इति प्रमाणेन निराकृतं मिथ्यात्वेन गृहीतमखिलं जगत् येन सः ततो हृदा सत्त्वप्रधानेन मनसा सम्यगास्वादितं चिल्लक्षणं घनामृतं दुःखासंभिन्नं सुखं येन सः । स्वर्गादि तु परिणामदुःखत्वात्तत्संभिन्नमेव । एवंभूतोऽशेषं जगद्देहेन्द्रियादिदृश्यसमूहं त्यजेत् हानोपादानबुद्धिविषयं न कुर्यात् । किन्तूदासीनस्तत्र भवेत् । ननु देहेन्द्रियादिभिरेव तज्ज्ञान

नेतिप्रमाणेन निराकृताखिलो हृदासमास्वादितचिद्घनामृतः ॥
त्यजेदशेषं जगदात्तसद्रसं पीत्वा यथाऽम्भः प्रजहाति तत्फ-
लम् ॥ ३४ ॥

लाभात्कथमुपजीव्यस्य त्याग इत्याशङ्क्य दृष्टान्तदर्शनेन परिहरति । यथा तृषावान् आत्तः सद्रसो माधुर्यं येन तादृशं नारिकेलनारङ्गादि फलान्तवर्त्यम्भः पीत्वा तत्स्थानभूतं तत्फलं जहाति तत्रोदासीनो भवति तद्वत् सर्वदृश्यसारांशो ब्रह्म तल्लाभसति निःसारं दृश्यं नोपादेयं नापि हेयमिति भावः । यतो भयादिसंभावनात द्वेर्यामित्युच्यते ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतरस्यानित्यत्वेनतत्रवैराग्यार्थमात्मनएवनित्यत्वमाह । कदाचिदिति । कदापीत्यर्थः । अनवः उत्पत्त्यनन्तरंविद्यमानोहिनवः । तेन जन्मानन्तरास्तित्वंव्यावर्तितं नवत्वाभावेनैवजीर्णत्वाभावादवस्थान्तरापत्तिरूप परिणामोऽपिनिरस्तः ।अनेनअस्तिजायतेवर्द्धतेविपरिणम तेऽपक्षीयते नश्यतीति षड्भाव विकार राहित्यमुक्तम् । एवंचैतद्भिन्नं सर्वमुक्तषड्भावविकारवत्त्वादनित्यमिति ततोविरज्येतेतिबोधित-

कदाचि दात्मान मृतोनजायते नक्षीयते नापिविवर्धतेऽनवः ॥
निरस्तसर्वातिशयःसुखात्मकःस्वयम्प्रभःसर्वगतोऽयमद्वयः ३५

म् । यतऽईदृशोऽतएवनिरस्तः सर्वस्यदेहेन्द्रियादेरतिशयोमहत्त्वं येनस्वलाभात्सः यल्लाभान्नापरोलाभइतिःश्रुतेः यतःसुखात्मकः आनन्द स्वरूपः स्वयम्प्रभःस्वप्रकाशकश्च देहेन्द्रियादिस्तुदुःखस्वरूपः परप्रकाश्यश्च । यस्यभासासर्वमिदंविभाति । इतिश्रुतेः । सर्वगतोव्यापकः अयमहंबुद्धिविषयःप्रत्यगात्माऽपिअद्वयः उक्ताद्वयब्रह्मस्वरूपएव । नततोऽतिरिक्तइतिभावः । अयमात्माब्रह्म । इतिश्रुतेः ॥ ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुएवंविधेविकारशून्येआत्मनिजन्ममरणादिप्रवाहरूपसंसारभानंकथमितिशङ्कते। एवंविधेइति।दुःखमयःदुःखप्रचुरः।उत्तरयाति। अज्ञानतइ तिअज्ञानमूलकोयोध्यासोदेहान्तः करणादौअहंममेत्यध्यासस्तद्वशात्। एवंचभ्रान्तिरूपातत्प्रतीतिरितिभावः। नन्वेवंकथंतस्यसंसारस्यनि

एवंविधे ज्ञानमये सुखात्मके कथंभवो दुःखमयःप्रतीयते ॥
अज्ञानतोऽध्यासवशात्प्रकाशतेज्ञानेविलीयेत विरोधतःक्षणात्॥
॥ ३६ ॥

वृत्तिस्तत्राह। ज्ञानेनि। आविर्भूतइतिशेषः। ज्ञानस्याज्ञानविरोधित्वात्तदुत्पत्तिक्षणएवकारणभूताज्ञाननाशात्तत्कार्यसंसारस्यापि वि लयइत्यर्थः। यथारज्जुज्ञाननरज्जौसर्पस्यलयइत्यर्थः ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाध्यासलक्षणमाह । यदन्यदिति । यदन्यत्सर्पादिकमन्यत्ररज्ज्वादौ भ्रमात् भ्रमजनकाद्दोषाद्विभाव्यते विज्ञायते अमुं विपश्चितो विद्वांसोऽध्यास इत्याहुः । यथाऽसर्पभूते रज्ज्वादौ अहिविभावनं सर्पारोपो रज्ज्वबुद्धिमूलकस्तद्वदीश्वरेऽपि जगदेहादिसंसारात्मकं सर्वं विभाव्य-

यदन्यदन्यत्र विभाव्यते भ्रमादध्यासमित्याहुरमुं विपश्चितः॥
असर्पभूतेऽहिविभावनं यथा रज्ज्वादिके तद्वदपीश्वरे जगत्॥३७॥

तेऽआत्मज्ञानाभावात्सत्यार्थतया ज्ञायते ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनिजगद्धानेकीदृशोऽध्यासोनिमित्तंतदाह विकल्पेति सर्वविकल्पकारणमायारहितेवस्तुतस्तत्सङ्गरहितेचिदात्मकेचित्स्वरूपेसर्वकारणेनिरामयेदुःखासंभिन्नानन्दमयेकेवलेसर्वविकारशून्येपरेदृश्याविलक्षणेब्रह्मणिव्यापके आत्मनिप्रथममहङ्कारः कल्पितः सएवाध्यासः ।

विकल्पमायारहितेचिदात्मके ऽहङ्कारएष प्रथमः प्रकल्पितः ॥
अध्यासएवात्मनिसर्वकारणे निरामयेब्रह्मणि केवलेपरे ॥ ३८॥

अहंबुद्ध्यात्मकोध्यासएवसर्वसंसारकारणमितिभावः ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बुद्धिनिष्ठएवसंसारोनत्वात्मनिष्ठइत्यत्रान्वयव्यतिरेकौप्रमाणयति। इच्छादीति। परेसर्वसाक्षिणिआत्मनिसंसृतिहेतवःभासमानसंसारकारणं
सदाकालत्रयेऽपिइच्छादिरागादिसुखादिधार्मिकाः इच्छांपक्षेरागद्वेषौसुखदुःखंइत्येवमादिद्वन्द्वधार्मिकाःधियएवधीषुसतीषुसंसारइत्यन्वयमु

इच्छादिरागादिसुखादिधार्मिकाः सदा धियः संसृतिहेतवः परे ॥
यस्मात्प्रसुप्तौतदभावतःपरः सुखस्वरूपेणविभाव्यतेहिनः ॥३९॥

क्त्वातद्व्यतिरेकमाह्यस्मात्कारणात्प्रसुप्तौतदभावात् धीवृत्त्यभावात् परआत्मानोऽस्माभिःतृतीयार्थेषुषष्ठी। सुखरूपेणस्वस्वरूपमात्रेणाविभा
व्यतेनिश्चीयते नतु संसारित्वेनेतिभावः सुप्तोत्थितस्तुसुखमहमस्वाप्समितिप्रत्यभिज्ञानुभवात्तदात्मस्वरूपनिश्चयोऽस्तीतितात्पर्यम् ॥ ३९ ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथपुनस्तत्त्वं पदार्थस्वरूपमाह ।अनादीति ।अनादिर्याऽविद्यातत उद्भवोयस्या बुद्धेरन्तःकरणस्यतत्रविम्बितःप्रतिबिम्बितश्चितःप्रकाशः सजीवइतीर्यते आत्मापरात्माधियः साक्षितयाधीधर्मासङ्गेनैवपृथक्स्थितः । अन्तर्यामितयेत्यर्थः जीवोऽहंसुखीत्यादिप्रकारेणान्तःकर

अनाद्यविद्योद्भवबुद्धिबिम्बितोजीवप्रकाशोऽयमितीर्यते चितः ॥ आत्माधियः साक्षितया पृथक् स्थितो बुद्ध्या परिच्छिन्नपरः सएव हि ॥ ४० ॥

णधर्माध्यासवान्परमात्मातु साक्षितयासर्वत्रविद्यमानोऽपिनतथेतिभावः। अतएवबुद्ध्यापरिच्छिन्नपरः बुद्धिलक्षणपरिच्छेदरहितःअतएव परः । एवंचज्ञानेनप्रतिबिम्बाधार विलयप्रतिबिम्बस्यविलयात्सजीवः सएवपरमात्मैवहिप्रसिद्धं सइत्यस्यचावृत्तिर्बोध्या ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ बुद्ध्यात्मनोःपरस्पराध्यासवशात् परस्परधर्मभानमितिदार्ढ्यायपुनराह । चिद्बिम्बेति । चिद्रात्मचेतसोरन्योन्याध्यासवशात् परस्परतादात्म्यारोपाज्जडाजडत्वंप्रतीयते । चेतसोवृत्तीनांज्ञानत्वं जीवात्मनोजडत्वंप्रतीयते । अतएवज्ञानाश्रयआत्मेति चितएवता। किंकर्तृव्यवहारः । जीवात्मनिजडात्मनिजडात्माकथ्यते बुधैरितिस्मार्तव्यवहारश्च । अत्रहेतुः । चिदित्यादि । चिद्बिम्बस्यसाचिदाभासः अ

चिद्बिम्बसाक्ष्यात्मधियांप्रसङ्गतस्त्वेकत्रवासादनलाक्तलोहवत्॥ अन्योऽन्यमध्यासवशात्प्रतीयते जडाजडत्वंचचिदात्मचेतसोः ॥ ४१ ॥

क्षैःसहितः साक्षःसेन्द्रियः सचासावात्मामनःधीरन्तःकरणंतेषांप्रकृष्टसङ्गात्दतिसान्निकर्षादध्यासइत्यर्थः । अनलाक्तलोहवत् अग्नितप्तलोहपिण्डवत् अत्रदृष्टान्तः । अग्निधर्मोदाहकत्वं लोहधर्मश्चवर्तुलत्वाद्यनलेभासते । तत्रहेतुरेकत्रवासात् परस्पराविभागेनवृत्तेरित्यर्थः । तद्वदेतयोरपि परस्परधर्माध्यासइत्यर्थः ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं दार्ढ्यायपुनराह । गुरोरिति । वेदवाक्यतइत्यनेन श्रवणंगुरोःसकाशादपि । ततश्चानेनमननमुक्तम् । ताभ्यांसञ्जातोविद्यया ज्ञानरूपस्यात्मनोऽनुभवोयस्यसः । अनेनकृतनिदिध्यासनइत्यर्थः । तं चिदानन्दस्वरूपं स्वात्मानमुपाधिवर्जितं रहितोपाधिधर्मंमात्मस्थं

गुरोःसकाशादपिवेदवाक्यतः सञ्जातविद्यानुभवोनिरीक्ष्य तम् । स्वात्मानमात्मस्थमुपाधिवर्जितं त्यजेदशेषं जडमात्मगोचरम् ॥ ४२ ॥

हृत्स्थंनिरीक्ष्य अपरोक्षीकृत्याशेषंजडं दृश्यंत्यजेत् । तत्रोदासीनोभवेदिति भावः ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञेयंनिरुपाधिकं स्वरूपंश्लोकद्वयेनाह प्रकाशेति अहंप्रकाशरूपः स्वप्रकाशः परप्रकाशहीनः परप्रकाशरूपोयथाघटादिः अजोजन्मादि
हीनः अद्वयःसजातीयद्वितीयरहितः अप्रकृद्विभातः सकृदपिपरेणभासकान्तरेणप्रकाशितः सकृद्विभातः नसकृद्विभातोसकृद्विभातः नत

प्रकाशरूपोऽहमजोऽहमद्वयोऽसकृद्विभातोऽहमतीवनिर्मलः ॥
विशुद्धविज्ञानघनोनिरामयःसम्पूर्णआनन्दमयोऽहमक्रियः॥४३॥

त्रसूर्योभातिनचन्द्रतारकमितिश्रुतेः नतद्भासयतेसूर्यइतिस्मृतेश्च अतीवनिर्मलः मायाकृतावरणविक्षेपरहितः विशुद्धविज्ञानघनःविशुद्धचि
देकरसः निरामयःकर्तृत्वाभिमानरहितः सम्पूर्णःदेशकालपरिच्छेदहीनः आनन्दमयः आनन्दरूपः स्वार्थेमयट् अक्रियः परिणामहीनः
॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदैवेति अहंसदैवकालत्रयेऽपिमुक्तःसर्वधर्मरहितः अचिन्त्यशक्तिमान् यः परमात्मा अतिन्द्रियज्ञानम् इन्द्रियातिरिक्तज्ञानरूपःयतोवाचो निवर्त्तन्ते अप्राप्यमनसासहइतिश्रुतेः अविक्रियात्मकोऽपरिणामी अनन्तपारःअन्तःकालतःपारःपरन्तीरन्तावविद्यमानौ यस्य तेनदेश

सदैवमुक्तोऽहमचिन्त्यशक्तिमानतीन्द्रियज्ञानमविक्रियात्मकः॥
अनन्तपारोऽहमहर्निशंबुधैर्विभावितोऽहंहृदिवेदवादिभिः ॥४४॥

कालपरिच्छेदहीनः ईदृशोयःपरमात्माबुधैर्हृदि अहर्निशंविभावितः सोऽहमित्यर्थः ॥ ४४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवभावनायाःफलमाह एवमिति उक्तरीत्यासदाआत्मानं अखण्डितात्मनाविषयानाकृष्टचित्तेन विचारमाणस्यध्यायतः धातूनामनेकार्थ
त्वात् चरमाणएवचारमाणःस्वार्थेऽण् विशुद्धभावनाब्रह्माकारान्तः करणवृत्तिरुद्दतीतिशेषः साचेच्छिन्नाकारकैर्देहान्तरप्रापककर्मभिः स

एवंसदात्मानमखण्डितात्मनाविचारमाणस्यविशुद्धभावना ॥
हन्यादविद्यामचिरेणकारकैरसायनंयद्वदुपासितंरुजः ॥ ४५ ॥

हाविद्यामचिरेणशीघ्रमेवहन्यात् यथोपासितंसेवितंरसायनं रुजोहन्यात्तद्वत् ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रध्यानेइतिकर्तव्यतामाह विविक्तइति निर्जनइत्यर्थः आसीनोयथोचितपद्मासनाद्युपविष्टः उपारतेन्द्रियः तेनशमदमादिसम्पन्नः विनि र्जितात्माप्राणायामादिभिर्जितान्तःकरणः अतएवविमलान्तराशयोविशुद्धचित्तः विज्ञानदृक्विज्ञानएवदृक्भानंयस्यसः द्रष्टृदृश्यभा

विविक्तआसीनउपारतेन्द्रियोविनिर्जितात्माविमलान्तराशयः॥
विभावयेदेकमनन्यसाधनोविज्ञानदृक्केवलआत्मसंस्थितः॥४६

नरहितः अनेननिर्विकल्पकसमाधिरुक्तः अनन्यसाधनः तत्त्वज्ञानातिरिक्तमुक्तिसाधनास्तित्वभ्रमरहितः केवलोऽसङ्गः आत्मसंस्थितः आत्मन्येवसंस्थासमाप्तिः सञ्जातायस्यसतेन नकदापिविषयान्तरसञ्चारवच्चित्तः विभावयेत् ध्यायेत् ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंच यदेतत्भूतंभविष्यद्वर्तमानं विश्वंपरमात्मादर्शनंभासकोयस्यतत् तस्यभासासर्वमिदंविभातीति श्रुतेः तत्सर्वकारणेमायासान्निधाना
त्सर्वोपादानत्वेनाभिमतेआत्मनिविलापयेत् उपादानसत्ताव्यतिरेकेणकार्यसत्तांनपश्येत् तादृशस्यलक्षणमाह सम्पूर्णः अवाप्तसमस्तका

विश्वंयदेतत्परमात्मदर्शनं विलापयेदात्मनि सर्वकारणे ॥
पूर्णश्चिदानन्दमयोऽवतिष्ठते न वेद बाह्यं न च किञ्चिदान्त
रम् ॥ ४७ ॥

मः तस्यकाम्याभावात् । चिदानन्दमयः तद्रूपोऽवतिष्ठते बाह्यमान्तरंच दृश्यंनजानाति सर्वत्रब्रह्मदर्शनादिति भावः ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाधिसिद्धेः पूर्वंयत्कर्तव्यंतदाह । पूर्वमिति । समाधेः सकलविषयव्यासङ्गनिवृत्तिपूर्वकं ब्रह्माकारवृत्तिः समाधिस्ततः पूर्वमखिलंस चराचरंजगत् ओङ्कारमात्रं विचिन्तयेत् । ओङ्कारोमीयतेऽनयेतिमात्रा प्रमाणं बोधकत्वेन परिच्छेदकोयस्यतथाजानीयात् । तदेवविवृ

पूर्वं समाधे रखिलं विचिन्तये दोङ्कारमात्रं सचराचरं जगत् ॥
तदेव वाच्यं प्रणवो हि वाचको विभाव्यते ज्ञानवशान्न बो-
धतः ॥ ४८ ॥

णोति तदेवेति । जगदेवेत्यर्थः । प्रणवोवाचकोविभाव्यतेएतत्प्राहिप्रसिद्ध इत्यर्थः । इयंभावनाज्ञानवशादेवनबोधकः । बोधोनिर्विशेषब्रह्मसा क्षात्कारस्तदुत्तरंनेत्यर्थः । तस्यसर्ववृत्त्युपमर्दकत्वात् ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमर्थंविवृणोति । अकारंति । अकारसञ्ज्ञस्तद्वाच्यःपुरुषोहिविश्वकोविश्वएवविश्वकः विश्वशब्देनपरिभाषितःअयंजाग्रत्साक्षीविराट्
ततःस्वप्नसाक्षीतैजसःतेनपदेनपरिभाषितःलिङ्गदेहाभिमानीहिरण्यगर्भउकारकः उकारप्रतिपाद्यईर्यते । ततः सुषुप्तिसाक्षीप्राज्ञपदवाच्यो

अकारसञ्ज्ञः पुरुषो हि विश्वको ह्युकारकस्तैजसईर्यते क्रमात्
प्राज्ञो मकारः परिपठ्यतेऽखिलैः समाधि पूर्वं न तु तत्त्वतो
भवेत् ॥ ४९ ॥

मायोपाधिकोमकारस्तद्वाच्यः परिपठ्यतेऽखिलैर्वेदैः । इयंभावनासमाधिपूर्वंसमाधेःपूर्वमेव नतत्त्वतः तत्त्वसाक्षात्कारेसतिनभवेत् । सर्व
स्यब्रह्मणिप्रविलयात् ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविलापन प्रकारमाहद्वाभ्याम । विश्वंत्विति । उकारमध्ये बहुधाव्यवस्थितं स्थूलदेहनिबंधनंस्थूलदेहाभिमानेन स्थितं विश्वम्पुरुषंतद्वाचकमकारम् च विलापयेत् । तुश्चार्थे । विलीनम्भावयेत् ततस्तैजसंसलिङ्गदेहाभिमानिनम् पुरुषं तद्वाचकंप्रणवद्वितीय वर्णमुकारं वि-

विश्वं त्वकारं पुरुषं विलापयेदुकारमध्येबहुधा व्यवस्थितम् ।
ततो मकारे प्रविलाप्यतैजसंद्वितीयवर्णं प्रणवस्य चान्तिमे ॥५०॥

लीनविश्वकम्मकारे विलाप्याविलीनम्भावयित्वा ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततस्तादृशंमकारंतद्वाच्यंप्राज्ञंचकारणंकारणत्वाभिमानिनंपुरुषमिहात्मनि चिद्घनेपरे विलापयेत् तथाभावयेत् । ततः सोऽहंसर्वविला पाधिष्ठानंपरब्रह्मविभावयेत् । तद्विशिनष्टि । सदाविमुक्तिमत् नित्यमुक्तम् । नन्वहंपदार्थस्यरागद्वेषादिमलिनस्यकथं ब्रह्मत्वभावनेत्या

मकारमप्यात्मनि चिद्घने परे विलापयेत्प्राज्ञमपीह कारणम् ।
सोऽहं परं ब्रह्म सदा विमुक्तिमद्विज्ञानदृङ्मुक्त उपाधितोऽमलः ॥ ५१ ॥

शङ्क्याहंपदार्थंविशिनष्टि । उपाधितोमुक्तः अतएवामलःतथाभावनेसाधनं विज्ञानदृक्विज्ञानं ब्रह्ममात्रप्रत्ययाविच्छेदरूपादृक् निदिध्या सनं सत्साक्षात्कारेसाधनंयस्यसः ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंभावनावतोलक्षणमाह । एवमिति । उक्तप्रकारेणसदाजातापरमात्मन्येकभावना यस्यसः परिविस्मृतमखिलंपुत्रदेहादियेनसः। अत एवस्वस्वरूपानन्देनैवतुष्टःनतुविषयानन्देन । तस्यपरिणामेदुःखरूपत्वात्ततो विरक्तइत्यर्थः । साक्षान्नित्यात्मनिसुखप्रकाशकः साक्षा

एवं सदा जातपरात्मभावनः स्वानन्दतुष्टःपरिविस्मृताखिलः ॥
आस्ते स नित्यात्मसुखप्रकाशकः साक्षाद्विमुक्तोऽचलवारिसि
न्धुवत् ॥ ५२ ॥

दौपाधिकनामरूपभेदराहित्येननित्यमखण्डितमात्मस्वरूपंयत्सुखंप्रकाशश्चतद्रूपः एवंरूपो विमुक्तोजीवन्मुक्तः । अचलंनिश्चलंवारियस्यताहशसिन्धुवदास्ते । विषयसम्बन्धरूपलहरीरहितआस्तइत्यर्थः ॥ ५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशस्यमत्प्राप्तिर्भवत्येवेत्याह । एवमिति । उक्तप्रकारेणसदाऽभ्यस्तसमाधियोगिनः निवृत्ताःसर्वेषामिन्द्रियाणांगोचराविषयाःशब्दादयो यस्य विनिर्जिताअशेषारिपवःकामादयोयेनतस्य । तज्जयेनविषयेष्वन्तःकरणाप्रवृत्तेः । अतएव सर्वज्ञत्वनित्यत्वनित्यतृप्तत्वबोध

एवं सदाऽभ्यस्तसमाधियोगिनो निवृत्तसर्वेन्द्रियगोचरस्य हि ॥ विनिर्जिताशेषरिपोरहंसदा दृश्यो भवेयं जितषड्गुणात्मनः ॥५३ ॥

रूपत्वस्वतन्त्रत्वनियमलुप्तत्वानन्तरूपाषड्गुणायस्यतादृशआत्माजितो वशीकृतोयेनतस्य सदादृश्योभवेयम् । एतेनमद्भक्तस्ययोगिनो ऽहंदृश्यांनतुभक्तिविमुखस्येति सूचितम् ॥ ५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंविधोजीवन्मुक्तःप्रारब्धवशेन अनभिमानोभोगानश्नँस्तिष्ठेत् ततोमय्येवाविलीयते मद्रूपोभवतीत्याह । ध्यात्वैवमिति ॥ ५४ ।

ध्यात्वैवमात्मानमहर्निशं मुनिस्तिष्ठेत्सदा मुक्तसमस्तबन्धनः ॥
प्रारब्धमश्नन्नभिमानवर्जितो मय्येवसाक्षात्प्रविलीयते ततः ५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सर्वधर्मापेक्षयाऽयमेवधर्मोज्यायानित्याह । आदौचेति । भवसंसारमादिमध्यान्तसानेपुमर्वथाभयशोकयोः कारणंविदित्वातत्कारणीभूतंविधिवादैर्यजेतत्यादिभिश्चोदितंबोधितंसमस्तंकर्ममार्गंकाम्यंहित्वा अखिलात्मनांजीवानांस्वरूपभूतंमामात्मानं परमेश्वरंभजेत् । य

आदौ च मध्ये च तथैव चान्ततो भवं विदित्वा भयशोक कारणम् ॥ हित्वा समस्तं विधिवादचोदितं भजेत्स्वमात्मान मथाखिलात्मनाम् ॥ ५५ ॥

थाधनस्यार्जनेनादौदुःखंमध्येपालनकृतं तत्र राजादिकृतं भयमन्तेनाशेशोकपर्यवसायिदुःखमेवं पदार्थमात्रेद्रष्टव्यम् ॥ ५५ ॥

CC-0. In Public Domain. Digitization by eGangotri

मय्यभेदभावनया नामरूपाविभागेन तद्रूप एवभवतीत्यमुमर्थं सदृष्टान्तमाह । आत्मनीति । आत्मनिसर्वाधिष्ठानेमयिइदंस्वस्वरूपं जीव मभेदेनविभावयन्यदा । तिष्ठतीतिशेषः । तदामयात्मनापरमेश्वरेणाऽभेदेनभवति अभिन्नोभवति । तत्रदृष्टान्तः यथासमुद्रेप्रविष्टं नद्यादि

आत्मन्यभेदेन विभावयन्निदं भवत्यभेदेन मयाऽत्मनातदा ॥
यथाजलं वारिनिधौ यथापयः क्षीरेवियद्व्योम्न्यऽनिले यथाऽ
निलः ॥ ५६ ॥

जलंसमुद्रएव यथाक्षीरेगवादिक्षीरेप्रक्षिप्तंपयःक्षीरमेव यथाव्योम्निमहाकाशेघटाद्यवच्छिन्नाकाशोघटादिभङ्गे च यथाचर्मभस्त्रिकाद्यव च्छिन्नोवायुरनिलेमहावायौ नामरूपाविभागेनैकीभवतीत्यर्थः ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमात्मतत्त्वज्ञस्य जगत्सत्यत्वभ्रमःस्वतएवापैतीत्याह । इत्थमिति । हिरण्यर्थे । लोकसंस्थितोऽपिजीवन्मुक्तिदशायांप्रारब्धवशाल्लोक
व्यवहारंकुर्वन्नपिजगन्मृषैवेतिविभावयन्सन् यदियदा इत्थमीक्षते ऐकात्म्यं जानीयात्तदा निवृत्तजगत्सत्यत्वभ्रमो भवतीति शेषः। तत्र
हेतुः श्रुतियुक्तिमानतोनिराकृतत्वात् । अतोऽन्यदार्तमित्यादिश्रुतिरूपात् जगन्मिथ्यादृश्यत्वात् शुक्तिरजतवदितितदुपबृंहितानुमानरू

इत्थं यदीक्षेत हि लोकसंस्थितो जगन्मृषैवेतिविभावयन्मुनिः ॥
निराकृतत्वाच्छ्रुतियुक्तिमानतो यथेन्दुभेदो दिशि दिग्भ्रमादयः ॥ ५७ ॥

पात्मानतःप्रमाणतोनिराकृतत्वात् तत्रदृष्टान्तोयथेन्दुभेदः एकचन्द्रेद्विचन्द्रत्वभ्रमस्तदेकत्वज्ञानेननिवर्तते यथाच दिशिप्राच्यादौअ
न्यदिक्त्वभ्रमः सोऽपितत्त्वज्ञानान्निवर्तते । एवंभ्रमतःपुरुषस्य दिक्षुभ्रमणाद्भ्रमोनिकटवर्तिवृक्षादौच भ्रमणभ्रमस्तत्स्थैर्यज्ञानेन निवर्तते
तद्वत् ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशज्ञानेमदाराधनमेवोपायइत्याह । यावदिति । अखिलं जगन्मदात्मकंमदधिष्ठानकंमाद्विवर्तभूतंयावन्नपश्येत्तावन्मत्प्राप्तयेश्रद्धालुः भगवदाराधनमेवज्ञानप्रापकमित्यत्र दृढविश्वासवान् अतिशयेनोर्जितावृद्धिमतीभक्तिर्मयिभगवतिपूज्यताबुद्धिरूपालक्षणं चिह्नंयस्यसः ।

यावन्नपश्येदखिलं मदात्मकं तावन्मदाराधनतत्परो भवेत्॥
श्रद्धालुरत्यूर्जित भक्तिलक्षणो यस्तस्य दृश्यो ऽहमहर्निशं हृदि ॥ ५८ ॥

तावन्मदाराधननिष्ठोभवेत् एवंहितस्यहृदि अहमहर्निशंदृश्योभवा मियेयथामांप्रपद्यन्ते तांस्तथैवभजाम्यहमितिस्मृतेः ॥ ५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वोक्तवचनजातस्य श्रुतिसमत्वं कथमेतदालोचनमपिमदाराधनप्रतिबन्धकदुरितध्वंसोपायइत्याह रहस्यमिति । श्रुतिसारसङ्ग्रहत्वेनाति

रहस्यमेतच्छ्रुतिसारसङ्ग्रहं मया विनिश्चित्य तवोदितं प्रिय ॥
यस्त्वेतदालोचयतीहबुद्धिमान् स मुच्यते पातकराशिभिः
क्षणात् ॥ ५९ ॥

गोपनीयता अप्रमाणशङ्काकलङ्कराहित्यंसूचितम् । आलोचयतिसम्यग्विचारयति ॥ ५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ भगवानुक्तमेवार्थसङ्क्षेपेण दार्ढ्यायपुनराह भ्रातरिति । यदीतियादित्यर्थे । यदीदंजगत् परिदृश्यते तत्सर्वंमायैवेतिज्ञात्वेति शेषः चेतसासर्वंपरिहृत्यतत्रौदासीन्यंकृत्वामद्भावनयामदैक्यभावनया भावितंशुद्धंमानसंयस्यताहृशास्तिष्ठ । इत्युपदिश्याशिषंप्राह निरामयः

भ्रातर्यदीदं परिदृश्यते जगन्मायैव सर्वं परिहृत्य चेतसा ॥ मद्भा वनाभावितशुद्धमानसः सुखी भवाऽऽनन्दमयो निरामयः ६०

सन्मुखीभव । सर्वदुःखनिवृत्त्योतिभावः । ततोऽन्तरङ्गामन्यामाशिषमाह आनन्दमयोभवेति तद्रूपोभवेत्यर्थः । यद्यपिपूर्वमानन्दरूपत्वमस्त्ये वतथाऽपितत्प्राप्तिर्विस्मृतकंठस्थभूषणप्राप्तिवत् ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंरीत्याम्बोपासकस्यलोकपावनत्वमाह। यइति । कदावा यदाकदाचिदित्यर्थः । हृदानिर्मलेनान्तःकरणेन यो मामगुणं प्राकृतसत्त्व रजस्तमोरूपगुणरहितम् । सच्चिदानन्दरूपत्त्वात् । अतएवगुणादव्याकृतात्परंमायातीतम् । यद्विवायद्वत्यर्थे । गुणात्मकं सर्वज्ञत्वा- दिलोकोत्तरलावण्यादिगुणवानात्मामूर्तिर्यस्यतं दृश्यमानं रूपं सेवते । सद्विविधोऽप्युपासकः अहं मत्स्वरूपएव । मामकइत्यर्थोवा । मि-

य: सेवते मामगुणं गुणात्परंहृदा कदा वा यदि वा गुणात्मकम् ॥ सोऽहंस्वपादाञ्चितरेणुभिः स्पृशन्पुनाति लोकान्त्रितयं यथा रविः ॥ ६१ ॥

त्रोदिज्ञानिनोऽत्यर्थमहंसचममप्रिय इत्युक्तेः । तादृशोभक्तःस्वपादलग्नरेणुभिःसंस्पृशन्लोकत्रयमपि पुनाति । अज्ञानध्वान्तनिरसने नपवित्रीकरोति । यथारविःस्वकरैर्जगद्वितिमिरीकरोति तद्वत् ॥ ६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानीमेतद्ग्रन्थार्थालोचनासमर्थस्यपाठमात्रतोऽपिमहत्फलमाह । विज्ञानंविज्ञानजनकं करणंव्युत्पत्त्येतिबोध्यम् । वेदान्तैरुपनिषद्वाक्यै
र्वेद्यंचरणंजगज्जन्मादिलक्षणंकर्मयस्यतेन ननुपाठमात्रादेतादृशमहत्फलप्राप्तिःकथमित्याशङ्क्यभवत्येवेति सूचयंस्तत्रहेतुमाह । मद्वचने

विज्ञानमेतदखिलंश्रुतिसारमेकं वेदान्तवेद्यचरणेनमयैवगीतम् ।
यःश्रद्धया परिपठेद्गुरुभक्तियुक्तो मद्रूपमेति यदि मद्वचनेषु भक्तिः
॥ ६२ ॥ इतिश्री अध्यात्मरामायणे रामगीता समाप्ता ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसम्वादे उत्तरकाण्डे श्रीरामगीतायां पञ्चमःसर्गः ॥ ५ ॥

षुभक्तिर्विश्वासोयदीतिअर्थाद्गुरुवाक्यविश्वासस्यैव फलदायकत्वादितिभावः ॥६२॥ इत्यध्यात्मरामायणेउमामहेश्वरसम्वादे उत्तरकाण्डे
सेतौपञ्चमःसर्गः ॥ ६२ ॥ श्रीरामचन्द्रार्पणमस्तु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीराममन्त्रःखलु तारकाख्यः संसारसन्तारणसुप्रसिद्धः ॥ भक्-
त्याऽप्यभक्त्या समुपासितोयः श्रेयांसि सर्वाणि ददात्यवश्य
म् ॥ १ ॥ तन्तारकंसम्प्रतिपादयन्ती श्रीरामगीता सकलैः सुसे
व्या ॥ विज्ञप्तिमित्थंजनको विनीतः समर्पयत्यार्यजनेषुहर्षात् २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प,	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति
स्यर्द्धि	स्पार्द्धि	१	२	१	शाधि	शाधि	३	२	६	नाशे	नाशो	६	१	१
जीव्य	जीन्य	१	२	३	व्यत्र	व्यव	४	१	१	नन्वितिश	नन्वितिशे	६	२	१
सम्बीन्धनीः	सम्बन्धिनीः	२	२	१	छामे	छानमे	४	२	३	त्रिदा	विदा	६	२	२
व्रह्म	ब्रह्म	२	१	२	व्रह्म	ब्रह्म	४	२	१	मेवे	मेव	६	२	२
ब्रह्म	व्रह्म	२	१	६	वलेन	बलेन	४	२	७	व्येतीत	व्यतेति	७	१	१
वोधोऽसि	बोधोऽसि	३	१	४	निघृत्ते	निवृत्ते	५	१	१	बीरहा	वीरहा	७	१	१
संवन्ध	सम्बन्ध	३	१	७	कत्व	कत्वा	५	१	१	सद्दष्ट	सद्द्दष्ट	८	१	३
भवस्यंससार	भवस्यसंसार	३	२	१	नक	नैक	५	१	१	त्रिशुद्धं	विशुद्ध	८	२	१
न्सार	सार	३	२	२	बेदान्त	वेदान्त	५	१	१	कारांतः	कारान्तः	८	२	२
पर्वग	पवर्ग	३	२	२	पूर्वे	पूर्वे	५	१	२	वृत्ति	वृत्ति	९	१	१
बारिधि	वारिधि	३	२	२	बुद्ध्या	बुद्ध्या	५	१	६	स्वत्राना	स्वनां	९	२	१
					एवं	एव	५	१	६	बृत्यु	वृत्यु	१०	१	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
रीप	रपि	११	२	१
नर्द्दष्टा	र्नद्दष्टा	१२	१	४
र्वाद्धे	र्वाद्धे	१२	१	७
त्याभिः	त्माभिः	१२	२	६
शुद्द	शुद्ध	१३	१	१
जीवया	नीवयो	१३	१	२
निर्वाध	निर्बाध	१४	१	१०
भव	भव	१९	१	४
अर्जोद्र	अर्जोऽद्र	१६	२	६
द्वात्	द्वाव्	१७	२	१

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
ह्लाभ	ह्लाभे	१८	१	८
इतिः	इति	१८	२	२
ज्ञानन	ज्ञानेन	१९	१	१
वुद्द्या	वुद्ध्या	२०	१	९
रागादि	रागादे	२१	१	३
व्रिलय	विलय	२१	१	७
धम	धर्म	२१	२	१
म्वस्य	म्वंयस्य	२१	२	२
वुवै	बुधै	२३	१	५
एव	एवं	२३	२	१
द्रष्ट	द्रष्टृ	२४	१	२

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
विभाव्यत	विभाव्यते	२५	१	४ मु
लिङ्गद	लिङ्गदे	२६	१	२
बोधकः	बोधतः	२५	१	६
विज्ञानं ब्रह्म	विज्ञानंनिदि ध्यासनं ब्रह्म	२६	२६	३
भेदेरा	भेदरा	२७	१	६
रुपा	रूपाः	२७	२	१
आत्म	अत्मा	२७	२	१
मुनिति	मुनास्ति	२८	१	२
भव	भवं	२८	२	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
तदकत्व	तदेकत्व	२६	२	७	वतथाऽ	वतथाऽ	३१	१	१	मद्वचने	मद्वचने	३२	१	२
भ्रमण	भ्रमणं-	२६	२	८	कंठ	कण्ठ	३१	१	२	तन्तारकं	तत्तारकं	३२	२	३

नेपाल पाशुपत, यन्त्रालये मुद्रिता.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इती रामगीता सटीका समाप्ता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द. नं. १६६४१

अथ रामगीता सटीका प्रारभ्यते ॥

मू० ५/-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ रामंरत्नकिरीटकुण्डलयुतं केयूरहारान्वितं सीतालङ्कृतवामभागममलं सिंहासनस्थं विभुम् ॥ सुग्रीवादि कपीश्वरैःसुरवरैः संसेव्यमानं सदा विश्वामित्रपराशरादिमुनिभिः संस्तूयमानं भजे ॥ १ ॥ इतिध्यात्वा ॥ श्रीमहादेवउवाच ॥

Sampurnanand Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ ध्यायेत्वाजानुबाहुं धृतशरधनुषं वद्धपद्मासनस्थं पीतंवासोवसानं नवकमलदलस्पर्द्धिनेत्रं प्रसन्नम् ॥ वामाङ्काऊढ सीतामुखकमलमिलल्लोचनं नीरदाभं नाना लङ्कारदीप्तं दधतमुरुजटामण्डलं रामचन्द्रम् ॥ १ ॥ ततइति जगतां यानि मङ्गलानि आनन्दास्तेषामुपजीव्यभुतं मङ्गलं ब्रह्मानन्दः सएवात्मास्वरूपं तेन तस्यैवानन्दस्यान्यानि भूतानिमात्रामुपजीवन्तीति श्रुतेः मङ्ग

ततोजगन्मङ्गलमङ्गलात्मना विधाय रामायणकीर्तिमुत्तमाम्॥
चचार पूर्वाचरितं रघूत्तमो राजर्षिवर्य्यैरभिसेवितं यथा ॥ १ ॥

लानाञ्चमङ्गलमिति स्मृतेश्च किंच जगतां मङ्गलं कल्याणं यस्मात्तादृशकल्याणरूपआत्मामूर्तिस्तया उत्तमांश्रोत्रादीनां मोक्षदत्वेना त्युत्तमां रामायणकीर्तिं वाल्मीक्यादि कृत नानाविध रामायण प्रवर्तिकां रावणवधादिजां कीर्तिंविधाय स्थितोरघूत्तमः ततः सीताप रित्यागानन्तरं पूर्वैः स्ववंशजैराचरितं प्रजापालनसत्कथाश्रवणादिकं केवलंतत्पूर्वजैरेवाचरितमितिन किंत्वन्यैरपि राजर्षिश्रेष्ठैर्य थाऽभिसेवितं तथाचचार कृतवान् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदारागुरुदेवविश्वासलक्षणमहागुणवती यद्वा उदारा दानशीलाबुद्धिर्यस्य तेन पुरातनीः प्राचीनराजसम्बन्धिनीः शुभाः धर्माधर्मनिर्णेत्रीः प्रमत्तस्य स्वगोमण्डलमिश्रितब्राह्मणगोदानात् प्रमत्तस्य नृगस्य राज्ञो द्विजस्य शापात्तिर्यक्त्वमाह तेनाज्ञातकृतब्रह्मस्वापहारेण परमधा

सौमित्रिणापृष्ट उदारबुद्धिना रामःकथाःप्राह पुरातनीःशुभाः ॥
राज्ञः प्रमत्तस्य नृगस्य शापतो द्विजस्य तिर्यक्त्वमथाह राघवः
॥ २ ॥

र्मिकस्यापीदृश्यवस्थेति सर्वथाब्रह्मस्वविमुखताधर्मइतिसूचितम् ॥ १ ॥

CC-0. In Public Domain. Digitization by eGangotri

एकान्तेविजने उपस्थितंप्राप्तम् विनयान्वितः सन् भक्त्यागुरुरयमिति बुद्ध्या प्रणम्य अनेनगुरूपसदनप्रकारउक्तः आसादितंशुद्धंभाव

कदाचिदेकान्त उपस्थितंप्रभुं रामं रमालालितपादपङ्कजम् ॥
सौमित्रिरासादितशुद्धभावनः प्रणम्यभक्त्याविनयान्वितोऽब्र-
वीत् ॥ ३ ॥

नं भावनाकरणमन्तः करणंयेनसः शुद्धान्तःकरणइतियावत् भगवदुक्तसत्कथाश्रवणेन शुद्धान्तःकरणइत्यर्थः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हे महामते महतीसर्वविषयामतिर्यस्य तस्य संबोधनं त्वं शुद्धबोधोऽसि अनवच्छिन्नचैतन्यरूपोऽसि सर्वदेहिनामात्माऽसि जीवानांतत् प्रतिबिम्बत्वात् अधीशोऽसि अन्तर्यामित्वान्नियन्ताऽसि वास्तवभेदाभावाच्च सर्वात्मत्वम् औपाधिकभेदाच्च नियन्तृनियम्यभावोबोध्यः निराकृतिः अस्मदादिवत्स्वार्जितकर्माधीनशरीराकृतिरहितः नन्वेवंसर्वैः कथमेवंनज्ञायतेऽतआह ज्ञानदृशां स्वयमेवप्रतीयसे ज्ञायतेऽ

त्वं शुद्धबोधोऽसि हि सर्वदेहिनामात्माऽस्यधीशोऽसि निराकृतिःस्वयम् ॥ प्रतीयसे ज्ञानदृशां महामते पादाब्जभृङ्गाहितसङ्गसाङ्गिनाम् ॥ ४ ॥

नेनेतिज्ञानं वेदान्तवाक्यजातं तदेवदृक्दर्शनसाधनंयेषां तेषामितिसंबन्धसामान्येषष्ठी तैरित्यर्थः तादृशदृक्लाभश्च त्वद्भक्त्यधीनइत्याह पादेति त्वच्चरणकमलयोर्भृङ्गवदाहितःकृतः सङ्गोयेन तादृशान्तः करणसङ्गवतां त्वच्चरणकमल सल्लग्नान्तः करणवतामित्यर्थः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ प्रार्थयते अहमिति भवस्य संसारस्यापवर्गो निवृत्तिर्यस्मात्तादृशं तव पादाम्बुजं प्रपन्नोऽस्मि शरणं प्राप्तोऽस्मि योगिभावितं योगीभिः संसारमुक्तये भावितम् अनेनतस्य भवापवर्गत्वे सदाचारः प्रमाणमुक्तम् प्रार्थनीयमाह अपारवारिधिरूपं यदज्ञानं संसारमूलकारणं यथासुखम

अहं प्रपन्नोऽस्मि पदाम्बुजं प्रभो भवापवर्गं तव योगिभावितम् ॥ यथाञ्जसाज्ञानमपारवारिधिं सुखं तरिष्यामि तथाऽनुशाधि माम् ॥ ८ ॥

क्लेशेन तरिष्यामि तथा मामनुशाधि शिक्षय अपारवारिधिमित्यनेन सपारप्रसिद्धसमुद्राद्व्यतिरेक उक्तः अशक्यतरणताऽनेनध्वनिता ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथोत्तरमवतारयति श्रुत्वेति रामः सौमित्रिवचः श्रुत्वा अथशब्दोवाक्यालङ्कारे तदा श्रवणाव्यवहितकाले एवप्रपन्नानां भक्तानामार्ति संसारदुःखंहरतितादृशः प्रपन्नाश्रमादिहीना भक्तानुग्रहपरा च धीर्यस्यसः क्षितिपालानां राज्ञां भूषणभूतोज्ञानरूपतमसउपशान्तये त

श्रुत्वाथ सौमित्रिवचोऽखिलं तदाप्राह प्रपन्नार्तिहरःप्रसन्नधीः ॥
विज्ञानमज्ञानतमोपशान्तये श्रुतिप्रपन्नं क्षितिपालभूषणः॥ ६॥

दर्थम् सन्धिरार्षः श्रुतिभिः तमेवविदित्वाऽतिमृत्युमेतीत्यादिश्रुतिभिः प्रपन्नं तत्फलकत्वेन बोधितं विज्ञानमात्मतत्वज्ञानामिति सामान्य तः प्रथमंप्राह ॥ ६ ॥

CC-0. In Public Domain. Digitization by eGangotri

अथताद्दशज्ञानप्राप्त्यें क्रमेणवहिरङ्गान्तरङ्गसाधनान्याह आदाविति स्ववर्णाश्रमेषु शास्त्रेण वर्णिता याः क्रियानित्यनैमित्तकयज्ञदाना दिरूपास्ताः कृत्वा समासादितशुद्धमानसः प्राप्तान्तःकरणशुद्धिः तत्पूर्वमुपात्तसाधनः तदनुष्ठानपूर्वकमेवउपात्तानिसाधनानि शम दमादीनियेन ताद्दशः अनेनकर्मणां वहिरङ्गत्वं शमादीनामन्तरङ्गत्वं स्फुटमेवोक्तम् किंच शमदमवैराग्यदार्ढ्यपर्यन्तं कर्मानुष्ठानमेवेति

आदौ स्ववर्णाश्रमवर्णिताः क्रियाः कृत्वा समासादितशुद्धमानसः
समाप्य तत्पूर्वमुपात्तसाधनः समाश्रयेत्सद्गुरुमात्मलब्धये॥ ७॥

सूचितम् ततस्तत्कर्मानुष्ठानं समाप्य त्यक्त्वा संन्यस्येतियावत् आत्मलब्धये आत्मज्ञानाय तत्फलकाय तत्वमस्यादिवाक्यार्थविचारा-
य सद्गुरुं श्रोत्रियंब्रह्मनिष्ठमित्यादि लक्षणलक्षितं समाश्रयेत् सेवेत अनेनव्युत्पत्तिवलेन स्वयमेववाक्यार्थविचारः क्रियमाणो न फला-
येति सूचितम् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसारस्यभ्रमिमच्चक्ररूपत्वात्तन्निवृत्तेश्चतत्कारणाज्ञाननिवृत्तिमूलकत्वदज्ञाननिवृत्तेश्चतत्त्वज्ञानकसाध्यत्वात्तत्त्वज्ञानस्यचवेदान्त विचारसा-ध्यत्वात्तदर्थंगुरुसमाश्रयणमित्याह क्रियेति भवःसंसारश्चक्रवद्विपरिवर्तमानईर्यते कथ्यते तदेवोपपादयाति आदृताआदरपूर्वपूर्वजन्मार्जिताक्रियाएनस्यशरीरोद्भवस्यजन्मनोहेतुः तत्रजन्मनिसुरागिणोविषयाभिलाषवतः तौ शास्त्रप्रसिद्धौ धर्मेतरौ धर्माधर्मौ प्रियाप्रियौसुखदुः

क्रियाशरीरोद्भवहेतुरादृताप्रियाप्रियौतौभवतःसुरागिणः ॥
धर्मेतरौतत्रपुनः शरीरकंपुनः क्रियाचक्रवदीर्यतेभवः ॥ ८ ॥

खजनकौभवतःकस्यचिदधर्मएवसुखत्वबुद्ध्याप्रवृत्तिः कस्यचिद्धर्मएवंकदाचिदित्यप्यूह्यम् एवंतत्रोत्पादितकर्मणापुनःशरीरंपुनःक्रिया-इत्येवंचक्रवद्विपरिवृत्तिः । यथाचक्रेभ्राम्यमाणेऽधोभागः कदाचिदुपरिउपरितनश्चाधः पुनरुपरिपुनरधएवंजन्मक्रिययोर्जन्यजनकभावेनपरिवृत्तिरिति बोध्यम् ॥ ८ ॥

Nepal Sanskrit University, Balmeekī Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यचाज्ञानमेवमूलमित्याह अज्ञानमेवेति   अत्रविधौसंसारानिवृत्तिलक्षणेकर्तव्येऽर्थेतद्ज्ञानमेवमूलकारणत्वादज्ञानहानमेवाविधीयते साधनत्वेनेतिशेषः ननुकर्मैवतन्नाशकमस्तुकिंज्ञानेनेत्याशङ्क्याह विद्यैवज्ञानमेवतन्नाशविधौमूलाज्ञाननाशनेपटीयसीसमर्थानकर्मसमर्थमितिशेषः

अज्ञानमेवास्यहिमूलकारणंतद्धानमेवात्रविधौविधीयते ॥ विद्यैवतन्नाशविधौपटीयसीनकर्मतज्जंसविरोधमीरितम् ॥ ९ ॥

यतस्तत्तज्जमज्ञानजम् आत्मस्वरूपाज्ञानजन्यदेहाद्यभिमानजन्यत्वात्कर्मणोज्ञानजन्यत्वंबोध्यम् ननुतज्जन्यस्यापितन्नाशकत्वंवृश्चिककर्कव्यादौदृष्टमित्याशङ्क्यतज्जन्यत्वंवाननाशकत्वप्रयोजकंकिन्तुसविरोधत्वमेवेत्याह यत्सविरोधंतदीरितंनाशकमुक्तमित्यर्थः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतएवकर्मणानाज्ञानहानिरित्याह नाज्ञानेत्यादि यतःकर्मणाविरोधाभावान्नाज्ञाननाशनापिरागनाशोवस्तुतः कर्मानुष्ठानात्पुनः सदो
षंक्षयिफलत्वादिदोषविशिष्टंकर्मैवोद्भवेत्कर्मणश्चपुनःसंसारएवेतिनमुक्तिमत्याशा ततस्तस्माद्बुधोविवेकीज्ञानविचारवान् ज्ञायतेऽनेने·

नाज्ञानहानिर्नचरागसङ्क्षयोभवेत्ततः कर्मसदोषमुद्भवेत् ॥ ततः
पुनः संसृतिरप्यवारितातस्माद्बुधोज्ञानविचारवान्भवेत् ॥ १० ॥

तिज्ञानंवेदान्तवाक्यंतद्विचारवान्भवेत ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानींज्ञानस्यैवमोक्षहेतुत्वंवक्तुंज्ञानकर्मसमुच्चयवादंदूषणायानुवदतिसार्धेन नन्विति नन्वितिशङ्कायाम् यथाविद्यावेदमुखेनश्रुतिपुराण-
लक्षणेन ब्रह्मविदाप्नोतिपरम् इत्यादिनापुरुषार्थसाधनमुक्ता तथा उभाभ्यामेवपक्षाभ्यांयथाखेपक्षिणांगातिः तथैवज्ञानकर्मभ्यांप्राप्यते
ब्रह्मशाश्वतम् इत्यादिनाक्रियाऽपितत्साधनत्वेनोक्ता किंच क्रियाकर्तव्यत। तृतीयार्थेप्रथमा कर्तव्यतयाआवश्यकेकृत्यअवश्यकर्तव्यत-

ननुक्रियावेदमुखेनचोदितायथैवविद्यापुरुषार्थसाधनम् ॥ कर्तव्यताप्राणभृतःप्रचोदिताविद्यासहायत्वमुपैतिसापुनः ॥ ११ ॥

याप्रचोदितानित्यनैमित्तिकरूपा एवंचनदकरणेप्रत्यवायोत्पत्त्याज्ञानोत्पत्तिरेवनस्यात् तस्मात्सापुनर्विद्यायाःसहायत्वंप्राप्नोतिघटेजन-
नीयेयथादण्डचक्रादीनांपरस्परसहायता ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eCangotri

कर्तव्येतीतस्वोक्तमेवेविवृणोति कर्मेति वीरहावाएषदेवानांयोऽग्निमुद्वासयतेयावज्जीवमग्निहोत्रंजुहोति इतिश्रुतिः तत्रासिद्धान्तीशङ्कते नन्विति ध्रुवंस्थिरंकार्यमिदंपुरुषार्थमोक्षजनिकाविद्यायतः स्वतन्त्राविनाऽपिसहायेन स्वकार्यसंपादनेसमर्था यथातेजस्तिमिरनिवर्तन-

कर्माकृतौदोषमपिश्रुतिर्जगौतस्मात्सदाकार्यमिदंमुमुक्षुणा॥ननु स्वतन्त्राध्रुवकार्यकारिणीविद्यानकिञ्चिन्मनसाऽप्यपेक्षते ॥ १२

समर्थंमनसाऽपिकिञ्चित्सहायभूतंवस्तुनापेक्षते तथाफलेजननीयेसहायान्तरसंभावनाऽपिनेतिभावः अनेनविद्याफलजननेनिरपेक्षास्वतन्त्र-त्वात्तेजोवदित्यनुमानंसूचितम् ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समुच्चयवादीपरिहराति नेति त्वदुक्तंनेत्यर्थः सत्यकार्यः अक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवति इत्यादिवेदनबोधितःस्थिरकार्योऽपि-
अध्वरः यथाऽन्यानपिकारकादिकान् आरादुपकारकप्रयाजाद्यङ्गानिदेशकालादीनिचप्रकाङ्क्षते तथाविद्यापिअग्निहोत्रंजुहोतिइत्यादिवि

नसत्यकार्योऽपिहियद्वदध्वरः प्रकाङ्क्षतेऽन्यानपिकारकादिकान्
तथैवविद्याविधितःप्रकाशितैर्विशिष्यते कर्मभिरेवमुक्तये ॥ १३ ॥

धिवाक्यतःतत्समूहेनप्रकाशितैः कर्मभिः सहितैवमुक्तयेविशिष्यतइत्यर्थः विदद्याफलदानेकर्मापेक्षा अङ्गित्वात् प्रयाजाद्यङ्गापेक्षदर्शा
दिवादितिसत्प्रतिपक्षानुमानमनेनसूचितम् ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदनूद्यसिद्धान्तीदूषयति केचिदिति यत्केचिद्वितर्कवादिनउतिज्ञानकर्मणोसमुच्चित्यमुक्तिसाधनंवदन्तितदप्यसत् यथाकेवलंकर्म मोक्ष साधनमित्यमत्तथातन्मीलितमित्यप्यसत् तत्रेहेतुर्दृष्टविरोधकारणात् दृष्टोयोविरोधः सवलोकदृष्टविरोधरूपात्कारणात्तदसदित्यर्थः विरो

केचिद्वदन्तीतिवितर्कवादिनस्तदप्यसदृष्टविरोधकारणात् ॥
देहाभिमानादभिवर्धतेक्रियाविद्यागताहङ्कृतितःप्रसिद्धयति १४

धमेवाह देहाभिमानात्क्रियात्वर्धतेअनात्मनिदेहादावात्मत्वाभिमानात्क्रियावृद्धिः विद्यातुगताहङ्कृतितः गताहङ्कृतिर्यस्यतस्यनष्टाहङ्कृतेः प्रसिद्ध्यति सार्वविभक्तिकस्तासिः एवंचाहङ्कारसत्तामूलकत्वात्क्रियाज्ञानयोः समुच्चयोविरुद्धइत्यर्थः ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, ...

CC-0. In Public Domain. Digitization by eGangotri

अथपूर्वपक्ष्युक्तानुमानंदूषयनविद्यास्वरूपमाह विशुद्धंविज्ञानंयेभ्यस्तेषांवेदान्तवाक्यानांयद्विशेषेणरोचनंरलयोरभेदादालोचनंविचार
स्तेनाञ्चिताप्रापितायाचरमाआत्मवृत्तिर्ब्रह्माकारांतःकरणवृत्तिः साविद्येतिभण्यतेविद्वद्भिरितिशेषः पुनःसमुच्चयनिराकरणायविद्याकर्मणो
वैषम्यमाह कर्मयज्ञादिअखिलकारकादिभिःकर्तव्यकर्मादिभिरङ्गैश्चसहितंसदुदेति फलोन्मुखंभवति विद्यापुनरखिलकारकादीन्निहन्ति

विशुद्धविज्ञानविरोचनाञ्चिताविद्याऽऽत्मवृत्तिश्चरमेतिभण्यते ॥
उदेतिकर्माखिलकारकादिभिर्निहन्ति विद्याऽखिल कारकादि-
कम् ॥ १५ ॥

तत्रकर्तृत्वादिबुद्धिंनिहन्ति सकलव्यापारपरित्यागेनब्रह्मणिसमाप्तिर्हिविद्या अतःस्वोत्पत्तौचित्तशुद्धिद्वाराकर्मसापेक्षास्वफलेजनयितव्ये ॥ ८ ॥
तन्निरपेक्षैवान्यथाविद्यास्वरूपस्यैवभङ्गापत्तेरितिपूर्वपक्ष्युक्तहेतोरासिद्धिरितिभावः ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपसंहरन्मुमुक्षोर्वृत्तिप्रकारमाह तस्मादिति विद्याविरोधाद्विद्यायाःकर्मणासह विरोधेनसमुच्चयोनभवेत्तस्मात्सुधीर्मुमुक्षुरशेषतःकर्मत्यजे-
त् काम्यंतुसर्वथात्याज्यमेवनित्यनैमित्तिकमपियावाच्चित्तशुद्धिकर्तव्यमेव ततोऽपिब्रह्माणिचित्तस्थैर्यपर्यन्तं कर्तव्यमेव ततस्तदनुसन्धानप्र-

तस्मात्त्यजेत्कार्यमशेषतः सुधीर्विद्याविरोधान्नसमुच्चयोभवेत् ।
आत्मानुसन्धानपरायणःसदा निवृत्तसर्वेन्द्रियवृत्तिगोचरः १६

तिबन्धकत्वात्प्रयोजनाभावाच्चतदपित्याज्यमेवेतिभावः इदानींमुमुक्षुकर्तव्यमाह निवृत्ताःसर्वेषामिन्द्रियाणां गोचराविषयाःशब्दादयोय
स्मात्तादृशःसन् आत्मनःसच्चिदानन्दस्यानुसन्धानमेवपरमयनंप्राप्यंयस्यतथाविधोभवेत् अत्रेन्द्रियप्रत्याहारःकर्तव्यत्वेनोक्तस्तेनतत्पूर्वंप्रा-
णायामाद्यर्थादाक्षिप्तम् ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 रागिविरागिभेदेनकर्मणोकर्तव्यताकर्त्तव्यतेआहयावदिति माययाविद्ययाशरीरादिष्ववानात्मसुआत्मधीरहङ्कृतेत्यादिरूपायावद्वर्ततेतावद्वि
धिवादकर्मणाम् विधिर्यजेतेत्यादिश्रुतिर्वादः कर्तव्यताबोधकोयेषांकर्मणांविधेयोवशवर्त्तितत्कर्मकर्ताभवेत् तदपगमेतुतदाखिलं जगन्नेतीति

यावच्छरीरादिषुमाययात्मधीस्तावद्विधेयोविधिवादकर्मणाम् ॥
नेतीतिवाक्यैरखिलं निषिद्ध्य तज्ज्ञात्वापरात्मानमथत्यजेत्क्रि
याः ॥ १७ ॥

वाक्यैः अथातआदेशोनेतिनेतिइत्यादिवाक्यैर्निषिध्य मिथ्यात्वेननिर्णीयताद्विलक्षणतयासत्यत्वेनपरमात्मस्वरूपंज्ञात्वाक्रियास्त्यजेत्निरू
पितमेतत् ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मविज्ञानेसत्यवश्यमविद्या निवर्ततइत्याह यदेति आत्मनिशुद्धेन्तःकरणेपरमात्मनईशस्यात्मनोजीवस्यचयोविभेदोमायान्तःकरण रूपोपाधिद्वयकृतोविभेदोभेदस्तस्यभेदकं नाशकंभास्वरंप्रकाशशीलंयद्विज्ञानमितरवृत्त्युपमर्दनपूर्वकंब्रह्माकाराऽखण्डाद्वृत्तिर्यदाऽवभाति

यदापरात्मात्मविभेदभेदकंविज्ञानमात्मन्यवभाति भास्वरम् ॥
तदैवमायाप्रविलीयतेऽञ्जसासकारकाकारणमात्मसंसृतेः॥ १८॥

असंभावनादितिरस्कारेणोदेति तदैव सकारकाजन्मान्तरप्रापककर्मसहितामायातत्तज्जीवोपाधिभूताविद्याऽञ्जसाझदितिप्रविलीयतेनश्यति ननुतन्नाशेऽपिसंसारनाशःकथमतोमायाविशेषणम् आत्मसंसृतेःकारणंसंसारस्योपादानकारणमेवंचतन्नाशेकार्यनाशोभवत्येवेतिभावः १८

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं पुनर्दार्ढ्यायाह श्रुतीति तत्त्वमसीत्यादिश्रुतिरूपैःप्रमाणैस्तज्जनितज्ञानेन नाशितासाविद्याकथमपिकार्यकारिणीभविष्यतीति काकुरत्र सर्वथानेत्यर्थः असतःकार्यकारित्वासंभवादितिभावः पुनश्चतस्यानोद्भवइत्याह विज्ञानमात्रादिति अमलाशुद्धाद्द्वितीयतःद्विती

श्रुतिप्रमाणाभिर्विनाशिताचसाकथंभविष्यत्यपिकार्यकारिणी ॥
विज्ञानमात्रादमलाद्द्वितीयतस्तस्मादविद्यानपुनर्भविष्यति १९

यात्मविषयकाद्विज्ञानमात्रादितरासहकृतान्निदिध्यासनपरिपाकजज्ञानाद्यतोनष्टातस्मात्सापुनर्नभविष्यति रज्ज्वज्ञानमूलकस्य सर्पस्य रज्जुज्ञानेन निवृत्तस्ययथानपुनरुत्पत्तिरितिभावः ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्यायाइतरनिरपेक्षायाएवमोक्षकारणत्वमुक्तंयुक्तिपूर्वकंपुनःकथयतिश्रोतृदार्ढ्याय। यदीति। यदिनष्टातत्वज्ञाननाशिता सा न पुनः प्रसूयतेनोत्पद्यतेतदाकारणाभावादहंमतिःकथंभवेत्। कथमपिनभवेदित्यर्थः। तदभावाच्चतत्कालेकर्माभावइतिस्वफलजननेसास्वतन्त्राइ

यदिस्मनष्टा नपुनःप्रसूयते कर्ताऽहमस्येति मतिः कथं भवेत्॥
तस्मात्स्वतन्त्रा न किमप्यपेक्षते विद्या विमोक्षाय विभाति केवला॥ २०॥

तरानिरपेक्षैवनाकिमप्यपेक्षते द्वितीयस्यासंभवात् अतः केवलाऽसहायैवविमोक्षायविभातितत्फलिकाभवतीत्यर्थः॥ २०॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वकरणेप्रत्यवायभिया कर्मकार्यमितिचेन्नेत्याह सप्रत्यवायइति कर्मत्यागेनाहंनिश्चयेनाहंप्रत्यवायसंहितोभविष्यामीत्येवंशुद्धात्मानि-
अनात्मधर्मस्यधीरप्रज्ञस्यतत्त्वज्ञानविकलस्यप्रसिद्धा नतुतत्त्वदर्शिनः तस्याहंबुद्धेरभावात् पीपादेरनात्मधर्मतानिश्चयाच्च तस्माद्बुधैःकर्म

स प्रत्यवायोह्यहमित्यनात्मधीरज्ञप्रसिद्धा नतु तत्वदर्शिनः ॥
तस्माद्बुधैस्त्याज्यमपि क्रियात्माभिर्विधानतःकर्मविधि प्रका
शितम् ॥ २३ ॥

क्रियात्यभिः षष्ठ्यर्थेतृतीया क्रियाफलसक्तचित्तानां विधानतोविधानेनेतिकर्तव्यतयायुक्तंकर्म विधिभिरवश्यकर्तव्यतयाबोधितमपि-
त्याज्यमित्यर्थः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविरक्तस्यकार्यमाह। श्रद्धेति । गुरुशास्त्रयोर्विश्वासःश्रद्धातदन्वितोबुभुत्सुःशुद्धमानसोऽपि निष्कामकर्मानुष्ठानाच्छुद्धमानसश्चगुरोः प्रसादाल्लब्धतत्त्वमसीतिवाक्यतः श्रुतमात्मजीवयोरैकात्म्यंविज्ञाय मनननिदिध्यासनपरिपाकाभ्यांसाक्षात्कृत्य। चएवार्थः । साक्षा

श्रद्धान्वितस्तत्त्वमसीतिवाक्यतो गुरोःप्रसादादपिशुद्धमानसः॥
विज्ञायचैकात्म्यमथात्मजीवयोः सुखी भवेन्मेरुरिवाप्रकम्पनः
॥ २४ ॥

त्कृत्यैवसुखी भवेत्। सकलदुःखहीनोभवेदित्यर्थः। अप्रकम्पनःविषयाभिलाषाक्षोभितान्तःकरणः ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महावाक्यं विवरीतुं वाक्यार्थस्य पदार्थबोधपूर्वकत्वमाह । आदाविति । विधानतः भ्रमप्रमादराहित्येन वाक्यार्थविज्ञानस्य विधावुत्पत्तौ आदौ प्रथमं मुख्यमिति यावत् । पदार्थावगतिः कारणम् । हि प्रसिद्धं तस्य पदत्रयं तत्त्वमसीति । तत्र तत्पदार्थः परमात्मा सर्वज्ञत्वादिगुणः त्वं

आदौ पदार्थावगतिर्हि कारणं वाक्यार्थविज्ञानविधौ विधानतः ॥
तत्त्वंपदार्थौ परमात्मजीवकावसीति चैकात्म्यमथानयोर्भवेत्
॥ २५ ॥

पदार्थो जीवः अनयोस्तत्त्वंपदार्थयोरैकात्म्यं तद्बोधकमसीतिपदम् ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननु सर्वज्ञत्वादिगुणस्येशस्याकिञ्चिज्ज्ञत्वधर्मवता जीवेनैकात्म्यं विरुद्धमित्याशङ्क्याह । प्रत्यगिति । अहंबुद्धिविषयत्वं प्रत्यक्त्वं जीवधर्मः परोक्षत्वमीशधर्मस्तदादिधर्मकृतमात्मनोः परमात्मजीवात्मनोर्विरोधं विहाय त्यक्त्वा तयोः संशोधिताम् युक्तिभिः सम्यग्विचारितां तत्त्वंपदाभ्यां शक्त्यभावेऽपि वक्ष्यमाणप्रकारया लक्षणया लक्षितां ज्ञातां चिदात्मतां संगृह्य तत्त्वंपदोपास्थितिविषयां कृत्वा स्वमात्मानं तथा ज्ञात्वाऽथ एकात्मज्ञानानन्तरमद्वयो भवेत् । चित्स्वरूपतां प्राप्त इव भवेत् । पूर्वमपि तत्स्वरूप एव विस्मृतकण्ठचामीकरन्यायेन च तत्प्राप्तिः तद्वदित्युक्तम् ।

प्रत्यक्परोक्षादिविरोधमात्मनोर्विहाय संगृह्य तयोश्चिदात्मताम् ॥
संशोधितां लक्षणया च लक्षितां ज्ञात्वा स्वमात्मानमथाद्वयो भवेत्
॥ २६ ॥

अयं भावः तत्त्वंपदयोर्द्वावर्थौ वाच्यो लक्ष्यश्च तत्र तत्पदस्य मायोपाधिः सर्वज्ञत्वादिविशिष्टो वाच्यः त्वंपदस्यापि किञ्चिज्ज्ञत्वादिविशिष्टो मायाकार्याविद्योपाधिरविद्यावदन्तःकरणोपाधिर्वाच्यः उभयोरपि विशेषणांशत्यागेन शुद्धश्चिदात्मा लक्ष्यः तत्र वाच्ययोर्विरुद्धधर्मकत्वादैक्यासंभवेऽपि लक्ष्ययोरैक्यं निर्बाधमेवेति ॥ २६ ॥

...Sanskrit University. Balmeeki Campus...

CC-0. In Public Domain. Digitization by eGangotri

उक्तलक्षणास्वरूपमाह । एकात्मकत्वादिति जहतीलक्षणाजहत्स्वार्थलक्षणायथागङ्गायांघोषइत्यत्रगङ्गापदार्थस्यप्रवाहस्यघोषाधारता नुपपत्त्यासर्वथातत्परित्यागेनतीररूपार्थलक्षणा साप्रकृते न एकात्मत्वात् । विशेष्यांशस्यैकत्वात्सर्वथास्वार्थत्यागाभावात् । तथाज हल्लक्षणताजहत्स्वार्थलक्षणावत्त्वमपिअत्रनसंभवति । यथाकाकेभ्योदधिरक्ष्यतामित्यादौकाकशब्दस्यस्वार्थात्यागेनैवदध्युपघातकेलक्षणा सापिन । विरोधतःविशेषणत्यागेनसर्वथास्वार्थत्यागाभावात् । अतोभागलक्षणाजहदजहल्लक्षणायुज्यते । अदोषतःपूर्वोक्तदोषाभावात्

एकात्मकत्वाज्जहती न सम्भवेत्तथाऽजहल्लक्षणता विरोधतः॥
सोऽयंपदार्थाविवभागलक्षणायुज्येततत्त्वंपदयोरदोषतः॥२७॥

विशेष्यांशस्यात्यागाद्विशेषणांशस्यत्यागाच्च । तत्रदृष्टान्तः । सोऽयंपदार्थाविव । यथासोऽयंदेवदत्तइत्यत्रतद्देशादिविशिष्टोऽतीतानुभव विषयोवातत्पदार्थः एतद्देशादिविशिष्टोऽनुभूयमानोवेदंशब्दार्थः । तयोश्चाविरुद्धविशेषणकत्वादैक्यासंभवेनदेशादिरूपविशेषणत्यागेना नुभवगतातीतत्वादिविशेषणत्यागेनवालक्षणयैक्यंतद्वदितिभावः ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथत्याज्यत्वायजीवोपाधिमाह । रसादी ति । रसापृथ्वीआदिर्येषांतानिपञ्चीकृतानियानिभूतानितेभ्यःसंभवोयस्यतत् । पञ्चीकरणंचे त्थम् एकैकंभूतंद्विधाविभज्यतत्रैकंभागंचतुर्धाविभज्यतेषांभागानांस्वेतरभूतचतुष्टयार्धभागचतुष्टयेसंयोजनेएकैकंभूतंपञ्चात्मकंभवतिभा

रसादिपञ्चीकृतभूतसंभवंभोगालयंदुःखसुखादिकर्मणाम् ॥ शरी
रमाद्यन्तवदादिकर्मजंमायामयंस्थूलमुपाधिमात्मनः ॥ २८ ॥

गाधिक्याच्चप्रातिस्विकतयाभूगादिव्यवहारोऽपि । सुखदुःखयोरादीनियानिकर्माणितेषांभेभास्तत्कर्मजसुखदुःखानुभवस्तस्यालयमाश्र यभूतमाद्यन्तवत् उत्पत्तिनाशयोगि आदिकर्मजंभागभवीयकर्मजन्यंमायामयंपरम्परयामायाविकारः तद्विकारभूतविकारत्वात् । एतच्छरी रमात्मनःस्थूलमुपाधिंवदन्तीतिशेषः ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसूक्ष्मोपाधिमाह। सूक्ष्ममिति । बुधाःअन्यतस्थूलशरीरविलक्षणंशरीरंलिङ्गदेहाख्यमात्मनउपाधिंविदुः । तत्स्वरूपमाह। सूक्ष्मंचक्षु-
राद्यविषयः मनोबुद्धिदशेन्द्रियैःप्राणैश्चयुतम् सङ्कल्पात्मकंमनः निश्चयात्मिकाबुद्धिः घ्राणरसनाचक्षुस्त्वक्श्रोत्रेतिपञ्चज्ञानेन्द्रियाणि वा-

सूक्ष्मंमनोबुद्धिदशेन्द्रियैर्युतंप्राणैरपञ्चीकृतभूतसंभवम् ॥ भोक्तुः
सुखादेरनुसाधनंभवेच्छरीरमन्याद्विदुरात्मनोबुधाः ॥ २९ ॥

क्पाणिपादपायूपस्थानिकर्मेन्द्रियाणि प्राणापानव्यानोदानसमानाश्चप्राणास्तैर्युतमेतत्सप्तदशसमुदायात्मकम्। तदाधारभूतान्याह ।अप
ञ्चीकृतभूतसंभवंतेभ्यउत्पन्नमतएवादृश्यम्।तथाभोक्तुःसुखादेःसुखदुःखाद्यनुभवस्यानुसाधनम् स्थूलशरीरस्यैतदनुगतस्यैवभोगसाधनत्व
मितिभावः । एतद्वियोगेनैवमरणव्यवहारइतिबोध्यम् ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतजीवोपाधिद्वयमुक्त्वाईशोपाधिमाह । अनादीति । अनादि उत्पत्तिहीनम् । नानाविधपरिणामशालितयापरिणामरूपेणनश्वरामिति अनादित्वमात्रेणक्त्यासूचितम् । अनिर्वाच्यम् सत्त्वासत्त्वाभ्यांनिर्वक्तुमशक्यम् कारणंसकलप्रपञ्चस्यजनकम् ईदृशीमायातुब्रह्मणःपरमी-

अनाद्यनिर्वाच्यमपीहकारणं मायाप्रधानंतुपरंशरीरकम् ॥ उ-
पाधिभेदात्तुयतःपृथक्स्थितं स्वात्मानमात्मन्यवधारयेत्क्र-
मात् ॥ ३० ॥

श्वरव्यवहारसंपादकत्वादुत्कृष्टंप्रधानंशरीरकम् । स्वार्थेकः । एवमुपाधिभेदादेकमेवचैतन्यंयतः पृथक्स्थितंजीवईशइतिभेदबुद्धिविषय मतोलक्षणयोपाधिपरित्यागेनस्वात्मानमात्मनिअवधारयेदभेदेनजानीयात् । क्रमाच्छ्रवणमनननिदिध्यासनक्रमेणेत्यर्थः ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

अथवाक्यार्थविचारफलमाह । कोशेष्विति । आनन्दमयस्य ब्रह्मत्वेअन्नमयप्राणमयमनोमयविज्ञानमयेषुचतुर्षुकोशेषुतत्तत्सङ्गात्तत्तदाकृतिर्विभाति यथाजपादिसङ्गात्स्फटिकोऽनेकाकृतिर्भाति । आनन्दमयस्यापि जीवत्ववादिनातुतेनसहपञ्चसु कोशेष्वितिबोध्यम् । अस्मि-

कोशेषुपञ्चस्वपितत्तदाकृतिर्विभातिसङ्गात्स्फटिकोपलोयथा ॥ असङ्गरूपोऽयमजोयतोऽद्वयोविज्ञायतेऽस्मिन्परितोविचारिते ॥ ३१ ॥

न्महावाक्येपरितोविचारितेसम्यग्विचारितेसत्ययमात्माऽसङ्गरूपःअन्नमयादिभिःसङ्गरहितः । असङ्गोनहिसज्जते । इतिश्रुतेः । अजोऽद्वयश्चविज्ञायते । स्थूलोऽहमित्यादिस्त्वज्ञस्यतत्तत्कोशप्रसङ्गात्प्रतीतिःस्फटिकवत् तत्त्वज्ञस्यतुनतथाप्रतीतिरितिभावः । एवंचतत्तदुपाधिकृततत्तद्रूपताप्रतीतिनिरासएव विचारफलमितिभावः ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जाग्रदाद्यवस्थाऽपि बुद्धेर्धर्मोनात्मधर्मइत्याह । बुद्धेरिति । इहआत्मनिस्वप्नादिभेदेन जाग्रत्स्वप्नसुषुप्तिभेदेन यात्रिधावृत्तिर्दृश्यतेसाऽपि गुणत्रयात्मनः सत्त्वरजस्तमोरूपगुणत्रयस्वरूपाया बुद्धेर्धर्मः । उक्तावस्थात्रयस्योक्तमूलकत्वात् । एतदवस्थात्रयस्यास्मिन्नवस्थात्रय- साक्षिणि आत्मनि भानं मृषा बुद्ध्यध्यास निवन्धनं न तु वास्तव मित्यर्थः । अन्योऽन्यतोव्यभिचारतस्तस्यावस्था त्रयस्यस्व रूपतो

बुद्धेस्त्रिधा वृत्तिरपीह दृश्यते स्वप्नादि भेदेन गुणत्रयात्मनः ॥ अन्योऽन्यतोऽस्मिन्व्यभिचारतोमृषा नित्ये परे ब्रह्मणि केवले शिवे ॥ ३२ ॥

मृषात्वात्तज्ज्ञानस्य मृषात्वमेव । स्वप्नकाले जाग्रत्सुषुप्त्योरभावात् । जाग्रतिइतरद्वयस्याभावात् सुषुप्तावितरयोरभावात्परस्परं व्यभिचारोवोध्यः आत्मनस्तदनाश्रयत्वं विशेषणैराह । नित्येउत्पत्तिनाशशून्येपरेगुणत्रयातीते ब्रह्मणिव्यापकेकेवलेऽसङ्गेशिवआनन्दरूपे एवंभूतेसदेकरसेपरस्परव्यभिचारधर्माभानमसंभवीति भावः ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसाज्यत्वायसंसारमूलभूतांवृत्तिमाह । देहेति । एषांसङ्घातइतरेतराध्यासविषयात् अजस्त्रंयावद्धियो बुद्धेर्वृत्तिस्तमोमूलतयाऽज्ञ लक्षणाऽज्ञत्वज्ञापिका यावत्परिवर्तते तावद्भवोद्भवःसंसारोद्भवोभवेत् । तमःपदंरजसोऽप्युपलक्षणम् । रजस्तमःप्रधानाबुद्धिः संसारहेतु

देहेन्द्रियप्राण मनश्चिदात्मनां सङ्घादजस्त्रं परिवर्तते धियः ॥
वृत्तिस्तमोमूलतयाऽज्ञलक्षणा यावद्भवेत्तावदसौ भवोद्भवः॥३३॥

त्वात्सर्वथासाज्येति भावः ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्त महावाक्यविचारस्य कर्तव्यमाह । नेतीति । अथात आदेशोनेतिनेति इति प्रमाणेननिराकृतं मिथ्यात्वेनगृहीतमखिलंजगत्येनसः ततोहृदासम्यक्प्रधानेनमनसासम्यगास्वादितं चिल्लक्षणंघनामृतंदुःखासंभिन्नंसुखंयेनसः । स्वर्गादितुपरिणामदुःखत्वात्तत्संभिन्नमेव । एवंभूतोऽशेषंजगद्देहेन्द्रियादिदृश्यमसूहंत्यजेत् ज्ञानोपादानबुद्धिविषयंनकुर्यात् । किन्तूदासीनस्तत्रभवेत् । ननुदेहेन्द्रियादिभिरेवतज्ज्ञान

नेतिप्रमाणेन निराकृताखिलो हृदासमास्वादितचिद्घनामृतः ॥ त्यजेदशेषं जगदात्तसद्रसं पीत्वा यथाऽम्भः प्रजहाति तत्फलम् ॥ ३४ ॥

लाभात्कथमुपजीव्यस्यत्यागइत्याशङ्क्यदृष्टान्तदर्शनेनपरिहरति । यथातृषावानआत्तः सद्रसोमाधुर्यंयेनतादृशं नारिकेलनारङ्गादि फलान्तर्वर्त्यम्भःपीत्वा तत्स्थानभूतंतत्फलं जहाति तत्रोदासीनोभवति तद्वत्सर्वदृश्यसारांशोत्रब्रह्मतल्लाभसतिनिः सारंदृश्यंनोपादेयंनापिहेयमितिभावः । यतोभयादिसंभावनातद्धेयमित्युच्यते ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतरस्यानित्यत्वेनतत्रवैराग्यार्थमात्मनएवनित्यत्वमाह । कदाचिदिति । कदापीत्यर्थः । अनवः उत्पत्त्यनन्तरंविद्यमानोऽहिनवः । तेन जन्मानन्तरास्तित्वंव्यावर्तितं नवत्वाभावेनेवजीर्णत्वाभावादवस्थान्तरापत्तिरूप परिणामोऽपिनिरस्तः ।अनेनअस्तिजायतेवर्द्धतेविपरिणमतेऽपक्षीयते नश्यतीति षड्भाव विकार राहित्यमुक्तम् । एवंचैतद्भिन्नं सर्वमुक्तषड्भावविकारित्वादनित्यमिति ततोविरज्येतेतिबोधित-

कदाचि दात्मान मृतोनजायते नक्षीयते नापिविवर्धतेऽनवः ॥
निरस्तसर्वातिशयः सुखात्मकः स्वयम्प्रभः सर्वगतोऽयमद्वयः ३५

म् । यतऽईदृशोऽतएवनिरस्तः सर्वस्यदेहेन्द्रियादेरतिशयोमहत्त्वं येनस्वलाभात्सः यल्लाभान्नापरोलाभइतिःश्रुतेः यतःसुखात्मकः आनन्द स्वरूपः स्वयम्प्रभःस्वप्रकाशकश्च देहेन्द्रियादिस्तु दुःखस्वरूपः परप्रकाश्यश्च । यस्यभासासर्वमिदंविभाति । इतिश्रुतेः । सर्वगतोव्यापकः अयमहंबुद्धिविषयःप्रत्यगात्माऽपिअद्वयः उक्ताद्वयब्रह्मस्वरूपएव । नततोऽतिरिक्तइतिभावः । अयमात्माब्रह्म । इतिश्रुतेः ॥ ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुएवंविधेविकारशून्येआत्मनिजन्ममरणादिप्रवाहरूपसंसारभानंकथमितिशङ्कते। एवंविधेइति।दुःखमयःदुःखप्रचुरः।उत्तरयति। अज्ञानतइ तिअज्ञानमूलकोयोध्यासोदेहान्तः करणादौअहममेत्यध्यासस्तद्वशात्। एवंचभ्रान्तिरूपातत्प्रतीतिरितिभावः। नन्वेवंकथंतस्यसंसारस्यानि

एवंविधे ज्ञानमये सुखात्मके कथंभवो दुःखमयःप्रतीयते ॥
अज्ञानतोऽध्यासवशात्प्रकाशतेज्ञानेविलीयेत विरोधतःक्षणात्॥
॥ ३६ ॥

वृत्तिस्तत्राह। ज्ञानेति। आविर्भूतइतिशेषः। ज्ञानस्याज्ञानविरोधित्वात्तदुत्पत्तिक्षणएवकारणभूताज्ञाननाशात्तत्कार्यसंसारस्यापि वि लयइत्यर्थः। यथारज्जुज्ञाननरज्जौसर्पस्यलयइत्यर्थः ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

रा. गी. अथाध्यासलक्षणमाह । यदन्यदिति । यदन्यत्सर्पादिकमन्यत्ररज्ज्वादौ भ्रमात् भ्रमजनकाद्दोषाद्विभाव्यते विज्ञायते अमुं विपश्चितो विद्वांसोऽध्यासइत्याहुः । यथाऽसर्पभूते रज्ज्वादौ अहिविभावनं सर्पारोपो रज्ज्वबुद्धिमूलकस्तद्वदीश्वरेऽपि जगद्देहादिसंसारात्मकं सर्वं विभाव्य- स.

॥ १९ ॥ यदन्यदन्यत्र विभाव्यते भ्रमादध्यासमित्याहुरमुं विपश्चितः॥
असर्पभूतेऽहिविभावनं यथा रज्ज्वादिके तद्वदपीश्वरे जगत्॥३७॥

तेआत्मज्ञानाभावाद्यथार्थतयाज्ञायते ॥ ३७ ॥ ॥ १९ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनिब्रगज्ञानेकीदृशोऽध्यामोनिमित्तंतदाह विकल्पेति सर्वविकल्पकारणमायारहितेवस्तुतस्तत्सङ्गरहितेचिदात्मकेचित्स्वरूपेसर्वकारणेनिरामयेदुःखासंभिन्नानन्दमयेकेवलेसर्वविकारशून्येपरेदृश्याविलक्षणेब्रह्मणिव्यापकं आत्मनिप्रथममहङ्कारः कल्पितः सएवाध्यासः ।

विकल्पमायारहितेचिदात्मके ऽहङ्कारएष प्रथमः प्रकल्पितः ॥
अध्यासएवात्मनिसर्वकारणे निरामयेब्रह्मणि केवलेपरे ॥ ३८ ॥

अहंबुद्ध्यात्मकोऽध्यासएवसर्वसंसारकारणमितिभावः ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 बुद्धिनिष्ठएवसंसारोनत्वात्मनिष्ठइत्यत्रान्वयव्यातिरेकौप्रमाणयति । इच्छादीति । परेसर्वसाक्षिणि आत्मनिसंसृतिहेतवःभासमानसंसारकारणं
सदाकालत्रयेऽपिइच्छादिरागादिसुखादिधार्मिकाः इच्छांपेक्षेरागद्वेषौसुखदुःखंइत्येवमादिद्वन्द्वधर्मिकाःधियएवधीषुसतीषुसंसारइत्यन्वयमु

इच्छादिरागादिसुखादिधार्मिकाः सदा धियः संसृतिहेतवः परे ॥
यस्मात्प्रसुप्तौतदभावतःपरः सुखस्वरूपेणविभाव्यतेहिनः ॥ ३९ ॥

क्त्वातद्व्यतिरेकमाहयस्मात्कारणात्प्रसुप्तौतदभावात् धीवृत्त्यभावात परआत्मानोऽस्माभिःतृतीयार्थेषुषष्ठी । सुखरूपेणस्वस्वरूपमात्रेणाविभा
व्यतेनिश्चीयते नतु संसारित्वेनेतिभावः सुप्तोत्थितस्तुसुखमहमस्वाप्समितिप्रत्यभिज्ञानुभवात्तदात्मस्वरूपनिश्चयोऽस्तीतितात्पर्यम् ॥ ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ पुनस्तत्त्वं पदार्थस्वरूपमाह । अनादीति । अनादिर्याऽविद्यातत उद्भवो यस्या बुद्धेरन्तःकरणस्य तत्र बिम्बितः प्रतिबिम्बितश्चितः प्रकाशः स जीव इतीर्यते आत्मा परमात्माधियः साक्षितया धीधर्मासङ्गेनैव पृथक्स्थितः । अन्तर्यामितयेत्यर्थः जीवोऽहं सुखीत्यादिप्रकारेणान्तःकर

अनाद्यविद्योद्भवबुद्धिबिम्बितोजीवप्रकाशोऽयमितीर्यते चितः ॥ आत्माधियः साक्षितया पृथक् स्थितो बुद्ध्या परिच्छिन्नपरः सएव हि ॥ ४० ॥

णवर्गाध्यासवान् परमात्मा तु साक्षितया सर्वत्र विद्यमानोऽपि न तथेति भावः । अत एव बुद्ध्यापरिच्छिन्नपरः बुद्धिलक्षणपरिच्छेदरहितः अत एव परः । एवं च ज्ञानेन प्रतिबिम्बाधार विलये प्रतिबिम्बस्य विलयात् स जीवः स एव परमात्मैव हि प्रसिद्धं स इत्यस्य चावृत्तिर्बोध्या ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ बुद्ध्यात्मनोःपरस्पराध्यासवशात परस्परधमभानामितिदार्ढ्यायपुनराह । चिद्बिम्बेति । चिदात्मचेतसोरन्योन्याध्यासवशात् पर स.
रा. गी. स्परतादात्म्यारोपाज्जडाजडत्वंप्रतीयते । चेतसोवृत्तीनांज्ञानत्वं जीवात्मनोजडत्वंप्रतीयते । अतएवज्ञानाश्रयआत्मेति चितएवताकिं
कव्यवहारः । जीवात्मनिजडात्मनिजडात्माकथ्यते बुधैरितिस्मार्तव्यवहारश्च । अत्रहेतुः । चिदित्यादि । चिद्बिम्बस्यसाचिदाभासः अ
॥ २१ ॥

चिद्बिम्बसाक्ष्यात्मधियांप्रसङ्गतस्त्वेकत्रवासादनलाक्तलोहवत्॥
अन्योऽन्यमध्यासवशात्प्रतीयतेजडाजडत्वंचचिदात्मचेतसोः
॥ ४१ ॥

क्षैःसहितः साक्षःसेन्द्रियः सचासावात्मामनःधीरन्तःकरणंतेषांप्रकृष्टसङ्गादतिसान्निकर्षादध्यासइत्यर्थः । अनलाक्तलोहवत् अग्नितप्तलो
हपिण्डवत् अत्रदृष्टान्तः । अग्निधर्मोदाहकत्वं लोहधर्मश्चवर्तुलत्वाद्यनलेभासते । तत्रहेतुरेकत्रवासात् परस्पराविभागेनवृत्तेरित्यर्थः । तद्व ॥ २१ ॥
देतयोरपि परस्परधर्माध्यासइत्यर्थः ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं दार्ढ्यायपुनराह । गुरोरिति । वेदवाक्यतइत्यनेन श्रवणंगुरोःसकाशादपि । ततश्चानेनमननमुक्तम् । ताभ्यांसञ्जातोविद्यया ज्ञानरूपस्यात्मनोऽनुभवोयस्यसः । अनेनकृतनिदिध्यासनइत्यर्थः । तं चिदानन्दस्वरूपं स्वात्मानमुपाधिवर्जितं रहितोपाधिधर्ममात्मस्थं

गुरोःसकाशादपिवेदवाक्यतः सञ्जातविद्यानुभवोनिरीक्ष्य तम् । स्वात्मानमात्मस्थमुपाधिवर्जितं त्यजेदशेषं जडमात्मगोचरम् ॥ ४२ ॥

हृत्स्थंनिरीक्ष्य अपरोक्षीकृत्याशेषंजडं दृश्यंत्यजेत् । तत्रोदासीनोभवेदिति भावः ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञेयंनिरुपाधिकं स्वरूपंश्लोकद्वयेनाह प्रकाशेति अहंप्रकाशरूपः स्वप्रकाशः परप्रकाशहीनः परप्रकाशरूपोयथाघटादिः अजोजन्मादि
हीनः अद्वयःसजातीयद्वितीयरहितः असकृद्विभातः सकृदपिपरेणभासकान्तरेणप्रकाशितः सकृद्विभातः नसकृद्विभातोसकृद्विभातः नत

प्रकाशरूपोऽहमजोऽहमद्वयोऽसकृद्विभातोऽहमतीवनिर्मलः ॥
विशुद्धविज्ञानघनोनिरामयःसम्पूर्णआनन्दमयोऽहमक्रियः॥४३॥

त्रसूर्योभातिनचन्द्रतारकमितिश्रुतेः नतद्भासयतेसूर्यइतिस्मृतेश्च अतीवनिर्मलः मायाकृतावरणविक्षेपरहितः विशुद्धविज्ञानघनः विशुद्धचि
देकरसः निरामयःकर्तृत्वाभिमानरहितः सम्पूर्णःदेशकालपरिच्छेदहीनः आनन्दमयः आनन्दरूपः स्वार्थेमयट् अक्रियः परिणामहीनः
॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदैवेति अहंसदैवकालत्रयेऽपिमुक्तःसर्वधर्मरहितः अचिन्त्यशक्तिमान् यः परमात्मा अतीन्द्रियज्ञानमृइन्द्रियातिरिक्तज्ञानरूपःयतोवाचो निवर्त्तन्ते अप्राप्यमनसासहइतिश्रुतेः अविक्रियात्मकोऽपरिणामी अनन्तपारःअन्तःकालतःपारःपरन्तीरन्तावविद्यमानौ यस्य तेनदेश

सदैवमुक्तोऽहमचिन्त्यशक्तिमानतीन्द्रियज्ञानमविक्रियात्मकः॥
अनन्तपारोऽहमहर्निशंबुधैर्विभावितोऽहंहृदिवेदवादिभिः ॥४४॥

कालपरिच्छेदहीनः ईदृशोयःपरमात्माबुधैर्हृदि अहर्निशंविभावितः सोऽहमित्यर्थः ॥ ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंभावनायाःफलमाह एवमिति उक्तरीत्यासदाआत्मानं अखण्डितात्मनाविषयानाकृष्टचित्तेन विचारमाणस्यध्यायतः धातूनामनेकार्थत्वात् चरमाणएवचारमाणःस्वार्थेऽण् विशुद्धभावनाब्रह्माकारान्तःकरणवृत्तिरुदेतीतिशेषः साचोदिताकारकैर्देहान्तरप्रापककर्मभिः स

एवंसदात्मानमखण्डितात्मनाविचारमाणस्यविशुद्धभावना ॥
हन्यादविद्यामचिरेणकारकैरसायनंयद्वदुपासितंरुजः ॥ ४५ ॥

हाविद्यामाचिरेणशीघ्रमेवहन्यात् यथापामितंसेवितंरसायनं रुजोहन्यात्तद्वत् ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रध्यानेऽइतिकर्तव्यतामाह विविक्तइति निर्जनइत्यर्थः आसीनोयथोचितपद्मासनाद्युपविष्टः उपारतेन्द्रियः तेनशमदमादिसम्पन्नः विनि र्जितात्माप्राणायामादिभिर्जितान्तःकरणः अतएवविमलान्तराशयोविशुद्धचित्तः विज्ञानदृक्विज्ञानएवदृक्भानंयस्यसः द्रष्टृदृश्यभा

विविक्तआसीनउपारतेन्द्रियोविनिर्जितात्माविमलान्तराशयः॥
विभावयेदेकमनन्यसाधनोविज्ञानदृक्केवलआत्मसंस्थितः॥४६

नरहितः अनेननिर्विकल्पकसमाधिरुक्तः अनन्यसाधनः तत्त्वज्ञानातिरिक्तमुक्तिसाधनास्तित्वभ्रमरहितः केवलोऽसङ्गःआत्मसंस्थितः आत्मन्येवसंस्थासमाप्तिः सञ्जातायस्यसतेन नकदापिविषयान्तरसञ्चारवांश्चित्तः विभावयेत् ध्यायेत् ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंच यदेतत्भूतंभविष्यद्वर्तमानं विश्वंपरमात्मादर्शनंभासकोयस्यतत् तस्यभासासर्वमिदंविभातीति श्रुतेः तत्सर्वकारणेमायासान्निधाना
त्सर्वोपादानत्वेनाभिमतेआत्मनिविलापयेत् उपादानसत्ताव्यतिरेकेणकार्यसत्तांनपश्येत् तादृशस्यलक्षणमाह सम्पूर्णः अवाप्तसमस्तका

विश्वंयदेतत्परमात्मदर्शनं विलापयेदात्मनि सर्वकारणे ॥
पूर्णश्चिदानन्दमयोऽवतिष्ठते न वेद बाह्यं न च किञ्चिदान्त
रम् ॥ ४७ ॥

मः तस्यकाम्याभावात् चिदानन्दमयः तद्रूपोऽवतिष्ठते बाह्यमान्तरंच दृश्यंनजानाति सर्वत्रब्रह्मदर्शनादिति भावः ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाधिसिद्धेः पूर्वंयत्कर्तव्यंतदाह । पूर्वमिति । समाधेः सकलविषयव्यासङ्गनिवृत्तिपूर्वकं ब्रह्माकारवृत्तिः समाधिस्ततः पूर्वमखिलंस चराचरंजगत् ओंकारमात्रं विचिन्तयेत् । ओंकारोऽर्मायतेऽनेनेतिमात्रा प्रमाणं बोधकत्वेन परिच्छेदकोयस्यतथाजानीयात् । तदेवाविवृ

पूर्वं समाधे रखिलं विचिन्तये दोङ्कारमात्रं सचराचरं जगत् ॥
तदेव वाच्यं प्रणवो हि वाचको विभाव्यते ज्ञानवशान्न बो-
धतः ॥ ४८ ॥

णोति तदेवेति । जगदेवेत्यर्थः । प्रणवोवाचकोविभाव्यतेएतत्त्वाहिप्रसिद्ध इत्यर्थः । इयंभावनाज्ञानवशादेवनबोधकः । बोधोनिर्विशेषब्रह्मसा क्षात्कारस्तदुत्तरंनेत्यर्थः । तस्यसर्ववृत्त्युपमर्दकत्वात् ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमर्थं विवृणोति । अकारेति । अकारसञ्ज्ञस्तद्वाच्यः पुरुषो हि विश्वको विश्व एव विश्वकः विश्वशब्देन परिभाषितः अयं जाग्रत्साक्षी विराट् ततः स्वप्नसाक्षी तैजसः तेन पदेन परिभाषितः लिङ्गदेहाभिमानी हिरण्यगर्भ उकारकः उकारप्रतिपाद्य ईर्यते । ततः सुषुप्तिसाक्षी प्राज्ञपदवाच्यो

अकारसञ्ज्ञः पुरुषो हि विश्वको ह्युकारकस्तैजस ईर्यते क्रमात्
प्राज्ञो मकारः परिपठ्यतेऽखिलैः समाधि पूर्वं न तु तत्त्वतो
भवेत् ॥ ४९ ॥

मायोपाधिको मकारस्तद्वाच्यः परिपठ्यतेऽखिलैर्वेदैः । इयं भावना समाधिपूर्वं समाधेः पूर्वमेव न तत्त्वतः तत्त्वसाक्षात्कारे सति न भवेत् । सर्व स्याग्रप्राणिप्रविलयात् ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविलापन प्रकारमाहद्वाभ्याम् । विश्वंत्विति । उकारमध्ये बहुधाव्यवस्थितं स्थूलदेहनिबंधनंस्थूलदेहाभिमानेन स्थितं विश्वम्पुरुषंतद्वाचकमकारम् च विलापयेत् । तुश्चार्थे । विलीनम्भावयेत् ततस्तैजसंलिङ्गदेहाभिमानिनम् पुरुषं तद्वाचकंप्रणवद्वितीय वर्णमुकारं वि-

विश्वं त्वकारं पुरुषं विलापयेदुकारमध्येबहुधा व्यवस्थितम् ।
ततो मकारे प्रविलाप्यतैजसंद्वितीयवर्णं प्रणवस्य चान्तिमे ॥५०॥

लीनविश्वकम्मकारे विलाप्याविलीनम्भावयित्वा ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततस्तादृशंमकारंतद्वाच्यंप्राज्ञंचकारणंकारणत्वाभिमानिनंपुरुषमिहात्मनि चिद्घनेपरे विलापयेत् तथाभावयेत् । ततः सोऽहंमर्वोविला
पाधिज्ञानंपरब्रह्मांवभावयेत् । तादृशंनष्टि । सदाविमुक्तिमत् नित्यमुक्तम् । नन्वहंपदार्थस्यरागद्वेषादिमलिनस्यकथं ब्रह्मत्वभावनेसा

मकारमप्यात्मनि चिद्घने परे विलापयेत्प्राज्ञमपीह कारणम् ।
सोऽहं परं ब्रह्म सदा विमुक्तिमद्विज्ञानदृङ्मुक्त उपाधितोऽ
मलः ॥ ५१ ॥

शङ्कयाहंपदार्थंविशिनष्टि । उपाधितोमुक्तः अतएवामलःतथाभावनेसाधनं विज्ञानदृक्विज्ञानं ब्रह्ममात्रप्रसयाविच्छेदरूपादृक् निदिध्या
सनं सत्साक्षात्कारसाधनंयस्यसः ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंभावनावतोलक्षणमाह । एवमिति । उक्तप्रकारेणसदाजातापरमात्मन्येकभावना यस्यसः परिविस्मृतमखिलंपुत्रदेहादियेनसः । अत एवस्वस्वरूपानन्देनैवतुष्टःनतुविषयानन्देन । तस्यपरिणामेदुःखरूपत्वात्ततो विरक्तइत्यर्थः । साक्षान्नित्यात्मनिसुखप्रकाशकः साक्षा

एवं सदा जातपरात्मभावनः स्वानन्दतुष्टःपरिविस्मृताखिलः ॥
आस्ते स नित्यात्मसुखप्रकाशकः साक्षाद्विमुक्तोऽचलवारिसि
न्धुवत् ॥ ५२ ॥

दौपाधिकनामरूपभेदराहित्येननित्यमखण्डितमात्मस्वरूपंयत्सुखंप्रकाशश्चतद्रूपः एवंरूपो विमुक्तोजीवन्मुक्तः । अचलंनिश्चलंवारियस्यतादृशसिन्धुवदास्ते । विषयसम्बन्धरूपलहरीरहितआस्तइत्यर्थः ॥ ५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशस्यमत्प्राप्तिर्भवत्येवेत्याह । एवमिति । उक्तप्रकारेणसदाऽभ्यस्तसमाधियोगिनः निवृत्ताःसर्वेषामिन्द्रियाणांगोचराविषयाःशब्दादयो यस्य विनिर्जिताअशेषारिपवःकामादयोयेनतस्य । तज्जयेनविषयेष्वन्तःकरणाप्रवृत्तेः । अतएव सर्वज्ञत्वनित्यत्वनित्यतृप्तत्वबोध

एवं सदाऽभ्यस्तसमाधियोगिनो निवृत्तसर्वेन्द्रियगोचरस्य हि ॥ विनिर्जिताशेषरिपोरहंसदा दृश्यो भवेयं जितषड्गुणात्मनः ॥५३ ॥

रूपत्वस्वतन्त्रत्वनित्यमलुप्तत्वानन्तरूपाषड्गुणायस्यतादृशआत्माजितो वशीकृतोयेनतस्य सदादृश्योभवेयम् । एतेनमद्भक्तस्ययोगिनो ऽहंदृश्योनतुभक्तिविमुखस्येति सूचितम् ॥ ५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंविधोजीवन्मुक्तःप्रारब्धवशेन अनभिमानोभोगानश्नँस्तिष्ठेत् ततोमय्येवविलीयते मद्रूपोभवतीत्याह । ध्यात्वैवमिति ॥ ५४ ।

ध्यात्वैवमात्मानमहर्निशं मुनिस्तिष्ठेत्सदा मुक्तसमस्तबन्धनः ॥
प्रारब्धमश्नन्नभिमानवर्जितो मय्येवसाक्षात्प्रविलीयते ततः ५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वधर्मापेक्षयाऽयमेवधर्मोज्यायानित्याह । आदौचेति । भवसंसारमादिमध्यावसानेषुसर्वथाभयशोकयोः कारणंविदित्वातत्कारणी
भूतंविधिवादैर्यजेतेत्यादिभिश्चोदितंबोधितंसमस्तंकर्ममार्गकाम्यंहित्वा अखिलात्मनांजीवानांस्वरूपभूतंमामात्मानं परमेश्वरंभजेत् । य

आदौ च मध्ये च तथैव चान्ततो भवं विदित्वा भयशोक कारणम् ॥ हित्वा समस्तं विधिवादचोदितं भजेत्स्वमात्मान मथाखिलात्मनाम् ॥ ५५ ॥

थाधनस्यार्जनेनादौदुःखंमध्येपालनकृतं तत्र राजादिकृतं भयमन्तेनाशेशोकपर्यवसायिदुःखमेवं पदार्थमात्रेद्रष्टव्यम् ॥ ५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मय्यभेदभावनया नामरूपाविभागेन तद्रूप एवभवतीत्यमुमर्थं सदृष्टान्तमाह । आत्मनीति । आत्मनिसर्वाधिष्ठानेमयिइदंस्वस्वरूपं जीवमभेदेनविभावयन्यदा । तिष्ठतीतिशेषः । तदामयात्मनापरमेश्वरेणाऽभेदेनभवति अभिन्नोभवति । तत्रदृष्टान्तः यथासमुद्रेप्रविष्टं नद्यादि

आत्मन्यभेदेन विभावयन्निदं भवत्यभेदेन मयाऽत्मनातदा ॥
यथाजलं वारिनिधौ यथापयः क्षीरेवियद्व्योम्न्यऽनिले यथाऽनिलः ॥ ५६ ॥

जलंसमुद्रएव यथाक्षीरेगव्यादिक्षीरेप्रक्षिप्तंपयःक्षीरमेव यथाव्योम्निमहाकाशेघटाद्यवच्छिन्नाकाशोघटादिभङ्गे च यथाचर्मभस्त्रिकाद्यवच्छिन्नोवायुरनिलेमहावायौ नामरूपाविभागेनैकीभवतीत्यर्थः ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमात्मतत्त्वज्ञस्य जगत्सत्यत्वभ्रमःस्वतएवापैतीत्याह । इत्थमिति । हिरण्यर्थे । लोकसंस्थितोऽपिजीवन्मुक्तिदशायांप्रारब्धवशाल्लोकव्यवहारंकुर्वन्नपिजगन्मृषैवेतिविभावयन्सन् यदियदा इत्थमीक्षते ऐकात्म्यं जानीयात्तदा निवृत्तजगत्सत्यत्वभ्रमो भवतीति शेषः। तत्र हेतुः श्रुतियुक्तिमानतोनिराकृतत्वात् । अतोऽन्यदार्तमित्यादिश्रुतिरूपात् जगन्मिथ्यादृश्यत्वात् शुक्तिरजतवदितितदुपबृंहितानुमानरू

इत्थं यदीक्षेत हि लोकसंस्थितो जगन्मृषैवेतिविभावयन्मुनिः ॥ निराकृतत्वाच्छ्रुतियुक्तिमानतो यथेन्दुभेदो दिशि दिग्भ्रमादयः ॥ ५७ ॥

पात्मानतःप्रमाणतोनिराकृतत्वात् तत्रदृष्टान्तोयथेन्दुभेदः एकचन्द्रेद्विचन्द्रत्वभ्रमस्तदेकत्वज्ञानेननिवर्तते यथाच दिशिप्राच्यादौअन्यदिक्त्वभ्रमः सोऽपितत्त्वज्ञानान्निवर्तते । एवंभ्रमतःपुरुषस्य दिक्षुभ्रमणाद्भ्रमोनिकटवर्तिवृक्षादौच भ्रमणभ्रमस्तत्स्थैर्यज्ञानेन निवर्तते तद्वत् ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशज्ञानेमदाराधनमेवोपायइत्याह । यावदिति । अखिलं जगन्मदात्मकंमदधिष्ठानकंमाद्विवर्तभूतंयावन्नपश्येत्तावन्मत्साक्षयेश्रद्धालुः भगवदाराधनमेवज्ञानप्रापकमित्यत्र दृढविश्वासवान् अतिशयेनोर्जितावृद्धिमतीभक्तिर्मयिभगवतिपूज्यताबुद्धिरूपालक्षणं चिह्नंयस्यसः ।

यावन्नपश्येदखिलं मदात्मकं तावन्मदाराधनतत्परो भवेत् ॥
श्रद्धालुरत्यूर्जित भक्तिलक्षणो यस्तस्य दृश्यो ऽहमहर्निशं हृदि ॥ ५८ ॥

तावन्मदाराधननिष्ठोभवेत् एवंहितस्यहृदि अहमहर्निशंदृश्योभवा मियेयथामांप्रपद्यन्ते तांस्तथैवभजाम्यहमितिस्मृतेः ॥ ५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वोक्तवचनजातस्य श्रुतिसमत्वं कथमेतदालोचनमपिमदाराधनप्रतिबन्धकदुरितध्वंसोपायइत्याह रहस्यमिति । श्रुतिसारसङ्ग्रहत्वेनाति

रहस्यमेतच्छ्रुतिसारसङ्ग्रहं मया विनिश्चित्य तवोदितं प्रिय ॥
यस्त्वेतदालोचयतीहबुद्धिमान् स मुच्यते पातकराशिभिः
क्षणात् ॥ ५९ ॥

गोपनीयता अप्रमाणशङ्काकलङ्कराहित्यंस्चितम् । आलोचयतिसम्यग्विचारयति ॥ ५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ भगवानुक्तमेवार्थंसङ्क्षेपेण दार्ढ्यार्यपुनराह भ्रातरिति। यदीतियादित्यर्थे। यदीदंजगत् परिदृश्यते तत्सर्वंमायैवेतिज्ञात्वेति शेषः चेतसासर्वंपरिहृत्यतत्रौदासीन्यंकृत्वामद्भावनयामदैक्यभावनया भावितंशुद्धंमानसंयस्यताद्दशास्तिष्ठ। इत्युपदिश्याशिषंप्राह निरामयः

भ्रातर्यदीदं परिदृश्यते जगन्मायैव सर्वं परिहृत्य चेतसा॥ मद्भावनाभावितशुद्धमानसः सुखी भवाऽऽनन्दमयो निरामयः ६०

सन्सुखीभव। सर्वदुःखनिवृत्त्येतिभावः। ततोऽन्तरङ्गामन्यामाशिषमाह आनन्दमयोभवेति तद्रूपोभवेत्यर्थः। यद्यपिपूर्वमानन्दरूपत्वमस्त्येवतथाऽपितत्प्राप्तिर्विस्मृतकंठस्थभूषणप्राप्तिवत ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंरीत्यास्वोपासकस्यलोकपावनत्वमाह। यइति । कदावा यदाकदाचिदित्यर्थः । हृदानिर्मलेनान्तःकरणेन यो मामगुणं प्राकृतसत्त्व रजस्तमोरूपगुणरहितम् । सच्चिदानन्दरूपत्वात् । अतएवगुणादव्याकृतात्परंमायातीतम् । यदिवायद्वत्त्वर्थे । गुणात्मकं सर्वज्ञत्वा- दिलोकोत्तरलावण्यादिगुणवानात्मामूर्तिर्यस्यतं दृश्यमानं रूपं सेवते । सद्विविधोऽप्युपासकःअहं मत्स्वरूपएव । मामकइत्यर्थोवा । प्रि-

यः सेवते मामगुणं गुणात्परं हृदा कदा वा यदि वा गुणात्मकम् ॥ सोऽहंस्वपादाञ्चितरेणुभिः स्पृशन्पुनाति लोकत्रितयं यथा रविः ॥ ६१ ॥

योहिज्ञानिनोऽत्यर्थमहंसचममप्रिय इत्युक्तेः । तादृशोभक्तःस्वपादलग्नरेणुभिःसंस्पृशन् लोकत्रयमपि पुनाति । अज्ञानध्वान्तनिरसने नपवित्रीकरोति । यथारविःस्वकरैर्जगद्वितिमिरीकरोति तद्वत् ॥ ६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानीमेतद्ग्रन्थार्थालोचनासमर्थस्यपाठमात्रतोऽपिमहत्फलमाह । विज्ञानंविज्ञानजनकं करणंव्युत्पत्त्येतिबोध्यम् । वेदान्तैरुपनिषद्वाक्यैर्वेद्यंचरणंजगज्जन्मादिलक्षणंकर्मयस्यतेन ननुपाठमात्रादेतादृशमहत्फलप्राप्तिःकथमित्याशङ्क्यभवत्येवेति सूचयंस्तत्रहेतुमाह । मद्वचने

विज्ञानमेतदखिलंश्रुतिसारमेकं वेदान्तवेद्यचरणेनमयैवगीतम् ।
यःश्रद्धया परिपठेद्गुरुभक्तियुक्तो मद्रूपमेतियदि मद्वचनेषुभक्तिः
॥ ६२ ॥ इतिश्री अध्यात्मरामायणे रामगीता समाप्ता ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसम्वादे उत्तरकाण्डे श्रीरामगीतायां पञ्चमःसर्गः ॥ ५ ॥

षुभक्तिर्विश्वासोयदीतिअर्थाद्गुरुवाक्यविश्वासस्यैव फलदायकत्वादितिभावः ॥६२॥ इत्यध्यात्मरामायणेउमामहेश्वरसम्वादे उत्तरकाण्डेसेतौपञ्चमःसर्गः ॥ ६२ ॥ श्रीरामचन्द्रार्पणमस्तु ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

॥ ३२ ॥ श्रीराममन्त्रः खलु तारकाख्यः संसारसन्तारणसुप्रसिद्धः ॥ भक्-
त्याऽप्यभक्त्या समुपासितोयः श्रेयांसि सर्वाणि ददात्यवश्य
म् ॥ १ ॥ तन्तारकं सम्प्रतिपादयन्ती श्रीरामगीता सकलैः सुसे
व्या ॥ विज्ञाप्तिमित्थं जनको विनीतः समर्पयत्यार्यजनेषु हर्षात् २ ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प,	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति
स्यर्द्धि	स्पर्द्धि	१	२	१	शाधि	शाधि	३	२	६	नाशे	नाशो	६	१	१
जीव्य	जीव्य	१	२	३	व्यत्र	व्यत्र	४	१	१	नन्वितिश	नन्वितिशे	६	२	१
सम्वीन्धनी:	सम्वन्धिनी:	२	२	१	ष्ठामे	ष्ठानमे	४	२	३	विदा	विदा	६	२	२
व्रह्म	व्रह्म	२	१	२	व्रह्म	व्रह्म	४	२	१	मवे	मेव	६	२	२
व्रह्म	व्रह्म	२	१	६	वलेन	वलेन	४	२	७	व्येतीत	व्यतेति	७	१	१
वोधोऽासि	वोथोऽसि	३	१	४	निघृत्ते	निवृत्ते	५	१	१	वीरहा	वीरहा	७	१	१
संवन्ध	सम्बन्ध	३	१	७	कत्व	कत्वा	५	१	१	सद्दष्ट	सद्दृष्ट	८	१	३
भवस्यंससार	भवस्यसंसार	३	२	१	नक	नैक	५	१	१	विशुद्धं	विशुद्ध	८	२	१
न्सार	सार	३	२	२	बेदान्त	वेदान्त	५	१	१	कारांत:	कारान्त:	८	२	२
पर्वग	पवर्ग	३	२	२	पूर्व	पूर्व	५	१	२	वृत्ति	वृत्ति	९	१	१
वारिधि	वारिधि	३	२	२	वुद्ध्या	वुद्ध्या	५	१	६	स्त्रवाना	स्वना	९	२	१
					एवं	एत्र	५	१	६	वृत्यु	वृत्यु	१०	१	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
रीप	रपि	११	२	१
नर्दष्टा	नर्दष्टा	१२	१	४
वर्द्धौ	वर्द्धौ	१२	१	७
त्याभिः	त्माभिः	१२	२	६
शुद्ध	शुद्ध	१३	१	१
जीवया	जीवयो	१३	१	२
निर्वाध	निर्वाध	१४	१	१०
भत्र	भव	१९	१	४
अर्जोद्व	अर्जोऽद्व	१६	२	६
द्वात्	द्वात्	१७	२	१

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
ह्लाभ	ह्लाभे	१८	१	८
इतिः	इति	१८	२	२
ज्ञानन	ज्ञानेन	१९	१	१
वुद्वया	वुद्ध्या	२०	१	९
रागादि	रागादि	२१	१	३
त्रिलय	विलय	२१	१	७
धम	धर्म	२१	२	१
म्त्रस्य	म्वंयस्य	२१	२	२
वुवै	बुधै	२३	१	५
एव	एवं	२३	२	१
द्रष्ट	द्रष्टुं	२४	१	२

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
विभाव्यत	विभाव्यते	२५	१	४ मू
लिङ्गद	लिङ्गदे	२६	१	२
वोधकः	वोधतः	२५	१	६
त्रिज्ञानं ब्रह्म	विज्ञानंनिादि ध्यासनं ब्रह्म	२६	२ ६	३
भेदेरा	भेदरा	२७	१	६
रुपा	रूपाः	२७	२	६
आत्म	अत्मा	२७	२	६
मुनिति	मुनिास्ति	२८	१	२
भव	भवं	२८	२	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
तदकत्व	तदेकत्व	२६	२	७	वतथाऽ	वतथाऽ	३१	१	६	मद्बचने	मद्बचने	३२	१	२
भ्रमण	भ्रमणं	२६	२	८	कंठ	कण्ठ	३१	१	२	तन्त्तारकं	तत्तारकं	३२	२	३

नेपाल पाशुपत, यन्त्रालये मुद्रितः

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति रामगीता सटीका समाप्ता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द. नं. १६६४२

अथ रामगीता सटीका प्रारभ्यते ॥

मू० २।-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ रामंरत्नकिरीटकुण्डलयुतं केयूरहारान्वितं
सीतालङ्कृतवामभागममलं सिंहासनस्थं विभुम् ॥ सुग्रीवादि
कपीश्वरैःसुरवरैः संसेव्यमानं सदा विश्वामित्रपराशरादिमुनि-
भिः संस्तूयमानं भजे ॥ १ ॥ इतिध्यात्वा ॥ श्रीमहादेवउवाच॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ ध्यायेत्वाजानुबाहुं धृतशरधनुषं बद्धपद्मासनस्थं पीतंवासोवसानं नवकमलदलस्पर्द्धिनेत्रं प्रसन्नम् ॥ वामाङ्कारूढ सीतामुखकमलमिलल्लोचनं नीरदाभं नाना लङ्कारदीप्तं दधतमुरुजटामण्डलं रामचन्द्रम् ॥ १ ॥ ततइति जगतां यानि मङ्गलानि आनन्दास्तेषामुपजीव्यभूतं मङ्गलं ब्रह्मानन्दः सएवात्मास्वरूपं तेन तस्यैवानन्दस्यान्यानि भूतानिमात्रामुपजीवन्तीति श्रुतेः मङ्ग

ततोजगन्मङ्गलमङ्गलात्मना विधाय रामायणकीर्तिमुत्तमाम् ॥
चचार पूर्वाचरितं रघूत्तमो राजर्षिवर्य्यैरभिसेवितं यथा ॥ १ ॥

लानाश्चमङ्गलमिति स्मृतेश्च किंच जगतां मङ्गलं कल्याणं यस्मात्तादृशकल्याणरूपआत्मामूर्तिस्तया उत्तमांश्रोत्रादीनां मोक्षदत्वेना त्युत्तमां रामायणकीर्तिं वाल्मीक्यादि कृत नानाविध रामायण प्रवर्तिकां रावणवधादिजां कीर्तिंविधाय स्थितोरघूत्तमः ततः सीताप रित्यागानन्तरं पूर्वैः स्ववंशजैराचारितं प्रजापालनसत्कथाश्रवणादिकं केवलंतत्पूर्वजैरेवाचरितमितिन किंत्वन्यैरपि राजर्षिश्रेष्ठैर्य थाऽभिसेवितं तथाचचार कृतवान् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदारागुरुदेवविश्वासलक्षणमहागुणवती यद्वा उदारा दानशीलाबुद्धिर्यस्य तेन पुरातनीः प्राचीनराजसम्बन्धिनीः शुभाः धर्माधर्मनिर्णेत्रीः प्रमत्तस्य स्वगोमण्डलमिश्रितब्राह्मणगोदानात् प्रमत्तस्य नृगस्य राज्ञो द्विजस्य शापात्तिर्यक्त्वमाह तेनाज्ञातकृतब्रह्मस्वापहारेण परमधा

सौमित्रिणापृष्ट उदारबुद्धिना रामःकथाःप्राह पुरातनीःशुभाः ॥
राज्ञः प्रमत्तस्य नृगस्य शापतो द्विजस्य तिर्यक्त्वमथाह राघवः
॥ २ ॥

र्मिकस्यापीदृश्यवस्थेति सर्वथाब्रह्मस्वविमुखताधर्मइतिसूचितम् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 एकान्तेविजने उपस्थितंप्राप्तम् विनयान्वितः सन् भक्त्यागुरुरयमिति बुद्ध्या प्रणम्य अनेनगुरूपसदनप्रकारउक्तः आसादितंशुद्धंभाव

कदाचिदेकान्त उपस्थितंप्रभुं रामं रमालालितपादपङ्कजम् ॥
सौमित्रिरासादितशुद्धभावनः प्रणम्यभक्त्याविनयान्वितोऽब्रवीत् ॥ ३ ॥

नं भावनाकरणमन्तः करणंयेनसः शुद्धान्तःकरणइतियावत् भगवदुक्तसत्कथाश्रवणेन शुद्धान्तःकरणइत्यर्थः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हे महामते महतीसर्वविषयामतिर्यस्य तस्य संबोधनं त्वं शुद्धबोधोऽसि अनवच्छिन्नचैतन्यरूपोऽसि सर्वदेहिनामात्माऽसि जीवानांतत् प्रतिबिम्बत्वात् अधीशोऽसि अन्तर्यामित्वान्नियन्ताऽसि वास्तवभेदाभावाच्च सर्वात्मत्वम् औपाधिकभेदाच्च नियन्तृनियम्यभावोबोध्यः निराकृतिः अस्मदादिवत्स्वार्जितकर्माधीनशरीराकृतिरहितः नन्वेवंसर्वैः कथमेवंनज्ञायतेऽतआह ज्ञानदृशां स्वयमेवप्रतीयसे ज्ञायतेऽ

त्वं शुद्धबोधोऽसि हि सर्वदेहिनामात्माऽस्यधीशोऽसि निरा-कृतिःस्वयम् ॥ प्रतीयसे ज्ञानदृशां महामते पादाब्जभृङ्गाहितस ङ्गसाङ्गिनाम् ॥ ४ ॥

नेनेतिज्ञानं वेदान्तवाक्यजातं तदेवदृक्दर्शनसाधनंयेषां तेषामितिसंबन्धसामान्येषष्ठी तैरित्यर्थः तादृशदृक्लाभश्च त्वद्भक्त्यधीनइत्याह पादेति त्वच्चरणकमलयोर्भृङ्गवदाहितःकृतः सङ्गोयेन तादृशान्तः करणसङ्गवतां त्वच्चरणकमल सङ्क्षिप्तान्तः करणवतामित्यर्थः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

अथ प्रार्थयते अहमिति भवस्यंससारस्यापवर्गो निवृत्तिर्यस्मात्तादृशंतवपादाम्बुजंप्रपन्नोऽस्मिशरणंप्राप्तोऽस्मि योगिभावितं योगीभिः सं न्सारमुक्तये भावितम् अनेनतस्य भवापवर्गत्वे सदाचारः प्रमाणमुक्तम् प्रार्थनीयमाह अपारवारिधिरूपंयदज्ञानंसंसारमूलकारणं यथासुखम

अहं प्रपन्नोऽस्मि पदाम्बुजं प्रभो भवापवर्गं तव योगिभावितम् ॥ यथाञ्जसाज्ञानमपारवारिधिं सुखं तरिष्यामि तथाऽनुशाधि माम् ॥ ५ ॥

क्लेशेन तरिष्यामि तथा मामनुशाधिशिक्षय अपारवारिधिमित्यनेनसपारप्रसिद्धसमुद्राद्व्यतिरेकउक्तः अशक्यतरणताऽनेनध्वनिता ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथोत्तरमवतारयति श्रुत्वेति रामः सौमित्रिवचः श्रुत्वा अथशब्दोवाक्यालङ्कारे तदा श्रवणाव्यवहितकाले एवप्रपन्नानां भक्तानामार्ति संसारदुःखंहरतितादृशः प्रपन्नाभ्रमादिहीना भक्तानुग्रहपरा च धीर्यस्यसः क्षितिपालानां राज्ञां भूषणभूतोज्ञानरूपतमसउपशान्तये त

श्रुत्वाथ सौमित्रिवचोऽखिलं तदाप्राहप्रपन्नार्तिहरःप्रसन्नधीः ॥
विज्ञानमज्ञानतमोपशान्तये श्रुतिप्रपन्नं क्षितिपालभूषणः ॥ ६ ॥

दर्थम् सन्धिरार्षः श्रुतिभिः तमेवविदित्वाऽतिमृत्युमेतीत्यादिश्रुतिभिः प्रपन्नं तत्फलकत्वेन बोधितं विज्ञानमात्मतत्वज्ञानमिति सामान्य तः प्रथमंप्राह ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथतादृशज्ञानप्राप्तये क्रमेणबहिरङ्गान्तरङ्गसाधनान्याह आदाविति स्ववर्णाश्रमेषु शास्त्रेण वर्णिता याः क्रियानित्यनैमित्तकयज्ञदानादिरूपास्ताः कृत्वा समासादितशुद्धमानसः प्राप्तान्तःकरणशुद्धिः तत्पूर्वमुपात्तसाधनः तदनुष्ठानपूर्वकमेवउपात्तानिसाधनानि शमदमादीनियेन तादृशः अनेनकर्मणां बहिरङ्गत्वं शमादीनामन्तरङ्गत्वं स्फुटमेवोक्तम् किंच शमदमवैराग्यदार्ढ्यपर्यन्तं कर्मानुष्ठामेवेति

आदौ स्ववर्णाश्रमवर्णिताः क्रियाः कृत्वा समासादितशुद्धमानसः
समाप्य तत्पूर्वमुपात्तसाधनः समाश्रयेत्सद्गुरुमात्मलब्धये॥ ७॥

सूचितम् ततस्तत्कर्मानुष्ठानं समाप्य त्यक्त्वा संन्यस्येतियावत् आत्मलब्धये आत्मज्ञानाय तत्फलकाय तत्वमस्यादिवाक्यार्थविचाराय सद्गुरुंश्रोत्रियंब्रह्मनिष्ठमित्यादि लक्षणलक्षितं समाश्रयेत् सेवेत अनेनव्युत्पत्तिबलेन स्वयमेववाक्यार्थविचारः क्रियमाणो न फलायेति सूचितम् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसारस्यभ्रमिमच्चक्ररूपत्वात्तन्निवृत्तेश्चतत्कारणाज्ञाननिवृत्तिमूलकत्वदज्ञाननिवृत्तेश्चतत्त्वज्ञानकसाध्यत्वात्तत्त्वज्ञानस्यचवेदान्तविचारसाध्यत्वात्तदर्थंगुरुसमाश्रयणमित्याह क्रियेति भवःसंसारश्चक्रवद्विपरिवर्तमानईर्यते कथ्यते तदेवोपपादयति आदृताआदरपूर्वपूर्वजन्मार्जिताक्रियाएनस्यशरीरोद्भवस्यजन्मनोहेतुः तत्रजन्मनिसुरागिणोविपयाभिलाषवतः तौ शास्त्रप्रसिद्धौ धर्मेतरौ धर्माधर्मौ प्रियाप्रियौसुखदुः

क्रियाशरीरोद्भवहेतुरादृताप्रियाप्रियौतौभवतःसुरागिणः ॥
धर्मेतरौतत्रपुनः शरीरकंपुनः क्रियाचक्रवदीर्यतेभवः ॥ ८ ॥

खजनकौभवतःकस्यचिदधर्मएवसुखत्वबुद्ध्याप्रवृत्तिः कस्यचिद्धर्मएवंकदाचिदित्यप्यूह्यम् एवंतत्रोत्पादितकर्मणापुनःशरीरंपुनःक्रियाइत्येवंचक्रवद्विपरिवृत्तिः । यथाचक्रेभ्राम्यमाणेऽधोभागः कदाचिदुपरिउपरितनश्चाधः पुनरुपरिपुनरधएवंजन्मक्रियर्योर्जन्यजनकभावेनपरिवृत्तिरिति बोध्यम् ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यचाज्ञानमेवमूलमित्याह अज्ञानमेवेति अत्रविधौसंसारनिवृत्तिलक्षणेकर्तव्येऽर्थेतद्ज्ञानमेवमूलकारणत्वादज्ञानज्ञानमेवविधीयते साध-
नत्वेनेतिशेषः ननुकर्मैवतन्नाशकमस्तुकिंज्ञानेनेत्याशङ्क्याह विद्यैवज्ञानमेवतन्नाशविधौमूलाज्ञाननाशनेपटीयसीसमर्थानकर्मसमर्थमितिशेषः

अज्ञानमेवास्याहिमूलकारणंतद्ज्ञानमेवात्रविधौविधीयते॥ विद्यै
वतन्नाशविधौपटीयसीनकर्मतज्जंसविरोधमीरितम् ॥ ९ ॥

यतस्तत्तज्जमज्ञानजम् आत्मस्वरूपाज्ञानजन्यदेहाद्यभिमानजन्यत्वात्कर्मणोज्ञानजन्यत्वंबोध्यम् ननुतज्जन्यस्यापितन्नाशकत्वंवृश्चिककर्क
व्यादौदृष्टमित्याशङ्क्यतज्जन्यत्वंवाननाशकत्वप्रयोजकंकिन्तुसविरोधत्वमेवेत्याह यतसविरोधंतदीरितंनाशकमुक्तमित्यर्थः ॥ ९ ॥ ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतएवकर्मणानाज्ञानहानिरित्याह नाज्ञानेत्यादि यतःकर्मणाविरोधाभावान्नाज्ञाननाशनापिरागनाशोवस्तुतः कर्मानुष्ठानात्पुनः सदोषंक्षयिफलत्वादिदोषविशिष्टंकर्मैवोद्भवेत्कर्मणश्चपुनःसंसारएवेतिनमुक्तिमत्याशा ततस्तस्माद्बुधोविवेकीज्ञानविचारवान् ज्ञायतेऽनेने·

नाज्ञानहानिर्नचरागसङ्क्षयोभवेत्ततः कर्मसदोषमुद्भवेत् ॥ ततः पुनः संसृतिरप्यवारितातस्माद्बुधोज्ञानविचारवान्भवेत्॥ १०॥

तिज्ञानंवेदान्तवाक्यंतद्विचारवान्भवेत ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानींज्ञानस्यैवमोक्षहेतुत्वंवक्तुंज्ञानकर्मसमुच्चयवादंदूषणायानुवदतिसार्धेन नन्विति नन्वितिशङ्कायाम् यथाविद्यावेदमुखेनश्रुतिपुराण-
लक्षणेन ब्रह्मविदाप्नोतिपरम् इत्यादिनापुरुषार्थसाधनमुक्ता तथा उभाभ्यामवपक्षाभ्यांयथाखेपक्षिणांगतिः तथैवज्ञानकर्मभ्यांप्राप्यते
ब्रह्मशाश्वतम् इत्यादिनाक्रियाऽपितत्साधनत्वेनोक्ता किंच क्रियाकर्तव्यत। तृतीयार्थेप्रथमा कर्तव्यतयाआवश्यकेकृत्यैअवश्यकर्तव्यत-

ननुक्रियावेदमुखेनचोदितायथैवविद्यापुरुषार्थसाधनम् ॥ कर्तव्य
ताप्राणभृतःप्रचोदिताविद्यासहायत्वमुपैतिसापुनः ॥ ११ ॥

याप्रचोदितानित्यनैमित्तिकरूपा एवंचनदकरणेप्रत्यवायोत्पत्त्याज्ञानोत्पत्तिरेवनस्यात् तस्मात्सापुनर्विद्यायाःसहायत्वंप्राप्नोतिघटेजन-
नीयेयथादण्डचक्रादीनांपरस्परसहायता ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्तव्यमेतीतस्त्वात्कर्मवेविहिताणि कर्मेति वीरहा वा एष देवानां योऽग्निमुद्वासयते यावज्जीवमग्निहोत्रं जुहोति इतिश्रुतिः तत्रासिद्धान्तीशङ्कते नान्वास्ति ध्रुवंस्थिरंकार्यमिदंपुरुषार्थमोक्षजनिकाविद्यायतः स्वतन्त्राविनाऽपिसहायेन स्वकार्यसंपादनेसमर्था यथातेजस्तिमिरनिवर्तन-

कर्माकृतौदोषमपिश्रुतिर्जगौतस्मात्सदाकार्यमिदंमुमुक्षुणा॥ननु स्वतन्त्राध्रुवकार्यकारिणीविद्यानकिञ्चिन्मनसाऽप्यपेक्षते ॥ १२

समर्थंमनसाऽपिकिञ्चित्सहायभूतंवस्तुनापेक्षते तथाफलेजननीयेसहायान्तरसंभावनाऽपिनेतिभावः अनेनविद्याफलजननेनिरपेक्षास्वतन्त्र-त्वात्तेजोवदित्यनुमानंसूचितम् ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समुच्चयवादीपरिहराति नेति त्वदुक्तंनेत्यर्थः सत्यकार्यः अक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवति इत्यादिवेदनबोधितःस्थिरकार्योऽपि-
अध्वरः यथाऽन्यानपिकारकादिकान् आरादुपकारकप्रयाजाद्यङ्गानिदेशकालादीनिचप्रकाङ्क्षते तथाविद्यापिअग्निहोत्रंजुहोतिइत्यादिवि

नसत्यकार्योऽपिहियद्वदध्वरः प्रकाङ्क्षतेऽन्यानपिकारकादिकान्
तथैवविद्याविधितःप्रकाशितैर्विशिष्यते कर्मभिरेवमुक्तये ॥ १३ ॥

धिवाक्यतःतत्समूहेनप्रकाशितैः कर्मभिः सहितैवमुक्तयेविशिष्यतइत्यर्थः विद्याफलदानेकर्मापेक्षा अङ्गित्वात् प्रयाजाद्यङ्गापेक्षदर्शा
दिवादितिसत्प्रतिपक्षानुमाानमनेनसूचितम् ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदनूद्यासिद्धान्तीदूषयति केचिदिति यत्केचिद्वितर्कवादिनश्शतिज्ञानकर्मणोसमुच्चित्यमुक्तिसाधनंवदन्तितदप्यसत् यथाकेवलंकर्म मोक्ष साधनमित्यमत्तथातन्मीलितमित्यप्यसत् तत्रहेतुर्दृष्टविरोधकारणात् दृष्टोयोविरोधः सर्वलोकदृष्टविरोधरूपात्कारणात्तदसदित्यर्थः विरो

केचिद्वदन्तीतिवितर्कवादिनस्तदप्यसद्दृष्टविरोधकारणात् ॥
देहाभिमानादभिवर्धतेक्रियाविद्यागताहङ्कृतितःप्रसिद्ध्यति १४

धमेवाह देहाभिमानात्क्रियावर्धतेअनात्मनिदेहादावात्मत्वाभिमानात्क्रियावृद्धिः विद्यातुगताहङ्कृतितः गताहङ्कृतिर्यस्यतस्यनष्टाहङ्कृतेः प्रसिद्ध्यति सार्वविभक्तिकस्तसिः एवंचाहङ्कारसत्तामूलकत्वात्क्रियाज्ञानयोः समुच्चयोविरुद्धइत्यर्थः ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथपूर्वपक्ष्युक्तानुमानंदूषयन्विद्यास्वरूपमाह विशुद्धंविज्ञानंयेभ्यस्तेषांवेदान्तवाक्यानांयाद्विशेषेणरोचनंरलयोरभेदादालोचनंविचार
स्तेनाञ्चितामापितायाचरमाआत्मवृत्तिर्ब्रह्माकारांतःकरणवृत्तिः साविद्येतिभण्यते।विद्वद्भिरितिशेषः पुनःसमुच्चयवारणायविद्याकर्मणो
वैषम्यमाह कर्मयज्ञादिअखिलकारकादिभिःकर्तव्यकर्मादिभिरङ्गैश्चसहितंसदुदेति फलोन्मुखंभवति विद्यापुनरखिलकारकादीन्निहन्ति

विशुद्धविज्ञानविरोचनाञ्चिताविद्याऽऽत्मवृत्तिश्चरमेतिभण्यते ॥
उदेतिकर्माखिलकारकादिभिर्निहन्ति विद्याऽखिल कारकादि-
कम् ॥ १५ ॥

तत्रकर्तृत्वादिबुद्धिंनिहन्ति सकलव्यापारपरित्यागेनब्रह्मणिसमाप्तिर्हिविद्या अतःस्वोत्पत्तौचित्तशुद्धिद्वाराकर्मसापेक्षास्वफलेजनायितव्यं-
तान्निरपेक्षैवान्यथाविद्यास्वरूपस्यैवभङ्गापत्तेरितिपूर्वपक्ष्युक्तहेतोरासिद्धिरितिभावः ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उपसंहरन्मुमुक्षोर्वृत्तिप्रकारमाह तस्मादिति विद्याविरोधाद्विद्यायाःकर्मणासह विरोधेनसमुच्चयोनभवेत्तस्मात्सुधीर्मुमुक्षुरशेषतःकर्मत्यजेत् काम्यंतुसर्वथात्याज्यमेवनित्यनैमित्तिकमपियावच्चित्तशुद्धिकर्तव्यमेव ततोऽपिब्रह्माणिचित्तस्थैर्यपर्यन्तं कर्तव्यमेव ततस्तदनुसन्धानप्र-

तस्मात्त्यजेत्कार्यमशेषतः सुधीर्विद्याविरोधान्नसमुच्चयोभवेत् ।
आत्मानुसन्धानपरायणःसदा निवृत्तसर्वेन्द्रियवृत्तिगोचरः १६

तिबन्धकत्वात्प्रयोजनाभावाच्चतदपित्याज्यमेवेतिभावः इदानींमुमुक्षुकर्तव्यमाह निवृत्ताःसर्वेषामिन्द्रियाणां गोचराविषयाःशब्दादयोयस्मात्तादृशःसन् आत्मनःसच्चिदानन्दस्यानुसन्धानमेवपरमयनंप्राप्यंयस्यतथाविधोभवेत् अत्रेन्द्रियप्रत्याहारःकर्तव्यत्वेनोक्तस्तेनतत्पूर्वप्राणायामाद्यर्थादाक्षिप्तम् ॥ १६ ॥

CC-0. In Public Domain. Digitization by eGangotri

रागिविरागिभेदेनकर्मणोकर्तव्यताकर्त्तव्यतेआहयावदिति माययाविद्ययाशरीरादिष्ववानात्मसुआत्मधीरहङ्कृतेत्यादिरूपायावद्वर्ततेतावद्वि
धिवादकर्मणाम् विधिर्यजेतेत्यादिश्रुतिर्वादःकर्तव्यतावोधकोयेषांकर्मणांविधेयोवश्यवर्त्तितत्कर्मकर्ताभवेत तदपगमेतुतदाखिलं जगन्नेतीति

यावच्छरीरादिषुमाययात्मधीस्तावद्विधेयोविधिवादकर्मणाम् ॥
नेतीतिवाक्यैरखिलं निषिद्धय तज्ज्ञात्वापरात्मानमथत्यजेत्क्रि
याः ॥ १७ ॥

वाक्यैः अथातआदेशोनेतिनेतिइत्यादिवाक्यैर्निषिध्य मिथ्यात्वेननिर्णीयताद्विलक्षणतयासत्यत्वेनपरमात्मस्वरूपंज्ञात्वाक्रियास्त्यजेत्निरू ॥ ९ ॥
पितमेतत् ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मविज्ञानेसत्यवश्यमविद्या निवर्ततइत्याह यदेति आत्मनिशुद्धेन्तःकरणेपरमात्मनईशस्यात्मनोजीवस्यचयोविभेदोमायान्तःकरण रूपोपाधिद्वयकृतोविभेदोभेदस्तस्यभेदकं नाशकंभास्वरंप्रकाशशीलंयद्विज्ञानमितरवृत्त्युपमर्दनपूर्वकंब्रह्माकाराऽखण्डाद्याचित्तिर्यदाऽवभाति

यदापरात्मात्मविभेदभेदकंविज्ञानमात्मन्यवभाति भास्वरम् ॥
तदैवमायाप्रविलीयतेऽञ्जसासकारकाकारणमात्मसंसृतेः॥१८॥

असंभावनादितिरस्कारेणोदेति तदैव सकारकाजन्मान्तरप्रापककर्मसहितामायातत्तज्जीवोपाधिभूताविद्याऽञ्जसाझदितिप्रविलीयतेनश्यति ननुतन्नाशेऽपिसंसारनाशःकथमतोमायाविशेषणम् आत्मसंसृतेःकारणंसंसारस्योपादानकारणमेवंचतन्नाशेकार्यनाशोभवत्येवेतिभावः १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं पुनर्दार्ढ्यायाह श्रुतीति तत्त्वमसीत्यादिश्रुतिरूपैःप्रमाणैस्तज्जानितज्ञानेन नाशितासाविद्याकथमपिकार्यकारिणीभविष्यतीति काकुरत्र सर्वथानेत्यर्थः असतःकार्यकारित्वासंभवादितिभावः पुनश्चतस्यानोद्भवइत्याह विज्ञानमात्रादिति अमलाशुद्धाद्द्वितीयतःद्विती

श्रुतिप्रमाणाभिविनाशिताचसाकथंभविष्यत्यपिकार्यकारिणी ॥
विज्ञानमात्रादमलाद्द्वितीयतस्तस्मादविद्यानपुनर्भविष्यति १९

यात्मविषयकाद्विज्ञानमात्रादितरासहकृतान्निदिध्यासनपरिपाकजज्ञानाचसोनष्टातस्मात्सापुनर्नभविष्यति रज्ज्वज्ञानमूलकस्य सर्पस्य रज्जुज्ञानेन निवृत्तस्ययथानपुनरुत्पत्तिरितिभावः ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्यायाइतरनिरपेक्षायाएवमोक्षकारणत्वमुक्तंयुक्तिपूर्वकंपुनःकथयतिश्रोतृदार्ढ्याय। यदीति। यदिनष्टातत्त्वज्ञाननाशिता सा न पुनः प्रसूयतेनोत्पद्यतेतदाकारणाभावादहंमतिःकथंभवेत्। कथमपिनभवेदित्यर्थः। तदभावाच्चतत्कालेकर्माभावइतिस्वफलजननेसास्वतन्त्राइ

यदिस्मनष्टा नपुनःप्रसूयते कर्ताऽहमस्येति मतिः कथं भवेत्॥
तस्मात्स्वतन्त्रा न किमप्यपेक्षते विद्या विमोक्षाय विभाति केवला॥ २०॥

तरनिरपेक्षैवनकिमप्यपेक्षते द्वितीयस्यासंभवात् अतः केवलाऽसहायैवविमोक्षायविभातितत्फलिकाभवतीत्यर्थः ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अत्रार्थे श्रुतिरपिप्रमाणमित्याह सेति साप्रसिद्धा नकर्मणानप्रजयाधनेनत्यागेनैके अमृतत्वमानशुः इत्यादिकातैत्तिरीयश्रुतिःप्रशस्तानामर्थ वादैःप्राशस्त्येनबोधितानामपिकर्मणांन्यासंत्यागंसादरंस्फुटमाह नतुकर्मसमुच्चयमित्यर्थः तथावाजिनां वाजसनेयिनाम् एतावदरेखल्वमृत

सातैत्तिरीयश्रुतिराहसादरंन्यासंप्रशस्ताखिलकर्मणां स्फुटम् ॥
एतावदित्याहचवाजिनांश्रुतिर्ज्ञानंविमोक्षायनकर्मसाधनम् २१

त्वम् इत्यादिका ज्ञानंविमोक्षायसाधनं नकर्मेत्येतदाह ॥ २१ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहङ्कारत्यागरूपकारणवैषम्यात् क्रियाज्ञानयोर्वैषम्यमुक्त्वा फलमप्युक्तमपिवैषम्यमाह विद्येति हेसमुच्चयवादिन् त्वयाक्रतुरग्निष्टोमादिर्विद्यासमत्वेनदर्शितः परन्तुसमोदृष्टान्तोनोदाहृतः अनेनक्रतुर्विद्यासमः श्रुतिबोधितकर्तव्यताकत्वादित्यनुमानान्निरस्तम् दृष्टान्ताभावात् अन्वय्येवानुमानन्नव्यतिरेकीतिभावः एतच्चाकरेविस्तरेणप्रपञ्चितम् ननुविद्याकर्मणीसमे एकफलत्वाच्चक्रदण्डादिवदित्यनुमान-

विद्या समत्वेनतु दर्शितस्त्वया क्रतुर्नदृष्टान्त उदाहृतः समः ॥
फलैःपृथक्त्वाद्बहुकारकैः क्रतुःसंसाध्यतेज्ञानमतोविपर्ययम् २२

मितिचेत्तत्राह फलैः पृथक्त्वात षष्ठ्यर्थेतृतीया फलानांभेदादित्यर्थः एवंचस्वरूपासिद्धोहेतुरितिभावः समानकारकत्वमपिहेतुर्नेत्याह क्रतुर्बहुभिः कारकैरहंममताभिमानरूपैरान्तरैर्बाह्यैश्चदेशकालादिनियमैश्चसाध्यते ज्ञानन्त्वतोविपर्ययवदतोनतयोः साम्यमितिभावः २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वकरणे प्रत्यवायभिया कर्मकार्यमिति चेन्नेत्याह सप्रत्यवाय इति कर्मत्यागेनाहं निश्चयेनाहं प्रत्यवायसहितो भविष्यामीत्येवं शुद्धात्मानि- अनात्मधर्मस्य धीरज्ञस्य तत्त्वज्ञानविकलस्य प्रसिद्धा न तु तत्त्वदर्शिनः तस्याहंबुद्धेरभावात् पापादेरनात्मधर्मतानिश्चयाच्च तस्माद्बुधैः कर्म

स प्रत्यवायो ह्यहमित्यनात्मधीरज्ञप्रसिद्धा न तु तत्त्वदर्शिनः ॥ तस्माद्बुधैस्त्याज्यमपि क्रियात्मभिर्विधानतः कर्मविधि प्रकाशितम् ॥ २३ ॥

क्रियात्मभिः षष्ठ्यर्थे तृतीया क्रियाफलसक्तचित्तानां विधानतो विधानेनेतिकर्तव्यतया युक्तं कर्म विधिभिरवश्यकर्तव्यतया बोधितमपि त्याज्यमित्यर्थः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाविरक्तस्यकार्यमाह। श्रद्धेति । गुरुशास्त्रयोर्विश्वासःश्रद्धातदन्वितोबुभुत्सुःशुद्धमानसोऽपि निष्कामकर्मानुष्ठानाच्छुद्धमानसश्चगुरोः प्रसादाल्लब्धतत्त्वमसीतिवाक्यतः श्रुतमात्मजीवयोरैकात्म्यंविज्ञाय मननिदिध्यासनपरिपाकाभ्यांसाक्षात्कृत्य। चएवार्थः । साक्षा

श्रद्धान्वितस्तत्त्वमसीतिवाक्यतो गुरोःप्रसादादपिशुद्धमानसः॥
विज्ञायचैकात्म्यमथात्मजीवयोः सुखी भवेन्मेरुरिवाप्रकम्पनः
॥ २४ ॥

त्कृत्यैवसुखीभवेत्। सकलदुःखहीनोभवेदित्यर्थः । अप्रकम्पनःविषयाभिलाषाक्षोभितान्तःकरणः ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महाव क्यार्थंविवरीतुंवाक्यार्थस्यपदार्थबोधपूर्वकत्वमाह । आदाविति । विधानतःभ्रमप्रमादरहितेनवाक्यार्थविज्ञानस्य विधावुत्पत्तौआ
दौप्रथमंमुख्यमितियावत् । पदार्थावगतिःकारणम् । हिप्रसिद्धं तत्पदत्वंपदंतत्त्वम् असीति । तत्रतत्पदार्थःपरमात्मासर्वज्ञत्वादिगुणः त्वं

आदौ पदार्थावगतिर्हिकारणं वाक्यार्थविज्ञानविधौ विधानतः ॥
तत्त्वंपदार्थौपरमात्मजीवकावसीतिचैकात्म्यमथानयोर्भवेत्
॥ २५ ॥

पदार्थोजीवःअनयोस्तत्त्वंपदार्थयोरैकात्म्यंतद्बोधकमसीतिपदम् ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुसर्वज्ञत्वादिगुणस्येशस्यकिञ्चिज्ज्ञत्वधर्मवताजीवेनैकात्म्यं विरुद्धमित्याशङ्क्याह । प्रत्यागिति । अहंबुद्धिविषयत्वंप्रत्यक्त्वंजीवधर्मः परोक्षत्वमीशधर्मस्तदादिधर्मकृतमात्मनोःपरमात्मजीवात्मनोर्विरोधंविहायत्यक्त्वातयोः संशोधितामुयुक्तिभिःसम्यग्विचारितांतत्त्वंपदाभ्यांशक्त्यभावेऽपिवक्ष्यमाणप्रकारयालक्षणयालक्षितां ज्ञाताश्चिदात्मतां संगृह्य तत्त्वंपदोपास्थानांविषयांकृत्वा स्वमात्मानंतथाज्ञात्वाऽथएकात्मज्ञानानन्तरमद्वयोभवत् । चित्स्वरूपतांप्राप्तइवभवत् । पूर्वमपितत्स्वरूपएवविस्मृतकण्ठचामीकरन्यायेनचतत्प्राप्तिः तद्वत्युक्तम् ।

प्रत्यक्परोक्षादिविरोधमात्मनोर्विहायसंगृह्यतयोश्चिदात्मताम् ॥ संशोधितांलक्षणयाचलक्षितांज्ञात्वास्वमात्मानमथाद्वयोभवेत् ॥ २६ ॥

अयंभावः तत्त्वंपदयोर्द्वावर्थौ वाच्योलक्ष्यश्च तत्रतत्पदस्यमायोपाधिःसर्वज्ञत्वादिविशिष्टोवाच्यः त्वंपदस्यापिकिञ्चिज्ज्ञत्वादिविशिष्टो मायाकार्याविद्योपाधिरविद्यावदन्तःकरणोपाधिर्वाच्यः उभयोरपिविशेषणांशत्यागेनशुद्धश्चिदात्मालक्ष्यः तत्रवाच्ययोर्विरुद्धधर्मकत्वादैक्यासंभवेऽपिलक्ष्ययोरैक्यंनिर्बाधमेवेति ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उक्तलक्षणास्वरूपमाह । एकात्मकत्वादिति जहतीलक्षणाजहत्स्वार्थलक्षणायथागङ्गायांघोषइत्यत्रगङ्गापदार्थस्यप्रवाहस्यघोषाधारता नुपपत्त्यासर्वथातत्परित्यागेनतीररूपार्थलक्षणा साप्रकृते न एकात्मत्वात् । विशेष्यांशस्यैकत्वात्सर्वथास्वार्थत्यागाभावात् । तथाज हल्लक्षणताजहत्स्वार्थलक्षणात्वत्त्वमपिअत्रनसंभवति । यथाकाकेभ्योदधिरक्ष्यतामित्यादौकाकपदस्यस्वार्थात्यागेनैवदध्युपघातकेलक्षणा सापिन । विरोधतःविशेषणत्यागेनसर्वथास्वार्थत्यागाभावात् । अतोभागलक्षणाजहदजहल्लक्षणायुज्यते । अदोषतःपूर्वोक्तदोषाभावात्

एकात्मकत्वाज्जहती न सम्भवेत्तथाऽजहल्लक्षणता विरोधतः॥
सोऽयंपदार्थाविवभागलक्षणायुज्येततत्त्वंपदयोरदोषतः॥२७॥

विशेष्यांशस्यात्यागाद्विशेषणांशस्यत्यागाच्च । तत्रदृष्टान्तः । सोऽयंपदार्थाविव । यथासोऽयंदेवदत्तइत्यत्रतद्देशादिविशिष्टोऽतीतानुभव विषयोवातत्पदार्थः एतद्देशादिविशिष्टोऽनुभूयमानोवेदंशब्दार्थः । तयोश्चाविरुद्धविशेषणकत्वादैक्यासंभवेनदेशादिरूपविशेषणत्यागेना नुभवगतानांतत्वादिविशेषणत्यागेनवालक्षणयैक्यंतद्वदितिभावः ॥ २७ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथत्याज्यत्वायजीवोपाधिमाह । रसादीति । रसापृथ्वीआदिर्येषांतानिपञ्चीकृतानियानिभूतानितेभ्यः संभवांयस्यतत् । पञ्चीकरणंचे त्थम् एकैकंभूतंद्विधाविभज्यतत्रैकंभागंचतुर्धाविभज्यतेषांभागानांस्वेतरभूतचतुष्टयार्धभागचतुष्टयेसंयोजनेएकैकंभूतंपञ्चात्मकंभवतिभा

रसादिपञ्चीकृतभूतसंभवंभोगालयंदुःखसुखादिकर्मणाम् ॥ शरी रमाद्यन्तवदादिकर्मजंमायामयंस्थूलमुपाधिमात्मनः ॥ २८ ॥

गाधिक्याच्चप्रातिस्विकतयाभूगादिव्यवहारोऽपि । सुखदुःखयोरादीनियानिकर्माणितेषांभोगस्तत्कर्मजसुखदुःखानुभवस्तस्यालयमाश्र यभूतमाद्यन्तवत् उत्पत्तिनाशयोगि आदिकर्मजंभागभवीयकर्मजन्यंमायामयंपरम्परयामायाविकारः तद्विकारभूतविकारत्वात् । एतच्छरी रमात्मनःस्थूलमुपाधिंवदन्तीतिशेषः ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसूक्ष्मोपाधिमाह। सूक्ष्ममिति। बुधाःअन्यतस्थूलशरीरविलक्षणंशरीरंलिङ्गदेहाख्यमात्मनउपाधिंविदुः। तत्स्वरूपमाह। सूक्ष्मंचक्षुराद्यविषयः मनोबुद्धिदशेन्द्रियैःप्राणैश्चयुतम् सङ्कल्पात्मकंमनः निश्चयात्मिकाबुद्धिः घ्राणरसनाचक्षुस्त्वक्श्रोत्रेतिपञ्चज्ञानेन्द्रियाणि वा-

सूक्ष्मंमनोबुद्धिदशेन्द्रियैर्युतंप्राणैरपञ्चीकृतभूतसंभवम्॥ भोक्तुः सुखादेरनुसाधनंभवेच्छरीरमन्यद्विदुरात्मनोबुधाः॥ २९ ॥

क्पाणिपादपायूपस्थानिकर्मेन्द्रियाणि प्राणापानव्यानोदानसमानाश्चप्राणास्तैर्युतमेतत्सप्तदशसमुदायात्मकम्। तदाधारभूतान्याह। अपञ्चीकृतभूतसंभवंतेभ्यउत्पन्नमतएवादृश्यम्। तथाभोक्तुःसुखादेःसुखदुःखाद्यनुभवस्यानुसाधनम् स्थूलशरीरस्यैतदनुगतस्यैवभोगसाधनत्वमितिभावः। एतद्वियोगेनैवमरणव्यवहारइतिबोध्यम्॥ २९॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिजीवोपाधिद्वयमुक्त्वाईशोपाधिमाह । अनादीति । अनादिउत्पत्तिहीनम् । नानाविधपरिणामशालितयापरिणामरूपेणनश्वरामिति अनादित्वमात्रोक्त्यासूचितम् । अनिर्वाच्यम् सत्त्वासत्त्वाभ्यांनिर्वक्तुमशक्यम् कारणंसकलप्रपञ्चस्यजनकम् ईदृशीमायातुब्रह्मणःपरमी-

अनाद्यनिर्वाच्यमपीहकारणं मायाप्रधानंतुपरंशरीरकम् ॥ उपाधिभेदात्तुयतःपृथक्स्थितं स्वात्मानमात्मन्यवधारयेत्क्रमात् ॥ ३० ॥

श्वरव्यवहारसंपादकत्वादुत्कृष्टंप्रधानंशरीरकम् । स्वार्थेकः । एवमुपाधिभेदादेकमेवचैतन्यंयतः पृथक्स्थितंजीवईशइतिभेदबुद्धिविषय मतोलक्षणयोपाधिपरित्यागेनस्वात्मानमात्मनिअवधारयेदभेदेनजानीयात् । क्रमाच्छ्रवणमनननिदिध्यासनक्रमेणेत्यर्थः ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवाक्यार्थविचारफलमाह । कोशेष्विति । आनन्दमयस्य ब्रह्मत्वेअन्नमयप्राणमयमनोमयविज्ञानमयेषुचतुर्षुकोशेषुतत्तत्सङ्गात्तत्तदाकृतिर्विभाति यथाजपादिसङ्गात्स्फटिकोऽनेकाकृतिर्भाति । आनन्दमयस्यापि जीवत्ववादिनातुतेनसहपञ्चस्वु कोशेष्वितिबोध्यम् । अस्मि-

कोशेषुपञ्चस्वपितत्तदाकृतिर्विभातिसङ्गात्स्फटिकोपलोयथा ॥ असङ्गरूपोऽयमजोयतोऽद्वयोविज्ञायतेऽस्मिन्परितोविचारिते ॥ ३१ ॥

न्महावाक्येपरितोविचारितेसम्याग्विचारितेसत्ययमात्माऽसङ्गरूपःअन्नमयादिभिःसङ्गरहितः । असङ्गोनहिसज्जते। इतिश्रुतेः । अजोऽद्वयश्चविज्ञायते । स्थूलोऽहमित्यादिस्त्वज्ञस्यतत्तत्कोशप्रसङ्गात्प्रतीतिःस्फटिकवत् तत्त्वज्ञस्यतुनतथाप्रतीतिरितिभावः । एवंचतत्तदुपाधिकृततत्तद्रूपताप्रतीतिनिरासएव विचारफलमितिभावः ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जाग्रदाद्यवस्थाऽपि बुद्धेर्धर्मोनात्मधर्मइत्याह । बुद्धेरिति । इहआत्मनिस्वप्नादिभेदेन जाग्रत्स्वप्नसुषुप्तिभेदेन यात्रिधावृत्तिर्दृश्यतेसाऽपि गुणत्रयात्मनः सत्त्वरजस्तमोरूपगुणत्रयस्वरूपाया बुद्धेर्धर्मः । उक्तावस्थात्रयस्योक्तमूलकत्वात् । एतदवस्थात्रयस्यास्मिन्नवस्थात्रय-साक्षिणि आत्मनि भानं मृषा बुद्ध्यध्यास निबन्धनं न तु वास्तव मित्यर्थः । अन्योऽन्यतोव्यभिचारतस्तस्यावस्था त्रयस्यस्व रूपतो

बुद्धेस्त्रिधा वृत्तिरपीह दृश्यते स्वप्नादि भेदेन गुणत्रयात्मनः ॥ अन्योऽन्यतोऽस्मिन्व्यभिचारतोमृषा नित्ये परे ब्रह्मणि केवले शिवे ॥ ३२ ॥

मृषात्वात्तज्ज्ञानस्य मृषात्वमेव । स्वप्नकाले जाग्रत्सुषुप्त्योरभावात् । जाग्रतिइतरद्वयस्याभावात् सुषुप्ताावितरयोरभावात्परस्परं व्यभिचारोबोध्यः आत्मनस्तदनाश्रयत्वंविशेषणैराह । नित्येउत्पत्तिनाशशून्येपरेगुणत्रयातीते ब्रह्मणिव्यापकेकेवलेऽसङ्गेशिवआनन्दरूपे एवंभूतेसदैकरसेपरस्परव्यभिचारधर्माभानमसंभवीति भावः ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथत्याज्यत्वायसंसारमूलभूतांवृत्तिमाह । देहेति । एषांसङ्घातइतरेतराध्यासविषयात् अजस्रंयावद्धियो बुद्धेर्वृत्तिस्तमोमूलतयाऽज्ञ
लक्षणाऽज्ञत्वज्ञापिका यावत्परिवर्तते तावद्भवोद्भवःसंसारोद्भवोभवेत् । तमःपदंरजसोऽप्युपलक्षणम् । रजस्तमःप्रधानाबुद्धिः संसारहेतु

देहेन्द्रियप्राण मनश्चिदात्मनां सङ्घादजस्रं परिवर्तते धियः ॥
वृत्तिस्तमोमूलतयाऽज्ञलक्षणा यावद्भवेत्तावदसौ भवोद्भवः॥३३॥

त्वात्सर्वथात्याज्येति भावः ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत महावाक्यविचारस्य कर्तव्यमाह । नेतीति । अथात आदेशोनेतिनेति इति प्रमाणेननिराकृतं मिथ्यात्वेनगृहीतमखिलंजगत्येनसः ततोहृदासत्त्वप्रधानेनमनसासम्यगास्वादितं चिल्लक्षणंघनामृतंदुःखासंभिन्नंसुखंयेनसः । स्वर्गादितुपरिणामदुःखत्वात्तत्संभिन्नमेव । एवंभूतोऽशेषंजगद्देहेन्द्रियादिदृश्यसमूहंत्यजेत् हानोपादानबुद्धिविषयंनकुर्यात् । किन्तूदासीनस्तत्रभवेत् । ननुदेहेन्द्रियादिभिरेवतज्ज्ञान

नेतिप्रमाणेन निराकृताखिलो हृदासमास्वादितचिद्घनामृतः ॥ त्यजेदशेषं जगदात्तसद्रसं पीत्वा यथाऽम्भः प्रजहाति तत्फलम् ॥ ३४ ॥

लाभात्कथमुपजीव्यस्यत्यागइत्याशङ्क्यदृष्टान्तदर्शनेनपरिहरति । यथातृषावानआत्तः सद्रसोमाधुर्यंयेनतादृशं नारिकेलनारङ्गादि फलान्तवर्त्यम्भःपीत्वा तत्स्थानभूतंतत्फलं जहाति तत्रोदासीनोभवति तद्वत्सर्वदृश्यसारांशोब्रह्मतल्लाभसतिनिः सारंदृश्यंनोपादेयंनापिहेयमितिभावः । यतोभयादिसंभावनातद्धेयमपित्युच्यते ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतरस्यानित्यत्वेनतत्रवैराग्यार्थमात्मनएवनित्यत्वमाह । कदाचिदिति । कदापीत्यर्थः । अनवः उत्पत्त्यनन्तरंविद्यमानोहिनवः । तेन जन्मानन्तरास्तित्वंव्यावर्तितं नवत्वाभावेनेवजीर्णत्वाभावादवस्थान्तरापत्तिरूप परिणामोऽपिनिरस्तः ।अनेनअस्तिजायतेवर्द्धतेविपारिणम तेऽपक्षीयते नश्यतीति षड्भाव विकार राहित्यमुक्तम् । एवंचैतद्भिन्नं सर्वमुक्तषड्भावविकारवत्त्वादनित्यमिति ततोविरज्येतेतिबोधित-

कदाचि दात्मान मृतोनजायते नक्षीयते नापिविवर्धतेऽनवः ॥
निरस्तसर्वातिशयः सुखात्मकः स्वयम्प्रभः सर्वगतोऽयमद्वयः ३५

म् । यतऽईदृशोऽतएवनिरस्तः सर्वस्यदेहेन्द्रियादेरतिशयोमहत्त्वं येनस्वलाभात्सः यल्लाभान्नापरोलाभइतिःश्रुतेः यतःसुखात्मकः आनन्द स्वरूपः स्वयम्प्रभःस्वप्रकाशकश्च देहेन्द्रियादिस्तु दुःखस्वरूपः परप्रकाश्यश्च । यस्यभासासर्वमिदंविभाति । इतिश्रुतेः । सर्वगतोव्यापकः अयमहंबुद्धिविषयःप्रत्यगात्माऽपिअद्वयः उक्ताद्वयब्रह्मस्वरूपएव । नततोऽतिरिक्तइतिभावः । अयमात्माब्रह्म । इतिश्रुतेः ॥ ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुएवंविधेविकारशून्येआत्मनिजन्ममरणादिप्रवाहरूपसंसारभानंकथमितिशङ्कते। एवंविधेइति। दुःखमयःदुःखप्रचुरः। उत्तरयति। अज्ञानतइ
तिअज्ञानमूलकोयोध्यासोदेहान्तः करणादौअहममेत्यध्यासस्तद्वशात्। एवंचभ्रान्तिरूपातत्प्रतीतिरितिभावः। नन्वेवंकथंतस्यसंसारस्यनि

एवंविधे ज्ञानमये सुखात्मके कथंभवो दुःखमयःप्रतीयते ॥
अज्ञानतोऽध्यासवशात्प्रकाशतेज्ञानेविलीयेत विरोधलःक्षणात्॥
॥ ३६ ॥

वृत्तिस्तत्राह। ज्ञानेति। आविर्भूतइतिशेषः। ज्ञानस्याज्ञानविरोधित्वात्तदुत्पत्तिक्षणएवकारणभूताज्ञाननाशात्तत्कार्यसंसारस्यापि वि
लयइत्यर्थः। यथारज्जुज्ञाननरज्जौसर्पस्यलयइसर्थः ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाध्यासलक्षणमाह । यदन्यदिति । यदन्यत्सर्पादिकमन्यत्ररज्ज्वादौभ्रमातभ्रमजनकाद्दोषाद्विभाव्यतेविज्ञायतेअमुंविपश्चितोविद्वां-
सोऽध्यासइत्याहुः । यथाऽसर्पभूतेरज्ज्वादौ अहिविभावनंसर्पारोपोरज्ज्वबुद्धिमूलकस्तद्वदीश्वरेऽपिजगद्देहादिसंसारात्मकंसर्वंविभाव्य-

यदन्यदन्यत्र विभाव्यते भ्रमादध्यासमित्याहुरमुंविपश्चितः॥
असर्पभूतेऽहिविभावनंयथा रज्ज्वादिकेतद्वदपीश्वरेजगत्॥३७॥

तेआत्मज्ञानाभावाद्यथार्थतयाज्ञायते ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनिब्रगङ्धानेकीदृशोऽध्यामोनिमित्तंतदाह विकल्पेति सर्वविकल्पकारणमायारहितेवस्तुतस्तत्सङ्गरहितेचिदात्मकेचित्स्वरूपेसर्वकारणेनिरामयेदुःखासंभिन्नानन्दमयेकेवलसर्वविकारशून्यपरेदृश्याविलक्षणेब्रह्मणिव्यापकं आत्मनिप्रथममहङ्कारः कल्पितः सएवाध्यासः ।

विकल्पमायारहितेचिदात्मकेऽहङ्कारएष प्रथमः प्रकल्पितः ॥
अध्यासएवात्मनिसर्वकारणे निरामयेब्रह्मणि केवलेपरे ॥ ३८॥

अहंबुद्ध्यात्मकोऽध्यासएवसर्वसंसारकारणमितिभावः ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बुद्धिनिष्ठएवसंसारोनत्वात्मनिष्ठइत्यत्रान्वयव्यतिरेकौप्रमाणयति। इच्छादीति। परेसर्वसाक्षिणिआत्मनिसंसृतिहेतवःभासमानसंसारकारणं सदाकालत्रयेऽपिइच्छादिरागादिसुखादिधार्मिकाः इच्छापक्षेरागद्वेषौसुखदुःखंइत्येवमादिद्वन्द्वधार्मिकाःधियएवधीषुसतीषुसंसारइत्यन्वयमु

इच्छादिरागादिसुखादिधार्मिकाः सदा धियः संसृतिहेतवः परे ॥
यस्मात्प्रसुप्तौतदभावतःपरः सुखस्वरूपेणविभाव्यतेहिनः ॥३९॥

क्त्वातद्व्यतिरेकमाहयस्मात्कारणात्प्रसुप्तौतदभावा त्धीवृत्त्यभावात परआत्मानोऽस्माभिःतृतीयार्थेषुषष्ठी। सुखरूपेणस्वस्वरूपमात्रेणाविभा व्यतेनिश्चीयते नतु संसारित्वेनेतिभावः सुप्तोत्थितस्तुसुखमहमस्वाप्समितिप्रत्यभिज्ञानुभवात्तदात्मस्वरूपनिश्चयोऽस्तीतितात्पर्यम् ॥ ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथपुनस्तत्त्वं पदार्थस्वरूपमाह ।अनादीति। अनादिर्याऽविद्यातदुद्भवायस्या बुद्धेरन्तःकरणस्यतत्रविम्बितःप्रतिबिम्बिताश्चितःप्रकाशः सजीवइतीर्यते आत्मापरात्माधियः साक्षितया धीधर्मासङ्गेनैवपृथक्स्थितः । अन्तर्यामितयेत्यर्थः जीवोऽहंसुखीत्यादिप्रकारेणान्तःकर

अनाद्यविद्योद्भवबुद्धिबिम्बितोजीवप्रकाशोऽयमितीर्यते चितः ॥ आत्माधियः साक्षितया पृथक् स्थितो बुद्ध्या परिच्छिन्नपरः सएव हि॥ ४० ॥

णधर्माध्यासवानुपरमात्मातु साक्षितयासर्वत्राविद्यमानोऽपिनतथेतिभावः। अतएवबुद्ध्यापरिच्छिन्नपरः बुद्धिलक्षणपरिच्छेदरहितःअतएव परः । एवंचज्ञानेनप्रतिबिम्बाधार विलयप्रतिबिम्बस्यविलयात्सजीवः सएवपरमात्मैवहिप्रसिद्धं सइत्यस्यचात्रान्वयबोध्या ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ बुद्ध्यात्मनोःपरस्पराध्यासवशात् परस्परधर्मभानमितिदार्ढ्यायपुनराह । चिद्बिम्बेति । चिदात्मचेतसोरन्योन्याध्यासवशात् पर स्परतादात्म्यारोपाज्जडाजडत्वंप्रतीयते । चेतसोवृत्तीनांज्ञानत्वं जीवात्मनोजडत्वंप्रतीयते । अतएवज्ञानाश्रयआत्मेति चितएवताकिं कव्यवहारः । जीवात्मनिजडात्मनिजडात्माकथ्यते बुधैरितिस्मार्तव्यवहारश्च । अत्रहेतुः । चिदित्यादि । चिद्बिम्बस्यसाचिदाभासः अ

चिद्बिम्बसाक्ष्यात्मधियांप्रसङ्गतस्त्वेकत्रवासादनलाक्तलोहवत् ॥
अन्योऽन्यमध्यासवशात्प्रतीयते जडाजडत्वंच चिदात्मचेतसोः
॥ ४१ ॥

क्षेःसहितः साक्षःसेन्द्रियः सचासावात्मामनःधीरन्तःकरणंतेषांप्रकृष्टमङ्गादतिसान्निकर्षादध्यासइत्यर्थः । अनलाक्तलोहवत् अग्नितप्तलो हपिण्डवत् अत्रदृष्टान्तः । अग्निधर्मोदाहकत्वं लोहधर्मश्चवर्तुलत्वाद्यनलेभासते । तत्रहेतुरेकत्रवासात् परस्पराविभागेनवृत्तेरित्यर्थः । तद्व देतयोरपि परस्परधर्माध्यासइत्यर्थः ॥ ४१ ॥ ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं दार्ढ्यायपुनराह । गुरोरिति । वेदवाक्यतइत्यनेन श्रवणंगुरोःसकाशादपि । ततश्चानेनमननमुक्तम् । ताभ्यांसञ्जातोविद्यया ज्ञानरूपस्यात्मनोऽनुभवोयस्यसः । अनेनकृतनिदिध्यासनइत्यर्थः । तं चिदानन्दस्वरूपं स्वात्मानमुपाधिवर्जितं रहितोपाधिधर्ममात्मस्थं

गुरोःसकाशादपिवेदवाक्यतः सञ्जातविद्यानुभवोनिरीक्ष्य तम् । स्वात्मानमात्मस्थमुपाधिवर्जितं त्यजेदशेषं जडमात्मगोचरम् ॥ ४२ ॥

हृत्स्थंनिरीक्ष्य अपरोक्षीकृत्याशेषंजडं दृश्यंत्यजेत् । तत्रोदासीनोभवेदिति भावः ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

ज्ञेयंनिरुपाधिकं स्वरूपंश्लोकद्वयेनाह प्रकाशेति अहंप्रकाशरूपः स्वप्रकाशः परप्रकाशहीनः परप्रकाशरूपोयथाघटादिः अजोजन्मादि हीनः अद्वयःसजातीयद्वितीयरहितः असकृद्विभातः सकृदपिपरेणभासकान्तरेणप्रकाशितः सकृद्विभातः नसकृद्विभातोसकृद्विभातः नत

प्रकाशरूपोऽहमजोऽहमद्वयोऽसकृद्विभातोऽहमतीवनिर्मलः ॥
विशुद्धविज्ञानघनोनिरामयःसम्पूर्णआनन्दमयोऽहमक्रियः॥४३॥

त्रसूर्योभातिनचन्द्रतारकमितिश्रुतेः नतद्भासयतेसूर्यइतिस्मृतेश्च अतीवनिर्मलः मायाकृतावरणविक्षेपरहितः विशुद्धविज्ञानघनः विशुद्धचि दकरसः निरामयःकर्तृत्वाभिमानरहितः सम्पूर्णःदेशकालपरिच्छेदहीनः आनन्दमयः आनन्दरूपः स्वार्थेमयट् अक्रियः परिणामहीनः ॥ ४३ ॥

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदैवेति अहंसदैवकालत्रयेऽपिमुक्तःसर्वधर्मरहितः अचिन्त्यशक्तिमान् यःपरमात्मा अतीन्द्रियज्ञानम् इन्द्रियातिरिक्तज्ञानरूपःयतोवाचो निवर्त्तन्ते अप्राप्यमनसासहइतिश्रुतेः अविक्रियात्मकोऽपरिणामी अनन्तपारःअन्तःकालतःपारःपरन्तीरन्तावविद्यमानौ यस्य तेनदेश

सदैवमुक्तोऽहमचिन्त्यशक्तिमानतीन्द्रियज्ञानमविक्रियात्मकः॥
अनन्तपारोऽहमहर्निशंबुधैर्विभावितोऽहंहृदिवेदवादिभिः ॥४४॥

कालपरिच्छेदहीनः ईदृशोयःपरमात्माबुधैर्हृदि अहर्निशंविभावितः सोऽहमित्यर्थः ॥ ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंभावनायाःफलमाह एवमिति उक्तरीत्यासदाआत्मानं अखण्डितात्मनाविषयानाकृष्टचित्तेन विचारमाणस्यध्यायतः धातूनामनेकार्थत्वात् चरमाणएवचारमाणःस्वार्थेऽण् विशुद्धभावनाब्रह्माकारान्तःकरणवृत्तिरुदेतीतिशेषः स्राचोदिताकारकैर्देहान्तरप्रापककर्मभिः स

एवंसदात्मानमखण्डितात्मनाविचारमाणस्यविशुद्धभावना ॥
हन्यादविद्यामचिरेणकारकैरसायनंयद्वदुपासितंरुजः ॥ ४५ ॥

हाविद्यामचिरेणशीघ्रमेवहन्यात् यथोपामितंसेवितंरसायनं रुजोहन्यात्तद्वत् ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रध्यानेइतिकर्तव्यतामाह विविक्तइति निर्जनइत्यर्थः आसीनोयथोचितपद्मासनाद्युपविष्टः उपारतेन्द्रियः तेनशमदमादिसम्पन्नः विनि र्जितात्माप्राणायामादिभिर्जितान्तःकरणः अतएवविमलान्तराशयोविशुद्धचित्तः विज्ञानदृक्विज्ञानएवदृक्भानंयस्यसः द्रष्टृदृश्यभा

विविक्तआसीनउपारतेन्द्रियोविनिर्जितात्माविमलान्तराशयः।
विभावयेदेकमनन्यसाधनोविज्ञानदृक्केवलआत्मसंस्थितः॥४६

नरहितः अनेननिर्विकल्पकसमाधिरुक्तः अनन्यसाधनः तत्त्वज्ञानातिरिक्तमुक्तिसाधनास्तित्वभ्रमरहितः केवलोऽसङ्गःआत्मसंस्थितः आत्मन्येवसंस्थासमाप्तिः सञ्जातायस्यसतेन नकदापिविषयान्तरसञ्चारवच्चित्तः विभावयेत् ध्यायेत् ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 किंच यदेतत्भूतंभविष्यद्वर्तमानं विश्वंपरमात्मादर्शनंभासकोयस्यतत् तस्यभासासर्वमिदंविभातीति श्रुतेः तत्सर्वकारणेमायासान्निधाना
त्सर्वोपादानत्वेनाभिमतेआत्मनिविलापयेत् उपादानसत्ताव्यतिरेकेणकार्यसत्तांनपश्येत् तादृशस्यलक्षणमाह सम्पूर्णः अवाप्तसमस्तका

विश्वंयदेतत्परमात्मदर्शनं विलापयेदात्मनि सर्वकारणे ॥
पूर्णश्चिदानन्दमयोऽवतिष्ठते न वेद बाह्यं न च किञ्चिदान्तरम् ॥ ४७ ॥

मः तस्यकाम्याभावात् चिदानन्दमयः तद्रूपोऽवतिष्ठते बाह्यमान्तरंच दृश्यंनजानाति सर्वत्रब्रह्मदर्शनादिति भावः ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाधिसिद्धेः पूर्वंयत्कर्तव्यंतदाह । पूर्वमिति । समाधेः सकलविषयव्यासङ्गनिवृत्तिपूर्वकं ब्रह्माकारवृत्तिः समाधिस्ततः पूर्वमखिलंस चराचरंजगत् ओङ्कारमात्रं विचिन्तयेत् । ओङ्कारोमीयतेऽ नयेतिमात्रा प्रमाणं बोधकत्वेन परिच्छेदकोयस्यतथाजानीयात् । तदेवविवृ

पूर्वं समाधे रखिलं विचिन्तये दोङ्कारमात्रं सचराचरं जगत् ॥
तदेव वाच्यं प्रणवो हि वाचको विभाव्यते ज्ञानवशान्न बो-
धतः ॥ ४८ ॥

णोति तदेवेति । जगदेवेत्यर्थः । प्रणवोवाचकोविभाव्यतेएतत्राहिप्रसिद्ध इत्यर्थः । इयंभावनाज्ञानवशादेवनबोधकः । बोधोनिर्विशेषब्रह्मसा क्षात्कारस्तदुत्तरंनेत्यर्थः । तस्यसर्ववृत्त्युपमर्दकत्वात् ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उक्तमर्थं विवृणोति । अकारेति । अकारसञ्ज्ञस्तद्वाच्यः पुरुषो हि विश्वको विश्व एव विश्वकः विश्वशब्देन परिभाषितः अयं जाग्रत्साक्षी विराट् ततः स्वप्नसाक्षी तैजसः तेन पदेन परिभाषितः लिङ्गदेहाभिमानी हिरण्यगर्भ उकारकः उकारप्रतिपाद्य ईर्यते । ततः सुषुप्तिसाक्षी प्राज्ञपदवाच्यो

अकारसञ्ज्ञः पुरुषो हि विश्वको ह्युकारकस्तैजस ईर्यते क्रमात् प्राज्ञो मकारः परिपठ्यतेऽखिलैः समाधि पूर्वं न तु तत्त्वतो भवेत् ॥ ४९ ॥

मायोपाधिको मकारस्तद्वाच्यः परिपठ्यतेऽखिलैर्वेदैः । इयं भावना समाधिपूर्वं समाधेः पूर्वमेव न तत्त्वतः तत्त्वसाक्षात्कारे सति न भवेत् । सर्वस्य ब्रह्मणि प्रविलयात् ॥ ४९ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाविलापन प्रकारमाहद्वाभ्याम् । विश्वंत्विति । उकारमध्ये बहुधाव्यवस्थितं स्थूलदेहनिबंधनंस्थूलदेहाभिमानेन स्थितं विश्वम्पुरुषंत-द्वाचकम्मकारम् च विलापयेत् । तुश्चार्थे । विलीनम्भावयेत् ततस्तैजसंलिङ्गदेहाभिमानिनम् पुरुषं तद्वाचकंप्रणवस्यद्वितीय वर्णमुकारं वि-

विश्वं त्वकारं पुरुषं विलापयेदुकारमध्येबहुधा व्यवस्थितम् ।
ततो मकारे प्रविलाप्यतैजसंद्वितीयवर्णं प्रणवस्य चान्तिमे ॥५०॥

लीनविश्वकम्मकारे विलाप्याविलीनम्भावयित्वा ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तनस्तादृशंमकारंतद्वाच्यंप्राज्ञंचकारणंकारणत्वाभिमानिनंपुरुषमिहात्मनि चिद्घनेपरे विलापयेत् तथाभावयेत् । ततः सोऽहंमर्वोपला
पाधिष्ठानंपरब्रह्मविभावयेत् । तद्विशिनष्टि । सदाविमुक्तिमत् नित्यमुक्तम् । नन्वहंपदार्थस्यरागद्वेषादिमलिनस्यकथं ब्रह्मत्वभावनेसा

मकारमप्यात्मनि चिद्घने परे विलापयेत्प्राज्ञमपीह कारणम् ।
सोऽहं परं ब्रह्म सदा विमुक्तिमद्विज्ञानदृङ्मुक्त उपाधितोऽ
मलः ॥ ५१ ॥

शङ्कयाहंपदार्थंविशिनष्टि । उपाधितोमुक्तः अतएवामलःतथाभावनेसाधनं विज्ञानदृक्विज्ञानं ब्रह्ममात्रप्रत्ययाविच्छेदरूपादृक् निदिध्या
सनं सत्साक्षात्कारेसाधनंयस्यसः ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंभावनवतोलक्षणमाह । एवमिति । उक्तप्रकारेणसदाजातापरमात्मन्येकभावना यस्यसः परिविस्मृतमखिलंपुत्रदेहादियेनसः । अत एवस्वस्वरूपानन्देनैवतुष्टःनतुविषयानन्देन । तस्यपरिणामेदुःखरूपत्वात्ततो विरक्तइत्यर्थः । साक्षान्नित्यात्मनिसुखप्रकाशकः साक्षा

एवं सदा जातपरात्मभावनः स्वानन्दतुष्टःपरिविस्मृताखिलः ॥
आस्ते स नित्यात्मसुखप्रकाशकः साक्षाद्विमुक्तोऽचलवारिसि
न्धुवत् ॥ ५२ ॥

दौपाधिकनामरूपभेदराहित्येननित्यमखण्डितमात्मस्वरूपंयत्सुखंप्रकाशश्चतद्रूपः एवंरूपो विमुक्तोजीवन्मुक्तः । अचलंनिश्चलंवारियस्यताद्दशसिन्धुवदास्ते । विषयसम्बन्धरूपलहरीरहितआस्तेइत्यर्थः ॥ ६२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशस्यमत्प्राप्तिर्भवत्येवेत्याह । एवमिति । उक्तप्रकारेणसदाऽभ्यस्तसमाधेर्योगिनः निवृत्ताःसर्वेषामिन्द्रियाणांगोचराविषयाःशब्दादयो यस्य विनिर्जिताअशेषारिपवःकामादयोयेनतस्य । तज्जयेनविषयेष्वन्तःकरणाप्रवृत्तिः । अतएव सर्वज्ञत्वनित्यत्वनित्यतृप्तत्वबोध

एवं सदाऽभ्यस्तसमाधियोगिनो निवृत्तसर्वेन्द्रियगोचरस्य हि ॥ विनिर्जिताशेषरिपोरहंसदा दृश्यो भवेयं जितषड्गुणात्मनः ॥५३ ॥

रूपत्वस्वतन्त्रत्वनित्यमलुप्तत्वानन्तरूपाषड्गुणायस्यताहृशआत्मजितो वशीकृतोयेनतस्य सदादृश्योभवेयम् । एतेनमद्भक्तस्ययोगिनो ऽहंदृश्योनतुभक्तिविमुखस्येति सूचितम् ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंविधोजीवन्मुक्तःप्रारब्धवशेन अनभिमानोभोगानश्नँस्तिष्ठेत् ततोमय्येवाविलीयते मद्रूपोभवतीत्याह । ध्यात्वैवमिति ॥ ५४ ।

ध्यात्वैवमात्मानमहर्निशं मुनिर्तिष्ठेत्सदा मुक्तसमस्तबन्धनः ॥
प्रारब्धमश्नन्नभिमानवर्जितो मय्येवसाक्षात्प्रविलीयते ततः ५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सर्वधर्मापेक्षयाऽयमन्यधर्मोऽध्यायानित्याह । आदौचेति । भवसंसारमादिमध्यान्तमानेषु सर्वथा भयशोकयोः कारणं विदित्वा तत्कारणी
भूतं विधिवादं यजेतस्वा।दभिश्चोदितं बोधितं समस्तं कर्ममार्गं काम्यं हित्वा अखिलात्मनां जीवानां स्वरूपभूतं मामात्मानं परमेश्वरं भजेत् । य

आदौ च मध्ये च तथैव चान्ततो भवं विदित्वा भयशोक कारणम् ॥ हित्वा समस्तं विधिवादचोदितं भजेत्स्वमात्मान मथाखिलात्मनाम् ॥ ५५ ॥

थाधनस्यार्जनेनादौ दुःखं मध्ये पालनकृतं तत्र राजादिकृतं भयमन्ते नाशे शोकपर्यवसायि दुःखमेवं पदार्थमात्रे द्रष्टव्यम् ॥ ५५ ॥

CC-0. In Public Domain. Digitization by eGangotri

मय्यभेदभावनया नामरूपाविभागेन तद्रूप एवभवतीत्यमुमर्थं सदृष्टान्तमाह । आत्मनीति । आत्मनिसर्वाधिष्ठानेमयिइदंस्वस्वरूपं जीवमभेदेनविभावयन्यदा । तिष्ठतीतिशेषः । तदामयात्मनापरमेश्वरेणाऽभेदेनभवति अभिन्नोभवति । तत्रदृष्टान्तः यथासमुद्रेप्रविष्टं नद्यादि

आत्मन्यभेदेन विभावयन्निदं भवत्यभेदेन मयाऽत्मनातदा ॥ यथाजलं वारिनिधौ यथापयः क्षीरेवियद्व्योम्न्यऽनिले यथाऽनिलः ॥ ५६ ॥

जलंसमुद्रएव यथाक्षीरेगवादिक्षीरेप्रक्षिप्तंपयःक्षीरमेव यथाव्योम्निमहाकाशेघटाद्यवच्छिन्नाकाशोघटादिभङ्गे च यथाचर्मभस्त्रिकाद्यवच्छिन्नोवायुरनिलेमहावायौ नामरूपाविभागेनैकीभवतीत्यर्थः ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमात्मतत्त्वज्ञस्य जगत्सत्यत्वभ्रमःस्वतएवापैतीत्याह । इत्थमिति । हिरण्यर्थे । लोकसंस्थितोऽपिजीवन्मुक्तिदशायांप्रारब्धवशाल्लोकव्यवहारंकुर्वन्नपिजगन्मृषैवेतिविभावयनसन् यदियदा इत्थमीक्षते ऐकात्म्यं जानीयात्तदा निवृत्तजगत्सत्यत्वभ्रमो भवतीति शेषः । तत्र हेतुः श्रुतियुक्तिमानतोनिराकृतत्वात् । अतोऽन्यदार्तमित्यादिश्रुतिरूपात् जगन्मिथ्यादृश्यत्वात् शुक्तिरजतवदितितदुपबृंहितानुमानरू

इत्थं यदीक्षेत हि लोकसंस्थितो जगन्मृषैवेतिविभावयन्मुनिः ॥
निराकृतत्वाच्छ्रुतियुक्तिमानतो यथेन्दुभेदो दिशि दिग्भ्रमा
दयः ॥ ५७ ॥

पात्मानतःप्रमाणतोनिराकृतत्वात् तत्रदृष्टान्तोयथेन्दुभेदः एकचन्द्रेद्विचन्द्रत्वभ्रमस्तदेकत्वज्ञानेननिवर्तते यथाच दिशिप्राच्यादौअन्यदिक्त्वभ्रमः सोऽपितत्त्वज्ञानान्निवर्तते । एवंभ्रमतःपुरुषस्य दिक्षुभ्रमणाद्भ्रमोनिकटवर्तिवृक्षादौच भ्रमणभ्रमस्तत्स्थैर्यज्ञानेन निवर्तते तद्वत् ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशज्ञानेमदाराधनमेवोपायइत्याह । यावदिति । अखिलं जगन्मदात्मकंमदधिष्ठानकंमाद्विवर्तभूतंयावन्नपश्येत्तावन्मत्प्राप्तयेश्रद्धालुः भगवदाराधनमेवज्ञानप्रापकमित्यत्र दृढविश्वासवान् अतिशयेनोर्जिताद्वृद्धिमतीभक्तिर्मयिभगवतिपूज्यताबुद्धिरूपालक्षणं चिह्नंयस्यसः ।

यावन्नपश्येदखिलं मदात्मकं तावन्मदाराधनतत्परो भवेत् ॥
श्रद्धालुरत्यूर्जित भक्तिलक्षणो यस्तस्य दृश्यो ऽहमहर्निशं हृदि ॥ ५८ ॥

तावन्मदाराधननिष्ठोभवेत् एवंहितस्यहृदि अहमहर्निशंदृश्योभवा मियेयथामांप्रपद्यन्ते तांस्तथैवभजाम्यहमितिस्मृतेः ॥ ५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वोक्तवचनजातस्य श्रुतिसमत्वं कथमेतदालोचनमपिमदाराधनप्रतिबन्धकदुरितध्वंसोपायइत्याह रहस्यमिति । श्रुतिसारसङ्ग्रहत्वेनाति

रहस्यमेतच्छ्रुतिसारसङ्ग्रहं मया विनिश्चित्य तवोदितं प्रिय ॥
यस्त्वेतदालोचयतीहबुद्धिमान् स मुच्यते पातकराशिभिः
क्षणात् ॥ ५९ ॥

गोपनीयता अप्रमाणशङ्काकलङ्कराहित्यंसूचितम् । आलोचयतिसम्यग्विचारयति ॥ ५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथ भगवानुक्तमेवार्थसंक्षेपेण दार्ढ्यायपुनराह भ्रातरिति । यदीतियादित्यर्थे । यदीदंजगत् परिदृश्यते तत्सर्वंमायैवेतिज्ञात्वेति शेषः चेतसासर्वंपरिहृत्यतत्रौदासीन्यंकृत्वामद्भावनयामदैक्यभावनया भावितंशुद्धंमानसंयस्यतादृशास्तिष्ठ । इत्युपदिश्याशिषंप्राह निरामयः

भ्रातर्यदीदं परिदृश्यते जगन्मायैव सर्वं परिहृत्य चेतसा॥मद्भावनाभावितशुद्धमानसः सुखी भवाऽऽनन्दमयो निरामयः ६०

सन्सुखीभव । सर्वदुःखनिवृत्त्योतिभावः । ततोऽन्तरङ्गामन्यामाशिषमाह आनन्दमयोभवेति तद्रूपोभवेत्यर्थः । यद्यपिपूर्वमानन्दरूपत्वमस्त्येवतथाऽपितत्प्राप्तिर्विस्मृतकंठस्थभूषणप्राप्तिवत ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu
CC-0. In Public Domain. Digitization by eGangotri

एवंरीत्यास्वोपासकस्यलोकपावनत्वमाह। यइति । कदावा यदाकदाचिदित्यर्थः । हृदानिर्मलेनान्तःकरणेन यो मामगुणं प्राकृतसत्त्व रजस्तमोरूपगुणरहितम् । सच्चिदानन्दरूपत्वात् । अतएवगुणाद्व्याकृतात्परंमायातीतम् । यदिवायद्वत्वर्थे । गुणात्मकं सर्वज्ञत्वा-
॥ ३१ ॥ दिलोकोत्तरलावण्यादिगुणवानात्मामूर्तिर्यस्यतं दृश्यमानं रूपं सेवते । सद्विविधोऽप्युपासकः अहं मत्स्वरूपएव । मामकइत्यर्थोवा । प्रि-

य: सेवते मामगुणं गुणात्परंहृदा कदा वा यदि वा गुणात्मकम् ॥ सोऽहंस्वपादाञ्चितरेणुभि: स्पृशन्पुनाति लोकान्त्रितयं यथा रवि: ॥ ६१ ॥

योऽहिज्ञानिनोऽसर्थमहंमचममप्रिय इत्युक्तेः । तादृशोभक्तःस्वपादकमरेणुभिःसंस्पृशन् लोकत्रयमपि पुनाति । अज्ञानध्वान्तनिरसने नपवित्रीकरोति । यथारविःस्वकरैर्जगद्वितिमिरीकरोति तद्वत् ॥ ६१ ॥ ॥ ३१ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानीमेतद्ग्रन्थार्थालोचनासमर्थस्यपाठमात्रतोऽपिमहत्फलमाह । विज्ञानंविज्ञानजनकं करणव्युत्पत्त्येतिबोध्यम् । वेदान्तैरुपनिषद्वाक्यैर्वेद्यंचरणंजगज्जन्मादिलक्षणंकर्मयस्यतेन ननुपाठमात्रादेतादृशमहत्फलप्राप्तिःकथमित्याशङ्क्यभवत्येवेति सूचयंस्तत्रहेतुमाह । मद्वचने

विज्ञानमेतदखिलंश्रुतिसारमेकं वेदान्तवेद्यचरणेनमयैवगीतम् ।
यःश्रद्धया परिपठेद्गुरुभक्तियुक्तो मद्रूपमेति यदि मद्वचनेषुभक्तिः
॥ ६२ ॥ इतिश्री अध्यात्मरामायणे रामगीता समाप्ता ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसम्वादे उत्तरकाण्डे श्रीरामगीतायां पञ्चमःसर्गः ॥ ५ ॥

षुभक्तिर्विश्वासोयदीतिअर्थाद्गुरुवाक्यविश्वासस्यैव फलदायकत्वादितिभावः ॥६२॥ इत्यध्यात्मरामायणेउमामहेश्वरसम्वादे उत्तरकाण्डेसेतौपञ्चमःसर्गः ॥ ६२ ॥   श्रीरामचन्द्रार्पणमस्तु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीराममन्त्रःखलु तारकाख्यः संसारसन्तारणसुप्रसिद्धः ॥ भक्-
त्याऽप्यभक्त्या समुपासितोयः श्रेयांसि सर्वाणि ददात्यवश्य
म् ॥ १ ॥ तन्तारकंसम्प्रतिपादयन्ती श्रीरामगीता सकलैः सुसे
व्या ॥ विज्ञप्तिमित्थंजनको विनीतः समर्पयत्यार्यजनेषुहर्षात् २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प,	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति
स्यर्द्धि	स्पर्द्धि	१	२	१	शाधि	शाधि	३	२	६	नाशे	नाशो	६	१	१
जीव्य	जीन्य	१	२	३	व्यत्र	व्यव	४	१	१	नन्वितिश	नन्वितिशे	६	२	१
सम्वीन्धनीः	सम्वन्धिनीः	२	२	१	ष्ठामे	ष्ठानमे	४	२	३	त्विदा	विदा	६	२	२
व्रह्म	ब्रह्म	२	१	२	व्रह्म	ब्रह्म	४	२	१	मेत्रे	मेव	६	२	२
व्रह्म	ब्रह्म	२	१	६	वलेन	वलेन	४	२	७	व्येतीत	व्यतेति	७	१	१
वोधोऽसि	बोधोऽसि	३	१	४	निघृत्ते	निवृत्ते	५	१	१	वीरहा	वीरहा	७	१	१
संवन्ध	सम्बन्ध	३	१	७	कत्व	कत्वा	५	१	१	सद्दष्ट	सद्दृष्ट	८	१	३
भवस्यंससार	भवस्यसंसार	३	२	१	नक	नैक	५	१	१	विशुद्धं	विशुद्ध	८	२	१
न्सार	सार	३	२	२	बेदान्त	वेदान्त	५	१	१	कारांतः	कारान्तः	८	२	२
पर्वग	पवर्ग	३	२	२	पूर्वं	पूर्वे	५	१	२	वृत्ति	वृत्ति	९	१	१
वारिधि	वारिधि	३	२	२	वुद्ध्या	बुद्ध्या	५	१	६	स्वत्राना	स्वना	९	२	१
					एवं	एव	५	१	६	वृत्यु	वृत्यु	१०	१	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
रीप	रपि	११	२	१
नर्दष्टा	नर्दष्टा	१२	१	४
वर्द्धे	वर्द्धे	१२	१	७
त्याभिः	त्माभिः	१२	२	६
शुद्द	शुद्ध	१३	१	१
जीवया	जीवयो	१३	१	२
निर्वाध	निर्बाध	१४	१	१०
गव्र	भव्र	१५	१	४
अर्जोद्व	अर्जोऽद्व	१६	२	६
द्वात्	द्वात्	१७	२	१
ल्राभ	ल्राभे	१८	१	८
इतिः	इति	१८	२	२
ज्ञानन	ज्ञानेन	१९	१	१
वुद्धया	वुद्धया	२०	१	५
रागादि	रागादे	२१	१	३
विलय	विलय	२१	१	७
धम	धर्म	२१	२	१
म्वस्य	म्वंयस्य	२१	२	२
वुवै	बुधै	२३	१	५
एव	एवं	२३	२	१
द्रष्ट	द्रष्टृ	२४	१	२
विभाव्यत	विभाव्यते	२५	१	४ मू
लिङ्गेद	लिङ्गदे	२६	१	२
वोधकः	वोधतः	२५	१	६
विज्ञानं ब्रह्म	विज्ञानंनिादि ध्यासनं ब्रह्म	२६	२६	३
भेदेरा	भेदरा	२७	१	६
रुपा	रूपाः	२७	२	१
आतम	अत्मा	२७	२	१
सुनिति	सुनिास्ति	२८	१	२
भव	भवं	२८	२	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
तदकत्व	तदेकत्व	२९	२	७	वतथाऽ	वतथाऽ	३१	१	६	मद्वचने	मद्वचने	३२	१	२
भ्रमण	भ्रमणं	२९	२	८	कंठ	कण्ठ	३१	१	२	तन्तारकं	तत्तारकं	३२	२	३

नेपाल पाशुपत, यन्त्रालये मुद्रिता.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इती रामगीता सटीका समाप्ता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ॡ·नं·१६६४३

अथ रामगीता सटीका प्रारभ्यते ॥

मू० २।-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ रामंरत्नकिरीटकुण्डलयुतं केयूरहारान्वितं
सीतालङ्कृतवामभागममलं सिंहासनस्थं विभुम् ॥ सुग्रीवादि
कपीश्वरैःसुरवरैः संसेव्यमानं सदा विश्वामित्रपराशरादिमुनि-
भिः संस्तूयमानं भजे ॥ १ ॥ इतिध्यात्वा ॥ श्रीमहादेवउवाच॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशाय नमः ॥ ध्यायेत्वाजानुबाहुं धृतशरधनुषं बद्धपद्मासनस्थं पीतंवासोवसानं नवकमलदलस्पर्द्धिनेत्रं प्रसन्नम् ॥ वामाङ्कारूढ सीतामुखकमलमिलल्लोचनं नीरदाभं नाना लङ्कारदीप्तं दधतमुरुजटामण्डलं रामचन्द्रम् ॥ १ ॥ ततइति जगतां यानि मङ्गलानि आनन्दास्तेषामुपजीव्यभूतं मङ्गलं ब्रह्मानन्दः सएवात्मास्वरूपं तेन तस्यैवानन्दस्यान्यानि भूतानिमात्रामुपजीवन्तीति श्रुतेः मङ्ग

ततोजगन्मङ्गलमङ्गलात्मना विधाय रामायणकीर्तिमुत्तमाम् ॥
चचार पूर्वाचरितं रघूत्तमो राजर्षिवर्य्यैरभिसेवितं यथा ॥ १ ॥

लानाञ्चमङ्गलमिति स्मृतेश्च किंच जगतां मङ्गलं कल्याणं यस्मात्तादृशकल्याणरूपआत्मामूर्तिस्तया उत्तमांश्रोत्रादीनां मोक्षदत्वेना त्युत्तमां रामायणकीर्तिं वाल्मीक्यादि कृत नानाविध रामायण प्रवर्तिकां रावणवधादिजां कीर्तिंविधाय स्थितोरघूत्तमः ततः सीताप रित्यागानन्तरं पूर्वैः स्ववंशजैराचरितं प्रजापालनसत्कथाश्रवणादिकं केवलंतत्पूर्वजैरेवाचरितमितिन किंत्वन्यैरपि राजर्षिश्रेष्ठैर्य थाऽभिसेवितं तथाचचार कृतवान् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उदारागुरुदेवविश्वासलक्षणमहागुणवती यद्वा उदारा दानशीलाबुद्धिर्यस्य तेन पुरातनीः प्राचीनराजसम्बन्धिनीः शुभाः धर्माधर्मनिर्णेत्रीः प्रमत्तस्य स्वगोमण्डलमिश्रितब्राह्मणगोदानात् प्रमत्तस्य नृगस्य राज्ञो द्विजस्य शापात्तिर्यक्त्वमाह तेनाज्ञातकृतब्रह्मस्वापहारेण परमधा

सौमित्रिणापृष्ट उदारबुद्धिना रामःकथाःप्राह पुरातनीःशुभाः ॥
राज्ञः प्रमत्तस्य नृगस्य शापतो द्विजस्य तिर्यक्त्वमथाह राघवः ॥ २ ॥

र्मिकस्यापीदृस्यवस्थेति सर्वथाब्रह्मस्वविमुखताधर्मइतिसूचितम् ॥ १ ॥

CC-0. In Public Domain. Digitization by eGangotri

एकान्तेविजने उपस्थितंप्राप्तम् विनयान्वितः सन् भक्त्यागुरुरयमिति बुद्ध्या प्रणम्य अनेनगुरूपसदनप्रकारउक्तः आसादितंशुद्धंभाव

कदाचिदेकान्त उपस्थितंप्रभुं रामं रमालालितपादपङ्कजम् ॥
सौमित्रिरासादितशुद्धभावनः प्रणम्यभक्त्याविनयान्वितोऽब्र-
वीत् ॥ ३ ॥

नं भावनाकरणमन्तः करणंयेनसः शुद्धान्तःकरणइतियावत् भगवदुक्तसत्कथाश्रवणेन शुद्धान्तःकरणइत्यर्थः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हे महामते महतीसर्वविषयामतिर्यस्य तस्य संबोधनं त्वं शुद्धबोधोऽसि अनवच्छिन्नचैतन्यरूपोऽसि सर्वदेहिनामात्माऽसि जीवानांतत्प्रतिविम्बत्वात्अधीशोऽसि अन्तर्यामित्वान्नियन्ताऽसि वास्तवभेदाभावाच्च सर्वात्मत्वम् औपाधिकभेदाच्च नियन्तृनियम्यभावोबोध्यः निराकृतिः अस्मदादिवत्स्वार्जितकर्माधीनशरीराकृतिरहितः नन्वेवंसर्वैः कथमेवंनज्ञायतेऽतआह ज्ञानदृशां स्वयमेवप्रतीयसे ज्ञायतेऽ

त्वं शुद्धबोधोऽसि हि सर्वदेहिनामात्माऽस्यधीशोऽसि निराकृतिःस्वयम् ॥ प्रतीयसे ज्ञानदृशां महामते पादाब्जभृङ्गाहितसङ्गसङ्गिनाम् ॥ ४ ॥

नेनेतिज्ञानं वेदान्तवाक्यजातं तदेवदृक्दर्शनसाधनंयेषां तेषामितिसंवन्धसामान्येषष्ठी तैरित्यर्थः तादृशदृक्लाभश्च त्वद्भक्त्यधीनइत्याह पादेति त्वच्चरणकमलयोर्भृङ्गवदाहितःकृतः सङ्गोयेन तादृशान्तः करणसङ्गवतां त्वच्चरणकमल सक्तान्तः करणवतामित्यर्थः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ प्रार्थयते अहमिति भवस्यं संसारस्यापवर्गो निवृत्तिर्यस्मात्ताद्दशं तव पादाम्बुजं प्रपन्नोऽस्मि शरणं प्राप्तोऽस्मि योगिभावितं योगीभिः संसारमुक्त्यै भावितम् अनेन तस्य भवापवर्गत्वे सदाचारः प्रमाणमुक्तम् प्रार्थनीयमाह अपारवारिधिरूपं यदज्ञानं संसारमूलकारणं यथासुखम

अहं प्रपन्नोऽस्मि पदाम्बुजं प्रभो भवापवर्गं तव योगिभावितम् ॥ यथाञ्जसाज्ञानमपारवारिधिं सुखं तरिष्यामि तथाऽनुशाधि माम् ॥ ५ ॥

क्लेशेन तरिष्यामि तथा मामनुशाधि शिक्षय अपारवारिधिमित्यनेन सपारप्रसिद्धसमुद्राद्व्यतिरेक उक्तः अशक्यतरणताऽनेन ध्वनिता ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथोत्तरमवतारयति श्रुत्वेति रामः सौमित्रिवचः श्रुत्वा अथशब्दोवाक्यालङ्कारे तदा श्रवणाव्यवहितकाले एवप्रपन्नानां भक्तानामार्ति संसारदुःखहरतिताद्दशः प्रपन्नाश्रमादिहीना भक्तानुग्रहपरा च धीर्यस्यसः क्षितिपालानां राज्ञां भूषणभुतोज्ञानरूपतमसउपशान्तये त

श्रुत्वाथ सौमित्रिवचोऽखिलं तदाप्राह प्रपन्नार्तिहरःप्रसन्नधीः ॥
विज्ञानमज्ञानतमोपशान्तये श्रुतिप्रपन्नं क्षितिपालभूषणः॥ ६ ॥

दर्थम् सन्धिरार्षः श्रुतिभिः तमेवविदित्वाऽतिमृत्युमेतीत्यादिश्रुतिभिः प्रपन्नं तत्फलकत्वेन बोधितं विज्ञानमात्मतत्वज्ञानामिति सामान्य तः प्रथमंप्राह ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथताद्दशज्ञानप्राप्तये क्रमेणबहिरङ्गान्तरङ्गसाधनान्याह आदाविति स्ववर्णाश्रमेषु शास्त्रेण वर्णिता याः क्रियानित्यनैमित्तकयज्ञदाना दिरूपास्ताः कृत्वा समासादितशुद्धमानसः प्राप्तान्तःकरणशुद्धिः तत्पूर्वमुपात्तसाधनः तदनुष्ठानपूर्वकमेवउपात्तानिसाधनानि शम दमादीनियेन तादृशः अनेनकर्मणां बहिरङ्गत्वं शमादीनामन्तरङ्गत्वं स्फुटमेवोक्तम् किंच शमदमवैराग्यदार्ढ्यपर्यन्तं कर्मानुष्ठामेवेति

आदौ स्ववर्णाश्रमवर्णिताः क्रियाः कृत्वा समासादितशुद्धमानसः
समाप्य तत्पूर्वमुपात्तसाधनः समाश्रयेत्सद्गुरुमात्मलब्धये॥ ७॥

सूचितम् ततस्तत्कर्मानुष्ठानं समाप्य त्यक्त्वा संन्यस्येतियावत् आत्मलब्धये आत्मज्ञानाय तत्फलकाय तत्वमस्यादिवाक्यार्थविचारा- य सद्गुरुंश्रोत्रियंब्रह्मनिष्ठमित्यादि लक्षणलक्षितं समाश्रयेत् सेवेत अनेनव्युत्पत्तिबलेन स्वयमेववाक्यार्थविचारः क्रियमाणो न फला- येति सूचितम् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसारस्यभ्रमिमच्चक्ररूपत्वात्तन्निवृत्तेश्चतत्कारणाज्ञाननिवृत्तिमूलकत्वदज्ञाननिवृत्तेश्चतत्त्वज्ञानकसाध्यत्वात्तत्त्वज्ञानस्यचवेदान्त विचारसाध्यत्वात्तदर्थंगुरुसमाश्रयणमित्याह क्रियेति भवःसंसारश्चक्रवद्विपरिवर्तमानईर्यते कथ्यते तदेवोपपादयति आदृताआदरपूर्वंपूर्वजन्मार्जिताक्रियाएनस्यशरीरोद्भवस्यजन्मनोहेतुः तत्रजन्मनिसुरागिणोविषयाभिलाषवतः तौ शास्त्रप्रसिद्धौ धर्मेतरौ धर्माधर्मौ प्रियाप्रियौसुखदुः

क्रियाशरीरोद्भवहेतुरादृताप्रियाप्रियौतौभवतःसुरागिणः ॥
धर्मेतरौतत्रपुनः शरीरकंपुनः क्रियाचक्रवदीर्यतेभवः ॥ ८ ॥

खजनकौभवतःकस्यचिदधर्मएवसुखत्वबुद्ध्याप्रवृत्तिः कस्यचिद्धर्मएवंकदाचिदित्यप्यूह्यम् एवंतत्रोत्पादितकर्मणापुनःशरीरंपुनःक्रियाइत्येवंचक्रवद्विपरिवृत्तिः । यथाचक्रेभ्राम्यमाणेऽधोभागः कदाचिदुपरिउपरितनश्चाधः पुनरुपरिपुनरधएवंजन्मक्रिययोर्जन्यजनकभावेनपरिवृत्तिरिति बोध्यम् ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यचाज्ञानमेवमूलमित्याह अज्ञानमेवेति अत्रविधौसंसारनिवृत्तिलक्षणेकर्तव्येऽर्थेतद्धानमेवमूलकारणत्वादज्ञानहानमेवविधीयते साध-
नत्वेनेतिशेषः ननुकर्मैवतन्नाशकमस्तुकिंज्ञानेनेत्याशङ्क्याह विद्यैवज्ञानमेवतन्नाशविधौमूलाज्ञाननाशनेपटीयसीसमर्थानकर्मसमर्थमितिशेषः

अज्ञानमेवास्यहिमूलकारणंतद्धानमेवात्रविधौविधीयते ॥ विद्यै
वतन्नाशविधौपटीयसीनकर्मतज्जंसविरोधमीरितम् ॥ ९ ॥

यतस्तत्तज्जमज्ञानजम् आत्मस्वरूपाज्ञानजन्यदेहाद्यभिमानजन्यत्वात्कर्मणोज्ञानजन्यत्वंवोध्यम् ननुतज्जन्यस्यापितन्नाशकत्वंवृश्चिककर्क
व्यादौदृष्टमित्याशङ्क्यतज्जन्यत्वंवाननाशकत्वप्रयोजकंकिन्तुसविरोधत्वमेवेत्याह यतसविरोधंतदीरितंनाशकमुक्तमित्यर्थः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतएवकर्मणानाज्ञानहानिरित्याह नाज्ञानेत्यादि यतःकर्मणाविरोधाभावान्नाज्ञाननाशनापिरागनाशोवस्तुतः कर्मानुष्ठानात्पुनः सदोषंक्षयिफलत्वादिदोषविशिष्टंकर्मैवोद्भवेत्कर्मणश्चपुनःसंसारएवेतिनमुक्तिमत्याशा ततस्तस्माद्बुधोविवेकीज्ञानविचारवान् ज्ञायतेऽनेने·

नाज्ञानहानिर्नचरागसङ्क्षयोभवेत्ततः कर्मसदोषमुद्भवेत् ॥ ततः पुनः संसृतिरप्यवारितातस्माद्बुधोज्ञानविचारवान्भवेत् ॥ १० ॥

तिज्ञानंवेदान्तवाक्यंतद्विचारवान्भवेत ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानींज्ञानस्यैवमोक्षहेतुत्वंनतुज्ञानकर्मसमुच्चयत्वादंदूषणायानुवदतिसार्धेन नन्विति नान्वितिशङ्कायाम् यथाविद्यावेदमुखेनश्रुतिपुराण-
लक्षणेन ब्रह्मविदाप्नोतिपरम् इत्यादिनापुरुषार्थसाधनमुक्ता तथा उभाभ्यांमवपक्षाभ्यांयथाखेपक्षिणांगातिः तथैवज्ञानकर्मभ्यांप्राप्यते
ब्रह्मशाश्वतम् इत्यादिनाक्रियाऽपितत्साधनत्वेनोक्ता किंच क्रियाकर्तव्यत। तृतीयार्थेप्रथमा कर्तव्यतयाआवश्यकेकृत्यअवश्यकर्तव्यत-

ननुक्रियावेदमुखेनचोदितायथैवविद्यापुरुषार्थसाधनम् ॥ कर्त्तव्य
ताप्राणभृतःप्रचोदिताविद्यासहायत्वमुपैतिसापुनः ॥ ११ ॥

याप्रचोदितानित्यनैमित्तिकरूपा एवंचनदकरणेप्रत्यवायोत्पत्त्याज्ञानोत्पत्तिरेवनस्यात् तस्मात्सापुनर्विद्यायाःसहायत्वंप्राप्नोतिघटेजन-
नीयेयथादण्डचक्रादीनांपरस्परसहायता ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्तव्यमेतीतिमत्वाक्यमवेविवृणोति कर्मेति वीरहा वा एष देवानां योऽग्निमुद्वासयते यावज्जीवमग्निहोत्रं जुहोति इतिश्रुतिः तत्रासिद्धान्तीशङ्कते नन्विति ध्रुवंस्थिरंकार्यमिदंपुरुषार्थमोक्षजनिकाविद्यायतः स्वतन्त्राविनाऽपिसहायेन स्वकार्यसंपादनेसमर्था यथातेजस्तिमिरनिवर्तन-

कर्माकृतौदोषमपिश्रुतिर्जगौतस्मात्सदाकार्यमिदंमुमुक्षुणा॥ननु स्वतन्त्राध्रुवकार्यकारिणीविद्यानकिञ्चिन्मनसाऽप्यपेक्षते ॥ १२

समर्थंमनसाऽपिकिञ्चित्सहायभूतंवस्तुनापेक्षते तथाफलेजननीयेसहायान्तरसंभावनाऽपिनेतिभावः अनेनविद्याफलजननेनिरपेक्षास्वतन्त्र-त्वात्तेजोवदित्यनुमानंसूचितम् ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समुच्चयवादीपरिहराति नेति त्वदुक्तनेत्यर्थः सत्यकार्यः अक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवति इत्यादिवेदनबोधितःस्थिरकार्योऽपि-
अध्वरः यथाऽन्यानपिकारकादिकान् आरादुपकारकप्रयाजाद्यङ्गानिदेशकालादीनिचप्रकाङ्क्षते तथाविद्यापिअग्निहोत्रंजुहोतिइत्यादिवि

नसत्यकार्योऽपिहियद्वदध्वरः प्रकाङ्क्षतेऽन्यानपिकारकादिकान्
तथैवविद्याविधितः प्रकाशितैर्विशिष्यते कर्मभिरेवमुक्तये ॥ १३ ॥

धिवाक्यतःतत्समूहेनप्रकाशितैः कर्मभिः सहितैवमुक्तयेविशिष्यतइत्यर्थः विद्याफलदानेकर्मापेक्षा अङ्गित्वात् प्रयाजाद्यङ्गापेक्षदर्शा
दिवादितिसत्प्रतिपक्षानुमानमनेनसूचितम् ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदनूद्यसिद्धान्तीदूषयति केचिदिति यत्केचिद्वितर्कवादिनशर्तज्ञानकर्मणोसमुचित्यमुक्तिसाधनंवदान्तितदप्यसत् यथाकेवलंकर्म मोक्ष साधनमित्यमत्तथातन्मीलितमित्यप्यसत् तत्रहेतुर्दृष्टविरोधकारणात् दृष्टायोविरोधः सर्वलोकदृष्टविरोधरूपात्कारणात्तदसदित्यर्थः विरो

केचिद्वदन्तीतिवितर्कवादिनस्तदप्यसद्दृष्टविरोधकारणात् ॥
देहाभिमानादभिवर्धतेक्रियाविद्यागताहङ्कृतितःप्रसिद्ध्यति १४

धमेवाह देहाभिमानात्क्रियावर्धतेअनात्मनिदेहादावात्मत्वाभिमानात्क्रियावृद्धिः विद्यातुगताहङ्कृतितः गताहङ्कृतिर्यस्यतस्यनष्टाहङ्कृतेः प्रसिद्ध्यति सार्वविभक्तिकस्तसिः एवंचाहङ्कारसत्तामूलकत्वात्क्रियाज्ञानयोः समुच्चयोविरुद्धइत्यर्थः ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथपूर्वपक्षयुक्तानुमानंदूषयन्विद्यास्वरूपमाह विशुद्धंविज्ञानंयेभ्यस्तेषांवेदान्तवाक्यानांयद्विशेषेणरोचनंरलयोरभेदादालोचनंविचार
स्तेनाञ्चिताप्रापितायाचरमाआत्मवृत्तिर्ब्रह्माकारांतःकरणवृत्तिः साविद्येतिभण्यतेविद्वद्भिरितिशेषः पुनःसमुच्चयवारणायविद्याकर्मणो
वैषम्यमाह कर्मयज्ञादिअखिलकारकादिभिःकर्तव्यकर्मादिभिरङ्गैश्चसहितंसदुदेति फलोन्मुखंभवति विद्यापुनरखिलकारकादीनिहन्ति

विशुद्धविज्ञानविरोचनाञ्चिताविद्याऽऽत्मवृत्तिश्चरमेतिभण्यते ॥
उदेतिकर्माखिलकारकादिभिर्निहन्ति विद्याऽखिल कारकादि-
कम् ॥ १५ ॥

तत्रकर्तृत्वादिबुद्धिंनिहन्ति सकलव्यापारपरित्यागेनब्रह्मणिसमाप्तिर्हिविद्या अतःस्वोत्पत्तौचित्तशुद्धिद्वाराकर्मसापेक्षास्वफलेजनयितव्ये-
तन्निरपेक्षैवान्यथाविद्यास्वरूपस्यैवभङ्गापत्तेरितिपूर्वपक्षयुक्तहेतोरसिद्धिरितिभावः ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपसंहरन्मुमुक्षोर्वृत्तिप्रकारमाह तस्मादिति विद्याविरोधाद्विद्यायाःकर्मणासह विरोधेनसमुच्चयोनभवेत्तस्मात्सुधीर्मुमुक्षुरशेषतःकर्मत्यजे-
त् काम्यंतुसर्वथात्याज्यमेवनित्यनैमितिकमपियावच्चित्तशुद्धिकर्तव्यमेव ततोऽपिब्रह्माणिचित्तस्थैर्यपर्यन्तं कर्तव्यमेव ततस्तदनुसन्धानप्र-

तस्मात्त्यजेत्कार्यमशेषतः सुधीर्विद्याविरोधान्नसमुच्चयोभवेत् ।
आत्मानुसन्धानपरायणःसदा निवृत्तसर्वेन्द्रियवृत्तिगोचरः १६

तिबन्धकत्वात्प्रयोजनाभावाच्चतदापित्याज्यमेवेतिभावः इदानींमुमुक्षुकर्तव्यमाह निवृत्ताःसर्वेषामिन्द्रियाणां गोचराविषयाःशब्दादयोय
स्मात्तादृशःसन् आत्मनःसच्चिदानन्दस्यानुसन्धानमेवपरमयनंप्राप्यंयस्यतथाविधोभवेत् अत्रेन्द्रियप्रत्याहारःकर्तव्यत्वेनोक्तस्तेनतत्पूर्वप्रा-
णायामाद्यर्थादाक्षिप्तम् ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रागिविरागिभेदेनकर्मणोकर्तव्यताकर्त्तव्यतेआहयावदिति माययाविद्ययाशरीरादिष्ववानात्मसुआत्मधीरहङ्कर्तेत्यादिरूपायावद्वर्ततेतावद्वि

धिवादकर्मणाम् विधिर्यजेतत्यादिश्रुतिर्वादःकर्तव्यतावोधकोयेषांकर्मणांविधेयोवश्यवर्त्तितत्कर्मकर्ताभवेत तदपगमेतुतदाखिलं जगन्नेतीति

यावच्छरीरादिषुमाययात्मधीस्तावद्विधेयोविधिवादकर्मणाम् ॥
नेतीतिवाक्यैरखिलंनिषिद्ध्य तज्ज्ञात्वापरात्मानमथत्यजेत्क्रि
याः ॥ १७ ॥

वाक्यैः अथातआदेशोनेतिनेतिइत्यादिवाक्यैर्निषिध्य मिथ्यात्वेननिर्णीयताद्विलक्षणतयासत्यत्वेनपरमात्मस्वरूपंज्ञात्वाक्रियास्त्यजेत्निरू ॥ ९ ॥
पितमेतत् ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मविज्ञानेसत्यवश्यमविद्या निवर्ततइत्याह यदेति आत्मनिशुद्धेन्तःकरणेपरमात्मनईशस्यात्मनोजीवस्यचयोविभेदोमायान्तःकरण रूपोपाधिद्वयकृतोविभेदोभेदस्तस्यभेदकं नाशकंभास्वरंप्रकाशशीलं यद्विज्ञानमितरवृत्त्युपमर्दनपूर्वकंब्रह्माकाराऽखण्डाद्याव्रत्तिर्यदाऽवभाति

यदापरात्मात्मविभेदभेदकंविज्ञानमात्मन्यवभाति भास्वरम् ॥
तदैवमायाप्रविलीयतेऽञ्जसासकारकाकारणमात्मसंसृतेः॥ १८ ॥

असंभावनादितिरस्कारेणोदेति तदैव सकारकाजन्मान्तरप्रापककर्मसहितामायातत्तज्जीवोपाधिभूताविद्याऽञ्जसाझदितिप्रविलीयतेनश्यति ननुतन्नाशेऽपिसंसारनाशःकथमतोमायाविशेषणम् आत्मसंसृतेःकारणंसंसारस्योपादानकारणमेवंचतन्नाशेकार्यनाशोभवत्येवेतिभावः १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं पुनर्दार्ढ्यायाह श्रुतीति तत्त्वमसीत्यादिश्रुतिरूपैःप्रमाणैस्तज्जनितज्ञानेन नाशितासाविद्याकथमपिकार्यकारिणीभविष्यतीति काकुरत्र सर्वथानेत्यर्थः असतःकार्यकारित्वासंभवादितिभावः पुनश्चतस्यानोद्भवइत्याह विज्ञानमात्रादिति अमलाशुद्धाद्वितीयतःद्विती

श्रुतिप्रमाणाभिर्विनाशिताचसाकथंभविष्यत्यपिकार्यकारिणी ॥
विज्ञानमात्रादमलाद्वितीयतस्तस्मादविद्यानपुनर्भविष्यति १९

यात्माविषयकाद्विज्ञानमात्रादितरासहकृतान्निदिध्यासनपरिपाकजज्ञानाद्यतोनष्टातस्मात्सापुनर्नभाविष्यति रज्ज्वज्ञानमूलकस्य सर्पस्य रज्जुज्ञानेन निवृत्तस्ययथानपुनरुत्पात्तिरितिभावः ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्यायाइतरनिरपेक्षायाएवमोक्षकारणत्वमुक्तंयुक्तिपूर्वकंपुनःकथयतिश्रोतृदार्ढ्याय। यदीति। यदिनष्टातत्त्वज्ञाननाशिता सा न पुनः प्रसूयतेनोत्पद्यतेतदाकारणाभावादहंमतिःकथंभवेत्। कथमपिनभवेदित्यर्थः। तदभावाच्चतत्कालेकर्माभावइतिस्वफलजननेसास्वतन्त्राइ

यदिस्मनष्टा नपुनःप्रसूयते कर्ताऽहमस्येति मतिः कथं भवेत् ॥
तस्मात्स्वतन्त्रा न किमप्यपेक्षते विद्या विमोक्षाय विभाति केवला ॥ २० ॥

तरनिरपेक्षैवनाकिमप्यपेक्षते द्वितीयस्य।संभवात् अतः केवलाऽसहायैवविमोक्षायविभातितत्फलिकाभवतीत्यर्थः ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अत्रार्थेश्रुतिरपिप्रमाणमित्याह सेति साप्रसिद्धा नकर्मणानप्रजयाधनेनत्यागेनैके अमृतत्वमानशुः इत्यादिकातैत्तिरीयश्रुतिःप्रशस्तानामर्थ
वादैःप्राशस्त्येनबोधितानामपिकर्मणांन्यासंत्यागंसादरंस्फुटमाह नतुकर्मसमुच्चयमित्यर्थः तथावाजिनां वाजसनेयिनाम् एतावदरे खल्वमृत

सातैत्तिरीयश्रुतिराहसादरंन्यासंप्रशस्ताखिलकर्मणां स्फुटम् ॥
एतावदित्याहचवाजिनांश्रुतिर्ज्ञानंविमोक्षायनकर्मसाधनम् २१

त्वम् इत्यादिका ज्ञानंविमोक्षायसाधनं नकर्मेत्येतदाह ॥ २१ ॥

CC-0. In Public Domain. Digitization by eGangotri

अहङ्कारत्यागरूपकारणवैषम्यात् क्रियाज्ञानयोर्वैषम्यमुक्त्वा फलमप्युक्तमपिवैषम्यमाह विद्येति हेसमुच्चयवादिन् त्वयाक्रतुरग्निष्टोमादिर्वि द्यासमत्वेनदर्शितः परन्तुसमोदृष्टान्तोनोदाहृतः अनेनक्रतुर्विद्यासमः श्रुतिबोधितकर्तव्यताकत्वादित्यनुमानन्निरस्तम् दृष्टान्ताभावा- द अन्वय्येवानुमानन्नव्यतिरेकीतिभावः एतच्चाकरेविस्तरेणप्रपञ्चितम् ननुविद्याकर्मणीसमे एकफलत्वाच्चक्रदण्डादिवदित्यनुमान-

विद्या समत्वेनतु दर्शितस्त्वया क्रतुर्नदृष्टान्त उदाहृतः समः ॥
फलैःपृथक्त्वाद्बहुकारकैः क्रतुःसंसाध्यतेज्ञानमतोविपर्ययम् २२

मितिचेत्तत्राह फलैः पृथक्त्वात षष्ठ्यर्थेतृतीया फलानांभेदादित्यर्थः एवंचस्वरूपासिद्धोहेतुरितिभावः समानकारकत्वमपिहेतुर्नेत्याह क्रतुर्बहुभिः कारकैरहंममताभिमानरूपैरान्तरैर्बाह्यैश्चदेशकालादिनियमैश्चसाध्यते ज्ञानन्त्वतोविपर्ययवदतोनतयोः साम्यमितिभावः २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

नन्वकरणेप्रत्यवायभिया कर्मकार्यमितिचेन्नेत्याह सप्रत्यवायइति कर्मत्यागेनाहंनिश्चयेनाहंप्रत्यवायसहितोभविष्यामीत्येवंशुद्धात्मानि-
अनात्मधर्मस्यधीरप्रज्ञस्यतत्त्वज्ञानविकलस्यप्रसिद्धा नतुतत्त्वदर्शिनः तस्याहंबुद्धेरभावात् पापादेरनात्मधर्मतानिश्चयाच्च तस्माद्बुधैःकर्म

स प्रत्यवायोह्यहमित्यनात्मधीरज्ञप्रसिद्धा नतु तत्वदर्शिनः ॥
तस्माद्बुधैस्त्याज्यमपि क्रियात्माभिर्विधानतःकर्मविधि प्रका
शितम् ॥ २३ ॥

क्रियात्मभिः षष्ठ्यर्थेतृतीया क्रियाफलसक्तचित्तानां विधानतोविधानेनेतिकर्तव्यतयायुक्तंकर्म विधिभिरवश्यकर्तव्यतयाबोधितमपि
त्याज्यमित्यर्थः ॥ २३ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविरक्तस्यकार्यमाह। श्रद्धेति । गुरुशास्त्रयोर्विश्वासःश्रद्धातदन्वितोबुभुत्सुःशुद्धमानसोऽपि निष्कामकर्मानुष्ठानाच्छुद्धमानसश्चगुरोः प्रसादाल्लब्धतत्त्वमसीतिवाक्यतः श्रुतमात्मजीवयोरैकात्म्यंविज्ञाय मनननिदिध्यासनपरिपाकाभ्यांसाक्षात्कृत्य। चएवार्थः । साक्षा

श्रद्धान्वितस्तत्त्वमसीतिवाक्यतो गुरोःप्रसादादपिशुद्धमानसः॥
विज्ञायचैकात्म्यमथात्मजीवयोः सुखी भवेन्मेरुरिवाप्रकम्पनः
॥ २४ ॥

त्कृत्यैवसुखी भवेत्। सकलदुःखहीनोभवेदित्यर्थः। अप्रकम्पनःविषयाभिलाषाक्षोभितान्तःकरणः ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

महावाक्यंविवरीतुंवाक्यार्थस्यपदार्थबोधपूर्वकत्वमाह । आदाविति । विधानतःक्रमप्रमादगतिर्हि येनवाक्यार्थविज्ञानस्य विधावुत्पत्तौआ
दौप्रथमंमुख्यमितियावत्। पदार्थावगतिःकारणम्। हिप्रसिद्धं तस्यपदत्रयंतत्त्वम्असीति। तत्रतत्पदार्थःपरमात्मासर्वज्ञत्वादिगुणः त्वं

आदौ पदार्थावगतिर्हि कारणं वाक्यार्थविज्ञानविधौ विधानतः ॥
तत्त्वंपदार्थौपरमात्मजीवकावसीतिचैकात्म्यमथानयोर्भवेत्
॥ २५ ॥

पदार्थोजीवः अनयोस्तत्त्वंपदार्थयोरैकात्म्यंतद्बोधकमसीतिपदम् ॥ २५ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुसर्वज्ञत्वादिगुणस्येशस्याकिञ्चिज्ज्ञत्वधर्मवताजीवेनैकात्म्यं विरुद्धमित्याशङ्क्याह । प्रत्यगिति । अहंबुद्धिवद्यत्त्वंप्रत्यक्त्वंजीवधर्मः परोक्षत्वमीशधर्मस्तदादिधर्मकृतमात्मनोःपरमात्मजीवात्मनोर्विरोधंविहायत्यक्त्वातयोः संशोधिताम् युक्तिभिःसम्यग्विचारितांतत्त्वंपदाभ्यांशक्त्यभावेऽपिवक्ष्यमाणप्रकारयालक्षणयालक्षितां ज्ञातांचिदात्मतां संगृह्य तत्त्वंपदोपास्थानिविषयांकृत्वा स्वमात्मानंतथाज्ञात्वाऽथएकात्मज्ञानानन्तरमद्वयोभवत् । चित्स्वरूपतांप्राप्तइवभवत् । पूर्वमपितत्स्वरूपएवविस्मृतकण्ठचामीकरन्यायेनचतत्प्राप्तिरुक्तवत्युक्तम् ।

प्रत्यक्परोक्षादिविरोधमात्मनोर्विहायसंगृह्यतयोश्चिदात्मताम् ॥
संशोधितांलक्षणयाचलक्षितांज्ञात्वास्वमात्मानमथाद्वयोभवेत्
॥ २६ ॥

अयंभावः तत्त्वंपदयोर्द्वावर्थौ वाच्योलक्ष्यश्च तत्रतत्पदस्यमायोपाधिःसर्वज्ञत्वादिविशिष्टोवाच्यः त्वंपदस्यापिकिञ्चिज्ज्ञत्वादिविशिष्टो मायाकार्याविद्योपाधिरविद्यावदन्तःकरणोपाधिर्वाच्यः उभयोरपिविशेषणांशत्यागेनशुद्धश्चिदात्मालक्ष्यः तत्रवाच्ययोर्विरुद्धधर्मकत्वादैक्यासंभवेऽपिलक्ष्ययोरैक्यंनिर्बाधमेवेति ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तलक्षणास्वरूपमाह । एकात्मकत्वादिति जहतीलक्षणाजहत्स्वार्थलक्षणायथागङ्गायांघोषइत्यत्रगङ्गापदार्थस्यप्रवाहस्यघोषाधारता नुपपत्त्यासर्वथातत्परित्यागेनतीररूपार्थलक्षणा साप्रकृते न एकात्मत्वात् । विशेष्यांशस्यैकत्वात्सर्वथास्वार्थत्यागाभावात् । तथाज हल्लक्षणताजहत्स्वार्थलक्षणावत्त्वमपिअत्रनसंभवति । यथाकाकेभ्योदधिरक्ष्यतामित्यादौकाकपदस्यस्वार्थात्यागेनैवदध्युपघातकेलक्षणा सापिन । विरोधतःविशेषणत्यागेनसर्वथास्वार्थत्यागाभावात् । अतोभागलक्षणाजहदजहल्लक्षणायुज्यते । अदोषतःपूर्वोक्तदोषाभावात्

एकात्मकत्वाज्जहती न सम्भवेत्तथाऽजहल्लक्षणता विरोधतः॥
सोऽयंपदार्थाविवभागलक्षणायुज्येततत्त्वंपदयोरदोषतः॥२७॥

विशेष्यांशस्यात्यागाद्विशेषणांशस्यत्यागाच्च । तत्रदृष्टान्तः । सोऽयंपदार्थाविव । यथासोऽयंदेवदत्तइत्यत्रतद्देशादिविशिष्टोऽतीतानुभव विषयोवातत्पदार्थः एतद्देशादिविशिष्टोऽनुभूयमानोवेदंशब्दार्थः । तयोश्चाविरुद्धविशेषणकत्वादैक्यासंभवेनदेशादिरूपविशेषणत्यागेना नुभवगतातीतत्वादिविशेषणत्यागेनवालक्षणयैक्यंतद्वदितिभावः ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथत्याज्यत्वायजीवोपाधिमाह । रसादीति । रसापृथ्वीआदिर्येषांतानिपञ्चीकृतानियानिभूतानितेभ्यःसंभवोयस्यतत् । पञ्चीकरणंचे त्थम् एकैकंभूतंद्विधाविभज्यतत्रैकंभागंचतुर्धाविभज्यतेषांभागानांस्वेतरभूतचतुष्टयार्धभागचतुष्टयेसंयोजनेएकैकंभूतंपञ्चात्मकंभवतिभा

रसादिपञ्चीकृतभूतसंभवंभोगालयंदुःखसुखादिकर्मणाम् ॥ शरीरमाद्यन्तवदादिकर्मजंमायामयंस्थूलमुपाधिमात्मनः ॥ २८ ॥

गाधिक्याच्चप्रातिस्विकतयाभूगादिव्यवहारोऽपि । सुखदुःखयोरादीनियानिकर्माणितेषांभोगस्तत्कर्मजसुखदुःखानुभवस्तस्यालयमाश्रयभूतमाद्यन्तवत्उत्पत्तिनाशयोगि आदिकर्मजंप्राग्भवीयकर्मजन्यंमायामयंपरम्परयामायाविकारः तद्विकारभूतविकारत्वात् । एतच्छरीरमात्मनःस्थूलमुपाधिंवदन्तीतिशेषः ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसूक्ष्मोपाधिमाह। सूक्ष्ममिति । बुधाःअन्यत्स्थूलशरीरविलक्षणंशरीरंलिङ्गदेहाख्यमात्मनउपाधिंविदुः । तत्स्वरूपमाह। सूक्ष्मंचक्षु-
राद्यविषयः मनोबुद्धिदशेन्द्रियैःप्राणैश्चयुतम् सङ्कल्पात्मकंमनः निश्चयात्मिकाबुद्धिः घ्राणरसनाचक्षुस्त्वक्श्रोत्रेतिपञ्चज्ञानेन्द्रियाणि वा-

सूक्ष्मंमनोबुद्धिदशेन्द्रियैर्युतंप्राणैरपञ्चीकृतभूतसंभवम् ॥ भोक्तुः
सुखादेरनुसाधनंभवेच्छरीरमन्याद्विदुरात्मनोबुधाः ॥ २९ ॥

क्पाणिपादपायूपस्थानिकर्मेन्द्रियाणि प्राणापानव्यानोदानसमानाश्चप्राणास्तैर्युतमेतत्सप्तदशसमुदायात्मकम्। तदाधारभूतान्याह ।अप
ञ्चीकृतभूतसंभवंतेभ्यउत्पन्नमतएवादृश्यम्।तथाभोक्तुःसुखादेःसुखदुःखाद्यनुभवस्यानुसाधनम स्थूलशरीरस्यतदनुगतस्यैवभोगसाधनत्व
मितिभावः । एतद्वियोगेनैवमरणव्यवहारइतिबोध्यम् ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिजीवोपाधिद्वयमुक्त्वाईशोपाधिमाह । अनादीति । अनादि उत्पत्तिहीनम् । नानाविधपरिणामशालितयापरिणामरूपेणनश्वरामिति अनादित्वमात्रेोक्त्यासूचितम् । अनिर्वाच्यम् सत्त्वासत्त्वाभ्यांनिर्वक्तुमशक्यम् कारणंसकलप्रपञ्चस्यजनकम् ईदृशीमायातुब्रह्मणःपरमी-

**अनाद्यनिर्वाच्यमपीहकारणं मायाप्रधानंतुपरंशरीरकम् ॥ उ-
पाधिभेदान्तुयतःपृथक्स्थितं स्वात्मानमात्मन्यवधारयेत्क्र-
मात् ॥ ३० ॥**

श्वरव्यवहारसंपादकत्वादुत्कृष्टंप्रधानंशरीरकम् । स्वार्थेकः । एवमुपाधिभेदादेकमेवचैतन्यंयतः पृथक्स्थितंजीवईशइतिभेदबुद्धिविषय मतोलक्षणयोपाधिपरित्यागेनस्वात्मानमात्मनिअवधारयेदभेदेनजानीयात् । क्रमाच्छ्रवणमनननिदिध्यासनक्रमेणेत्यर्थः ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवाक्यार्थविचारफलमाह । कोशेष्विति । आनन्दमयस्य ब्रह्मत्वेअन्नमयप्राणमयमनोमयविज्ञानमयेषुचतुर्षुकोशेषुतत्तत्सङ्गात्तत्तदाकृतिर्विभाति यथाजपादिसङ्गात्स्फटिकोऽनेकाकृतिर्भाति । आनन्दमयस्यापि जीवत्ववादिनातुतेनसहैपञ्चसु कोशेष्वितिबोध्यम् । अस्मि-

कोशेषुपञ्चस्वपितत्तदाकृतिर्विभातिसङ्गात्स्फटिकोपलोयथा ॥ असङ्गरूपोऽयमजोयतोऽद्वयोविज्ञायतेऽस्मिन्परितोविचारिते ॥ ३१ ॥

न्महावाक्येपरितोविचारितेसम्यग्विचारितेसत्ययमात्माऽसङ्गरूपःअन्नमयादिभिःसङ्गरहितः । असङ्गोनहिसज्जते । इतिश्रुतेः । अजोऽद्वयश्चविज्ञायते । स्थूलोऽहमित्यादिस्त्वज्ञस्यतत्तत्कोशप्रसङ्गात्प्रतीतिःस्फटिकवत् तत्त्वज्ञस्यतुनतथाप्रतीतिरितिभावः । एवंचतत्तदुपाधिकृततत्तद्रूपताप्रतीतिनिरामएव विचारफलमितिभावः ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जाग्रदाद्यवस्थाऽपि बुद्धेर्धर्मोनात्मधर्मइत्याह । बुद्धेरिति । इहआत्मनिस्वप्नादिभेदेन जाग्रत्स्वप्नसुषुप्तिभेदेन यात्रिधावृत्तिर्दृश्यतेसाऽपि गुणत्रयात्मनः सत्त्वरजस्तमोरूपगुणत्रयस्वरूपाया बुद्धेर्धर्मः । उक्तावस्थात्रयस्योक्तमूलकत्वात् । एतदवस्थात्रयस्यास्मिन्नवस्थात्रय-साक्षिणि आत्मनि भानं मृषा बुद्ध्यध्यास निबन्धनं न तु वास्तव मित्यर्थः । अन्योऽन्यतोव्यभिचारतस्तस्यावस्था त्रयस्यस्व रूपतो

बुद्धेस्त्रिधा वृत्तिरपीह दृश्यते स्वप्नादि भेदेन गुणत्रयात्मनः ॥
अन्योऽन्यतोऽस्मिन्व्यभिचारतोमृषा नित्ये परे ब्रह्मणि केव ले शिवे ॥ ३२ ॥

मृषात्वात्तज्ज्ञानस्य मृषात्वमेव । स्वप्नकाले जाग्रत्सुषुप्त्योरभावात् । जाग्रतिइतरद्वयस्याभावात् सुषुप्ताावितरयोरभावात्परस्परं व्यभिचारोबोध्यः आत्मनस्तदनाश्रयत्वं विशेषणैराह । नित्येउत्पत्तिनाशशून्येपरेगुणत्रयातीते ब्रह्मणिव्यापकेकेवलेऽसङ्गेशिवआनन्दरूपे एवंभूतेसदेकरसेपरस्परव्यभिचारधर्माभानमसंभवीति भावः ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसाऽन्यत्वायसंसारमूलभूतांवृत्तिमाह । देहेति । एषांसङ्घातइतरेतराध्यासविषयात् अजस्रंयावद्धियो बुद्धेर्वृत्तिस्तमोमूलतयाऽज्ञलक्षणाऽज्ञत्वज्ञापिका यावत्परिवर्तते तावद्भवोद्भवःसंसारोद्भवोभवेत् । तमःपदंरजसोऽप्युपलक्षणम् । रजस्तमःप्रधानाबुद्धिः संसारहेतु

देहेन्द्रियप्राण मनश्चिदात्मनां सङ्घादजस्रं परिवर्तते धियः ॥
वृत्तिस्तमोमूलतयाऽज्ञलक्षणा यावद्भवेत्तावदसौ भवोद्भवः॥३३॥

त्वात्सर्वथासाऽन्येति भावः ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत महावाक्यविचारस्य कर्तव्यमाह । नेतीति । अथात आदेशोनेतिनेति इति प्रमाणेननिराकृतं मिथ्यात्वेनगृहीतमखिलंजगत्येनसः ततोहृदामस्त्वप्रधानेनमनसासम्यगास्वादितं चिल्लक्षणंघनामृतंदुःखासंभिन्नंसुखंयेनसः । स्वर्गादितुपरिणामदुःखत्वात्तत्संभिन्नमेव । एवंभूतोऽशेषंजगद्देहेन्द्रियादिदृश्यसमूहंत्यजेत् हानोपादानबुद्धिविषयंनकुर्यात् । किन्तूदासीनस्तत्रभवेत् । ननुदेहेन्द्रियादिभिरेवतज्ज्ञान

नेतिप्रमाणेन निराकृताखिलो हृदासमास्वादितचिद्घनामृतः ॥
त्यजेदशेषं जगदात्तसद्रसं पीत्वा यथाऽम्भः प्रजहाति तत्फ-
लम् ॥ ३४ ॥

लाभात्कथमुपजीव्यस्यत्यागइत्याशङ्क्यदृष्टान्तदर्शनेनपरिहराति । यथातृषावानआत्तः सद्रसोमाधुर्ययेनतादृशं नारिकेलनारङ्गादि फलान्तवर्त्यम्भःपीत्वा तत्स्थानभूतंतत्फलं जहाति तत्रोदासीनोभवति तद्वत्सर्वदृश्यसारांशोब्रह्मतल्लाभसातिनिः सारंदृश्यंनोपादेयंनापिहेयमितिभावः । यतोभयादिसंभावनातद्धेयमित्युच्यते ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

इतरस्यानित्यत्वेनतत्रवैराग्यार्थमात्मनएवनित्यत्वमाह । कदाचिदिति । कदापीत्यर्थः । अनवः उत्पत्त्यनन्तरंविद्यमानोहिनवः । तेन जन्मानन्तरास्तित्वंव्यावर्तितं नवत्वाभावेनैवजीर्णत्वाभावादवस्थान्तरापत्तिरूप परिणामोऽपिनिरस्तः ।अनेनअस्तिजायतेवर्द्धतेविपरिणमतेऽपक्षीयते नश्यतीति षड्भाव विकार राहित्यमुक्तम् । एवंचैतद्भिन्नं सर्वमुक्तषड्भावविकारवत्त्वादनित्यमिति ततोविरज्येतेतिबोधित-

कदाचि दात्मान मृतोनजायते नक्षीयते नापिविवर्धतेऽनवः ॥
निरस्तसर्वातिशयःसुखात्मकःस्वयम्प्रभःसर्वगतोऽयमद्वयः ३५

म् । यतऽईदृशोऽतएवनिरस्तः सर्वस्यदेहेन्द्रियादेरतिशयोमहत्त्वं येनस्वलाभात्सः यल्लाभान्नापरोलाभइतिःश्रुतेः यतःसुखात्मकः आनन्दस्वरूपः स्वयम्प्रभःस्वप्रकाशकश्च देहेन्द्रियादिस्तु दुःखस्वरूपः परप्रकाश्यश्च । यस्यभासासर्वमिदंविभाति । इतिश्रुतेः । सर्वगतोव्यापकः अयमहंबुद्धिविषयःप्रत्यगात्माऽपिअद्वयः उक्ताद्वयब्रह्मस्वरूपएव । नततोऽतिरिक्तइतिभावः । अयमात्माब्रह्म । इतिश्रुतेः ॥ ॥ ३५ ॥

CC-0. In Public Domain. Digitization by eGangotri

ननुएवंविधेविकारशून्येआत्मनिजन्ममरणादिप्रवाहरूपसंसारभानंकथमितिशङ्कते। एवंविधेइति।दुःखमयःदुःखप्रचुरः।उत्तरयति। अज्ञानतइ तिअज्ञानमूलकोयोध्यासोदेहान्तः करणादौअहंममेत्यध्यासस्तद्वशात्। एवंचभ्रान्तिरूपातत्प्रतीतिरितिभावः। नन्वेवंकथंतस्यसंसारस्यनि

एवंविधे ज्ञानमये सुखात्मके कथंभवो दुःखमयःप्रतीयते ॥
अज्ञानतोऽध्यासवशात्प्रकाशतेज्ञानेविलीयेत विरोधतःक्षणात्॥
॥ ३६ ॥

वृत्तिस्तत्राह। ज्ञानेति। आविर्भूतइतिशेषः। ज्ञानस्याज्ञानविरोधित्वात्तदुत्पत्तिक्षणएवकारणभूताज्ञाननाशात्तत्कार्यसंसारस्यापि वि लयइत्यर्थः। यथारज्जुज्ञानेनरज्जौसर्पस्यलयइत्यर्थः॥ ३६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाध्यासलक्षणमाह । यदन्य दिति । यदन्यत्सर्पादिकमन्यत्ररज्ज्वादौ भ्रमात् भ्रमजनकाद्दोषाद्विभाव्यते विज्ञायते अमुं विपश्चितो विद्वां- सोऽध्यास इत्याहुः । यथाऽसर्पभूते रज्ज्वादौ अहिविभावनं सर्पारोपो रज्ज्वबुद्धिमूलकस्तद्वदीश्वरेऽपि जगद्देहादिसंसारात्मकं सर्वं विभाव्य-

यदन्यदन्यत्र विभाव्यते भ्रमादध्यासमित्याहुरमुं विपश्चितः॥
असर्पभूतेऽहिविभावनं यथा रज्ज्वादिके तद्वदपीश्वरे जगत्॥३७॥

ते आत्मज्ञानाभावाद्यथार्थतया ज्ञायते ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनिजगज्ज्ञानेकीदृशोऽध्यासोनिमित्तंतदाह विकल्पेति सर्वविकल्पकारणमायारहितेवस्तुतस्तत्सङ्गरहितेचिदात्मकेचित्स्वरूपेसर्वकारणेनिरामयेदुःखासंभिन्नानन्दमयेकेवलंसर्वविकारशून्यपरेदृश्यविलक्षणेब्रह्मणिव्यापके आत्मनिप्रथममहङ्कारः कल्पितः सएवाध्यासः ।

विकल्पमायारहितेचिदात्मके ऽहङ्कारएष प्रथमः प्रकल्पितः ॥
अध्यासएवात्मनिसर्वकारणे निरामयेब्रह्मणि केवलेपरे ॥ ३८॥

अहंबुद्ध्यात्मकोऽध्यासएवसर्वसंसारकारणमितिभावः ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बुद्धिनिष्ठएवसंसारोनत्वात्मनिष्ठइत्यत्रान्वयव्यतिरेकौप्रमाणयति। इच्छादीति। परेसर्वसाक्षिणिआत्मनिसंसृतिहेतवःभासमानसंसारकारणं
सदाकालत्रयेऽपिइच्छादिरागादिसुखादिधार्मिकाः इच्छांपक्षेरागद्वेषौसुखदुःखंइत्येवमादिद्वन्द्वधार्मिकाःधियएवधीषुसतीषुसंसारइत्यन्वयमु

इच्छादिरागादिसुखादिधार्मिकाः सदा धियः संसृतिहेतवः परे ॥
यस्मात्प्रसुप्तौतदभावतःपरः सुखस्वरूपेणविभाव्यतेहिनः ॥३९॥

क्त्वातद्व्यतिरेकमाहयस्मात्कारणात्प्रसुप्तौतदभावात्धीवृत्त्यभावात् परआत्मानोऽस्माभिःतृतीयार्थेषुषष्ठी। सुखरूपेणस्वस्वरूपमात्रेणाविभा
व्यंतेनिश्चीयते नतु संसारित्वेनेतिभावः सुप्तोत्थितस्तुसुखमहमस्वाप्समितिप्रत्यभिज्ञानुभवात्तदात्मस्वरूपनिश्चयोऽस्तीतितात्पर्यम् ॥ ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ पुनस्तत्त्वं पदार्थस्वरूपमाह । अनादीति । अनादिर्याऽविद्यातत्तदुद्भवो यस्या बुद्धेरन्तःकरणस्यतत्रविम्बितःप्रतिबिम्बिताश्रितःप्रकाशः सजीवइतीर्यत आत्मापगात्माधियः साक्षितयाधीधर्मासङ्गेनैवपृथक्स्थितः । अन्तर्यामितयेत्यर्थः जीवोऽहंसुखीत्यादिप्रकारेणान्तःकर

अनाद्यविद्योद्भवबुद्धिबिम्बितोजीवप्रकाशोऽयमितीर्यते चितः ॥ आत्माधियः साक्षितया पृथक् स्थितो बुद्ध्या परिच्छिन्नपरः सएव हि ॥ ४० ॥

णधर्माध्यासवानूपगमात्मातु साक्षितयासर्वत्रविद्यमानोऽपिनतथेतिभावः । अतएवबुद्ध्यापरिच्छिन्नपरः बुद्धिलक्षणपरिच्छेदरहितःअतएव परः । एवंचज्ञानेनप्रतिविम्बाधार विलयप्रतिविम्बस्यविलयात्सजीवः सएवपरमात्मैवहिप्रसिद्धं सइत्यस्यचात्रापित्तर्बोध्या ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ बुद्ध्यात्मनोःपरस्पराध्यासवशात् परस्परधर्मभानमितिदार्ढ्यायपुनराह । चिद्बिम्बेति । चिदात्मचेतसोरन्योन्याध्यासवशात् परस्परतादात्म्यारोपाज्जडाजडत्वंप्रतीयते । चेतसोवृत्तीनांज्ञानत्वं जीवात्मनोजडत्वंप्रतीयते । अतएवज्ञानाश्रयआत्मेति चितएवताऽर्कि कर्त्रव्यवहारः । जीवात्मनिजडात्मनिजडात्माकथ्यते बुधैरितिस्मार्तव्यवहारश्च । अत्रहेतुः । चिदित्यादि । चिद्बिम्बस्यसाचिदाभासः अ

चिद्बिम्बसाक्ष्यात्मधियांप्रसङ्गतस्त्वेकत्रवासादनलाक्तलोहवत् ॥
अन्योऽन्यमध्यासवशात्प्रतीयते जडाजडत्वंचचिदात्मचेतसोः
॥ ४१ ॥

क्षिःसहितः साक्षःसेन्द्रियः सचासावात्मामनःधीरन्तःकरणंतेषांप्रकृष्टसङ्गादतिसान्निकर्षादध्यासइत्यर्थः । अनलाक्तलोहवत् अग्नितप्तलोहपिण्डवत् अत्रदृष्टान्तः । अग्निधर्मोदाहकत्वं लोहधर्मश्चवर्तुलत्वाद्यनलेभासते । तत्रहेतुरेकत्रवासात् परस्पराविभागेनवृत्तेरित्यर्थः । तद्वदेतयोरपि परस्परधर्माध्यासइत्यर्थः ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं दार्ढ्यायपुनराह । गुरोरिति । वेदवाक्यतइत्यनेन श्रवणंगुरोःसकाशादपि । ततश्चानेनमननमुक्तम् । ताभ्यांसञ्जातोविद्यया ज्ञानरूपस्यात्मनोऽनुभवोयस्यसः । अनेनकृतनिदिध्यासनइत्यर्थः । तं चिदानन्दस्वरूपं स्वात्मानमुपाधिवर्जितं रहितोपाधिधर्ममात्मस्थं

गुरोःसकाशादपिवेदवाक्यतः सञ्जातविद्यानुभवोनिरीक्ष्य तम् । स्वात्मानमात्मस्थमुपाधिवर्जितं त्यजेदशेषं जडमात्मगोचरम् ॥ ४२ ॥

हृत्स्थंनिरीक्ष्य अपरोक्षीकृत्याशेषंजडं दृश्यंत्यजेत् । तत्रोदासीनोभवेदिति भावः ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ज्ञेयंनिरुपाधिकं स्वरूपंश्लोकद्वयेनाह प्रकाशेति अहंप्रकाशरूपः स्वप्रकाशः परप्रकाशहीनः परप्रकाशरूपोयथाघटादिः अजोजन्मादि हीनः अद्वयःसजातीयद्वितीयरहितः असकृद्विभातः सकृदपिपरेणभासकान्तरेणप्रकाशितः सकृद्विभातः नसकृद्विभातोसकृद्विभातः नत

प्रकाशरूपोऽहमजोऽहमद्वयोऽसकृद्विभातोऽहमतीवनिर्मलः ॥
विशुद्धविज्ञानघनोनिरामयःसम्पूर्णआनन्दमयोऽहमक्रियः॥४३॥

त्रसूर्योभातिनचन्द्रतारकमितिश्रुतेः नतद्भासयतेसूर्यइतिस्मृतेश्च अतीवनिर्मलः मायाकृतावरणविक्षेपरहितः विशुद्धविज्ञानघनः विशुद्धचिदेकरसः निरामयःकर्तृत्वाभिमानरहितः सम्पूर्णःदेशकालपरिच्छेदहीनः आनन्दमयः आनन्दरूपः स्वार्थेमयट् अक्रियः परिणामहीनः ॥ ४३ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदैवेति अहंसदैवकालत्रयेऽपिमुक्तःसर्वधर्मरहितः अचिन्त्यशक्तिमान यः परमात्मा अतिन्द्रियज्ञानमूइन्द्रियातिरिक्तज्ञानरूपःयतोवाचो निवर्त्तन्ते अप्राप्यमनसासहइतिश्रुतेः अविक्रियात्मकोऽपरिणामी अनन्तपारःअन्तःकालतःपारःपरन्तीरन्तावविद्यमानौ यस्य तंनदेश

सदैवमुक्तोऽहमचिन्त्यशक्तिमानतीन्द्रियज्ञानमविक्रियात्मकः॥
अनन्तपारोऽहमहर्निशंबुधैर्विभावितोऽहंहृदिवेदवादिभिः ॥४४॥

कालपरिच्छेदहीनः ईदृशोयःपरमात्माबुधैर्हृदि अहर्निशंविभावितः सोऽहमित्यर्थः ॥ ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवभावनायाःफलमाह एवमिति उक्तरीत्यामदाआत्मानं अखण्डितात्मनाविषयानाकृष्टचित्तेन विचारमाणम्यध्यायतः धातूनामनेकार्थ त्वात् चरमाणएवचारमाणःस्वार्थेऽण् विशुद्धभावनाब्रह्माकारान्तः करणवृत्तिरुदंतीतिशेषः सात्वोदिनाकारकैर्देहान्तरभापककर्मभिः स

एवंसदात्मानमखण्डितात्मनाविचारमाणस्यविशुद्धभावना ॥
हन्यादविद्यामचिरेणकारकैरसायनंयद्वदुपासितंरुजः ॥ ४५ ॥

हाविद्यामचिरेणशीघ्रमेवहन्यात् यथापामितंसेवितंरसायनं रुजोहन्यात्तद्वत् ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रध्यानेइतिकर्तव्यतामाह विविक्तइति निर्जनइत्यर्थः आसीनोयथोचितपद्मासनाद्युपविष्टः उपारतेन्द्रियः तेनशमदमादिसम्पन्नः विनि र्जितात्माप्राणायामादिभिर्जितान्तःकरणः अतएवविमलान्तराशयोविशुद्धचित्तः विज्ञानदृक्विज्ञानएवदृक्भानंयस्यसः द्रष्टृदृश्यभा

विविक्तआसीनउपारतेन्द्रियोविनिर्जितात्माविमलान्तराशयः॥
विभावयेदेकमनन्यसाधनोविज्ञानदृक्केवलआत्मसंस्थितः॥४६

वरहितः अनेननिर्विकल्पकसमाधिरुक्तः अनन्यसाधनः तत्त्वज्ञानातिरिक्तमुक्तिसाधनास्तित्वभ्रमरहितः केवलोऽसङ्गःआत्मसंस्थितः आत्मन्येवसंस्थासमाप्तिः सञ्जातायस्यसतेन नकदापिविषयान्तरसञ्चारवांश्चित्तः विभावयेत् ध्यायेत् ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

किंच यदेतत्भूतंभाविष्यद्वर्तमानं विश्वंपरमात्मादर्शनंभासकोयस्यतत् तस्यभासासर्वमिदंविभातीति श्रुतेः तत्सर्वकारणेमायासान्निधाना तुसर्वोपादानत्वेनाभिमतेआत्मनिविलापयेत् उपादानसत्ताव्यतिरेकेणकार्यसत्तांनपश्येत् तादृशस्यलक्षणमाह सम्पूर्णः अवाप्तसमस्तका

विश्वंयदेतत्परमात्मदर्शनं विलापयेदात्मनि सर्वकारणे ॥ पूर्णश्चिदानन्दमयोऽवतिष्ठते न वेद बाह्यं न च किञ्चिदान्तरम् ॥ ४७ ॥

मः तस्यकाम्याभावात् चिदानन्दमयः तद्रूपोऽवतिष्ठते बाह्यमान्तरंच दृश्यंनजानाति सर्वत्रब्रह्मदर्शनादिति भावः ॥ ४७ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाधिसिद्धेः पूर्वंयत्कर्तव्यंतदाह । पूर्वमिति । ममाधेः सकलविषयव्यासङ्गनिवृत्तिपूर्वकं ब्रह्माकारवृत्तिः समाधिस्ततः पूर्वमखिलंस
चराचरंजगत् ओङ्कारमात्रं विचिन्तयेत् । ओङ्कारोमीयतेऽनयेतिमात्रा प्रमाणं बोधकत्वेन परिच्छेदकोयस्यतथाजानीयात् । तदेवविवृ

पूर्वं समाधे रखिलं विचिन्तये दोङ्कारमात्रं सचराचरं जगत् ॥
तदेव वाच्यं प्रणवो हि वाचको विभाव्यते ज्ञानवशान्न बो-
धतः ॥ ४८ ॥

णोति तदेवेति । जगदेवेत्यर्थः । प्रणवोवाचकोविभाव्यतेएतत्प्रहिप्रसिद्ध इत्यर्थः । इयंभावनाज्ञानवशादेवनबोधकः । बोधोनिर्विशेषब्रह्मसा
क्षात्कारस्तदुत्तरंनेत्यर्थः । तस्यसर्ववृत्त्युपमर्दकत्वात् ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमर्थंविवृणोति । अकारेति । अकारसञ्ज्ञस्तद्वाच्यःपुरुषोहिविश्वकोविश्वएवविश्वकः विश्वशब्देनपरिभाषितःअयंजाग्रत्साक्षीविराट् ततःस्वप्नसाक्षीतैजसःतेनपदेनपरिभाषितःलिङ्गदेहाभिमानीहिरण्यगर्भउकारकः उकारप्रतिपाद्यईर्यते । ततः सुषुप्तिसाक्षीप्राज्ञपदवाच्यो

अकारसञ्ज्ञः पुरुषो हि विश्वको ह्युकारकस्तैजसईर्यते क्रमात् प्राज्ञो मकारः परिपठ्यतेऽखिलैः समाधि पूर्वं न तु तत्त्वतो भवेत् ॥ ४९ ॥

मायोपाधिकोमकारस्तद्वाच्यः परिपठ्यतेऽखिलैर्वेदैः । इयंभावनासमाधिपूर्वंसमाधेःपूर्वमेव नतत्त्वतः तत्त्वसाक्षात्कारेसतिनभवेत् । सर्वस्यब्रह्मणिप्रविलयात् ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाविलापन प्रकारमाहद्वाभ्याम । विश्वंत्विति । उकारमध्ये बहुधाव्यवस्थितं स्थूलदेहनिबंधनंस्थूलदेहाभिमानेन स्थितं विश्वम्पुरुषंतद्वाचकमकारम् च विलापयेत् । तुश्चार्थे । विलीनम्भावयेत् ततस्तैजसंलिङ्गदेहाभिमानिनम् पुरुषं तद्वाचकंप्रणवद्वितीय वर्णमुकारं वि-

विश्वं त्वकारं पुरुषं विलापयेदुकारमध्येबहुधा व्यवस्थितम् ।
ततो मकारे प्रविलाप्यतैजसंद्वितीयवर्णं प्रणवस्य चान्तिमे ॥५०॥

लीनोविश्वकम्मकारे विलाप्याविलीनम्भावायित्वा ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततस्तादृशंमकारंतद्वाच्यंप्राज्ञंचकारणंकारणत्वाभिमानिनंपुरुषमिहात्मनि चिद्घनेपरे विलापयेत् तथाभावयेत् । ततः सोऽहंमर्वविला
पाधिष्ठानंपरब्रह्मविभावयेत् । तद्विशिनष्टि । सदाविमुक्तिमत् नित्यमुक्तम् । नन्वहंपदार्थस्यरागद्वेषादिमलिनस्यकथं ब्रह्मत्वभावनेसा

मकारमप्यात्मनि चिद्घने परे विलापयेत्प्राज्ञमपीह कारणम् ।
सोऽहं परं ब्रह्म सदा विमुक्तिमद्विज्ञानदृङ्मुक्त उपाधितोऽमलः ॥ ५१ ॥

शङ्क्याहंपदार्थंविशिनष्टि । उपाधितोमुक्तः अतएवामलःतथाभावनेसाधनं विज्ञानदृक्विज्ञानं ब्रह्ममात्रप्रत्ययाविच्छेदरूपाहक् निदिध्या
सनं सत्साक्षात्कारेसाधनंयस्यसः ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंभावनावतोलक्षणमाह । एवमिति । उक्तप्रकारेण सदा जातापरमात्मन्येकभावना यस्य सः परिविस्मृतमखिलं पुत्रदेहादि येन सः । अत एव स्वस्वरूपानन्देनैव तुष्टः न तु विषयानन्देन । तस्य कारणमिदुःखरूपत्वात्ततो विरक्त इत्यर्थः । साक्षान्नित्यात्मनि सुखप्रकाशकः साक्षा

एवं सदा जातपरात्मभावनः स्वानन्दतुष्टः परिविस्मृताखिलः ॥
आस्ते स नित्यात्मसुखप्रकाशकः साक्षाद्विमुक्तोऽचलवारिसि
न्धुवत् ॥ ५२ ॥

दौपाधिकनामरूपभेदराहित्येन नित्यमखण्डितमात्मस्वरूपं यत्सुखं प्रकाशश्च तद्रूपः एवंरूपो विमुक्तो जीवन्मुक्तः । अचलं निश्चलं वारियस्य तादृशसिन्धुवदास्ते । विषयसम्बन्धरूपकल्लोलरहित आस्त इत्यर्थः ॥ ५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ईदृशस्यमत्प्राप्तिर्भवत्येवेत्याह । एवमिति । उक्तप्रकारेणसदाऽभ्यस्तसमाधेर्योगिनः निवृत्ताःसर्वेषामिन्द्रियाणांगोचराविषयाःशब्दादयो यस्य विनिर्जिताअशेषारिपवःकामादयोयेनतस्य । तज्जयेनविषयेष्वन्तःकरणाप्रवृत्तिः । अतएव सर्वज्ञत्वनित्यत्वनित्यतृप्तत्वबोध

एवं सदाऽभ्यस्तसमाधियोगिनो निवृत्तसर्वेन्द्रियगोचरस्य हि ॥ विनिर्जिताशेषरिपोरहंसदा दृश्यो भवेयं जितषड्गुणात्मनः ॥५३ ॥

रूपत्वस्वतन्त्रत्वनियमलुप्तत्वानन्तरूपाषड्गुणायस्यताहृशआत्मजितो वशीकृतोयेनतस्य सदादृश्योभवेयम् । एतेनमद्भक्तस्ययोगिनो ऽहंदृश्योनतुभक्तिविमुखस्येति सूचितम् ॥ ५३ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंविधोजीवन्मुक्तःप्रारब्धवशेन अनभिमानोभोगानश्नँस्तिष्ठेत् ततोमय्येवविलीयते मद्रूपोभवतीत्याह । ध्यात्वैवमिति ॥ ५४ ।

ध्यात्वैवमात्मानमहर्निशं मुनितिष्ठेत्सदा मुक्तसमस्तबन्धनः ॥
प्रारब्धमश्नन्नभिमानवर्जितो मय्येवसाक्षात्प्रविलीयते ततः ५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

सर्वधर्मापेक्षयाऽयमेव धर्मो ज्यायानित्याह । आदाविति । भवसंसारस्यादिमध्यावसानेषु सर्वथा भयशोकयोः कारणं विदित्वा तत्कारणी
भूतं विधिवादयजनं तस्मादौ विधिवादचोदितं विधितं समस्तं कर्ममार्गं काम्यं हित्वा अखिलात्मनां जीवानां स्वरूपभूतं स्वमात्मानं परमेश्वरं भजेत् । य

आदौ च मध्ये च तथैव चान्ततो भवं विदित्वा भयशोक कार
णम् ॥ हित्वा समस्तं विधिवादचोदितं भजेत्स्वमात्मान मथा
खिलात्मनाम् ॥ ५७ ॥

थाधनस्य जनेनादौ दुःखं मध्ये पालनकृतं तत्र राजादिकृतं भयमन्ते नाशे शोकपर्यवसानाय दुःखमेवं पदार्थमात्रं द्रष्टव्यम् ॥ ५७ ॥

CC-0. In Public Domain. Digitization by eGangotri

मय्यभेदभावनया नामरूपाविभागेन तद्रूप एवभवतीत्यमुमर्थं सदृष्टान्तमाह । आत्मनीति । आत्मनिसर्वाधिष्ठानेमयिइदंस्वस्वरूपं जीव मभेदेनविभावयन्यदा । तिष्ठतीतिशेषः । तदामयात्मनापरमेश्वरेणाऽभेदेनभवति अभिन्नोभवति । तत्रदृष्टान्तः यथासमुद्रेप्रविष्टं नद्यादि

आत्मन्यभेदेन विभावयन्निदं भवत्यभेदेन मयाऽत्मनातदा ॥
यथाजलं वारिनिधौ यथापयः क्षीरेवियद्व्योम्न्यऽनिले यथाऽ
निलः ॥ ५६ ॥

जलंसमुद्रएव यथाक्षीरेगव्यादिक्षीरेप्रक्षिप्तंपयःक्षीरमेव यथाव्योम्निमहाकाशेघटाद्यवच्छिन्नाकाशोघटादिभङ्गे च यथाचर्मभस्त्रिकाद्यव च्छिन्नोवायुरनिलेमहावायौ नामरूपाविभागेनैकीभवतीत्यर्थः ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमात्मतत्त्वज्ञस्य जगत्सत्यत्वभ्रमःस्वतएवापैतीत्याह । इत्थमिति । हिरण्यर्थे । लोकसंस्थितोऽपिजीवन्मुक्तिदशायांप्रारब्धवशाल्लोक व्यवहारंकुर्वन्नपिजगन्मृषैवेतिविभावयन्सन् यदियदा इत्थमीक्षते ऐकात्म्यं जानीयात्तदा निवृत्तजगत्सत्यत्वभ्रमो भवतीति शेषः। तत्र हेतुः श्रुतियुक्तिमानतोनिराकृतत्वात् । अतोऽन्यदार्तमित्यादिश्रुतिरूपात् जगन्मिथ्यादृश्यत्वात् शुक्तिरजतवदितितदुपबृंहितानुमानरू

इत्थं यदीक्षेत हि लोकसंस्थितो जगन्मृषैवेतिविभावयन्मुनिः ॥ निराकृतत्वाच्छ्रुतियुक्तिमानतो यथेन्दुभेदो दिशि दिग्भ्रमादयः ॥ ५७ ॥

पात्मानतःप्रमाणतोनिराकृतत्वात् तत्रदृष्टान्तोयथेन्दुभेदः एकचन्द्रेद्विचन्द्रत्वभ्रमस्तदेकत्वज्ञानेननिवर्तते यथाच दिशिप्राच्यादौअ न्यदिक्त्वभ्रमः सोऽपितत्त्वज्ञानान्निवर्तते । एवंभ्रमतःपुरुषस्य दिक्षुभ्रमणाद्भ्रमोनिकटवर्तिवृक्षादौच भ्रमणभ्रमस्तत्स्थैर्यज्ञानेन निवर्तते तद्वत् ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशज्ञानेमदाराधनमेवोपायइत्याह । यावदिति । अखिलं जगन्मदात्मकंमदधिष्ठानकंमाद्विवर्तंभूतंयावन्नपश्येत्तावन्मत्प्राप्त्येयेश्रद्धालुः भगवदाराधनमेवज्ञानप्रापकमित्यत्र दृढविश्वासवान् अतिशयेनोर्जितात्वृद्धिमतीभक्तिर्मयिभगवतिपूज्यताबुद्धिरूपालक्षणं चिह्नंयस्यसः ।

यावन्नपश्येदखिलं मदात्मकं तावन्मदाराधनतत्परो भवेत् ॥
श्रद्धालुरत्यूर्जित भक्तिलक्षणो यस्तस्य दृश्यो ऽहमहर्निशं
हृदि ॥ ५८ ॥

तावन्मदाराधननिष्ठोभवेत् एवंहितस्यहृदि अहमहर्निशंदृश्योभवा मियेयथामांप्रपद्यन्ते तांस्तथैवभजाम्यहमितिस्मृतेः ॥ ५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वोक्तवचनजातस्य श्रुतिसमत्वं कथमेतदालोचनमपिमदाराधनप्रतिबन्धकदुरितध्वंसोपायइत्याह रहस्यमिति । श्रुतिसारसङ्ग्रहत्वेनाति

रहस्यमेतच्छ्रुतिसारसङ्ग्रहं मया विनिश्चित्य तवोदितं प्रिय ॥
यस्त्वेतदालोचयतीहबुद्धिमान् स मुच्यते पातकराशिभिः
क्षणात् ॥ ५९ ॥

गोपनीयता अप्रमाणशङ्काकलङ्कराहित्यंसूचितम् । आलोचयतिसम्यग्विचारयति ॥ ५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ भगवानुक्तमेवार्थसंक्षेपेण दार्ढ्यायपुनराह भ्रातरिति । यदीतियदित्यर्थे । यदीदंजगत् परिदृश्यते तत्सर्वंमायैवेतिज्ञात्वेति शेषः चेतसासर्वंपरिहृत्यतत्रौदासीन्यंकृत्वामद्भावनयामदैक्यभावनया भावितंशुद्धंमानसंयस्यताद्दशास्तिष्ठ । इत्युपदिश्याशिषंप्राह निरामयः

भ्रातर्यदीदं परिदृश्यते जगन्मायैव सर्वं परिहृत्य चेतसा ॥ मद्भावनाभावितशुद्धमानसः सुखी भवाऽऽनन्दमयो निरामयः ६०

सन्सुखीभव । सर्वदुःखनिवृत्त्येतिभावः । ततोऽन्तरङ्गामन्यामाशिषमाह आनन्दमयोभवेति तद्रूपोभवेत्यर्थः । यद्यपिपूर्वमानन्दरूपत्वमस्त्ये वतथाऽपितत्प्राप्तिर्विस्मृतकंठस्थभूषणप्राप्तिवत ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एवंरीत्याम्बोपासकस्यलोकपावनत्वमाह। यइति । कदावा यदाकदाचिदित्यर्थः । हृदानिर्मलेनान्तःकरणेन यो मामगुणं प्राकृतसत्त्व रजस्तमोरूपगुणरहितम् । सच्चिदानन्दरूपत्वात् । अतएवगुणादव्याकृतात्परंमायातीतम् । यदिवायद्वत्वर्थे । गुणात्मकं सर्वज्ञत्वा- दिलोकोत्तरलावण्यादिगुणवानात्मामूर्तिर्यस्यतं दृश्यमानं रूपं सेवते । सद्विविधोऽप्युपासकःअहं मत्स्वरूपएव । मामकइत्यर्थोवा । भि-

य: सेवते मामगुणं गुणात्परं हृदा कदा वा यदि वा गुणात्मकम् ॥ सोऽहंस्वपादाञ्चितरेणुभिः स्पृशन्पुनाति लोकान्त्रितयं यथा रविः ॥ ६१ ॥

योऽहिज्ञानिनोऽत्यर्थमहंमचममप्रिय इत्युक्तेः । तादृशोभक्तःस्वपादलग्नरेणुभिःसंस्पृशन्लोकत्रयमपि पुनाति । अज्ञानध्वान्तनिरसने नपवित्रीकरोति । यथारविःस्वकरैर्जगद्वितिमिरीकरोति तद्वत् ॥ ६१ ॥ ॥ ३१ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानीमेतद्ग्रन्थार्थालोचनासमर्थस्यपाठमात्रतोऽपिमहत्फलमाह । विज्ञानंविज्ञानजनकं करणंव्युत्पत्त्यंतिबोध्यम् । वेदान्तैरुपनिषद्वाक्यै
र्वेद्यंचरणंजगज्जन्मादिलक्षणंकर्मयस्यतेन ननुपाठमात्रादेतादृशमहत्फलप्राप्तिःकथमित्याशङ्क्यभवत्येवेति सूचयंस्तत्रहेतुमाह । मद्वचने

विज्ञानमेतदखिलंश्रुतिसारमेकं वेदान्तवेद्यचरणेनमयैवगीतम् ।
यःश्रद्धया परिपठेद्गुरुभक्तियुक्तो मद्रूपमेति यदि मद्वचनेषुभक्तिः
॥ ६२ ॥ इतिश्री अध्यात्मरामायणे रामगीता समाप्ता ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसम्वादे उत्तरकाण्डे श्रीरामगीतायां पञ्चमःसर्गः ॥ ५ ॥

षुभक्तिर्विश्वासोयदीतिअर्थाद्गुरुवाक्यविश्वासस्यैव फलदायकत्वादितिभावः ॥६२॥ इत्यध्यात्मरामायणेउमामहेश्वरसम्वादे उत्तरकाण्डे
सेतौपञ्चमःसर्गः ॥ ६२ ॥ श्रीरामचन्द्रार्पणमस्तु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीराममन्त्रःखलु तारकाख्यः संसारसन्तारणसुप्रसिद्धः ॥ भक्-
त्याऽप्यभक्त्या समुपासितोयः श्रेयांसि सर्वाणि ददात्यवश्य
म् ॥ १ ॥ तन्तारकंसम्प्रतिपादयन्ती श्रीरामगीता सकलैः सुसे
व्या ॥ विज्ञप्तिमित्थंजनको विनीतः समर्पयत्यार्यजनेषुहर्षात् २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प,	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति
स्यर्द्धि	स्पर्द्धि	१	२	१	शाधि	शाधि	३	२	६	नाशे	नाशो	६	१	१
जीव्य	जीव्य	१	२	३	व्यत्र	व्यत्र	४	१	१	नन्वितिश	नन्वितिशे	६	२	१
सम्वीन्धनीः	सम्बन्धिनीः	२	२	१	ष्ठामे	ष्ठानमे	४	२	३	त्रिदा	त्रिदा	६	२	२
व्रह्म	व्रह्म	२	१	२	व्रह्म	व्रह्म	४	२	१	मेत्रें	मेव	६	२	२
व्रह्म	व्रह्म	२	१	६	वलेन	वलेन	४	२	७	व्येतीत	व्यतेति	७	१	१
वोधोऽास्ति	वोधोऽसि	३	१	४	निघृत्ते	निवृत्ते	५	१	१	वीरहा	वीरहा	७	१	१
संवन्ध	सम्बन्ध	३	१	७	कत्व	कत्वा	५	१	१	सद्दृष्ट	सद्द्दृष्ट	८	१	३
भवस्यंससार	भवस्यसंसार	३	२	१	नक	नैक	५	१	१	त्रिशुद्धं	विशुद्ध	८	२	१
न्सार	सार	३	२	२	बेदान्त	वेदान्त	५	१	१	कारांतः	कारान्तः	८	२	२
पर्वग	पवर्ग	३	२	२	पूर्व्वे	पूर्व्वे	५	१	२	वृंत्ति	वृत्ति	९	१	१
वारिधि	वारिधि	३	२	२	वुद्ध्या	वुद्ध्या	५	१	६	स्वत्राना	स्वना	९	२	१
					एवं	एव	५	१	६	वृत्यु	वृत्यु	१०	१	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
रींप	रपि	११	२	१
नर्दष्टा	र्नदष्टा	१२	१	४
र्वाद्धे	र्वाद्धे	१२	१	७
त्याभि:	त्माभि:	१२	२	६
शुद्द	शुद्ध	१३	१	१
जीवया	जीवयो	१३	१	२
निर्वाध	निर्बाध	१४	१	१०
भव	भव	१९	१	४
अर्जोद्व	अर्जोऽद्व	१६	२	६
द्व त्	द्वात्	१७	२	१

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
ह्लाभ	ह्लाभे	१८	१	८
इतिः	इति	१८	२	२
ज्ञानन	ज्ञानेन	१९	१	१
वुद्दया	वुद्धया	२०	१	९
रागादि	रागादि	२१	१	३
विलय	विलय	२१	१	७
धम	धर्म	२१	२	१
म्वस्य	म्वंयस्य	२१	२	२
वुवै	वुधै	२३	१	५
एव	एवं	२३	२	१
द्रष्ट	द्रष्टृ	२४	१	२

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
विभांव्युत	विभाव्यते	२५	१	४ मु
लिङ्गद	लिङ्गदे	२६	१	२
वोधकः	वोधतः	२५	१	६
विज्ञानं ब्रह्म	विज्ञानंनिादि ध्यासनं ब्रह्म	२६	२ ६	३
भेदेरा	भेदरा	२७	१	६
रुपा	रूपाः	२७	२	१
आत्म	अत्मा	२७	२	१
मुनिति	मुनिास्ति	२८	१	२
भव	भवं	२८	२	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
तदकत्व	तदेकत्व	२९	२	७	वतथाऽ	वतथाऽ	३१	१	१	मद्बचने	मद्वचने	३२	१	२
भ्रमण	भ्रमणं	२९	२	८	कंठ	कण्ठ	३१	१	२	तन्तारकं	तत्तारकं	३२	२	३

नेपाल पाशुपत, यन्त्रालये मुद्रिता.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इती रामगीता सटीका समाप्ता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द. नै. १६६४४

अथ रामगीता सटीका प्रारभ्यते ॥

मू० ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ रामंरत्नकिरीटकुण्डलयुतं केयूरहारान्वितं
सीतालङ्कृतवामभागममलं सिंहासनस्थं विभुम् ॥ सुग्रीवादि
कपीश्वरैःसुरवरैः संसेव्यमानं सदा विश्वामित्रपराशरादिमुनि-
भिः संस्तूयमानं भजे ॥ १ ॥ इतिध्यात्वा ॥ श्रीमहादेवउवाच॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ ध्यायेत्वाजानुबाहुं धृतशरधनुषं वद्धपद्मासनस्थं पीतंवासोवसानं नवकमलदलस्पर्द्धिनेत्रं प्रसन्नम् ॥ वामाङ्कारूढ सीतामुखकमलमिलल्लोचनं नीरदाभं नाना लङ्कारदीप्तं दधतमुरुजटामण्डलं रामचन्द्रम् ॥ १ ॥ ततइति जगतां यानि मङ्गलानि आनन्दास्तेषामुपजीव्यभूतं मङ्गलं ब्रह्मानन्दः सएवात्मास्वरूपं तेन तस्यैवानन्दस्यान्यानि भूतानिमात्रामुपजीवन्तीति श्रुतेः मङ्ग

ततोजगन्मङ्गलमङ्गलात्मना विधाय रामायणकीर्तिमुत्तमाम् ॥
चचार पूर्वाचरितं रघूत्तमो राजर्षिवर्य्यैरभिसेवितं यथा ॥ १ ॥

लानाञ्चमङ्गलमिति स्मृतेश्च किंच जगतां मङ्गलं कल्याणं यस्मात्तादृशकल्याणरूपआत्मामूर्तिस्तया उत्तमांश्रोत्रादीनां मोक्षदत्वेना त्युत्तमां रामायणकीर्तिं वाल्मीक्यादि कृत नानाविध रामायण प्रवर्तिकां रावणवधादिजां कीर्तिंविधाय स्थितोरघूत्तमः ततः सीताप रित्यागानन्तरं पूर्वैः स्ववंशजैराचरितं प्रजापालनसत्कथाश्रवणादिकं केवलंतत्पूर्वजैरेवाचरितमितिन किंत्वन्यैरपि राजर्षिश्रेष्ठैर्य थाऽभिसेवितं तथाचचार कृतवान् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदारागुरुदेवविश्वासलक्षणमहागुणवती यद्वा उदारा दानशीलाबुद्धिर्यस्य तेन पुरातनीः प्राचीनराजसम्बन्धिनीः शुभाः धर्माधर्मनिर्णेत्रीः प्रमत्तस्य स्वगोमण्डलमिश्रितब्राह्मणगोदानात् प्रमत्तस्य नृगस्य राज्ञो द्विजस्य शापात्तिर्यक्त्वमाह तेनाज्ञातकृतब्रह्मस्वापहारेण परमधा

सौमित्रिणापृष्ट उदारबुद्धिना रामःकथाःप्राह पुरातनीःशुभाः ॥
राज्ञः प्रमत्तस्य नृगस्य शापतो द्विजस्य तिर्यक्त्वमथाह राघवः
॥ २ ॥

र्मिकस्यापीदृश्यवस्थेति सर्वथाब्रह्मस्वविमुखताधर्मइतिसूचितम् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकान्तेविजने उपस्थितंप्राप्तम् विनयान्वितः सन् भक्त्यागुरुरयमिति बुद्ध्या प्रणम्य अनेनगुरूपसदनप्रकारउक्तः आसादितंशुद्धंभाव

कदाचिदेकान्त उपस्थितंप्रभुं रामं रमालालितपादपङ्कजम् ॥
सौमित्रिरासादितशुद्धभावनः प्रणम्यभक्त्याविनयान्वितोऽब्र-
वीत् ॥ ३ ॥

नं भावनाकरणमन्तः करणंयेनसः शुद्धान्तःकरणइतियावत् भगवदुक्तसत्कथाश्रवणेन शुद्धान्तःकरणइत्यर्थः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हे महामते महतीसर्वविषयामतिर्यस्य तस्य संबोधनं त्वं शुद्धबोधोऽसि अनवच्छिन्नचैतन्यरूपोऽसि सर्वदेहिनामात्माऽसि जीवानांतत्प्रतिबिम्बत्वात् अधीशोऽसि अन्तर्यामित्वान्नियन्ताऽसि वास्तवभेदाभावाच्च सर्वात्मत्वम् औपाधिकभेदाच्च नियन्तृनियम्यभावोबोध्यः निराकृतिः अस्मदादिवत्स्वार्जितकर्माधीनशरीराकृतिरहितः नन्वेवंसर्वैः कथमेवंनज्ञायतेऽतआह ज्ञानदृशां स्वयमेवप्रतीयसे ज्ञायतेऽ

त्वं शुद्धबोधोऽसि हि सर्वदेहिनामात्माऽस्यधीशोऽसि निरा-कृतिःस्वयम् ॥ प्रतीयसे ज्ञानदृशां महामते पादाब्जभृङ्गाहितसङ्गसाङ्गिनाम् ॥ ४ ॥

नेनेतिज्ञानं वेदान्तवाक्यजातं तदेवदृकुदर्शनसाधनंयेषां तेषामितिसंबन्धसामान्येषष्ठी तैरित्यर्थः तान्शदृक्लाभश्च त्वद्भक्त्यधीनइत्याह पादेति त्वच्चरणकमलयोर्भृङ्गवदाहितःकृतः सङ्गोयेन तादृशान्तः करणसङ्गवतां त्वच्चरणकमल सङ्गिनान्तः करणवतामित्यर्थः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ प्रार्थयते अहमिति भवस्यंससारस्यापवर्गो निवृत्तिर्यस्मात्तादृशंतवपादाम्बुजंप्रपन्नोऽस्मिशरणंप्राप्तोऽस्मि योगिभावितं योगीभिः सं-न्सारमुक्तये भावितम् अनेनतस्य भवापवर्गत्वे सदाचारः प्रमाणमुक्तम् प्रार्थनीयमाह अपारवारिधिरूपंयदज्ञानंसंसारमूलकारणं यथासुखम्

अहं प्रपन्नोऽस्मि पदाम्बुजं प्रभो भवापवर्गं तव योगिभावितम् ॥ यथाञ्जसाज्ञानमपारवारिधिं सुखं तरिष्यामि तथाऽनुशाधि माम् ॥ ५ ॥

क्लेशेन तरिष्यामि तथा मामनुशाधि शिक्षय अपारवारिधिमित्यनेनसपारप्रसिद्धसमुद्राद्व्यतिरेकउक्तः अशक्यतरणताऽनेनध्वनिता ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अर्थोत्तरमवतारयति श्रुत्वेति रामः सौमित्रिवचः श्रुत्वा अथशब्दोवाक्यालङ्कारे तदा श्रवणाऽव्यवहितकाले एवप्रपन्नानां भक्तानामार्ति संसारदुःखंहरतितादृशः प्रपन्नाश्रमादिहीना भक्तानुग्रहपरा च धीर्यस्यसः क्षितिपालानां राज्ञां भूषणभूतोज्ञानरूपतमसउपशान्तये त.

श्रुत्वाथ सौमित्रिवचोऽखिलं तदाप्राहप्रपन्नार्तिहरःप्रसन्नधीः ॥
विज्ञानमज्ञानतमोपशान्तये श्रुतिप्रपन्नं क्षितिपालभूषणः॥ ६ ॥

दर्थम् सन्धिरार्षः श्रुतिभिः तमेवविदित्वाऽतिमृत्युमेतीत्यादिश्रुतिभिः प्रपन्नं तत्फलकत्वेन बोधितं विज्ञानमात्मतत्वज्ञानामिति सामान्यतः प्रथमंप्राह ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथतादृशज्ञानप्राप्त्यै क्रमेणबहिरङ्गान्तरङ्गसाधनान्याह आदाविति स्ववर्णाश्रमेषु शास्त्रेण वर्णिता याः क्रियानित्यनैमित्तकयज्ञदाना दिरूपास्ताः कृत्वा समासादितशुद्धमानसः प्राप्तान्तःकरणशुद्धिः तत्पूर्वमुपात्तसाधनः तदनुष्ठानपूर्वकमेवउपात्तानिसाधनानि शम दमादीनियेन तादृशः अनेनकर्मणां बहिरङ्गत्वं शमादीनामन्तरङ्गत्वं स्फुटमेवोक्तम् किंच शमदमवैराग्यदार्ढ्यपर्यन्तं कर्मानुष्ठानमेवेति

आदौ स्ववर्णाश्रमवर्णिताः क्रियाः कृत्वा समासादितशुद्धमानसः
समाप्य तत्पूर्वमुपात्तसाधनः समाश्रयेत्सद्गुरुमात्मलब्धये॥ ७ ॥

सूचितम् ततस्तत्कर्मानुष्ठानं समाप्य त्यक्त्वा संन्यस्येतियावत् आत्मलब्धये आत्मज्ञानाय तत्फलकाय तत्वमस्यादिवाक्यार्थविचारा-य सद्गुरुं श्रोत्रियंब्रह्मनिष्ठमित्यादि लक्षणलक्षितं समाश्रयेत् सेवेत अनेनव्युत्पत्तिबलेन स्वयमेववाक्यार्थविचारः क्रियमाणो न फला-येति सूचितम् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसारस्यभ्रमिमच्चक्ररूपत्वात्तन्निवृत्तेश्चतत्कारणाज्ञाननिवृत्तिमूलकत्वदज्ञाननिवृत्तेश्चतत्त्वज्ञानकसाध्यत्वात्तत्त्वज्ञानस्यचवेदान्त विचारसा-ध्यत्वात्तदर्थंगुरुसमाश्रयणमित्याह क्रियेति भवःसंसारश्चक्रवद्विपरिवर्तमानईर्यते कथ्यते तदेवोपपादयति आदृताआदरपूर्वंपूर्वजन्मार्जिताक्रियाएतस्यशरीरोद्भवस्यजन्मनोहेतुः तत्रजन्मनिसुरागिणोविषयाभिलाषवतः तौ शास्त्रप्रसिद्धौ धर्मेतरौ धर्माधर्मौ प्रियाप्रियौसुखदुः-

क्रियाशरीरोद्भवहेतुरादृताप्रियाप्रियौतौभवतःसुरागिणः ॥
धर्मेतरौतत्रपुनः शरीरकंपुनः क्रियाचक्रवदीर्यतेभवः ॥ ८ ॥

खजनकौभवतःकस्यचिदधर्मएवसुखत्वबुद्ध्याप्रवृत्तिः कस्यचिद्धर्मएवंकदाचिदित्यप्यूह्यम् एवंतत्रोत्पादितकर्मणापुनःशरीरंपुनःक्रिया-इत्येवंचक्रवद्विपरिवृत्तिः । यथाचक्रेभ्राम्यमाणेऽधोभागः कदाचिदुपरिउपरितनश्चाधः पुनरुपरिपुनरधएवंजन्मक्रिययोर्जन्यजनक-भावेनपरिवृत्तिरिति बोध्यम् ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्य चाज्ञानमेव मूलमित्याह अज्ञानमेवेति अत्र विधौ संसारनिवृत्तिलक्षणे कर्तव्येऽर्थे तद्ध्यानमेव मूलकारणत्वादज्ञानहानमेव विधीयते साध-
नत्वेनेति शेषः ननु कर्मैव तन्नाशकमस्तु किं ज्ञानेनेत्याशङ्क्याह विद्यैवज्ञानमेव तन्नाशविधौ मूलाज्ञाननाशने पटीयसी समर्था न कर्म समर्थमिति शेषः

अज्ञानमेवास्य हि मूलकारणं तद्धानमेवात्र विधौ विधीयते ॥ विद्यैव तन्नाशविधौ पटीयसी न कर्म तज्जं सविरोधमीरितम् ॥ ९ ॥

यतस्तत्तज्जमज्ञानजम् आत्मस्वरूपाज्ञानजन्यदेहाद्यभिमानजन्यत्वात्कर्मणोऽज्ञानजन्यत्वं बोध्यम् ननु तज्जन्यस्यापि तन्नाशकत्वं वृश्चिककर्क-
व्यादौ दृष्टमित्याशङ्क्य तज्जन्यत्वं वाऽननाशकत्वे न प्रयोजकं किन्तु सविरोधत्वमेवेत्याह यत्सविरोधं तदीरितं नाशकमुक्तमित्यर्थः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अतएवकर्मणानाज्ञानहानिरित्याह नाज्ञानेत्यादि यतःकर्मणाविरोधाभावान्नाज्ञाननाशेनापिरागनाशोवस्तुतः कर्मानुष्ठानात्पुनः सदो षंक्षयिफलत्वादिदोषविशिष्टंकर्मैवोद्भवेत्कर्मणश्चपुनःसंसारएवेतिनमुक्तिमत्याशा ततस्तस्माद्बुधोविवेकीज्ञानविचारवान् ज्ञायतेऽनेने·

नाज्ञानहानिर्नचरागसङ्क्षयोभवेत्ततः कर्मसदोषमुद्भवेत् ॥ ततः
पुनः संसृतिरप्यवारितातस्माद्बुधोज्ञानविचारवान्भवेत् ॥ १० ॥

तिज्ञानंवेदान्तवाक्यंतद्विचारवान्भवेत ॥ १० ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानींज्ञानस्यैवमोक्षहेतुत्वंउक्तुंज्ञानकर्मसमुच्चयवादंदूषणायानुवदतिसार्धेन नन्विति नन्वितिशङ्कायाम् यथाविद्यावेदमुखेनश्रुतिपुराण-
लक्षणेन ब्रह्मविदाप्नोतिपरम् इत्यादिनापुरुषार्थसाधनमुक्ता तथा उभाभ्यांमेवपक्षाभ्यांयथाखेपक्षिणांगतिः तथैवज्ञानकर्मभ्यांप्राप्यते
ब्रह्मशाश्वतम् इत्यादिनाक्रियाऽपितत्साधनत्वेनोक्ता किंच क्रियाकर्तव्यत। तृतीयार्थेप्रथमा कर्तव्यतयाआवश्यकेकृत्येअवश्यकर्तव्यत-

ननुक्रियावेदमुखेनचोदितायथैवविद्यापुरुषार्थसाधनम् ॥ कर्तव्यताप्राणभृतःप्रचोदिताविद्यासहायत्वमुपैतिसापुनः ॥ ११ ॥

याप्रचोदितानित्यनैमित्तिकरूपा एवंचनदकरणेप्रत्यवायोत्पत्त्याज्ञानोत्पत्तिरेवनस्यात् तस्मात्सापुनर्विद्यायाःसहायत्वंप्राप्नोतिघटेजन-
नीयेयथादण्डचक्रादीनांपरस्परसहायता ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्तव्येतीतस्त्रोक्तमंत्रेविदृणोति कर्मेति वीरहावाएषदेवानांयोऽग्निमुद्वासयतेयावज्जीवमग्निहोत्रंजुहोति इतिश्रुतिः तत्रासिद्धान्तीशङ्कते
नन्विति ध्रुवंस्थिरंकार्यमिदंपुरुषार्थमोक्षजनिकाविद्यायतः स्वतन्त्राविनाऽपिसहायेन स्वकार्यसंपादनेसमर्था यथातेजस्तिमिरनिवर्तन-

कर्माकृतौदोषमपिश्रुतिर्जगौतस्मात्सदाकार्यमिदंमुमुक्षुणा॥ननु
स्वतन्त्राध्रुवकार्यकारिणीविद्यानकिञ्चिन्मनसाऽप्यपेक्षते ॥ १२

समर्थंमनसाऽपिकिञ्चित्सहायभूतंवस्तुनापेक्षते तथाफलेजननीयेसहायान्तरसंभावनाऽपिनेतिभावः अनेनुविद्याफलजननेनिरपेक्षास्वतन्त्र-
त्वात्तेजोवदित्यनुमानंसूचितम् ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समुच्चयवादीपरिहराते नेति त्वदुक्तंनेत्यर्थः सत्यकार्यः अक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवति इत्यादिवेदनबोधितःस्थिरकार्योऽपि-
अध्वरः यथाऽन्यानपिकारकादिकान् आरादुपकारकप्रयाजाद्यङ्गानिदेशकालादीनिचप्रकाङ्क्षते तथाविद्यापिअग्निहोत्रंजुहोतिइत्यादिवि

नसत्यकार्योऽपिहियद्वदध्वरः प्रकाङ्क्षतेऽन्यानपिकारकादिकान्
तथैवविद्याविधितः प्रकाशितैर्विशिष्यते कर्मभिरेवमुक्तये ॥ १३ ॥

धिवाक्यतःतत्समूहेनप्रकाशितैः कर्मभिः सहितैवमुक्तयेविशिष्यतइत्यर्थः विद्याफलदानेकर्मापेक्षा अङ्गित्वात् प्रयाजाद्यङ्गापेक्षदर्शा
दिवदितिसत्प्रतिपक्षानुमानमनेनसूचितम् ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदनूदयसिद्धान्तीदूषयति केचिदिति यत्केचिद्वितर्कवादिनइतिज्ञानकर्मणोसमुच्चित्यमुक्तिसाधनंवदन्तितदप्यसत् यथाकेवलंकर्म मोक्ष साधनमित्यमत्तथातन्मीलितमित्यप्यसत् तत्रहेतुर्दृष्टविरोधकारणात् दृष्टोयोविरोधः सर्वलोकदृष्टविरोधरूपात्कारणात्तदसदित्यर्थः विरो

केचिद्वदन्तीतिवितर्कवादिनस्तदप्यसद्दृष्टविरोधकारणात् ॥
देहाभिमानादभिवर्धतेक्रियाविद्यागताहङ्कृतितःप्रसिद्ध्यति १४

धमेवाह देहाभिमानात्क्रियावर्धतेअनात्मनिदेहादावात्मत्वाभिमानात्क्रियावृद्धिः विद्यातुगताहङ्कृतितः गताहङ्कृतिर्यस्यतस्यनष्टाहङ्कृतेः प्रसिद्ध्यति सार्वविभक्तिकस्तासिः एवंचाहङ्कारसत्तामूलकत्वात्क्रियाज्ञानयोः समुच्चयोविरुद्धइत्यर्थः ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथपूर्वपक्ष्युक्तानुमानंदूषयनविद्यास्वरूपमाह विशुद्धंविज्ञानंयेभ्यस्तेषांवेदान्तवाक्यानांयाद्विशेषेणरोचनंरलयोरभेदादालोचनंविचार
स्तेनाञ्चितामापितायाचरमाआत्मवृत्तिर्ब्रह्माकारांतःकरणवृत्तिः साविद्येतिभण्यतेविद्वद्भिरितिशेषः पुनःसमुच्चयवारणायविद्याकर्मणो
र्वैषम्यमाह कर्मयज्ञादिअखिलकारकादिभिःकर्तव्यकर्मादिभिरङ्गैश्चसहितंसदुदेति फलोन्मुखंभवति विद्यापुनरखिलकारकादीन्निहन्ति

विशुद्धविज्ञानविरोचनाञ्चिताविद्याऽऽत्मवृत्तिश्चरमेतिभण्यते ॥
उदेतिकर्माखिलकारकादिभिर्निहन्ति विद्याऽखिल कारकादि-
कम् ॥ १५ ॥

तत्रकर्तृत्वादिबुद्धिंनिहन्ति सकलव्यापारपरित्यागेनब्रह्मणिसमाप्तिर्हिविद्या अतः स्वोत्पत्तौचित्तशुद्धिद्वाराकर्मसापेक्षास्वफलेजनयितव्यं-
तन्निरपेक्षैवान्यथाविद्यास्वरूपस्यैवभङ्गापत्तेरितिपूर्वपक्ष्युक्तहेतोरसिद्धिरितिभावः ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

उपसंहरन्मुमुक्षोर्वृत्तिप्रकारमाह तस्मादिति विद्याविरोधाद्विद्यायाः कर्मणासह विरोधेनसमुच्चयोनभवेत्तस्मात्सुधीर्मुमुक्षुरशेषतः कर्मत्यजे-
त् काम्यंतुसर्वथात्याज्यमेवनित्यनैमित्तिकमपियावच्चित्तशुद्धिकर्तव्यमेव ततोऽपिब्रह्माणिचित्तस्थैर्यपर्यन्तं कर्तव्यमेव ततस्तदनुसन्धानप्र-

तस्मात्त्यजेत्कार्यमशेषतः सुधीर्विद्याविरोधान्नसमुच्चयोभवेत् ।
आत्मानुसन्धानपरायणःसदा निवृत्तसर्वेन्द्रियवृत्तिगोचरः १६

तिबन्धकत्वात्प्रयोजनाभावाच्चतदपित्याज्यमेवेतिभावः इदानींमुमुक्षुकर्तव्यमाह निवृत्ताःसर्वेषामिन्द्रियाणां गोचराविषयाःशब्दादयोय
स्मात्तादृशःसन् आत्मनःसच्चिदानन्दस्यानुसन्धानमेवपरमयनंप्राप्यंयस्यतथाविधोभवेत् अत्रेन्द्रियप्रत्याहारःकर्तव्यत्वेनोक्तस्तेनतत्पूर्वंप्रा-
णायामाद्यर्थादाक्षिप्तम् ॥ १६ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रागिविरागिभेदेनकर्मणोकर्तव्यताकर्त्तव्यतेआहयावदिति माययाविद्ययाशरीरादिष्ववानात्मस्वआत्मधीरहङ्कर्त्तेत्यादिरूपायावद्वर्त्ततेतावद्वि
धिवादकर्मणाम् विधिर्यजेतेत्यादिश्रुतिर्वादः कर्तव्यताबोधकोयेषांकर्मणांविधेयोवश्यवर्त्तितत्कर्मकर्तानिवेत तदपगमेतुतदाखिलं जगन्नेतीति

याविच्छरीरादिषुमाययात्मधीस्तावद्विधेयोविधिवादकर्मणाम् ॥
नेतीतिवाक्यैरखिलं निषिद्ध्य तज्ज्ञात्वापरात्मानमथत्यजेत्क्रि
याः ॥ १७ ॥

वाक्यैः अथातआदेशोनेतिनेतिइत्यादिवाक्यैर्निषिध्य मिथ्यात्वेननिर्णीयताद्विलक्षणतयासत्यत्वेनपरमात्मस्वरूपंज्ञात्वाक्रियास्त्यजेत्निरू ॥ ९ ॥
पितमेतत् ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मविज्ञानेसत्यवश्यमविद्या निवर्ततइत्याह यदेति आत्मनिशुद्धेन्तःकरणेपरमात्मनईशस्यात्मनोजीवस्यचयोविभेदोमायान्तःकरण रूपोपाधिद्वयकृतोविभेदोभेदस्तस्यभेदकं नाशकंभास्वरंप्रकाशशीलं यद्विज्ञानमितरवृत्त्युपमर्दनपूर्वकंब्रह्माकाराऽखण्डाद्यवृत्तिर्यदाऽवभाति

यदापरात्मात्मविभेदभेदकंविज्ञानमात्मन्यवभाति भास्वरम् ॥
तदैवमायाप्रविलीयतेऽञ्जसासकारकाकारणमात्मसंसृतेः॥ १८॥

असंभावनादितिरस्कारेणोदेति तदैव सकारकाजन्मान्तरप्रापककर्मसहितामायातत्तज्जीवोपाधिभूता विद्याऽञ्जसाझदितिप्रविलीयतेनश्यति ननुतन्नाशेऽपिसंसारनाशःकथमतोमायाविशेषणम् आत्मसंसृतेःकारणंसंसारस्योपादानकारणमेवंचतन्नाशेकार्यनाशोभवत्येवेतिभावः १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं पुनर्दार्ढ्यायाह श्रुतीति तत्त्वमसीत्यादिश्रुतिरूपैः प्रमाणैस्तज्जनितज्ञानेन नाशितासाविद्याकथमपिकार्यकारिणीभविष्यतीति काकुरत्र सर्वथानेत्यर्थः असतःकार्यकारित्वासंभवादितिभावः पुनश्चतस्यानोद्भवइत्याह विज्ञानमात्रादिति अमलाच्छुद्धाद्द्वितीयतःद्विती

श्रुतिप्रमाणाभिर्विनाशिताचसाकथंभविष्यत्यपिकार्यकारिणी ॥
विज्ञानमात्रादमलाद्द्वितीयतस्तस्मादविद्यानपुनर्भविष्यति १९

यात्मविषयकाद्विज्ञानमात्रादितरासहकृतान्निदिध्यासनपरिपाकजज्ञानाद्यतोनष्टातस्मात्सापुनर्नभविष्यति रज्ज्वज्ञानमूलकस्य सर्पस्य रज्जुज्ञानेन निवृत्तस्ययथानपुनरुत्पत्तिरितिभावः ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्याया इतरनिरपेक्षाया एवमोक्षकारणत्वमुक्तंयुक्तिपूर्वकंपुनःकथयतिश्रोतृदार्ढ्याय । यदीति । यदिनष्टातत्त्वज्ञाननाशिता सा न पुनः प्रसूयतेनोत्पद्यतेतदाकारणाभावादहंमतिःकथंभवेत् । कथमपिनभवेदित्यर्थः । तदभावाच्चतत्कालेकर्माभावइतिस्वफलजननेसास्वतन्त्राइ

यदिस्मनष्टा नपुनःप्रसूयते कर्ताऽहमस्येति मतिः कथं भवेत् ॥
तस्मात्स्वतन्त्रा न किमप्यपेक्षते विद्या विमोक्षाय विभाति केव
ला ॥ २० ॥

तरनिरपेक्षैवनाकिमप्यपेक्षते द्वितीयस्यासंभवात् अतः केवलाऽसहायैवविमोक्षायविभातितत्फलिकाभवतीत्यर्थः ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रार्थे श्रुतिरपिप्रमाणमित्याह सेति साप्रसिद्धा नकर्मणानप्रजयाधनेनत्यागेनैके अमृतत्वमानशुः इत्यादिकातैत्तिरीयश्रुतिःप्रशस्तानामर्थ
वादैःप्राशस्त्येनबोधितानामपिकर्मणांन्यासंत्यागंसादरंस्फुटमाह नतुकर्मसमुच्चयमित्यर्थः तथावाजिनांवाजसनेयिनाम् एतावदरेखल्वमृत

सातैत्तिरीयश्रुतिराहसादरंन्यासंप्रशस्ताखिलकर्मणां स्फुटम् ॥
एतावदित्याहचवाजिनांश्रुतिर्ज्ञानंविमोक्षायनकर्मसाधनम् २१

त्वम् इत्यादिका ज्ञानंविमोक्षायसाधनं नकर्मेत्येतदाह ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहङ्कारत्यागरूपकारणवैषम्यात् क्रियाज्ञानयोर्वैषम्यमुक्त्वा फलमयुक्तमापिवैषम्यमाह विद्येति हेसमुच्चयवादिन् त्वयाक्रतुरग्निष्टोमादिर्वि द्यासमत्वेनदर्शितः परन्तुसमोदृष्टान्तोनोदाहृतः अनेनक्रतुर्विद्यासमः श्रुतिबोधितकर्तव्यताकत्वादित्यनुमानन्निरस्तम् दृष्टान्ताभावा- त् अन्वय्येवानुमानन्नव्यतिरेकीतिभावः एतच्चाकरेविस्तरेणप्रपञ्चितम् ननुविद्याकर्मणीसमे एकफलत्वाच्चक्रदण्डादिवदित्यनुमान-

विद्या समत्वेनतु दर्शितस्त्वया क्रतुर्नदृष्टान्त उदाहृतः समः ॥
फलैःपृथक्त्वाद्बहुकारकैः क्रतुःसंसाध्यतेज्ञानमतोविपर्ययम् २२

मितिचेत्तत्राह फलैः पृथक्त्वात षष्ठ्यर्थेतृतीया फलानांभेदादित्यर्थः एवंचस्वरूपासिद्धोहेतुरितिभावः समानकारकत्वमपिहेतुर्नेत्याह क्रतुर्बहुभिः कारकैरहंममताभिमानरूपैरान्तरैर्बाह्यैश्चदेशकालादिनियमैश्चसाध्यते ज्ञानन्त्वतोविपर्ययवदतोनतयोः साम्यमितिभावः २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वकरणेप्रत्यवायभिया कर्मकार्यमितिचेन्नेत्याह सप्रत्यवायइति कर्मत्यागेनाहंनिश्चयेनाहंप्रत्यवायसंहितोभविष्यामीत्येवंशुद्धात्मानि-
अनात्मधर्मस्यधीरप्रज्ञस्यतत्त्वज्ञानविकलस्यप्रसिद्धा नतुतत्त्वदर्शिनः तस्याहंबुद्धेरभावात् पापादेरनात्मधर्मतानिश्चयाच्च तस्माद्बुधैःकर्म

स प्रत्यवायोह्यहमित्यनात्मधीरज्ञप्रसिद्धा नतु तत्वदर्शिनः ॥
तस्माद्बुधैस्त्याज्यमपि क्रियात्मभिर्विधानतःकर्मविधि प्रका
शितम् ॥ २३ ॥

क्रियात्मभिः षष्ठ्यर्थेतृतीया क्रियाफलसक्तचित्तानां विधानतोविधानेनेतिकर्तव्यतयायुक्तंकर्म विधिभिरवश्यकर्तव्यतयाबोधितमपि-
त्याज्यमित्यर्थः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविरक्तस्यकार्यमाह । श्रद्धेति । गुरुशास्त्रयोर्विश्वासःश्रद्धानदन्वितोबुभुत्सुःशुद्धमानसोऽपि निष्कामकर्मानुष्ठानाच्छुद्धमानसश्चगुरोः प्रसादाल्लब्धतत्त्वमसीतिवाक्यतः श्रुतमात्मजीवयोरैकात्म्यंविज्ञाय मननिदिध्यासनपरिपाकाभ्यांसाक्षात्कृत्य । चएवार्थः । साक्षा

श्रद्धान्वितस्तत्त्वमसीतिवाक्यतो गुरोःप्रसादादपिशुद्धमानसः॥
विज्ञायचैकात्म्यमथात्मजीवयोः सुखी भवेन्मेरुरिवाप्रकम्पनः
॥ २४ ॥

त्कृत्यवसुखी भवेत् । सकलदुःखहीनो भवेदित्यर्थः । अप्रकम्पनःविषयाभिलाषाक्षोभितान्तःकरणः ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महावाक्यंविवरीतुंवाक्यार्थस्यपदार्थबोधपूर्वकत्वमाह । आदाविति । विधानतःभ्रमप्रमादराहित्येनवाक्यार्थविज्ञानस्यविधावुत्पत्तौआ
दौप्रथमंमुख्यमितियावत्। पदार्थावगतिःकारणम्। हिप्रसिद्धं तस्यपदत्रयंतत्त्वम्असीति । तत्रतत्पदार्थःपरमात्मासर्वज्ञत्वादिगुणः त्वं

आदौ पदार्थावगतिर्हिकारणं वाक्यार्थविज्ञानविधौ विधानतः ॥
तत्त्वंपदार्थौपरमात्मजीवकावसीतिचैकात्म्यमथानयोर्भवेत्
॥ २५ ॥

पदार्थोजीवः अनयोस्तत्त्वंपदार्थयोरैकात्म्यंतद्बोधकमसीतिपदम् ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुसर्वज्ञत्वादिगुणस्येशस्यकिञ्चिज्ज्ञत्वधर्मवताजीवेनैकात्म्यं विरुद्धमित्याशङ्क्याह । प्रत्यागिति । अहंबुद्धिवेद्यत्वंप्रत्यक्त्वंजीवधर्मः परोक्षत्वमीशधर्मस्तदादिधर्मकृतमात्मनोःपरमात्मजीवात्मनोर्विरोधंविहायत्यक्त्वातयोः संशोधिताम् युक्तिभिःसम्यग्विचारितांतत्त्वंपदाभ्यांशक्त्यभावेऽपिवक्ष्यमाणप्रकारयालक्षणयालक्षितां ज्ञाताञ्चिदात्मतां संगृह्य तत्त्वंपदोपास्थितिविषयांकृत्वा स्वमात्मानंतथाज्ञात्वाऽथएकात्मज्ञानानन्तरमद्वयोभवेत् । चित्स्वरूपतांप्राप्तइवभवेत् । पूर्वमपितत्स्वरूपएवविस्मृतकण्ठचामीकरन्यायेनचतत्प्राप्तिः तडवेत्युक्तम् ।

प्रत्यक्परोक्षादिविरोधमात्मनोर्विहायसंगृह्यतयोश्चिदात्मताम् ॥
संशोधितांलक्षणयाचलक्षितांज्ञात्वास्वमात्मानमथाद्वयोभवेत्
॥ २६ ॥

अयंभाव ः तत्त्वंपदयोर्द्वावर्थौ वाच्योलक्ष्यश्च तत्रतत्पदस्यमायोपाधिःसर्वज्ञत्वादिविशिष्टोवाच्यः त्वंपदस्यापिकिञ्चिज्ज्ञत्वादिविशिष्टो मायाकार्याविद्योपाधिरविद्यावदन्तःकरणोपाधिर्वाच्यः उभयोरपिविशेषणांशत्यागेनशुद्धश्चिदात्मालक्ष्यः तत्रवाच्ययोर्विरुद्धधर्मकत्वादैक्यासंभवेऽपिलक्ष्ययोरैक्यंनिर्बाधमेवेति ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तलक्षणास्वरूपमाह । एकात्मकत्वादिति जहतीलक्षणा जहत्स्वार्थलक्षणा यथा गङ्गायां घोष इत्यत्र गङ्गापदार्थस्य प्रवाहस्य घोषाधारतानुपपत्त्या सर्वथा तत्परित्यागेन तीररूपार्थलक्षणा सा प्रकृते न एकात्मत्वात् । विशेष्यांशस्यैकत्वात् सर्वथा स्वार्थत्यागाभावात् । तथाजहल्लक्षणताजहत्स्वार्थलक्षणा तत्त्वमपि अत्र न संभवति । यथा काकेभ्यो दधि रक्ष्यतामित्यादौ काकपदस्य स्वार्थात्यागेनैव दध्युपघातकेलक्षणा सापि न । विरोधतः विशेषणत्यागेन सर्वथा स्वार्थत्यागाभावात् । अतो भागलक्षणा जहदजहल्लक्षणा युज्यते । अदोषतः पूर्वोक्तदोषाभावात्

एकात्मकत्वाज्जहती न सम्भवेत्तथाऽजहल्लक्षणता विरोधतः॥
सोऽयंपदार्थाविवभागलक्षणायुज्येततत्त्वंपदयोरदोषतः॥२७॥

विशेष्यांशस्यात्यागाद्विशेषणांशस्यत्यागाच्च । तत्र दृष्टान्तः । सोऽयं पदार्थाविव । यथा सोऽयं देवदत्त इत्यत्र तद्देशादिविशिष्टोऽतीतानुभवविषयो वा तत्पदार्थः एतद्देशादिविशिष्टोऽनुभूयमानो वेदंशब्दार्थः । तयोश्चाविरुद्धविशेषणकत्वादैक्यासंभवेन देशादिरूपविशेषणत्यागेनानुभवगतानां तत्त्वादिविशेषणत्यागेन वा लक्षणयैक्यं तद्वदिति भावः ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथत्याज्यत्वायजीवोपाधिमाह । रसादी ति । रसापृथ्वीआदिर्येषांतानिपञ्चीकृतानियानिभूतानितेभ्यःसंभवोयस्यतत् । पञ्चीकरणंचेत्थम् एकैकंभूतंद्विधाविभज्यतत्रैकंभागंचतुर्धाविभज्यतेषांभागानांस्वेतरभूतचतुष्टयार्धभागचतुष्टयेसंयोजनेएकैकंभूतंपञ्चात्मकंभवतिभा

रसादिपञ्चीकृतभूतसंभवंभोगालयंदुःखसुखादिकर्मणाम् ॥ शरीरमाद्यन्तवदादिकर्मजंमायामयंस्थूलमुपाधिमात्मनः ॥ २८ ॥

गाधिक्याच्चप्रातिस्विकतयाभूगादिव्यवहारोऽपि । सुखदुःखयोरादीनियानिकर्माणितेषांभोगस्तत्कर्मजसुखदुःखानुभवस्तस्यालयमाश्रयभूतमाद्यन्तवत्उत्पत्तिनाशयोगि आदिकर्मजंभाग्भवीयकर्मजन्यंमायामयंपरम्परयामायाविकारः तद्विकारभूतविकारत्वात् । एतच्छरीरमात्मनःस्थूलमुपाधिंवदन्तीतिशेषः ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसूक्ष्मोपाधिमाह। सूक्ष्ममिति । बुधाःअन्यत्स्थूलशरीरविलक्षणंशरीरंलिङ्गदेहाख्यमात्मनउपाधिंविदुः । तत्स्वरूपमाह। सूक्ष्मंचक्षु-
राद्यविषयः मनोबुद्धिदशेन्द्रियैःप्राणैश्चयुतम् सङ्कल्पात्मकंमनः निश्चयात्मिकाबुद्धिः घ्राणरसनाचक्षुस्त्वक्श्रोत्रेतिपञ्चज्ञानेन्द्रियाणि वा-

सूक्ष्मंमनोबुद्धिदशेन्द्रियैर्युतंप्राणैरपञ्चीकृतभूतसंभवम् ॥ भोक्तुः
सुखादेरनुसाधनंभवेच्छरीरमन्याद्विदुरात्मनोबुधाः ॥ २६ ॥

क्पाणिपादपायूपस्थानिकर्मेन्द्रियाणि प्राणापानव्यानोदानसमानाश्चप्राणास्तैर्युतमेतत्सप्तदशसमुदायात्मकम्। तदाधारभूतान्याह ।अप
ञ्चीकृतभूतसंभवंतेभ्यउत्पन्नमतएवादृश्यम् । तथाभोक्तुःसुखादेःसुखदुःखाद्यनुभवस्यानुसाधनम् स्थूलशरीरस्यैतदनुगतस्यैवभोगसाधनत्व
मितिभावः । एताद्वियोगेनैवमरणव्यवहारइतिबोध्यम् ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिजीवोपाधिद्वयमुक्त्वाईशोपाधिमाह । अनादीति । अनादि उत्पत्तिहीनम् । नानाविधपरिणामशालितयापरिणामरूपेणनश्वरामिति अनादित्वमात्रोक्त्यासूचितम् । अनिर्वाच्यम् सत्त्वासत्त्वाभ्यांनिर्वक्तुमशक्यम् कारणंसकलप्रपञ्चस्यजनकम् ईदृशीमायातुब्रह्मणःपरमी-

अनाद्यनिर्वाच्यमपीहकारणं मायाप्रधानंतुपरंशरीरकम् ॥ उ-
पाधिभेदान्तुयतःपृथक्स्थितं स्वात्मानमात्मन्यवधारयेत्क्र-
मात् ॥ ३० ॥

श्वरव्यवहारसंपादकत्वादुत्कृष्टंप्रधानंशरीरकम् । स्वार्थेकः । एवमुपाधिभेदादेकमेवचैतन्यंयतः पृथक्स्थितंजीवईशइतिभेदबुद्धिविषय मतोलक्षणयोपाधिपरित्यागेनस्वात्मानमात्मनिअवधारयेदभेदेनजानीयात् । क्रमाच्छ्रवणमननानिदिध्यासनक्रमेणेत्यर्थः ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवाक्यार्थविचारफलमाह । कोशेष्विति । आनन्दमयस्य ब्रह्मत्वेअन्नमयप्राणमयमनोमयविज्ञानमयेषुचतुर्षुकोशेषुतत्तत्सङ्गात्तत्तदाकृतिर्विभाति यथाजपादिसङ्गात्स्फटिकोऽनेकाकृतिर्भाति । आनन्दमयस्यापि जीवत्ववादिनातुतेनसहपञ्चसु कोशेष्वितिबोध्यम् । अस्मि-

कोशेषुपञ्चस्वपितत्तदाकृतिर्विभातिसङ्गात्स्फटिकोपलोयथा ॥ असङ्गरूपोऽयमजोयतोऽद्वयोविज्ञायतेऽस्मिन्परितोविचारिते ॥ ३१ ॥

न्महावाक्येपरितोविचारितेसम्यग्विचारितेसत्ययमात्माऽसङ्गरूपःअन्नमयादिभिःसङ्गरहितः । असङ्गोनहिसज्जते । इतिश्रुतेः । अजोऽद्वयश्चविज्ञायते । स्थूलोऽहमित्यादिस्त्वज्ञस्यतत्तत्कोशप्रसङ्गात्प्रतीतिःस्फटिकवत् तत्त्वज्ञस्यतुनतथाप्रतीतिरितिभावः । एवंचतत्तदुपाधिकृततत्तद्रूपताप्रतीतिनिरासएव विचारफलमितिभावः ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जाग्रदाद्यवस्थाऽपि बुद्धेर्धर्मोनात्मधर्मइत्याह । बुद्धेरिति । इहआत्मनिस्वप्नादिभेदेन जाग्रत्स्वप्नसुषुप्तिभेदेन यात्रिधावृत्तिर्दृश्यतेसाऽपि गुणत्रयात्मनः सत्त्व रजस्तमोरूपगुणत्रयस्वरूपाया बुद्धेर्धर्मः । उक्तावस्थात्रयस्योक्तमूलकत्वात् । एतदवस्थात्रयस्यास्मिन्नवस्थात्रय-साक्षिणि आत्मनि भानं मृषा बुद्ध्यध्यास निबन्धनं न तु वास्तव मित्यर्थः । अन्योऽन्यतोव्यभिचारतस्तस्यावस्था त्रयस्यस्व रूपतो

बुद्धेस्त्रिधा वृत्तिरपीह दृश्यते स्वप्नादि भेदेन गुणत्रयात्मनः ॥ अन्योऽन्यतोऽस्मिन्व्यभिचारतोमृषा नित्ये परे ब्रह्मणि केवले शिवे ॥ ३२ ॥

मृषात्वात्तज्ज्ञानस्य मृषात्वमेव । स्वप्नकाले जाग्रत्सुषुप्त्योरभावात् । जाग्रतिइतरद्वयस्याभावात् सुषुप्ताावितरयोरभावात्परस्परं व्यभिचारोवोध्यः आत्मनस्तदनाश्रयत्वंविशेषणैराह । नित्येउत्पत्तिनाशशून्येपरेगुणत्रयातीते ब्रह्मणिव्यापकेकेवलेऽसङ्गेशिवआनन्दरूपे एवंभूतेसदैकरसेपरस्परव्यभिचारधर्माभानमसंभवीति भावः ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथत्याज्यत्वायसंसारमूलभूतांवृत्तिमाह । देहेति । एषांसङ्घातइतरेतराध्यासविषयात् अजस्रंसावाद्धियो बुद्धेर्वृत्तिस्तमोमूलतयाऽज्ञ
लक्षणाऽज्ञत्वज्ञापिका यावत्परिवर्तते तावद्भवोद्भवःसंसारोऽभवोभवेत् । तमःपदंरजसोऽप्युपलक्षणम् । रजस्तमःप्रधानाबुद्धिः संसारहेतु

देहेन्द्रियप्राण मनश्चिदात्मनां सङ्घादजस्रं परिवर्तते धियः ॥
वृत्तिस्तमोमूलतयाऽज्ञलक्षणा यावद्भवेत्तावदसौ भवोद्भवः॥३३॥

त्वात्सर्वथात्याज्येति भावः ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत महावाक्यविचारस्य कर्तव्यमाह । नेतीति । अथात आदेशोनेतिनेति इति प्रमाणेननिराकृतं मिथ्यात्वेनगृहीतमखिलंजगत्येनसः ततोहृदासत्त्वप्रधानेनमनसासम्यगास्वादितं चिल्लक्षणंघनामृतंदुःखासंभिन्नंसुखंयेनसः । स्वर्गादितुपरिणामदुःखत्वात्तत्संभिन्नमेव । एवंभूतोऽशेषंजगद्देहेन्द्रियादिदृश्यसमूहंत्यजेत् हानोपादानबुद्धिविषयंनकुर्यात् । किन्तूदासीनस्तत्रभवेत् । ननुदेहेन्द्रियादिभिरेवतज्ज्ञान

नेतिप्रमाणेन निराकृताखिलो हृदासमास्वादितचिद्घनामृतः ॥ त्यजेदशेषं जगदात्तसद्रसं पीत्वा यथाऽम्भः प्रजहाति तत्फलम् ॥ ३४ ॥

लाभात्कथमुपजीव्यस्यत्यागइत्याशङ्क्यदृष्टान्तदर्शनेनपरिहराति । यथातृषावानआत्तः सद्रसोमाधुर्ययेनतादृशं नारिकेलनारङ्गादि फलान्तवर्त्यम्भःपीत्वा तत्स्थानभूतंतत्फलं जहाति तत्रोदासीनोभवति तद्वत्सर्वदृश्यसारांशोब्रह्मतल्लाभसतिनिः सारंदृश्यंनोपादेयंनापिहेयमितिभावः । यतोभयादिसंभावनातद्धेयामित्युच्यते ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतरस्यानित्यत्वेनतत्रवैराग्यार्थमात्मनएवनित्यत्वमाह । कदाचिदिति । कदापीत्यर्थः । अनवः उत्पत्त्यनन्तरंविद्यमानोहिनवः । तेन जन्मानन्तरास्तित्वंव्यावर्तितं नवत्वाभावेनैवजीर्णत्वाभावादवस्थान्तरापत्तिरूप परिणामोऽपिनिरस्तः ।अनेनअस्तिजायतेवर्द्धतेविपरिणमतेऽपक्षीयते नश्यतीति षड्भाव विकार राहित्यमुक्तम् । एवंचैतद्भिन्नं सर्वमुक्तषड्भावविकारवत्त्वादनित्यमिति ततोविरज्येतेतिबोधित-

कदाचि दात्मान मृतोनजायते नक्षीयते नापिविवर्धतेऽनवः ॥
निरस्तसर्वातिशयः सुखात्मकः स्वयम्प्रभः सर्वगतोऽयमद्वयः ३५

म् । यतऽईदृशोऽतएवनिरस्तः सर्वस्यदेहेन्द्रियादेरतिशयोमहत्त्वं येनस्वलाभात्सः यल्लाभान्नापरोलाभइतिश्रुतेः यतःसुखात्मकः आनन्द स्वरूपः स्वयम्प्रभःस्वप्रकाशकश्च देहेन्द्रियादिस्तु दुःखस्वरूपः परप्रकाश्यश्च । यस्यभासासर्वमिदंविभाति । इतिश्रुतेः । सर्वगतोव्यापकः अयमहंबुद्धिविषयःप्रत्यगात्माऽपिअद्वयः उक्ताद्वयब्रह्मस्वरूपएव । नततोऽतिरिक्तइतिभावः । अयमात्माब्रह्म । इतिश्रुतेः ॥ ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुएवंविधेविकारशून्येआत्मनिजन्ममरणादिप्रवाहरूपसंसारभानंकथमितिशङ्कते। एवंविधेइति।दुःखमयःदुःखप्रचुरः।उत्तरयाति। अज्ञानतइ तिअज्ञानमूलकोयोध्यासोदेहान्तःकरणादौअहंममेत्यध्यासस्तद्वशात्। एवंचभ्रान्तिरूपातत्प्रतीतिरितिभावः। नन्वेवंकथंतस्यसंसारस्यनि

एवंविधे ज्ञानमये सुखात्मके कथंभवो दुःखमयःप्रतीयते ॥
अज्ञानतोऽध्यासवशात्प्रकाशतेज्ञानेविलीयेत विरोधतःक्षणात्॥
॥ ३६ ॥

वृत्तिस्तत्राह। ज्ञानेति। आविर्भूतइतिशेषः। ज्ञानस्याज्ञानविरोधित्वात्तदुत्पत्तिक्षणएवकारणभूताज्ञाननाशात्तत्कार्यसंसारस्यापि वि लयइत्यर्थः। यथारज्जुज्ञाननरज्जौसर्पस्यलयइत्यर्थः ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाध्यासलक्षणमाह । यदन्यदिति । यदन्यत्सर्पादिकमन्यत्ररज्ज्वादौ भ्रमात् भ्रमजनकाद्दोषाद्विभाव्यते विज्ञायते अमुं विपश्चितो विद्वां-
सोऽध्यास इत्याहुः । यथाऽसर्पभूते रज्ज्वादौ अहिविभावनं सर्पारोपो रज्ज्वबुद्धिमूलकस्तद्वदीश्वरेऽपि जगद्देहादिसंसारात्मकं सर्वं विभाव्य-

यदन्यदन्यत्र विभाव्यते भ्रमादध्यासमित्याहुरमुं विपश्चितः॥
असर्पभूतेऽहिविभावनं यथा रज्ज्वादिके तद्वदपीश्वरे जगत्॥३७॥

तेऽआत्मज्ञानाभावात्तथ्यार्थतया ज्ञायते ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनिजगज्ज्ञानेकीदृशोऽध्यासोनिमित्तंतदाह विकल्पेति सर्वविकल्पकारणमायारहितेवस्तुतस्तत्सङ्गरहितेचिदात्मकेचित्स्वरूपेसर्वकारणेनिरामयेदुःखासंभिन्नानन्दमयेकेवलेसर्वविकारशून्यपरेदृश्यविलक्षणेब्रह्मणिव्यापके आत्मनिप्रथममहङ्कारः कल्पितः सएवाध्यासः ।

विकल्पमायारहितेचिदात्मके ऽहङ्कारएष प्रथमः प्रकल्पितः ॥
अध्यासएवात्मनिसर्वकारणे निरामयेब्रह्मणि केवलेपरे ॥ ३८॥

अहंबुद्ध्यात्मकोऽध्यासएवसर्वसंसारकारणमितिभावः ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बुद्धिनिष्ठएवसंसारोनत्वात्मनिष्ठइत्यत्रान्वयव्यतिरेकौप्रमाणयति। इच्छादीति। परेसर्वसाक्षिणिआत्मनिसंसृतिहेतवःभासमानसंसारकारणं
सदाकालत्रयेऽपिइच्छादिरागादिसुखादिधार्मिकाः इच्छांपेक्षेरागद्वेषौसुखदुःखंइत्येवमादिद्वन्द्वधार्मिकाःधियएवधीषुसतीषुसंसारइत्यन्वयमु

इच्छादिरागादिसुखादिधार्मिकाः सदा धियः संसृतिहेतवः परे ॥
यस्मात्प्रसुप्तौतदभावतःपरः सुखस्वरूपेणविभाव्यतेहिनः ॥३९॥

क्त्वातद्व्यतिरेकमाहयस्मात्कारणात्प्रसुप्तौतदभावा तधीवृत्त्यभावात परआत्मानोऽस्माभिःतृतीयार्थेषुषष्ठी। सुखरूपेणस्वस्वरूपमात्रेणाविभा
व्यतेनिश्चीयते नतु संसारित्वेनेतिभावः सुप्तोत्थितस्तुसुखमहमस्वाप्समितिप्रत्यभिज्ञानुभवात्तदात्मस्वरूपनिश्चयोऽस्तीतितात्पर्यम् ॥ ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथपुनस्तत्त्वंपदार्थस्वरूपमाह ।अनादीति।अनादिर्याऽविद्यातततउद्भवोयस्या बुद्धेरन्तःकरणस्यतत्रबिम्बितःप्रतिबिम्बितश्चितःप्रकाशः सजीवइतीर्यते आत्मापरमात्माधियः साक्षितयाधीधर्मासङ्गेनैवपृथक्स्थितः । अन्तर्यामितयेत्यर्थः जीवोऽहंसुखीत्यादिप्रकारेणान्तःकर

अनाद्यविद्योद्भवबुद्धिबिम्बितोजीवप्रकाशोऽयमितीर्यते चितः ॥
आत्माधियः साक्षितया पृथक् स्थितो बुद्ध्या परिच्छिन्नपरः
सएव हि ॥ ४० ॥

णधर्माध्यासवान्परमात्मातु साक्षितयासर्वत्रविद्यमानोऽपिनतथेतिभावः। अतएवबुद्ध्यापरिच्छिन्नपरः बुद्धिलक्षणपरिच्छेदरहितःअतएव परः । एवंचज्ञानेनप्रतिबिम्बाधार विलयप्रतिबिम्बस्यविलयात्सजीवः सएवपरमात्मैवहिप्रसिद्धं सइत्यस्यचावृत्तिर्वोध्या ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ बुद्ध्यात्मनोः परस्पराध्यासवशात् परस्परधर्मभानमितिदार्ढ्यायपुनराह । चिद्बिम्बेति । चिद्रात्मचेतसोरन्योन्याध्यासवशात् परस्परतादात्म्यारोपाज्जडाजडत्वंप्रतीयते । चेतसोवृत्तीनांज्ञानत्वं जीवात्मनोजडत्वंप्रतीयते । अतएवज्ञानाश्रयआत्मेति चितएवता। किंकर्तृव्यवहारः । जीवात्मनिजडात्मनिजडात्माकथ्यते बुधैरितिस्मार्तव्यवहारश्च । अत्रहेतुः । चिदित्यादि । चिद्बिम्बस्यसाचिदाभासः अ

चिद्बिम्बसाक्ष्यात्मधियांप्रसङ्गतस्त्वेकत्रवासादनलाक्तलोहवत् ॥
अन्योऽन्यमध्यासवशात्प्रतीयते जडाजडत्वंचचिदात्मचेतसोः

॥ ४१ ॥

क्षैःसहितः साक्षः सेन्द्रियः सचासावात्मामनःधीरन्तःकरणंतेषांप्रकृष्टसङ्गादतिसान्निकर्षादध्यासइत्यर्थः । अनलाक्तलोहवत् अग्नितप्तलोहपिण्डवत् अत्रदृष्टान्तः । अग्निधर्मोदाहकत्वं लोहधर्मश्चवर्तुलत्वाद्यनलेभासते । तत्रहेतुरेकत्रवासात् परस्पराविभागेनवृत्तेरित्यर्थः । तद्वदेतयोरपि परस्परधर्माध्यासइत्यर्थः ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं दार्ढ्यायपुनराह । गुरोरिति । वेदवाक्यतइत्यनेन श्रवणंगुरोःसकाशादपि । ततश्चानेनमननमुक्तम् । ताभ्यांसञ्जातोविद्यया ज्ञानरूपस्यात्मनोऽनुभवोयस्यसः । अनेनकृतनिदिध्यासनइत्यर्थः । तं चिदानन्दस्वरूपं स्वात्मानमुपाधिवर्जितं रहितोपाधिधर्ममात्मस्थं

गुरोःसकाशादपिवेदवाक्यतः सञ्जातविद्यानुभवोनिरीक्ष्य तम् ।
स्वात्मानमात्मस्थमुपाधिवर्जितं त्यजेदशेषं जडमात्मगोचरम् ॥ ४२ ॥

हृत्स्थंनिरीक्ष्य अपरोक्षीकृत्याशेषंजडं दृश्यंत्यजेत् । तत्रोदासीनोभवेदिति भावः ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ज्ञेयंनिरुपाधिकं स्वरूपंश्लोकद्वयेनाह प्रकाशेति अहंप्रकाशरूपः स्वप्रकाशः परप्रकाशहीनः परप्रकाशरूपोयथाघटादिः अजोजन्मादि
हीनः अद्वयःसजातीयद्वितीयरहितः अप्रकृद्विभातः सकृदपिपरेणभासकान्तरेणप्रकाशितः सकृद्विभातः नसकृद्विभातोसकृद्विभातः नत

प्रकाशरूपोऽहमजोऽहमद्वयोऽसकृद्विभातोऽहमतीवनिर्मलः ॥
विशुद्धविज्ञानघनोनिरामयःसम्पूर्णआनन्दमयोऽहमक्रियः॥४३॥

त्रसूर्योभातिनचन्द्रतारकमितिश्रुतेः नतद्भासयतेसूर्यइतिस्मृतेश्च अतीवनिर्मलः मायाकृतावरणविक्षेपरहितः विशुद्धविज्ञानघनः विशुद्धचि
देकरसः निरामयःकर्तृत्वाभिमानरहितः सम्पूर्णःदेशकालपरिच्छेदहीनः आनन्दमयः आनन्दरूपः स्वार्थेमयट् अक्रियः परिणामहीनः
॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदैवेति अहंसदैवकालत्रयेऽपिमुक्तःसर्वधर्मरहितः अचिन्त्यशक्तिमान् यः परमात्मा अतिन्द्रियज्ञानमूइन्द्रियातिरिक्तज्ञानरूपःयतोवाचो निवर्त्तन्ते अप्राप्यमनसासहइतिश्रुतेः अविक्रियात्मकोऽपरिणामी अनन्तपारःअन्तःकालतःपारःपरन्तीरन्तावविद्यमानौ यस्य तेनदेश

सदैवमुक्तोऽहमचिन्त्यशक्तिमानतीन्द्रियज्ञानमविक्रियात्मकः॥
अनन्तपारोऽहमहर्निशंबुधैर्विभावितोऽहंहृदिवेदवादिभिः ॥४४॥

कालपरिच्छेदहीनः ईदृशोयःपरमात्माबुधैर्हृदि अहर्निशंविभावितः सोऽहमित्यर्थः ॥ ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंभावनायाःफलमाह एवमिति उक्तरीत्यासदाआत्मानं अखण्डितात्मनाविषयानाकृष्टचित्तेन विचारमाणस्यध्यायतः धातूनामनेकार्थ
त्वात् चरमाणएवचारमाणःस्वार्थेऽण् विशुद्धभावनाब्रह्माकारान्तः करणवृत्तिरुदंतीतिशेषः साचेऽविद्यांकारकैर्देहान्तरप्रापककर्मभिः स

एवंसदात्मानमखण्डितात्मनाविचारमाणस्यविशुद्धभावना ॥
हन्यादविद्यामचिरेणकारकैरसायनंयद्वदुपासितंरुजः ॥ ४५ ॥

हाविद्यामाचिरेणशीघ्रमेवहन्यात् यथांपासितंसेवितंरसायनं रुजोहन्यात्तद्वत् ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रध्यानेइतिकर्तव्यतामाह विविक्तइति निर्जनइत्यर्थः आसीनोयथोचितपद्मासनाद्युपविष्टः उपारतेन्द्रियः तेनशमदमादिसम्पन्नः विनिर्जितात्माप्राणायामादिभिर्जितान्तःकरणः अतएवविमलान्तराशयोविशुद्धचित्तः विज्ञानदृक्विज्ञानएवदृक्भानंयस्यसः द्रष्टृदृश्यभा

विविक्तआसीनउपारतेन्द्रियोविनिर्जितात्माविमलान्तराशयः॥
विभावयेदेकमनन्यसाधनोविज्ञानदृक्केवलआत्मसंस्थितः॥४६

नरहितः अनेननिर्विकल्पकसमाधिरुक्तः अनन्यसाधनः तत्त्वज्ञानातिरिक्तमुक्तिसाधनास्तित्वभ्रमरहितः केवलोऽसङ्गःआत्मसंस्थितः आत्मन्येवसंस्थासमाप्तिः सञ्जातायस्यसतेन नकदापिविषयान्तरसञ्चारवच्चित्तः विभावयेत् ध्यायेत् ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंच यदेतत्भूतंभविष्यद्वर्तमानं विश्वंपरमात्मादर्शनंभासकोयस्यतत् तस्यभासासर्वमिदंविभातीति श्रुतेः तत्सर्वकारणेमायासान्निधाना
त्सर्वोपादानत्वेनाभिमतेआत्मनिविलापयेत् उपादानसत्ताव्यतिरेकेणकार्यसत्तांनपश्येत् तादृशस्यलक्षणमाह सम्पूर्णः अवाप्तसमस्तका

विश्वंयदेतत्परमात्मदर्शनं विलापयेदात्मनि सर्वकारणे ॥
पूर्णश्चिदानन्दमयोऽवतिष्ठते न वेद बाह्यं न च किञ्चिदान्त
रम् ॥ ४७ ॥

मः तस्यकाम्याभावात् ।चिदानन्दमयः तद्रूपोऽवतिष्ठते बाह्यमान्तरंच दृश्यंनजानाति सर्वत्रब्रह्मदर्शनादिति भावः ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाधिसिद्धेः पूर्वंयत्कर्तव्यंतदाह । पूर्वमिति । समाधेः सकलविषयव्यासङ्गनिवृत्तिपूर्वकं ब्रह्माकारवृत्तिः समाधिस्ततः पूर्वमखिलंस चराचरंजगत् ओङ्कारमात्रं विचिन्तयेत् । ओङ्कारोमीयतेऽनयेतिमात्रा प्रमाणं बोधकत्वेन परिच्छेदकोयस्यतथाजानीयात् । तदेवविवृ

पूर्वं समाधे रखिलं विचिन्तये दोङ्कारमात्रं सचराचरं जगत् ॥
तदेव वाच्यं प्रणवो हि वाचको विभाव्यते ज्ञानवशान्न बो-
धतः ॥ ४८ ॥

णोति तदेवेति । जगदेवेत्यर्थः । प्रणवोवाचकोविभाव्यतेएतत्राहिप्रसिद्ध इत्यर्थः । इयंभावनाज्ञानवशादेवनबोधकः । बोधोनिर्विशेषब्रह्मसा क्षात्कारस्तदुत्तरंनेत्यर्थः । तस्यसर्ववृत्त्युपमर्दकत्वात् ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमर्थंविवृणोति । अकारेति । अकारसञ्ज्ञस्तद्वाच्यःपुरुषोहिविश्वकोविश्वएवविश्वकः विश्वशब्देनपरिभाषितःअयंजाग्रत्साक्षीविराट् ततःस्वप्नसाक्षीतैजसःतेनपदेनपरिभाषितःलिङ्गदेहाभिमानीहिरण्यगर्भउकारकः उकारप्रतिपाद्यईर्यते । ततः सुषुप्तिसाक्षीप्राज्ञपदवाच्यो

अकारसञ्ज्ञः पुरुषो हि विश्वको ह्युकारकस्तैजसईर्यते क्रमात्
प्राज्ञो मकारः परिपठ्यतेऽखिलैः समाधि पूर्वं न तु तत्त्वतो
भवेत् ॥ ४९ ॥

मायोपाधिकोमकारस्तद्वाच्यः परिपठ्यतेऽखिलैर्वेदैः । इयंभावनासमाधिपूर्वंसमाधेःपूर्वमेव नतत्त्वतः तत्त्वसाक्षात्कारेसतिनभवेत् । सर्वस्यब्रह्मणिप्रविलयात् ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाविलापन प्रकारमाहद्वाभ्याम । विश्वंत्विति । उकारमध्ये बहुधाव्यवस्थितं स्थूलदेहनिबंधनंस्थूलदेहाभिमानेन स्थितं विश्वम्पुरुषंतद्वाचकमकारम् च विलापयेत् । तुश्चार्थे । विलीनम्भावयेत् ततस्तैजसंसलिङ्गदेहाभिमानिनम् पुरुषं तद्वाचकंप्रणवद्द्वितीय वर्णमुकारं वि-

विश्वं त्वकारं पुरुषं विलापयेदुकारमध्येबहुधा व्यवस्थितम् ।
ततो मकारे प्रविलाप्यतैजसंद्वितीयवर्णं प्रणवस्य चान्तिमे ॥५०॥

लीनविश्वकम्मकारे विलाप्यविलीनम्भावयित्वा ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततस्तादृशंमकारंतद्वाच्यंप्राज्ञंचकारणंकारणत्वाभिमानिनंपुरुषमिहात्मनि चिद्घनेपरे विलापयेत् तथाभावयेत्। ततः सोऽहंसर्वविला
पाधिष्ठानंपरब्रह्मविभावयेत्। तद्विशिनाष्टि। सदाविमुक्तिमत् नित्यमुक्तम्। नन्वहंपदार्थस्यरागद्वेषादिमलिनस्यकथं ब्रह्मत्वभावनेत्या

मकारमप्यात्मनि चिद्घने परे विलापयेत्प्राज्ञमपीह कारणम्।
सोऽहं परं ब्रह्म सदा विमुक्तिमद्विज्ञानदृङ्मुक्त उपाधितोऽमलः॥ ५१॥

शङ्क्याहंपदार्थंविशिनष्टि। उपाधितोमुक्तः अतएवामलःतथाभावनेसाधनं विज्ञानदृक्विज्ञानं ब्रह्ममात्रप्रत्ययाविच्छेदरूपादृक् निदिध्या
सनं सत्साक्षात्कारेसाधनंयस्यसः॥ ५१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंभावनावतोलक्षणमाह । एवमिति । उक्तप्रकारेणसदाजातापरमात्मन्येकभावना यस्यसः परिविस्मृतमखिलंपुत्रदेहादियेनसः। अत
एवस्वस्वरूपानन्देनैवतुष्टःनतुविषयानन्देन । तस्यपरिणामेदुःखरूपत्वात्ततो विरक्तइत्यर्थः । साक्षान्नित्यात्मनिसुखप्रकाशकः साक्षा

एवं सदा जातपरात्मभावनः स्वानन्दतुष्टःपरिविस्मृताखिलः ॥
आस्ते स नित्यात्मसुखप्रकाशकः साक्षाद्विमुक्तोऽचलवारिसि
न्धुवत् ॥ ५२ ॥

दौपाधिकनामरूपभेदरहित्येननिरसमखण्डितमात्मस्वरूपंयत्सुखंप्रकाशश्चतद्रूपः एवंरूपो विमुक्तोजीवन्मुक्तः । अचलंनिश्चलंवारियि
स्यताहशसिन्धुवदास्ते । विषयसम्बन्धरूपलहरीरहितआस्तइत्यर्थः ॥ ५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशस्यमत्प्राप्तिर्भवत्येवेत्याह । एवमिति । उक्तप्रकारेणसदाऽभ्यस्तसमाधियोगिनः निवृत्ताःसर्वेषामिन्द्रियाणांगोचराविषयाःशब्दादयो
यस्य विनिर्जिताअशेषारिपवःकामादयोयेनतस्य । तज्जयेनविषयेष्वन्तःकरणाप्रवृत्तेः । अतएव सर्वज्ञत्वनित्यत्वनित्यतृप्तत्वबोध

एवं सदाऽभ्यस्तसमाधियोगिनो निवृत्तसर्वेन्द्रियगोचरस्य हि
॥ विनिर्जिताशेषरिपोरहंसदा दृश्यो भवेयं जितषड्गुणात्मनः ॥५३ ॥

रूपत्वस्वतन्त्रत्वनित्यमलुप्तत्वानन्तरूपाषड्गुणायस्यतादृशआत्मजितो वशीकृतोयेनतस्य सदादृश्योभवेयम् । एतेनमद्भक्तस्ययोगिनो
ऽहंदृश्योनतुभक्तिविमुखस्येति सूचितम् ॥ ५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंविधोजीवन्मुक्तःप्रारब्धवशेन अनभिमानोभोगानश्नँस्तिष्ठेत् ततोमय्येवाविलीयते मद्रूपोभवतीत्याह । ध्यात्वैवमिति ॥ ५४ ॥

ध्यात्वैवमात्मानमहर्निशं मुनिस्तिष्ठेत्सदा मुक्तसमस्तबन्धनः ॥
प्रारब्धमश्नन्नभिमानवर्जितो मय्येवसाक्षात्प्रविलीयते ततः ५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वधर्मापेक्षयाऽयमेवधर्मोज्यायानित्याह । आदौचेति । भवसंसारमादिमध्यान्तसानेपुमर्वथाभयशोकयोः कारणंविदित्वातत्कारणीभूतंविधिवादैर्यजेतत्यादिभिश्चोदितंबोधितंसमस्तंकर्ममार्गकाम्यंहित्वा अखिलात्मनांजीवानांस्वरूपभूतंमामात्मानं परमेश्वरंभजेत् । य

आदौ च मध्ये च तथैव चान्ततो भवं विदित्वा भयशोक कारणम् ॥ हित्वा समस्तं विधिवादचोदितं भजेत्स्वमात्मानमथाखिलात्मनाम् ॥ ५५ ॥

थाधनस्यार्जनेनादौदुःखंमध्येपालनकृतं तत्र राजादिकृतं भयमन्तेनाशेशोकपर्यवसायिदुःखमेवं पदार्थमात्रेद्रष्टव्यम् ॥ ५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मय्यभेदभावनया नामरूपाविभागेन तद्रूप एवभवतीत्यमुमर्थं सदृष्टान्तमाह । आत्मनीति । आत्मनिसर्वाधिष्ठानेमयिइदंस्वस्वरूपं जीव मभेदेनविभावयन्यदा । तिष्ठतीतिशेषः । तदामयात्मनापरमेश्वरेणाऽभेदेनभवति अभिन्नोभवति । तत्रदृष्टान्तः यथासमुद्रेप्रविष्टं नद्यादि

आत्मन्यभेदेन विभावयन्निदं भवत्यभेदेन मयाऽत्मनातदा ॥
यथाजलं वारिनिधौ यथापयः क्षीरेवियद्व्योम्न्यऽनिले यथाऽनिलः ॥ ५६ ॥

जलंसमुद्रएव यथाक्षीरेगवादिक्षीरेप्रक्षिप्तंपयःक्षीरमेव यथाव्योम्निमहाकाशेघटाद्यवच्छिन्नाकाशोघटादिभङ्गे च यथाचर्मभस्त्रिकाद्यव च्छिन्नोवायुरनिलेमहावायौ नामरूपाविभागेनैकीभवतीत्यर्थः ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कारणंविदित्वातत्कारणी

एवमात्मतत्त्वज्ञस्य जगत्सत्यत्वभ्रमःस्वतएवापैतीत्याह । इत्थमिति । हिरण्यर्थे । लोकसंस्थितोऽपिजीवन्मुक्तिदशायांप्रारब्धवशाल्लोक
व्यवहारंकुर्वन्नपिजगन्मृषैवेतिविभावयन्सन् यदियदा इत्थमीक्षते ऐकात्म्यं जानीयात्तदा निवृत्तजगत्सत्यत्वभ्रमो भवतीति शेषः। तत्र
हेतुः श्रुतियुक्तिमानतोनिराकृतत्वात् । अतोऽन्यदार्तमित्यादिश्रुतिरूपात् जगन्मिथ्यादृश्यत्वात् शुक्तिरजतवादितितदुपबृंहितानुमानरू

इत्थं यदीक्षेत हि लोकसंस्थितो जगन्मृषैवेतिविभावयन्मुनिः ॥
निराकृतत्वाच्छ्रुतियुक्तिमानतो यथेन्दुभेदो दिशि दिग्भ्रमा
दयः ॥ ५७ ॥

पात्मानतःप्रमाणतोनिराकृतत्वात् तत्रदृष्टान्तोयथेन्दुभेदः एकचन्द्रेद्विचन्द्रत्वभ्रमस्तदेकत्वज्ञानेननिवर्तते यथाच दिशिप्राच्यादौअ
न्यदिक्त्वभ्रमः सोऽपितत्त्वज्ञानान्निवर्तते । एवंभ्रमतःपुरुषस्य दिक्षुभ्रमणाद्भ्रमोनिकटवर्तिवृक्षादौच भ्रमणभ्रमस्तत्स्थैर्यज्ञानेन निवर्तते
तद्वत् ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशज्ञानेमदाराधनमेवोपायइत्याह । यावदिति । अखिलं जगन्मदात्मकंमदधिष्ठानकंमाद्विवर्तभूतंयावन्नपश्येत्तावन्मत्प्राप्तयेश्रद्धालुः भगवदाराधनमेवज्ञानप्रापकमित्यत्र दृढविश्वासवान् अतिशयेनोर्जितावृद्धिमतीभक्तिर्मयिभगवतिपूज्यताबुद्धिरूपालक्षणं चिह्नंयस्यसः ।

यावन्नपश्येदखिलं मदात्मकं तावन्मदाराधनतत्परो भवेत् ॥
श्रद्धालुरत्यूर्जित भक्तिलक्षणो यस्तस्य दृश्यो ऽहमहर्निशं हृदि ॥ ५८ ॥

तावन्मदाराधननिष्ठोभवेत् एवंहितस्यहृदि अहमहर्निशंदृश्योभवा मियेयथामांप्रपद्यन्ते तांस्तथैवभजाम्यहमितिस्मृतेः ॥ ५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वोक्तवचनजातस्य श्रुतिसमत्वं कथमेतदालोचनमपिमदाराधनप्रतिबन्धकदुरितध्वंसोपायइत्याह रहस्यमिति । श्रुतिसारसङ्ग्रहत्वेनाति स.

रहस्यमेतच्छ्रुतिसारसङ्ग्रहं मया विनिश्चित्य तवोदितं प्रिय ॥
यस्त्वेतदालोचयतीहबुद्धिमान् स मुच्यते पातकराशिभिः
क्षणात् ॥ ५९ ॥

गोपनीयता अप्रमाणशङ्काकलङ्कराहित्यंसूचितम् । आलोचयतिसम्यग्विचारयति ॥ ५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ भगवानुक्तमेवार्थसङ्क्षेपेण दार्ढ्यायपुनराह भ्रातरिति । यदीतियादित्यर्थे । यदीदंजगत् परिदृश्यते तत्सर्वंमायैवेतिज्ञात्वेति शेषः चेतसासर्वंपरिहृत्यतत्रौदासीन्यंकृत्वामद्भावनयामदैक्यभावनया भावितंशुद्धंमानसंयस्यताद्दशास्तिष्ठ । इत्युपदिश्याशिषंप्राह निरामयः

भ्रातर्यदीदं परिदृश्यते जगन्मायैव सर्वं परिहृत्य चेतसा॥ मद्भावनाभावितशुद्धमानसः सुखी भवाऽऽनन्दमयो निरामयः ६०

सन्मुखीभव। सर्वदुःखनिवृत्त्योतिभावः। ततोऽन्तरन्नामन्यामाशिषमाह आनन्दमयोभवेति तद्रूपोभवेत्यर्थः। यद्यपिपूर्वमानन्दरूपत्वमस्त्ये वतथाऽपितत्प्राप्तिर्विस्मृतकंठस्थभूषणप्राप्तिवत् ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एवंरीत्याम्बोपासकस्यलोकपावनत्वमाह। यइति । कदावा यदाकदाचिदित्यर्थः । हृदानिर्मलेनान्तःकरणेन यो मामगुणं प्राकृतसत्त्व रजस्तमोरूपगुणरहितम् । सच्चिदानन्दरूपत्वात् । अतएवगुणादव्याकृतात्परंमायातीतम् । यद्विवायद्वेत्यर्थे । गुणात्मकं सर्वज्ञत्वा दिलोकोत्तरलावण्यादिगुणवानात्मामूर्तिर्यस्यतं दृश्यमानं रूपं सेवते । सद्विविधोऽप्युपासकः अहं मत्स्वरूपएव । मामकइत्यर्थोवा । प्रि-

य: सेवते मामगुणं गुणात्परं हृदा कदा वा यदि वा गुणात्मकम् ॥ सोऽहंस्वपादाञ्चितरेणुभिः स्पृशन्पुनाति लोकान्त्रितयं यथा रविः ॥ ६१ ॥

योहिज्ञानिनोऽत्यर्थमहंमचममप्रिय इत्युक्तेः । तादृशोभक्तःस्वपादलग्नरेणुभिःसंस्पृशन् लोकत्रयमपि पुनाति । अज्ञानध्वान्तनिरसने नपवित्रीकरोति । यथारविःस्वकरैर्जगद्वितिमिरीकरोति तद्वत् ॥ ६१ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानीमेतद्ग्रन्थार्थालोचनासमर्थस्यपाठमात्रतोऽपिमहत्फलमाह । विज्ञानंविज्ञानजनकं करणंव्युत्पत्त्येतिबोध्यम् । वेदान्तैरुपनिषद्वाक्यैर्वेद्यंचरणंजगज्जन्मादिलक्षणंकर्मयस्यतेन ननुपाठमात्रादेतादृशमहत्फलप्राप्तिःकथमित्याशङ्क्यभवत्येवेति सूचयंस्तत्रहेतुमाह । मद्वचने

विज्ञानमेतदखिलंश्रुतिसारमेकं वेदान्तवेद्यचरणेनमयैवगीतम् ।
यःश्रद्धया परिपठेद्गुरुभक्तियुक्तो मद्रूपमेति यदि मद्वचनेषुभक्तिः
॥ ६२ ॥ इतिश्री अध्यात्मरामायणे रामगीता समाप्ता ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसम्वादे उत्तरकाण्डे श्रीरामगीतायां पञ्चमःसर्गः ॥ ५ ॥

षुभक्तिर्विश्वासोयदीतिअर्थाद्गुरुवाक्यविश्वासस्यैव फलदायकत्वादितिभावः ॥६२॥ इत्यध्यात्मरामायणेउमामहेश्वरसम्वादे उत्तरकाण्डे सेतौपञ्चमःसर्गः ॥ ६२ ॥ श्रीरामचन्द्रार्पणमस्तु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीराममन्त्रःखलु तारकाख्यः संसारसन्तारणसुप्रसिद्धः ॥ भक्-
त्याऽप्यभक्त्या समुपासितोयः श्रेयांसि सर्वाणि ददात्यवश्य
म् ॥ १ ॥ तन्तारकंसम्प्रतिपादयन्ती श्रीरामगीता सकलैः सुसे
व्या ॥ विज्ञप्तिमित्थंजनको विनीतः समर्पयत्यार्यजनेषुहर्षात् २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प,	पृ.	पङ्क्ति
स्यर्द्धि	स्पर्द्धि	१	२	१
जीव्य	जीन्य	१	२	३
सम्वीन्धनीः	सम्वन्धिनीः	२	२	१
व्रह्म	व्रह्म	२	१	२
व्रह्म	व्रह्म	२	१	६
वोधोऽसि	वोधोऽसि	३	१	४
संवन्ध	सम्वन्ध	३	१	७
भवस्यंससार	भवस्यसंसार	३	२	१
न्सार	सार	३	२	२
पर्वग	पवर्ग	३	२	२
बारिधि	वारिधि	३	२	२

अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति
शाधि	शाधि	३	२	६
व्यत्र	व्यव	४	१	१
ष्ठामे	ष्ठानमे	४	२	३
व्रह्म	व्रह्म	४	२	१
वलेन	बलेन	४	२	७
निघृत्ते	निवृत्ते	५	१	१
कत्व	कत्वा	५	१	१
नक	नैक	५	१	१
बेदान्त	वेदान्त	५	१	१
पूर्वे	पूर्वे	५	१	२
वुद्ध्या	वुद्ध्या	५	१	६
एवं	एव	५	१	६

अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति
नाशे	नाशो	६	१	१
नन्वितिश	नन्वितिशे	६	२	१
विदा	विदा	६	२	२
मेवे	मेव	६	२	२
व्येतीत	व्यतेति	७	१	१
बीरहा	वीरहा	७	१	१
सदृष्ट	सद्दृष्ट	८	१	३
विशुद्धं	विशुद्ध	८	२	१
कारांतः	कारान्तः	८	२	२
वृत्ति	वृत्ति	९	१	१
स्ववाना	स्वनां	९	२	१
वृत्यु	वृत्यु	१०	१	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
रीप	रपि	११	२	१
नर्दष्टा	र्नदष्टा	१२	१	४
र्वाद्धे	र्वाद्धे	१२	१	७
त्याभिः	त्माभिः	१२	२	६
शुद्द	शुद्ध	१३	१	१
जीवया	नीवयो	१३	१	२
निर्वाध	निर्बाध	१४	१	१०
भव	भव	१९	१	४
अर्जोद्र	अर्जोऽद्र	१६	२	६
द्वात्	द्वाव्	१७	२	१

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
ह्लाभ	ह्लाभे	१८	१	८
इतिः	इति	१८	२	२
ज्ञानन	ज्ञानेन	१९	१	१
वुद्दया	वुद्धया	२०	१	९
रागादि	रागादे	२१	१	३
त्रिलय	विलय	२१	१	७
धम	धर्म	२१	२	१
म्वस्य	म्वंयस्य	२१	२	२
वुवै	बुधै	२३	१	५
एव	एवं	२३	२	१
द्रष्ट	द्रष्टृ	२४	१	२

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
बिभाव्यत	विभाव्यते	२५	१	४ मु
लिङ्गद	लिङ्गदे	२६	१	२
बोधकः	बोधतः	२५	१	६
त्रिज्ञानं ब्रह्म	विज्ञानंनिदिध्यासनं ब्रह्म	२६	२ ६	३
भेदेरा	भेदरा	२७	१	६
रुपा	रूपाः	२७	२	१
आत्म	अत्मा	२७	२	१
मुनिति	मुनिास्ति	२८	१	२
भव	भवं	२८	२	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
तदकत्व	तदेकत्व	२६	२	७	वतथाऽ	वतथाऽ	३१	१	१	मद्वचने	मद्वचने	३२	१	२
भ्रमण	भ्रमणं-	२६	२	८	कंठ	कण्ठ	३१	१	२	तन्तारकं	तत्तारकं	३२	२	३

नेपाल पाशुपत, यन्त्रालये मुद्रिता.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इती रामगीता सटीका समाप्ता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द. नं. १६६४८

अथ रामगीता सटीका प्रारभ्यते ॥

मू: ५।—

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Almira 2
Shelf 4
2

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द. नं. १६६४१

अथ रामगीता सटीका प्रारभ्यते ॥

मू० ५।-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ रामंरत्नकिरीटकुण्डलयुतं केयूरहारान्वितं सीतालङ्कृतवामभागममलं सिंहासनस्थं विभुम् ॥ सुग्रीवादि कपीश्वरैःसुरवरैः संसेव्यमानं सदा विश्वामित्रपराशरादिमुनि-भिः संस्तूयमानं भजे ॥ १ ॥ इतिध्यात्वा ॥ श्रीमहादेवउवाच ॥

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ ध्यायेत्वाजानुबाहुं धृतशरधनुषं वद्धपद्मासनस्थं पीतंवासोवसानं नवकमलदलस्पर्द्धिनेत्रं प्रसन्नम् ॥ वामाङ्कारूढ सीतामुखकमलमिलल्लोचनं नीरदाभं नाना लङ्कारदीप्तं दधतमुरुजटामण्डलं रामचन्द्रम् ॥ १ ॥ ततइति जगतां यानि मङ्गलानि आनन्दास्तेषामुपजीव्यभुतं मङ्गलं ब्रह्मानन्दः सएवात्मास्वरूपं तेन तस्यैवानन्दस्यान्यानि भूतानिमात्रामुपजीवन्तीति श्रुतेः मङ्ग

ततोजगन्मङ्गलमङ्गलात्मना विधाय रामायणकीर्तिमुत्तमाम्॥ चचार पूर्वाचरितं रघूत्तमो राजर्षिवर्य्यैरभिसेवितं यथा ॥ १ ॥

लानाञ्चमङ्गलमिति स्मृतेश्च किंच जगतां मङ्गलं कल्याणं यस्मात्तादृशकल्याणरूपआत्मामूर्तिस्तया उत्तमांश्रोत्रादीनां मोक्षदत्वेना त्युत्तमां रामायणकीर्तिं वाल्मीक्यादि कृत नानाविध रामायण प्रवर्तिकां रावणवधादिजां कीर्तिंविधाय स्थितोरघूत्तमः ततः सीताप रित्यागानन्तरं पूर्वैः स्ववंशजैराचारितं प्रजापालनसत्कथाश्रवणादिकं केवलंतत्पूर्वजैरेवाचरितमितिन किंत्वन्यैरपि राजर्षिश्रेष्ठैर्य थाऽभिसेवितं तथाचचार कृतवान् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदारागुरुदेवविश्वासलक्षणमहागुणवती यद्वा उदारा दानशीलाबुद्धिर्यस्य तेन पुरातनीः प्राचीनराजसम्बन्धिनीः शुभाः धर्माधर्मनिर्णेत्रीः प्रमत्तस्य स्वगोमण्डलमिश्रितब्राह्मणगोदानात् प्रमत्तस्य नृगस्य राज्ञो द्विजस्य शापात्तिर्यक्त्वमाह तेनाज्ञातकृतब्रह्मस्वापहारेण परमधा

सौमित्रिणापृष्ट उदारबुद्धिना रामःकथाःप्राह पुरातनीःशुभाः ॥
राज्ञः प्रमत्तस्य नृगस्य शापतो द्विजस्य तिर्यक्त्वमथाह राघवः
॥ २ ॥

र्मिकस्यापीदृश्यवस्थेति सर्वथाब्रह्मस्वविमुखताधर्मइतिसूचितम् ॥ १ ॥

CC-0. In Public Domain. Digitization by eGangotri

एकान्तेविजने उपस्थितंप्राप्तम् विनयान्वितः सन् भक्त्यागुरुरयमिति बुद्ध्या प्रणम्य अनेनगुरूपसदनप्रकारउक्तः आसादितंशुद्धंभाव

कदाचिदेकान्त उपस्थितंप्रभुं रामं रमालालितपादपङ्कजम् ॥
सौमित्रिरासादितशुद्धभावनः प्रणम्यभक्त्याविनयान्वितोऽब्र-
वीत् ॥ ३ ॥

नं भावनाकरणमन्तः करणंयेनसः शुद्धान्तःकरणइतियावत् भगवदुक्तसत्कथाश्रवणेन शुद्धान्तःकरणइत्यर्थः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हे महामते महतीसर्वविषयामतिर्यस्य तस्य संबोधनं त्वं शुद्धबोधोऽसि अनवच्छिन्नचैतन्यरूपोऽसि सर्वदेहिनामात्माऽसि जीवानांतत् प्रतिबिम्बत्वात् अधीशोऽसि अन्तर्यामित्वान्नियन्ताऽसि वास्तवभेदाभावाच्च सर्वात्मत्वम् औपाधिकभेदाच्च नियन्तृनियम्यभावोबोध्यः निराकृतिः अस्मदादिवत्स्वार्जितकर्माधीनशरीराकृतिरहितः नन्वेवंसर्वैः कथमेवंनज्ञायतेऽतआह ज्ञानदृशां स्वयमेवप्रतीयसे ज्ञायतेऽ

त्वं शुद्धबोधोऽसि हि सर्वदेहिनामात्माऽस्यधीशोऽसि निराकृतिःस्वयम् ॥ प्रतीयसे ज्ञानदृशां महामते पादाब्जभृङ्गाहितसङ्गसाङ्गिनाम् ॥ ४ ॥

नेनेतिज्ञानं वेदान्तवाक्यजातं तदेवदृक्दर्शनसाधनंयेषां तेषामितिसंबन्धसामान्येषष्ठी तैरित्यर्थः तादृशदृक्लाभश्च त्वद्भक्त्यधीनइत्याह पादेति त्वच्चरणकमलयोर्भृङ्गवदाहितःकृतः सङ्गोयेन तादृशान्तः करणसङ्गवतां त्वच्चरणकमल सल्लग्नान्तः करणवतामित्यर्थः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ प्रार्थयते अहमिति भवस्य संसारस्यापवर्गो निवृत्तिर्यस्मात्तादृशं तव पादाम्बुजं प्रपन्नोऽस्मि शरणं प्राप्तोऽस्मि योगिभावितं योगिभिः संसारमुक्तये भावितम् अनेन तस्य भवापवर्गत्वे सदाचारः प्रमाणमुक्तम् प्रार्थनीयमाह अपारवारिधिरूपं यदज्ञानं संसारमूलकारणं यथासुखम

अहं प्रपन्नोऽस्मि पदाम्बुजं प्रभो भवापवर्गं तव योगिभावितम् ॥ यथाञ्जसाज्ञानमपारवारिधिं सुखं तरिष्यामि तथाऽनुशाधि माम् ॥ ५ ॥

क्लेशेन तरिष्यामि तथा मामनुशाधि शिक्षय अपारवारिधिमित्यनेन सपारप्रसिद्धसमुद्राद्व्यतिरेक उक्तः अशक्यतरणताऽनेन ध्वनिता ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथोत्तरमवतारयति श्रुत्वेति रामः सौमित्रिवचः श्रुत्वा अथशब्दोवाक्यालङ्कारे तदा श्रवणाव्यवहितकाले एवप्रपन्नानां भक्तानामार्ति संसारदुःखंहरतितादृशः प्रपन्नाश्रमादिहीना भक्तानुग्रहपरा च धीर्यस्यसः क्षितिपालानां राज्ञां भूषणभूतोऽज्ञानरूपतमसउपशान्तये त

श्रुत्वाथ सौमित्रिवचोऽखिलं तदाप्राह प्रपन्नार्तिहरः प्रसन्नधीः ॥
विज्ञानमज्ञानतमोपशान्तये श्रुतिप्रपन्नं क्षितिपालभूषणः ॥ ६ ॥

दर्थम् सन्धिरार्षः श्रुतिभिः तमेवविदित्वाऽतिमृत्युमेतीत्यादिश्रुतिभिः प्रपन्नं तत्फलकत्वेन बोधितं विज्ञानमात्मतत्वज्ञानमिति सामान्यतः प्रथमंप्राह ॥ ६ ॥

CC-0. In Public Domain. Digitization by eGangotri

अथताद्दशज्ञानप्राप्त्यै क्रमेणबहिरङ्गान्तरङ्गसाधनान्याह आदाविति स्ववर्णाश्रमेषु शास्त्रेण वर्णिता याः क्रियानित्यनैमित्तकयज्ञदाना दिरूपास्ताः कृत्वा समासादितशुद्धमानसः प्राप्तान्तःकरणशुद्धिः तत्पूर्वमुपात्तसाधनः तदनुष्ठानपूर्वकमेवउपात्तानिसाधनानि शम दमादीनियेन तादृशः अनेनकर्मणां बहिरङ्गत्वं शमादीनामन्तरङ्गत्वं स्फुटमेवोक्तम् किंच शमदमवैराग्यदार्ढ्यपर्यन्तं कर्मानुष्ठानमेवेति

आदौ स्ववर्णाश्रमवर्णिताः क्रियाः कृत्वा समासादितशुद्धमानसः
समाप्य तत्पूर्वमुपात्तसाधनः समाश्रयेत्सद्गुरुमात्मलब्धये॥ ७॥

सूचितम् ततस्तत्कर्मानुष्ठानं समाप्य त्यक्त्वा संन्यस्येतियावत् आत्मलब्धये आत्मज्ञानाय तत्फलकाय तत्त्वमस्यादिवाक्यार्थविचारा- य सद्गुरुं श्रोत्रियंब्रह्मनिष्ठमित्यादि लक्षणलक्षितं समाश्रयेत् सेवेत अनेनव्युत्पत्तिबलेन स्वयमेववाक्यार्थविचारः क्रियमाणो न फला- येति सूचितम् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसारस्यभ्रमिमच्चक्ररूपत्वात्तन्निवृत्तेश्चतत्कारणाज्ञाननिवृत्तिमूलकत्वदज्ञाननिवृत्तेश्चतत्त्वज्ञानकसाध्यत्वात्तत्त्वज्ञानस्यचवेदान्त विचारसा-ध्यत्वात्तदर्थंगुरुसमाश्रयणमित्याह क्रियेति भवःसंसारश्चक्रवद्विपरिवर्तमानईर्यते कथ्यते तदेवोपपादयति आदृताआदरपूर्वंपूर्वजन्मार्जिताक्रियाएतस्यशरीरोद्भवस्यजन्मनोहेतुः तत्रजन्मनिसुरागिणोविषयाभिलाषवतः तौ शास्त्रप्रसिद्धौ धर्मेतरौ धर्माधर्मौ प्रियाप्रियौसुखदुः

क्रियाशरीरोद्भवहेतुरादृताप्रियाप्रियौतौभवतःसुरागिणः ॥
धर्मेतरौतत्रपुनः शरीरकंपुनः क्रियाचक्रवदीर्यतेभवः ॥ ८ ॥

खजनकौभवतःकस्यचिदधर्मएवसुखत्वबुद्ध्याप्रवृत्तिः कस्यचिद्धर्मएवंकदाचिदित्यप्यूह्यम् एवंतत्रोत्पादितकर्मणापुनःशरीरंपुनःक्रिया-इत्येवंचक्रवद्विपरिवृत्तिः । यथाचक्रेभ्राम्यमाणेऽधोभागः कदाचिदुपरिउपरितनश्चाधः पुनरुपरिपुनरधएवंजन्मक्रिययोर्जन्यजनक-भावेनपरिवृत्तिरिति बोध्यम् ॥ ८ ॥

Nepal Sanskrit University, Balmeekri Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्य चाज्ञानमेव मूलमित्याह अज्ञानमेवेति अत्र विधौ संसारनिवृत्तिलक्षणे कर्तव्येऽर्थे तज्ज्ञानमेव मूलकारणत्वादज्ञानहानमेव विधीयते साधनत्वेनेति शेषः ननु कर्मैव तन्नाशकमस्तु किं ज्ञानेनेत्याशङ्क्याह विद्यैवाज्ञानमेव तन्नाशविधौ मूलाज्ञाननाशने पटीयसी समर्था न कर्म समर्थमिति शेषः

अज्ञानमेवास्य हि मूलकारणं तद्धानमेवात्र विधौ विधीयते ॥ विद्यैव तन्नाशविधौ पटीयसी न कर्म तज्जं सविरोधमीरितम् ॥ ९ ॥

यतस्तत्तज्जमज्ञानजम् आत्मस्वरूपाज्ञानजन्यदेहाद्यभिमानजन्यत्वात्कर्मणोऽज्ञानजन्यत्वं बोध्यम् ननु तज्जन्यस्यापि तन्नाशकत्वं वृश्चिककर्कव्यादौ दृष्टमित्याशङ्क्य तज्जन्यत्वं वा न नाशकत्वप्रयोजकं किन्तु सविरोधत्वमेवेत्याह यत्सविरोधं तदीरितं नाशकमुक्तमित्यर्थः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतएवकर्मणानाज्ञानहानिरित्याह नाज्ञानेत्यादि यतःकर्मणाविरोधाभावान्नाज्ञाननाशनापिरागनाशोवस्तुतः कर्मानुष्ठानात्पुनः सदोषंक्षयिफलत्वादिदोषविशिष्टंकर्मैवोद्भवेत्कर्मणश्चपुनःसंसारएवेतिनमुक्तिमत्याशा ततस्तस्माद्बुधोविवेकीज्ञानविचारवान् ज्ञायतेऽनेने-

नाज्ञानहानिर्नचरागसङ्क्षयोभवेत्ततः कर्मसदोषमुद्भवेत् ॥ ततः
पुनः संसृतिरप्यवारितातस्माद्बुधोज्ञानविचारवान्भवेत् ॥ १० ॥

तिज्ञानंवेदान्तवाक्यंतद्विचारवान्भवेत ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानींज्ञानस्यैवमोक्षहेतुत्वंवक्तुंज्ञानकर्मसमुच्चयवादंदूषणायानुवदतिसार्धेन नन्विति नन्वितिशङ्कायाम् यथाविद्यावेदमुखेनश्रुतिपुराण-
लक्षणेन ब्रह्मविदाप्नोतिपरम् इत्यादिनापुरुषार्थसाधनमुक्ता तथा उभाभ्यामेवपक्षाभ्यांयथाखेपक्षिणांगतिः तथैवज्ञानकर्मभ्यांप्राप्यते
ब्रह्मशाश्वतम् इत्यादिनाक्रियाऽपितत्साधनत्वेनोक्ता किंच क्रियाकर्तव्यत। तृतीयार्थेप्रथमा कर्तव्यतयाआवश्यकेकृत्येअवश्यकर्तव्यत-

**ननुक्रियावेदमुखेनचोदितायथैवविद्यापुरुषार्थसाधनम् ॥ कर्तव्य
ताप्राणभृतःप्रचोदिताविद्यासहायत्वमुपैतिसापुनः ॥ ११ ॥**

याप्रचोदितानित्यनैमित्तिकरूपा एवंचनदकरणेप्रत्यवायोत्पत्त्याज्ञानोत्पत्तिरेवनस्यात् तस्मात्सापुनर्विद्यायाःसहायत्वंप्राप्नोतिघटेजन-
नीयेयथादण्डचक्रादीनांपरस्परसहायता ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्तव्येतीतस्वोक्तमेवविवृणोति कर्मेति वीरहावाएषदेवानांयोऽग्निमुद्वासयतेयावज्जीवमग्निहोत्रंजुहोति इतिश्रुतिः तत्रासिद्धान्तीशङ्कते नन्विति ध्रुवंस्थिरंकार्यमिदंपुरुषार्थमोक्षजनिकाविद्यायतः स्वतन्त्राविनाऽपिसहायेन स्वकार्यसंपादनेसमर्था यथातेजस्तिमिरनिवर्तन-

कर्माकृतौदोषमपिश्रुतिर्जगौतस्मात्सदाकार्यमिदंमुमुक्षुणा॥ननु स्वतन्त्राध्रुवकार्यकारिणीविद्यानकिञ्चिन्मनसाऽप्यपेक्षते ॥ १२

समर्थंमनसाऽपिकिञ्चित्सहायभूतंवस्तुनापेक्षते तथाफलेजननीयेसहायान्तरसंभावनाऽपिनेतिभावः अनेनविद्याफलजननेनिरपेक्षास्वतन्त्र-त्वात्तेजोवदित्यनुमानंसूचितम् ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समुच्चयवादीपरिहराति नेति त्वदुक्तंनेत्यर्थः सत्यकार्यः अक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवति इत्यादिवेदनबोधितःस्थिरकार्योऽपि-
अध्वरः यथाऽन्यानपिकारकादिकान् आरादुपकारकप्रयाजाद्यङ्गानिदेशकालादीनिचप्रकाङ्क्षते तथाविद्यापिअग्निहोत्रंजुहोतिइत्यादिवि

नसत्यकार्योऽपिहियद्वदध्वरः प्रकाङ्क्षतेऽन्यानपिकारकादिकान्
तथैवविद्याविधितः प्रकाशितैर्विशिष्यते कर्मभिरेवमुक्तये ॥ १३ ॥

धिवाक्यतःतत्समूहेनप्रकाशितैः कर्मभिः सहितैवमुक्त्येविशिष्यतइत्यर्थः विदद्याफलदानेकर्मापेक्षा अङ्गित्वात् प्रयाजादव्यङ्गापेक्षदर्शा
दिवादितिसत्प्रतिपक्षानुमानमनेनसूचितम् ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदनूद्यसिद्धान्तीदूषयति केचिदिति यत्केचिद्वितर्कवादिनइतिज्ञानकर्मणोःसमुच्चित्यमुक्तिसाधनंवदन्तितदप्यसत् यथाकेवलंकर्म मोक्ष साधनमित्यसत्तथातन्मीलितमित्यप्यसत् तत्रहेतुर्दृष्टविरोधकारणात् दृष्टयोर्विरोधः सवलोकदृष्टविरोधरूपात्कारणात्तदसदित्यर्थः विरो

केचिद्वदन्तीतिवितर्कवादिनस्तदप्यसद्दृष्टविरोधकारणात् ॥
देहाभिमानादभिवर्धतेक्रियाविद्यागताहङ्कृतितःप्रसिद्ध्यति १४

धमेवाह देहाभिमानात्क्रियात्वर्धतेअनात्मनिदेहादावात्मत्वाभिमानात्क्रियाद्वृद्धिः विद्यातुगताहङ्कृतितः गताहङ्कृतिर्यस्यतस्यनष्टाहङ्कृतेः प्रसिद्ध्यति सार्वविभक्तिकस्तासिः एवंचाहङ्कारसत्तामूलकत्वात्क्रियाज्ञानयोः समुच्चयोविरुद्धइत्यर्थः ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus

अथपूर्वपक्षयुक्तानुमानंदूषयन विद्यास्वरूपमाह विशुद्धंविज्ञानंयेभ्यस्तेषांवेदान्तवाक्यानांयाद्विशेषेणरोचनंरलयोरभेदादालोचनंविचार स्तेनाञ्चिताप्रापितायाचरमाआत्मवृत्तिर्ब्रह्माकारांतःकरणवृत्तिः साविद्येतिभण्यतेविद्वाद्भिरितिशेषः पुनःसमुच्चयनिराकरणायविद्याकर्मणो वैषम्यमाह कर्मयज्ञादिअखिलकारकादिभिःकर्तव्यकर्मादिभिरङ्गैश्चसाहितंसदुदेति फलोन्मुखंभवति विद्यापुनरखिलकारकादीन्निहन्ति

विशुद्धविज्ञानविरोचनाञ्चिताविद्याऽत्मवृत्तिश्चरमेतिभण्यते ॥ उदेतिकर्माखिलकारकादिभिर्निहन्ति विद्याऽखिल कारकादिकम् ॥ १५ ॥

तत्रकर्तृत्वादिबुद्धिंनिहन्ति सकलव्यापारपरित्यागेनब्रह्मणिसमाप्तिर्हिविद्या अतः स्वोत्पत्तौचित्तशुद्धिद्वाराकर्मसापेक्षास्वफलेजनायितव्ये तन्निरपेक्षैवान्यथाविद्यास्वरूपस्यैवभङ्गापत्तेरितिपूर्वपक्षयुक्तहेतोरासिद्धिरितिभावः ॥ १५ ॥

CC-0. In Public Domain. Digitization by eGangotri

उपसंहरन्मुमुक्षोर्वृत्तिप्रकारमाह तस्मादिति विद्याविरोधाद्विद्यायाःकर्मणासह विरोधेनसमुच्चयोनभवेत्तस्मात्सुधीर्मुमुक्षुरशेषतःकर्मत्यजे-
त् काम्यंतुसर्वथात्याज्यमेवनित्यनैमितिकमपियावच्चित्तशुद्धिकर्तव्यमेव ततोऽपिब्रह्माणिचित्तस्थैर्यपर्यन्तं कर्तव्यमेव ततस्तदनुसन्धानप्र-

तस्मात्त्यजेत्कार्यमशेषतः सुधीर्विद्याविरोधान्नसमुच्चयोभवेत् ।
आत्मानुसन्धानपरायणःसदा निवृत्तसर्वेन्द्रियवृत्तिगोचरः १६

तिबन्धकत्वात्प्रयोजनाभावाच्चतदपित्याज्यमेवेतिभावः इदानींमुमुक्षुकर्तव्यमाह निवृत्ताःसर्वेषामिन्द्रियाणां गोचराविषयाःशब्दादयोय
स्मात्तादृशःसन् आत्मनःसच्चिदानन्दस्यानुसन्धानमेवपरमयनंप्राप्यंयस्यतथाविधोभवेत् अत्रेन्द्रियप्रत्याहारःकर्तव्यत्वेनोक्तस्तेनतत्पूर्वंप्रा-
णायामाद्यर्थादाक्षिप्तम् ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 रागिविरागिभेदेनकर्मणोकर्तव्यताकर्त्तव्यतेआहयावदिति माययाविद्ययाशरीरादिष्ववानात्मसुआत्मधीरहङ्कृतेत्यादिरूपायावद्वर्ततेतावद्वि
धिवादकर्मणाम् विधिर्यजेतेत्यादिश्रुतिर्वाद:कर्तव्यताबोधकोयेषांकर्मणांविधेयोवशवर्त्तितत्कर्मकर्ताभवेत् तदपगमेतुतदाखिलं जगन्नेतीति

यावच्छरीरादिषुमाययात्मधीस्तावद्विधेयोविधिवादकर्मणाम् ॥
नेतीतिवाक्यैरखिलं निषिद्ध्य तज्ज्ञात्वापरात्मानमथत्यजेत्क्रि
याः ॥ १७ ॥

वाक्यैः अथातआदेशोनेतिनेतिइत्यादिवाक्यैर्निषिध्य मिथ्यात्वेननिर्णीयताद्विलक्षणतयासत्यत्वेनपरमात्मस्वरूपंज्ञात्वाक्रियास्त्यजेत्।निरू
पितमेतत् ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मविज्ञानेसत्यवश्यमविद्या निवर्ततइत्याह यदेति आत्मनिशुद्धेन्तःकरणेपरमात्मनईशस्यात्मनोजीवस्यचयोविभेदोमायान्तःकरण रूपोपाधिद्वयकृतोविभेदोभेदस्तस्यभेदकं नाशकंभास्वरंप्रकाशशीलंयद्विज्ञानमितरवृत्त्युपमर्दनपूर्वकंब्रह्माकाराऽखण्डाद्वृत्तिर्यदाऽवभाति

यदापरात्मात्मविभेदभेदकंविज्ञानमात्मन्यवभाति भास्वरम् ॥
तदैवमायाप्रविलीयतेऽञ्जसासकारकाकारणमात्मसंसृतेः॥ १८॥

असंभावनादितिरस्कारेणोदेति तदैव सकारकाजन्मान्तरप्रापककर्मसहितामायातत्तज्जीवोपाधिभूताविद्याऽञ्जसाझदितिप्रविलीयतेनश्यति ननुतन्नाशेऽपिसंसारनाशःकथमतोमायाविशेषणम् आत्मसंसृतेःकारणंसंसारस्योपादानकारणमेवंचतन्नाशेकार्यनाशोभवत्येवेतिभावः १८

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं पुनर्दार्ढ्यायाह श्रुतीति तत्त्वमसीत्यादिश्रुतिरूपैःप्रमाणैस्तज्जनितज्ञानेन नाशितासाविद्याकथमपिकार्यकारिणीभविष्यतीति काकुरत्र सर्वथानेत्यर्थः असतःकार्यकारित्वासंभवादितिभावः पुनश्चतस्यानोद्भवइत्याह विज्ञानमात्रादिति अमलाशुद्धाद्द्वितीयतःद्विती

श्रुतिप्रमाणाभिविनाशिताचसाकथंभविष्यत्यपिकार्यकारिणी ॥
विज्ञानमात्रादमलाद्द्वितीयतस्तस्मादविद्यानपुनर्भविष्यति १९

यात्मविषयकाद्विज्ञानमात्रादितरासहकृतान्निदिध्यासनपरिपाकजज्ञानाद्यतोनष्टातस्मात्सापुनर्नभविष्यति रज्ज्वज्ञानमूलकस्य सर्पस्य रज्जुज्ञानेन निवृत्तस्ययथानपुनरुत्पत्तिरितिभावः ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्यायाइतरनिरपेक्षायाएवमोक्षकारणत्वमुक्तंयुक्तिपूर्वकंपुनःकथयतिश्रोतृदार्ढ्याय। यदीति। यदिनष्टातत्त्वज्ञाननाशिता सा न पुनः प्रसूयतेनोत्पद्यतेतदाकारणाभावादहंमतिःकथंभवेत्। कथमपिनभवेदित्यर्थः। तदभावाच्चतत्कालेकर्माभावइतिस्वफलजननेसास्वतन्त्राइ

यदिस्मनष्टा नपुनःप्रसूयते कर्ताऽहमस्येति मतिः कथं भवेत् ॥ तस्मात्स्वतन्त्रा न किमप्यपेक्षते विद्या विमोक्षाय विभाति केवला ॥ २० ॥

तरनिरपेक्षैवनाकिमप्यपेक्षते द्वितीयस्यासंभवात् अतः केवलाऽसहायैवविमोक्षायविभातितत्फलिकाभवतीत्यर्थः ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वकरणेप्रत्यवायभिया कर्मकार्यमितिचेन्नेत्याह सप्रत्यवायइति कर्मत्यागेनाहंनिश्चयेनाहंप्रत्यवायसंहितोभविष्यामीत्येवंशुद्धात्मानि-अनात्मधर्मस्यधीरप्रज्ञस्यतत्त्वज्ञानविकलस्यप्रसिद्धा नतुतत्त्वदर्शिनः तस्याहंबुद्धेरभावात् धीपादेरनात्मधर्मतानिश्चयाच्च तस्माद्बुधैःकर्म

स प्रत्यवायोह्यहमित्यनात्मधीरज्ञप्रसिद्धा नतु तत्त्वदर्शिनः ॥ तस्माद्बुधैस्त्याज्यमपि क्रियात्मभिर्विधानतःकर्मविधि प्रकाशितम् ॥ २३ ॥

क्रियात्मभिः षष्ठ्यर्थेतृतीया क्रियाफलसक्तचित्तानां विधानतोविधानेनेतिकर्तव्यतयायुक्तंकर्म विधिभिरवश्यकर्तव्यतयाबोधितमपि-त्याज्यमित्यर्थः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविरक्तस्यकार्यमाह। श्रद्धेति । गुरुशास्त्रयोर्विश्वासःश्रद्धातदन्वितोबुभुत्सुःशुद्धमानसोऽपि निष्कामकर्मानुष्ठानाच्छुद्धमानसश्चगुरोः
प्रसादाल्लब्धतत्त्वमसीतिवाक्यतः श्रुतमात्मजीवयोरैकात्म्यंविज्ञाय मननिदिध्यासनपरिपाकाभ्यांसाक्षात्कृत्य। चएवार्थः । साक्षा

श्रद्धान्वितस्तत्त्वमसीतिवाक्यतो गुरोःप्रसादादपिशुद्धमानसः॥
विज्ञायचैकात्म्यमथात्मजीवयोः सुखी भवेन्मेरुरिवाप्रकम्पनः
॥ २४ ॥

त्कृत्यवत्सुखी भवेत्। सकलदुःखहीनोभवेदित्यर्थः। अप्रकम्पनःविषयाभिलाषाक्षोभितान्तःकरणः ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महावाक्यंविवरीतुंवाक्यार्थस्यपदार्थवोधपूर्वकत्वमाह । आदाविति । विधानतःभ्रमप्रमादराहित्येनवाक्यार्थविज्ञानस्यविधावुत्पत्तौआ
दौप्रथमंमुख्यमितियावत्। पदार्थावगतिःकारणम्। हिप्रसिद्धं तस्यपदत्र्यंतत्त्वम्असीति । तत्रतत्पदार्थःपरमात्मासर्वज्ञत्वादिगुणः त्वं

आदौ पदार्थावगतिर्हिकारणं वाक्यार्थविज्ञानविधौ विधानतः ॥
तत्त्वंपदार्थौपरमात्मजीवकावसीतिचैकात्म्यमथानयोर्भवेत्
॥ २५ ॥

पदार्थोजीवः अनयोस्तत्त्वंपदार्थयोरैकात्म्यंतद्बोधकमसीतिपदम् ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुसर्वज्ञत्वादिगुणस्येशस्याकिञ्चिज्ज्ञत्वधर्मवताजीवेनैकात्म्यं विरुद्धमित्याशङ्क्याह । प्रत्यागिति । अहंबुद्धिवद्यत्वंप्रत्यक्त्वंजीवधर्मः परोक्षत्वमीशधर्मस्तदादिधर्मकृतमात्मनोःपरमात्मजीवात्मनोर्विरोधंविहायत्यक्त्वातयोः संशोधिताम् युक्तिभिःसम्यग्विचारितांतत्त्वंपदाभ्यांशक्त्यभावेऽपिवक्ष्यमाणप्रकारयालक्षणयालक्षितां ज्ञाताञ्चिदात्मतां संगृह्य तत्त्वंपदोपास्थानिविषयांकृत्वा स्वमात्मानंतथाज्ञात्वाऽखण्डात्मज्ञानानन्तरमद्वयोभवेत् । चित्स्वरूपतांप्राप्तइवभवेत् । पूर्वमपितत्स्वरूपएवविस्मृतकण्ठचामीकरन्यायेनचतत्प्राप्तिःतद्वत्युक्तम् ।

प्रत्यक्परोक्षादिविरोधमात्मनोर्विहायसंगृह्यतयोश्चिदात्मताम् ॥
संशोधितांलक्षणयाचलक्षितांज्ञात्वास्वमात्मानमथाद्वयोभवेत्
॥ २६ ॥

अयंभावः तत्त्वंपदयोर्द्वावर्थौ वाच्योलक्ष्यश्च तत्रतत्पदस्यमायोपाधिःसर्वज्ञत्वादिविशिष्टोवाच्यः त्वंपदस्यापिकिञ्चिज्ज्ञत्वादिविशिष्टोमायाकार्याविद्योपाधिरविद्यावदन्तःकरणोपाधिर्वाच्यः उभयोरपिविशेषणांशत्यागेनशुद्धश्चिदात्मालक्ष्यः तत्रवाच्ययोर्विरुद्धधर्मकत्वादैक्यासंभवेऽपिलक्ष्ययोरैक्यंनिर्बाधमेवेति ॥ २६ ॥

CC-0. In Public Domain. Digitization by eGangotri

उक्तलक्षणास्वरूपमाह । एकात्मकत्वादिति जहतीलक्षणाजहत्स्वार्थलक्षणायथागङ्गायांघोषइत्यत्रगङ्गापदार्थस्यप्रवाहस्यघोषाधारता नुपपत्त्यासर्वथातत्परित्यागेनतीररूपार्थलक्षणा साप्रकृते न एकात्मत्वात् । विशेष्यांशस्यैकत्वात्सर्वथास्वार्थत्यागाभावात् । तथाज हल्लक्षणताजहत्स्वार्थलक्षणावत्त्वमपिअत्रनसंभवति । यथाकाकेभ्योदधिरक्ष्यतामित्यादौकाकशब्दस्यस्वार्थात्यागेनैवदध्युपघातकेलक्षणा सापिन । विरोधतःविशेषणत्यागेनसर्वथास्वार्थत्यागाभावात् । अतोभागलक्षणाजहदजहल्लक्षणायुज्यते । अदोषतःपूर्वोक्तदोषाभावात्

एकात्मकत्वाज्जहती न सम्भवेत्तथाऽजहल्लक्षणता विरोधतः॥
सोऽयंपदार्थाविवभागलक्षणायुज्येतत्त्वंपदयोरदोषतः॥२७॥

विशेष्यांशस्यात्यागाद्विशेषणांशस्यत्यागाच्च । तत्रदृष्टान्तः । सोऽयंपदार्थाविव । यथासोऽयंदेवदत्तइत्यत्रतद्देशादिविशिष्टोऽतीतानुभव विषयोवातत्पदार्थः एतद्देशादिविशिष्टोऽनुभूयमानोवेदंशब्दार्थः । तयोश्चाविरुद्धविशेषणकत्वादैक्यासंभवेनदेशादिरूपविशेषणत्यागेना नुभवगतातीतत्वादिविशेषणत्यागेनवालक्षणयैक्यंतद्वदितिभावः ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथत्याज्यत्वायजीवोपाधिमाह । रसादी ति । रसापृथ्वीआदिर्येषांतानिपञ्चीकृतानियानिभूतानितेभ्यःसंभवोयस्यतत् । पञ्चीकरणंचे त्थम् एकैकंभूतंद्विधाविभज्यतत्रैकंभागंचतुर्धाविभज्यतेषांभागानांस्वेतरभूतचतुष्टयार्धभागचतुष्टयेसंयोजनेएकैकंभूतंपञ्चात्मकंभवतिभा

रसादिपञ्चीकृतभूतसंभवंभोगालयंदुःखसुखादिकर्मणाम् ॥ शरी
रमाद्यन्तवदादिकर्मजंमायामयंस्थूलमुपाधिमात्मनः ॥ २८ ॥

गाधिक्याच्चप्रातिस्विकतयाभूगादिव्यवहारोऽपि । सुखदुःखयोरादीनियानिकर्माणितेषांभेभास्तत्कर्मजसुखदुःखानुभवस्तस्यालयमाश्र यभूतमाद्यन्तवत् उत्पत्तिनाशयोगि आदिकर्मजंभाग्भवीयकर्मजन्यंमायामयंपरम्परयामायाविकारः तद्विकारभूतविकारत्वात् । एतच्छरी रमात्मनःस्थूलमुपाधिंवदन्तीतिशेषः ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 अथसूक्ष्मोपाधिमाह। सूक्ष्ममिति । बुधाःअन्यतस्थूलशरीराद्विलक्षणंशरीरंलिङ्गदेहाख्यमात्मनउपाधिंविदुः । तत्स्वरूपमाह। सूक्ष्मंचक्षु-
राद्यविषयः मनोबुद्धिदशेन्द्रियैःप्राणैश्चयुतम् सङ्कल्पात्मकंमनः निश्चयात्मिकाबुद्धिः घ्राणरसनाचक्षुस्त्वक्श्रोत्रेतिपञ्चज्ञानेन्द्रियाणि वा-

सूक्ष्मंमनोबुद्धिदशेन्द्रियैर्युतंप्राणैरपञ्चीकृतभूतसंभवम् ॥ भोक्तुः
सुखादेरनुसाधनंभवेच्छरीरमन्याद्विदुरात्मनोबुधाः ॥ २९ ॥

क्पाणिपादपायूपस्थानिकर्मेन्द्रियाणि प्राणापानव्यानोदानसमानाश्चप्राणास्तैर्युतमेतत्सप्तदशसमुदायात्मकम्। तदाधारभूतान्याह ।अप
ञ्चीकृतभूतसंभवंतेभ्यउत्पन्नमतएवादृश्यम् । तथाभोक्तुःसुखादेःसुखदुःखाद्यनुभवस्यानुसाधनम् स्थूलशरीरस्यैतदनुगतस्यैवभोगसाधनत्व
मितिभावः । एताद्वियोगेनैवमरणव्यवहारइतिबोध्यम् ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतजीवोपाधिद्वयमुक्त्वाईशोपाधिमाह । अनादीति । अनादि उत्पत्तिहीनम् । नानाविधपरिणामशालितयापरिणामरूपेणनश्वरामिति अनादित्वमात्रेणक्त्यासूचितम् । अनिर्वाच्यम् सत्त्वासत्त्वाभ्यांनिर्वक्तुमशक्यम् कारणंसकलप्रपञ्चस्यजनकम् ईदृशीमायातुब्रह्मणःपरमी-

अनाद्यनिर्वाच्यमपीहकारणं मायाप्रधानंतुपरंशरीरकम् ॥ उ-
पाधिभेदात्तुयतःपृथक्स्थितं स्वात्मानमात्मन्यवधारयेत्क्र-
मात् ॥ ३० ॥

श्वरव्यवहारसंपादकत्वादुत्कृष्टंप्रधानंशरीरकम् । स्वार्थेकः । एवमुपाधिभेदादेकमेवचैतन्यंयतः पृथक्स्थितंजीवईशइतिभेदबुद्धिविषय मतोलक्षणयोपाधिपरित्यागेनस्वात्मानमात्मनिअवधारयेदभेदेनजानीयात् । क्रमाच्छ्रवणमनननिदिध्यासनक्रमेणेत्यर्थः ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus

अथवाक्यार्थविचारफलमाह । कोशेष्विति । आनन्दमयस्य ब्रह्मत्वेअन्नमयप्राणमयमनोमयविज्ञानमयेषुचतुर्षुकोशेषुतत्तत्सङ्गात्तत्तदाकृतिर्विभाति यथाजपादिसङ्गात्स्फटिकोऽनेकाकृतिर्भाति । आनन्दमयस्यापि जीवत्ववादिनातुतेनसहपञ्चसु कोशेष्वितिबोध्यम् । अस्मि-

कोशेषुपञ्चस्वपितत्तदाकृतिर्विभातिसङ्गात्स्फटिकोपलोयथा ॥ असङ्गरूपोऽयमजोयतोऽद्वयोविज्ञायतेऽस्मिन्परितोविचारिते ॥ ३१ ॥

न्महावाक्येपरितोविचारितेसम्यग्विचारितेसत्ययमात्माऽसङ्गरूपःअन्नमयादिभिःसङ्गरहितः । असङ्गोनहिसज्जते। इतिश्रुतेः । अजोऽद्वयश्चविज्ञायते । स्थूलोऽहमित्यादिस्त्वज्ञस्यतत्तत्कोशप्रसङ्गात्प्रतीतिःस्फटिकवत् तत्त्वज्ञस्यतुनतथाप्रतीतिरितिभावः । एवंचतत्तदुपाधिकृततत्तद्रूपताप्रतीतिनिरासएव विचारफलमितिभावः ॥ ३१ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जाग्रदाद्यवस्थाऽपि बुद्धेर्धर्मोनात्मधर्मइत्याह । बुद्धेरिति । इहआत्मनिस्वप्नादिभेदेन जाग्रत्स्वप्नसुषुप्तिभेदेन यात्रिधावृत्तिर्दृश्यतेसाऽपि गुणत्रयात्मनः सत्त्वरजस्तमोरूपगुणत्रयस्वरूपाया बुद्धेर्धर्मः । उक्तावस्थात्रयस्योक्तमूलकत्वात् । एतदवस्थात्रयस्यास्मिन्नवस्थात्रय-साक्षिणि आत्मनि भानं मृषा बुद्ध्यध्यास निबन्धनं न तु वास्तव मित्यर्थः । अन्योऽन्यतोव्यभिचारतस्तस्यावस्था त्रयस्यस्व रूपतो

बुद्धेस्त्रिधा वृत्तिरपीह दृश्यते स्वप्नादि भेदेन गुणत्रयात्मनः ॥ अन्योऽन्यतोऽस्मिन्व्यभिचारतोमृषा नित्ये परे ब्रह्मणि केवले शिवे ॥ ३२ ॥

मृषात्वात्तज्ज्ञानस्य मृषात्वमेव । स्वप्नकाले जाग्रत्सुषुप्त्योरभावात् । जाग्रतिइतरद्वयस्याभावात् सुषुप्तावितरयोरभावात्परस्परं व्यभिचारोबोध्यः आत्मनस्तदनाश्रयत्वंविशेषणैराह । नित्येउत्पत्तिनाशशून्येपरेगुणत्रयातीते ब्रह्मणिव्यापकेकेवलेऽसङ्गेशिवआनन्दरूपे एवंभूतेसदैकरसेपरस्परव्यभिचारधर्माभानमसंभवीति भावः ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसाज्यत्वायसंसारमूलभूतांवृत्तिमाह । देहेति । एषांसङ्घातइतरेतराध्यासविषयात् अजस्त्रंयावाद्धियो बुद्धेर्वृत्तिस्तमोमूलतयाऽज्ञ लक्षणाऽज्ञत्वज्ञापिका यावत्परिवर्तते तावद्भवोद्भवःसंसारोद्भवोभवेत् । तमःपदंरजसोऽप्युपलक्षणम् । रजस्तमःप्रधानाबुद्धिः संसारहेतु

देहेन्द्रियप्राण मनश्चिदात्मनां सङ्घादजस्त्रं परिवर्तते धियः ॥
वृत्तिस्तमोमूलतयाऽज्ञलक्षणा यावद्भवेत्तावदसौ भवोद्भवः॥३३॥

त्वात्सर्वथासाज्येति भावः ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्तन महावाक्यविचारस्य कर्तव्यमाह । नेतीति । अथात आदेशोनेतिनेति इति प्रमाणेननिराकृतं मिथ्यात्वेनगृहीतमखिलंजगत्येनसः ततोहृदासम्त्वमधानेनमनसासम्यगास्वादितं चिल्लक्षणंघनामृतंदुःखासंभिन्नंसुखंयेनसः । स्वर्गादितुपरिणामदुःखत्वात्तत्संभिन्नमेव । एवंभूतोऽशेषंजगद्देहेन्द्रियादिदृश्यमसूहंत्यजेत् हानोपादानबुद्धिविषयंनकुर्यात् । किन्तूदासीनस्तत्रभवेत् । ननुदेहेन्द्रियादिभिरेवतज्ज्ञान

नेतिप्रमाणेन निराकृताखिलो हृदासमास्वादितचिद्घनामृतः ॥ त्यजेदशेषं जगदात्तसद्रसं पीत्वा यथाऽम्भः प्रजहाति तत्फलम् ॥ ३४ ॥

लाभात्कथमुपजीव्यस्यत्यागइत्याशङ्क्यदृष्टान्तदर्शनेनपरिहराति । यथातृषावानआत्तः सद्रसोमाधुर्यंयेनतादृशं नारिकेलनारङ्गादि फलान्तर्वर्त्यम्भःपीत्वा तत्स्थानभूतंतत्फलं जहाति तत्रोदासीनोभवति तद्वत्सर्वदृश्यसारांशोत्रब्रह्मतल्लाभसतिनिः सारंदृश्यंनोपादेयंनापिहेयमितिभावः । यतोभयादिसंभावनातद्धेयमित्युच्यते ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतरस्यानित्यत्वेनतत्रवैराग्यार्थमात्मनएवनित्यत्वमाह । कदाचिदिति । कदापीत्यर्थः । अनवः उत्पत्त्यनन्तरंविद्यमानोहिनवः । तेन जन्मानन्तरास्तित्वंव्यावर्तितं नवत्वाभावेनेवजीर्णत्वाभावादवस्थान्तरापत्तिरूप परिणामोऽपिनिरस्तः ।अनेनअस्तिजायतेवर्द्धतेविपरिणमतेऽपक्षीयते नश्यतीति षड्भाव विकार राहित्यमुक्तम् । एवंचैतद्विधं सर्वमुक्तषड्भावविकारवत्त्वादनित्यमिति ततोविरज्येतेतिबोधितम् । यतऽईदृशोऽतएवनिरस्तः सर्वस्यदेहेन्द्रियादेरतिशयोमहत्त्वं येनस्वलाभात्सः यल्लाभान्नापरोलाभइतिःश्रुतेः यतःसुखात्मकः आनन्दस्वरूपः स्वयम्प्रभःस्वप्रकाशकश्च देहेन्द्रियादिस्तु दुःखस्वरूपः परप्रकाश्यश्च । यस्यभासासर्वमिदंविभाति । इतिश्रुतेः । सर्वगतोव्यापकः अयमहंबुद्धिविषयःप्रत्यगात्माऽपिअद्वयः उक्ताद्वयब्रह्मस्वरूपएव । नततोऽतिरिक्तइतिभावः । अयमात्माब्रह्म । इतिश्रुतेः ॥ ॥ ३८ ॥

कदाचि दात्मान मृतोनजायते नक्षीयते नापिविवर्धतेऽनवः ॥
निरस्तसर्वातिशयःसुखात्मकःस्वयम्प्रभःसर्वगतोऽयमद्वयः ३५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुएवंविधेविकारशून्येआत्मनिजन्ममरणादिप्रवाहरूपसंसारभानंकथमितिशङ्कते। एवंविधेइति।दुःखमयःदुःखप्रचुरः।उत्तरयति। अज्ञानतइ
तिअज्ञानमूलकोयोध्यासोदेहान्तःकरणादौअहंममेत्यध्यासस्तद्वशात्। एवंचभ्रान्तिरूपातत्प्रतीतिरितिभावः। नन्वेवंकथंतस्यसंसारस्यनि

एवंविधे ज्ञानमये सुखात्मके कथंभवो दुःखमयःप्रतीयते ॥
अज्ञानतोऽध्यासवशात्प्रकाशतेज्ञानेविलीयेत विरोधतःक्षणात्॥
॥ ३६ ॥

वृत्तिस्तत्राह। ज्ञानेति। आविर्भूतइतिशेषः। ज्ञानस्याज्ञानविरोधित्वात्तदुत्पत्तिक्षणएवकारणभूताज्ञाननाशात्तत्कार्यसंसारस्यापि वि
लयइत्यर्थः। यथारज्जुज्ञानेनरज्जौसर्पस्यलयइत्यर्थः॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाध्यासलक्षणमाह । यदन्यदिति । यदन्यत्सर्पादिकमन्यत्ररज्ज्वादौभ्रमातभ्रमजनकाद्दोषाद्विभाव्यतेविज्ञायतेअमुंविपश्चितोविद्वां-
सोऽध्यासइत्याहुः । यथाऽसर्पभूतेरज्ज्वादौ अहिविभावनंसर्पारोपोरज्ज्वबुद्धिमूलकस्तद्वदीश्वरेऽपिजगद्देहादिसंसारात्मकंसर्वंविभाव्य- स.

यदन्यदन्यत्र विभाव्यते भ्रमादध्यासमित्याहुरमुंविपश्चितः ॥
असर्पभूतेऽहिविभावनंयथा रज्ज्वादिकेतद्वदपीश्वरेजगत् ॥ ३७ ॥

तेआत्मज्ञानाभावाद्यथार्थतयाज्ञायते ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनिब्रगज्ञानेकीदृशोऽध्यासोनिमित्तंतदाह विकल्पेति सर्वविकल्पकारणमायारहितेवस्तुतस्तत्सङ्गरहितेचिदात्मकेचित्स्वरूपेसर्वकारणेनिरामयेदुःखासंभिन्नानन्दमयेकेवलंसर्वविकारशून्यपरेदृश्यविलक्षणेब्रह्मणिव्यापकं आत्मनिप्रथममहङ्कारः कल्पितः सएवाध्यासः ।

विकल्पमायारहितेचिदात्मके ऽहङ्कारएष प्रथमः प्रकल्पितः ॥
अध्यासएवात्मनिसर्वकारणे निरामयेब्रह्मणि केवलेपरे ॥ ३८ ॥

अहंबुद्ध्यात्मकोध्यासएवसर्वसंसारकारणमितिभावः ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बुद्धिनिष्ठएवसंसारोनत्वात्मनिष्ठइत्यत्रान्वयव्यतिरेकौप्रमाणयति। इच्छादीति। परेसर्वसाक्षिणिआत्मनिसंसृतिहेतवःभासमानसंसारकारणं सदाकालत्रयेऽपिइच्छादिरागादिसुखादिधार्मिकाः इच्छापेक्षेरागद्वेषौसुखदुःखंइत्येवमादिद्वन्द्वधर्मिकाःधियएवधीषुसतीषुसंसारइत्यन्वयमु

इच्छादिरागादिसुखादिधार्मिकाः सदा धियः संसृतिहेतवः परे ॥
यस्मात्प्रसुप्तौतदभावतःपरः सुखस्वरूपेणविभाव्यतेहिनः ॥३९॥

क्त्वातद्व्यतिरेकमाहयस्मात्कारणात्प्रसुप्तौतदभावात् धीवृत्त्यभावात् परआत्मानोऽस्माभिःतृतीयार्थेषष्ठी। सुखरूपेणस्वस्वरूपमात्रेणाविभा व्यतेनिश्चीयते नतु संसारित्वेनेतिभावः सुप्तोत्थितस्तुसुखमहमस्वाप्समितिप्रत्यभिज्ञानुभवात्तदात्मस्वरूपनिश्चयोऽस्तीतितात्पर्यम् ॥ ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ पुनस्तत्त्वं पदार्थस्वरूपमाह । अनादीति । अनादिर्याऽविद्या ततउद्भवो यस्या बुद्धेरन्तःकरणस्य तत्र बिम्बितः प्रतिबिम्बितश्चितः प्रकाशः स जीवइतीर्यते आत्मा परमात्मा धियः साक्षितया धीधर्मासङ्गेनैव पृथक्स्थितः । अन्तर्यामितयेत्यर्थः जीवोऽहंसुखीत्यादिप्रकारेणान्तःकर

अनाद्यविद्योद्भवबुद्धिबिम्बितोजीवप्रकाशोऽयमितीर्यते चितः ॥
आत्माधियः साक्षितया पृथक् स्थितो बुद्ध्या परिच्छिन्नपरः
सएव हि ॥ ४० ॥

णवर्गाध्यासवान्परमात्मा तु साक्षितया सर्वत्र विद्यमानोऽपि न तथेति भावः । अतएव बुद्ध्यापरिच्छिन्नपरः बुद्धिलक्षणपरिच्छेदरहितः अतएव परः । एवंच ज्ञानेन प्रतिबिम्बाधार विलयप्रतिबिम्बस्य विलयात्मजीवः सएव परमात्मैवेति प्रसिद्धं सइत्यस्य चानुवृत्तिर्बोध्या ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ बुद्ध्यात्मनोःपरस्पराध्यासवशात् परस्परधर्मभानमितिदार्ढ्यायपुनराह । चिद्बिम्बेति । चिदात्मचेतसोरन्योन्याध्यासवशात् परस्परतादात्म्यारोपाज्जडाजडत्वंप्रतीयते । चेतसोवृत्तीनांज्ञानत्वं जीवात्मनोजडत्वंप्रतीयते । अतएवज्ञानाश्रयआत्मेति चितएवताकिर्ककव्यवहारः । जीवात्मनिजडात्मनिजडात्माकथ्यते बुधैरितिस्मार्तव्यवहारश्च । अत्रहेतुः । चिदित्यादि । चिद्बिम्बस्तस्यसाचिदाभासः अ

स.

चिद्बिम्बसाक्ष्यात्मधियांप्रसङ्गतस्त्वेकत्रवासादनलाक्तलोहवत्॥
अन्योऽन्यमध्यासवशात्प्रतीयते जडाजडत्वंचचिदात्मचेतसोः

॥ ४१ ॥

क्षैःसहितः साक्षःसेन्द्रियः सचासावात्मामनःधीरन्तःकरणंतेषांप्रकृष्टसङ्गादतिसान्निकर्षादध्यासइत्यर्थः । अनलाक्तलोहवत् अग्नितप्तलोहपिण्डवत् अत्रदृष्टान्तः । अग्निधर्मोदाहकत्वं लोहधर्मश्चवर्तुलत्वाद्यनलेभासते । तत्रहेतुरेकत्रवासात् परस्पराविभागेनवृत्तेरित्यर्थः । तद्वदेतयोरपि परस्परधर्माध्यासइत्यर्थः ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं दार्ढ्यायपुनराह । गुरोरिति । वेदवाक्यतइत्यनेन श्रवणंगुरोःसकाशादपि । ततश्चानेनमननमुक्तम् । ताभ्यांसञ्जातोविद्यया ज्ञानरूपस्यात्मनोऽनुभवोयस्यसः । अनेनकृतनिदिध्यासनइत्यर्थः । तं चिदानन्दस्वरूपं स्वात्मानमुपाधिवर्जितं रहितोपाधिधर्ममात्मस्थं

गुरोःसकाशादपिवेदवाक्यतः सञ्जातविद्यानुभवोनिरीक्ष्य तम् । स्वात्मानमात्मस्थमुपाधिवर्जितं त्यजेदशेषं जडमात्मगोचरम् ॥ ४२ ॥

हृत्स्थंनिरीक्ष्य अपरोक्षीकृत्याशेषंजडं दृश्यंत्यजेत् । तत्रोदासीनोभवेदिति भावः ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 ज्ञेयंनिरुपाधिकं स्वरूपंश्लोकद्वयेनाह प्रकाशेति अहंप्रकाशरूपः स्वप्रकाशः परप्रकाशहीनः परप्रकाशरूपोयथाघटादिः अजोजन्मादि
हीनः अद्वयःसजातीयद्वितीयरहितः असकृद्विभातः सकृदपिपरेणभासकान्तरेणप्रकाशितः सकृद्विभातः नसकृद्विभातोसकृद्विभातः नत

प्रकाशरूपोऽहमजोऽहमद्वयोऽसकृद्विभातोऽहमतीवनिर्मलः ॥
विशुद्धविज्ञानघनोनिरामयःसम्पूर्णआनन्दमयोऽहमक्रियः॥४३॥

त्रसूर्योभातिनचन्द्रतारकमितिश्रुतेः नतद्भासयतेसूर्यइतिस्मृतेश्च अतीवनिर्मलः मायाकृतावरणविक्षेपरहितः विशुद्धविज्ञानघनः विशुद्धचि
देकरसः निरामयःकर्तृत्वाभिमानरहितः सम्पूर्णःदेशकालपरिच्छेदहीनः आनन्दमयः आनन्दरूपः स्वार्थेमयट् अक्रियः परिणामहीनः
॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदैवेति अहंसदैवकालत्रयेऽपिमुक्तःसर्वधर्मरहितः अचिन्त्यशक्तिमान् यःपरमात्मा अतीन्द्रियज्ञानम्इन्द्रियातिरिक्तज्ञानरूपःयतोवाचो निवर्त्तन्ते अप्राप्यमनसासहइतिश्रुतेः अविक्रियात्मकोऽपरिणामी अनन्तपारःअन्तःकालतःपारःपरन्तीरन्तावविद्यमानौ यस्य तेनदेश

सदैवमुक्तोऽहमचिन्त्यशक्तिमानतीन्द्रियज्ञानमविक्रियात्मकः॥
अनन्तपारोऽहमहर्निशंबुधैर्विभावितोऽहंहृदिवेदवादिभिः ॥४४॥

कालपरिच्छेदहीनः ईदृशोयःपरमात्माबुधैर्हृदिअहर्निशंविभावितः सोऽहमित्यर्थः ॥ ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंभावनायाःफलमाह एवमिति उक्तरीत्यासदाआत्मानं अखण्डितात्मनाविषयानाकृष्टचित्तेन विचारमाणस्यध्यायतः धातूनामनेकार्थ
त्वात् चरमाणएवचारमाणःस्वार्थेऽण् विशुद्धभावनाब्रह्माकारान्तःकरणवृत्तिरुदंतीतिशेषः साचोदिताकारकैर्देहान्तरमापककर्मभिः स

एवंसदात्मानमखण्डितात्मनाविचारमाणस्यविशुद्धभावना ॥
हन्यादविद्यामचिरेणकारकैरसायनंयद्वदुपासितंरुजः ॥ ४५ ॥

हाविद्यामाचिरेणशीघ्रमेवहन्यात् यथापामितंसेवितंरसायनं रुजोहन्यात्तद्वत् ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रध्यानेइतिकर्तव्यतामाह विविक्तइति निर्जनइत्यर्थः आसीनोयथोचितपद्मासनाद्युपविष्टः उपारतेन्द्रियः तेनशमदमादिसम्पन्नः विनि र्जितात्माप्राणायामादिभिर्जितान्तःकरणः अतएवविमलान्तराशयोविशुद्धचित्तः विज्ञानदृग्विज्ञानएवदृग्भानंयस्यसः द्रष्टृदृश्यभा

**विविक्तआसीनउपारतेन्द्रियोविनिर्जितात्माविमलान्तराशयः॥
विभावयेदेकमनन्यसाधनोविज्ञानदृक्केवलआत्मसंस्थितः॥४६**

नरहितः अनेननिर्विकल्पकसमाधिरुक्तः अनन्यसाधनः तत्त्वज्ञानातिरिक्तमुक्तिसाधनास्तित्वभ्रमरहितः केवलोऽसङ्गःआत्मसंस्थितः आत्मन्येवसंस्थासमाप्तिः सञ्जातायस्यसतेन नकदापिविषयान्तरसञ्चारवांश्चित्तः विभावयेत् ध्यायेत् ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंच यदेतत्भूतंभविष्यद्वर्तमानं विश्वंपरमात्मादर्शनंभासकोयस्यतत् तस्यभासासर्वमिदंविभातीति श्रुतेः तत्सर्वकारणेमायासान्निधाना
तुसर्वोपादानत्वेनाभिमतेआत्मनिाविलापयेत् उपादानसत्ताव्यतिरेकेणकार्यसत्तांनपश्येत् तादृशस्यलक्षणमाह सम्पूर्णः अवाप्तसमस्तका

विश्वंयदेतत्परमात्मदर्शनं विलापयेदात्मनि सर्वकारणे ॥
पूर्णश्चिदानन्दमयोऽवतिष्ठते न वेद बाह्यं न च किञ्चिदान्त
रम् ॥ ४७ ॥

मः तस्यकाम्याभावात् चिदानन्दमयः तद्रूपोऽवतिष्ठते बाह्यमान्तरंच दृश्यंनजानाति सर्वत्रब्रह्मदर्शनादिति भावः ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाधिसिद्धेः पूर्वंयत्कर्तव्यंतदाह । पूर्वमिति । समाधेः सकलविषयव्यासङ्गनिवृत्तिपूर्वकं ब्रह्माकारवृत्तिः समाधिस्ततः पूर्वमखिलंस चराचरंजगत् ओङ्कारमात्रं विचिन्तयेत् । ओङ्कारोर्मायतेऽ नेर्नेतिमात्रा प्रमाणं बोधकत्वेन परिच्छेदकोयस्यतथाजानीयात् । तदेवविवृ

पूर्वं समाधे रखिलं विचिन्तये दोङ्कारमात्रं सचराचरं जगत् ॥
तदेव वाच्यं प्रणवो हि वाचको विभाव्यते ज्ञानवशान्न बोधतः ॥ ४८ ॥

णोति तदेवेति । जगदेवेत्यर्थः । प्रणवोवाचकोविभाव्यतेएतत्त्वाहिप्रसिद्ध इत्यर्थः । इयंभावनाज्ञानवशादेवनबोधकः । बोधोनिर्विशेषब्रह्मसाक्षात्कारस्तद्वृत्तरंनेत्यर्थः । तस्यसर्ववृत्त्युपमर्दकत्वात् ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमर्थं विवृणोति । अकारेति । अकारसञ्ज्ञस्तद्वाच्यः पुरुषो हि विश्वको विश्व एव विश्वकः विश्वशब्देन परिभाषितः अयं जाग्रत्साक्षी विराट् ततः स्वप्नसाक्षी तैजसः तेन पदेन परिभाषितः लिङ्गदेहाभिमानी हिरण्यगर्भ उकारकः उकारप्रतिपाद्य ईर्यते । ततः सुषुप्तिसाक्षी प्राज्ञपदवाच्यो

अकारसञ्ज्ञः पुरुषो हि विश्वको ह्युकारकस्तैजस ईर्यते क्रमात्
प्राज्ञो मकारः परिपठ्यतेऽखिलैः समाधिपूर्वं न तु तत्त्वतो
भवेत् ॥ ४९ ॥

मायोपाधिको मकारस्तद्वाच्यः परिपठ्यतेऽखिलैर्वेदैः । इयं भावना समाधिपूर्वं समाधेः पूर्वमेव न तत्त्वतः तत्त्वसाक्षात्कारे सति न भवेत् । सर्वस्य ब्रह्मणि प्रविलयात् ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविलापन प्रकारमाहद्वाभ्याम् । विश्वंत्विति । उकारमध्ये बहुधाव्यवस्थितं स्थूलदेहनिबंधनंस्थूलदेहाभिमानेन स्थितं विश्वम्पुरुषंतद्वाचकमकारम् च विलापयेत् । तुश्चार्थे । विलीनम्भावयेत् ततस्तैजसंलिङ्गदेहाभिमानिनम् पुरुषं तद्वाचकंप्रणवद्वितीय वर्णमुकारं वि-

विश्वं त्वकारं पुरुषं विलापयेदुकारमध्येबहुधा व्यवस्थितम् ।
ततो मकारे प्रविलाप्यतैजसंद्वितीयवर्णं प्रणवस्य चान्तिमे ॥५०॥

लीनविश्वकम्मकारे विलाप्याविलीनम्भावयित्वा ॥ ९० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततस्तादृशंमकारंतद्वाच्यंप्राज्ञंचकारणंकारणत्वाभिमानिनंपुरुषमिहात्मनि चिद्घनेपरे विलापयेत् तथाभावयेत् । ततः सोऽहंमर्वविला
पाधिज्ञानंपरब्रह्मभावयेत् । तादृशं नष्टि । सदाविमुक्तिमत् नित्यमुक्तम् । नन्वहंपदार्थस्यरागद्वेषादिमलिनस्यकथं ब्रह्मत्वभावनेसा

मकारमप्यात्मनि चिद्घने परे विलापयेत्प्राज्ञमपीह कारणम् ।
सोऽहं परं ब्रह्म सदा विमुक्तिमद्विज्ञानदृङ्मुक्त उपाधितोऽ
मलः ॥ ५१ ॥

शङ्क्याहंपदार्थंविशिनष्टि । उपाधितोमुक्तः अतएवामलःतथाभावनेसाधनं विज्ञानदृक्विज्ञानं ब्रह्ममात्रप्रसयाविच्छेदरूपादृक् निदिध्या
सनं सत्साक्षात्कारसाधनंयस्यसः ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंभावनावतोलक्षणमाह । एवमिति । उक्तप्रकारेणसदाजातापरमात्मन्येकभावना यस्यसः परिविस्मृतमखिलंपुत्रदेहादियेनसः। अत एवस्वस्वरूपानन्देनैवतुष्टःनतुविषयानन्देन । तस्यपरिणामेदुःखरूपत्वात्ततो विरक्तइत्यर्थः । साक्षान्नित्यात्मनिसुखप्रकाशकः साक्षा

एवं सदा जातपरात्मभावनः स्वानन्दतुष्टःपरिविस्मृताखिलः ॥
आस्ते स नित्यात्मसुखप्रकाशकः साक्षाद्विमुक्तोऽचलवारिसि
न्धुवत् ॥ ५२ ॥

दौपाधिकनामरूपभेदराहित्येननित्यमखण्डितमात्मस्वरूपंयत्सुखंप्रकाशश्चतद्रूपः एवंरूपो विमुक्तोजीवन्मुक्तः । अचलंनिश्चलंवारियस्यताद्दशसिन्धुवदास्ते । विषयसम्बन्धरूपलहरीरहितआस्तइत्यर्थः ॥ ५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशस्यमत्प्राप्तिर्भवत्येवेत्याह । एवमिति । उक्तप्रकारेणसदाऽभ्यस्तसमाधियोगिनः निवृत्ताःसर्वेषामिन्द्रियाणांगोचराविषयाःशब्दादयो यस्य विनिर्जिताअशेषारिपवःकामादयोयेनतस्य । तज्जयेनविषयेष्वन्तःकरणाप्रवृत्तेः । अतएव सर्वज्ञत्वनित्यत्वनित्यतृप्तत्वबोध

एवं सदाऽभ्यस्तसमाधियोगिनो निवृत्तसर्वेन्द्रियगोचरस्य हि ॥ विनिर्जिताशेषरिपोरहंसदा दृश्यो भवेयं जितषड्गुणात्मनः ॥५३ ॥

रूपत्वस्वतन्त्रत्वनियमलुप्तत्वानन्तरूपाषड्गुणायस्यतादृशआत्माजितो वशीकृतोयेनतस्य सदादृश्योभवेयम् । एतेनमद्भक्तस्ययोगिनो ऽहंदृश्योनतुभक्तिविमुखस्येति सूचितम् ॥ ५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एवंविधोजीवन्मुक्तःप्रारब्धवशेन अनभिमानोभोगानश्नँस्तिष्ठेत् ततोमय्येवविलीयते मद्रूपोभवतीत्याह । ध्यात्वैवमिति ॥ ५४ ।

ध्यात्वैवमात्मानमहर्निशं मुनिस्तिष्ठेत्सदा मुक्तसमस्तबन्धनः ॥
प्रारब्धमश्नन्नभिमानवर्जितो मय्येवसाक्षात्प्रविलीयते ततः ५४

CC-0. In Public Domain. Digitization by eGangotri

सर्वधर्मापेक्षयाऽयमेवधर्मोज्यायानित्याह । आदौचेति । भवसंसारमादिमध्यावसानेषुसर्वथाभयशोकयोः कारणंविदित्वातत्कारणी भूतंविधिवादैर्यजेतेत्यादिभिश्चोदितंबोधितंसमस्तंकर्ममार्गकाम्यंहित्वा अखिलात्मनांजीवानांस्वरूपभूतंमामात्मानं परमेश्वरंभजेत् । य

आदौ च मध्ये च तथैव चान्ततो भवं विदित्वा भयशोक कारणम् ॥ हित्वा समस्तं विधिवादचोदितं भजेत्स्वमात्मान मथाखिलात्मनाम् ॥ ५५ ॥

थाधनस्यार्जनेनादौदुःखंमध्येपालनकृतं तत्र राजादिकृतं भयमन्तेनाशेशोकपर्यंवसायिदुःखमेवं पदार्थमात्रेद्रष्टव्यम् ॥ ५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मय्यभेदभावनया नामरूपाविभागेन तद्रूप एवभवतीत्यमुमर्थं सदृष्टान्तमाह । आत्मनीति । आत्मनिसर्वाधिष्ठानेमयिइदंस्वस्वरूपं जीवमभेदेनविभावयन्यदा । तिष्ठतीतिशेषः । तदामयात्मनापरमेश्वरेणाऽभेदेनभवति अभिन्नोभवति । तत्रदृष्टान्तः यथासमुद्रेप्रविष्टं नद्यादि

आत्मन्यभेदेन विभावयन्निदं भवत्यभेदेन मयाऽत्मनातदा ॥ यथाजलं वारिनिधौ यथापयः क्षीरेवियद्व्योम्न्यऽनिले यथाऽनिलः ॥ ५६ ॥

जलंसमुद्रएव यथाक्षीरेगवादिक्षीरेप्रक्षिप्तंपयःक्षीरमेव यथाव्योम्निमहाकाशेघटाद्यवच्छिन्नाकाशोघटादिभङ्गे च यथाचर्मभस्त्रिकाद्यवच्छिन्नोवायुरनिलेमहावायौ नामरूपाविभागेनैकीभवतीत्यर्थः ॥ ५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमात्मतत्त्वज्ञस्य जगत्सत्यत्वभ्रमःस्वतएवापैतीत्याह । इत्थमिति । हिरप्यर्थे । लोकसंस्थितोऽपिजीवन्मुक्तिदशायांप्रारब्धवशाल्लोक
व्यवहारंकुर्वन्नपिजगन्मृषैवेतिविभावयन्सन् यदियदा इत्थमीक्षते ऐकात्म्यं जानीयात्तदा निवृत्तजगत्सत्यत्वभ्रमो भवतीति शेषः। तत्र
हेतुः श्रुतियुक्तिमानतोनिराकृतत्वात् । अतोऽन्यदार्तमित्यादिश्रुतिरूपात् जगन्मिथ्यादृश्यत्वात् शुक्तिरजतवदितितदुपबृंहितानुमानरू

इत्थं यदीक्षेत हि लोकसंस्थितो जगन्मृषैवेति विभावयन्मुनिः ॥
निराकृतत्वा च्छ्रुतियुक्तिमानतो यथेन्दुभेदो दिशि दिग्भ्रमा
दयः ॥ ५७ ॥

पात्मानतःप्रमाणतोनिराकृतत्वात् तत्रदृष्टान्तोयथेन्दुभेदः एकचन्द्रेद्विचन्द्रत्वभ्रमस्तदेकत्वज्ञानेननिवर्तते यथाच दिशिप्राच्यादौअ
न्यदिक्त्वभ्रमः सोऽपितत्त्वज्ञानान्निवर्तते । एवंभ्रमतःपुरुषस्य दिक्षुभ्रमणाद्भ्रमोनिकटवर्तिवृक्षादौच भ्रमणभ्रमस्तत्स्थैर्यज्ञानेन निवर्तते
तद्वत् ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशज्ञानेमदाराधनमेवोपायइत्याह । यावदिति । अखिलं जगन्मदात्मकंमदधिष्ठानकंमाद्विवर्तभूतंयावन्नपश्येत्तावन्मत्शास्त्रेयेश्रद्धालुः भगवदाराधनमेवज्ञानप्रापकमित्यत्र दृढविश्वासवान् अतिशयेनोर्जितात्यृद्धिमतीभक्तिर्मयिभगवतिपूज्यताबुद्धिरूपालक्षणं चिह्नंयस्यसः ।

यावन्नपश्येदखिलं मदात्मकं तावन्मदाराधनतत्परो भवेत् ॥
श्रद्धालुरत्यूर्जित भक्तिलक्षणो यस्तस्य दृश्यो ऽहमहर्निशं हृदि ॥ ५८ ॥

तावन्मदाराधननिष्ठोभवेत् एवंहितस्यहृदि अहमहर्निशंदृश्योभवा मियेयथामांप्रपद्यन्ते तांस्तथैवभजाम्यहमितिस्मृतेः ॥ ५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वोक्तवचनजातस्य श्रुतिसमत्वं कथमेतदालोचनमपिमदाराधनप्रतिबन्धकदुरितध्वंसोपायइत्याह रहस्यमिति । श्रुतिसारसङ्ग्रहत्वेनाति

रहस्यमेतच्छ्रुतिसारसङ्ग्रहं मया विनिश्चित्य तवोदितं प्रिय ॥
यस्त्वेतदालोचयतीहबुद्धिमान् स मुच्यते पातकराशिभिः
क्षणात् ॥ ५९ ॥

गोपनीयता अप्रमाणशङ्काकलङ्कराहित्यंसूचितम् । आलोचयतिसम्यग्विचारयति ॥ ५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ भगवानुक्तमेवार्थसङ्क्षेपेण दार्ढ्यायपुनराह भ्रातरिति । यदीतियादित्यर्थे । यदीदंजगत् परिदृश्यते तत्सर्वंमायैवेतिज्ञात्वेति शेषः चेतसासर्वंपरिहृत्यतत्रौदासीन्यंकृत्वामद्भावनयामदैक्यभावनया भावितंशुद्धंमानसंयस्यताद्दशास्तिष्ठ । इत्युपदिश्याशिषंप्राह निरामयः

भ्रातर्यदीदं परिदृश्यते जगन्मायैव सर्वं परिहृत्य चेतसा॥ मद्भावनाभावितशुद्धमानसः सुखी भवाऽऽनन्दमयो निरामयः ६०

सन्मुखीभव । सर्वदुःखनिवृत्त्येतिभावः । ततोऽन्तरङ्गामन्यामाशिषमाह आनन्दमयोभवेति तद्रूपोभवेत्यर्थः । यद्यपिपूर्वमानन्दरूपत्वमस्त्येवतथाऽपितत्प्राप्तिर्विस्मृतकंठस्थभूषणप्राप्तिवत ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंरीत्यास्वोपासकस्यलोकपावनत्वमाह। यइति । कदावा यदाकदाचिदित्यर्थः । हृदानिर्मलेनान्तःकरणेन यो मामगुणं प्राकृतसत्त्व रजस्तमोरूपगुणरहितम् । सच्चिदानन्दरूपत्वात् । अतएवगुणादन्याकृतात्परमायातीतम् । यदिवायद्वत्यर्थे । गुणात्मकं सर्वज्ञत्वा- स.
॥ ३१ ॥ दिलोकोत्तरलावण्यादिगुणवानात्मामूर्तिर्यस्यतं दृश्यमानं रूपं सेवते । सद्विविधोऽप्युपासकःअहं मत्स्वरूपएव । मामकइत्यर्थोवा । प्रि-

यः सेवते मामगुणं गुणात्परंहृदा कदा वा यदि वा गुणात्मकम् ॥ सोऽहंस्वपादाञ्चितरेणुभिः स्पृशन्पुनाति लोकत्रितयं यथा रविः ॥ ६१ ॥

योहिज्ञानिनोऽत्यर्थमहंसचममप्रिय इत्युक्तेः । तादृशोभक्तःस्वपादलग्नरेणुभिःसंस्पृशन्लोकत्रयमपि पुनाति । अज्ञानध्वान्तनिरसने नपवित्रीकरोति । यथारविःस्वकरैर्जगद्वितिमिरीकरोति तद्वत् ॥ ६१ ॥ ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानीमेतद्ग्रन्थार्थालोचनासमर्थस्यपाठमात्रतोऽपिमहत्फलमाह । विज्ञानंविज्ञानजनकं करणंव्युत्पत्त्येतिबोध्यम् । वेदान्तैरुपनिषद्वाक्यै वेद्यंचरणंजगज्जन्मादिलक्षणंकर्मयस्यतेन ननुपाठमात्रादेतादृशमहत्फलप्राप्तिःकथमित्याशङ्क्यभवत्येवेति सूचयंस्तत्रहेतुमाह । मद्वचने

विज्ञानमेतदखिलंश्रुतिसारमेकं वेदान्तवेद्यचरणेनमयैवगीतम् ।
यःश्रद्धया परिपठेद्गुरुभक्तियुक्तो मद्रूपमेतियदि मद्वचनेषुभक्तिः
॥ ६२ ॥ इतिश्री अध्यात्मरामायणे रामगीता समाप्ता ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसम्वादे उत्तरकाण्डे श्रीरामगीतायां पञ्चमःसर्गः ॥ ५ ॥

षुभक्तिर्विश्वासोयदीतिअर्थाद्गुरुवाक्यविश्वासस्यैव फलदायकत्वादितिभावः ॥६२॥ इत्यध्यात्मरामायणेउमामहेश्वरसम्वादे उत्तरकाण्डे सेतौपञ्चमःसर्गः ॥ ६२ ॥ श्रीरामचन्द्रार्पणमस्तु ॥

Nepal Sanskrit University, Balmeeki Campus

CC-0. In Public Domain. Digitization by eGangotri

श्रीराममन्त्रःखलु तारकाख्यः संसारसन्तारणसुप्रसिद्धः ॥ भक्-
त्याऽप्यभक्त्या समुपासितोयः श्रेयांसि सर्वाणि ददात्यवश्य
म् ॥ १ ॥ तन्तारकंसम्प्रतिपादयन्ती श्रीरामगीता सकलैः सुसे
व्या ॥ विज्ञप्तिमित्थंजनको विनीतः समर्पयत्यार्यजनेषुहर्षात् २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प,	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति
स्यर्द्धि	स्पार्द्धि	१	२	१	शाधि	शाधि	३	२	६	नाशे	नाशो	६	१	१
जींव्य	जींव्य	१	२	३	व्यत्र	व्यत्र	४	१	१	नन्वितिश	नन्वितिशे	६	२	१
सम्बीन्धनीः	सम्बन्धिनीः	२	२	१	ष्ठामे	ष्ठानमे	४	२	३	विदा	विदा	६	२	२
व्रह्म	व्रह्म	२	१	२	व्रह्म	व्रह्म	४	२	१	मवे	मेव	६	२	२
व्रह्म	व्रह्म	२	१	६	वलेन	वलेन	४	२	७	व्येतीत	व्यतेति	७	१	१
वोधोऽसि	वोधोऽसि	३	१	४	निघृत्ते	निवृत्ते	५	१	१	वीरहा	वीरहा	७	१	१
संवन्ध	सम्वन्ध	३	१	७	कत्व	कत्वा	५	१	१	सद्दष्ट	सद्दृष्ट	८	१	३
भवस्यंससार	भवस्यसंसार	३	२	१	नक	नैक	६	१	१	बिशुद्धं	विशुद्ध	८	२	१
न्सार	सार	३	२	२	बेदान्त	वेदान्त	५	१	१	कारांतः	कारान्तः	८	२	२
पर्वग	पवर्ग	३	२	२	पूर्वं	पूर्वं	५	१	२	वृंत्ति	वृत्ति	९	१	१
वारिधि	वारिधि	३	२	२	बुद्ध्या	बुद्ध्या	५	१	६	स्ववाना	स्वना	९	२	१
					एवं	एत्र	५	१	६	वृत्यु	वृत्यु	१०	१	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
रीप	रपि	११	२	१
नर्दृष्टा	र्नदृष्टा	१२	१	४
वर्द्धौ	वर्द्धौ	१२	१	७
त्याभिः	त्माभिः	१२	२	६
शुद्द	शुद्ध	१३	१	१
जीवया	जीवयो	१३	१	२
निर्वांध	निर्वाध	१४	१	१०
भत्र	भव	१९	१	४
अर्जोद्व	अर्जोऽद्व	१६	२	६
द्वात्	द्वातू	१७	२	१
ह्लाभ	ह्लाभे	१८	१	८
इतिः	इति	१८	२	२
ज्ञानन	ज्ञानेन	१९	१	१
वुद्दया	वुद्ध्या	२०	१	९
रागादि	रागादि	२१	१	३
व्रिलय	विलय	२१	१	७
धम	धर्म	२१	२	१
म्व्रस्य	म्वंयस्य	२१	२	२
वुवै	बुधै	२३	१	५
एव	एवं	२३	२	१
द्रष्ट	द्रष्टृ	२४	१	२
विभाव्यत	विभाव्यते	२५	१	४ मू
लिङ्गद	लिङ्गदे	२६	१	२
वोधकः	वोधतः	२५	१	६
व्रिज्ञानं	विज्ञानंनिादि	२६	२ ६	३
व्रह्म	ध्यासनं ब्रह्म			
भेदेरा	भेदरा	२७	१	६
रुपा	रूपाः	२७	२	६
आत्म	अत्मा	२७	२	६
मुनिति	मुनिास्ति	२८	१	२
भव	भवं	२८	२	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
तदकत्व	तदेकत्व	२९	२	७	वतथाऽ	वतथाऽ	३१	१	६	मद्वचने	मद्वचने	३२	१	२
भ्रमण	भ्रमणं	२९	२	८	कंठ	कण्ठ	३१	१	२	तन्तारकं	तत्तारकं	३२	२	३

नेपाल पाशुपत, यन्त्रालये मुद्रितः

Nepal Sanskrit University, Balmiki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इति रामगीता सटीका समाप्ता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द. नं. १६६४२

अथ रामगीता सटीका प्रारभ्यते ॥

मू० २।-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

॥ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ रामंरत्नकिरीटकुण्डलयुतं केयूरहारान्वितं
सीतालङ्कृतवामभागममलं सिंहासनस्थं विभुम् ॥ सुग्रीवादि
कपीश्वरैःसुरवरैः संसेव्यमानं सदा विश्वामित्रपराशरादिमुनि-
भिः संस्तूयमानं भजे ॥ १ ॥ इतिध्यात्वा ॥ श्रीमहादेवउवाच ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ ध्यायेत्वाजानुबाहुं धृतशरधनुषं बद्धपद्मासनस्थं पीतंवासोवसानं नवकमलदलस्पर्द्धिनेत्रं प्रसन्नम् ॥ वामाङ्कारूढ सीतामुखकमलमिलल्लोचनं नीरदाभं नाना लङ्कारदीप्तं दधतमुरुजटामण्डलं रामचन्द्रम् ॥ १ ॥ ततइति जगतां यानि मङ्गलानि आनन्दास्तेषामुपजीव्यभूतं मङ्गलं ब्रह्मानन्दः सएवात्मास्वरूपं तेन तस्यैवानन्दस्यान्यानि भूतानिमात्रामुपजीवन्तीति श्रुतेः मङ्ग

ततोजगन्मङ्गलमङ्गलात्मना विधाय रामायणकीर्तिमुत्तमाम् ॥ चचार पूर्वाचरितं रघूत्तमो राजर्षिवर्य्यैरभिसेवितं यथा ॥ १ ॥

लानाश्चमङ्गलमिति स्मृतेश्च किंच जगतां मङ्गलं कल्याणं यस्मात्तादृशकल्याणरूपआत्मामूर्तिस्तया उत्तमांश्रोत्रादीनां मोक्षदत्वेना त्युत्तमां रामायणकीर्तिं वाल्मीक्यादि कृत नानाविध रामायण प्रवर्तिकां रावणवधादिजां कीर्तिंविधाय स्थितोरघूत्तमः ततः सीताप रित्यागानन्तरं पूर्वैः स्ववंशजैराचारितं प्रजापालनसत्कथाश्रवणादिकं केवलंतत्पूर्वजैरेवाचरितमितिन किंत्वन्यैरपि राजर्षिश्रेष्ठैर्य थाऽभिसेवितं तथाचचार कृतवान् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदारागुरुदेवविश्वासलक्षणमहागुणवती यद्वा उदारा दानशीलाबुद्धिर्यस्य तेन पुरातनीः प्राचीनराजसम्बन्धिनीः शुभाः धर्माधर्मनिर्णेत्रीः प्रमत्तस्य स्वगोमण्डलमिश्रितब्राह्मणगोदानात् प्रमत्तस्य नृगस्य राज्ञो द्विजस्य शापात्तिर्यक्त्वमाह तेनाज्ञातकृतब्रह्मस्वापहारेण परमधा

सौमित्रिणापृष्ट उदारबुद्धिना रामःकथाःप्राह पुरातनीःशुभाः ॥
राज्ञः प्रमत्तस्य नृगस्य शापतो द्विजस्य तिर्यक्त्वमथाह राघवः
॥ २ ॥

र्मिकस्यापीदृश्यवस्थेति सर्वथाब्रह्मस्वविमुखताधर्मइतिसूचितम् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकान्तेविजने उपस्थितंप्राप्तम् विनयान्वितः सन् भक्त्यागुरुरयमिति बुद्ध्या प्रणम्य अनेनगुरूपसदनप्रकारउक्तः आसादितंशुद्धंभाव

कदाचिदेकान्त उपस्थितंप्रभुं रामं रमालालितपादपङ्कजम् ॥
सौमित्रिरासादितशुद्धभावनः प्रणम्यभक्त्याविनयान्वितोऽब्रवीत् ॥ ३ ॥

नं भावनाकरणमन्तः करणंयेनसः शुद्धान्तःकरणइतियावत् भगवदुक्तसत्कथाश्रवणेन शुद्धान्तःकरणइत्यर्थः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हे महामते महतीसर्वविषयामतिर्यस्य तस्य संबोधनं त्वं शुद्धबोधोऽसि अनवच्छिन्नचैतन्यरूपोऽसि सर्वदेहिनामात्माऽसि जीवानांतत् प्रतिविम्बत्वात् अधीशोऽसि अन्तर्यामित्वान्नियन्ताऽसि वास्तवभेदाभावाच्च सर्वात्मत्वम् औपाधिकभेदाच्च नियन्तृनियम्यभावोबोध्यः निराकृतिः अस्मदादिवत्स्वार्जितकर्माधीनशरीराकृतिरहितः नन्वेवंसर्वैः कथमेवंनज्ञायतेऽतआह ज्ञानदृशां स्वयमेवप्रतीयसे ज्ञायतेऽ

त्वं शुद्धबोधोऽसि हि सर्वदेहिनामात्माऽस्यधीशोऽसि निरा-
कृतिःस्वयम् ॥ प्रतीयसे ज्ञानदृशां महामते पादाब्जभृङ्गाहितस
ङ्गसाङ्गिनाम् ॥ ४ ॥

नेनेतिज्ञानं वेदान्तवाक्यजातं तदेवदृक्दर्शनसाधनंयेषां तेषामितिसंवन्धसामान्येषष्ठी तैरित्यर्थः ग्राहशदृक्लाभश्च त्वद्भक्त्यधीनइत्याह पादेति त्वचरणकमलयोर्भृङ्गवदाहितःकृतः सङ्गोयेन तादृशान्तः करणसङ्गवतां त्वचरणकमल सङ्गिग्रान्तः करणवतामित्यर्थः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

अथ प्रार्थयते अहमिति भवस्यसंसारस्यापवर्गो निवृत्तिर्यस्मात्तादृशंतवपादाम्बुजंप्रपन्नोऽस्मिशरणंप्राप्तोऽस्मि योगिभावितं योगीभिः सं न्सारमुक्तये भावितम् अनेनतस्य भवापवर्गत्वं सदाचारः प्रमाणमुक्तम् प्रार्थनीयमाह अपारवारिधिरूपंयदज्ञानंसंसारमूलकारणं यथासुखम

अहं प्रपन्नोऽस्मि पदाम्बुजं प्रभो भवापवर्गं तव योगिभावितम् ॥ यथाञ्जसाज्ञानमपारवारिधिं सुखं तरिष्यामि तथाऽनुशाधि माम् ॥ ५ ॥

क्लेशेन तरिष्यामि तथा मामनुशाधिशिक्षय अपारवारिधिमित्यनेनसपारप्रसिद्धसमुद्राद्व्यतिरेकउक्तः अशक्यतरणताऽनेनध्वनिता ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथोत्तरमवतारयति श्रुत्वेति रामः सौमित्रिवचः श्रुत्वा अथशब्दोवाक्यालङ्कारे तदा श्रवणाऽव्यवहितकाले एवप्रपन्नानां भक्तानामार्ति संसारदुःखंहरतितादृशः प्रपन्नाभ्रमादिहीना भक्तानुग्रहपरा च धीर्यस्यसः क्षितिपालानां राज्ञां भूषणभूतोज्ञानरूपतमसउपशान्तये त

श्रुत्वाथ सौमित्रिवचोऽखिलं तदाप्राहप्रपन्नार्तिहरःप्रसन्नधीः ॥
विज्ञानमज्ञानतमोपशान्तये श्रुतिप्रपन्नं क्षितिपालभूषणः ॥ ६ ॥

दर्थम् सन्धिरार्षः श्रुतिभिः तमेवविदित्वाऽतिमृत्युमेतीत्यादिश्रुतिभिः प्रपन्नं तत्फलकत्वेन बोधितं विज्ञानमात्मतत्वज्ञानामिति सामान्य तः प्रथमंप्राह ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथतादृशज्ञानप्राप्तये क्रमेणबहिरङ्गान्तरङ्गसाधनान्याह आदाविति स्ववर्णाश्रमेषु शास्त्रेण वर्णिता याः क्रियानित्यनैमित्तकयज्ञदाना दिरूपास्ताः कृत्वा समासादितशुद्धमानसः प्राप्तान्तःकरणशुद्धिः तत्पूर्वमुपात्तसाधनः तदनुष्ठानपूर्वकमेवउपात्तानिसाधनानि शम दमादीनियेन तादृशः अनेनकर्मणां बहिरङ्गत्वं शमादीनामन्तरङ्गत्वं स्फुटमेवोक्तम् किंच शमदमवैराग्यदार्ढ्यपर्यन्तं कर्मानुष्ठामेवेति

आदौ स्ववर्णाश्रमवर्णिताःक्रियाः कृत्वा समासादितशुद्धमानसः
समाप्य तत्पूर्वमुपात्तसाधनः समाश्रयेत्सद्गुरुमात्मलब्धये॥ ७॥

सूचितम् ततस्तत्कर्मानुष्ठानं समाप्य त्यक्त्वा संन्यस्येतियावत् आत्मलब्धये आत्मज्ञानाय तत्फलकाय तत्वमस्यादिवाक्यार्थविचारा-य सद्गुरुंश्रोत्रियंब्रह्मनिष्ठमित्यादि लक्षणलक्षितं समाश्रयेत् सेवेत अनेनव्युत्पत्तिवलेन स्वयमेववाक्यार्थविचारः क्रियमाणो न फला-येति सूचितम् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसारस्यभ्रमिमच्चक्ररूपत्वात्तन्निवृत्तेश्चतत्कारणाज्ञाननिवृत्तिमूलकत्वदज्ञाननिवृत्तेश्चतत्त्वज्ञानकसाध्यत्वात्तत्त्वज्ञानस्यचवेदान्तविचारसाध्यत्वात्तदर्थंगुरुसमाश्रयणमित्याह क्रियेति भवःसंसारश्चक्रवद्विपरिवर्तमानईयते कथ्यते तदेवोपपादयति आहताआदरपूर्वंपूर्वजन्मार्जिताक्रियाएनस्यशरीरोद्भवस्यजन्मनोहेतुः तत्रजन्मनिसुरागिणोविषयाभिलाषवतः तौ शास्त्रप्रसिद्धौ धर्मेतरौ धर्माधर्मौ प्रियाप्रियौसुखदुः

क्रियाशरीरोद्भवहेतुराहताप्रियाप्रियौतौभवतःसुरागिणः ॥
धर्मेतरौतत्रपुनः शरीरकंपुनः क्रियाचक्रवदीर्यतेभवः ॥ ८ ॥

खजनकौभवतःकस्यचिदधर्मएवसुखत्वबुद्ध्याप्रवृत्तिः कस्यचिद्धर्मएवंकदाचिदित्यप्यूह्यम् एवंतत्रोत्पादितकर्मणापुनःशरीरंपुनःक्रियाइत्येवंचक्रवद्विपरिवृत्तिः । यथाचक्रेभ्राम्यमाणेऽधोभागः कदाचिदुपरिउपरितनश्चाधः पुनरुपरिपुनरधएवंजन्मक्रिययोर्जन्यजनकभावेनपरिवृत्तिरिति बोध्यम् ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सस्यचाज्ञानमेवमूलमित्याह अज्ञानमेवेति अत्रविधौसंसारनिवृत्तिलक्षणेकर्तव्येऽर्थेतद्धानमेवमूलकारणत्वादज्ञानहानमेवविधीयते साध-
नत्वेनेतिशेषः ननुकर्मैवतन्नाशकमस्तुकिंज्ञानेनेत्याशङ्क्याह विद्यैवज्ञानमेवतन्नाशविधौमूलाज्ञाननाशनेपटीयसीसमर्थानकर्मसमर्थमितिशेषः

अज्ञानमेवास्याहिमूलकारणंतद्धानमेवात्रविधौविधीयते ॥ विद्यै
वतन्नाशविधौपटीयसीनकर्मतज्जंसविरोधमीरितम् ॥ ९ ॥

यतस्तत्तज्जमज्ञानजम् आत्मस्वरूपाज्ञानजन्यदेहाद्यभिमानजन्यत्वात्कर्मणोज्ञानजन्यत्वंबोध्यम् ननुतज्जन्यस्यापितन्नाशकत्वंवृश्चिककर्क
व्यादौदृष्टमित्याशङ्क्यतज्जन्यत्वंवानाशकत्वप्रयोजकंकिन्तुसविरोधत्वमेवेत्याह यतसविरोधंतदीरितंनाशकमुक्तमित्यर्थः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अतएवकर्मणानाज्ञानहानिरित्याह नाज्ञानेत्यादि यतःकर्मणाविरोधाभावान्नाज्ञाननाशेनापिरागनाशोवस्तुतः कर्मानुष्ठानात्पुनः सदोषंक्षयिफलत्वादिदोषविशिष्टंकर्मैवोद्भवेत्कर्मणश्चपुनःसंसारएवेतिनमुक्तिमत्याशा ततस्तस्माद्बुधोविवेकीज्ञानविचारवान् ज्ञायतेऽनेने·

नाज्ञानहानिर्नचरागसङ्क्षयोभवेत्ततः कर्मसदोषमुद्भवेत् ॥ ततः पुनः संसृतिरप्यवारितातस्माद्बुधोज्ञानविचारवान्भवेत् ॥ १० ॥

तिज्ञानंवेदान्तवाक्यंतद्विचारवान्भवेत ॥ १० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानींज्ञानस्यैवमोक्षहेतुत्वंवक्तुंज्ञानकर्मसमुच्चयवादंदूषणायानुवदतिसार्धेन नन्विति नन्वितिशङ्कायाम् यथाविद्यावेदमुखेनश्रुतिपुराण-लक्षणेन ब्रह्मविदाप्नोतिपरम् इत्यादिनापुरुषार्थसाधनमुक्ता तथा उभाभ्यामेवपक्षाभ्यांयथाखेपक्षिणांगतिः तथैवज्ञानकर्मभ्यांप्राप्यते ब्रह्मशाश्वतम् इत्यादिनाक्रियाऽपितत्साधनत्वेनोक्ता किंच क्रियाकर्तव्यत। तृतीयार्थेप्रथमा कर्तव्यतयाआवश्यकेकृत्येअवश्यकर्तव्यत-

ननुक्रियावेदमुखेनचोदितायथैवविद्यापुरुषार्थसाधनम् ॥ कर्त्तव्यताप्राणभृतःप्रचोदिताविद्यासहायत्वमुपैतिसापुनः ॥ ११ ॥

याप्रचोदितानित्यनैमित्तिकरूपा एवंचनदकरणेप्रत्यवायोत्पत्त्याज्ञानोत्पत्तिरेवनस्यात् तस्मात्सापुनर्विद्यायाःसहायत्वंप्राप्नोतिघटेजन-नीयेयथादण्डचक्रादीनांपरस्परसहायता ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्तव्यमेतित्स्वात्कर्मवेविवृणोति कर्मेति वीरहा वा एष देवानां योऽग्निमुद्वासयते यावज्जीवमग्निहोत्रं जुहोति इतिश्रुतिः तत्रासिद्धान्तीशङ्कते नान्वाति ध्रुवंस्थिरंकार्यमिदंपुरुषार्थमोक्षजनिकाविद्यायतः स्वतन्त्राविनाऽपिसहायेन स्वकार्यसंपादनेसमर्था यथातेजस्तिमिरनिवर्तन-

कर्माकृतौदोषमपिश्रुतिर्जगौतस्मात्सदाकार्यमिदंमुमुक्षुणा॥ननु स्वतन्त्राध्रुवकार्यकारिणीविद्यानकिञ्चिन्मनसाऽप्यपेक्षते ॥ १२

समर्थंमनसाऽपिकिञ्चित्सहायभूतंवस्तुनापेक्षते तथाफलेजननीयेसहायान्तरसंभावनाऽपिनेतिभावः अनेनविद्याफलजननेनिरपेक्षास्वतन्त्र-त्वात्तेजोवदित्यनुमानंसूचितम् ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समुच्चयवादीपरिहराति नेति त्वदुक्तंनेत्यर्थः सत्यकार्यः अक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवति इत्यादिवेदनबोधितःस्थिरकार्योऽपि-
अध्वरः यथाऽन्यानपिकारकादिकान् आरादुपकारकप्रयाजाद्यङ्गानिदेशकालादीनिचप्रकाङ्क्षते तथाविद्यापिअग्निहोत्रंजुहोतिइत्यादिवि

नसत्यकार्योऽपिहियद्वदध्वरः प्रकाङ्क्षतेऽन्यानपिकारकादिकान्
तथैवविद्याविधितः प्रकाशितैर्विशिष्यते कर्मभिरेवमुक्तये ॥ १३ ॥

धिवाक्यतःतत्समूहेनप्रकाशितैः कर्मभिः सहितैवमुक्तयेविशिष्यतइत्यर्थः विदयाफलदानेकर्मापेक्षा अङ्गित्वात् प्रयाजाद्यङ्गापेक्षदर्शा
दिवादितिसत्प्रतिपक्षानुमानमनेनसूचितम् ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदनूद्यसिद्धान्तीदूषयति केचिदिति यत्केचिद्वितर्कवादिनश्शतिज्ञानकर्मणोसमुच्चित्यमुक्तिसाधनंवदन्तितदप्यसत् यथाकेवलंकर्म मोक्ष साधनमित्यमत्तथातन्मीलितमित्यप्यसत् तत्रहेतुर्दृष्टविरोधकारणात् दृष्टोयोविरोधः सर्वलोकदृष्टविरोधरूपात्कारणात्तदसदित्यर्थः विरो

केचिद्वदन्तीतिवितर्कवादिनस्तदप्यसद्दृष्टविरोधकारणात् ॥
देहाभिमानादभिवर्धतेक्रियाविद्यागताहङ्कृतितःप्रसिद्धयति १४

धमेवाह देहाभिमानात्क्रियावर्धतेअनात्मनिदेहादावात्मत्वाभिमानात्क्रियावृद्धिः विद्यातुगताहङ्कृतितः गताहङ्कृतिर्यस्यतस्यनष्टाहङ्कृतेः प्रसिद्धयति सार्वविभक्तिकस्तसिः एवंचाहङ्कारसत्तामूलकत्वात्क्रियाज्ञानयोः समुच्चयोविरुद्धइत्यर्थः ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथपूर्वपक्षयुक्तानुमानंदूषयनविद्यास्वरूपमाह विशुद्धंविज्ञानंयेभ्यस्तेषांवेदान्तवाक्यानांयाद्विशेषेणरोचनंरलयोरभेदादालोचनंविचार
स्तेनाञ्चिताप्रापितायाचरमाआतमवृत्तिर्ब्रह्माकारांतःकरणवृत्तिः साविद्येतिभण्यतेविद्वद्भिरितिशेषः पुनःसमुच्चयवारणायविद्याकर्मणो
वैषम्यमाह कर्मयज्ञादिअखिलकारकादिभिःकर्तव्यकर्मादिभिरङ्गैश्चसहितंसदुदेति फलोन्मुखंभवति विद्यापुनरखिलकारकादीन्निहन्ति

विशुद्धविज्ञानविरोचनाञ्चिताविद्याऽऽत्मवृत्तिश्चरमेतिभण्यते ॥
उदेतिकर्माखिलकारकादिभिर्निहन्ति विद्याऽखिल कारकादि-
कम् ॥ १५ ॥

तत्रकर्तृत्वादिबुद्धिंनिहन्ति सकलव्यापारपरित्यागेनब्रह्मणिसमाप्तिर्हिविद्या अतः स्वोत्पत्तौचित्तशुद्धिद्वाराकर्मसापेक्षास्वफलेजनायितव्यं-
तन्निरपेक्षैवान्यथाविद्यास्वरूपस्यैवभङ्गापत्तेरितिपूर्वपक्षयुक्तहेतोरसिद्धिरितिभावः ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपसंहरन्मुमुक्षोर्वृत्तिप्रकारमाह तस्मादिति विद्याविरोधाद्विद्यायाः कर्मणासह विरोधेनसमुच्चयोनभवेत्तस्मात्सुधीर्मुमुक्षुरशेषतः कर्मत्यजे-
त् काम्यंतुसर्वथात्याज्यमेवनित्यनैमितिकमापियावच्चित्तशुद्धिकर्तव्यमेव ततोऽपिब्रह्मणिचित्तस्थैर्यपर्यन्तं कर्तव्यमेव ततस्तदनुसन्धानप्र-

तस्मात्त्यजेत्कार्यमशेषतः सुधीर्विद्याविरोधान्नसमुच्चयोभवेत् ।
आत्मानुसन्धानपरायणःसदा निवृत्तसर्वेन्द्रियवृत्तिगोचरः १६

तिबन्धकत्वात्प्रयोजनाभावाच्चतदापित्याज्यमेवेतिभावः इदानींमुमुक्षुकर्तव्यमाह निवृत्ताःसर्वेषामिन्द्रियाणां गोचराविषयाःशब्दादयोय
स्मात्ताद्दशःसन् आत्मनःसच्चिदानन्दस्यानुसन्धानमेवपरमयनंप्राप्यंयस्यतथाविधोभवेत् अत्रेन्द्रियप्रत्याहारःकर्तव्यत्वेनोक्तस्तेनतत्पूर्वंप्रा-
णायामाद्यर्थादाक्षिप्तम् ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रागिविरागिभेदेनकर्मणोकर्तव्यताकर्त्तव्यतेआहयावदिति माययाविद्ययाशरीरादिष्वनात्मसुआत्मधीरहङ्कर्तेत्यादिरूपायावद्वर्तते तावद्वि
धिवादकर्मणाम् विप्रिर्यजेतेत्यादिश्रुतिर्वादःकर्तव्यताबोधकोयेषांकर्मणांविधेयोवशवर्त्तितत्कर्मकर्ताभवेत् तदपगमेतुतदाखिलं जगन्नेतीति

यावच्छरीरादिषुमाययात्मधीस्तावद्विधेयोविधिवादकर्मणाम् ॥
नेतीतिवाक्यैरखिलं निषिद्धय तज्ज्ञात्वापरात्मानमथत्यजेत्क्रि
याः ॥ १७ ॥

वाक्यैः अथातआदेशोनेतिनेतिइत्यादिवाक्यैर्निषिध्य मिथ्यात्वेननिर्णीयताद्विलक्षणतयासत्यत्वेनपरमात्मस्वरूपंज्ञात्वाक्रियास्त्यजेत्निरू ॥ ९ ॥
पितमेतत् ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मविज्ञानेसत्यवश्यमविद्या निवर्तत इत्याह यदेति आत्मनिशुद्धेन्तःकरणेपरमात्मनईशस्यात्मनोजीवस्यचयोविभेदोमायान्तःकरण रूपोपाधिद्वयकृतोविभेदोभेदस्तस्यभेदकं नाशकंभास्वरंप्रकाशशीलंयद्विज्ञानमितरवृत्त्युपमर्दनपूर्वकंब्रह्माकाराऽखण्डाद्याकृत्तिर्यदाऽवभाति

यदापरात्मात्मविभेदभेदकंविज्ञानमात्मन्यवभाति भास्वरम् ॥
तदैवमायाप्रविलीयतेऽञ्जसासकारकाकारणमात्मसंसृतेः॥ १८॥

असंभावनादितिरस्कारेणोदेति तदैव सकारकाजन्मान्तरप्रापककर्मसहितामायातत्तज्जीवोपाधिभूताविद्याऽञ्जसाझदितिप्रविलीयतेनश्यति ननुतन्नाशेऽपिसंसारनाशःकथमतोमायाविशेषणम् आत्मसंसृतेःकारणंसंसारस्योपादानकारणमेवंचतन्नाशेकार्यनाशोभवत्येवेतिभावः १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं पुनर्दार्ढ्यायाह श्रुतीति तत्त्वमसीत्यादिश्रुतिरूपैःप्रमाणैस्तज्जनितज्ञानेन नाशितासाविद्याकथमपिकार्यकारिणीभविष्यतीति काकुरत्र सर्वथानेत्यर्थः असतःकार्यकारित्वासंभवादितिभावः पुनश्चतस्यानोद्भवइत्याह विज्ञानमात्रादिति अमलाशुद्धाद्वितीयतःद्विती

श्रुतिप्रमाणाभिविनाशिताचसाकथंभविष्यत्यपिकार्यकारिणी ॥
विज्ञानमात्रादमलाद्वितीयतस्तस्मादविद्यानपुनर्भविष्यति १९

यात्मविषयकाद्विज्ञानमात्रादितरासहकृतान्निदिध्यासनपरिपाकजज्ञानाचसोनष्टातस्मात्सापुनर्नभाविष्यति रज्ज्वज्ञानमूलकस्य सर्पस्य रज्जुज्ञानेन निवृत्तस्ययथानपुनरुत्पत्तिरितिभावः ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्याया इतरनिरपेक्षाया एव मोक्षकारणत्वमुक्तं युक्तिपूर्वकं पुनः कथयति श्रोतृदार्ढ्याय । यदीति । यदि नष्टा तत्त्वज्ञाननाशिता सा न पुनः प्रसूयते नोत्पद्यते तदा कारणाभावादहं मतिः कथं भवेत् । कथमपि न भवेदित्यर्थः । तदभावाच्च तत्काले कर्माभाव इति स्वफलजनने सा स्वतन्त्रा इ

यदि स्म नष्टा न पुनः प्रसूयते कर्ताऽहमस्येति मतिः कथं भवेत् ॥
तस्मात्स्वतन्त्रा न किमप्यपेक्षते विद्या विमोक्षाय विभाति केव
ला ॥ २० ॥

तरनिरपेक्षैव न किमप्यपेक्षते द्वितीयस्यासंभवात् अतः केवलाऽसहायैव विमोक्षाय विभाति तत्फलिका भवतीत्यर्थः ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अत्रार्थे श्रुतिरपिप्रमाणमित्याह सेति साप्रसिद्धा नकर्मणानप्रजयाधनेनत्यागेनैके अमृतत्वमानशुः इत्यादिकातैत्तिरीयश्रुतिःप्रशस्तानामर्थ वादैःप्राशस्त्येनबोधितानामपिकर्मणांन्यासंत्यागंसादरंस्फुटमाह नतुकर्मसमुच्चयमित्यर्थः तथावाजिनां वाजसनेयिनाम् एतावदरेखल्वमृत

सातैत्तिरीयश्रुतिराहसादरंन्यासंप्रशस्ताखिलकर्मणां स्फुटम् ॥
एतावदित्याहचवाजिनांश्रुतिर्ज्ञानंविमोक्षायनकर्मसाधनम् २१

त्वम् इत्यादिका ज्ञानंविमोक्षायसाधनं नकर्मेत्येतदाह ॥ २१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहङ्कारत्यागरूपकारणवैषम्यात् क्रियाज्ञानयोर्वैषम्यमुक्त्वा फलमप्युक्तमपिवैषम्यमाह विद्येति हेसमुच्चयवादिन् त्वयाक्रतुरग्निष्टोमादिर्विद्यासमत्वेनदर्शितः परन्तुसमोदृष्टान्तोनोदाहृतः अनेनक्रतुर्विद्यासमः श्रुतिबोधितकर्तव्यताकत्वादित्यनुमानान्निरस्तम् दृष्टान्ताभावात् अन्वय्येवानुमानन्नव्यातिरेकीतिभावः एतच्चाकरेविस्तरेणप्रपञ्चितम् ननुविद्याकर्मणीसमे एकफलत्वाच्चक्रदण्डादिवदित्यनुमान-

विद्या समत्वेनतु दर्शितस्त्वया क्रतुर्नदृष्टान्त उदाहृतः समः ॥
फलैःपृथक्त्वाद्बहुकारकैः क्रतुःसंसाध्यतेज्ञानमतोविपर्ययम् २२

मितिचेत्तत्राह फलैः पृथक्त्वात् षष्ठ्यर्थेतृतीया फलानांभेदादित्यर्थः एवंचस्वरूपासिद्धोहेतुरितिभावः समानकारकत्वमपिहेतुर्नेत्याह क्रतुर्बहुभिः कारकैरहंममताभिमानरूपैरान्तरैर्बाह्यैश्चदेशकालादिनियमैश्चसाध्यते ज्ञानन्त्वतोविपर्ययवदतोनतयोः साम्यमितिभावः २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वकरणेप्रत्यवायभिया कर्मकार्यमितिचेन्नेत्याह सप्रत्यवायइति कर्मत्यागेनाहंनिश्चयेनाहंप्रत्यवायसहितोभविष्यामीत्येवंशुद्धात्मानि-
अनात्मधर्मस्यधीरमज्ञस्यतत्त्वज्ञानविकलस्यप्रसिद्धा नतुतत्त्वदर्शिनः तस्याहंबुद्धेरभावात् पापादेरनात्मधर्मतानिश्चयाच्च तस्माद्बुधैःकर्म

स प्रत्यवायोह्यहमित्यनात्मधीरज्ञप्रसिद्धा नतु तत्वदर्शिनः ॥
तस्माद्बुधैस्त्याज्यमपि क्रियात्मभिर्विधानतःकर्मविधि प्रका
शितम् ॥ २३ ॥

क्रियात्यभिः षष्ठ्यर्थेतृतीया क्रियाफलसक्तचित्तानां विधानतोविधानेनेतिकर्तव्यतयायुक्तंकर्म विधिभिरवश्यकर्तव्यतयावोधितमपि·
त्याज्यमित्यर्थः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविरक्तस्यकार्यमाह। श्रद्धेति । गुरुशास्त्रयोर्विश्वासःश्रद्धातदन्वितोबुभुत्सुःशुद्धमानसोऽपि निष्कामकर्मानुष्ठानाच्छुद्धमानसश्चगुरोः प्रसादाल्लब्धतत्त्वमसीतिवाक्यतः श्रुतमात्मजीवयोरैकात्म्यंविज्ञाय मनननिदिध्यासनपरिपाकाभ्यांसाक्षात्कृत्य। चएवार्थः । साक्षा

श्रद्धान्वितस्तत्त्वमसीतिवाक्यतो गुरोःप्रसादादपिशुद्धमानसः॥
विज्ञायचैकात्म्यमथात्मजीवयोः सुखी भवेन्मेरुरिवाप्रकम्पनः
॥ २४ ॥

त्कृत्यैवसुखी भवेत् । सकलदुःखहीनोभवेदित्यर्थः । अप्रकम्पनःविषयाभिलाषाक्षोभितान्तःकरणः ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महावाक्यार्थविचरीतुंवाक्यार्थस्यपदार्थबोधपूर्वकत्वमाह । आदाविति । विधानतःभ्रमप्रमादगांहित्येनवाक्यार्थविज्ञानस्य विधावुत्पत्तौआदौप्रथमंमुख्यमितियावत् । पदार्थावगतिःकारणम् । हिप्रसिद्धं तस्यपदत्र्यंतत्त्वम्असीति । तत्रतत्पदार्थःपरमात्मासर्वज्ञत्वादिगुणः त्वं

आदौ पदार्थावगतिर्हि कारणं वाक्यार्थविज्ञानविधौ विधानतः ॥
तत्त्वंपदार्थौ परमात्मजीवकावसीति चैकात्म्यमथानयोर्भवेत्
॥ २५ ॥

पदार्थोजीवःअनयोस्तत्त्वंपदार्थयोरैकात्म्यंतद्बोधकमसीतिपदम् ॥ २५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननु सर्वज्ञत्वादिगुणस्येशस्य किञ्चिज्ज्ञत्वधर्मवता जीवेनैकात्म्यं विरुद्धमित्याशङ्क्याह । प्रत्यगिति । अहंबुद्धिविषयत्वं प्रत्यक्त्वं जीवधर्मः परोक्षत्वमीशधर्मस्तदादिधर्मकृतमात्मनोः परमात्मजीवात्मनोर्विरोधं विहाय त्यक्त्वा तयोः संशोधितां युक्तिभिः सम्यग्विचारितां तत्त्वंपदाभ्यां शक्त्यभावेऽपि वक्ष्यमाणप्रकारया लक्षणया लक्षितां ज्ञातां चिदात्मतां संगृह्य तत्त्वंपदोपस्थितां विषयीकृत्वा स्वमात्मानं तथा ज्ञात्वाऽथ एकात्मज्ञानानन्तरमद्वयो भवेत् । चित्स्वरूपतां प्राप्तइव भवेत् । पूर्वमपि तत्स्वरूप एव विस्मृतकण्ठचामीकरन्यायेन चतत्प्राप्तिः तद्वदित्युक्तम् ।

प्रत्यक्परोक्षादिविरोधमात्मनोर्विहाय संगृह्य तयोश्चिदात्मताम् ॥
संशोधितां लक्षणया च लक्षितां ज्ञात्वा स्वमात्मानमथाद्वयो भवेत्
॥ २८ ॥

अयं भावः तत्त्वंपदयोर्द्वावर्थौ वाच्यो लक्ष्यश्च तत्र तत्पदस्य मायोपाधिः सर्वज्ञत्वादिविशिष्टो वाच्यः त्वंपदस्यापि किञ्चिज्ज्ञत्वादिविशिष्टो मायाकार्याविद्योपाधिरविद्यावदन्तःकरणोपाधिर्वाच्यः उभयोरपि विशेषणांशत्यागेन शुद्धश्चिदात्मा लक्ष्यः तत्र वाच्ययोर्विरुद्धधर्मकत्वादैक्यासंभवेऽपि लक्ष्ययोरैक्यं निर्बाधमेवेति ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तलक्षणास्वरूपमाह । एकात्मकत्वादिति जहतीलक्षणाजहत्स्वार्थलक्षणायथागङ्गायांघोषइत्यत्रगङ्गापदार्थस्यप्रवाहस्यघोषाधारता नुपपत्त्यामर्वथातत्परित्यागेनतीररूपार्थलक्षणा साप्रकृते न एकात्मत्वात् । विशेष्यांशस्यैकत्वात्सर्वथास्वार्थत्यागाभावात् । तथाज हल्लक्षणताजहत्स्वार्थलक्षणात्वत्त्वमपिअत्रनसंभवति । यथाकाकेभ्योदधिरक्ष्यतामित्यादौकाकपदस्यस्वार्थात्यागेनैवदध्युपघातकेलक्षणा सापिन । विरोधतःविशेषणत्यागेनसर्वथास्वार्थत्यागाभावात् । अतोभागलक्षणाजहदजहल्लक्षणायुज्यते । अदोषतःपूर्वोक्तदोषाभावात्

एकात्मकत्वाज्जहती न सम्भवेत्तथाऽजहल्लक्षणता विरोधतः॥
सोऽयंपदार्थाविवभागलक्षणायुज्येततत्त्वंपदयोरदोषतः॥२७॥

विशेष्यांशस्यात्यागाद्विशेषणांशस्यत्यागाच्च । तत्रदृष्टान्तः । सोऽयंपदार्थाविव । यथासोऽयंदेवदत्तइत्यत्रतद्देशादिविशिष्टोऽतीतानुभव विषयोवातत्पदार्थः एतद्देशादिविशिष्टोऽनुभूयमानोवेदंशब्दार्थः । तयोश्चाविरुद्धविशेषणकत्वादैक्यासंभवेनदेशादिरूपविशेषणत्यागेना नुभवगतानीतत्वादिविशेषणत्यागेनवालक्षणयैक्यंतद्वदितिभावः ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथत्याज्यत्वायजीवोपाधिमाह । रसादीति । रसापृथ्वीआदिर्येषांतानिपञ्चीकृतानियानिभूतानितेभ्यःसंभवोयस्यतत् । पञ्चीकरणंचे त्थम् एकैकंभूतंद्विधाविभज्यतत्रैकंभागंचतुर्धाविभज्यतेषांभागानांस्वेतरभूतचतुष्टयार्धभागचतुष्टयेसंयोजनेएकैकंभूतंपञ्चात्मकंभवतिभा

रसादिपञ्चीकृतभूतसंभवंभोगालयंदुःखसुखादिकर्मणाम् ॥ शरी
रमाद्यन्तवदादिकर्मजंमायामयंस्थूलमुपाधिमात्मनः ॥ २८ ॥

गाधिक्याच्चप्रातिस्विकतयाभूरादिव्यवहारोऽपि । सुखदुःखयोरादीनियानिकर्माणितेषांभोगस्तत्कर्मजन्यसुखदुःखानुभवस्तस्यालयमाश्र यभूतमाद्यन्तवत् उत्पत्तिनाशयोगि आदिकर्मजंभाग्भवीयकर्मजन्यंमायामयंपरम्परयामायाविकारः तद्विकारभूतविकारत्वात् । एतच्छरी रमात्मनःस्थूलमुपाधिंवदन्तीतिशेषः ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथसूक्ष्मोपाधिमाह। सूक्ष्ममिति । बुधाःअन्यत्स्थूलशरीरविलक्षणंशरीरंलिङ्गदेहाख्यमात्मनउपाधिंविदुः । तत्स्वरूपमाह। सूक्ष्मंचक्षु-
राद्यविषयः मनोबुद्धिदशेन्द्रियैःप्राणैश्चयुतम् सङ्कल्पात्मकंमनः निश्चयात्मिकाबुद्धिः घ्राणरसनाचक्षुस्त्वक्श्रोत्रेतिपञ्चज्ञानेन्द्रियाणि वा-

सूक्ष्मंमनोबुद्धिदशेन्द्रियैर्युतंप्राणैरपञ्चीकृतभूतसंभवम् ॥ भोक्तुः
सुखादेरनुसाधनंभवेच्छरीरमन्यद्विदुरात्मनोबुधाः ॥ २६ ॥

क्पाणिपादपायूपस्थानिकर्मेन्द्रियाणि प्राणापानव्यानोदानसमानाश्चप्राणास्तैर्युतमेतत्सप्तदशसमुदायात्मकम्। तदाधारभूतान्याह ।अप
ञ्चीकृतभूतसंभवंतेभ्यउत्पन्नमतएवादृश्यम् । तथाभोक्तुःसुखादेःसुखदुःखाद्यनुभवस्यानुसाधनम् स्थूलशरीरस्यैतदनुगतस्यैवभोगसाधनत्व
मितिभावः । एतद्वियोगेनैवमरणव्यवहारइतिबोध्यम् ॥ २९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिजीवोपाधिद्वयमुक्त्वाईशोपाधिमाह । अनादीति । अनादि उत्पत्तिहीनम् । नानाविधपरिणामशालितयापरिणामरूपेणनश्वरामिति अनादित्वमात्रेोक्त्यासूचितम् । अनिर्वाच्यम् सत्त्वासत्त्वाभ्यांनिर्वक्तुमशक्यम् कारणंसकलप्रपञ्चस्यजनकम् ईदृशीमायातुब्रह्मणःपरमी-

अनाद्यनिर्वाच्यमपीहकारणं मायाप्रधानंतुपरंशरीरकम् ॥ उपाधिभेदान्तुयतःपृथक्स्थितं स्वात्मानमात्मन्यवधारयेत्क्रमात् ॥ ३० ॥

श्वरव्यवहारसंपादकत्वादुत्कृष्टंप्रधानंशरीरकम् । स्वार्थेकः । एवमुपाधिभेदादेकमेवचैतन्यंयतः पृथक्स्थितंजीवईशइतिभेदबुद्धिविषय मतोलक्षणयोपाधिपरित्यागेनस्वात्मानमात्मनिअवधारयेदभेदेनजानीयात् । क्रमाच्छ्रवणमनननिदिध्यासनक्रमेणेत्यर्थः ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवाक्यार्थविचारफलमाह । कोशेष्विति । आनन्दमयस्य ब्रह्मत्वेअन्नमयप्राणमयमनोमयविज्ञानमयेषुचतुर्षुकोशेषुतत्तत्सङ्गात्तत्तदाकृतिर्विभाति यथाजपादिसङ्गात्स्फटिकोऽनेकाकृतिर्भाति । आनन्दमयस्यापि जीवत्ववादिनातुतेनसहपञ्चसु कोशेष्वितिबोध्यम् । अस्मि-

कोशेषुपञ्चस्वपितत्तदाकृतिर्विभातिसङ्गात्स्फटिकोपलोयथा ॥ असङ्गरूपोऽयमजोयतोऽद्वयोविज्ञायतेऽस्मिन्परितोविचारिते ॥ ३१ ॥

न्महावाक्येपरितोविचारितेसम्याग्विचारितेसत्ययमात्माऽसङ्गरूपःअन्नमयादिभिःसङ्गरहितः । असङ्गोनहिसज्जते । इतिश्रुतेः । अजोऽद्वयश्चविज्ञायते । स्थूलोऽहमित्यादिस्त्वज्ञस्यतत्तत्कोशप्रसङ्गात्प्रतीतिःस्फटिकवत् तत्त्वज्ञस्यतुनतथाप्रतीतिरितिभावः । एवंचतत्तदुपाधिकृततत्तद्रूपताप्रतीतिनिरासएव विचारफलमितिभावः ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जाग्रदाद्यवस्थाऽपि बुद्धेर्धर्मोनात्मधर्मइत्याह । बुद्धेरिति । इहआत्मनिस्वप्नादिभेदेन जाग्रत्स्वप्नसुषुप्तिभेदेन यात्रिधावृत्तिर्दृश्यतेसाऽपि गुणत्रयात्मनः सत्त्वरजस्तमोरूपगुणत्रयस्वरूपाया बुद्धेर्धर्मः । उक्तावस्थात्रयस्योक्तमूलकत्वात् । एतदवस्थात्रयस्यास्मिन्नवस्थात्रय-साक्षिणि आत्मनि भानं मृषा बुद्ध्यध्यास निवन्धनं न तु वास्तव मित्यर्थः । अन्योऽन्यतोव्यभिचारतस्तस्यावस्था त्रयस्यस्व रूपतो

बुद्धेस्त्रिधा वृत्तिरपीह दृश्यते स्वप्नादि भेदेन गुणत्रयात्मनः ॥ अन्योऽन्यतोऽस्मिन्व्यभिचारतोमृषा नित्ये परे ब्रह्मणि केवले शिवे ॥ ३२ ॥

मृषात्वात्तज्ज्ञानस्य मृषात्वमेव । स्वप्नकाले जाग्रत्सुषुप्त्योरभावात् । जाग्रतिइतरद्वयस्याभावात् सुषुप्तावितरयोरभावात्परस्परं व्यभिचारोबोध्यः आत्मनस्तदनाश्रयत्वंविशेषणैराह । नित्येउत्पत्तिनाशशून्येपरेगुणत्रयातीते ब्रह्मणिव्यापकेकेवलेऽसङ्गेशिवआनन्दरूपे एवंभूतेसदैकरसेपरस्परव्यभिचारधर्माभानमसंभवीति भावः ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

 अथसाऽन्यत्वायमंसारमूलभूतांवृत्तिमाह । देहेति । एषांसङ्घातइतरेतराध्यासविषयात् अजस्रंयावद्धियो बुद्धेर्वृत्तिस्तमोमूलतयाऽज्ञ
लक्षणाऽज्ञत्वज्ञापिका यावत्परिवर्तते तावद्भवोद्भवःसंसारोद्भवोभवेत् । तमःपदंरजसोऽप्युपलक्षणम् । रजस्तमःप्रधानाबुद्धिः संसारहेतु

देहेन्द्रियप्राण मनश्चिदात्मनां सङ्घादजस्रं परिवर्तते धियः ॥
वृत्तिस्तमोमूलतयाऽज्ञलक्षणा यावद्भवेत्तावदसौ भवोद्भवः॥३३॥

त्वात्सर्वथासान्येति भावः ॥ ३३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत महावाक्यविचारस्य कर्तव्यमाह । नेतीति । अथात आदेशो नेति नेति इति प्रमाणेन निराकृतं मिथ्यात्वेन गृहीतमखिलं जगत् येन सः ततो हृदा सत्त्वप्रधानेन मनसा सम्यगास्वादितं चिल्लक्षणं घनामृतं दुःखासंभिन्नं सुखं येन सः । स्वर्गादि तु परिणामदुःखत्वात्तत्संभिन्नमेव । एवंभूतोऽशेषं जगद्देहेन्द्रियादि दृश्यसमूहं त्यजेत् हानोपादानबुद्धिविषयं न कुर्यात् । किन्तूदासीनस्तत्र भवेत् । ननु देहेन्द्रियादिभिरेव तज्ज्ञान

नेतिप्रमाणेन निराकृताखिलो हृदा समास्वादितचिद्घनामृतः ॥
त्यजेदशेषं जगदात्तसद्रसं पीत्वा यथाऽम्भः प्रजहाति तत्फ-
लम् ॥ ३४ ॥

लाभात् कथमुपजीव्यस्य त्याग इत्याशङ्क्य दृष्टान्तदर्शनेन परिहरति । यथा तृषावान् आत्तः सद्रसो माधुर्यं येन तादृशं नारिकेलनारङ्गादि फलान्तवर्त्यम्भः पीत्वा तत्स्थानभूतं तत्फलं जहाति तत्रोदासीनो भवति तद्वत् सर्वदृश्यसारांशो ब्रह्म तल्लाभसति निःसारं दृश्यं नोपादेयं नापि हेयमिति भावः । यतो भयादिसंभावनातद्धेयमपीत्युच्यते ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतरस्यानित्यत्वेनतत्रवैराग्यार्थमात्मनएवनित्यत्वमाह । कदाचिदिति । कदापीत्यर्थः । अनवः उत्पत्त्यनन्तरंविद्यमानोहिनवः । तेन जन्मानन्तरास्तित्वंव्यावर्तितं नवत्वाभावेनैवजीर्णत्वाभावादवस्थान्तरप्राप्तिरूप परिणामोऽपिनिरस्तः ।अनेनअस्तिजायतेवर्द्धतेविपरिणम तेऽपक्षीयते नश्यतीति षड्भाव विकार राहित्यमुक्तम् । एवंचैतद्भिन्नं सर्वमुक्तषड्भावविकारवत्त्वादनित्यमिति ततोविरज्येतेतिबोधित-

कदाचि दात्मान मृतोनजायते नक्षीयते नापिविवर्धतेऽनवः ॥
निरस्तसर्वातिशयः सुखात्मकः स्वयम्प्रभःसर्वगतोऽयमद्वयः ३५

म् । यतऽईदृशोऽतएवनिरस्तः सर्वस्यदेहेन्द्रियादेरतिशयोमहत्त्वं येनस्वलाभात्सः यल्लाभान्नापरोलाभइतिःश्रुतेः यतःसुखात्मकः आनन्द स्वरूपः स्वयम्प्रभःस्वप्रकाशकश्च देहेन्द्रियादिस्तु दुःखस्वरूपः परप्रकाश्यश्च । यस्यभासासर्वमिदंविभाति । इतिश्रुतेः । सर्वगतोव्यापकः अयमहंबुद्धिविषयःप्रत्यगात्माऽपिअद्वयः उक्ताद्वयब्रह्मस्वरूपएव । नततोऽतिरिक्तइतिभावः । अयमात्माब्रह्म । इतिश्रुतेः ॥ ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुएवंविधेविकारशून्येआत्मनिजन्ममरणादिप्रवाहरूपसंसारभानंकथमितिशङ्कते। एवंविधेइति।दुःखमयःदुःखप्रचुरः।उत्तरयति। अज्ञानतइ
तिअज्ञानमूलकोयोध्यासोदेहान्तः करणादौअहंममेत्यध्यासस्तद्वशात्। एवंचभ्रान्तिरूपातत्प्रतीतिरितिभावः। नन्वेवंकथंतस्यसंसारस्यनि

एवंविधे ज्ञानमये सुखात्मके कथंभवो दुःखमयःप्रतीयते ॥
अज्ञानतोऽध्यासवशात्प्रकाशतेज्ञानेविलीयेत विरोधलःक्षणात्॥
॥ ३६ ॥

वृत्तिस्तत्राह। ज्ञानेति। आविर्भूतइतिशेषः। ज्ञानस्याज्ञानविरोधित्वात्तदुत्पत्तिक्षणएवकारणभूताज्ञाननाशात्तत्कार्यसंसारस्यापि वि
लयइत्यर्थः। यथारज्जुज्ञाननरज्जौसर्पस्यलयइत्यर्थः॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाध्यासलक्षणमाह । यदन्यदिति । यदन्यत्सर्पादिकमन्यत्ररज्ज्वादौ भ्रमात्भ्रमजनकाद्दोषाद्विभाव्यतेविज्ञायतेअमुंविपश्चितोविद्वांसोऽध्यासइत्याहुः । यथाऽसर्पभूतेरज्ज्वादौ अहिविभावनंसर्पारोपोरज्ज्वबुद्धिमूलकस्तद्वदीश्वरेऽपिजगद्देहादिसंसारात्मकंसर्वंविभाव्य-

यदन्यदन्यत्र विभाव्यते भ्रमादध्यासमित्याहुरमुंविपश्चितः॥
असर्पभूतेऽहिविभावनंयथा रज्ज्वादिकेतद्वदपीश्वरेजगत्॥३७॥

तेआत्मज्ञानाभावाद्यथार्थतयाज्ञायते ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनिब्रगद्धानेकीदृशोऽध्यामोनिमित्तंतदाह विकल्पेति सर्वविकल्पकारणमायारहितेवस्तुतस्तत्सङ्गरहितेचिदात्मकेचित्स्वरूपेसर्वकारणेनिरामयेदुःखासंभिन्नानन्दमयेकेवलंसर्वविकारशून्यपरेदृश्याविलक्षणेब्रह्मणिव्यापके आत्मनिप्रथममहङ्कारःकल्पितः सएवाध्यासः ।

विकल्पमायारहितेचिदात्मके ऽहङ्कारएष प्रथमः प्रकल्पितः ॥
अध्यासएवात्मनिसर्वकारणे निरामयेब्रह्मणि केवलेपरे ॥ ३८॥

अहंबुद्ध्यात्मकोऽध्यासएवसर्वसंसारकारणमितिभावः ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बुद्धिनिष्ठएवसंसारोनत्वात्मनिष्ठइत्यत्रान्वयव्यतिरेकौप्रमाणयति। इच्छादीति। परेसर्वसाक्षिणिआत्मनिसंसृतिहेतवःभासमानसंसारकारणं सदाकालत्रयेऽपिइच्छादिरागादिसुखादिधार्मिकाः इच्छापक्षेरागद्वेषौसुखदुःखंइत्येवमादिद्वन्द्वधार्मिकाःधियएवधीषुसतीषुसंसारइत्यन्वयमु

इच्छादिरागादिसुखादिधार्मिकाः सदा धियः संसृतिहेतवः परे ॥
यस्मात्प्रसुप्तौतदभावतःपरः सुखस्वरूपेणविभाव्यतेहिनः ॥३९॥

क्त्वातद्व्यतिरेकमाह यस्मात्कारणात्प्रसुप्तौतदभावा तद्धीवृत्त्यभावात परआत्मानोऽस्माभिःतृतीयार्थेषुषष्ठी। सुखरूपेणस्वस्वरूपमात्रेणाविभा व्यतेनिश्चीयते नतु संसारित्वेनेतिभावः सुप्तोत्थितस्तुसुखमहमस्वाप्समितिप्रत्यभिज्ञानुभवात्तदात्मस्वरूपनिश्चयोऽस्तीतितात्पर्यम् ॥ ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथपुनस्तत्त्वं पदार्थस्वरूपमाह । अनादीति । अनादिर्याऽविद्यातत उद्भवोयस्या बुद्धेरन्तःकरणस्यतत्रविम्बितःप्रतिबिम्बिताश्चितःप्रकाशः सजीवइतीर्यते आत्मापरात्माधियः साक्षितया धीधर्मासङ्गेनैवपृथक्स्थितः । अन्तर्यामितयेत्यर्थः जीवोऽहंसुखीत्यादिप्रकारेणान्तःकर

अनाद्यविद्योद्भवबुद्धिबिम्बितोजीवप्रकाशोऽयमितीर्यते चितः ॥ आत्माधियः साक्षितया पृथक् स्थितो बुद्ध्या परिच्छिन्नपरः सएव हि ॥ ४० ॥

णधर्माध्यासवान्परमात्मातु साक्षितयासर्वत्राविद्यमानोऽपितथेतिभावः । अतएवबुद्ध्यापरिच्छिन्नपरः बुद्धिलक्षणपरिच्छेदरहितःअतएव परः । एवंचज्ञानेनप्रतिबिम्बाधार विलयप्रतिबिम्बस्यविलयात्सजीवः सएवपरमात्मैवहिप्रसिद्धं सइत्यस्यचानुवृत्तिर्बोध्या ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ बुद्ध्यात्मनोःपरस्पराध्यासवशात् परस्परधर्मभानमितिदार्ढ्यायपुनराह । चिद्बिम्बेति । चिदात्मचेतसोरन्योन्याध्यासवशात् परस्परतादात्म्यारोपाज्जडाजडत्वंप्रतीयते । चेतसोवृत्तीनांज्ञानत्वं जीवात्मनोजडत्वंप्रतीयते । अतएवज्ञानाश्रयआत्मेति चितएवताकिंकव्यवहारः । जीवात्मनिजडात्मनिजडात्माकथ्यते बुधैरितिस्मार्तव्यवहारश्च । अत्रहेतुः । चिदित्यादि । चिद्बिम्बस्यसाचिदाभासः अ

चिद्बिम्बसाक्ष्यात्मधियांप्रसङ्गतस्त्वेकत्रवासादनलाक्तलोहवत्॥
अन्योऽन्यमध्यासवशात्प्रतीयते जडाजडत्वंचचिदात्मचेतसोः
॥ ४१ ॥

क्षेःसहितः साक्षःसेन्द्रियः सचासावात्मामनःधीरन्तःकरणंतेषांप्रकृष्टसङ्गादतिसन्निकर्षादध्यासइत्यर्थः । अनलाक्तलोहवत् अग्नितप्तलोहपिण्डवत् अत्रदृष्टान्तः । अग्निधर्मोदाहकत्वं लोहधर्मश्चवर्तुलत्वाद्यनलेभासते । तत्रहेतुरेकत्रवासात् परस्पराविभागेनवृत्तेरित्यर्थः । तद्वदेतयोरपि परस्परधर्माध्यासइत्यर्थः ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं दार्ढ्यायपुनराह । गुरोरिति । वेदवाक्यतइत्यनेन श्रवणंगुरोःसकाशादपि । ततश्चानेनमननमुक्तम् । ताभ्यांसञ्जातोविद्यया ज्ञानरूपस्यात्मनोऽनुभवोयस्यसः । अनेनकृतनिदिध्यासनइत्यर्थः । तं चिदानन्दस्वरूपं स्वात्मानमुपाधिवर्जितं रहितोपाधिधर्ममात्मस्थं

गुरोःसकाशादपिवेदवाक्यतः सञ्जातविद्यानुभवोनिरीक्ष्य तम् । स्वात्मानमात्मस्थमुपाधिवर्जितं त्यजेदशेषं जडमात्मगोचरम् ॥ ४२ ॥

हृत्स्थंनिरीक्ष्य अपरोक्षीकृत्याशेषंजडं दृश्यंत्यजेत् । तत्रोदासीनोभवेदिति भावः ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu.

CC-0. In Public Domain. Digitization by eGangotri

ज्ञेयंनिरुपाधिकं स्वरूपंश्लोकद्वयेनाह प्रकाशेति अहंप्रकाशरूपः स्वप्रकाशः परप्रकाशहीनः परप्रकाशरूपोयथाघटादिः अजोजन्मादि हीनः अद्वयःसजातीयद्वितीयरहितः असकृद्विभातः सकृदपिपरेणभासकान्तरेणप्रकाशितः सकृद्विभातः नसकृद्विभातोसकृद्विभातः नत

प्रकाशरूपोऽहमजोऽहमद्वयोऽसकृद्विभातोऽहमतीवनिर्मलः ॥
विशुद्धविज्ञानघनोनिरामयःसम्पूर्णआनन्दमयोऽहमक्रियः॥४३॥

त्रसूर्योभातिनचन्द्रतारकमितिश्रुतेः नतद्भासयतेसूर्यइतिस्मृतेश्च अतीवनिर्मलः मायाकृतावरणविक्षेपरहितः विशुद्धविज्ञानघनः विशुद्धचिदेकरसः निरामयःकर्तृत्वाभिमानरहितः सम्पूर्णःदेशकालपरिच्छेदहीनः आनन्दमयः आनन्दरूपः स्वार्थेमयट् अक्रियः परिणामहीनः ॥ ४३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सदैवेति अहंसदैवकालत्रयेऽपिमुक्तःसर्वधर्मरहितः अचिन्त्यशक्तिमान यः परमात्मा अतीन्द्रियज्ञानमृइन्द्रियातिरिक्तज्ञानरूपःयतोवाचो निवर्त्तन्ते अप्राप्यमनसासहइतिश्रुतेः अविक्रियात्मकोऽपरिणामी अनन्तपारःअन्तःकालतःपारःपरन्तीरन्तावविद्यमानौ यस्य तेनदेश

सदैवमुक्तोऽहमचिन्त्यशक्तिमानतीन्द्रियज्ञानमविक्रियात्मकः॥
अनन्तपारोऽहमहर्निशंबुधैर्विभावितोऽहंहृदिवेदवादिभिः ॥४४॥

कालपरिच्छेदहीनः ईदृशोयःपरमात्माबुधैर्हृदि अहर्निशंविभावितः सोऽहमित्यर्थः ॥ ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एवंभावनायाःफलमाह एवमिति उक्तरीत्यासदाआत्मानं अखण्डितात्मनाविषयानाकृष्टचित्तेन विचारमाणस्यध्यायतः धातूनामनेकार्थ स.
रा. गी. त्वात् चरमाणएवचारमाणःस्वार्थेऽण् विशुद्धभावनाब्रह्माकारान्तःकरणवृत्तिरुदेतीतिशेषः साचोदिताकारकैर्देहान्तरप्रापककर्मभिः स

॥ २३ ॥

एवंसदात्मानमखण्डितात्मनाविचारमाणस्यविशुद्धभावना ॥
हन्यादविद्यामचिरेणकारकैरसायनंयद्वदुपासितंरुजः ॥ ४५ ॥

॥ २३ ॥

हाविद्यामचिरेणशीघ्रमेवहन्यात् यथापामितंसेवितंरसायनं रुजोहन्यात्तद्वत् ॥ ४५ ॥

CC-0. In Public Domain. Digitization by eGangotri

तत्रध्यानेइतिकर्तव्यतामाह विविक्तइति निर्जनइत्यर्थः आसीनोयथोचितपद्मासनाद्युपविष्टः उपारतेन्द्रियः तेनशमदमादिसम्पन्नः विनि र्जितात्माप्राणायामादिभिर्जितान्तःकरणः अतएवविमलान्तराशयोविशुद्धचित्तः विज्ञानदृक्विज्ञानएवदृक्भानंयस्यसः द्रष्टदृश्यभा

विविक्तआसीनउपारतेन्द्रियोविनिर्जितात्माविमलान्तराशयः॥
विभावयेदेकमनन्यसाधनोविज्ञानदृक्केवलआत्मसंस्थितः॥४६

नरहितः अनेननिर्विकल्पकसमाधिरुक्तः अनन्यसाधनः तत्त्वज्ञानातिरिक्तमुक्तिसाधनास्तित्वभ्रमरहितः केवलोऽसङ्गःआत्मसंस्थितः आत्मन्येवसंस्थासमाप्तिः सञ्जातायस्यसतेन नकदापिविषयान्तरसञ्चारवच्चित्तः विभावयेत् ध्यायेत् ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंच यदेतत्भूतंभविष्यद्वर्तमानं विश्वंपरमात्मादर्शनंभासकोयस्यतत् तस्यभासासर्वमिदंविभातीति श्रुतेः तत्सर्वकारणेमायासान्निधाना
त्सर्वोपादानत्वेनाभिमतेआत्मनिविलापयेत् उपादानसत्ताव्यतिरेकेणकार्यसत्तांनपश्येत् तादृशस्यलक्षणमाह सम्पूर्णः अवाप्तसमस्तका

विश्वंयदेतत्परमात्मदर्शनं विलापयेदात्मनि सर्वकारणे ॥
पूर्णश्चिदानन्दमयोऽवतिष्ठते न वेद बाह्यं न च किञ्चिदान्तरम् ॥ ४७ ॥

मः तस्यकाम्याभावात् चिदानन्दमयः तद्रूपोऽवतिष्ठते बाह्यमान्तरंच दृश्यंनजानाति सर्वत्रब्रह्मदर्शनादिति भावः ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाधिसिद्धेः पूर्वंयत्कर्तव्यंतदाह । पूर्वमिति । ममाधेः सकलविषयव्यासङ्गनिवृत्तिपूर्वकं ब्रह्माकारवृत्तिः समाधिस्ततः पूर्वमखिलंस चराचरंजगत् ओङ्कारमात्रं विचिन्तयेत् । ओङ्कारोमीयतेऽ नयेतिमात्रा प्रमाणं बोधकत्वेन परिच्छेदकोयस्यतथाजानीयात् । तदेवविवृ

पूर्वं समाधे रखिलं विचिन्तये दोङ्कारमात्रं सचराचरं जगत् ।
तदेव वाच्यं प्रणवो हि वाचको विभाव्यते ज्ञानवशान्न बोधतः ॥ ४८ ॥

णोति तदेवेति । जगदेवेत्यर्थः । प्रणवोवाचकोविभाव्यतेएतत्प्राहिप्रसिद्ध इत्यर्थः । इयंभावनाज्ञानवशादेवनबोधकः । बोधोनिर्विशेषब्रह्मसाक्षात्कारस्तदुत्तरंनेत्यर्थः । तस्यसर्ववृत्त्युपमर्दकत्वात् ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमर्थंविवृणोति । अकारेति । अकारसञ्ज्ञस्तद्वाच्यःपुरुषोहिविश्वकोविश्वएवविश्वकः विश्वशब्देनपरिभाषितःअयंजाग्रत्साक्षीविराट् ततःस्वप्नसाक्षीतैजसःतेनपदेनपरिभाषितःलिङ्गदेहाभिमानीहिरण्यगर्भउकारकः उकारप्रतिपाद्यईर्यते । ततः सुषुप्तिसाक्षीप्राज्ञपदवाच्यो

अकारसञ्ज्ञः पुरुषो हि विश्वको ह्युकारकस्तैजसईर्यते क्रमात्
प्राज्ञो मकारः परिपठ्यतेऽखिलैः समाधि पूर्वं न तु तत्त्वतो
भवेत् ॥ ४९ ॥

मायोपाधिकोमकारस्तद्वाच्यः परिपठ्यतेऽखिलैर्वेदैः । इयंभावनासमाधिपूर्वंसमाधेःपूर्वमेव नतत्त्वतः तत्त्वसाक्षात्कारेसतिनभवेत् । सर्वस्यब्रह्मणिप्रविलयात् ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविलापन प्रकारमाहद्वाभ्याम् । विश्वंत्विति । उकारमध्ये बहुधाव्यवस्थितं स्थूलदेहनिबंधनं स्थूलदेहाभिमानेन स्थितं विश्वम्पुरुषं तद्वाचकमकारम् च विलापयेत् । तुश्चार्थे । विलीनम्भावयेत् ततस्तैजसं लिङ्गदेहाभिमानिनम् पुरुषं तद्वाचकं प्रणवस्य द्वितीय वर्णमुकारं वि-

विश्वं त्वकारं पुरुषं विलापयेदुकारमध्ये बहुधा व्यवस्थितम् ।
ततो मकारे प्रविलाप्य तैजसं द्वितीयवर्णं प्रणवस्य चान्तिमे ॥५०॥

लीनविश्वकम्मकारे विलाप्याविलीनम्भावयित्वा ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तनस्तादृशंमकारंतद्वाच्यंप्राज्ञंचकारणंकारणत्वाभिमानिनंपुरुषमिहात्मनि चिद्घनेपरे विलापयेत् तथाभावयेत् । ततः सोऽहंमर्वोपिला
पाधिष्ठानंपरब्रह्मविभावयेत् । तद्विशिनष्टि । सदाविमुक्तिमत् नित्यमुक्तम् । नन्वहंपदार्थस्यरागद्वेषादिमालिनस्यकथं ब्रह्मत्वभावनेसा

मकारमप्यात्मनि चिद्घने परे विलापयेत्प्राज्ञमपीह कारणम् ।
सोऽहं परं ब्रह्म सदा विमुक्तिमद्विज्ञानदृङ्मुक्त उपाधितोऽ
मलः ॥ ५१ ॥

शङ्क्याहंपदार्थंविशिनष्टि । उपाधितोमुक्तः अतएवामलःतथाभावनेसाधनं विज्ञानदृक्विज्ञानं ब्रह्ममात्रप्रत्ययाविच्छेदरूपादृक् निदिध्या
सनं सत्साक्षात्कारेसाधनंयस्यसः ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

एवंभावनावतो लक्षणमाह । एवमिति । उक्तप्रकारेण सदा जाता परमात्मन्येकभावना यस्य सः परिविस्मृतमखिलं पुत्रदेहादि येन सः । अत एव स्वस्वरूपानन्देनैव तुष्टः न तु विषयानन्देन । तस्य परिणामे दुःखरूपत्वात्ततो विरक्त इत्यर्थः । साक्षान्नित्यात्मनि सुखप्रकाशकः साक्षा

एवं सदा जातपरात्मभावनः स्वानन्दतुष्टः परिविस्मृताखिलः ॥
आस्ते स नित्यात्मसुखप्रकाशकः साक्षाद्विमुक्तोऽचलवारिसिन्धुवत् ॥ ५२ ॥

दौपाधिकनामरूपभेदरहितं नित्यमखण्डितमात्मस्वरूपं यत्सुखं प्रकाशश्च तद्रूपः एवंरूपो विमुक्तो जीवन्मुक्तः । अचलं निश्चलं वारि यस्य तादृशः सिन्धुवदास्ते । विषयसम्बन्धरूपलहरीरहित आस्त इत्यर्थः ॥ ५२ ॥

CC-0. In Public Domain. Digitization by eGangotri

ईदृशस्यमत्प्राप्तिर्भवत्येवेत्याह । एवमिति । उक्तप्रकारेणसदाऽभ्यस्तसमाधेर्योगिनः निवृत्ताःसर्वेषामिन्द्रियाणांगोचराविषयाःशब्दादयो यस्य विनिर्जिताअशेषारिपवःकामादयोयेनतस्य । तज्जयेनविषयेष्वन्तःकरणाप्रवृत्तिः । अतएव सर्वज्ञत्वनित्यत्वनित्यतृप्तत्वबोध

एवं सदाऽभ्यस्तसमाधियोगिनो निवृत्तसर्वेन्द्रियगोचरस्य हि ॥ विनिर्जिताशेषरिपोरहंसदा दृश्यो भवेयं जितषड्गुणात्मनः ॥५३ ॥

रूपत्वस्वतन्त्रत्वनित्यमलुप्तत्वानन्तरूपाषड्गुणायस्यतादृशआत्माजितो वशीकृतोयेनतस्य सदादृश्योभवेयम् । एतेनमद्भक्तस्ययोगिनो ऽहंदृश्योनतुभक्तिविमुखस्येति सूचितम् ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंविधोजीवन्मुक्तःप्रारब्धवशेन अनभिमानोभोगानश्नँस्तिष्ठेत् ततोमय्येवविलीयते मद्रूपोभवतीत्याह । ध्यात्वैवमिति ॥ ५४ ।

ध्यात्वैवमात्मानमहर्निशं मुनिस्तिष्ठेत्सदा मुक्तसमस्तबन्धनः ॥
प्रारब्धमश्नन्नभिमानवर्जितो मय्येवसाक्षात्प्रविलीयते ततः ५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वधर्मापेक्षयाऽयमेव धर्मोऽज्यायानित्याह । आदाविति । भवं संसारमादिमध्यान्तेष्वपि सर्वथा भयशोकयोः कारणं विदित्वा तत्कारणीभूतं विधिवादचोदितं त्यागादिभिश्चोदितं बोधितं समस्तं कर्ममार्गं काम्यं हित्वा । अखिलात्मनां जीवानां स्वरूपभूतं मामात्मानं परमेश्वरं भजेत् । य

आदौ च मध्ये च तथैव चान्ततो भवं विदित्वा भयशोककारणम् ॥ हित्वा समस्तं विधिवादचोदितं भजेत्स्वमात्मानमथाखिलात्मनाम् ॥ ५५ ॥

थाधनस्यार्जनेनादौ दुःखं मध्ये पालनकृतं तत्र राजादिकृतं भयमन्तेनाशे शोकः पर्यवसाने दुःखमेवं पदार्थमात्रे द्रष्टव्यम् ॥ ५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मय्यभेदभावनया नामरूपाविभागेन तद्रूप एवभवतीत्यमुमर्थं सदृष्टान्तमाह । आत्मनीति । आत्मनिसर्वाधिष्ठानेमयिइदंस्वस्वरूपं जीवमभेदेनविभावयन्यदा । तिष्ठतीतिशेषः । तदामयात्मनापरमेश्वरेणाऽभेदेनभवति अभिन्नोभवति । तत्रदृष्टान्तः यथासमुद्रेप्रविष्टं नद्यादि

आत्मन्यभेदेन विभावयन्निदं भवत्यभेदेन मयाऽऽत्मनातदा ॥ यथाजलं वारिनिधौ यथापयः क्षीरेवियद्व्योम्न्यऽनिले यथाऽनिलः ॥ ५६ ॥

जलंसमुद्रएव यथाक्षीरेगवादिक्षीरेप्रक्षिप्तंपयःक्षीरमेव यथाव्योम्निमहाकाशेघटाद्यवच्छिन्नाकाशोघटादिभङ्गे च यथाचर्मभस्त्रिकाद्यवच्छिन्नोवायुरनिलेमहावायौ नामरूपाविभागेनैकीभवतीत्यर्थः ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमात्मतत्त्वज्ञस्य जगत्सत्यत्वभ्रमःस्वतएवापैतीत्याह । इत्थमिति । हिरण्यर्थे । लोकसंस्थितोऽपिजीवन्मुक्तिदशायांप्रारब्धवशाल्लोक व्यवहारंकुर्वन्नपिजगन्मृषैवेतिविभावयनसन् यदियदा इत्थमीक्षते ऐकात्म्यं जानीयात्तदा निवृत्तजगत्सत्यत्वभ्रमो भवतीति शेषः। तत्र हेतुः श्रुतियुक्तिमानतोनिराकृतत्वात् । अतोऽन्यदार्तमित्यादिश्रुतिरूपात् जगन्मिथ्यादृश्यत्वात् शुक्तिरजतवदितितदुपबृंहितानुमानरू

इत्थं यदीक्षेत हि लोकसंस्थितो जगन्मृषैवेतिविभावयन्मुनिः ॥ निराकृतत्वाच्छ्रुतियुक्तिमानतो यथेन्दुभेदो दिशिदिग्भ्रमादयः ॥ ५७ ॥

पात्मानतःप्रमाणतोनिराकृतत्वात् तत्रदृष्टान्तोयथेन्दुभेदः एकचन्द्रेद्विचन्द्रत्वभ्रमस्तदेकत्वज्ञानेननिवर्तते यथाच दिशिप्राच्यादौअ न्यदिक्त्वभ्रमः सोऽपितत्त्वज्ञानान्निवर्तते । एवंभ्रमतःपुरुषस्य दिक्षुभ्रमणाद्भ्रमोनिकटवर्तिवृक्षादौच भ्रमणभ्रमस्तत्स्थैर्यज्ञानेन निवर्तते तद्वत् ॥ ५७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशज्ञानेमदाराधनमेवोपायइत्याह । यावदिति । अखिलं जगन्मदात्मकंमदधिष्ठानकंमाद्विवर्तभूतंयावन्नपश्येत्तावन्मत्प्राप्तयेश्रद्धालुः भगवदाराधनमेवज्ञानप्रापकमित्यत्र दृढविश्वासवान् अतिशयेनोर्जिताद्वृद्धिमतीभक्तिर्मयिभगवतिपूज्यताबुद्धिरूपालक्षणं चिह्नंयस्यसः ।

यावन्नपश्येदखिलं मदात्मकं तावन्मदाराधनतत्परो भवेत् ॥
श्रद्धालुरत्यूर्जित भक्तिलक्षणो यस्तस्य दृश्यो ऽहमहर्निशं हृदि ॥ ५८ ॥

तावन्मदाराधननिष्ठोभवेत् एवंहितस्यहृदि अहमहर्निशंदृश्योभवा मियेयथामांप्रपद्यन्ते तांस्तथैवभजाम्यहमितिस्मृतेः ॥ ५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वोक्तवचनजातस्य श्रुतिसमत्वं कथमेतदालोचनमपिमदाराधनप्रतिबन्धकदुरितध्वंसोपायइत्याह रहस्यमिति । श्रुतिसारसङ्ग्रहत्वेनाति

रहस्यमेतच्छ्रुतिसारसङ्ग्रहं मया विनिश्चित्य तवोदितं प्रिय ॥
यस्त्वेतदालोचयतीहबुद्धिमान् स मुच्यते पातकराशिभिः
क्षणात् ॥ ५९ ॥

गोपनीयता अप्रमाणशङ्काकलङ्कराहित्यंसूचितम् । आलोचयतिसम्यग्विचारयति ॥ ५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथ भगवानुक्तमेवार्थसंक्षेपेण दार्ढ्यायपुनराह भ्रातरिति । यदीतियादित्यर्थे । यदीदंजगत् परिदृश्यते तत्सर्वंमायैवेतिज्ञात्वेति शेषः चेतसासर्वंपरिहृत्यतत्रौदासीन्यंकृत्वामद्भावनयामदैक्यभावनया भावितंशुद्धंमानसंयस्यतादृशास्तिष्ठ । इत्युपदिश्याशिषंप्राह निरामयः

भ्रातर्यदीदं परिदृश्यते जगन्मायैव सर्वं परिहृत्य चेतसा॥मद्भा वनाभावितशुद्धमानसः सुखी भवाऽऽनन्दमयो निरामयः ६०

सन्सुखीभव । सर्वदुःखनिवृत्त्येतिभावः । ततोऽन्तरङ्गामन्यामाशिषमाह आनन्दमयोभवेति तद्रूपोभवेत्यर्थः । यद्यपिपूर्वमानन्दरूपत्वमस्त्येवतथाऽपितत्प्राप्तिर्विस्मृतकंठस्थभूषणप्राप्तिवत ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu
CC-0. In Public Domain. Digitization by eGangotri

CC-0. In Public Domain. Digitization by eGangotri

॥ ३१ ॥ एवंरीत्यास्वोपासकस्यलोकपावनत्वमाह। यइति । कदावा यदाकदाचिदित्यर्थः । हृदानिर्मलेनान्तःकरणेन यो मामगुणं प्राकृतसत्त्व रजस्तमोरूपगुणरहितम् । सच्चिदानन्दरूपत्वात् । अतएवगुणादव्याकृतात्परंमायातीतम् । यदिवायद्वत्त्वर्थे । गुणात्मकं सर्वज्ञत्वादिलोकोत्तरलावण्यादिगुणवानात्मामूर्तिर्यस्यतं दृश्यमानं रूपं सेवते । सद्विविधोऽप्युपासकः अहं मत्स्वरूपएव । मामकइत्यर्थोवा । प्रि-

य: सेवते मामगुणं गुणात्परंहृदा कदा वा यदि वा गुणात्मकम्
॥ सोऽहंस्वपादाञ्चितरेणुभिः स्पृशन्पुनाति लोकत्रितयं यथा
रविः ॥ ६१ ॥

योऽहिज्ञानिनोऽत्यर्थमहंसचममप्रिय इत्युक्तेः । तादृशोभक्तःस्वपादलग्नरेणुभिःसंस्पृशन्लोकत्रयमपि पुनाति । अज्ञानध्वान्तनिरसनेनपवित्रीकरोति । यथारविःस्वकरैर्जगद्वितिमिरीकरोति तद्वत् ॥ ६१ ॥ ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानीमेतद्ग्रन्थार्थालोचनासमर्थस्यपाठमात्रतोऽपिमहत्फलमाह । विज्ञानंविज्ञानजनकं करणव्युत्पत्त्येतिबोध्यम् । वेदान्तैरुपनिषद्वाक्यै र्वेद्यंचरणंजगज्जन्मादिलक्षणंकर्मयस्यतेन ननुपाठमात्रादेतादृशमहत्फलप्राप्तिःकथमित्याशङ्क्यभवत्येवेति सूचयंस्तत्रहेतुमाह । मद्वचने

विज्ञानमेतदखिलंश्रुतिसारमेकं वेदान्तवेद्यचरणेनमयैवगीतम् ।
यःश्रद्धया परिपठेद्गुरुभक्तियुक्तो मद्रूपमेति यदि मद्वचनेषुभक्तिः
॥ ६२ ॥ इतिश्री अध्यात्मरामायणे रामगीता समाप्ता ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसम्वादे उत्तरकाण्डे श्रीरामगीतायां पञ्चमःसर्गः ॥ ५ ॥

षुभक्तिर्विश्वासोयदीतिअर्थाद्गुरुवाक्यविश्वासस्यैव फलदायकत्वादितिभावः ॥६२॥ इत्यध्यात्मरामायणेउमामहेश्वरसम्वादे उत्तरकाण्डे सेतौपञ्चमःसर्गः ॥ ६२ ॥ श्रीरामचन्द्रार्पणमस्तु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीराममन्त्रःखलु तारकाख्यः संसारसन्तारणसुप्रसिद्धः ॥ भक्-
त्याऽप्यभक्त्या समुपासितोयः श्रेयांसि सर्वाणि ददात्यवश्य
म् ॥ १ ॥ तन्तारकंसम्प्रतिपादयन्ती श्रीरामगीता सकलैः सुसे
व्या ॥ विज्ञप्तिमित्थंजनको विनीतः समर्पयत्यार्यजनेषुहर्षात् २

॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प,	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति
स्यर्द्धि	स्पर्द्धि	१	२	१	शाधि	शाधि	३	२	६	नाशे	नाशो	६	१	१
जीव्य	जीन्य	१	२	३	व्यत्र	व्यव	४	१	१	नन्वितिश	नन्वितिशे	६	२	१
सम्बीन्धनीः	सम्बन्धिनीः	२	२	१	ष्टामे	ष्टानमे	४	२	३	त्रिदा	विदा	६	२	२
व्रह्म	ब्रह्म	२	१	२	व्रह्म	ब्रह्म	४	२	१	मेत्रे	मेव	६	२	२
व्रह्म	ब्रह्म	२	१	६	वलेन	बलेन	४	२	७	व्येतीत	व्यतेति	७	१	१
वोधोऽसि	बोधोऽसि	३	१	४	निघृत्ते	निवृत्ते	५	१	१	वीरहा	वीरहा	७	१	१
संवन्ध	सम्बन्ध	३	१	७	कत्व	कत्वा	५	१	१	सद्दष्ट	सद्दृष्ट	८	१	३
भवस्यंससार	भवस्यसंसार	३	२	१	नक	नैक	५	१	१	त्रिशुद्धं	विशुद्ध	८	२	१
न्सार	सार	३	२	२	बेदान्त	वेदान्त	५	१	१	कारांतः	कारान्तः	८	२	२
पर्वग	पवर्ग	३	२	२	पूर्व	पूर्वं	५	१	२	वृत्ति	वृत्ति	९	१	१
वारिधि	वारिधि	३	२	२	वुद्ध्या	बुद्ध्या	५	१	६	स्वत्राना	स्वना	९	२	१
					एवं	एव	५	१	६	बृत्यु	वृत्यु	१०	१	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
रीप	रपि	११	२	१
नर्दष्टा	नर्दष्टा	१२	१	४
वर्द्धे	वर्द्धे	१२	१	७
त्याभिः	त्माभिः	१२	२	६
शुद्द	शुद्ध	१३	१	१
जीवया	जीवयो	१३	१	२
निर्वाध	निर्बाध	१४	१	१०
गव्र	भव्र	१९	१	४
अर्जोद्र	अर्जोऽद्द	१६	२	६
द्वत्	द्वात्	१७	२	१

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
ल्लाभ	ल्लाभे	१८	१	८
इतिः	इति	१८	२	२
ज्ञानन	ज्ञानेन	१९	१	१
वुद्दया	वुद्धया	२०	१	९
रागादि	रागादे	२१	१	३
विलय	विलय	२१	१	७
धम	धर्म	२१	२	१
म्वस्य	म्वंयस्य	२१	२	२
वुधै	बुधै	२३	१	५
एव	एवं	२३	२	१
द्रष्ट	द्रष्टृ	२४	१	२

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
विभाव्यत	विभाव्यते	२५	१	४ मू
लिङ्गेद	लिङ्गदे	२६	१	२
वोधकः	वोधतः	२५	१	६
विज्ञानं ब्रह्म	विज्ञानंनिादि ध्यासनं ब्रह्म	२६	२ ६	३
भेदेरा	भेदरा	२७	१	६
रुपा	रूपाः	२७	२	१
आतम	अतमा	२७	२	१
मुनिति	मुनिास्ति	२८	१	२
भव	भवं	२८	२	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
तदकत्व	तदेकत्व	२६	२	७	वतथाऽ	वतथाऽ	३१	१	६	मद्वचने	मद्वचने	३२	१	२
भ्रमण	भ्रमणं	२६	२	८	कंठ	कण्ठ	३१	१	२	तन्तारकं	तत्तारकं	३२	२	३

नेपाल पाशुपत, यन्त्रालये मुद्रिता.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इती रामगीता सटीका समाप्ता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

द.नं.१६६४३

अथ रामगीता सटीका प्रारभ्यते ॥

मू० २।-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशायनमः ॥ रामंरत्नकिरीटकुण्डलयुतं केयूरहारान्वितं
सीतालङ्कृतवामभागममलं सिंहासनस्थं विभुम् ॥ सुग्रीवादि
कपीश्वरैःसुरवरैः संसेव्यमानं सदा विश्वामित्रपराशरादिमुनि-
भिः संस्तूयमानं भजे ॥ १ ॥ इतिध्यात्वा ॥ श्रीमहादेवउवाच॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशाय नमः ॥ ध्यायेत्वाजानुबाहुं धृतशरधनुपं बद्धपद्मासनस्थं पीतंवासोवसानं नवकमलदलस्पर्द्धिनेत्रं प्रसन्नम् ॥ वामाङ्कारूढ सीतामुखकमलमिलल्लोचनं नीरदाभं नाना लङ्कारदीप्तं दधतमुरुजटामण्डलं रामचन्द्रम् ॥ १ ॥ ततइति जगतां यानि मङ्गलानि आनन्दास्तेषामुपजीव्यभूतं मङ्गलं ब्रह्मानन्दः सएवात्मास्वरूपं तेन तस्यैवानन्दस्यान्यानि भूतानिमात्रामुपजीवन्तीति श्रुतेः मङ्ग

ततोजगन्मङ्गलमङ्गलात्मना विधाय रामायणकीर्तिमुत्तमाम् ॥
चचार पूर्वाचरितं रघूत्तमो राजर्षिवर्य्यैरभिसेवितं यथा ॥ १ ॥

लानाञ्चमङ्गलमिति स्मृतेश्च किंच जगतां मङ्गलं कल्याणं यस्मात्तादृशकल्याणरूपआत्मामूर्तिस्तया उत्तमांश्रोत्रादीनां मोक्षदत्वेना त्युत्तमां रामायणकीर्तिं वाल्मीक्यादि कृत नानाविध रामायण प्रवर्तिकां रावणवधादिजां कीर्तिंविधाय स्थितोरघूत्तमः ततः सीताप रित्यागानन्तरं पूर्वैः स्ववंशजैराचरितं प्रजापालनसत्कथाश्रवणादिकं केवलंतत्पूर्वजैरेवाचरितमितिन किंत्वन्यैरपि राजर्षिश्रेष्ठैर्य थाऽभिसेवितं तथाचचार कृतवान् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उदारागुरुदेवविश्वासलक्षणमहागुणवती यद्वा उदारा दानशीलाबुद्धिर्यस्य तेन पुरातनीः प्राचीनराजसम्बन्धिनीः शुभाः धर्माधर्मनिर्णेत्रीः प्रमत्तस्य स्वगोमण्डलमिश्रितब्राह्मणगोदानात् प्रमत्तस्य नृगस्य राज्ञो द्विजस्य शापात्तिर्यक्त्वमाह तेनाज्ञातकृतब्रह्मस्वापहारेण परमधा

सौमित्रिणापृष्ट उदारबुद्धिना रामःकथाःप्राह पुरातनीःशुभाः ॥
राज्ञः प्रमत्तस्य नृगस्य शापतो द्विजस्य तिर्यक्त्वमथाह राघवः
॥ २ ॥

र्मिकस्यापीदृस्यवस्थेति सर्वथाब्रह्मस्वविमुखताधर्मइतिसूचितम् ॥ १ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एकान्तेविजने उपस्थितंप्राप्तम् विनयान्वितः सन् भक्त्यागुरुरयमिति बुद्ध्या प्रणम्य अनेनगुरूपसदनप्रकारउक्तः आसादितंशुद्धंभाव

कदाचिदेकान्त उपस्थितंप्रभुं रामं रमालालितपादपङ्कजम् ॥
सौमित्रिरासादितशुद्धभावनः प्रणम्यभक्त्याविनयान्वितोऽब्र-
वीत् ॥ ३ ॥

नं भावनाकरणमन्तः करणंयेनसः शुद्धान्तःकरणइतियावत् भगवदुक्तसत्कथाश्रवणेन शुद्धान्तःकरणइत्यर्थः ॥ ३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हे महामते महतीसर्वविषयामतिर्यस्य तस्य संबोधनं त्वं शुद्धबोधोऽसि अनवच्छिन्नचैतन्यरूपोऽसि सर्वदेहिनामात्माऽसि जीवानांतत्प्रतिबिम्बत्वात्अधीशोऽसि अन्तर्यामित्वान्नियन्ताऽसि वास्तवभेदाभावाच्च सर्वात्मत्वम् औपाधिकभेदाच्च नियन्तृनियम्यभावोबोध्यः निराकृतिः अस्मदादिवत्स्वार्जितकर्माधीनशरीराकृतिरहितः नन्वेवंसर्वैः कथमेवंनज्ञायतेऽतआह ज्ञानदृशां स्वयमेवप्रतीयसे ज्ञायतेऽ

त्वं शुद्धबोधोऽसि हि सर्वदेहिनामात्माऽस्यधीशोऽसि निराकृतिःस्वयम् ॥ प्रतीयसे ज्ञानदृशां महामते पादाब्जभृङ्गाहितसङ्गसाङ्गिनाम् ॥ ४ ॥

नेनेतिज्ञानं वेदान्तवाक्यजातं तदेवदृक्दर्शनसाधनंयेषां तेषामितिसंबन्धसामान्येषष्ठी तैरित्यर्थः तादृशदृक्लाभश्च त्वद्भक्त्यधीनइत्याह पादेति त्वच्चरणकमलयोर्भृङ्गवदाहितःकृतः सङ्गोयेन तादृशान्तःकरणसङ्गवतां त्वच्चरणकमल सङ्लग्नान्तःकरणवतामित्यर्थः ॥ ४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ प्रार्थयते अहमिति भवश्चसंसारस्यापवर्गो निवृत्तिर्यस्मात्तादृशंतवपादाम्बुजंप्रपन्नोऽस्मिशरणंप्राप्तोऽस्मि योगिभावितं योगीभिः संसारमुक्त्यै भावितम् अनेनतस्य भवापवर्गत्वे सदाचारः प्रमाणमुक्तम् प्रार्थनीयमाह अपारवारिधिरूपंयदज्ञानंसंसारमूलकारणं यथासुखम

अहं प्रपन्नोऽस्मि पदाम्बुजं प्रभो भवापवर्गं तव योगिभावितम् ॥ यथाञ्जसाऽज्ञानमपारवारिधिं सुखं तरिष्यामि तथाऽनुशाधि माम् ॥ ५ ॥

क्लेशेन तरिष्यामि तथा मामनुशाधिशिक्षय अपारवारिधिमित्यनेनसपारप्रसिद्धसमुद्राद्व्यतिरेकउक्तः अशक्यतरणताऽनेनध्वनिता ॥ ५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथोत्तरमवतारयति श्रुत्वेति रामः सौमित्रिवचः श्रुत्वा अथशब्दोवाक्यालङ्कारे तदा श्रवणाव्यवहितकाले एवप्रपन्नानां भक्तानामार्ति संसारदुःखहरतितादृशः प्रपन्नाश्रमादिहीना भक्तानुग्रहपरा च धीर्यस्यसः क्षितिपालानां राज्ञां भूषणभुतोज्ञानरूपतमसउपशान्तये त

श्रुत्वाथ सौमित्रिवचोऽखिलं तदाप्राह प्रपन्नार्तिहरःप्रसन्नधीः ॥
विज्ञानमज्ञानतमोपशान्तये श्रुतिप्रपन्नं क्षितिपालभूषणः॥ ६ ॥

दर्थम् सन्धिरार्षः श्रुतिभिः तमेवविदित्वाऽतिमृत्युमेतीत्यादिश्रुतिभिः प्रपन्नं तत्फलकत्वेन बोधितं विज्ञानमात्मतत्वज्ञानामिति सामान्य तः प्रथमंप्राह ॥ ६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथताहृशज्ञानप्राप्तये क्रमेणबहिरङ्गान्तरङ्गसाधनान्याह आदाविति स्ववर्णाश्रमेषु शास्त्रेण वर्णिता याः क्रियानित्यनैमित्तकयज्ञदानादिरूपास्ताः कृत्वा समासादितशुद्धमानसः प्राप्तान्तःकरणशुद्धिः तत्पूर्वमुपात्तसाधनः तदनुष्ठानपूर्वकमेवउपात्तानिसाधनानि शमदमादीनियेन ताहृशः अनेनकर्मणां बहिरङ्गत्वं शमादीनामन्तरङ्गत्वं स्फुटमेवोक्तम् किंच शमदमवैराग्यदार्ढ्यपर्यन्तं कर्मानुष्ठामेवेति

आदौ स्ववर्णाश्रमवर्णिताः क्रियाः कृत्वा समासादितशुद्धमानसः
समाप्य तत्पूर्वमुपात्तसाधनः समाश्रयेत्सद्गुरुमात्मलब्धये॥ ७ ॥

सूचितम् ततस्तत्कर्मानुष्ठानं समाप्य त्यक्त्वा संन्यस्येतियावत् आत्मलब्धये आत्मज्ञानाय तत्फलकाय तत्वमस्यादिवाक्यार्थविचाराय सद्गुरुंश्रोत्रियंब्रह्मनिष्ठमित्यादि लक्षणलक्षितं समाश्रयेत् सेवेत अनेनव्युत्पत्तिबलेन स्वयमेववाक्यार्थविचारः क्रियमाणो न फलायेति सूचितम् ॥ ७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

संसारस्यभ्रमिमच्चक्ररूपत्वात्तन्निवृत्तिश्चतत्कारणाज्ञाननिवृत्तिमूलकत्वदज्ञाननिवृत्तेश्चतत्त्वज्ञानकसाध्यत्वात्तत्त्वज्ञानस्यचवेदान्तविचारसाध्यत्वात्तदर्थंगुरुसमाश्रयणमित्याह क्रियेति भवःसंसारश्चक्रवद्विपरिवर्तमानईर्यते कथ्यते तदेवोपपादयति आदृताआदरपूर्वंपूर्वजन्मार्जिताक्रियाएनस्यशरीरोद्भवस्यजन्मनोहेतुः तत्रजन्मनिसुरागिणोविषयाभिलाषवतः तौ शास्त्रप्रसिद्धौ धर्मेतरौ धर्माधर्मौ प्रियाप्रियौसुखदुः

क्रियाशरीरोद्भवहेतुरादृताप्रियाप्रियौतौभवतःसुरागिणः ॥
धर्मेतरौतत्रपुनः शरीरकंपुनः क्रियाचक्रवदीर्यतेभवः ॥ ८ ॥

खजनकौभवतःकस्यचिदधर्मएवसुखत्वबुद्ध्याप्रवृत्तिः कस्यचिद्धर्मएवंकदाचिदित्यप्यूह्यम् एवंतत्रोत्पादितकर्मणापुनःशरीरंपुनःक्रियाइत्येवंचक्रवद्विपरिवृत्तिः । यथाचक्रेभ्राम्यमाणेऽधोभागः कदाचिदुपरिउपरितनश्चाधः पुनरुपरिपुनरधएवंजन्मक्रिययोर्जन्यजनकभावेनपरिवृत्तिरिति बोध्यम् ॥ ८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तस्यचाज्ञानमेवमूलमित्याह अज्ञानमेवेति अत्रविधौसंसारनिवृत्तिलक्षणेकर्तव्येऽर्थेतद्धानमेवमूलकारणत्वादज्ञानहानमेवविधीयते साध-
नत्वेनेतिशेषः ननुकर्मैवतन्नाशकमस्तुकिंज्ञानेनेत्याशङ्क्याह विद्यैवज्ञानमेवतन्नाशविधौमूलाज्ञाननाशनेपटीयसीसमर्थानकर्मसमर्थमितिशेषः

अज्ञानमेवास्यहिमूलकारणंतद्धानमेवात्रविधौविधीयते॥ विद्यै
वतन्नाशविधौपटीयसीनकर्मतज्जंसविरोधमीरितम् ॥९॥

यतस्तत्तज्जमज्ञानजम् आत्मस्वरूपाज्ञानजन्यदेहाद्यभिमानजन्यत्वात्कर्मणोज्ञानजन्यत्वंबोध्यम् ननुतज्जन्यस्यापितन्नाशकत्वंवृश्चिककर्क
व्यादौदृष्टमित्याशङ्क्यतज्जन्यत्वंवाननाशकत्वप्रयोजकंकिन्तुसविरोधत्वमेवेत्याह यतसविरोधंतदीरितंनाशकमुक्तमित्यर्थः ॥ ९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अतएवकर्मणानाज्ञानहानिरित्याह नाज्ञानेत्यादि यतःकर्मणाविरोधाभावान्नाज्ञाननाशेनापिरागनाशोवस्तुतः कर्मानुष्ठानात्पुनः सदोषंक्षयिफलत्वादिदोषविशिष्टंकर्मैवोद्भवेत्कर्मणश्चपुनःसंसारएवेतिनमुक्तिप्रत्याशा ततस्तस्माद्बुधोविवेकीज्ञानविचारवान् ज्ञायतेऽनेने·

नाज्ञानहानिर्नचरागसङ्क्षयोभवेत्ततः कर्मसदोषमुद्भवेत् ॥ ततः पुनः संसृतिरप्यवारितातस्माद्बुधोज्ञानविचारवान्भवेत् ॥ १० ॥

तिज्ञानंवेदान्तवाक्यंतद्विचारवान्भवेत ॥ १० ॥

CC-0. In Public Domain. Digitization by eGangotri

इदानींज्ञानस्यैवमोक्षहेतुत्वंवक्तुंज्ञानकर्मसमुच्चयवादंदूषणायानुवदतिसार्धेन नन्विति नन्वितिशङ्कायाम् यथाविद्यावेदमुखेनश्रुतिपुराण-
लक्षणेन ब्रह्मविदाप्नोतिपरम् इत्यादिनापुरुषार्थसाधनमुक्ता तथा उभाभ्यांमवपक्षाभ्यांयथाखेपक्षिणांगतिः तथैवज्ञानकर्मभ्यांप्राप्यते
ब्रह्मशाश्वतम् इत्यादिनाक्रियाऽपितत्साधनत्वेनोक्ता किंच क्रियाकर्तव्यत। तृतीयार्थेप्रथमा कर्तव्यतयाआवश्यकेकृत्यअवश्यकर्तव्यत-

ननुक्रियावेदमुखेनचोदितायथैवविद्यापुरुषार्थसाधनम् ॥ कर्त्तव्य
ताप्राणभृतःप्रचोदिताविद्यासहायत्वमुपैतिसापुनः ॥ ११ ॥

याप्रचोदितानित्यनैमित्तिकरूपा एवंचनदकरणेप्रत्यवायोत्पत्त्याज्ञानोत्पत्तिरेवनस्यात् तस्मात्सापुनर्विद्यायाःसहायत्वंप्राप्नोतिघटेजन-
नीयेयथादण्डचक्रादीनांपरस्परसहायता ॥ ११ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कर्तव्यतेतिमवाक्यमवेविरुणाति कर्मेति व्रीरहावाएपदेवानांयोऽग्निमुद्वासयतेयावज्जीवमग्निहोत्रंजुहोति इतिश्रुतिः तत्रासिद्धान्तीशङ्कते नान्वाति ध्रुवंस्थिरंकार्यमिदंपुरुषार्थमोक्षजनिकाविद्यायतः स्वतन्त्राविनाऽपिसहायेन स्वकार्यसंपादनेसमर्था यथातेजस्तिमिरनिवर्तन-

कर्माकृतौदोषमपिश्रुतिर्जगौतस्मात्सदाकार्यमिदंमुमुक्षुणा॥ननु स्वतन्त्राध्रुवकार्यकारिणीविद्यानकिञ्चिन्मनसाऽप्यपेक्षते ॥ १२

समर्थंमनसाऽपिकिञ्चित्सहायभूतंवस्तुनापेक्षते तथाफलेजननीयेसहायान्तरसंभावनाऽपिनेतिभावः अनेनविद्याफलजननेनिरपेक्षास्वतन्त्र-त्वात्तेजोवदित्यनुमानंसूचितम् ॥ १२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समुच्चयवादीपरिहराति नेति त्वदुक्तेनेत्यर्थः सत्यकार्यः अक्षय्यंहवैचातुर्मास्ययाजिनःसुकृतंभवति इत्यादिवेदनबोधितःस्थिरकार्योऽपि-
अध्वरः यथाऽन्यानपिकारकादिकान् आरादुपकारकप्रयाजाद्यङ्गानिदेशकालादीनिचप्रकाङ्क्षते तथाविद्यापिअग्निहोत्रंजुहोतिइत्यादिवि

नसत्यकार्योऽपिहियद्वदध्वरः प्रकाङ्क्षतेऽन्यानपिकारकादिकान्
तथैवविद्याविधितःप्रकाशितैर्विशिष्यते कर्मभिरेवमुक्तये ॥ १३ ॥

धिवाक्यतःतत्समूहेनप्रकाशितैः कर्मभिः सहितैवमुक्तयेविशिष्यतइत्यर्थः विद्याफलदानेकर्मापेक्षा अङ्गित्वात् प्रयाजाद्यङ्गापेक्षदर्शा
दिवादितिसत्प्रतिपक्षानुमानमनेनसूचितम् ॥ १३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तदनूद्यसिद्धान्तीदूषयति केचिदिति यत्केचिद्वितर्कवादिनइतिज्ञानकर्मणीसमुच्चित्यमुक्तिसाधनंवदन्तितदप्यसत् यथाकेवलंकर्म मोक्ष साधनमित्यमत्तथातन्मीलितमित्यप्यसत् तत्रहेतुर्दृष्टविरोधकारणात् दृष्टायोविरोधः सर्वलोकदृष्टविरोधरूपात्कारणात्तदसदित्यर्थः विरो

केचिद्वदन्तीतिवितर्कवादिनस्तदप्यसद्दृष्टविरोधकारणात् ॥
देहाभिमानादभिवर्धतेक्रियाविद्यागताहङ्कृतितःप्रसिद्ध्यति १४

धमेवाह देहाभिमानात्क्रियावर्धतेअनात्मनिदेहादावात्मत्वाभिमानात्क्रियावृद्धिः विद्यातुगताहङ्कृतितः गताहङ्कृतिर्यस्यतस्यनष्टाहङ्कृतेः प्रसिद्ध्यति सार्वविभक्तिकस्तासिः एवंचाहङ्कारसत्तामूलकत्वात्क्रियाज्ञानयोः समुच्चयोविरुद्धइत्यर्थः ॥ १४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथपूर्वपक्षयुक्तानुमानंदूषयनविद्यास्वरूपमाह विशुद्धंविज्ञानंयेभ्यस्तेषांवेदान्तवाक्यानांयाद्विशेषेणरोचनंरलयोरभेदादालोचनंविचार
स्तेनाञ्चिताप्रापितायाचरमाआत्मवृत्तिर्ब्रह्माकारांतःकरणवृत्तिः साविदंयंतिभण्यतोविद्वाद्भिरितिशेषः पुनःसमुच्चयवारणायविद्याकर्मणो
वैषम्यमाह कर्मयज्ञादिअखिलकारकादिभिःकर्तव्यकर्मादिभिरङ्गैश्चसहितंसदुदेति फलोन्मुखंभवति विद्यापुनरखिलकारकादीनिहन्ति

विशुद्धविज्ञानविरोचनाञ्चिताविद्याऽऽत्मवृत्तिश्चरमेतिभण्यते ॥
उदेतिकर्माखिलकारकादिभिर्निहन्ति विद्याऽखिल कारकादि-
कम् ॥ १५ ॥

तत्रकर्तृत्वादिबुद्धिंनिहन्ति सकलव्यापारपरित्यागेनब्रह्मणिसमाप्तिर्हिविद्या अतःस्वोत्पत्तौचित्तशुद्धिद्वाराकर्मसापेक्षास्वफलेजनयितव्यं-
तन्निरपेक्षैवान्यथाविद्यास्वरूपस्यैवभङ्गापत्तेरितिपूर्वपक्षयुक्तहेतोरसिद्धिरितिभावः ॥ १५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपसंहरन्मुमुक्षोर्वृत्तिप्रकारमाह तस्मादिति विद्याविरोधाद्विद्यायाःकर्मणासह विरोधेनसमुच्चयोनभवेत्तस्मात्सुधीर्मुमुक्षुरशेषतःकर्मत्यजे-
त् काम्यंतुसर्वथात्याज्यमेवनित्यनैमितिकमापियावाच्चित्तशुद्धिकर्तव्यमेव ततोऽपिब्रह्माणिचित्तस्थैर्यपर्यन्तं कर्तव्यमेव ततस्तदनुसन्धानप्र-

तस्मात्त्यजेत्कार्यमशेषतः सुधीर्विद्याविरोधान्नसमुच्चयोभवेत् ।
आत्मानुसन्धानपरायणःसदा निवृत्तसर्वेन्द्रियवृत्तिगोचरः १६

तिबन्धकत्वात्प्रयोजनाभावाच्चतदापित्याज्यमेवेतिभावः इदानींमुमुक्षुकर्तव्यमाह निवृत्ताःसर्वेषामिन्द्रियाणां गोचराविषयाःशब्दादयोय
स्मात्तादृशःसन् आत्मनःसच्चिदानन्दस्यानुसन्धानमेवपरमयनंप्राप्यंयस्यतथाविधोभवेत् अत्रेन्द्रियप्रत्याहारःकर्तव्यत्वेनोक्तस्तेनतत्पूर्वंप्रा-
णायामाद्यर्थादाक्षिप्तम् ॥ १६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रागिविरागिभेदेनकर्मणोकर्तव्यताकर्त्तव्यतेआहयावदिति माययाविद्ययाशरीरादिष्ववानात्मसुआत्मधीरहङ्कर्तेत्यादिरूपायावद्वर्ततेतावद्वि
धिवादकर्मणाम् विधिर्यजेतेत्यादिश्रुतिर्वादःकर्तव्यताबोधकोयेषांकर्मणांविधेयोवश्यवर्त्तितत्कर्मकर्ताभवेत तदपगमेतुतदाखिलं जगन्नेतीति

याबच्छरीरादिषुमाययात्मधीस्तावद्विधेयोविधिवादकर्मणाम् ॥
नेतीतिवाक्यैरखिलं निषिद्ध्य तज्ज्ञात्वापरात्मानमथत्यजेत्क्रि
याः ॥ १७ ॥

वाक्यैः अथातआदेशोनेतिनेतिइत्यादिवाक्यैर्निषिध्य मिथ्यात्वेननिर्णीयताद्विलक्षणतयासत्यत्वेनपरमात्मस्वरूपंज्ञात्वाक्रियास्त्यजेत्निरू
पितमेतत् ॥ १७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मविज्ञानेसत्यवश्यमविद्या निवर्ततइत्याह यदेति आत्मनिशुद्धेन्तःकरणेपरमात्मनईशस्यात्मनोजीवस्यचयोविभेदोमायान्तःकरण रूपोपाधिद्वयकृतोविभेदोभेदस्तस्यभेदकं नाशकंभास्वरंप्रकाशशीलं यद्विज्ञानमितरवृत्त्युपमर्दनपूर्वकंब्रह्माकाराऽखण्डाद्याकारवृत्तिर्यदाऽवभाति

यदापरात्मात्मविभेदभेदकंविज्ञानमात्मन्यवभाति भास्वरम् ॥
तदैवमायाप्रविलीयतेऽञ्जसासकारकाकारणमात्मसंसृतेः॥ १८॥

असंभावनादितिरस्कारेणोदेति तदैव सकारकाजन्मान्तरप्रापककर्मसहितामायातत्तज्जीवोपाधिभूताविद्याऽञ्जसाझटितिप्रविलीयतेनश्यति ननुतन्नाशेऽपिसंसारनाशःकथमतोमायाविशेषणम् आत्मसंसृतेःकारणंसंसारस्योपादानकारणमेवंचतन्नाशेकार्यनाशोभवत्येवेतिभावः १८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं पुनर्दार्ढ्यायाह श्रुतीति तत्त्वमसीत्यादिश्रुतिरूपैःप्रमाणैस्तज्जनितज्ञानेन नाशितासाविद्याकथमपिकार्यकारिणीभविष्यतीति
काकुरत्र सर्वथानेत्यर्थः असतःकार्यकारित्वासंभवादितिभावः पुनश्चतस्यानोद्भवइत्याह विज्ञानमात्रादिति अमलाशुद्धाद्द्वितीयतःद्विती

श्रुतिप्रमाणाभिविनाशिताचसाकथंभविष्यत्यपिकार्यकारिणी ॥
विज्ञानमात्रादमलाद्द्वितीयतस्तस्मादविद्यानपुनर्भविष्यति १९

यात्मविषयकाद्विज्ञानमात्रादितरासहकृतान्निदिध्यासनपरिपाकजज्ञानाद्यतोनष्टातस्मात्सापुनर्नभविष्यति रज्ज्वज्ञानमूलकस्य सर्पस्य र
ज्जुज्ञानेन निवृत्तस्ययथानपुनरुत्पत्तिरितिभावः ॥ १९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्यायाइतरनिरपेक्षायाएवमोक्षकारणत्वमुक्तंयुक्तिपूर्वकंपुनःकथयतिश्रोतृदार्ढ्याय । यदीति । यदिनष्टातत्त्वज्ञाननाशिता सा न पुनः प्रसूयतेनोत्पद्यतेतदाकारणाभावादहंमतिःकथंभवेत् । कथमपिनभवेदित्यर्थः । तदभावाच्चतत्कालेकर्माभावइतिस्वफलजननेसास्वतन्त्राइ

यदिस्मनष्टा नपुनःप्रसूयते कर्ताऽहमस्येति मतिः कथं भवेत् ॥
तस्मात्स्वतन्त्रा न किमप्यपेक्षते विद्या विमोक्षाय विभाति केवला ॥ २० ॥

तरनिरपेक्षैवनाकिमप्यपेक्षते द्वितीयस्यासंभवात् अतः केवलाऽसहायैवविमोक्षायविभातितत्फलिकाभवतीत्यर्थः ॥ २० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

॥ ११॥ अत्रार्थेश्रुतिरपिप्रमाणमित्याह सेति साप्रसिद्धा नकर्मणानप्रजयाधनेनत्यागेनैकेअमृतत्वमानशुः इत्यादिकातैत्तिरीयश्रुतिःप्रशस्तानामर्थ
वादैःप्राशस्त्येनबोधितानामपिकर्मणांन्यासंत्यागंसादरंस्फुटमाह नतुकर्मसमुच्चयमित्यर्थः तथावाजिनां वाजसनेयिनाम् एतावदरेखल्वमृत

सातैत्तिरीयश्रुतिराहसादरंन्यासंप्रशस्ताखिलकर्मणां स्फुटम् ॥
एतावदित्याहचवाजिनांश्रुतिर्ज्ञानंविमोक्षायनकर्मसाधनम् २१

त्वम् इत्यादिका ज्ञानंविमोक्षायसाधनं नकर्मेत्येतदाह ॥ २१ ॥ ॥ ११ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अहङ्कारत्यागरूपकारणवैषम्यात् क्रियाज्ञानयोर्वैषम्यमुक्त्वा फलमयुक्तमपिवैषम्यमाह विद्येति हेसमुच्चयवादिन् त्वयाक्रतुरग्निष्टोमादिर्विद्यासमत्वेनदर्शितः परन्तुसमोदृष्टान्तोनोदाहृतः अनेनक्रतुर्विद्यासमः श्रुतिबोधितकर्तव्यताकत्वादित्यनुमानन्निरस्तम् दृष्टान्ताभावात्व अन्वय्येवानुमानन्नव्यतिरेकीतिभावः एतच्चाकरेविस्तरेणप्रपञ्चितम् ननुविद्याकर्मणीसमे एकफलत्वाच्चक्रदण्डादिवदित्यनुमान-

विद्या समत्वेनतु दर्शितस्त्वया क्रतुर्नदृष्टान्त उदाहृतः समः ॥
फलैःपृथक्त्वाद्बहुकारकैः क्रतुःसंसाध्यतेज्ञानमतोविपर्ययम् २२

मितिचेत्तत्राह फलैः पृथक्त्वात् षष्ठ्यर्थेतृतीया फलानांभेदादित्यर्थः एवंचस्वरूपासिद्धोहेतुरितिभावः समानकारकत्वमपिहेतुर्नेत्याह क्रतुर्बहुभिः कारकैरहंममताभिमानरूपैरान्तरैर्वाह्यैश्चदेशकालादिनियमैश्चसाध्यते ज्ञानन्त्वतोविपर्ययवदतोनतयोः साम्यमितिभावः २२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नन्वकरणेप्रत्यवायभिया कर्मकार्यमितिचेन्नेत्याह सप्रत्यवायइति कर्मत्यागेनाहिनिश्चयेनाहंप्रत्यवायसहितोभविष्यामीत्येवंशुद्धात्मानि-
अनात्मधर्मस्यधीरप्रज्ञस्यतत्त्वज्ञानविकलस्यप्रसिद्धा नतुतत्त्वदर्शिनः तस्याहंबुद्धेरभावात् पापादेरनात्मधर्मतानिश्चयाच्च तस्माद्बुधैःकर्म

स प्रत्यवायोह्यहमित्यनात्मधीरज्ञप्रसिद्धा नतु तत्वदर्शिनः ॥ तस्माद्बुधैस्त्याज्यमपि क्रियात्मभिर्विधानतःकर्मविधि प्रकाशितम् ॥ २३ ॥

क्रियात्मभिः षष्ठ्यर्थेतृतीया क्रियाफलसक्तचित्तानां विधानतोविधानेनेतिकर्तव्यतयायुक्तंकर्म विधिभिरवश्यकर्तव्यतयाबोधितमपि-
त्याज्यमित्यर्थः ॥ २३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविरक्तस्यकार्यमाह। श्रद्धेति । गुरुशास्त्रयोर्विश्वासःश्रद्धातदन्वितोबुभुत्सुःशुद्धमानसोऽपि निष्कामकर्मानुष्ठानाच्छुद्धमानसश्चगुरोः प्रसादाल्लब्धतत्त्वमसीतिवाक्यतः श्रुतमात्मजीवयोरैकात्म्यंविज्ञाय मनननिदिध्यासनपरिपाकाभ्यांसाक्षात्कृत्य। चएवार्थः । साक्षा

श्रद्धान्वितस्तत्त्वमसीतिवाक्यतो गुरोःप्रसादादपिशुद्धमानसः॥
विज्ञायचैकात्म्यमथात्मजीवयोः सुखी भवेन्मेरुरिवाप्रकम्पनः
॥ २४ ॥

त्कृत्यैवसुखी भवेत्। सकलदुःखहीनोभवेदित्यर्थः। अप्रकम्पनःविषयाभिलाषाक्षोभितान्तःकरणः ॥ २४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

महावाक्यंविवरीतुंवाक्यार्थस्यपदार्थबोधपूर्वकत्वमाह । आदाविति । विधानतःक्रमप्रमादवगतिर्हिवेदवाक्यार्थविज्ञानस्यविधावुत्पत्तौआ दौप्रथमंमुख्यमितियावत्। पदार्थावगतिःकारणम्। हिप्रसिद्धं तस्यपदत्र्यंतत्त्वम्असीति। तत्रतत्पदार्थःपरमात्मासर्वज्ञत्वादिगुणः त्वं

आदौ पदार्थावगतिर्हिकारणं वाक्यार्थविज्ञानविधौ विधानतः ॥
तत्त्वंपदार्थौपरमात्मजीवकावसीतिचैकात्म्यमथानयोर्भवेत्
॥ २५ ॥

पदार्थोजीवःअनयोस्तत्त्वंपदार्थयोरैकात्म्यंतद्बोधकमसीतिपदम् ॥ २५ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुसर्वज्ञत्वादिगुणस्येशस्य किञ्चिज्ज्ञत्वधर्मवता जीवेनैकात्म्यं विरुद्धमित्याशङ्क्याह । प्रत्यगिति । अहंबुद्धिविषयत्वं प्रत्यक्त्वं जीवधर्मः परोक्षत्वमीशधर्मस्तदादिधर्मकृतमात्मनोः परमात्मजीवात्मनोर्विरोधं विहाय त्यक्त्वा तयोः संशोधिताम् युक्तिभिः सम्यग्विचारितां तत्त्वंपदाभ्यां शक्त्यभावेऽपि वक्ष्यमाणप्रकारया लक्षणया लक्षितां ज्ञाताञ्चिदात्मतां संगृह्य तत्त्वंपदोपास्थानविषयांकृत्वा स्वमात्मानं तथाज्ञात्वाऽथ एकात्मज्ञानानन्तरमद्वयो भवेत् । चित्स्वरूपतां प्राप्तइव भवेत् । पूर्वमपि तत्स्वरूपएवविस्मृतकण्ठचामीकरन्यायेन च तत्प्राप्ति तद्वत्युक्तम् ।

प्रत्यक्परोक्षादिविरोधमात्मनोर्विहायसंगृह्यतयोश्चिदात्मताम् ॥
संशोधितांलक्षणयाचलक्षितांज्ञात्वास्वमात्मानमथाद्वयोभवेत्
॥ २६ ॥

अयंभावः तत्त्वंपदयोर्द्वावर्थौ वाच्यो लक्ष्यश्च तत्र तत्पदस्य मायोपाधिः सर्वज्ञत्वादिविशिष्टो वाच्यः त्वंपदस्यापि किञ्चिज्ज्ञत्वादिविशिष्टो मायाकार्याविद्योपाधिरविद्यावदन्तःकरणोपाधिर्वाच्यः उभयोरपि विशेषणांशत्यागेन शुद्धश्चिदात्मा लक्ष्यः तत्र वाच्ययोर्विरुद्धधर्मकत्वादैक्यासंभवेऽपि लक्ष्ययोरैक्यं निर्बाधमेवेति ॥ २६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तलक्षणास्वरूपमाह । एकात्मकत्वादिति जहतीलक्षणाजहत्स्वार्थलक्षणायथागङ्गायांघोषइत्यत्रगङ्गापदार्थस्यप्रवाहस्यघोषाधारता
नुपपत्त्यासर्वथातत्परित्यागेनतीररूपार्थलक्षणा साप्रकृते न एकात्मत्वात् । विशेष्यांशस्यैकत्वात्सर्वथास्वार्थत्यागाभावात् । तथाज
हल्लक्षणताजहत्स्वार्थलक्षणावत्त्वमपिअत्रनसंभवति । यथाकाकेभ्योदधिरक्ष्यतामित्यादौकाकपदस्यस्वार्थात्यागेनैवदध्युपघातकेलक्षणा
सापिन । विरोधतःविशेषणत्यागेनसर्वथास्वार्थत्यागाभावात् । अतोभागलक्षणाजहदजहल्लक्षणायुज्यते । अदोषतःपूर्वोक्तदोषाभावात्

एकात्मकत्वाज्जहती न सम्भवेत्तथाऽजहल्लक्षणता विरोधतः॥
सोऽयंपदार्थाविवभागलक्षणायुज्येततत्त्वंपदयोरदोषतः॥२७॥

विशेष्यांशस्यात्यागाद्विशेषणांशस्यत्यागाच्च । तत्रदृष्टान्तः । सोऽयंपदार्थाविव । यथासोऽयंदेवदत्तइत्यत्रतद्देशादिविशिष्टोऽतीतानुभव
विषयोवातत्पदार्थः एतद्देशादिविशिष्टोऽनुभूयमानोवेदंशब्दार्थः । तयोश्चाविरुद्धविशेषणकत्वादैक्यासंभवेनदेशादिरूपविशेषणत्यागेना
नुभवगतानीतत्वादिविशेषणत्यागेनवालक्षणयैक्यंतद्वदितिभावः ॥ २७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथत्याज्यत्वायजीवोपाधिमाह । रसादीति । रसापृथ्वीआदिर्येषांतानिपञ्चीकृतानियानिभूतानितेभ्यःसंभवोयस्यनत् । पञ्चीकरणंचे त्थम् एकैकंभूतंद्विधाविभज्यतत्रैकंभागंचतुर्धाविभज्यतेषांभागानांस्वेतरभूतचतुष्टयार्धभागचतुष्टयेसंयोजनेएकैकंभूतंपञ्चात्मकंभवतिभा

रसादिपञ्चीकृतभूतसंभवंभोगालयंदुःखसुखादिकर्मणाम् ॥ शरीरमाद्यन्तवदादिकर्मजंमायामयंस्थूलमुपाधिमात्मनः ॥ २८ ॥

गाधिक्याच्चप्रातिस्विकतयाभूगादिव्यवहारोऽपि । सुखदुःखयोरादीनियानिकर्माणितेषांभोगस्तत्कर्मजसुखदुःखानुभवस्तस्यालयमाश्रयभूतमाद्यन्तवत्उत्पत्तिनाशयोगि आदिकर्मजंप्राग्भवीयकर्मजन्यंमायामयंपरम्परयामायाविकारः तद्विकारभूतविकारत्वात् । एतच्छरीरमात्मनःस्थूलमुपाधिंवदन्तीतिशेषः ॥ २८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथसूक्ष्मोपाधिमाह। सूक्ष्ममिति । बुधाःअन्यत्स्थूलशरीरविलक्षणंशरीरंलिङ्गदेहाख्यमात्मनउपाधिंविदुः । तत्स्वरूपमाह। सूक्ष्मंचक्षु-
राद्यविषयः मनोबुद्धिदशेन्द्रियैःप्राणैश्चयुतम् सङ्कल्पात्मकंमनः निश्चयात्मिकाबुद्धिः घ्राणरसनाचक्षुस्त्वक्श्रोत्रेतिपञ्चज्ञानेन्द्रियाणि वा-

सूक्ष्मंमनोबुद्धिदशेन्द्रियैर्युतंप्राणैरपञ्चीकृतभूतसंभवम् ॥ भोक्तुः सुखादेरनुसाधनंभवेच्छरीरमन्यद्विदुरात्मनोबुधाः ॥ २९ ॥

क्पाणिपादपायूपस्थानिकर्मेन्द्रियाणि प्राणापानव्यानोदानसमानाश्चप्राणास्तैर्युतमेतत्सप्तदशसमुदायात्मकम्। तदाधारभूतान्याह ।अप
ञ्चीकृतभूतसंभवंतेभ्यउत्पन्नमतएवादृश्यम्।तथाभोक्तुःसुखादेःसुखदुःखाद्यनुभवस्यानुसाधनम् स्थूलशरीरस्यतदनुगतस्यैवभोगसाधनत्व
मितिभावः । एताद्धियोगेनैवमरणव्यवहारइतिबोध्यम् ॥ २९ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतिजीवोपाधिद्वयमुक्त्वाईशोपाधिमाह । अनादीति । अनादि उत्पत्तिहीनम् । नानाविधपरिणामशालितयापरिणामरूपेणनश्वरामिति अनादित्वमात्रेोक्त्यासूचितम् । अनिर्वाच्यम् सत्त्वासत्त्वाभ्यांनिर्वक्तुमशक्यम् कारणंसकलप्रपञ्चस्यजनकम् ईदृशीमायातुब्रह्मणःपरमी-

अनाद्यनिर्वाच्यमपीहकारणं मायाप्रधानंतुपरंशरीरकम् ॥ उपाधिभेदान्तुयतःपृथक्स्थितं स्वात्मानमात्मन्यवधारयेत्क्रमात् ॥ ३० ॥

श्वरव्यवहारसंपादकत्वादुत्कृष्टंप्रधानंशरीरकम् । स्वार्थेकः । एवमुपाधिभेदादेकमेवचैतन्यंयतः पृथक्स्थितंजीवईशइतिभेदबुद्धिविषय मतोलक्षणयोपाधिपरित्यागेनस्वात्मानमात्मनिअवधारयेदभेदेनजानीयात् । क्रमाच्छ्रवणमनननिदिध्यासनक्रमेणेत्यर्थः ॥ ३० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथवाक्यार्थविचारफलमाह । कोशेष्विति । आनन्दमयस्य ब्रह्मत्वेअन्नमयप्राणमयमनोमयविज्ञानमयेषुचतुर्षुकोशेषुतत्तत्सङ्गात्तत्तदाकृतिर्विभाति यथाजपादिसङ्गात्स्फटिकोऽनेकाकृतिर्भाति । आनन्दमयस्यापि जीवत्ववादिनातुतेनसहपञ्चसु कोशेष्वितिबोध्यम् । अस्मि-

कोशेषुपञ्चस्वपितत्तदाकृतिर्विभातिसङ्गात्स्फटिकोपलोयथा ॥
असङ्गरूपोऽयमजोयतोऽद्वयोविज्ञायतेऽस्मिन्परितोविचारि-
ते ॥ ३१ ॥

न्महावाक्येपरितोविचारितेसम्यग्विचारितेसत्ययमात्माऽसङ्गरूपःअन्नमयादिभिःसङ्गरहितः । असङ्गोनहिसज्जते । इतिश्रुतेः । अजोऽद्वयश्चविज्ञायते । स्थूलोऽहमित्यादिस्त्वज्ञस्यतत्तत्कोशप्रसङ्गात्प्रतीतिःस्फटिकवत् तत्त्वज्ञस्यतुनतथाप्रतीतिरितिभावः । एवंचतत्तदुपाधिकृततत्तद्रूपताप्रतीतिनिरासएव विचारफलमितिभावः ॥ ३१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जाग्रदाद्यवस्थाऽपि बुद्धेर्धर्मोनात्मधर्मइत्याह । बुद्धेरिति । इहआत्मनिस्वप्नादिभेदेन जाग्रत्स्वप्नसुषुप्तिभेदेन यात्रिधावृत्तिर्दृश्यतेसाऽपि गुणत्रयात्मनः सत्त्वरजस्तमोरूपगुणत्रयस्वरूपाया बुद्धेर्धर्मः । उक्तावस्थात्रयस्योक्तमूलकत्वात् । एतदवस्थात्रयस्यास्मिन्नवस्थात्रय-साक्षिणि आत्मनि भानं मृषा बुद्ध्यध्यास निबन्धनं न तु वास्तव मित्यर्थः । अन्योऽन्यतोव्यभिचारतस्तस्यावस्था त्रयस्यस्व रूपतो

बुद्धेस्त्रिधा वृत्तिरपीह दृश्यते स्वप्नादि भेदेन गुणत्रयात्मनः ॥ अन्योऽन्यतोऽस्मिन्व्यभिचारतोमृषा नित्ये परे ब्रह्मणि केवले शिवे ॥ ३२ ॥

मृषात्वात्तज्ज्ञानस्य मृषात्वमेव । स्वप्नकाले जाग्रत्सुषुप्त्योरभावात् । जाग्रतिइतरद्वयस्याभावात् सुषुप्तावितरयोरभावात्परस्परं व्यभिचारोबोध्यः आत्मनस्तद्रनाश्रयत्वं विशेषणैराह । नित्येउत्पत्तिनाशशून्येपरेगुणत्रयातीते ब्रह्मणिव्यापकेकेवलेऽसङ्गेशिवआनन्दरूपे एवंभूतेसदेकरसेपरस्परव्यभिचारधर्माभानमसंभवीति भावः ॥ ३२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

अथसाऽन्यत्वायसंसारमूलभूतांवृत्तिमाह । देहेति । एषांसङ्घातइतरेतराध्यासविषयात् अजस्रंयावाद्धियो बुद्धेर्वृत्तिस्तमोमूलतयाऽज्ञ
रा. गी. लक्षणाऽज्ञत्वज्ञापिका यावत्परिवर्तते तावद्भवोद्भवःसंसारोद्भवोभवेत् । तमःपदंरजसोऽप्युपलक्षणम् । रजस्तमःप्रधानाबुद्धिः संसारहेतु स.

॥ १७ ॥

देहेन्द्रियप्राण मनश्चिदात्मनां सङ्घादजस्रं परिवर्तते धियः ॥
वृत्तिस्तमोमूलतयाऽज्ञलक्षणा यावद्भवेत्तावदसौ भवोद्भवः॥३३॥

॥ १७ ॥

त्वात्सर्वथासाऽन्येति भावः ॥ ३३ ॥

CC-0. In Public Domain. Digitization by eGangotri
Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कृत महावाक्यविचारस्य कर्तव्यमाह । नेतीति । अथात आदेशोनेतिनेति इति प्रमाणेननिराकृतं मिथ्यात्वेनगृहीतमखिलंजगत्येनसः ततोहृदामस्त्वप्रधानेनमनसासम्यगास्वादितं चिल्लक्षणंघनामृतंदुःखासंभिन्नंसुखंयेनसः । स्वर्गादितुपरिणामदुःखत्वात्तत्संभिन्नमेव । एवंभूतोऽशेषंजगद्देहेन्द्रियादिदृश्यसमूहंत्यजेत् हानोपादानबुद्धिविषयंनकुर्यात् । किन्तूदासीनस्तत्रभवेत् । ननुदेहेन्द्रियादिभिरेवतज्ज्ञान

नेतिप्रमाणेन निराकृताखिलो हृदासमास्वादितचिद्घनामृतः ॥ त्यजेदशेषं जगदात्तसद्रसं पीत्वा यथाऽम्भः प्रजहाति तत्फलम् ॥ ३४ ॥

लाभात्कथमुपजीव्यस्यत्यागइत्याशङ्क्यदृष्टान्तदर्शनेनपरिहरति । यथातृषावानआत्तः सद्रसोमाधुर्ययेनतादृशं नारिकेलनारङ्गादि फलान्तर्वर्त्यम्भःपीत्वा तत्स्थानभूतंतत्फलं जहाति तत्रोदासीनोभवति तद्वत्सर्वदृश्यसारांशोब्रह्मतल्लाभसतिनिः सारंदृश्यंनोपादेयंनापिहेयमितिभावः । यतोभयादिसंभावनातद्धेयमित्युच्यते ॥ ३४ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इतरस्यानित्यत्वेनतत्रवैराग्यार्थमात्मनएवनित्यत्वमाह । कदाचिदिति । कदापीत्यर्थः । अनवः उत्पत्त्यनन्तरंविद्यमानोहिनवः । तेन
जन्मानन्तरास्तित्वंव्यावर्तितं नवत्वाभावेनैवजीर्णत्वाभावादवस्थान्तरापत्तिरूप परिणामोऽपिनिरस्तः ।अनेनअस्तिजायतेवर्द्धतेविपरिणम
तेऽपक्षीयते नश्यतीति षड्भाव विकार राहित्यमुक्तम् । एवंचैतद्भिन्नं सर्वमुक्तषड्भावविकारवत्त्वादनित्यमिति ततोविरज्येतेतिबोधित-

कदाचिदात्मा न मृतो न जायते न क्षीयते नापि विवर्धतेऽनवः ॥
निरस्तसर्वातिशयः सुखात्मकः स्वयम्प्रभः सर्वगतोऽयमद्वयः ३५

म् । यतऽईदृशोऽतएवनिरस्तः सर्वस्यदेहेन्द्रियादेरतिशयोमहत्त्वं येनस्वलाभात्सः यल्लाभान्नापरोलाभइतिःश्रुतेः यतःसुखात्मकः आनन्द
स्वरूपः स्वयम्प्रभःस्वप्रकाशकश्च देहेन्द्रियादिस्तुदुःखस्वरूपः परप्रकाश्यश्च । यस्यभासासर्वमिदंविभाति । इतिश्रुतेः । सर्वगतोव्यापकः
अयमहंबुद्धिविषयःप्रत्यगात्माऽपिअद्वयः उक्ताद्वयब्रह्मस्वरूपएव । नततोऽतिरिक्तइतिभावः । अयमात्माब्रह्म । इतिश्रुतेः ॥ ॥ ३५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ननुएवंविधेविकारशून्येआत्मनिजन्ममरणादिप्रवाहरूपसंसारभानंकथमितिशङ्कते। एवंविधेइति।दुःखमयःदुःखप्रचुरः।उत्तरयति। अज्ञानतइ तिअज्ञानमूलकोयोध्यासोदेहान्तः करणादौअहंममेत्यध्यासस्तद्वशात्। एवंचभ्रान्तिरूपातत्प्रतीतिरितिभावः। नन्वेवंकथंतस्यसंसारस्यनि

एवंविधे ज्ञानमये सुखात्मके कथंभवो दुःखमयःप्रतीयते ॥
अज्ञानतोऽध्यासवशात्प्रकाशतेज्ञानेविलीयेत विरोधतःक्षणात्॥
॥ ३६ ॥

वृत्तिस्तत्राह । ज्ञानेति । आविर्भूतइतिशेषः । ज्ञानस्याज्ञानविरोधित्वात्तदुत्पत्तिक्षणएवकारणभूताज्ञाननाशात्तत्कार्यसंसारस्यापि वि लयइत्यर्थः । यथारज्जुज्ञाननरज्जौसर्पस्यलयइत्यर्थः ॥ ३६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथाध्यासलक्षणमाह । यदन्य दिति । यदन्यत्सर्पादिकमन्यत्ररज्ज्वादौ भ्रमात् भ्रमजनकाद्दोषाद्विभाव्यते विज्ञायते अमुं विपश्चितो विद्वांसोऽध्यास इत्याहुः । यथाऽसर्पभूते रज्ज्वादौ अहिविभावनं सर्पारोपो रज्ज्वबुद्धिमूलकस्तद्वदीश्वरेऽपि जगद्देहादिसंसारात्मकं सर्वं विभाव्यते आत्मज्ञानाभावाद्यथार्थतया ज्ञायते ॥ ३७ ॥

॥ १९ ॥ यदन्यदन्यत्र विभाव्यते भ्रमादध्यासमित्याहुरमुं विपश्चितः ॥
असर्पभूतेऽहिविभावनं यथा रज्ज्वादिके तद्वदपीश्वरे जगत् ॥ ३७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

आत्मनि जगज्ज्ञानेकीदृशोऽध्यासोनिमित्तंतदाह विकल्पेति सर्वविकल्पकारणमायारहितेवस्तुतस्तत्सङ्गरहितेचिदात्मकेचित्स्वरूपेसर्वकारणेनिरामयेदुःखासंभिन्नानन्दमयेकेवलंसर्वविकारशून्यपरेदृश्यविलक्षणेब्रह्मणिव्यापके आत्मनिप्रथममहङ्कारः कल्पितः सएवाध्यासः ।

विकल्पमायारहितेचिदात्मके ऽहङ्कारएष प्रथमः प्रकल्पितः ॥
अध्यासएवात्मनिसर्वकारणे निरामयेब्रह्मणि केवलेपरे ॥ ३८॥

अहंबुद्ध्यात्मकोऽध्यासएवसर्वसंसारकारणमितिभावः ॥ ३८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बुद्धिनिष्ठएवसंसारोनत्वात्मनिष्ठइत्यत्रान्वयव्यतिरेकौप्रमाणयति । इच्छादीति । परेसर्वसाक्षिणिआत्मनिसंसृतिहेतवःभासमानसंसारकारणं
सदा कालत्रयेऽपिइच्छादिरागादिसुखादिधार्मिकाः इच्छांपक्षेरागद्वेषौसुखदुःखंइत्येवमादिद्वन्द्वधार्मिकाःधियएवधीषुसतीषुसंसारइत्यन्वयमु

इच्छादिरागादिसुखादिधार्मिकाः सदा धियः संसृतिहेतवः परे ॥
यस्मात्प्रसुप्तौतदभावतःपरः सुखस्वरूपेणविभाव्यतेहिनः ॥३९॥

क्त्वातद्व्यतिरेकमाहयस्मात्कारणात्प्रसुप्तौतदभावा तद्धीवृत्त्यभावात् परआत्मानोऽस्माभिःतृतीयार्थेषुषष्ठी । सुखरूपेणस्वस्वरूपमात्रेणाविभा
व्यतेनिश्चीयते नतु संसारित्वेनेतिभावः सुप्तोत्थितस्तुसुखमहमस्वाप्समितिप्रत्यभिज्ञानुभवात्तदात्मस्वरूपनिश्चयोऽस्तीतितात्पर्यम् ॥ ३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ पुनस्तत्त्वं पदार्थस्वरूपमाह । अनादीति । अनादिर्याऽविद्यातत्तउद्भवोयस्या बुद्धेरन्तःकरणस्यतत्रविम्बितःप्रतिबिम्बिताश्चितःप्रकाशः सजीवइतीर्यते आत्मापरमात्माधियः साक्षितयाधीधर्मासङ्गेनैवपृथक्स्थितः । अन्तर्यामितयेत्यर्थः जीवोऽहंसुखीत्यादिप्रकारेणान्तःकर

अनाद्यविद्योद्भवबुद्धिबिम्बितोजीवप्रकाशोऽयमितीर्यते चितः ॥
आत्माधियः साक्षितया पृथक् स्थितो बुद्ध्या परिच्छिन्नपरः
सएव हि ॥ ४० ॥

णधर्माध्यासवानपरमात्मातु साक्षितयासर्वत्रविद्यमानोऽपिनतथेतिभावः । अतएवबुद्ध्यापरिच्छिन्नपरः बुद्धिलक्षणपरिच्छेदरहितःअतएव परः । एवंचज्ञानेनप्रतिबिम्बाधार विलयप्रतिबिम्बस्यविलयात्सजीवः सएवपरमात्मैवहिप्रसिद्धं सइत्यस्यचात्राप्यत्रबोध्या ॥ ४० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ बुद्ध्यात्मनोःपरस्पराध्यासवशात् परस्परधर्मभानमितिदार्ढ्यायपुनराह । चिद्बिम्बेति । चिदात्मचेतसोरन्योन्याध्यासवशात् परस्परतादात्म्यारोपाज्जड.जडत्वंप्रतीयते । चेतसोवृत्तीनांज्ञानत्वं जीवात्मनोजडत्वंप्रतीयते । अतएवज्ञानाश्रयआत्मेति चितएवताकिंकव्यवहारः । जीवात्मनिजडात्मनिजडात्माकथ्यते बुधैरितिस्मार्तव्यवहारश्च । अत्रहेतुः । चिदित्यादि । चिद्बिम्बस्यसाचिदाभासः अ

चिद्बिम्बसाक्ष्यात्मधियांप्रसङ्गतस्त्वेकत्रवासादनलाक्तलोहवत् ॥
अन्योऽन्यमध्यासवशात्प्रतीयते जडाजडत्वंचचिदात्मचेतसोः

॥ ४१ ॥

क्षिःसहितः साक्षःसेन्द्रियः सचासावात्मामनःधीरन्तःकरणंतेषांप्रकृष्टसङ्गादतिसान्निकर्षादध्यासइत्यर्थः । अनलाक्तलोहवत् अग्नितप्तलोहपिण्डवत् अत्रदृष्टान्तः । अग्निधर्मोदाहकत्वं लोहधर्मश्चवर्तुलत्वाद्यनलेभासते । तत्रहेतुरेकत्रवासात् परस्पराविभागेनवृत्तेरित्यर्थः । तद्वदेतयोरपि परस्परधर्माध्यासइत्यर्थः ॥ ४१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमेवार्थं दार्ढ्यायपुनराह । गुरोरिति । वेदवाक्यतइत्यनेन श्रवणंगुरोःसकाशादपि । ततश्चानेनमननमुक्तम् । ताभ्यांसञ्जातोविद्यया ज्ञानरूपस्यात्मनोऽनुभवोयस्यसः । अनेनकृतनिदिध्यासनइत्यर्थः । तं चिदानन्दस्वरूपं स्वात्मानमुपाधिवर्जितं रहितोपाधिधर्ममात्मस्थं

गुरोःसकाशादपिवेदवाक्यतः सञ्जातविद्यानुभवोनिरीक्ष्य तम् । स्वात्मानमात्मस्थमुपाधिवर्जितं त्यजेदशेषं जडमात्मगोचरम् ॥ ४२ ॥

हृत्स्थंनिरीक्ष्य अपरोक्षीकृत्याशेषंजडं दृश्यंत्यजेत् । तत्रोदासीनोभवेदिति भावः ॥ ४२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

ज्ञेयंनिरुपाधिकं स्वरूपंश्लोकद्वयेनाह प्रकाशोति अहंप्रकाशरूपः स्वप्रकाशः परप्रकाशहीनः परप्रकाशरूपोयथाघटादिः अजोजन्मादि हीनः अद्वयःसजातीयद्वितीयरहितः असकृद्विभातः सकृदपिपरेणभासकान्तरेणप्रकाशितः सकृद्विभातः नसकृद्विभातोसकृद्विभातः नत

प्रकाशरूपोऽहमजोऽहमद्वयोऽसकृद्विभातोऽहमतीवनिर्मलः ॥
विशुद्धविज्ञानघनोनिरामयःसम्पूर्णआनन्दमयोऽहमक्रियः॥४३॥

त्रसूर्योभातिनचन्द्रतारकमितिश्रुतः नतद्भासयतेसूर्यइतिस्मृतेश्च अतीवनिर्मलः मायाकृतावरणविक्षेपरहितः विशुद्धविज्ञानघनः विशुद्धचि देकरसः निरामयःकर्तृत्वाभिमानरहितः सम्पूर्णःदेशकालपरिच्छेदहीनः आनन्दमयः आनन्दरूपः स्वार्थेमयट् अक्रियः परिणामहीनः ॥ ४३ ॥

CC-0. In Public Domain. Digitization by eGangotri

सदैवेति अहंसदैवकालत्रयेऽपिमुक्तःसर्वधर्मरहितः अचिन्त्यशक्तिमान यः परमात्मा अतिन्द्रियज्ञानमूइन्द्रियातिरिक्तज्ञानरूपःयतोवाचो निवर्त्तन्ते अप्राप्यमनसासहइतिश्रुतः अविक्रियात्मकोऽपरिणामी अनन्तपारःअन्तःकालतःपारःपरन्तीरन्तावविद्यमानौ यस्य तंनदेश

सदैवमुक्तोऽहमचिन्त्यशक्तिमानतीन्द्रियज्ञानमविक्रियात्मकः॥
अनन्तपारोऽहमहर्निशंबुधैर्विभावितोऽहंहृदिवेदवादिभिः ॥४४॥

कालपरिच्छेदहीनः ईदृशोयःपरमात्माबुधैर्हृदि अहर्निशंविभावितः सोऽहमित्यर्थः ॥ ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंभावनायाःफलमाह एवमिति उक्तरीत्यासदाआत्मानं अखण्डितात्मनाविषयानाकृष्टचित्तेन विचारमाणम्ध्यायतः धातूनामनेकार्थ स॰
त्वात् चरमाणएवचारमाणःस्वार्थेऽण् विशुद्धभावनाब्रह्माकारान्तः करणवृत्तिरुदेतीतिशेषः साक्षादिनाकारकैर्देहान्तरप्रापककर्मभिः स

एवंसदात्मानमखण्डितात्मनाविचारमाणस्यविशुद्धभावना ॥
हन्यादविद्यामचिरेणकारकैरसायनंयद्वदुपासितंरुजः ॥ ४५ ॥

हाविद्यामाचिरेणशीघ्रमेवहन्यात् यथापामितंसेवितंरसायनं रुजोहन्यात्तद्वत् ॥ ४५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तत्रध्यानेइतिकर्तव्यतामाह विविक्तइति निर्जनइत्यर्थः आसीनोयथोचितपद्मासनाद्युपविष्टः उपारतेन्द्रियः तेनशमदमादिसम्पन्नः विनि
र्जितात्माप्राणायामादिभिर्जितान्तःकरणः अतएवविमलान्तराशयोविशुद्धचित्तः विज्ञानदृक्विज्ञानएवदृक्भानंयस्यसः द्रष्टृदृश्यभा

विविक्तआसीनउपारतेन्द्रियोविनिर्जितात्माविमलान्तराशयः॥
विभावयेदेकमनन्यसाधनोविज्ञानदृक्केवलआत्मसंस्थितः॥४६

नरहितः अनेननिर्विकल्पकसमाधिरुक्तः अनन्यसाधनः तत्त्वज्ञानातिरिक्तमुक्तिसाधनास्तित्वभ्रमरहितः केवलोऽसङ्गःआत्मसंस्थितः
आत्मन्येवसंस्थासमाप्तिः सञ्जातायस्यसतेन नकदापिविषयान्तरसञ्चारवांश्चित्तः विभावयेत् ध्यायेत् ॥ ४६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

किंच यदेतत्भूतंभविष्यद्वर्तमानं विश्वंपरमात्मादर्शनंभासकोयस्यतत् तस्यभासासर्वमिदंविभातीति श्रुतेः तत्सर्वकारणेमायासान्निधाना
त्सर्वोपादानत्वेनाभिमतेआत्मनिविलापयेत् उपादानसत्ताव्यतिरेकेणकार्यसत्तांनपश्येत् तादृशस्यलक्षणमाह सम्पूर्णः अवाप्तसमस्तका

विश्वंयदेतत्परमात्मदर्शनं विलापयेदात्मनि सर्वकारणे ॥
पूर्णश्चिदानन्दमयोऽवतिष्ठते न वेद बाह्यं न च किञ्चिदान्तरम् ॥ ४७ ॥

मः तस्यकाम्याभावात् चिदानन्दमयः तद्रूपोऽवतिष्ठते बाह्यमान्तरंच दृश्यंनजानाति सर्वत्रब्रह्मदर्शनादिति भावः ॥ ४७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

समाधिसिद्धेः पूर्वंयत्कर्तव्यंतदाह । पूर्वमिति । समाधेः सकलविषयव्यासङ्गनिवृत्तिपूर्वकं ब्रह्माकारवृत्तिः समाधिस्ततः पूर्वमखिलंस
चराचरंजगत् ओङ्कारमात्रं विचिन्तयेत् । ओङ्कारोमीयतेऽ नयेतिमात्रा प्रमाणं बोधकत्वेन परिच्छेदकोयस्यतथाजानीयात् । तदेवविवृ

पूर्वं समाधे रखिलं विचिन्तये दोङ्कारमात्रं सचराचरं जगत् ॥
तदेव वाच्यं प्रणवो हि वाचको विभाव्यते ज्ञानवशान्न बो-
धतः ॥ ४८ ॥

णोति तदेवेति । जगदेवेत्यर्थः । प्रणवोवाचकोविभाव्यतेएतत्ताहिप्रसिद्ध इत्यर्थः । इयंभावनाज्ञानवशादेवनबोधकः । बोधोनिर्विशेषब्रह्मसा
क्षात्कारस्तद्भुत्तरंनेत्यर्थः । तस्यसर्ववृत्त्युपमर्दकत्वात् ॥ ४८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उक्तमर्थंविवृणोति । अकारेति । अकारसञ्ज्ञस्तद्वाच्यःपुरुषोहिविश्वकोविश्वएवविश्वकः विश्वशब्देनपरिभाषितःअयंजाग्रत्साक्षीविराट् ततःस्वप्नसाक्षीतैजसःतेनपदेनपरिभाषितःलिङ्गदेहाभिमानीहिरण्यगर्भउकारकः उकारप्रतिपाद्यईर्यते । ततः सुषुप्तिसाक्षीप्राज्ञपदवाच्यो

अकारसञ्ज्ञः पुरुषो हि विश्वको ह्युकारकस्तैजसईर्यते क्रमात्
प्राज्ञो मकारः परिपठ्यतेऽखिलैः समाधि पूर्वं न तु तत्त्वतो
भवेत् ॥ ४९ ॥

मायोपाधिकोमकारस्तद्वाच्यः परिपठ्यतेऽखिलैर्वेदैः । इयंभावनासमाधिपूर्वंसमाधेःपूर्वमेव नतत्त्वतः तत्त्वसाक्षात्कारेसतिनभवेत् । सर्वस्यब्रह्मणिप्रविलयात् ॥ ४९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथविलापन प्रकारमाहद्वाभ्याम् । विश्वंत्विति । उकारमध्ये बहुधाव्यवस्थितं स्थूलदेहनिबंधनंस्थूलदेहाभिमानेन स्थितं विश्वम्पुरुषंत-द्वाचकमकारम् च विलापयेत् । तुश्चार्थे । विलीनम्भावयेत् ततस्तैजसंलिङ्गदेहाभिमानिनम् पुरुषं तद्वाचकंप्रणवद्वितीय वर्णमुकारं वि-

विश्वं त्वकारं पुरुषं विलापयेदुकारमध्येबहुधा व्यवस्थितम् ।
ततो मकारे प्रविलाप्य तैजसं द्वितीयवर्णं प्रणवस्य चान्तिमे ॥५०॥

लीनोविश्वकम्मकारे विलाप्याविलीनम्भावयित्वा ॥ ५० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ततस्तादृशंमकारंतद्वाच्यंप्राज्ञंचकारणंकारणत्वाभिमानिनंपुरुषमिहात्मनि चिद्घनेपरे विलापयेत् तथाभावयेत् । ततः सोऽहंमर्वविला
पाधिष्ठानंपरब्रह्माविभावयेत् । तद्विशिनष्टि । सदाविमुक्तिमत् नित्यमुक्तम् । नन्वहंपदार्थस्यरागद्वेषादिमलिनस्यकथं ब्रह्मत्वभावनेत्या

मकारमप्यात्मनि चिद्घने परे विलापयेत्प्राज्ञमपीह कारणम् । सोऽहं परं ब्रह्म सदा विमुक्तिमद्विज्ञानदृङ्मुक्त उपाधितोऽमलः ॥ ५१ ॥

शङ्क्याहंपदार्थंविशिनष्टि । उपाधितोमुक्तः अतएवामलःतथाभावनेसाधनं विज्ञानदृक्विज्ञानं ब्रह्ममात्रप्रत्ययाविच्छेदरूपादृक् निदिध्या
सनं सत्साक्षात्कारेसाधनंयस्यसः ॥ ५१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंभावनावतोलक्षणमाह । एवमिति । उक्तप्रकारेण सदा जातापरमात्मन्येकभावना यस्य सः परिविस्मृतमखिलं पुत्रदेहादि येन सः । अत एव स्वस्वरूपानन्देनैव तुष्टः न तु विषयानन्देन । तस्य पारणमिदुःखरूपत्वात्ततो विरक्त इत्यर्थः । साक्षान्नित्यात्मनि सुखप्रकाशकः साक्षा

एवं सदा जातपरात्मभावनः स्वानन्दतुष्टः परिविस्मृताखिलः ॥
आस्ते स नित्यात्मसुखप्रकाशकः साक्षाद्विमुक्तोऽचलवारिसि
न्धुवत् ॥ ५२ ॥

दौपाधिकनामरूपभेदरहितत्वेन निरस्तमखण्डितमात्मस्वरूपं यत्सुखं प्रकाशश्च तद्रूपः एवंरूपो विमुक्तो जीवन्मुक्तः । अचलं निश्चलं वारि यस्य तादृशसिन्धुवदास्ते । विषयसम्बन्धरूपकल्लोलरहित आस्त इत्यर्थः ॥ ५२ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशस्यमत्प्राप्तिर्भवत्येवेत्याह । एवमिति । उक्तप्रकारेणसदाऽभ्यस्तसमाधेर्योगिनः निवृत्ताःसर्वेषामिन्द्रियाणांगोचराविषयाःशब्दादयो यस्य विनिर्जिताअशेषारिपवःकामादयोयेनतस्य । तज्जयेनविषयेष्वन्तःकरणाप्रवृत्तिः । अतएव सर्वज्ञत्वनित्यत्वनित्यतृप्तत्वबोध

एवं सदाऽभ्यस्तसमाधियोगिनो निवृत्तसर्वेन्द्रियगोचरस्य हि ॥ विनिर्जिताशेषरिपोरहंसदा दृश्यो भवेयं जितषड्गुणात्मनः ॥५३ ॥

रूपत्वस्वतन्त्रत्वनियमलुप्तत्वानन्तरूपाषड्गुणायस्यताद्दशआत्माजितो वशीकृतोयेनतस्य सदादृश्योभवेयम् । एतेनमद्भक्तस्ययोगिनो ऽहंदृश्योनतुभक्तिविमुखस्येति सूचितम् ॥ ५३ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंविधोजीवन्मुक्तःप्रारब्धवशेन अनभिमानोभोगानश्नँस्तिष्ठेत् ततोमय्येवविलीयते मद्रूपोभवतीत्याह । ध्यात्वैवमिति ॥ ५४ ।

ध्यात्वैवमात्मानमहर्निशं मुनिस्तिष्ठेत्सदा मुक्तसमस्तबन्धनः ॥
प्रारब्धमश्नन्नभिमानवर्जितो मय्येवसाक्षात्प्रविलीयते ततः ५४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वधर्मापेक्षयाऽयमेवधर्मोज्यायानित्याह । आदाविति । भवसंसारमादिमध्यावसानेषुभयशोकयोः कारणंविदित्वातत्कारणीभूतंविधिवादयंजेतत्याद्विधिवादतंविधितंसमस्तंकममार्गकाम्यंहित्वा अखिलात्मनांजीवानांस्वरूपभूतंमामात्मानं परमेश्वरंभजेत् । य

आदौ च मध्ये च तथैव चान्ततो भवं विदित्वा भयशोक कारणम् ॥ हित्वा समस्तं विधिवादचोदितं भजेत्स्वमात्मान मथाखिलात्मनाम् ॥ ५५ ॥

थाधनस्य.जनेनादौदुःखंमध्येपालनकृतं तत्र राजादिकृतं भयमन्तेनाशेशोकपर्यवसानायदुःखमेवं पदार्थमात्रंद्रष्टव्यम् ॥ ५५ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मय्यभेदभावनया नामरूपाविभागेन तद्रूप एवभवतीत्यमुमर्थं सदृष्टान्तमाह । आत्मनीति । आत्मनिसर्वाधिष्ठानेमयिइदंस्वस्वरूपं जीवमभेदेनविभावयन्यदा । तिष्ठतीतिशेषः । तदामयात्मनापरमेश्वरेणाऽभेदेनभवति अभिन्नोभवति । तत्रदृष्टान्तः यथासमुद्रेप्रविष्टं नद्यादि

आत्मन्यभेदेन विभावयन्निदं भवत्यभेदेन मयाऽत्मनातदा ॥
यथाजलं वारिनिधौ यथापयः क्षीरेवियद्व्योम्न्यऽनिले यथाऽनिलः ॥ ५६ ॥

जलंसमुद्रएव यथाक्षीरेगवादिक्षीरेप्रक्षिप्तंपयःक्षीरमेव यथाव्योम्निमहाकाशेघटाद्यवच्छिन्नाकाशोघटादिभङ्गे च यथाचर्मभस्त्रिकाद्यवच्छिन्नोवायुरनिलेमहावायौ नामरूपाविभागेनैकीभवतीत्यर्थः ॥ ५६ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवमात्मतत्त्वज्ञस्य जगत्ससत्त्वभ्रमःस्वतएवापैतीत्याह । इत्थमिति । हिरण्यर्थे । लोकसंस्थितोऽपिजीवन्मुक्तिदशायांप्रारब्धवशाल्लोकव्यवहारंकुर्वन्नपिजगन्मृषैवेतिविभावयन्सन् यदियदा इत्थमीक्षते ऐकात्म्यं जानीयात्तदा निवृत्तजगत्सत्यत्वभ्रमो भवतीति शेषः। तत्र हेतुः श्रुतियुक्तिमानतोनिराकृतत्वात् । अतोऽन्यदार्तमित्यादिश्रुतिरूपात् जगन्मिथ्यादृश्यत्वात् शुक्तिरजतवदितितदुपबृंहितानुमानरूपात्मानतःप्रमाणतोनिराकृतत्वात् तत्रदृष्टान्तोयथेन्दुभेदः एकचन्द्रेद्विचन्द्रत्वभ्रमस्तदेकत्वज्ञानेननिवर्तते यथाच दिशिप्राच्यादौअन्यदिक्त्वभ्रमः सोऽपितत्त्वज्ञानान्निवर्तते । एवंभ्रमतःपुरुषस्य दिक्षुभ्रमणाद्भ्रमोनिकटवर्तिवृक्षादौच भ्रमणभ्रमस्तत्स्थैर्यज्ञानेन निवर्तते तद्वत् ॥ ९७ ॥

इत्थं यदीक्षेत हि लोकसंस्थितो जगन्मृषैवेतिविभावयन्मुनिः॥ निराकृतत्वाच्छ्रुतियुक्तिमानतो यथेन्दुभेदो दिशि दिग्भ्रमादयः ॥ ९७ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ईदृशज्ञानेमदाराधनमेवोपायइत्याह । यावदिति । अखिलं जगन्मदात्मकंमदधिष्ठानकंमाद्विवर्तंभूतंयावन्नपश्येत्तावन्मत्प्राप्तयेश्रद्धालुः भगवदाराधनमेवज्ञानप्रापकमित्यत्र दृढविश्वासवान् अतिशयेनोर्जितावृद्धिमतीभक्तिर्मयिभगवतिपूज्यताबुद्धिरूपालक्षणं चिह्नंयस्यसः ।

यावन्नपश्येदखिलं मदात्मकं तावन्मदाराधनतत्परो भवेत् ॥
श्रद्धालुरत्यूर्जित भक्तिलक्षणो यस्तस्य दृश्यो ऽहमहर्निशं
हृदि ॥ ५८ ॥

तावन्मदाराधननिष्ठोभवेत् एवंहितस्यहृदि अहमहर्निशंदृश्योभवा मियेयथामांप्रपद्यन्ते तांस्तथैवभजाम्यहमितिस्मृतेः ॥ ५८ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वोक्तवचनजातस्य श्रुतिसमत्वं कथमेतदालोचनमपिमदाराधनप्रतिबन्धकदुरितध्वंसोपायइत्याह रहस्यमिति । श्रुतिसारसङ्ग्रहत्वेनाति

रहस्यमेतच्छ्रुतिसारसङ्ग्रहं मया विनिश्चित्य तवोदितं प्रिय ॥
यस्त्वेतदालोचयतीहबुद्धिमान् स मुच्यते पातकराशिभिः
क्षणात् ॥ ५९ ॥

गोपनीयता अप्रमाणशङ्काकलङ्कराहित्यंसूचितम् । आलोचयतिसम्यग्विचारयति ॥ ५९ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अथ भगवानुक्तमेवार्थंसङ्क्षेपेण दार्ढ्यायपुनराह भ्रातरिति । यदीतियादित्यर्थे । यदीदंजगत् परिदृश्यते तत्सर्वंमायैवेतिज्ञात्वेति शेषः चेतसासर्वंपरिहृत्यतत्रौदासीन्यंकृत्वामद्भावनयामदैक्यभावनया भावितंशुद्धंमानसंयस्यताद्दशास्तिष्ठ । इत्युपदिश्याशिषंप्राह निरामयः

भ्रातर्यदीदं परिदृश्यते जगन्मायैव सर्वं परिहृत्य चेतसा ॥ मद्भावनाभावितशुद्धमानसः सुखी भवाऽऽनन्दमयो निरामयः ६०

सन्सुखीभव । सर्वदुःखनिवृत्त्येति भावः । ततोऽन्तरङ्गामन्यामाशिषमाह आनन्दमयोभवेति तद्रूपोभवेत्यर्थः । यद्यपिपूर्वमानन्दरूपत्वमस्त्येवतथाऽपितत्प्राप्तिर्विस्मृतकंठस्थभूषणप्राप्तिवत ॥ ६० ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

एवंरीत्यास्वोपासकस्यलोकपावनत्वमाह। यइति । कदावा यदाकदाचिदित्यर्थः । हृदानिर्मलेनान्तःकरणेन यो मामगुणं प्राकृतसत्त्व रजस्तमोरूपगुणरहितम् । सच्चिदानन्दरूपत्वात् । अतएवगुणादव्याकृतात्परंमायातीतम् । यदिवायद्वत्त्वर्थे । गुणात्मकं सर्वज्ञत्वादिलोकोत्तरलावण्यादिगुणवानात्मासूर्तिर्यस्यतं दृश्यमानं रूपं सेवते । साद्विविधोऽप्युपासकःअहं मत्स्वरूपएव । मामकइत्यर्थोवा । भि-

यः सेवते मामगुणं गुणात्परं हृदा कदा वा यदि वा गुणात्मकम् ॥ सोऽहंस्वपादाञ्चितरेणुभिः स्पृशन्पुनाति लोकान्त्रितयं यथा रविः ॥ ६१ ॥

योऽङ्ग्ज्ञानिनोऽत्यर्थमहंमचममप्रिय इत्युक्तेः । तादृशोभक्तःस्वपादलग्नरेणुभिःसंस्पृशन्लोकत्रयमपि पुनाति । अज्ञानध्वान्तनिरसने नपवित्रीकरोति । यथारविःस्वकरैर्जगद्वितिमिरीकरोति तद्वत् ॥ ६१ ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इदानीमेतद्ग्रन्थार्थालोचनासमर्थस्यपाठमात्रतोऽपिमहत्फलमाह । विज्ञानंविज्ञानजनकं करणव्युत्पत्त्येतिबोध्यम् । वेदान्तैरुपनिषद्वाक्यैर्वेद्यंचरणंजगज्जन्मादिलक्षणंकर्मयस्यतेन ननुपाठमात्रादेताद्दशमहत्फलप्राप्तिःकथमित्याशङ्क्यभवत्येवेति सूचयंस्तत्रहेतुमाह । मद्वचने

विज्ञानमेतदखिलंश्रुतिसारमेकं वेदान्तवेद्यचरणेनमयैवगीतम् ।
यःश्रद्धया परिपठेद्गुरुभक्तियुक्तो मद्रूपमेतियदि मद्वचनेषुभक्तिः
॥ ६२ ॥ इतिश्री अध्यात्मरामायणे रामगीता समाप्ता ॥

इति श्रीमदध्यात्मरामायणे उमामहेश्वरसम्वादे उत्तरकाण्डे श्रीरामगीतायां पञ्चमःसर्गः ॥ ५ ॥

षुभक्तिर्विश्वासोयदीतिअर्थाद्गुरुवाक्यविश्वासस्यैव फलदायकत्वादितिभावः ॥६२॥ इत्यध्यात्मरामायणेउमामहेश्वरसम्वादे उत्तरकाण्डेसेतौपञ्चमःसर्गः ॥ ६२ ॥ श्रीरामचन्द्रार्पणमस्तु ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीराममन्त्रःखलु तारकाख्यः संसारसन्तारणसुप्रसिद्धः ॥ भक्-
त्याऽप्यभक्त्या समुपासितोयः श्रेयांसि सर्वाणि ददात्यवश्य
म् ॥ १ ॥ तन्तारकंसम्प्रतिपादयन्ती श्रीरामगीता सकलैः सुसे
व्या ॥ विज्ञप्तिमित्थंजनको विनीतः समर्पयत्यार्यजनेषुहर्षात् २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प,	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति	अशुद्ध	शुद्ध	प.	पृ.	पङ्क्ति
स्पर्द्धि	स्पर्द्धि	१	२	१	शाघि	शाधि	३	२	६	नाशे	नाशो	६	१	१
जींव्य	जीव्य	१	२	३	व्यत्र	व्यत्र	४	१	१	नन्वितिश	नन्वितिशे	६	२	१
सम्बीन्धनीः	सम्बन्धिनीः	२	२	१	ष्टामे	ष्टानमे	४	२	३	त्रिदा	त्रिदा	६	२	२
व्रह्म	व्रह्म	२	१	२	व्रह्म	व्रह्म	४	२	१	मेत्रे	मेव	६	२	२
व्रह्म	व्रह्म	२	१	६	वलेन	वलेन	४	२	७	व्येतीत	व्यतेति	७	१	१
वोधोऽसि	वोधोऽसि	३	१	४	निघृत्ते	निवृत्ते	९	१	१	वीरहा	वींरहा	७	१	१
संवन्ध	सम्वन्ध	३	१	७	कत्व	कत्वा	९	१	१	सद्दष्ट	सद्दृष्ट	८	१	३
भवस्यंससार	भवस्यसंसार	३	२	१	नक	नैक	५	१	१	विशुद्धं	विशुद्ध	८	२	१
न्सार	सार	३	२	२	बेदान्त	वेदान्त	५	१	१	कारांतः	कारान्तः	८	२	२
पर्वग	पवर्ग	३	२	२	पूर्व्वे	पूर्व्वे	५	१	२	वृंत्ति	वृत्ति	९	१	१
वारिधि	वारिधि	३	२	२	वुद्ध्या	वुद्ध्या	५	१	६	स्वत्राना	स्वना	९	२	१
					एवं	एव	९	१	६	वृत्यु	वृत्यु	१०	१	२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
रीप	रपि	११	२	१
नर्दष्टा	र्नदष्टा	१२	१	४
र्वाद्धे	र्वाद्धे	१२	१	७
त्याभिः	त्माभिः	१२	२	६
शुद्द	शुद्ध	१३	१	१
जीवया	जीवयो	१३	१	२
निर्वांध	निर्बाध	१४	१	१०
भव	भव	१५	१	४
अर्जोद्रु	अर्जोऽद्रु	१६	२	६
द्द त्	द्वात्	१७	२	१

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
ह्लाभ	ह्लाभे	१८	१	८
इतिः	इति	१८	२	२
ज्ञानन	ज्ञानेन	१९	१	१
वुद्दया	वुद्धया	२०	१	५
रागादि	रागादि	२१	१	३
विलय	विलय	२१	१	७
धम	धर्म	२१	२	१
म्वस्य	म्वंयस्य	२१	२	२
वुत्रै	वुधै	२३	१	५
एव	एवं	२३	२	१
द्रष्ट	द्रष्टृ	२४	१	२

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
विभाव्यत	विभाव्यते	२५	१	४ मु
लिङ्गेद	लिङ्गदे	२६	१	२
वोधकः	वोधतः	२५	१	६
विज्ञानं ब्रह्म	विज्ञानंनिादि ध्यासनं ब्रह्म	२६	२६	३
भेदेरा	भेदरा	२७	१	६
रुपा	रूपाः	२७	२	६
आत्म	अत्मा	२७	२	६
म्रुनिति	म्रुनिास्ति	२८	१	२
भव	भवं	२८	२	१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति	अशुद्ध	शुद्ध	प	पृ	पङ्क्ति
तदकत्व	तदेकत्व	२९	२	७	वतथाऽ	वतथाऽ	३१	१	१	मद्वचने	मद्वचने	३२	१	२
भ्रमण	भ्रमणं	२९	२	८	कंठ	कण्ठ	३१	१	२	तन्तारकं	तत्तारकं	३२	२	३

नेपाल पाशुपत, यन्त्रालये मुद्रिता.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

इती रामगीता सटीका समाप्ता ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu